PURCHASED

THE

KASHI SANSKRIT SERIES

235

*****

CATURVARGACINTĀMAṆI

OF

ŚRĪ HEMAḌRI

Volume II

VRATAKHAṆḌA

PART II

EDITED BY

PAṆḌITA BHARATACANDRA ŚIROMAṆI

PAṆḌITA YAJÑEŚVARA SMṚTIRATNA

and

PAṆḌITA KĀMĀKHYĀNĀTHA TARKAVĀGĪŚA

CHAUKHAMBHA SANSKRIT SANSTHAN

Publishers and Distributors of Oriental Cultural Literature

P. O. Chaukhambha, Post Box No. 1139

Jadau Bhawan, K. 37/116, Gopal Mandir Lane

VARANASI (INDIA)

© Chaukhambha Sanskrit Sansthan, Varanasi

Phone : 65889

Price Rs. 2500-00 for the set of four volumes in seven parts

Rs. 1000-00 for Volume II (Vratakhaṇḍa, Part 1-2)

THE ASIATIC SOCIETY
CALCUTTA 700016
Acc No S 507
Date

S
294.592
H 487
v.2, pt.2

Originally Published by The Asiatic Society of Bengal in 1879

Reprinted 1985

COMPUTERISED
C 1034

Also can be had of

CHAUKHAMBHA VISVABHARATI

Post.Box No. 1084

Chowk (Opposite Chitra Cinema)

VARANASI-221001

Phone : 65444

Printers-Srigokul Mudranalaya, Gopal Mandir Lane, Varanasi
and Globe Offset Press, New Delhi

॥ श्रीः ॥

काशी संस्कृत ग्रन्थमाला
२३५

चतुर्वर्गचिन्तामणिः

श्रीहेमाद्रिविरचितः

तत्र

व्रतखण्डनाम्नो

द्वितीयखण्डस्य

द्वितीयो भागः

श्रीभरतचन्द्रशिरोमणिना
श्रीयज्ञेश्वरस्मृतिरत्नेन
श्रीकामाख्यानाथतर्कवागीशेन
च
परिशोधितः

चौखम्भा संस्कृत संस्थान
भारतीय सांस्कृतिक साहित्य के प्रकाशक तथा वितरक
पो० आ० चौखम्भा, पो० बा० नं० ११३९
जड़ाव भवन, के. ३७/११६, गोपाल मन्दिर लेन
वाराणसी (भारत)

प्रकाशक : चौखम्भा संस्कृत संस्थान, वाराणसी

मूल्य : रु० २५००-०० संपूर्ण १-४ खण्ड, ७ भाग

रु० १०००-०० द्वितीयखण्ड (व्रतखण्ड, भाग १-२)

मूल रूप से आसियाटिक् सोसायिटि आफ बंगाल द्वारा प्रकाशित, १८७९

पुनर्मुद्रण १९८५

अन्य प्राप्तिस्थान

चौखम्भा विश्वभारती

पोस्ट बाक्स नं० १०८४

चौक (चित्रा सिनेमा के सामने)

वाराणसी-२२१००१ (भारत)

फोन : ६५४४४

मुद्रक श्रीगोकुलमुद्रणालय, गोपाल मंदिर लेन, वाराणसी एवं
ग्लोब आफसेट प्रेस, नई-दिल्ली

सूचीपत्रम् ।

	पृष्ठा
अ	
अग्न्यापत्प्रतिविधिः	९५६
अग्निवैकल्ये	१०८
अनङ्गत्रयोदशीव्रत (कालोत्तरोक्त)	८
अनङ्गत्रयोदशीव्रतं (भविष्योत्तरोक्त)	१
अनन्तचतुर्दशीव्रत	२६
अनन्तव्रत (विष्णुधर्मोत्तरोक्त)	६६०
अनन्तव्रतोद्यापनविधि	९६
अनङ्गकव्रत	८६९
अनशन विधि	९४८
अमावस्याव्रतं (कूर्मपुराणोक्त)	२५७
अमावस्याव्रतानि	२४६
अर्कव्रत	५०९
अवार्ष्टिकृतोपशमनं	१०८९
अर्द्धश्रावणिकाव्रत	७४३
अर्द्धोदयव्रतं	२४६
अरुन्धतीव्रत	३१२
अशोकत्रिरात्रव्रत	२०९
अशोकपूर्णिमाव्रत	१६२
अश्वव्रत	९११
अश्वशान्ति	१०३१
अश्विनीस्नान	५९७
अविघ्नपुत्रव्रत	६५४
अविरामाव्रतं	८६५
आ	
आज्ञामकाम्यव्रतं	७३८
आदित्यव्रतं (भविष्यपुराणोक्त)	५२१
आदित्यव्रत (भविष्योत्तरोक्त)	५२०
आदित्यशयनव्रत	६८०
आदित्यशान्तिव्रत	५१२
आदित्यहृदयविधि	५२६
आदित्याभिमुखविधि	५२५
आनन्दव्रत	८४०
आन्दोलनविधि	७४५
आयुधव्रत	८३१
आम्रव्रत	२२७
आमुक्ताभरणव्रतं	७३७
आरोग्यव्रत	७६१
आशादित्यव्रत	५१२
आश्विनव्रतानि	७५५
आषाढव्रतानि	७५१
इ	
इन्द्रपौर्णमासीव्रत	१८९

सूचीपत्रम्।

		पृष्ठा
इन्द्रव्रतं	...	८८७
ई		
ईश्वरव्रत	...	१४८
उ		
उपस्करवैकल्योपशम		१०८९
उमामहेश्वरव्रतप्रकार	...	८९१
उमामहेश्वरव्रतं देवीपुराणोक्तं		८९१
ऋ		
ऋतुव्रतानि	...	८५८
ए		
एकभक्तव्रत	...	७४८
एकभक्तव्रतं विष्णुधर्मोत्तरोक्तं		८६३
औ		
औत्पातिकं		१०७८
क		
कदलीव्रतं	...	१२४
करकव्रत	...	७१८
करकव्रतानि	...	७१८
करिव्रतं	...	९११
कल्पवृक्षव्रतं	...	९१०
काञ्चनपुरीव्रत	..	८६८
कामत्रयोदशीव्रत	...	२५
कामदेवव्रतं	...	१८
कामधेनुव्रतं	...	३४४
कामव्रत	...	७५
कामावाप्तिव्रतं	...	१५५
कारीषाग्निसाधन	...	९६०
कार्त्तिकमासव्रतं	...	७७२

		पृष्ठा
कार्त्तिकव्रतानि	...	७६२
कालविरात्रिव्रतं	...	३२६
कौशिव्रत	...	८६३
कृच्छ्रव्रतानि	...	७६९
कृत्तिकाव्रत	...	१७९
कृत्तिकास्नान	...	५९७
कृष्णचतुर्दशीव्रतं	.	६५
कृष्णचतुर्दशीव्रत ([illegible]मपुराणोक्तं)		१५६
कृष्णचतुर्दशीव्रतं (शिवधर्मोक्तं)		१५५
कृष्णचतुर्दशीव्रतं (सौरपुराणोक्तं)		१५६
कोकिलाव्रत	...	७५५
कौमुदीमहोत्सवः	..	२५०
कौमुदीव्रत	..	७६०
क्षमाव्रतं	..	१५४
ग		
गजनीराजनविधिः	..	२२६
गजपूजाविधि	..	२२१
गजशान्ति	..	१०३६
गन्धव्रत	...	२४१
गलन्तिकाव्रत	..	८६१
गायत्रीव्रतं	...	६२
गुणावाप्तिव्रत	...	४९९
गुरुव्रतं	...	५७९
गोत्रिरात्रव्रतकथा	...	२९२
गोत्रिरात्रव्रतं (भविष्योत्तरोक्तं)		३२३
गोत्रिरात्रव्रतं (स्कन्दपुराणोक्तं)		२८८
गोपदत्रिरात्रव्रत	...	३२२
गोयुग्मव्रत	...	६९४

	पत्रा
क्षीरव्रतं ...	६९५
गोयाग्निः ...	१०२७
घृतनिष्कर्षयामपावाम्रकोर्णम्	५९०
घ	
घटिकाभिषेकः ..	१०१५
घृतभाजनव्रत ..	२५०
घृतस्नपनविधि ..	६११
घृताविष्कवविधि ...	८९२
च	
चण्डिकाव्रत ..	४१०
चतुर्दशीजागरणव्रत ..	१४९
चतुर्दशीव्रतं ...	१५६
चतुर्दशीव्रतानि ..	२६
चतुर्दशीव्रत(भविष्योत्तरोक्त)	१२२
चतुर्दश्यष्टमीनक्तव्रत ..	१५८
चतुर्मासीव्रतानि	८००
चतुर्थव्रतं .	४००
चन्द्रव्रतचक्राणि .	५५८
चन्द्रव्रत	२४४
चन्द्रव्रत पद्मपुराणोक्त ..	८८४
चन्द्रव्रतं विष्णुधर्मोत्तरोक्त	३५६
चन्द्रार्कोपरागव्रत	१७५
चन्द्रसूर्योपरागस्नानम् ...	१०२१
चान्द्रायणव्रतं	९८७
ज	
जन्मराशिशान्ति .	१०८७
जयपौर्णमासीव्रतं	१६०
जयव्रत (विष्णुधर्मोत्तरोक्त)	१५५
जयविधि ..	५२४
जयावाप्तिव्रतं ..	७६
ज्ञानविराविव्रत ...	३१०
ज्ञानावाप्तिव्रत .	७४९
ज्योत्स्नाव्रतानि ...	७५०
ज्येष्ठाव्रत	६२०
त	
ताम्बूलसंक्रान्तिव्रतं ..	७४०
तिथिनक्षत्रवारव्रतानि ...	५८८
तिथिनक्षत्रपञ्चकं ...	९८७
तोयव्रत ..	६१०
तेज संक्रान्तिव्रत .	७३४
त्रयोदशीव्रतानि .	१
त्रयोदशीव्रत	१९
त्रिपुरमदनव्रतं ..	५२५
त्रिविक्रमत्रिरात्रिव्रत ..	३१८
त्रिविक्रमव्रत	८५४
त्रिविक्रमव्रतं (भो० पुराणोक्त)	८५६
त्र्यम्बकव्रत ...	१४७
द	
दमनोत्पत्तिपर्वाणि	१०३४
दमनकपञ्चाशिभि ..	४५३
दशादित्यव्रत .	५५०
दिवाकरव्रत .	५१८

सूचीपत्रम्

	पृष्ठा
दीपदानविधि ..	४७५
दीपव्रत ..	४९२
दीप्तिव्रतं ...	८६६
दुर्गन्धदौर्भाग्यनाशनत्रयोदशीव्रतं	१४
दूर्वात्रिरात्रव्रत .	३१५
देवव्रत पद्मपुराणोक्त	८६२
देवव्रत	६४
देवमूर्त्तिव्रत	५०४
देवशयनोत्थानविधि	८८०
देवीव्रत ...	२०९
देवीव्रत देवीपुराणोक्त	७७५
देवीव्रत भविष्योत्तरोक्त ..	८८३
देवीव्रत देवीपुराणोक्त ..	९१५
द्वितीयाभद्राव्रतं ..	७७४
द्वीपव्रत	४८५

ध

धनसङ्क्रान्तिव्रत	७३६
धनावाप्तिव्रतं विष्णुधर्मोत्तरोक्त	१५५
धनावाप्तिव्रत	५०१
धनावाप्तिव्रत विष्णुधर्मोक्त	७५९
धराव्रत ..	९२२
धान्यसङ्क्रान्तिव्रत ...	७३०
धामत्रिरात्रव्रत ..	३२१
धाराव्रत ...	८५३
धृतिव्रत	५८९
ध्वजव्रत ...	८०९

न

	पृष्ठा
नक्षत्रपुरुषव्रत	६९९
नक्षत्रपूजाविधि ...	५९४
नक्षत्रव्रतानि .	५९३
नक्षत्रहोमविधि ..	६८५
नक्षत्रार्थव्रत	६९६
नदीव्रत ...	४६२
नन्दव्रत ..	१८
नन्दादिविधि	५७२
नन्दादिव्रतविधि ...	५२७
नन्दाविधि	५२३
नन्दाव्रत .	८३२
नवनक्षत्रशान्ति .	६८८
नवम्याद्युपवासव्रत	५०९
नवपाणिमाव्रत	१६६
नरसिंहचतुर्दशीव्रत	४१
नरसिंहत्रयोदशीव्रत	१४
नानातिथिव्रतानि	२५८
नानाफलपूर्णिमाव्रत ...	२४३
नानामासव्रतानि ..	८००
निकुम्भपूजा ...	२४१
नीराजनविधि ...	६७५

प

पञ्चघटपूर्णिमाव्रत ...	१९५
पञ्चमूर्त्तिव्रत ..	२६८
पञ्चव्रत ..	८६४
पयोव्रत ..	७५४

	पृष्ठा
पक्षनक्षत्रव्रत ..	९०५
पक्षभ्रमाशनव्रतं ..	९०६
पवित्रारोहणविधि ...	४२०
पातालव्रत	५०६
पापव्रत ..	३८१
पादोदकस्नान	६५०
पापमोचनव्रत ..	३८६
पापसंक्रान्तिव्रत ...	७२८
पालीव्रतद्वादशीव्रत ..	२१०
पाशुपतव्रत ..	२५५
पाशुपतव्रत वायुसंहितोक्त	९१२
पाशुपतव्रत (मत्स्यपुराणोक्त)	[illegible]
पितृव्रत	२४३
पितृव्रत (भविष्यपुराणोक्त)	९४४
पितृव्रत (विष्णुपुराणोक्त)	९५५
पितृव्रत (विष्णुधर्मोत्तरोक्त)	१०१
पुत्रकामव्रत ..	१५१
पुत्रदाविधि ..	५२४
पुत्रव्रत ..	८८३
पुत्रप्राप्तिव्रत	[illegible]
पुत्रोत्पत्तिव्रत ..	६४४
पुराणश्रवणविधि ...	८८०
पूर्णिमाव्रत विष्णुधर्मोत्तरोक्त	९४३
पूर्णिमाव्रत ब्रह्मपुराणोक्त ...	९४४
पौर्णमासीव्रतानि	[illegible]
पौषव्रतानि ...	८८२
प्रकीर्णकव्रतानि ...	८६८

	पृष्ठा
प्रतिमाव्रत ...	५९
प्रदीपविधि	७६२
प्रदोषव्रतं ...	१९
प्रभाव्रत ...	८१४
प्रमथसंकल्प .	१०८६
प्राजापत्यव्रत	८०३
प्राप्तिव्रत	८६६
फ	
फलव्रतं ..	८१९
फलसंक्रान्तिव्रत ...	७८३
फाल्गुणविधि ..	७८८
फाल्गुणव्रतानि ..	७८०
ब	
बन्ध्याभिषेकविधान ...	१०२७
बाणिज्यलाभव्रत	६४८
बुधव्रत ...	५०८
बृहत्पापप्रशमन ...	१०८१
ब्रह्मकृच्छ्रव्रत	८३१
ब्रह्मकूर्चव्रत विष्णुधर्मोत्तरोक्त	[illegible]
ब्रह्मगायत्रीचान्द्रायणव्रत	८८४
ब्रह्मप्राप्तिव्रत .	५००
ब्रह्मव्रत ..	८५५
ब्रह्मसावित्रीव्रत ..	२१८
ब्राह्मण्यावाप्तिव्रत	२४१
भ	
भद्रचतुष्टयव्रत .	७०३
भद्राविधि	५३३
भवानीव्रत	६००
भाद्रपदव्रतानि ..	७१८

सूचीपत्रम् ।

	पृष्ठा
भीमव्रतं	८८७
भीष्मपञ्चकव्रतं	३११
भूभाजनव्रतं ..	८६७
भूतमातृउत्सवः ..	३९५
भूमिव्रतं ..	६२
भृगुपतनविधिः ...	९६१
भौमसंक्रान्तिव्रतं ...	७१२
भौमावास्याव्रतं	७५१
भौमवारव्रतं ...	५६७
भौमव्रतं ...	५६७
भौमव्रत (पद्मपुराणोक्त) .	५६८
म	
मङ्गलव्रतोद्यापन ...	५७४
मङ्गलाव्रतं	१३२
मदनमहोत्सव ...	२१
मनोरथपूर्णिमाव्रत ...	१३३
मनोरथसंक्रान्तिव्रतं ...	७५१
महातपोव्रतानि ..	९१७
महापौर्णमासीव्रत ...	१९१
महाप्रस्थानं ..	९५४
महाफलव्रत ..	३९२
महाराजव्रत ..	१३९
महालक्ष्मीव्रत ..	४९१
महाव्रत ...	३७७
महाव्रत (लिङ्गपुराणोक्त)..	३९८
महाव्रतं (विष्णुधर्मोत्तरोक्तं)	४६१
महाशान्तिः ..	५८०
महाशान्तिः (भविष्यपुराणोक्ता	१०७१
महेश्वरव्रतं	१५२
महेश्वरस्नानं ..	१००९
महोत्सवव्रतं ...	१४८
माघमासव्रतानि ...	७८९
माघस्नानविधिः ...	७९०
मार्गशीर्षव्रतानि ..	७८४
मासमविधाराव्रतं ...	८२५
मासव्रत ...	८५२
मासव्रतानि ...	७४४
मासोपवासव्रतं ...	७७६
मुखव्रत ...	८६५
मूलशान्तिः ...	६४५
मूलस्नान ..	६४४
मृगपक्षिवैकल्योपशमनं .	१०८
मौनव्रतम् ...	४८१
मौनव्रतोद्यापनम् ..	४९१
य	
यमलजननशान्तिः ..	१०१३
यमव्रत ...	१५१
यमव्रतं (महाभारतोक्तं)	३७७
यमव्रत (विष्णुधर्मोत्तरोक्त)	१५३
यमादर्शनत्रयोदशीव्रत ..	९
युगावतारव्रत ...	५१८
युगादिविधिः ...	५१७
युगादिव्रत ..	५१५
योगव्रत ..	७०७
योगव्रतानि	७०७

पृष्ठा

र

रथावमपौर्णमासीव्रत ... १९०
रथयात्रोत्सव. देवीपुराणोक्तः ४१०
रथयात्रोत्सवः .. ४१४
रम्भात्रिरात्रव्रतं २८३
रविव्रतं ... ७९५
राज्ञिव्रतं २३८
रुद्रव्रतं .. ८६६
रुद्रव्रतं (पद्मपुराणोक्तं) ३९४
रुद्रस्नानम् ... १०१२
रूपसत्रव्रतं ... ६७१
रूपसंक्रान्तिव्रतं ... ७१४
रूपावाप्तिव्रतं .. ७४४
रोमहरविधिः ... ५२६
रोहिणीव्रतं .. ५९८
रोहिणीस्नानं .. ५९९

ल

लक्ष्मीनारायणव्रत ... १६४
ललिताव्रतं .. ५१०
लावण्यावाप्तिव्रतं ... ७८५
लोकव्रतं ... ४६३

व

वटसावित्रीव्रतं ... १४७
वरव्रतं ... ८८६
वरुणव्रतं पद्मपुराणोक्तं .. ९०५
वरुणव्रत ... १३६
वर्द्धापनविधि ... ८८९

पृष्ठा

वसुव्रतं . ८८५
वत्सत्रिरात्रव्रतं ... २११
वह्निव्रतं ... २४५
वायुव्रतं .. १४२
वारव्रतानि .. ४२०
वारिव्रतं ८५७
विद्यावाप्तिव्रतं .. ७९६
विनायकस्नपनं ... १००१
विरूपाक्षव्रतं .. १४३
विल्वत्रिरात्रव्रतं .. १०८
विशोकसंक्रान्तिव्रतं ... ७४२
विष्टिव्रतं ७१९
विष्णुदेवकीव्रत .. ८३६
विष्णुपदव्रत .. ६६५
विष्णुव्रतं ... ४५८
वृक्षाकन्यार्चविधिः .. ९०९
वृषव्रतं .. २४२
वृषोत्सर्गः .. ९८३
वृहद्विल्वनिमज्जनं .. १०८४
वेदव्रतं .. ८६७
वेश्याव्रतं .. ५४१
वेश्याव्रतानि .. ७४८
वैशाखीकार्त्तिकीमाघीविधिः १६६
वैश्वानरव्रतं ८६०
वैष्णवव्रतं ... ८१८
व्यतीपातव्रतं नारदीयपुराणोक्तं ७०८
व्यतीपातव्रतं .. ७१३
व्योमव्रतं ... ८९१

सूचीपत्रम् ।

	पृष्ठा
श	
शक्रध्वजोच्छ्रायविधि	४०१
शक्रव्रतं ...	२२७
शक्तिव्रतं	८६४
शङ्करनारायणव्रतं	६६३
शतभिषास्नान	६५२
शक्रनाशनव्रतं	५८७
शनिव्रतं	५८०
शनैश्चरादिशान्ति	५८७
शङ्खव्रत	८६७
शान्तिकपौष्टिकानि	१००३
शाम्बरायणीव्रतं	६५९
शिवचतुर्दशीव्रत	५८
शिवनक्तव्रतं	३९८
शिवरथव्रतं	८५९
शिवरात्रिव्रतं ...	१२६
शिवरात्रिव्रतमाहात्म्य	९२
शिवरात्रिव्रतं स्कन्दपुराणोक्त	७१
शिवलिङ्गव्रत	८८७
शिवव्रत	३४२
शिवयोगयुक्त शिवरात्रिव्रतमाहात्म्य	५८७
शिवव्रत कालोत्तरोक्त	३८८
शिवव्रत पद्मपुराणोक्तं ...	४१८
शिवव्रत कालोत्तरोक्तं	८१९
शिवोपवीतव्रतं	८४२
शीतलाष्टमीव्रतं	७८६
शुक्लनामत्रिव्रतं	३२०

	पृष्ठा
शुक्रव्रतं	५७९
शूलदानव्रतं ...	२५२
शैलव्रतं	४६३
शैवनक्षत्रपुरुषव्रतं ...	६९३
शैवमहाव्रतं ...	८४३
शैवमहाव्रतमपरं	४४८
शैवोपवासव्रतं	३९७
श्यामामहोत्सव	९१२
श्यनपामनविधि ...	२४१
श्रद्धाव्रतं	८६९
श्रावणव्रतं ...	७५२
श्रीप्राप्तिव्रतं ...	७५१
श्रीव्रत	४६६
स	
सदाव्रत नाम अन्नदानमाहात्म्य	४६९
सन्तानदव्रत भविष्योत्तरोक्त	२३८
सप्तर्षिव्रत	५१८
सप्तसागरव्रत	५०७
सप्तसुन्दरकव्रत	८८६
समुद्रव्रत	३१४
सम्पल्लाभाय कृत्यं	१०८५
सङ्क्रान्तिव्रतानि	७२७
सङ्क्रान्तिव्रतानि देवीपुराणोक्तानि	७२८
सङ्ग्रामविधि ..	९०८
सघाटकव्रत वराहपुराणोक्त	८००
सम्पणव्रतं	७७०
सर्वेशव्रत भविष्यपुराणोक्त	३०२
संवत्सरव्रत विष्णुधर्मोत्तरोक्त	३१९

ग्रन्थानां वचनसंख्या।

पृष्ठा

अ

अथर्वाङ्गिगोपथब्राह्मण — ८९१, ८९२

अथर्वपरिशिष्ट —९१८, ९२३,९२६।

अथर्ववेदः—९१६।

आ

आदिपुराण—२५२ २४३,९१५।

आदित्यपुराण—३४९, ५१०, ६५०, ७६०, ९४८, ९५०, ९१९, ९८९।

क

कालिकापुराण –१५१ १८०, ३३२, ६८१ ९७७, ९९२।

कालोत्तर —९, ४००, ५९०, ८९१।

कूर्मपुराणं –१५१, १५६, २५७, ९५९।

ग

गर्ग –९८८,

गारुडपुराण –६१, ७२९, ८७६।

द

देवीपुराण –३०३ ३३५ ४२४, ४५५, ५९०, ६२७, ६९३, ६६५, ६६५, ६९८, ७५०, ७७६ ८५४ ८५६, ९१६, ९६५, ९९०।

पृष्ठा

न

नरसिंहपुराणं—१४, ४९,२७५, १७७, ९८१।

नारदीयपुराणं—७१७, ७७५।

नन्दिपुराणं—१११।

प

पद्मपुराणं—२५, १४७, १७४, १७९, २९९, २४२, ३५४, ३१८, ४२२, ३९४, ५७४, ६७८, ६८४, ६९४, ७४९, ८१८, ८५७, ८६०, ८६२, ८६७, ८६५, ८६६, ८६७, ८८३, ८८४, ८८५, ८८६, ८८७, ९०१, ९०२, ९०४, ९०५, ९११।

पालकथाः--२२२।

प्रभासखण्ड—१४५।

ब

ब्रह्मपुराण-७८९,८०१,९१४,९४०,९८४,

ब्रह्मवैवर्त: —८०५, ९०१, ९८१।

ब्रह्माण्डपुराण –५५२,७१९, ७१४,९५५

भ

भविष्यपुराणं—९८२। १०११,

पृष्ठा

भविष्यत्पुराणं—२५, १४८, १७५, १९७, २१९, २४०, २५४, २६४, ९९४, ३९७, ३९८, ४४०, ५०९, ५१९, ५२१, ५२२, ५२४, ५२६, ५२२, ५३८, ५९७, ७९५, ७९६, ८२४, ९०५, ९०६, ९६०, १००७, १०१६।

भविष्योत्तरं—८, १४, १६, १७, १९, २४, ५६, ५८, ६४, ६५, ७१, १३०, १३२, १३२, १३९, १४७, १५९, १६२, १७१, १८४, १९०, १९५, १९६, २९८, २७२, २८३, ३०८, ३२२, ३२७, ३२६, ३५२, ३९२, ३९८, ४७५, ४८२, ५१०, ५१७, ५२१, ५२५, ५२७, ५२८, ५४८, ५५८, ५६७, ५७८, ५७९, ५८०, ५८७, ५८८, ६३८, ६७५, ६८०, ७०७, ७२४, ७२६, ७४८, ८०२, ८१२, ८१५, ८५३, ८५६, ८५७, ८७९, ८८७, ८८४, ८८७, ८९६, ८९८, ९००, ९०३, ९१०, ९५४, ९६४, १०१५।

म

मत्स्यपुराण—६१, ५०९, ५४१, ७०७, ८४३, ९०९, ९८५, १०२८, १०८८।

मनु—६९१, ६९३, ६९९, ९८२।

महाभारत—१५५, ३७७, ९१९,

य

यमस्मृति—३९७,

याज्ञवल्क्य—१००१, १०२७,

र

रेवाखण्ड—९४९, ९६१

ल

लिङ्गपुराणं—११४, ११२, १९७, ३९८, ६३०, ९१७, ९५४, ९५६।

व

वराहपुराणं—२११, २७५, ७११, ७९८

वह्निपुराणं—१४५, २४८, ७९२, ९६९

वायुपुराणं—९५६।

वायुसंहिता—२२२

वामनपुराणं—२१, ९५९, ९९१

विष्णुधर्म्मः—१८, १५२, २४४, ४६१, ५०१, ७५२, ७८७, ७९७, ८४८, ८५५, ९४०, ९५०, ९७१, ९०३, ९९४

विष्णुधर्म्मोत्तरं—१९, १५३, १५४, १५५, १६४, १६६, १६७, २३५, २२६, २७७, २३८, २४९, २५६, ३२३, ४२०, ४६०, ४६१, ४६२, ४६३, ४६४, ४६५, ४६६, ४६८, ४६७, ४९२, ५००, ५०१, ५०३, ५०४, ५०५, ५०६, ५०७, ५०८, ५९४, ५९७, ५९८, ६००, ६१८, ६२३, ६२४, ६३०, ६४९, ६५३, ६५४, ६५५, ६५९, ६६७, ६७१, ६९१, ७०६, ७२८, ७४४, ७५०, ७५१, ७५८, ७५९, ७६१, ७६८, ७८५, ७९७, ७९९, ८००, ८२७, ८२८, ८२९, ८३१, ८३९, ८५९, ८६०, ८६३, ८६४, ८६७, ८९५, ९१७, ९४६, ९४८, १०१०, १०२५।

विष्णुपुराणं—२५५, २५६, ८६५

विष्णुरहस्यं—३१०, ४५७, ७६०, ७७१, ७८३, ८४३, ८९७, ९९९

पृष्ठा

विष्णुस्मृतिः—७९१

श

शिवधर्म्मः—१५४, १५६, ९९५, ८४३, ८५१, ८८८, ९११, १०३०

शिवधर्म्मोत्तर—९९६, ८८३

शिवरहस्यं—८६१

स

सौरधर्म्मः—५५७

पृष्ठा

सौरपुराणं—२४, १५६, ३९६, ९१४, ९१७, ९३४, ९६६

स्कन्दपुराणं—८७, ९२, १११, १४७, १४९, २५१, २७९, २८८, २९३, ३११, ३१५, ४८१, ४९१, ४९९, ५१४, ५३७, ५६६, ५६७, ५९९, ६४०, ७११, ७२२, ७२४, ७२५, ७२६, ७३७, ७३८, ७३९, ७४०, ७४१, ८६७, ८९१

स्कन्दमहाकाल खण्ड—१५१, २४११

अथ सप्तमोऽध्यायः।

———ooo———

अथ त्रयोदशीव्रतानि।

धर्मादपेतं न कदाचिदेव यदीयवाचो विषयत्वमेति।
स एव हेमाद्रिरमुक्रमेण त्रयोदशीषु व्रतवृन्दमाह॥

युधिष्ठिर उवाच।

भगवन् भूतभव्येश संसारार्णवतारक।
व्रतं कथय किञ्चिन्मे रूपसौभाग्यदायकं॥
अनङ्गः प्रीणितो येन फलं यच्छति केशव।
आत्मवद्रूपसौभाग्यं तन्मे विस्तरतो वद॥

कृष्ण उवाच।

अनङ्गः श्रूयते देवः शूलपाणिः पिनाकभृत्।
तस्मिन् सम्पूजिते* पार्थ किन्नाप्नोति नरो भुवि॥
तेन ते कथयिष्यामि शूलपाणिव्रतेष्विदम्।
यन्न कस्यचिदाख्यातं व्रतानामुत्तमं व्रतं॥
स्त्री वा भक्त्या नरो मर्त्यो यद्यदिच्छति पाण्डव।
तत्तदाप्नोत्यसन्दिग्धमनङ्गाख्यां त्रयोदशीम्॥
किं व्रतैर्बहुभिः पार्थ उक्तमात्रफलप्रदैः।
त्रयोदशी त्वियं पुण्या सर्व्वव्रतफलप्रदा॥

---

* तस्मिंस्तु पूजित इति पुस्तकान्तरे पाठः।

80-2

तस्मात् कार्य्या प्रयत्नेन बहुपुण्यमभीप्सता।
त्रयोदशीह्यनङ्गाख्या सर्व्वाऽघौघ* विनाशनी॥
सर्व्वदुष्टोपशमनी सर्व्वमङ्गलदायिनी।
अतुल्यसुखसौभाग्यरूपलावण्यदायिनी।
पुरा दग्धेन कामेन त्रिनेत्रनयनाग्निना।
भस्मीभूतेन लोकेऽस्मिन् सङ्कल्पस्थेन पाण्डव।
अनङ्गेन कृता ह्येषा तेनानङ्गत्रयोदशी॥
अपरं श्रूयते यस्यां पुराणेनेतिविश्रुतम्।
नाम निर्व्वचनं पार्थ कथयामि शृणुष्व तत्॥
अनङ्गो भगवान् शम्भुस्तेजो†मूर्त्तिरगोचरः।
स एव देवो येनास्यां तेनानङ्गत्रयोदशी॥
प्रसिद्धा समनुप्राप्ता नित्या सर्व्वफलप्रदा।
मार्गशीर्षेऽमले पक्षे त्रयोदश्यां समाहितः॥
स्नान नद्यां तडागे वा गृहे वा कूपतोऽपि वा।
कृत्वाभ्यर्च्य महादेवं विधानाच्छशिभूषणं॥
लिङ्गं स्वयम्भवं भूतमभावे यत्प्रतिष्ठितं।
तदनङ्गमितिप्रोक्तं पूजयेद्भक्तितो व्रती॥
दधि,दुग्ध,घृत,क्षौद्र, शर्कराद्यमृतैः शुभैः।
स्नाप्य‡ पञ्चामृतैः पश्चात्स्नापयेद्गन्धवारिणा॥
धूपदीपादिनैवेद्यैः पुष्पैस्तत्कालसम्भवैः।

---

* सर्व्वाघौघेति पुस्तकान्तरे पाठः।
† विष्णुरिति पुस्तकान्तरे पाठः।
‡ स्नापयेति पुस्तकान्तरे पाठः।

फलैर्नानाविधैर्भक्ष्यैर्गीतवादित्रनिस्वनैः ॥
स्वनामाद्ययोगाख्ये होमः कार्यस्तिलाक्षतैः ।
अश्वत्थ,जाति,नारङ्ग, पायसैर्मधुना पिबेत् ॥
अश्वत्थादि क्रमात् काष्ठपुष्पफलनैवेद्यप्राशनानि ॥

एवमुत्तरेष्वपि मासेषु

अनङ्गं पूजयेद्राज्ञी मधुमत्यासमन्वितं ।
अनङ्गनाम्ना संपूज्य मधु प्राश्य स्वपेन्निशि ॥
मधुप्राशनयोगेन जायते मधुरध्वनिः ।
अश्वमेधस्य यज्ञस्य फलं प्राप्नोति भक्तिमान् ॥
पुष्पैश्चोदुम्बरैर्व्वीर शुभदाडिममोदकैः ।
चन्दनेन च योगीशं मदयन्त्या युतं यजेत् ॥
स्नाप्य क्षीरादिभिः पार्थं पूजयित्वा विधानतः ।
योगेश्वरेति संस्मृत्य चन्दनं प्राशयेन्निशि ॥
सौम्यः शीतः सुगन्धश्च चन्दनप्राशनाद्भवेत् ।
राजसूयस्य यज्ञस्य तत्क्षणः फलमाप्नुयात् ॥
माघे न्यग्रोधसत्पुष्प मातुलिङ्ग सुमालिकैः ।

सुमालिकं सोमलकं मुक्ता भौतिश्च योगीशं मदयन्त्या सहितं यजेत् ।

माघेश्वरेति संस्मृत्य प्राशयेन्मौक्तिकोदकं ॥
प्राशनस्य प्रभावेन निर्मला धीः प्रजायते ।
रूपाढ्यश्च वपुःश्रीणां मनोनयननन्दनं ॥
मुक्तापूर्णोपमे नेत्रे पद्मपत्रायते शुचिः ।
सौम्यः शान्तः सुगन्धश्च चन्दनप्राशनाद्भवेत् ॥

बहुशर्म्माख्यहस्तस्य प्राप्नोत्यविकलं फलं।
फाल्गुने बदरीकैश्च गौरजीवीरणोदकैः॥
कक्कोलेनच वीरेशं सशीतं निशि पूजयेत्।
वीरनाम जपेद्रात्रौ कक्कोलं प्राशयेन्निशि॥
तेनास्य सुरभिर्गन्धो जायते कायवक्त्रयोः।
तथा गुणगणावासो द्रुतकाञ्चनसन्निभः॥
गोमेधस्य फलं प्राप्य शक्रलोके महीयते।
चैत्रे करञ्ज,दमन,द्राक्षा,वटक,शीतलैः॥

शीतलः कर्पूरः।

देवेशं रूपनामानं यजेत् सुभगया सह।
पूर्व्वोक्तविधिना पार्थ कर्पूरं प्राशयेन्निशि॥
कर्पूरवान् प्रियालोके गन्धगौरवसंयुतः।
चन्द्रवत्सर्व्वलोकानां लोचनाह्लादकारकः॥
जायते स नरः पार्थ यः करोतीह भक्तिमान्।
नरमेधफलावाप्तिर्जायते नात्र संशयः॥
वैशाखे सहकारार्कपुष्पाम्रफलसक्तुभिः।
जातीफलैर्महारूपमिन्द्राण्या सहितं यजेत्॥
प्राशयेद्रात्रिसमये जातीफलमनुत्तमं।
सफलास्तस्य सर्व्वाशा भवन्ति भुवि भारत॥
गोसहस्रफलं प्राप्य रुद्रलोके महीयते।
ज्यैष्ठे जम्बूबिल्वपत्रैः श्रीफलैः पूपकैस्तथा॥
लावण्यनाथं संपूज्य प्रद्युम्नं ललितान्वितम्।
लवङ्गं प्राशयेद्रात्रौ लावण्यं तेनचाप्नुयात्॥

वाजपेयफलं लब्ध्वा मोदते दिवि भारत ॥
आषाढे ऽपामार्गमौप नालिकेरकदम्बकैः।
तिलैश्चोमापतिं रात्रौ पूजयेच्च तिलोत्तमां।
उमापतिं जपन् प्राज्ञः प्राशयेच्च तिलोदकं ॥
तिलोत्तमावद्भवत् रूपसम्पदनुत्तमा।
प्राप्नोति पुण्डरीकस्य फलं कुरुकुलोद्वह।
श्रावणे सुमनोभिश्चाऽजकदलीफलमण्डकैः ॥

सुमना जाती।

गन्धतोयैः शूलपाणिं शुक्लवासोन्वितं यजेत्।
गन्धोदकञ्च संप्राश्य स्वपेद्रात्रौ विमत्सरः ॥
सुगन्धः सर्व्वसौख्याढ्यश्चिरायुश्चोपजायते।
अग्निष्टोमस्य यज्ञस्य तस्य स्यात् फलमुत्तमं ॥
भाद्रे पालाशचाम्पेयशर्कराज्य पुरैस्तथा।

आज्यपुरी घृतपूरः।

यजेतागुरुणा सद्योजातं गौर्य्यासमन्वितं ॥
अगुरुं प्राशयित्वा तु गुरुर्भवति भूतले।
तुलापुरुषदानस्य हैमस्य फलमश्नुते ॥
आश्विने चाप्यपामार्गकर्कन्धुगुडपूरकैः।
स्वर्णाम्भोभिः सुवर्णैश्च विद्याधिपतिं यजेत् ॥
हेमोदकञ्च संप्राश्य हेमवर्णः प्रजायते।
नरमेधस्य यज्ञस्य फलं प्राप्नोति निश्चितं ॥
ऊर्जे कदम्बक द्रोणकुष्माण्ड लवणैस्तु।
फलैश्च विद्याधिपतिं यजेच्चन्दनया सह ॥

फलैरमृतफलाख्यैर्भक्ष्यलवणवान् भवेत्।
लवणं प्राशयेत्तत्र श्रद्धया परयान्वितः।
रूपलावण्यसंयुक्तः प्राशनादस्य जायते॥
नैवेद्यानामप्यलाभे द्रविणानि प्रकल्पयेत्।

इह प्रतिश्लोकं दन्तधावन कुसुम नैवेद्य प्राशनानां यथा क्रममभिहितानां तस्य तस्याभावे अयमनुकल्प उक्तः।

सर्व्वेषु पारणेष्वेव भोजयित्वा द्विजोत्तमान्।
सदक्षिणस्ततोऽश्नीयाद्बन्धुभिः सहितो वशी।
व्रतविघ्नो यदा तस्यामशक्तो सूतकेऽथवा॥
उपोष्य एवोपवास्य तदहः पारयेत् पुनः।
एवं सम्वत्सरस्यान्ते शक्त्या रत्नाद्यलङ्कृतं॥
उमामहेश्वरं हैममधिवास्य ततोनिशि।
पुष्पैर्धूपैस्तथागन्धैर्नैवेद्यैर्विविधैः फलैः॥
ततः प्रभातसमये कृतहोमवलिक्रियः।
वक्ष्यमाणमिदं सर्व्वं प्रदद्यात्तु द्विजातये॥
लिङ्गाकारमनङ्गस्य सौवर्णं कारयेच्छिवं।
ताम्रपात्रेषु संस्थाप्य कलशोपरिविन्यसेत्॥
शुक्लवस्त्रेण संच्छाद्य पुष्पनैवेद्यपूजितं।
ब्राह्मणाय प्रदातव्यं शिवभक्ताय सुव्रत॥
शक्तिमान् शयनं दद्यात्सवत्सां गां पयस्विनीं।
छत्रोपानत्प्रदानञ्च कलशा मोदकान्विताः॥
द्वादशात्र प्रकर्त्तव्याः स्रक्चन्दनविभूषिताः।
सितपक्वान्नसंछन्ना ब्राह्मणेभ्यो निवेदयेत्॥

देवस्यैव प्रदातव्याः कुम्भा द्वादशगन्धकाः ।
वितानं पञ्चवर्णञ्च ध्वजकिङ्किणिकादिकम् ॥
घण्टाश्च सुस्वना भद्राश्चार्पीयाच्छिवमन्दिरे ।
तस्मिन्नेव दिने पार्थ सम्पौडशाम्बानमर्च्चयेत् ॥
देवदेवं त्रिशूलेशं पुष्पनैवेद्यदीपकैः ।
गीतवादित्रनृत्यादि प्रेक्षणैर्विविधैरपि ॥
दानान्यत्र प्रदेयानि स्ववित्तस्यानुसारतः ।
सूर्य्योपरागसदृशोयतःसदिवसो मतः ॥
भोजनञ्च यथा शक्त्या षड्रसं मधुरोत्तमम् ।
प्रदद्याच्छिवभक्तानां देयानि च विशेषतः ॥
अर्च्चितो नावमन्येत न क्षिपेन्नानृतं वदेत् ।
एवं तदुत्सवं कृत्वा शिवयज्ञमनुत्तमं ॥
ततः स्वयन्तु भुञ्जीयाद्भृत्यवर्गसमन्वितः ।
शान्ताचारकनिष्ठस्तु हृदि देवं निवेश्य च ।
एवं निर्व्वर्त्त्य विधिवत्कृतकृत्यःपुमान् भवेत् ॥
नारी वा नृपशार्दूल कुर्व्वीतद्व्रतमुत्तमं ।
फलं त्वेतदवाप्नोति नात्र कार्य्या विचारणा ।
एवं कृत्वा नरः सम्यक् भक्तिभावेन भावितः ॥
मुच्यते सर्व्वपापौघैर्ब्रह्महत्यादिकैरपि ।
इह कीर्त्तिमवाप्य वै मृतः स्वर्गं महीयते ॥
पुण्यशेषादिहागत्य सार्व्वभौमो नृपो भवेत् ।
व्रतस्यास्य प्रभावेण मूर्त्तिमान् मदनोभवेत् ॥
सौभाग्यधनसौख्याढ्यःशान्तचित्तो जितेन्द्रियः ॥

पुत्रपौत्रैः सुसम्पूर्णैः जीवेच्च शरदां शतं।
शिवभक्तिपरो भूत्वा शिवकर्मगतमानसः॥
अन्तकाले शिवं स्मृत्वा शिवसायुज्यतां व्रजेत्।
कामेन याकिल पुरा समुपोषिता सीत्
शुभ्रात्मिथिं त्रिदशदेवमवाप्तिहेतोः।
तां प्राशनैरुदितनामयुतैरुपोष्य
दिव्यं प्रयाति परमं पदमिन्दुमौलेः॥

इति भविष्योत्तरोक्तं मनङ्गत्रयोदशीव्रतं।

चैत्र शुक्लत्रयोदश्यामनङ्गं तु पटे लिखेत्।
नीलदूर्वाङ्कुरश्याम हस्तमात्रं प्रमाणतः॥
रतिप्रीत्युभयोपेतं पौष्पसायकचापधृक्।
पटेषु सुस्थितः कार्य्यः सर्वैश्चाप्सरसां गणैः॥
नानापुष्पैस्तु संपूज्य वस्त्रनैवेद्यदीपकैः।
धूपैर्नानाविधैर्द्द्यैर्वानातोद्यरवेण तु॥
पुष्पमण्डपमध्ये तु रम्योद्याने तु पूजयेत्।
आचार्य्योविविधैर्भक्त्या पूजितव्यः प्रयत्नतः॥
वस्त्रहेमान्नपानैश्च यथा शक्त्या तु भक्तितः।
पुमान् कामत्वमाप्नोति सर्व्वस्यैव प्रियो भवेत्॥
सौभाग्यं प्राप्नुयान्नारी इह लोके परत्र च।
मासि मासि यजेद्वापि यथानुक्रमयोगतः॥
एकस्मिन् वा दिने वत्स वत्सरे वा समर्चयेत्।

मदनं चित्तभवनं मन्मथन्तु रतिप्रियं।
अनङ्गं चैव कन्दर्पं संपूज्य मकरध्वजम्॥
कुसुमायुधसंज्ञञ्च तथा पूज्य मनोभवं।
तथा विषमबाणञ्च द्वादशं मालतीप्रियं॥
मासि भाद्रपदे यत्नादनङ्गं पूजयेत्सदा।
इत्येतन्नियमेनैव कामव्रतं समाचरेत्॥

इति कालोत्तरोक्तमनङ्गव्रतम्।

———ooo———

युधिष्ठिर उवाच।

यमस्याराधनं ब्रूहि श्रीवत्सपुरुषोत्तमं।
यथा न गम्यते रौद्रनरकं नरकान्तकम्॥

कृष्ण उवाच।

द्वारवत्यां पुरे पार्थ जातोऽहं लवणाम्भसि।
दृष्टवान् मुनिमायातं मुद्गलं नामनामतः॥
प्रज्वलन्तमिवादित्यं तपसा द्योतितं वरं।
स प्रणम्याथ सत्कारैरिदं पृष्टो युधिष्ठिर॥
यमादर्शननामेदं व्रतं जन्तुभयापहं।
कथयामास स मुनिर्मुद्गलो विस्मयान्वितः॥

मुद्गल उवाच।

वृत्तान्तं कथयिष्यामि यद्दृष्टं स्वशरीरके।
अकस्माद्रोगरहितः पतितोऽस्मि धरातले॥
पश्यामि चण्डपुरुषैः समन्तादावृतं वपुः।

अङ्गुष्ठमात्रपुरुषो बलादाकृष्यते तु सः * ॥
बद्धा यमभटैर्गाढं नीयते वेगवाहिभिः।
क्षणात्सभायां पश्यामि यमं पिङ्गललोचनम् ॥
कृष्णावदातं रौद्रास्यं मृत्युव्याधिसमन्वितम्।
वातपित्तकफाद्यैश्च मूर्त्तिमद्भिरुपासितम् ॥
कामशोकज्वरच्छर्दिशूलैर्नानाविधैर्भयङ्करैः।
राजयक्ष्मप्रमेहाद्यैर्नेत्ररोगैरनेकधा ॥
निजाङ्गन्तु व्रणैरौद्रैर्ज्वालागर्दभकादिभिः।
रोगैर्बहुविधैः कृष्णा नानारूपैर्भयावहैः ॥
मूर्त्तिमद्भिश्च संग्रामे नरकैर्घोरदर्शनैः।
राक्षसैश्च पिशाचैश्च समन्तात्परिवारितः ॥
विचारकैर्वशिष्ठाद्यैश्चित्रगुप्तादिलेखकैः।
आदित्यादिकदिक्पालैः कर्मसाक्षिभिरावृतः ॥
दूतैरौद्रमुखाद्यैश्च सिंहसर्पादिवाहनैः।
पाशांकुशादिहस्तैश्च भ्रुकुटीकुटिलाननैः ॥
बृहत्कायैर्महाघोरैः पापिष्ठानां नियामकैः।
असिपत्रवनाङ्गारक्षारगर्त्तास्रपूरकैः ॥
अस्थिभङ्गामिषच्छेदरुधिरस्रावकादिभिः।
ततश्चो दृष्टतोभाति यमोनाम्ना जनोऽपरः ॥
स प्राह किङ्करान् सर्वान् धर्मराजोरुषान्वितः।
त्यज्यतां किं समानीतोयुष्माभिर्भ्रान्तमानसैः ॥
मुद्गलोनाम कुण्डिन्ये नगरे भीष्मकात्मजः।

* बालदाकृष्यतेतुषा इति पुस्तकान्तरं।

क्षत्रियः समानीयतां क्षीणायुस्त्यज्यतां मुनिः ॥
इत्युक्तास्ते गतास्तस्मादायाता. पुनरेव ते ।
जवृथ्यमभटाः प्राप्ता धर्मराजं सुविस्मयाः ॥
क्षीणायुस्तत्र चास्माभिर्न कश्चिल्लक्षितो गतः ।
न जानीमो भ्रान्तचित्ताः क्षमस्व जगतांपते ॥

यमउवाच ।

प्रायेण ते न दृश्यन्ते पुरुषे धर्मकिङ्करैः* ।
कृता त्रयोदशी यैस्तु नरकार्त्तिविनाशनी ॥
उज्जयन्यां प्रयागे वा भैरवे वापि ये मृताः ।
तिलान्नगोहिरण्यादि दत्तं यैस्तु गवाह्निकं ॥

किङ्करा ऊचुः ।

कीदृशं तद्व्रतं स्वामिन्त्वंस नो भास्करात्मज ।
किं तत्र चैवं† कर्त्तव्यं पुरुषार्थचतुष्टये ॥

यमउवाच ।

पूर्व्वाह्णे मार्गशीर्षादौ वर्षमेकं निरन्तरं ।
त्रयोदश्यां सौम्यदिने सूर्य्याङ्गारकवर्जिते ॥
मम नाम्ना द्विजानष्टौ पञ्च चैव समाह्वयेत् ।
पुराणवेदतत्त्वज्ञान् स्वाचारांस्तत्र दर्शनान् ॥
सूर्य्यैकशरणान् साधून् सर्व्वभूतहिते रतान् ।
शुचौ देशे शुभे पट्टे प्राङ्मुखानुपवेशयेत् ॥
घृतस्त्वासीयुतान् भक्त्या यत्नेनाभ्यङ्गयेत तान् ।

---

* धर्मकिङ्करैरिति पुस्तकान्तरे पाठ ।

† देवेति पुस्तकान्तरे पाठ. ।

आरभ्य उत्तमाङ्गांस्तु तिलतैलेन मर्दयेत् ॥
स्नापयेद्गन्धकाषायैः सुखोष्णेन च वारिणा।
पृथक् पृथक् स्नापयित्वा सर्व्वानेव द्विजोत्तमान् ॥
सुखस्नातांस्तथाचान्तान् व्रती भक्तिपरायणः।
स्वयं सभृत्यः शुश्रूषां तेषां कुर्य्यात्समाहितः ॥
प्राङ्मुखानुपविष्टांश्च चयोदश पृथक् पृथक्।
संस्थापयेच्चाभिमुखान् गुडपूपान् सुपूजितान् ॥
सव्यञ्जनं सुपक्वान्नं भूयो भूयो निवेदयेत्।
यथासुखं यथातृप्ति यथाकाममयाचितं ॥
देयं भावं समालक्ष्य इच्छद्भिः श्रेय आत्मनः।
शुचिर्भूत्वा तथाचान्त दक्षयेत्तिलतण्डुलैः ॥
प्रस्थमात्रैरथैकैकं ताम्रपात्रसमन्वितैः।
सदक्षिणैश्च संछन्नै र्जलकुम्भैः पवित्रकैः ॥
चर्म्मप्रावरणैः श्रेष्ठैर्वस्त्रयुग्मैश्च दूतकाः।
मन्त्रेणानेन विप्रेन्द्रान् दक्षयेत्तान् पृथक् पृथक् ॥
ब्राह्मणान् समरूपांस्तान् पंक्तिभेदेन कारयेत्।
यमःशनैश्चरो मृत्युर्दण्डहस्तो विनायकः ॥
अभावः प्रलयः शान्तिर्दुःस्वप्नशमनोऽन्तकः।
लोकपालो धनी क्रूरो रौद्रो घोराननः शिवः ॥
मम प्रसादसुमुखोद्ददात्वभयदक्षिणाम्।
इत्युक्त्वा न प्रयच्छेत देयं दत्त्वा व्रती पुनः ॥
द्विजानानुव्रजेत्तस्मात् स्वगृह्यविधिनार्च्चितान्।
एवं यः पुरुषः कश्चित्सवहृतमिदं चरेत् ॥

स मृतोऽपि नरो दूता न याति यममन्दिरं ।
अदृष्टोसौ समायाति विमानेनार्कमण्डलम् ॥
तस्मायाति पुरीं विष्णोस्ततः शिवपुरीं व्रजेत् ।
नूनं चीर्णं व्रतं तेन मुद्गलेन यथोदितं ॥
तेन नायात्यसौ लोकं मम क्षत्रियपुङ्गव ।

मुद्गलउवाच ।

यमस्यैतद्वचः श्रुत्वा क्वापि दूता गतास्तु मे ।
अहञ्च सर्व्वमाकर्ण्य विस्मयाविष्टमानसः ॥
स्वशरीरस्ततः प्राप्य सुप्तएवोत्थितो हरेः ।
ततोहरत्वमाविष्टो त्वां द्रष्टुमिदमागतः ।
श्रुतन्तु च मया तच कथितन्ते मयाखिल ।

कृष्णउवाच ।

इत्युक्ता मुद्गलो राजन् प्रयातःस्वाश्रमं प्रति ।
इदं कुरुष्व कौन्तेय त्वमप्यच महीतले ॥
ततो यास्यस्यसन्दिग्धं परित्यज्यात्मकं दिवं ।
एवं येऽन्येऽपि पुरुषाः स्त्रियोवापि युधिष्ठिर ॥
चयोदश्यां चयोदश्यां ये करिष्यन्ति भूतले ।
एकभक्तेन नक्तेन उपवासेन वा पुनः ॥
यमादर्शननाम्ना वै व्रतं सर्व्वव्रतोत्तमं ।
ते सर्व्वपापनिर्मुक्ता विमानेनार्कवर्च्चसा ॥
यास्यन्तीन्द्रपुरीं रम्यामप्सरोगणसंवृतां ।
दोधूयमानाश्चमरैस्तूयमानाः सुरासुरैः ।
गीतवादित्रनिर्घोषैश्छत्रपंक्तिविराजिताः ।

अदृष्टा घोररूपैस्ते यमदूतैर्युधिष्ठिर ॥
अनाहिता व्याधिशतैः पिशाचाद्यैरगोचराः।
अताडिता महारौद्रैर्नानाप्रहरणाःक्षताः॥
यमदृष्टिपथामुक्ताः सर्वसौख्यसमन्विताः।
सर्वालङ्कारसंयुक्ताः स्वशिरःसौम्यदर्शनाः॥
स्वर्गं वसन्ति सुचिरं भाविताःस्वेन कर्म्मणा।
स्नाप्य त्रयोदशमुनीन् घृतपायसेन
सम्भोज्य पूज्य तिलतण्डुलसम्प्रदानैः।
कुर्व्वन्ति ये व्रतमिदं भिदशेऽह्नि पार्थ
पश्यन्ति ते यममुखं न कदाचिदेव ॥

इति भविष्योत्तरोक्तं यमादर्शनत्रयोदशीव्रतम्।

गुरुवारे त्रयोदश्यामपराह्णे जलप्लुतः।
तर्पयित्वा देवपितॄन् ऋषींश्च तिलतण्डुलैः॥
नरसिंहं समभ्यर्च्य यः करोत्युपवासकं।
सर्वपापविनिर्मुक्तोविष्णुलोके महीपते ॥

इति नरसिंहपुराणोक्तं नरसिंहत्रयोदशीव्रतम्।

युधिष्ठिर उवाच।
ब्रूहि मे यदुशार्दूल व्रतं गर्व्वविनाशनम्।
तिलापहस्य देहस्य दौर्भाग्यनाशन तथा ॥

कृष्ण उवाच ।

इमं प्रश्नं पुरा पार्थ आतुकर्णीमहामुनिः ।
पृष्टोराज्ञ्या महामत्या कालमन्दनया तथा ॥
कथयामास तां हृष्ट उपविष्टा शृणोति सा ।
देवी कृताञ्जलिपुटा आतुकर्णोऽवदद्व्रतं ॥
ज्यैष्ठमासि सिते पक्षे त्रयोदश्यां युधिष्ठिर ।
स्नात्वा पुण्यनदीतोये पूजयेद्भुभदेवजम् ॥
श्वेतमन्दारमर्कं वा करवीरञ्च रक्तकम् ।
निम्बञ्च सूर्य्यदेवस्य वल्लभं दुर्लभं तथा ॥
दीप,नैवेद्य,पुष्पाद्यै र्मन्त्रेणानेन पाण्डव ।
निरीक्ष्य गगने सूर्य्यं ध्यात्वा हृदि समुच्चरेत् ॥
सूर्य्य त्वं श्वेतमन्दारश्वेतार्कार्कस्य सम्भव ।
करवीर नमस्तुभ्यं निम्बवृक्ष नमोऽस्तु ते ॥
इत्थं योऽर्चयते भक्त्या वर्षं वर्षं पृथक् नरः ।
दुमत्रयं नृपश्रेष्ठ नारी वा भक्तिसयुता ॥
तस्याः शरीरे दुर्गन्धोदुर्भाग्य वा न जायते ।
न सापत्नाभयं लोके न वन्ध्यादोषजन्भवेत् ॥
जायतेऽतीव सौभाग्यमन्यस्त्रीदुर्लभं नृप ।
कथितं यास्तिष्ठन्ति गन्धदौर्भाग्यनाशनं ॥
सर्व्वदोषैर्विनिर्मुक्ताः सुखमश्नन्ति भारत ।
निम्बं नवार्ककरवीरलतासुपुष्पं ॥
याः पूजयन्ति कुसुमाक्षतदीपदानैः ।

• दौर्गन्ध्यनाशनमिति पुस्तकान्तरे पाठः ।

ताः सर्व्वकामसुखहृष्टिसमृद्धिभाजो
दौर्भाग्यदोषरहिताः सुभगा भवन्ति।

इति भविष्योत्तरोक्तं दुर्गन्धदौर्भाग्यनाशन
त्रयोदशीव्रतम्।

युधिष्ठिर उवाच।

कान्तारवनदुर्गेषु प्रविशन्ति नदीषु च।
समुद्रतरणे चैव संग्रामेषु वरानने॥
देवतां कां स्मरेत्तत्र परित्राणकरीं विभो।
कथञ्च देव कुरुते परित्राणकृते जनः॥

कृष्णउवाच।

सर्व्वमङ्गलमाङ्गल्यां दुर्गां भगवतीं उमां।
नाप्नोति दुःखं पुरुषः संस्मरन् सर्व्वमङ्गलां॥
चलाचलच्च भूतस्य सर्व्वस्य हृदये स्थितां।
न भयं समवाप्नोति संस्मरञ्जगदम्बिकां॥
यदा तु शास्त्रं विज्ञातुमवन्त्यामहमागतः।
गुरोः सन्दीपनेपार्श्वं बलेन सह भारत॥
प्राप्तविद्येन च मया प्रतिज्ञाताय दक्षिणाः।
दिव्यं भावं विदित्वा मे तेनाहं भावितस्तदा॥
प्रभासतीर्थे पुत्रो मे मृतोऽसौ दीयते त्वया।
मया ध्याता ततोदेवी सर्व्वापत्सु च तारणी।

अङ्गावङ्केति विख्याता तदा देवी च मङ्गला ॥
त्रितयं योऽर्चयेत्पार्थ तस्य सर्व्वत्र मङ्गलं ।
संहितान्तरकृत् बलभद्र मङ्गला चेतित्रयं ॥
ततः प्रभृति तत्रस्थाः पूजयन्ति जनाः सदा ।
माधवं बलभद्रञ्च मध्यस्थां सर्वमङ्गलां ॥
वामे नारायणः सोऽहं कपाद्रौ भवतस्ततः ।
त्रयोदश्यां सिते पक्षे मासि मासि धृतव्रतः ॥
एकभक्तेन नक्तेन उपवासेन वा पुनः ।
गन्धैः पुष्पैः सदीपैश्च मधुमोधुसुरासवैः ।
पललोड्डरकैः क्षिप्रं वलिभक्तैश्च भक्तितः ॥
योऽभ्यर्च्चयेत राजेन्द्र सर्व्वपापैः प्रमुच्यते ।
सर्व्वापत्सु तरत्येव त्रितयं संस्मरेच्च यः ॥
अथवा दूरदेशस्थः कारयेत् प्रतिमात्रयं ।
मृण्मयं काञ्चनं चापि लिखितं चित्रकेऽपि च ॥
पूजयित्वा विधानेन सर्व्वं तत् फलमश्नुते ।
एतत्त्रयं त्रिदशमेऽह्नि सिते सदैव
यः पूजयेत् कुसुममांससुरोपहारैः ।
नश्यन्ति तस्य भवनेष्वतिभीषणानि
चौरारिजन्तुजनितानि भयानि सद्यः* ॥

इति भविष्योत्तरोक्त† सर्व्वमङ्गलात्रयोदशीव्रतम् ।

---

* मग्ना इति पुस्तकान्तरे पाठः ।

† इति भविष्योत्तरोक्त अङ्गावङ्गामङ्गला त्रयोदशी व्रत मिति पुस्तकान्तरे पाठः ।

81-2

Asiatic ... Calcutta
Acc. No. ... Date 23 3 36

मार्कण्डेय उवाच।

शुक्लपक्षे महाराज त्रयोदश्यामुपोषितः।
पूजयेत् कामदेवन्तु वैशाखात् प्रभृति प्रभो॥
गन्ध,माल्य,नमस्कार,दीप,धूपान्नसम्पदा।
दद्याद्व्रतान्ते विप्राय गन्धवस्त्रयुगं तथा॥
कृत्वा व्रतं वत्सरमेतदिष्ट
माप्नोति नाकं * सुचिरं मनुष्यः †।
मानुष्यमासाद्य भवत्यरोगः
सुखान्वितो रूपसमन्वितश्च॥

इति विष्णुधर्म्मोक्तं कामदेवव्रतं।

मार्कण्डेय उवाच।

शुक्लपक्षे महाराजं त्रयोदश्यामुपोषितः।
फाल्गुनात्तु समारभ्य नित्यं संपूजयेन्नरः॥

महाराजन्तु धनदं।

गन्धमाल्यनमस्कार दीपधूपान्नसम्पदा।
सुवर्णं ब्राह्मणेन्द्राय व्रतान्ते प्रतिपादयेत्॥
कृत्वा व्रतं वत्सरमेत दिष्टं
पक्षेषु राजन् सुचिरं† तपोभ्य।

---

* * प्राप्नोत्यथान्दिवय मिति पुस्तकान्तरे पाठः
† मनुष्य इति पुस्तकान्तरे पाठः।

मानुष्यमासाद्य धनान्वितः स्यात्
सौभाग्ययुक्तश्च तथा विरोगः ॥

इति विष्णुधर्म्मोत्तरोक्तं नन्दव्रतं ।

व्यास उवाच ।

त्रयोदश्यां तथा रात्रौ सोपहारं त्रिलोचनं ।
दृष्ट्वेशं प्रथमे यामे मुच्यते सर्व्वपातकैः ॥

इति भविष्यत्पुराणोक्तं प्रदोषव्रतं ॥

सनत्कुमार उवाच ।

अथ स्वस्त्ययनं पुंसां शृण्वतामघनाशनं ।
त्रयोदश्यां महाबुद्धे व्रतमेतन्निशामय ॥
नवनीतं नवश्लक्ष्णं रजताश्मसमप्रभं ।
कपित्थफलमात्रं तु समादाय सुसंयतः ॥
रौप्यताम्रमये पात्रे सौवर्णे वाथ मृण्मये ।
सुवर्णरचिते तस्य निक्षिपेत् प्राङ्मुखः शुचिः ॥
स्नातश्च कृतजप्यश्च शुक्लाम्बरधरः स्वयं ।
मण्डलं पुष्पनिकरै रचितैर्वा प्रकल्पयेत् ॥
तस्मिन्नष्टदलं पद्मं कारयेत् कुसुमोत्करैः ।
तत्र लक्ष्मीपतिं देवं लक्ष्म्या युक्तन्तु दिव्यया ॥
कर्णिकायां समावाह्य दलेष्वावाहयेत्तथा ।
शक्तीरष्टौ तु तस्यैवं ह्रिंयां पाद्यांस्तु वाग्यतः ॥

विधाय देवयजनं स्वादुमूलफलानि च।
तदग्रे तत्समानीय नवनीतं नवं शुचिः।
द्विधा कृत्वा तदेकैकं मन्त्रेणैवाभिमन्त्रयेत्॥

मन्त्रः।

पुरुषः पूर्णकामश्च हरिर्भद्रं करोतु नः।
योषित्त्वे सदा लक्ष्मीर्मङ्गलं दिशतु स्वयं॥
एवं कृत्वा ततः पत्न्यै दद्यादेकैकमग्रतः।
पूर्व्वं पुंलक्षितं पिण्डमितरच्च तथापरम्।

इतरं स्त्रीलक्षितं।

प्राश्याचम्य स्थितां पत्नीं प्रयतामभिमन्त्रयेत्।
यस्त्वन्तरात्मा भूतानामनादिनिधनश्च्युतः॥
स परःपरया भक्त्या कुक्षिं रक्षन्तु मे सदा।
सर्व्वपुष्टिप्रजननी सर्व्वार्त्तिशमनी तथा॥
लक्ष्मीः कुक्षिगतं गर्भं रक्षतादच्युतप्रिया।
सर्व्वार्त्तिक्षयदक्षाणि दिव्यशक्तियुतान्यपि॥
त्वां रक्षन्तु सदा विष्णोःसर्व्वप्रहरणान्यपि।
तथा दिक्पतयः सर्व्वे रक्षन्तु ग्रहदेवताः॥
पान्तु संसारसंयुक्ताः सर्वे रक्षन्तु सर्व्वदा।
इति कृत्वा ततः कुर्य्याद्ब्राह्मणानाञ्च तर्पणम्॥
गुरवे च वरं दत्त्वा नियमान् प्रतिपालयेत्।
वध्वा सह्योपवस्तव्यं तद्दिनं प्रयतात्मना॥
चतुर्द्दश्यान्तु सुस्नातः कृतपूजाविधिः शुचिः।
ब्राह्मणान् भोजयित्वा तु दद्याच्च गुरुदक्षिणाम्॥

भुञ्जीत बान्धवैः सार्द्धं नियमानुत्सृजेत्ततः॥
एवं कुर्व्वन्नरः सम्यो बहुपत्नश्च विन्दति।
वन्ध्यापि लभते पुत्रं मनोनयननन्दनम्॥
कन्यापि सुपतिं विन्देत् व्रतेनानेन सुव्रता।
माङ्गल्यं परमं प्राप्य दीर्घमायुश्च विन्दति॥

इति वाराहपुराणोक्तं तृयोदशीव्रतम्।

ब्रह्मा उवाच।

गौरीं विवाह्य जग्राह हरः पाशुपतं व्रतम्।
उमापतिः पशुपतिर्ध्यानासक्तो बभूव ह॥
ब्रह्मादिभिश्च संमन्त्र्य विष्णुप्रमुखैस्तथा।
गौर्य्या मनोभिलषितपूरणाय प्रहर्षितैः॥
प्रहितः क्षोभणार्थाय समर्थ इति मन्मथः।
ततोमारो जगामाथ आश्रमं रतिसंयुतः॥
ईश्वरस्य धनुःपाणिर्व्वसन्तश्रीसहायवान्।
सचेक्षुचापमाकृष्य मदनोन्मादनं शरम्॥
चिक्षेप त्रिपुरघ्नाय समाधिर्भङ्गहेतवे।
बुद्धा तु तस्य सङ्कल्पं रुद्रः क्रोधज्वलद्वपुः॥
ललाटे वह्निमसृजत् तृतीयनयनाद्धरः।
कामोवलोकितस्तेन भस्मीभूतश्च तत्क्षणात्॥
दग्धं दृष्ट्वा स्मरं शोकाद्रतिर्प्रोत्योक्षिते सदा।

करुणं विलपन्त्यौ च सख्यं मन्त्वदिशागते ॥
ततः शोकार्त्तहृदया गौरी रुद्रमुवाच ह ।
भगवन् मद्दर्शे संरब्धः कामं निर्दग्धवानसि ॥
तेनैते पश्यतार्त्ते द्वे कामस्य रुदितः कथम् ।
कुरु प्रसादं देवेश रतिप्रीत्योर्वृषध्वज ॥
सञ्जीवय पुनः शम्भो मूर्त्तिमन्तं पुनः कुरु ।
तच्छ्रुत्वा तु महादेवो हृष्टः प्रोवाच पार्वतीं
उपप्लुतं जगत्सर्व्वं मन्मथेन शरीरिणा ।
मया दग्धस्य कामस्य पुनरागमनं कुतः ॥
किन्तु ते मानवद्वाक्यं करोमि सफलं प्रिये ।
अस्मिन्वसन्तसमये शुक्लपक्षे त्रयोदशी ॥
यस्यां मनोभवो देवो भविष्यति शरीरवान् ।
एतेन बीजभूतेन जगद्वर्त्तिष्यतेऽखिलम् ॥
एवं वरमिदं दत्त्वा मन्मथाय युधिष्ठिर ।
जगाम हिमवत्पृष्ठे कैलासं पार्वतीप्रियः ।
तदेतत्ते समाख्यातं स्मरस्य चरितं नृप ॥
पूजाविधानमपरं कथयामि शृणुष्व तत् ।
यस्यां स्नात्वा त्रयोदश्यामशोकाख्यं नगं लिखेत् ॥
सिन्दूररजनीरङ्गै रतिप्रीतिसमन्वितम् ।
कामदेवं मत्तवाजिवक्त्रं तत्र झषध्वजम् ॥
सौवर्णं वा महाराजन्पञ्चरत्नमथापि वा ।
लीलाविलासगमनगर्वितस्थानपुरोगमं ॥

† चन्दनेन मन्मथ इति पुस्तकान्तरं ।

गन्धर्वं गीतवादित्रप्रेक्षणीय समाकुलम् ।
गंधावर्त्तं ऋतुक्रीडाप्रीति विद्याधरीयुतं ॥
मध्याह्ने पूजयेत् भक्त्या गन्धैर्धूपैः सुगन्धकैः ।
गन्धेनानेन राजेन्द्र नरनारीसमन्वितं ।
नमः कामाय देवाय देवदेवाय मूर्त्तये ॥
ब्रह्मविष्णुसुरेशानां* नमःक्षोभकराय वै ।
इत्येवमर्च्चयित्वा तु देवदेवं मनोभवं ॥
ततस्तदग्रतो देया मोदकाः सुखमोदकाः ।
नानाप्रकारान् भक्ष्यांश्च कामो मे प्रीयतामिति ॥
ततो विसर्ज्जयेद्विप्रान् दत्त्वा युग्मं सदक्षिणं ।

युग्मं गोमिथुनं* ।

स्वपतिं पूजयेन्नारी वस्त्रमाल्यविभूषणैः ।
कामोयमिति सञ्चिन्त्य प्रहृष्टेनान्तरात्मना ॥
मन्मथाय महापूजां* यजमानः सुहृद्वृतः ।
रात्रौ जागरणं कुर्य्यात् सुस्वराभिर्यथा भवेत् ॥
कर्पूरं कुङ्कुमक्षोदगन्धताम्बूलसर्ज्जनैः ।
शूद्राणां मद्यदानैश्च कुर्य्याद्रास महोत्सवं ॥
दीपप्रज्वलनैश्चित्रैः नृत्यैः प्रेक्षणकोत्सवैः* ।

---

* सुरेशानामिति पुस्तकान्तरे ।
* वस्त्रयुग्ममिति पुस्तकान्तरे पाठः ।
* मन्मथायमहापूजामीषा पुस्तकान्तरे पाठः ।

एवं यः कुरुते पार्थ वर्षे वर्षे महोत्सवं ॥
वसन्तसमये प्राप्ते हृष्टः पुष्टो नृपः पुरे।
तस्य संवत्सरं यावत् शोकरोगैर्विमुच्यते ॥
सुभिक्षक्षेममारोग्य यशश्रीसौख्यमुत्तमं।
कामवर्षी च पर्जन्यः तस्मिन् राष्ट्रे प्रजायते ॥
तुष्यते नात्र सन्देहो द्वादशार्द्धलोचनः।
तथा कामश्च विष्णुश्च वसन्तश्च प्रजापतिः ॥
चन्द्रसूर्य्यादिकाः सर्व्वे ग्रहा ब्रह्मर्षयस्तथा।
सर्वेऽपि तस्य तुष्यन्ति यक्षगन्धर्व्वराक्षसाः ॥
असुरा यातुधानाश्च सुपर्णाः पन्नगा नगाः।
तुष्टाः प्रयच्छन्ति सुखं तस्य कर्त्तुर्न संशयः ॥
चैत्रोत्सवे सकललोकमनोनिवासे।
कामं वसन्तमलयाद्रिमरुत्सहायं* ॥
पश्यन्ति येऽर्च्चयन्ति पुरुषप्रवरोऽथ योषित्।
सौभाग्यरूपसुतसौख्ययुता सदा स्यात् ॥

इति भविष्योत्तरोक्तमदनमहोत्सवः।

व्यास उवाच।

मन्दवारयुता पुण्या शुक्लपक्षे त्रयोदशी।
तस्यामुपोष्य विधिवत्सम्पूज्य गिरिजापतिं ॥
ब्रह्महत्यादिभिः पापैर्मुक्तो भवति मानवः ॥

इति सौरपुराणोक्तं सर्व्वव्रतम्।

---

* कामं वसन्तमलयाद्रिसमेतमर्च्यमिति पुस्तकान्तरे पाठः।

पुष्यादितस्त्रयोदश्यां कृत्वा नक्तमथो पुनः ।
अशोकं काञ्चनं दद्यादिक्षुयुक्तं दशाङ्गुलं ॥
विप्राय वस्त्रसंयुक्तं प्रद्युम्नः प्रीयतामिति ।
कल्पं विष्णुपुरे स्थित्वा विशोकः स्यात् पुमान् नृपः[*] ।
एतत् कामव्रतं नाम सदा शोकविनाशनं ॥

इति पद्मपुराणोक्तं कामव्रतम् ।

ब्रह्मोवाच ।

कामं पूज्य[*] त्रयोदश्यां सुरूपो जायते ध्रुवम् ।
इष्टां रूपवतीं भार्य्यां लभेत् कामांश्च पुष्कलान् ॥
मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः ।
पूर्व्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः ॥
गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते ।
पूजाशाठेन शाठेन कृतापि तु फलप्रदा ॥
आज्यधारा समिद्भिश्च दधिक्षीरान्नमाक्षिकैः ।
पूर्व्वोक्तफलदो होमः कृतः शान्तेन चेतसा ॥
एतद्व्रतं वैश्वानरप्रतिपद्व्रतवत् व्याख्येयम ।

इति भविष्यत्पुराणोक्तं कामत्रयोदशीव्रतम् ।

इति श्रीमहाराजाधिराज श्रीमहादेवस्य समस्त
करणाधीश्वर-सकल-विद्याविशारद श्रीहेमाद्रि-
विरचिते चतुर्व्वर्गचिन्तामणौ व्रतखण्डे
त्रयोदशीव्रतानि ॥

---

* नरऽति पुस्तकान्तरे पाठः ।
* कामपूजेति पुस्तकान्तरे पाठः ।

अथ षष्टादशोऽध्यायः ॥

———000———

अथ चतुर्द्दशीव्रतानि ।

दिग्दन्तावलकर्णतालपवन-प्रेङ्खोलभङ्गाङ्गना
सङ्गीतिश्रुति मिश्रितं सुमधुरं वैकुण्ठ-कुण्ठस्वरैः ।
कीर्त्तिं किन्नरयोषितः प्रतिदिशङ्गायन्ति यस्यानिशं
हेमाद्रिः स चतुर्द्दशीव्रतगणं ब्रूते महासिद्धिदं ॥

श्रीकृष्ण उवाच ।

अनन्त व्रतमप्यन्यच्छृणु वक्ष्यामनुत्तमं ।
सर्वपापहरं नृणां स्त्रीणां चैव युधिष्ठिर ॥
शुक्लपक्षे चतुर्द्दश्यांमासि भाद्रपदे भवेत् ।
तस्यानुष्ठानमात्रेण सर्वपापाद्दापोहति ॥

युधिष्ठिर उवाच ।

कृष्ण कोयमनन्तेति प्रोच्यते यस्तया विभो ।
किं शेषनाग आहोस्विदनन्तस्तक्षकः स्मृतः ॥
परमात्मा तथानन्त उताहो ब्रह्म उच्यते ।
क एषोऽनन्तसंज्ञोवै तथ्यं मे ब्रूहि केशव ॥

श्रीकृष्ण उवाच ।

अनन्त इत्यहं पार्थ ममरूपं निबोध वै ।
आदित्यादिग्रहा वारा यः काल उपपद्यते ॥

कला-काष्ठा-मुहूर्त्तादि दिनरात्रि शरीरवान् ।
पक्षमासर्त्तु-वर्षाणि युगकल्प-व्यवस्थया ॥
योऽयं कालो मया ख्यातः सोऽनन्त इति कीर्त्त्यते ।
सोऽहं कलावतीर्णोऽत्र भुवो भारावतारणात् ॥
दानवानां विनाशाय साधूनां पालनाय च ।
अनादि मध्यमर्थ्यन्तकृष्णं विष्णुं हरिं शिवं ॥
ब्रह्माणं भास्करं सोमं सर्वव्यापकमीश्वरं ।
विश्वरूपं महाकालं सृष्टि संहारकारकं ॥
प्रत्ययार्थं मया रूपं फाल्गुनाय प्रदर्शितं ।
सर्व्वमेव महाबाहो योगिध्येयमनुत्तमं ॥
विश्वरूपमनन्तस्य यस्मिन्निन्द्राश्चतुर्दश ।
वसवोऽष्टौ द्वादशार्का रुद्रा एकादशामलाः ॥
सप्तर्षयः समुद्राश्च पर्व्वताः सरितोद्रुमाः ।
नक्षत्राणि दिशोभूमिः पातालं भूर्भुवः स्वः ।
मा कुरुष्वात्र सन्देहं सोऽहं पार्थ न संशयः ॥

युधिष्ठिर उवाच ।

अनन्तव्रतमाहात्म्यविधिं विधिविदाम्बर ।
किं पुण्यं किं फलं यत्स्यादनुष्ठानवतां नृणां ॥
केन चादौ पुरा चीर्णं मर्त्त्ये केन प्रकाशितं ।
एवं सविस्तरं कृष्ण ब्रूह्यनन्त व्रतंमम ॥

श्रीकृष्ण उवाच ।

आसीत् पुरा कृतयुगे सुमन्तुर्नाम वै द्विज ।

वसिष्ठगोत्रेचोत्पन्नः सुरूपां भृगोःसुतां ॥
दीक्षां नामोपयेमे तां वेदोक्तविधिना नृप।
तस्याः कालेन सञ्जाता दुहिता नन्ददायिनी ॥
शीला नाम सुशीला सा न्यवसन्मातृसद्मनि।
ततः कालेन कियता ज्वरदाहेन पीड़िता ॥
विनष्टा सा नदीतोये ययौ स्वर्गं पतिव्रता।
सुमन्तुस्तु ततो यत्नेः धर्म्मं पुंसः सतां पुनः ॥
उपयेमे विधानेन कर्कशां नाम नामतः।
दुःशीलां कर्कशां चण्डीं नित्यं कलहकारिणीं ॥
सापि शीला पितुर्गेहे गृहार्च्चनरता बभौ।
कुड्यस्तम्भाङ्गन-द्वार-देहली-तोरणादिषु ॥
वर्णकैश्चित्रमकरोत् नील-पीत-सिता-सितैः।
स्वस्तिकैः शङ्खपद्मैश्च अर्च्चयन्ती पुनः पुनः ॥
ततः काले बहुतिथे गते मारदशानुगा।
पित्रा दृष्टा तदा तेन स्त्रीचिह्ने यौवने स्थिता ॥
कस्मै देया मया शीला विचार्य्येवं सुदुःखितः।
पिता ददौ द्विजेन्द्राय कौण्डिन्याय शुभे दिने ॥
गृह्योक्तविधिना पार्थ विवाहमकरोत्तदा।
निर्वर्त्त्योद्वाहिकं सर्वं प्रोक्तवान् कर्कशां द्विजः ॥
किञ्चिद्दायादिकं देयं जामातुः परितोषकं।
तत् श्रुत्वा कर्कशा क्रुद्धा प्रोञ्छाय गृहमण्डनं ॥
पटायां सुस्थितं कृत्वा स्वगृहं गम्यतामिति।
भोज्यावशिष्टचूर्णेन पाथेयञ्च चकार सा ॥

कौण्डिन्योऽपि विवाहेनां पथि गच्छन् शनैः शनैः।
शीलां सुशीलामादाय नवोढ़ां गौरवेण हि॥
मध्याह्ने भोज्यवेलायां समुत्तीर्य्य सरित्तटे।
ददर्श शीला स्त्रीणां सा समूहं रक्तवाससां॥
चतुर्द्दश्यामर्च्चयन्तं भक्त्या देवं जनार्द्दनं।
उपगम्य शनैः साथ प्रपच्छ स्त्रीकदम्बकं॥
आर्य्या किमेतन्मे ब्रूत किं नाम व्रतमीदृशं।
ता ऊचु र्योषितस्तां तु शीलां शीलविभूषणां॥
अनन्तव्रतमेतद्धि व्रतेऽनन्तस्तु पूज्यते।
सा ब्रवीदहमेतत्ते करिष्ये व्रतमुत्तमं॥
विधानं कीदृशं तत्र किं दानं कोऽत्र पूज्यते।

स्त्रिय ऊचुः।

शीले सदन्नप्रस्थस्य पुन्नामसंस्कृतस्य च।
अर्द्धं विप्राय दातव्यं अर्द्धमात्मनि भोजनं॥
शक्त्या च दक्षिणां दद्याद्वित्तशाठ्यविवर्जितां।
कर्त्तव्यं स सरित्तीरे विधिमानेन मानिनि॥
स्नात्वा नन्तं समभ्यर्च्य गन्धलेपनधूपनैः।
पुष्पैर्गन्धैः सुनैवेद्यैः पीतरक्तैस्ततुःसमैः॥
तस्याग्रतो दृढ़ं सूत्रं कुङ्कुमाक्तं सुडोरकं।
चतुर्द्दशग्रन्थियुतं वामे करतले न्यसेत्॥
मन्त्रेणानेन सुश्रोणियावद्वर्षं समाप्यते॥

अनन्त संसारमहासमुद्रे
मग्नान् समभ्युद्धर वासुदेव।

अनन्तरूपी विनियोजयस्व
अनन्त सूत्राय नमोनमस्ते ॥
अनेन डोरकं बद्ध्वा भोक्तव्यं स्वस्थमानसैः।
ध्यात्वा नारायणं देवमनन्तं विश्वरूपिणं।
भुक्त्वा चान्ते व्रजेद्वेश्म भद्रे उक्तं व्रतं तव ॥

श्रीकृष्ण उवाच।

एवमाकर्ण्य राजेन्द्र प्रहृष्टेनान्तरात्मना।
सापि चक्रे व्रतं शीला करे बद्ध्वा सुडोरकम् ॥
पाथेयमर्द्धं विप्राय दत्त्वा भक्तं स्वयं तथा।
पुनर्जगाम संहृष्टा गोरथेन पतिर्गृहं ॥
भर्त्रासहैव शनकैः प्रत्ययस्तत्क्षणादभूत्।
तेनानन्तव्रतेनाश्या चालं गोरस-संकुलं ॥
गृहाश्रमं श्रियाजुष्टं धन-धान्य-समन्वितं।
कुलमव्याकुलं रम्यं सर्वं चातिथिपूजनं ॥
सापि माणिक्यकाञ्चीभि र्मुक्ताहारविभूषिता।
देवाङ्गवस्त्रसंच्छन्ना सावित्री प्रतिमाभवत् ॥
कदाचिदुपविष्टाया दृष्टोबद्धः सडोरकः।
शीलायाहस्तमूले तु भर्त्रा तेन द्विजन्मना ॥
श्रीमदान्धेन कौरव्य साक्षेपं त्रोटितं वृथा।
कोऽनन्त इति मूढेन जल्पता पापकारिणा ॥
शिष्टा ज्वाला कुलेवाक्षौ हाहाकृत्वा प्रधाविता।
शीला गृहीत्वा सूत्रञ्च क्षीरमध्ये समाक्षिपेत् ॥

तेन कर्म्मविपाकेन तस्य सा श्रीः क्षयं गता ।
गोधनं तस्करैर्नीतं दग्धं शुष्टमकाञ्चनं ॥
यद्यच्चैवागतं तत्र तत्रैव च विनिर्गतम् ।
स्वजनैः कलहोमित्रैर्वैरञ्च भर्त्सनं तथा ॥
अनन्ताक्षेपदोषेण दारिद्र्यं पतितं गृहे ।
न कश्चिद्वदतोलोके तेन सार्द्धं युधिष्ठिर ॥
शरीरेणाति सन्तप्तो मायया प्यतिदुःखितः ।
निर्वेदं परमं प्राप्तः कौण्डिन्यः प्राह तां प्रियां ॥
शीले किमेतदुत्पन्नं सहसाश्शोककारकं ।
येनातिदुःखितोऽस्माकं जातः सर्वधनक्षयं ॥
स्वजनैः कलहोगेहे नकश्चिन्मेप्रभाषते ।
शरीरे तीव्रसन्तापः खेदश्चेतसि दारुणः ॥
जानासि दुर्नयः कोऽत्र किं कृतं दुष्कृतं भवेत् ।
प्रत्युवाच तं शीला सुशीलाशीलमण्डना ॥
प्रायोऽनन्तकृताक्षेप पापसम्भवजं फलं ।
भविष्यति महाभाग तदर्थं यत्नमाचर ॥
एवमुक्तः सविप्रर्षिर्जगाम मनसा हरिं ।
निर्वेदोनिर्जगामाथ कौण्डिन्यः प्रयतोवनं ॥
तपसे कृतसङ्कल्पो वायुभक्षो द्विजोत्तमः ।
मनसाध्याय चानन्तं द्रक्ष्यामि ततो विभुं ॥
यस्याप्रसादात्सञ्जातमाक्षेपान्निधनं गतं ।
धनादिकं ममातीव सुखदुःखप्रदायकं ॥
एवं सञ्चिन्तयत् सोऽथ बभ्राम विजने वने ॥

तत्रापश्यत् महाचूतं फलितं पुष्पितं तथा।
वर्जितं पक्षिसङ्घातैः कीकटे विभवं यथा॥
तमपृच्छत्त्वयानन्तः कश्चिद्दृष्टो महातरो।
ब्रूहि सौम्य ममातीव दुःखं चेतसि वर्त्तते॥
सोऽब्रवीद्ब्रह्मनानन्तं वेद्मि द्रक्ष्यामि वा द्विज।
एवं निराकृतस्तेन जगामाथ द्विजस्ततः॥
क्व द्रक्ष्यामीति गच्छन् स गामपश्यत्सवत्सकां।
तृणमध्ये प्रधावन्तीमितश्चेतश्च पाण्डव॥
अपृच्छद्धेनुके ब्रूहि यद्यनन्तस्त्वयेक्षितः।
साचोवाचाथ कौण्डिन्यं नानन्तं वेद्म्यहं द्विजः॥
ततो व्रजन् ददर्शाग्रे रम्यं पुष्करिणीद्वयं।
अन्योन्यजलकल्लोल-वीचिपर्य्यन्तसङ्गमम्॥
छन्नं किञ्जल्ककह्लार-कमलोत्पलमण्डलैः।
सेवितं भ्रमरैर्हंसैश्चक्रैः कारण्डवैर्वकैः॥
ते चापृच्छद्द्विजोऽनन्तो भवतीभ्यां न लक्षितः।
जपतस्ते द्विजश्रेष्ठ नानन्तं वेद्मि हे किल॥
ददर्शाथ वने तस्मिन् गर्दभं कुञ्जरं तथा।
तावप्यतो द्विजेनोक्तौ जचतुर्नैव विद्महे॥
एवं सम्यक् क्व द्रक्ष्यामि तत्रैव भूमि तादृशः।
कौण्डिन्यो विह्वलीभूतो निराशो जीविते नृप॥
दीर्घमुष्णञ्च निश्वस्य पपात भुवि भारत।
प्राप्य संज्ञामनन्तेति जल्पन्नुत्थाय स द्विजः॥
नूनं पश्याम्यहं प्राणानिति सङ्कल्प्य चेतसि।

उपायोऽयं द्रष्टव्यः (?) स्वर्गेऽस्मिन् तावद्भारत सत्तम ॥
उपयायन्तदेवोऽस्य प्रत्यक्षं समजायत।
वृद्धब्राह्मणरूपेण एह्येहीत्युवाच तं ॥
प्रगृह्य दक्षिणे पाणौ गुहामाविश्य तं ततः।
स्वां पुरीं दर्शयामास दिव्यनारीनरैर्युतं ॥
तस्यां निविष्टमात्मानं दिव्यसिंहासने शुभे।
पार्श्वस्थं शङ्खचक्राद्य गदागरुडशोभितं ॥
दर्शयामास विप्राय विश्वरूपमनन्तकम्।
विभूतिभेदैर्यानन्तैरनन्तममितौजसं।
तं दृष्ट्वा तादृशं रूपमनन्तमपराजितम् ॥
वेपमानो जगादोच्चैर्जयशब्दपुरःसरं।
जय कृष्ण जयानन्त विश्वमूर्त्ते जयाव्यय ॥
जय सर्व्वैककर्त्तर्ति संहर्त्त च जयाच्युत।
अनादि निधना, व्यक्त जय नित्य जयाक्षर ॥
जय सर्वग सर्व्वात्मन् सर्व्वस्य हृदयेशय:।
एवमादि प्रणम्याथ पुनरप्याह तं द्विजं ॥
पापोऽहं पापकर्म्माहं पापात्मा पापसम्भवः।
त्राहि मां पुण्डरीकाक्ष सर्व्व पापहरो भव ॥
तच्छ्रुत्वा नन्तदेवश्च प्राह सुस्निग्धया गिरा।
माभैस्त्वं ब्रूहि विप्रेन्द्र यत्ते मनसि वर्त्तते ॥

कौण्डिन्य उवाच।

मया भूत्वा विलुप्तेन त्रोटितोऽनन्तडोरकः।
तेन पापविपाकेन भूतिर्मे प्रलयं गता ॥

स्वजनैः कलहो गेहे न कश्चिन्मां प्रभाषते।
निर्वेदात् भ्रमितोऽरण्ये तव दर्शनकाङ्क्षया॥
कृपया देवदेवेश त्वया ह्यात्मा प्रदर्शितः।
तस्य पापस्य मे शान्तिं कारुण्याद्वक्तुमर्हसि।

श्रीकृष्ण उवाच।

तच्छ्रुत्वानन्तदेवेश उवाच द्विजसत्तमं।
भक्त्या माता पिता देवः किं न दद्याद्युधिष्ठिर॥

अनन्त उवाच।

स्वगृहं गच्छ कौण्डिन्य मा विलम्बं करिष्यसि।
चरानन्तव्रतं कुर्य्यात् नववर्षाणि पञ्च च॥
ततः पापविशुद्धात्मा प्राप्स्यसे ऋद्धिमुत्तमां।
पुत्रपौत्रान् समुत्पाद्य भुक्त्वा भोगान्मनोनुगान्॥
अन्ते च स्मरणं प्राप्य मामुपैष्यस्यसंशयम्।
अन्यच्चते वरन्दद्मि सर्व्वलोकोपकारकम्॥
इदमाख्यानकं श्रुत्वा श्रीमानन्तव्रतादिकम्।
करिष्यति नरोयस्तु कुर्व्वन् व्रतमिदं शुभम्॥
सोऽचिरात्पापनिर्म्मुक्तः प्राप्नोति परमां गतिं।
गच्छ विप्र गृहं शीघ्रं यथायेनागतोह्यसि॥

कौण्डिन्य उवाच।

स्वामिन् पृच्छामि मे ब्रूहि किञ्चित् कौतूहलं मया।
अरण्ये भ्रमता दृष्टं न तद्देवि जगद्गुरो॥
स चूत दृष्टस्तास्मिन् गौरिका च वृषभस्तथा।

कमलोत्पलकह्लारै: शोभितं सुमनोहरं ॥
मया दृष्टं महारण्ये किं तत् पुष्करिणीद्वयं ।
क: खर: कुञ्जर: कोऽसौ कोऽसौ वृक्षोद्विजोत्तम: ॥

अनन्त उवाच ।

स भूतहर्षीविप्रोऽसौ वेदार्थस्य विशारद: ।
सोर्चितोऽपि नवै प्रादा च्छिष्येभ्य स्तत्ताङ्गत: * ॥
सा गौ वसुन्धरा दृष्टा सुफला या त्वया द्विज ।
वृषोधर्मस्त्वयादृष्ट: शाद्वलं सत्यमाश्रित: ॥
धर्मे व्यवस्थानं तच्च यच्चपुष्करिणीद्वयं ।
ब्राह्मण्यौ केचिदप्यास्तां भगिन्यौ ते परस्परं ॥
धर्माधर्मादि यत्किञ्चित् तं निवेदयतोमिथ: ।
विप्राय न कश्चिद्दत्तमतिथौ दुर्बलोऽपि वा ॥
भिक्षा दत्ता नचार्थिभ्यो तेन पापेन कर्मणा ।
वीचीकल्लोलमालाभिर्मच्छतस्ते परस्परम् ॥
खर: क्रोध: त्वयादृष्ट: कुञ्जरो रोगउच्यते ।
ब्राह्मणो सावनन्तोऽहं गुहासंसारगह्वरम् ॥
इत्युक्त्वा देवदेवेशस्तत्रैवान्तरधीयत ।
स्वप्नप्रायश्च तद्दृष्ट्वा तत: स्वगृहमागत: ॥
कृत्वानन्तव्रतं सम्यक् नववर्षाणि पञ्च च ।
भुक्त्वासर्व्वमनन्तेन यथोक्तं पाण्डुनन्दन ॥
अन्ते च स्मरणं प्राप्य गतोऽनन्तपुरे द्विज: ।
तथा त्वमपि राजेन्द्र कथां शृण्वन् व्रतं कुरु ॥

---

* उपपन्न श्च: शिष्येभ्यो नर्थान् विद्यां न दत्तवानिति पुस्तकान्तरे पाठ: ।

कौमुंदे तत्क्रियाकाले समकृत्वः पुनः पुनः।
लक्ष्म्या समन्वितं देवमर्चयेत जनार्दनं ॥
सन्ध्याव्युपरमे चन्द्रस्वरूपं हरिमीश्वरं।
रोहिणीं लक्ष्मीं सञ्चिन्त्य सत्त्वगर्भेण चिन्तयेत् ॥
श्रीनिवासा चन्द्ररूपा त्वं वासुदेवजगत्पते।
मनोभिलषितं देव पूरयस्व नमोनमः ॥
मन्त्रेणानेन दत्त्वार्घ्यं देवदेवस्य भक्तितः।
नक्तं भुञ्जीत मौनेन तैलक्षारविवर्जितं ॥
तथैव चैत्रवैशाखे ज्यैष्ठे च मुनिसत्तम।
अर्चयेच्च यथाप्रोक्तं मासि मासि च तद्दिने ॥
निष्पादितं भवेदेकं पारणं दाल्भ्यभक्तितः *।
द्वितीयं तत्र वक्ष्यामि पारणन्तं निबोध मे ॥
आषाढे श्रावणे मासि मासि भाद्रपदे तथा।
तथैवाश्वयुजेऽभ्यर्च्य श्रीधरञ्च श्रिया सह ॥
सम्यक्चन्द्रमसन्दत्त्वा भुञ्जीतार्घं यथाविधि।
द्वितीयमेतदाख्यातं तृतीयं पारणं शृणु।
कार्त्तिकादिषु मासेषु तथैवाभ्यर्च्य केशवं ॥
भूत्या समन्वितं दद्याच्छशाङ्कायार्घ्यं निशि।
भुञ्जीत च यथाख्यातं तृतीयमपि पारणं ॥
प्रतिपूज्य ततोदद्यात् ब्राह्मणेभ्योऽर्घ्य दक्षिणां।
प्रतिमासं च वक्ष्यामि प्राशनं कायशुद्धये ॥
चतुरः प्रथमं मासान् पञ्चगव्यमुदाहृतं।

---

* दक्षभक्तिता इति पुस्तकान्तरे पाठः।

कुशोदकं तथैवाम्बुदुक्तं मासचतुष्टयं ॥
सूर्यांशुतप्तं तद्वच्च जलं मासचतुष्टयं ।
गीतवाद्यादिकं रात्रौ तथा श्राव्याः कथाः शुभाः ॥
कारयेद्देवदेवस्य पारणे पारणे गते ।
जनार्दनं सलक्ष्मीकमर्चयेत् प्रथमं तथा ॥
सश्रीकं श्रीधरं तद्वत्तृतीयं भूतिकेशवं ।
एवं संपूज्य विधिवत् सपत्नीकं जनार्दनं ॥
नाप्नोतीष्टवियोगार्त्तिं पुमान्नार्य्यपिवा पुनः ।
यावद्देतद्विधानेन पारणान्यर्चति प्रभुं ॥
तावन्ति जन्मान्यसुखं नाप्नोतीष्ट वियोगजं ॥
देवस्य च प्रसादेन मरणात्प्राक्ष्मृतेः स्मृतिं ।
कुले सतां स्फीतधने भोगान् भुङ्क्ते यथेप्सितान् ॥

इति विष्णुधर्मोत्तरोक्तलक्ष्मीनारायणं व्रतं।

दाल्भ्य उवाच ।

श्रोतुमिच्छाम्यहं तात यममार्गं सुदुर्गमं ।
यथा सुखेन संयान्ति मानवास्तद्वदस्व मे ॥

पुलस्त्य उवाच ।

प्रतिमासन्तु नामानि पञ्चदश्यां जगत्पतेः ।
कृतोपवासः स्नातः पूजयित्वा जगद्गुरुं ॥
उद्धारयमरोयाति सुसुखेनैव गच्छति ।

ततो विप्राय वै दद्यादुदकुम्भं सदक्षिणं ॥
उपानद्युगच्छत्रं आसनमेव च।
यद्वा मासगतं नाम प्रीयतामिति कीर्त्तयेत्॥
केशवं मार्गशीर्षे तु पौषे नारायणं तथा।
माधवं माघमासे तु गोविन्दमपि फाल्गुने॥
चैत्रे विष्णुञ्च वैशाखे कीर्त्तयेन्मधुसूदनं।
ज्यैष्ठे त्रिविक्रमं देवं तथाषाढे च वामनं॥
श्रीधरं श्रावणे मासि हृषीकेशं ततः परं।
नाम भाद्रपदे तद्वत् गायते पुण्यकाङ्क्षिभिः॥
तद्वदाश्वयुजे मासि पद्मनाभेति कीर्त्तयेत्।
दामोदरं कार्त्तिके च सर्व्वांस्तरति दुर्गतिं॥
एवं मासक्रमेणैव यदि दातुं न शक्यते।
तदा संवत्सरस्यान्ते दद्याच्चैव समागतं॥

विशेषश्चात्र कथित इत्यनेन विशेषादन्यत्र पूर्वव्रतसाम्यं गम्यते।

कृत्वैवं सुखमाप्नोति मरणे स्मरणं हरेः।
याम्यं क्लेशं समं प्राप्य स्वर्गलोके महीयते॥
ततोमानुषतां प्राप्य निरातङ्कोगतज्वरः।
धनधान्यवति स्फीते कुले महति जायते॥

इति विष्णुधर्मोत्तरोक्तं नरकपूर्णिमाव्रतं।

—o(0)o—

सूत उवाच।

वैशाख्यां पौर्णमास्यान्तु सृष्टाः कमलयोनिना।

तिलाः कृष्णाश्च गौराश्च क्षमये सर्व्वदेहिनां ॥
तस्मात् कार्य्यं तिलैः स्नानं तथाग्नौ जुहुयात् तिलान् ॥
निवेदितव्यं विधिवत् तिलपात्रं तु विष्णवे।
तिलतैलेन दीपाश्च देया देवेभ्य एव च ॥

कूर्म्मपुराणे तु विशेषः।

वैशाखपूर्णमास्यान्तु ब्राह्मणान् पञ्च सप्त वा।
उपोष्य विधिना शान्ताञ्छुचीन् प्रयतमानसः ॥

आदित्य पुराणे।

मोदकैश्च तिलैः श्राद्धं कर्त्तव्यं पितृतर्पणं।
तिलैः समधुभिर्य्युक्तं ब्राह्मणेभ्यो जनार्द्दन ॥
दातव्या दक्षिणा चापि तिलैर्म्मधुयुतैरपि।
मन्त्रं जपेच्च पौराणं पारंपर्य्याक्रमागतं ॥
ओं तिला वै सोमदैवत्याः सुरसृष्टास्तु गोसवे।
स्वर्गप्रदाश्च तस्माच्च ते मां रक्षन्ति नित्यशः ॥
दद्यादनेन मन्त्रेण तिलपात्राणि तत्र च।
सप्तभ्यस्त्वथ पञ्चभ्यो ब्राह्मणेभ्यस्तु कीर्त्तयेत् ॥
प्रीयतां धर्म्मराजश्च देवाद्यान्ये तथापि वा ॥

'गृह्णीतो' मन्त्रः।

एवं कृते स मुक्तःस्यात्पापैर्जन्मशतार्ज्जितैः।
इत्यादि पुराणोक्तो वैशाखो विधिः ॥

युधिष्ठिर उवाच।

——न्मरेऽपि याः काश्चितिथयः पुण्यलक्षणाः।

एता एव यदुश्रेष्ठ स्नाने दाने महाफलाः ॥

ब्रह्म उवाच।

वैशाखी कार्त्तिकी माघी तिथयोऽतीव पूजिताः।
स्नान दान विहीनास्तु ननेयाः पाण्डुनन्दन ॥
तीर्थस्नानं तदा शस्तं दानं वित्तानुसारतः।
वैशाख्यां पाण्डवश्रेष्ठ श्रेष्ठा चोज्जयनी मता ॥
कार्त्तिक्यां पुष्करं श्रेष्ठं माघ्यां वाराणसी मता।
स्नानेनोदकदानेन तारयेदखिलान् पितॄन्।
कुम्भान् स्वच्छजलैः पूर्णान् हिरण्याद्यैः समन्वितान्।
वैशाख्यां ब्राह्मणे दत्त्वा न शोचति कृताकृते ॥
मधुराम्नरसैः पूर्णं भाजनं कनकोज्ज्वलं।
बहूनि धनधान्यानि भक्त्या परमया युतः॥
गोभूहिरण्यवासांसि विप्राय विधिवन्नृप।
माघ्यां स्नानं तथा सम्यक् सर्व्वं पितृदेवताः॥
तिलपात्राणि देयानि तिलाः सघृतमोदकाः।
कार्य्या सदन्नमन्नैश्च धेनुदानं प्रशस्यते।
कम्बलाजिनरत्नानि मोचको पापमोचकः।
उपानद्दानमत्रैव तुल्यमश्वरथेन तु ॥
यत्र वा तत्र वा स्नानं दानं वित्तानुसारतः।
काले कालोद्भवं सर्व्वं शस्यते पाण्डुनन्दन ॥
कार्त्तिक्यां तु वृषोत्सर्गं विवाहं पुष्पलक्षण।
कुर्यात् कुरुकुलश्रेष्ठ हरेर्नीराजनं तथा ॥
गजाश्वरथदानानि घृतधेन्वादिकानि च।

प्रदेयानि द्विजातिभ्यस्तास्ताः संस्मृत्य देवताः।
फलानि यानि विद्यन्ते सुगन्धान्यगदानि च॥
कङ्कोलकफलं जात्या लवङ्गकदलीफलं।
खर्जूरं नारिकेलञ्च कदलीफलमेव च॥
दाड़िमं मातुलिङ्गञ्च कर्कोटं त्रपुषन्तथा।
तुम्बाकङ्कारवेल्लञ्च चिञ्चा कुष्माण्डमेव च॥
फलानामप्रदानेन येषान्तु तिथयो गताः।
ते व्याधिता दरिद्राश्च जायन्ते भुवि मानवाः॥
न केवलं ब्राह्मणानां दानमत्र प्रशस्यते।
भगिनी भागिनेयानां मातुलानां पितृष्वसुः॥
दरिद्राणाञ्च बन्धूनां दानं कोटिगुणोत्तरं।
मित्रं कुलीनश्चापन्नो बन्धुर्दारिद्रदुःखिताः॥
आशयाभ्यागतोदूरात्सोऽतिथिः सर्गसङ्क्रमः।
वनं प्रस्थापिते रामे सशोते सहलक्ष्मणे॥
मातामहञ्च कुलादेत्य विशुद्धेनान्तरात्मना।
सपथैः श्राविताने कैः कौशल्या भरतेन वै॥
यदा न प्रत्ययं याति कदाचित् कोशलात्मजा।
तदा विशुद्धभावेन शपथान् श्राविता पुनः॥
वैशाखी कार्त्तिकी माघी तिथयोऽमरपूजिताः।
अप्रदानवतो यान्तु यस्यार्य्योऽनुमते गतः॥
एतत् श्रुत्वा तु कौशल्या सहसा प्रत्ययं गता।
अङ्कमानीय भरतं सान्त्वयामास दुःखितं॥
एतत्तिथीनां माहात्म्यमाख्यातं बहुविस्तरं।

भूयस्तु संप्रवक्ष्यामि तव भारतसत्तम ॥
वैशाखे कार्त्तिके माघे संस्थिता नृपेन्द्र ।
या पूर्णिमा भवति पूर्णशशाङ्कचिह्ना ॥
तस्यां जलान्नकरकान् वरमातपत्रं ।
दत्त्वा प्रयाति पुरुषः पुरुहूत लोकं ॥

इति भविष्योत्तरोक्तो वैशाखी कार्त्तिकीमाघीविधिः ।

———ooo———

पुलस्त्य उवाच ।

ततोऽरतान्ते भगवान् पिनाकी
तस्यां गुहायामनुभोय पुण्यं ।
देवैश्च सर्वैरनुगम्यमानो
बभूव कामेन विहारचारी ॥
तस्यां मनुष्यः सुचिरं प्रमत्तो
नभस्य मासस्य तु पौर्णमास्यां ।
भार्य्याद्वितीयः सहसा य एव
पुत्रेष्टिमादौ स्वगृहेपि कृत्वा ॥
गच्छेत्ततः सर्व्वसमृद्धियुक्तो
होमैः सजाप्यैर्व्वलिनाच रुद्रं ।
शैलेन्द्रकन्यागजवक्त्रनन्दी .
सहायसत्त्वा प्यथवार्च्चयित्वा
संपूज्य विप्रानथ देव पूर्व्वान्
कृतोपवासो जितरोष दोषः
ततः सहायानपि भोजयित्वा

भार्य्याञ्च पश्चात् स्वयमप्यभुक्त्वा ॥
तृप्तांश्च भार्य्यामथ तोषयित्वा
प्रदक्षिणीकृत्य गुरुं सगुर्व्वा ।
गृहांस्तु गच्छेत्परिपूर्णकामः
हृष्टः प्रहृष्टः कृतभोजनश्च ।
कथाश्च दिव्याश्च पुनः शिवीश्च
भार्य्यां ततः श्रावणयोः प्रयुक्तां ।
क्षीरोदनं त्रिदिनं भोजये च
वन्ध्याञ्च भार्य्यामपि पुत्रकामां ॥
ततो गृहे सर्वसमृद्धिकामः
सन्तर्प्य भार्य्यां प्रयतो विधाय ।
उमां शिवं नन्दिनं चार्चयित्वा
ततो भवेत् पुत्रवतीव वन्ध्या ॥
प्रादेशमात्रामथवा शिवस्य
हिरण्मयीं राजतीमायसीं वा ।
त्रिशूलखट्वाङ्गधराम्बरेण्यां
त्रिलोचनां जाह्नवीं चारुरूपां ॥
कृत्वा कृतीं तामभिपूज्य पश्चात्
प्रताप्य वह्नौ तु निधाय पात्रे ।
प्रस्थेन दुग्धस्य ततोऽभिषेकं
दत्त्वा च तत्पाययेत्पुत्रकामां ॥

इति पद्मपुराणोक्तं पुत्रव्रतं ।

———०৪०———

ज्यैष्ठे मासि सिते पक्षे पौर्णमास्यां यतव्रतः ।
स्थापयेदव्रणं कुम्भं सिततण्डुलपूरितं ॥
नानाफलयुतं तद्वदिक्षुदण्डसमन्वितं ।
सितवस्त्रयुगच्छन्नं सितचन्दनचर्च्चितं ॥
नानाभक्ष्यसमोपेतं सहिरण्यञ्च शक्तितः ।
ताम्रपात्रं गुड़ोपेतं तस्योपरि निवेदयेत् ।
तस्मादुपरि ब्रह्माणं सौवर्णं पद्मकोदरे ॥
कुर्य्यात्प्रकर्य्योपेतां सावित्रीं तस्य वामतः* ।
गन्धधूपं ततो दद्याद्गीतवाद्यञ्च कारयेत् ॥
तदभावे कथां कुर्य्याद्यथा प्राह पितामहः ।
ब्रह्मनाम्नीं च प्रतिमां कृत्वा गुडमयीं शुभां ॥
शुक्लपुष्पाक्षततिलैरर्च्चयेत्पद्मसम्भवं ।
ब्रह्मणे पादौ संपूज्य जङ्घे सौभाग्यदाय च ॥
विरिञ्चयोरुयुग्मञ्च मन्मथायेति वै कटिं ।
स्वच्छोदरायेत्युदरमनङ्गायेत्युरो हरेः ॥
मुखं पद्ममुखायेति बाहू वै वेदपाणये ।
नमः सर्व्वात्मने मौलिमर्च्चयेच्चापि पङ्कजं ॥
ततः प्रभाते तं कुम्भं ब्राह्मणाय निवेदयेत् ।
ब्राह्मणान् भोजयेद्भक्त्या स्वयं तु लवणम्बिना ॥
भक्त्या तु दक्षिणान्दद्यादिमं मन्त्रमुदाहरेत् ।
प्रीयतामत्र भगवान् सर्व्वलोकपितामहः ॥
हृदये सर्व्वलोकानां यस्त्वानन्दो विधीयते ।

---

* वासत इति पुस्तकान्तरे पाठः ।

अनेन विधिना सर्व्वं मासि मासि समाचरेत् ॥
उपवासो पौर्णमास्यामव्ययं ब्रह्म पूजयेत्।
फलमेकन्तु संप्राश्य अवैर्य्यां भूतले स्वपेत् ॥
तत्र त्रयोदशे मासि घृतधेनुसमन्वितां।
शय्यां दद्याद्द्विजेन्द्राय सर्व्वोपस्करसंयुतां ॥
ब्रह्माणं काञ्चनं कृत्वा सावित्रीं राजतीन्तथा।
षाण्मासिकः* सृष्टिकर्त्ता सावित्री तु फलस्य तु ॥
वस्त्रैर्द्विजं सपत्नीकं पूज्य शक्त्या विभूषणैः।
शक्त्या गवाह्निकं दद्यात् प्रीयतामित्युदीरयेत् ॥
होमं शुक्लैस्तिलैः कुर्य्याद्ब्रह्मनामानि कीर्त्तयेत्।
गव्येन सर्पिषा तद्वत्पायसेनच कर्म्मवित् ॥
विप्रेभ्यो भोजनं दत्त्वा वित्तशाठ्यविवर्जितः।
इक्षुदण्डस्ततो दद्यात्पुष्पमालाश्च शक्तितः ॥
यो ब्रह्मा स स्मृतो विष्णुरानन्दात्मा महेश्वरः।
सुखार्थी कामरूपेण स्मरन्देवं पितामहं ॥
कुर्य्याच्चैव विधानेन पौर्णमासं स्त्रियोऽपि वा।
सर्व्वपापविनिर्मुक्तः प्राप्नोति ब्रह्मशाश्वतं ॥
इहलोके वरान् पुत्रान् सौभाग्यं ध्रुवमश्नुते ॥

इति श्रीपद्मपुराणोक्तं पुत्रकामव्रतं।

———ooo———

सुमन्तुरुवाच।

सोमव्रतन्तथाप्यन्यच्छङ्करप्रीतये शृणु।

---

* पद्मासन इति पुस्तकान्तरे पाठः।

ताम्रपात्रं पयः*पूर्णं कृत्वा तत्रस्थच शङ्करं ॥
प्रच्छाद्योपरिवस्त्रेण गन्धपुष्पार्च्चितं महत्।
शिवभक्ते द्विजे दद्याद्भोजयित्वा विधानतः॥
प्राच्यां समुदिते सोमे प्रतीच्याञ्च रवौ गते।
पौर्णमास्यान्तु वैशाख्यां रुद्रपात्रं शिवाय तु॥
प्रीयतां मे महादेवः सोममूर्त्तिर्जगत्पतिः।
तस्मै विप्राय तत्पात्रमर्पयेद्भक्तितः शनैः॥
एवं सोमव्रतं नाम कृत्वा सोमाश्रिकं व्रजेत्
रुद्रलोकात्परिभ्रष्टो भवेज्जातिस्मरो नरः॥
पूर्व्वाभ्यासेन तेनैव पुनः शिवपुरं व्रजेत्।

इति भविष्यत्पुराणोक्तं सोमव्रतं।

भीष्म उवाच।

दीर्घायुरारोग्यकुलाभिवृद्धि
युक्तः पुमान् रूपगुणान्वितः स्यात्।
मुहुर्म्मुहुर्जन्मनि येन सम्यक्
व्रतं समाचक्ष्व तदिन्दुमौलेः॥

पुलस्त्य उवाच।

त्वयापृष्टमिदं सम्यगक्षय्यकारकं।
रहस्यं तव वक्ष्यामि यत् पुराणविदोविदुः॥
रोहिणीचन्द्रशयनं सोमव्रतमिहोत्तमं।
तस्मिन्नारायणस्यार्चामर्च्चयेदिन्दुनामभिः॥

---

* ताम्रपात्रपयोभिरिति पुस्तकान्तर पाठः।

यदा सोमदिने युक्ता भवेत्पञ्चदशी क्वचित्।
अथ वा ब्रह्मनक्षत्रं पौर्णमास्यां प्रजायते॥
तदा स्नानं नरः कुर्य्यात् पञ्चगव्येन सर्षपैः।

ब्रह्म नक्षत्रं रोहिणी॥

आप्यायस्वेति च जपेद्विद्वानथ शतं पुनः।
शूद्रोऽपि परया भक्त्या पाषण्डालापवर्ज्जितः॥
सोमाय वरदायाथ विष्णवे च नमोनमः।
कृतजाप्यः स्वभवनमागत्य मधुसूदनं॥
पूजयेत् फलपुष्पैस्तु सोमनामानि कीर्त्तयेत्।

सोमाय शान्ताय नमोस्तु पादा
वानन्ददायेति च पूज्य जङ्घे।
ऊरुद्वयं वापि जलोदराय
संपूजयेन्मेढ्रमनङ्गराजं॥
नमोनमः कामसुखप्रदाय
कटिः शशाङ्कस्य समर्चनीया।
तथोदरञ्चाप्यमृतोदराय
नाभिस्तु पूज्यो विधिलोचनाय॥
नमोस्तु चन्द्राय मुखञ्च पूज्यं
दन्ता द्विजानामधिपाय पूज्याः।
आस्यं नमश्चन्द्रमसेऽभिपूज्य
पूज्यौ तथौष्ठौ कुमुदप्रियाय॥
नासा च नाथाय वनौषधीनां
आनन्दभूताय पुनर्भ्रुवौ च।

नेत्रद्वयं पद्मनिभन्तथेन्दो
रिन्दीवरश्यामकराय सौरे ॥
नमः समस्तामरवन्दिताय
कर्णद्वयं दैत्यनिषूदनाय ।
ललाटमिन्दोरुदधि प्रियाय
केशाः सुषुम्नाधिपतेऽभिपूज्याः ।
शिरः शशाङ्काय नमोमुरारेः
विश्वेश्वरायेति नमः किरीटं ।
पद्मप्रिये रोहिणि नाम लक्ष्मि
सौभाग्यसौख्यामृतसारकायै ॥
देवीञ्च संपूज्य सुगन्धपुष्पै
र्नैवेद्यधूपादिभिरिन्दुपत्नीं ।
सुप्त्वा तु भूमौ पुनरुत्थितेन
स्नात्वा च विप्राय हविष्ययुक्तः ॥
देयः प्रभाते स हिरण्यवारि
कुम्भोनमः पापविनाशनाय ।
संप्राश्य गोमूत्र ममांसमन्न
मक्षारवर्ज्यानथविंशतिञ्च ॥
ग्रासान् पयः सर्पियुतानुपोष्य
भुक्तेतिहासं शृणुयाच्च कर्णैः ।
कदम्बनीलोत्पलकेतकानि
जाती सरोजः शतपत्रिका च ॥
म्लान कुब्जान्यथ सिन्दुवार

पुष्पं पुनर्भारसमल्लिकायाः।
शक्रस्य विष्णोः करवीरपुष्पं
श्रीचम्पकं चन्द्रमसः प्रदेयं* ॥
श्रावणादिषु मासेषु क्रमादेतानि सर्वदा।
यस्मिन्मासे व्रतादिःस्यात्तत्पुष्पैरर्चयेद्धरिं ॥
एवं संवत्सरं यावदुपोष्य विधिवन्नरः।
व्रतान्ते शयनन्दद्याद्दर्पणोपस्करान्वितं ॥
रोहिणी चन्द्रमिथुनं कारयित्वा च काञ्चनं।
चन्द्रः षडङ्गुलः कार्य्यो रोहिणी चतुरङ्गुला ॥
द्विचन्द्ररूपनिर्म्माणं चतुर्द्दशीस्थित महाराजोक्तं वेदितव्यं।
मुक्ताफलाष्टकयुतं* शितनेत्रपटान्वितं।
क्षीरकुम्भोपरि पुनः कांस्यपात्राक्षतैर्युतं ॥
दद्यान्मन्त्रेण पूर्व्वाह्णे शालेक्षुफलसंयुतां।
सितामथ सुवर्णास्यां खुरै रौप्यैः सुवर्णितां ॥
सवस्त्रभाजनां धेनुं तथा शङ्खञ्च शोभनं।
भूषणैर्द्विजदम्पत्यमलंकृत्य गुणान्वितं ॥
चन्द्रोऽयं द्विजरूपेण सभार्य्य इति कल्पयेत्*।
यथा न रोहिणी कृष्ण शयनं त्यज्य गच्छति ॥
सोमरूपस्य ते तद्वन्मे भेदोऽस्तु भूपते।
यथात्वमेव सर्वेषां परमानन्दमुक्तिदः ॥

---

* श्रीचन्दनमिति पुस्तकान्तरे पाठः।

* मुक्ताकलापयुक्ता इति पुस्तकान्तरे पाठः।

* भावयेदिति पुस्तकान्तरे पाठः।

मुक्तिर्मुक्तिस्तथा भक्तिस्त्वयि चन्द्रेऽस्तु मे दृढ़ा।
इति संसारभीतस्य मुक्तिकामस्य चानघ॥
रूपारोग्यायुषामेतद्विधायकमनुत्तमं।
इदमेव पितृणाञ्च सर्व्वदा वल्लभं मुने॥
त्रैलोक्याधिपतिर्भूत्वा सप्तकल्पशतत्रयं।
चन्द्रलोकमवाप्नोति विष्णुर्भूत्वा विमुच्यते॥
नारी वा रोहिणीचन्द्र शयनं वा समाचरेत्।
सापि तत्फलमाप्नोति पुनरावृत्तिदुर्लभं॥
इति पठति शृणोति वा य इत्थं
मधुमथनार्च्चन मिन्दुकीर्त्तनेन।
मतिमपि च ददाति सोऽपि शौरे
र्भवनगत: परिपूज्यतेऽमरौघै:॥

इति पद्मपुराणोक्तं चन्द्ररोहिणी शयनव्रतं।

———०००(a,०००———

अनिलाद[*] उवाच।

अथोपोष्य चतुर्द्दश्यां पौर्णमास्यां गुरौ दिने।
पूजयेद्विधिनानेन लिङ्गं सार्वं निबोध मे॥
ब्रह्माण: पश्चिमे भागे वामे लिङ्गस्य वै हरिं।
खखोल्कं दक्षिणे रौद्रमोङ्कारं प्राग्दिशि स्थितं॥
खखोल्क: सूर्य्य:।
ईशानं मध्यमे देशे पूर्व्वाह्णे चैव पूजयेत्।

* अनिलादन इति पुस्तकान्तरे पाठ:।

विलिप्यागुरुचन्द्रैश्च कुसुमैश्च सुगन्धिभिः ॥
चन्द्रः कर्पूरं ।
गुग्गुलस्याज्यसंयुक्तमगरुं वासितं शुभं ।
दत्त्वा नीराजनं कुर्याद्दद्याद्वै युग्मपञ्चकं ॥
युग्मं गोमिथुनं ।
नैवेद्यान्तं वलिञ्चैव पूर्व्ववत् स्वगृहं व्रजेत् ।
पञ्चगव्यं ततः प्राश्य आचार्य्यब्राह्मणांस्तथा ॥
व्रतिनोमिथुनान्येव भोजयेच्च स्वशक्तितः ।
हेमवस्त्रादिकञ्चैव यत्नात् कृत्वा च कल्पयेत् ॥
ततोदेवः प्रपूज्यो वै नैवेद्याद्यं निवेद्य च ।
नत्वाग्निं पूजयित्वा तु पञ्चवक्त्रं शिवं स्मरेत् ॥
प्राप्तेऽब्दे पञ्चमे गावः पञ्च पञ्च नियोजयेत् ।
तेषामुद्दिश्यतेष्वेवं न्यूनञ्चापि ततोऽधिकं ॥

पञ्चमे पञ्चपञ्चेति वचनाद्द्वितीये द्वे द्वे तृतीये तिस्रस्तिस्रः चतुर्थे चतस्रश्चतस्रः पञ्चमे पञ्च पञ्च प्रथमादेकैकैव तेषां ब्रह्मादीनां, पञ्चानां चन्द्ररूपानां पञ्चदेवतानां पञ्चवर्गानुद्दिश्य न्यूनाधिकं तेषु तेषु नियोजयेत्

निखिलं प्राग्विशेषञ्च कर्त्तव्यं तत्पदे नृभिः ॥
सुखकीर्त्तिश्रियोऽर्थञ्च इहैवविभवाय च ।
रहस्यमेतदत्युक्तं न देयं यस्य कस्यचित् ॥

इति कालिकापुराणोक्तमीशान व्रतं ।

———000(())000———

कृष्ण उवाच।

अथातः शृणु भूपाल कृत्तिकाव्रतमुत्तमं।
राज्ञी या लिङ्गभद्राख्या पुरा यस्य प्रभावतः॥
अतीव महतीं लब्धा श्रियं जातिस्मराभवत्।
योगेनान्ते तनुन्त्यक्त्वा परब्रह्मणि लीयते॥

युधिष्ठिर उवाच।

कीदृशं तद्व्रतं कृष्ण मन्त्रो यन्त्रोऽपि कीदृशः।
विधानं कृत्तिकानाञ्च तच्च कालं वदस्व मे॥

कृष्ण उवाच।

कार्त्तिक्यां पौर्णमास्यान्तु गृह्णीयात् कृत्तिका व्रतं।
षट् मासांस्तु व्रतं यावदिदं संचिन्त्य चेतसि॥
पारणे पारणे चापि पराणान्ते द्विजोत्तमे।
उद्यापनं प्रयच्छेत यथा विभवसारतः।
कृत्तिकासु स्वयं सोमः कृत्तिकासु बृहस्पतिः॥
यदास्यात् सोमवारेण सा महाकार्त्तिकी स्मृता।
इदृशीबहुभिर्व्वर्षैं बहुपुण्येन लभ्यते॥
लब्धापि न वृथा नेया यदीच्छेच्छ्रेय आत्मनः।
अन्यापि कार्त्तिकी पार्थ समपाप्या विधानतः॥
तस्या विधानं राजेन्द्र शृणुष्वैकाग्रमानसः।
कार्त्तिके शुक्लपक्षस्य पौर्णमास्यां दिनोदये॥
नक्तेन नियमं कुर्याद्दन्तधावनपूर्व्वकं।

उपवासेन वा शक्त्या ततः स्नात्वा जलाशये ॥
कुरुक्षेत्रे प्रयागे वा पुष्करे निमिषेऽथ वा।
शालग्रामे कुशावर्त्ते मूलस्थाने चरित्रके ॥
गोकर्णे वावटे पुण्ये ह्यथवा नरकण्टके।
पुरे वा नगरे वापि ग्रामे घोषेऽथ पत्तने ॥
यत्र वा तत्र वा स्नात्वा नारी वाप्यथ वा पुमान् ॥
देवर्षिपितृपूजाञ्च कृत्वा होमं युधिष्ठिर ॥
ततोऽस्तसमये प्राप्ते पात्रं गव्यस्य सर्पिषः।
क्षीरस्य वाम्भसः पूर्णं कृत्वा गुडफलान्वितं ॥

चकाराद्दध्नः।

षट् प्रमाणं यथाख्योऽस्ति कृत्तिका शङ्करं न्यसेत्*।
षट् प्रमाणं षट् कृत्तिकानामाणीत्यर्थः॥
षट्कृत्तिका विमानानि स्वर्णं रौप्यमयानि च ॥
रत्नगर्भाणि कुर्य्याच्च स्वशक्त्या पाण्डुनन्दन।
प्रथमा स्वर्णं निष्पन्ना द्वितीया रौप्यनिर्म्मिता ॥
तृतीया रत्नघटिता चतुर्थी नवनीतजा।
पञ्चमी कणिकान्नेन षष्ठी पिष्टमयी कृता ॥
कृत्वा षट्कृत्तिकां पार्थ गन्धालक्तक भूषिताः।
रत्नगर्भाः कुसुमाढ्याः पिष्टान्नस्तवकाञ्चिताः ॥
सिन्दूरचन्दनाभ्यक्ता—जाती पुष्पैस्तु पूजिता।

* कृत्तिका शङ्करमिति पुस्तकान्तरे पाठः

मन्त्रेणानेन ताः पूज्य विप्राय प्रतिपादयेत् ॥

ॐ सप्तर्षिदारा ह्यनलस्य वल्लभा
या ब्राह्मणत्वस्य प्रभावेन युक्ताः ।
तुष्टा कुमारस्य च मातरो याः
ममापि सुप्रीततराः सन्तु स्वाहा ॥

एवमुच्चार्य विप्राय देयास्ताः कृत्तिका नृप ।
ब्राह्मणोपि प्रतीच्छेत मन्त्रेणानेन पाण्डव ॥
धर्मदाः कामदाः सन्तु इमा नक्षत्रमातरः ।
कृत्तिका दुर्गसंसारात्तारयन्तु भयादपि ।
अनेन विधिना दत्त्वा दृष्टाश्चैवान्तरे स्थिताः ॥
विसृज्य ब्राह्मणं भक्त्या अनुव्रज्य पदानि षट् ।
निर्वर्त्य च कृतार्थश्च त्रियं सत्फलमाप्नुयात् ।
विमानेनार्कवर्णेन गत्वा नक्षत्रमण्डलं ॥
दिव्येन वपुषा तत्र स्रक्चन्दनविभूषितः ।
दिव्यनारीगणयुतः सुखमास्तेह्यनामयः ॥
वैधूयमानश्चमरैः छत्त्रपङ्क्त्याविराजितः ।
पारिजातकमन्दारपुष्पमाला विराजित ॥
कृतार्थः परिपूर्णश्च तिष्ठेद्वर्षायुतत्रयं ।
नारी कृत्वा व्रतं चास्ते गत्वा स्वर्गं सभर्तृका ॥
क्रीडते सुभगा साध्वी सर्वभोगसमन्विता ।
यश्चैतच्छृणुयान्पार्थ भक्तियुक्तः समाहितः ॥
नारी वा पुरुषो वापि मुच्यते सर्व्वकिल्बिषैः ।

सौवर्णरौप्यमणिगोनवनीतसिद्धा
षट्कृत्तिकाः कणिकपिष्टमयीश्च कृत्वा।
पात्रे निधाय कुसुमाक्षतधूपदीपैः
संपूज्य जन्मगहनं न विशन्ति मर्त्याः।

इति भविष्योत्तरोक्तं कृत्तिकाव्रतं।

युधिष्ठिर उवाच।

किमर्थं फाल्गुनस्यान्ते पौर्णमास्यां जनार्दन।
उत्सवो जायते लोके ग्रामे ग्रामे पुरे पुरे॥
किमर्थं शिशवस्तस्यां गेहे गेहे निनादिताः।
होलाका दीप्यते कस्मात् फाल्गुन्यान्तु किमुच्यते॥
आडाडेतिकासंज्ञा शीतोष्णेति किमुच्यते।
कोऽत्रास्याम्पूज्यते देवः केनेयमवतारिता॥
किमस्यां क्रियते कृष्ण एतद्विस्तरतो वद॥

कृष्ण उवाच।

शृणु राजन् प्रवक्ष्यामि विस्तरेण पुरातनं।
चरितं होलिकायास्तु पारंपर्य्येणचागतं॥
आसीत् कृतयुगे पार्थ रघुर्नाम नराधिपः।
शूरः सर्व्वगुणोपेतः प्रियवादी बहुश्रुतः॥
स सर्वां पृथिवीं जित्वा वशीकृत्य नराधिपान्।
धर्मतः पालयामास प्रजाः पुत्रानिवौरसान्॥

न दुर्भिक्षं न च व्याधिर्नाकालमरणं नृणां।
नाधर्म्मरुचयः पापास्तस्मिन् शासति पार्थिवे॥
तस्यैवं शासतो राज्यं स्वधर्म्मरतस्य वै।
सर्व्वलोकाः समागम्य त्राहि त्राहीति चाब्रुवन्॥

पौरा ऊचुः।

अस्माकं तु गृहे का चित् ढौण्ढानामेति राक्षसी।
दिवारात्रौ समागम्य बालान् पीडयते बहून्॥
रक्षया चोदकेनापि भेषज्यैर्वा नराधिप।
मन्त्रैः परमाचार्य्यैः सा नियन्तुं न शक्यते॥
पौराणां वचनं श्रुत्वा रघुर्व्विस्मयमागतः।
विस्मयाविष्टहृदयः पुरोहितमथाब्रवीत्॥

रघुरुवाच।

ढौण्टेति राक्षसी केयं किं प्रभावा द्विजोत्तम।
कथमेषा नियन्तव्या मया दुष्कृतकारिणी॥
रक्षणात् प्रोच्यते राजा पृथिवीपालनान्नृपः।
अरक्षमाणः पृथिवीं राजा भवति किल्विषी॥

वशिष्ठ उवाच।

शृणु राजन् परं गुह्यं यथाख्यातं मया क्वचित्।
ढौण्ढानामेति विख्याता राक्षसी मालिनः सुता॥
तया चाराधितः शम्भुरुग्रेण तपसा पुरा।
प्रीतस्तामाह भगवान् वरं वरय सुव्रते॥

यत्ते मनोभिलषितं तद्दास्यविचारितं।
ढोण्ढा प्राह महादेवं यदि तुष्टः स्वयं मम॥
तदवध्यां सुरादीनां मनुजानाञ्च शङ्कर।
मां कुरुष्व त्रिलोकेश शस्त्राणाञ्च तथैव च॥
शीतोष्णवर्षसमये दिवारात्रौ बहिर्गृहे।
अभयं सर्वदा मे स्यात्त्वत्प्रसादान्महेश्वर॥
एवमस्त्वित्यथोक्तास्तां पुनः प्रोवाच शूलभृत्।
उन्मत्तेभ्यः शिशुभ्यश्च भयस्ते संभविष्यति॥
ऋतुसन्धौ महाभागे मा व्यथा हृदये कृथाः।
एवं दत्त्वा वरं तस्या भगवान् भगनेत्रहा॥
स्वप्ने ह्यर्थोप्यथोलब्धस्तत्रैवान्तरधीयत।
एवं लब्ध्वा वरं सा तु राक्षसी कामरूपिणी॥
नित्यं पीड़यते बालान् संस्मृत्य हरभाषितं।
अडाडया तु गृह्णाति सिद्धमन्त्रं कुटुम्बिनां॥
गृहेषु तेन सा लोके अड़ाड़ेत्यभिधीयते।
पुंश्चलीनाञ्च नारीणां नराणाञ्च विशेषतः॥
रुधिरं नासिकाच्छिद्राद्गलितं सा पिबत्यलं।
एतत्ते सर्व्वमाख्यातं ढौढ़ायाश्चरितं महत्।
साम्प्रतं कथयिष्यामि येनोपायेन हन्यते॥
अद्य पञ्चदशी शुक्ला फाल्गुनस्य नराधिप।
शीतकालो विनिष्क्रान्तः प्रातर्ग्रीष्मो भविष्यति॥
अभयं सर्व्वलोकानां दीयतां पुरुषर्षभ।
तथाश्शंकिता लोका हसन्तु च रमन्तु च॥

दारुणानि च खड्गानि गृहीत्वा समरोत्सुकाः।
योधा इव विनिर्यान्तु शिशवः संप्रहर्षिताः॥
सञ्चयं शुष्ककाष्ठानां पलालानाञ्च कारयेत्।
तत्राग्निं विधिवद्धुत्वा रक्षोघ्नैर्मन्त्रविस्तरैः॥
ततः किलिकिलाशब्दैस्तालीशब्दैर्मनोहरैः।
तमग्निं त्रिःपरिक्रम्य गायन्तु च हसन्तु च॥
जल्पन्तु स्वेच्छया लोकाः निःशङ्का यस्य यन्मतं।
भणैर्बहुविधैः शब्दैः कीर्त्तयन् देशभाषया॥
विस्तारयंश्च गायंश्च सहस्रं नाम तस्य वै।
तेन शब्देन सा पापा होमेन च निराकृता॥
अट्टाट्टहासैर्डिम्भानां राक्षसी क्षयमेष्यति।
तस्यैर्तद्वचनं श्रुत्वा स नृपः पाण्डुनन्दन॥
सर्व्वं चकार विधिवद्यदुक्तन्तेन धीमता।
गता सा राक्षसी नाशन्तेन चोग्रेण कर्मणा॥
ततः प्रभृति लोकेऽस्मिन्ढुण्ढाख्यातिमागता।
सर्व्वदुष्टप्रशमो होमः सर्व्वरोगोपशान्तिदः॥
क्रियतेऽस्यां द्विजैः पार्थ तेन सा होलिका स्मृता।
सर्व्वसारा तिथिश्चेयं पौर्णमासी युधिष्ठिर॥'
सारत्वात्सर्व्वलोकानां परमानंददायिनी।
अस्यां निशागमे पार्थ संरक्ष्याः शिशवो गृहे॥
गोमयेनोपलिप्ते च सचतुष्के गृहाङ्गणे।
आकारयेच्छिशुप्रायान् खड्गव्यग्रकरान्नरान्॥
खड्गकाष्ठैश्च संस्पृश्य गीतैर्हास्यकरैः शिशून्

रक्षन्ति तेषां दातव्यं गुडपक्वान्नमेव च॥
एवं ढौण्ढेति राक्षस्या दोषः प्रशमनं व्रजेत्।
बालानां रक्षणं कार्य्यं तस्मात्तस्मिन् स्वमालये॥

युधिष्ठिर उवाच।

प्रभाते किं जने देव कर्त्तव्यं सुखमीप्सुभिः।
प्रवृत्ते माधवे मासि प्रतिपद्युदिते रवौ॥

कृष्ण उवाच।

कृत्वावश्यककार्य्याणि सन्तर्प्य पितृदेवताः।
वन्दयेद्धोलिकाभूतिं सर्व्वदुष्टोपशान्तये॥
मन्त्रेणानेन राजेन्द्र पठ्यमानं निबोध मे।
वन्दितासि सुरेन्द्रेण ब्रह्मणा शङ्करेण च।
अतस्त्वं पाहि नो देवि विभूते भूतिदा भव॥
मण्डिते चर्च्चिते चैव उपलिप्ते गृहाजिरे।
चतुष्कङ्कारयेत् स्वच्छं वर्णकैश्चाक्षतैः शुभैः॥
तन्मध्ये स्थापयेत्पीठं शुक्लवस्त्रोत्तरच्छदं।
अग्रतः पूर्णकलशं स्थापयेत्पल्लवैर्युतं।
साक्षतं सहिरण्यञ्च सितचन्दनचर्च्चितं।
आसने चोपविष्टस्य ब्रह्मघोषेण भारत।
चर्च्चयेच्चन्दने नारी अव्यङ्गाङ्गा सुलक्षणा॥
पद्मरागोत्तरपटा श्वेतांशुकविभूषिता।
नूपुराद्यं शिरोऽस्माद्य दधिदूर्व्वाक्षतान्वितं॥
वर्द्धापयित्वा श्रीखण्डमायुरारोग्यवृद्धये।

वपुराद्यं शिरोऽन्तमिति पादादारभ्यमूर्द्धपर्य्यन्तं चन्दनेन चर्च्चयेदित्यर्थः तच्चन्दनं वर्द्धायित्वा किञ्चिदवशेष्य ।

पश्चाच्च प्राशयेद्विद्वान् चूतपुष्पं सचन्दनं ।
मनोभवस्य सा पूजा ऋषिभिः सम्प्रदर्शिता ॥
यत्पिबन्ति वसन्तादौ चूतपुष्पं सचन्दनम् ।
सत्यं सत्यस्य कामस्य पूजेयं क्रियते जनैः ॥

प्राशनमन्त्रश्च ।

इदमग्रं वसन्तस्य माकन्दकुसुमं तव ।
सचन्दनं पिबाम्यद्य सर्व्वकामसमृद्धये ॥
अनन्तरं द्विजेन्द्राणां सूतमागधवन्दिनां ।
दद्याद्दानं यथाशक्त्या कामो मे प्रीयतामिति ॥
ततो भोजनवेलायां स्वतपाकेन तेन हि ।
प्राशयेत् प्रथमं चाज्यं ततो भुञ्जीत कामतः ॥
य एवं कुरुते पार्थ शास्त्रोक्तं फाल्गुनोत्सवं ।
अनायासेन सिध्यन्ति तस्य सर्वे मनोरथाः ॥
आधयो व्याधयश्चैव यान्ति नाशं न संशयः ।
पुत्रपौत्रसमायुक्तः सुखं तिष्ठति मानवः ॥
पुण्या पवित्रा सर्व्वत्र सर्व्वविघ्नविनाशिनी ।
एवं ते कथिता पार्थ तिथीनामुत्तमा तिथिः ॥
वृत्ते तुषारसमये सितपञ्चदश्यां
प्रातर्व्वसन्तसमये समुपस्थिते च ।
सम्प्राश्य चूतकुसुमं सह चन्दनेन ।

सत्यं हि पार्थ पुरुषोऽथ समां सुखी स्यात्।
समां वर्षन्तु यावत्।

इति भविष्योत्तरपुराणोक्तहोलिकोत्सवविधिः।

—ooo—

युधिष्ठिर उवाच।

रक्षाबन्धविधानं मे किञ्चित् कथय केशव।
दुष्टप्रेतपिशाचानां येनाधृष्यो भवेन्नरः॥
सर्व्वरोगोपशमनं सर्व्वाशुभविनाशनं
सकृत्कृतेनाब्दमेकं येन रक्षा कृता भवेत्।

कृष्ण उवाच।

शृणु पाण्डवशार्दूल इतिहासं पुरातनं।
इन्द्राण्या यत् कृतं पूर्व्वं शक्रस्य जयवृद्धये॥
देवासुरमभूद्युद्धं पुरा द्वादशवार्षिकं।
तत्रासुरैर्जितः शक्रः सह सर्वैः सुरोत्तमैः॥
परित्यज्यामरैःस्वर्गं सर्व्वालङ्कारवर्जितः।
प्राप्यामरावतीं तस्थौ प्राणत्राणपरायणः॥
ततो दानवराजेन त्रैलोक्यं स्ववशीकृतं।
इदमुक्ताः समानाय्य शृणुध्वं सनरामराः॥
मां यजध्वं सुविश्वस्ताः यथं पूज्यः सुरासुरैः।
यः शक्रः सम्यगातिष्ठे स गच्छेद्ध्यतां मया॥
दानवेश्वरवाक्येन नष्टाः सर्व्वाः क्रियास्ततः।
स्वाहाकारस्वधाकारवषट्कारादिकार्य याः॥

नाधीयत तथा वेदा नपूज्यन्तच देवताः।
उत्सवा न प्रवर्त्तन्ते सर्वमासीदसंहृतं॥
धर्म्मनाशे सुरेशस्य बलहानिरजायत।
ज्ञात्वा क्षीणबलं सर्वं दानवाः समभिद्रवन्॥
सोऽभिद्रुतोऽसुरगणै स्वस्तराज्योऽपि देवराट्।
बृहस्पतिमुपागम्य इदं वचनमब्रवीत्॥
न स्थातुमवशक्नोमि न गन्तुं तैरभिद्रुतः।
सर्वथा योद्धुमिच्छामि यद्भाव्यं तद्भविष्यति॥
नश्यते युध्यतो वापि तावद्भवति जीवितं।
तावद्यातास्त्वजत् पूर्वं न यावन्मनसीप्सितं॥
अयं मे शंसते ब्रह्मन् योत्स्येऽहं दानवैः सह।
मुहूर्त्तज्वलितं श्रेयो येन धूमायितं चिरं॥
कर्म्मायत्तं सुरैश्वर्य्यं पौरुषं कर्म्मचोच्यते॥
तदद्याहं करिष्यामि ध्रुवं श्रेयो भविष्यति।
श्रुत्वा सुरपतेर्वाक्यं बृहस्पतिरथाब्रवीत्॥

बृहस्पतिरुवाच।

न कालोविक्रमस्याद्य त्यजकोपं पुरन्दर।
देश काल विहीनानि कार्य्याणि विपरीतवत्॥
क्रियमाणानि दूष्यन्ति सोऽनर्थः सुमहान् भवेत्।

इन्द्र उवाच।

ब्रह्मन् किं बहुनोक्तेन योत्स्येऽह सह दानवैः।
नृणां कार्य्यसमारम्भे श्रेयसीत्येकचिन्तता॥
गुणदोषावुभावेतावेकीकृत्य विचक्षणैः।

कार्य्यमारभते यत्तु तस्य दोषाः पराङ्मुखाः॥
तयोः संवदतोरेवं शचीप्राह सुरेश्वरं।
अद्य भूतदिनं देव प्रातः पर्व्व भविष्यति॥
अहं रक्षां विधास्यामि जयो येन भविष्यति।
पौलम्यास्तु वचः सर्व्वं कृतवान् बलवृत्रहा॥
पौर्णमास्यां ततः प्रातः पौलोमीकृतमङ्गला।
बबन्ध दक्षिणे पाणौ रक्षापोठलिकां शुभां॥
बद्धरक्षस्ततः शक्रः कृतस्वस्त्ययनो द्विजैः।
आरुह्यैरावतं नागं निर्जगाम सुरारिहा॥
संप्राप्य दानवानीकं नाम विश्राव्य चात्मनः।
पातयामास शत्रूणां शिरांसि निशितैः शरैः॥
तं दृष्ट्वा सहसायातं दानवाः संप्रहर्षिताः।
अभिजग्मुः शितैर्बाणैः शक्रं बर्हिणवाजिनैः॥
उवाच दानवान् सर्व्वान् प्रह्लादो दानवेश्वरः।
दिष्ट्याद्य भवतां प्राप्तिर्वृत्रहा दृष्टिगोचरः॥
* हतेनमेकीकृत्याशु रथवंशेन दानवाः।
रथवंशेन रथसमुदायेन॥
यावन्न नश्यते पापस्तावद्यत्नो विधीयतां।
दानवेश्वरवाक्येन ततस्ते दनुनन्दनाः॥
त्यक्त्वा मौनं महात्मानः शक्रमाहुरहंकृताः।
ततः शचीपतिः क्रुद्धो वज्रमुद्यम्य भास्वरं॥
जघान दानवानीकं क्षणात् कालइव प्रजाः।

---

* एतेनमित्रि पुस्तकान्तर पाठः।

वध्यमानाः सुरेशेन दानवास्ते महाबलाः ॥
अत्यन्तभयसन्त्रस्ताः कालोयमिति मोहिताः ।
केचित्समुद्रं विविशुर्गहनं केचिदाश्रिताः ॥
केचिन्मुण्डितमूर्द्धानो नग्ना भूत्वा वनेऽवसन् ।
दयाधर्म्मं प्रब्रुवाणा निर्ग्रन्थव्रतमाश्रिताः ॥
हेतुवादपरा मूढा वञ्चयन्तः प्रजागणान् ।
एवं निर्ज्जितदैतेयान् शक्रःस्वस्थानमागतः ॥
त्रैलोक्यं पालयामास पूज्यमानः सुरासुरैः ।
हतहर्षा सुरेन्द्रेण शुक्रं शरणमागताः ॥
प्रणम्य कथयामासुर्जितोऽहं समरेऽरिणा ।
आर्षेण हीनवीर्य्येण शक्रेणापि जितो यतः ॥
तस्माद्धिक् पौरुषं लोके दैवं हि बलवत्तरं ।

शुक्र उवाच ।

विषादं मा कृथा दैत्याः कार्य्याणां गतिरीदृशी ।
दैवाद्भवती भूतानां काले जयपराजयौ ॥
सन्धानं सह शक्रेण नेदानीमुचितं भवेत् ।
अजेयः सर्व्वशत्रूणां कृतः शच्या शचीपतिः ॥
रक्षाबन्धप्रभावेण दानवेन्द्रो जितो महान् ।
वर्षमेकं प्रतीक्षध्वं ततः श्रेयो भविष्यति ॥
भार्गवेणैव मुक्तास्ते दानवा विगतज्वराः ।
तस्थुः कालं प्रतीक्षन्तो यथोक्तं गुरुणा तथा ॥
एष प्रभावो रक्षायाः कथितस्ते युधिष्ठिर ।
जयदः सुखदश्चैव पुत्रारोग्यधनप्रदः ॥

युधिष्ठिर उवाच।

क्रियते केन विधिना रक्षाबन्धः सुरोत्तम।
कस्यां तिथौ कदा देव एतन्मे वक्तुमर्हसि॥
यथा यथा हि भगवन् विचित्राणि प्रभाषसे।
तथा तथा न मे तृप्तिर्बह्वर्थाः शृण्वतः कथाः॥

कृष्ण उवाच।

घनावृतेऽम्बरे पार्थ शाद्वले धरणीतले।
संप्राप्ते श्रावणे मासि पौर्णमास्यां दिनोदये॥
स्नानं कुर्व्वीत मतिमान् श्रुतिस्मृतिविधानतः।
ततो देवान् पितृंश्चैव तर्पयेत्परमात्मना॥
उपाकर्म्मादिकं चैवोक्तमृषीणाञ्चैव तर्पणं।
कुर्व्वीत ब्राह्मणः श्राद्धं वेदानुद्दिश्य सुव्रत॥
शूद्राणां मन्त्ररहितं स्नानं दानञ्च शस्यते।
ततोऽपराह्णसमये रक्षापोटलिकां शुभां॥
कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितां।
वस्त्रैर्विचित्रैः कार्पासैः क्षौमैर्व्वा मलवर्ज्जितैः॥
विचित्रतन्तुग्रथितां स्थापयेद्भाजनोपरि।
कार्य्या गृहस्य रक्षा, गोमयोपरचितैः सुवृत्तकुण्डलकैः॥
दूर्व्वावर्णसहितैश्चिरा दुरितोपशमनाय।
उपलिप्ते गृहे देशे दत्तचतुष्के न्यसेत् कुम्भं।
पीठं तस्योपरि विशेत् राजामात्यैर्युतश्च सुमुहूर्त्ते॥
वेश्याजनेन सहितो मङ्गलशब्दैः समुच्छ्रितैश्चिह्नैः।
रक्षाबन्धः कार्य्यः शान्तिध्वनिना नरेन्द्रस्य॥

देवद्विजातिशस्तास्ये रक्षाभिरर्चयेत् प्रथमं।
तदनु पुरोधा नृपतेः रक्षामध्नीत मन्त्रेण॥
येन बद्धो बली राजा दानवेन्द्रो महाबलः।
तेन त्वामभिबध्नामि रक्षे माचल माचल॥
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मानवैः।
कर्त्तव्यो रक्षिकाबन्धो द्विजान् संपूज्य शक्तितः॥
अनेन विधिना यस्तु रक्षाबन्धनमाचरेत्।
स सर्व्वदोषरहितः सुखी सम्वत्सरं भवेत्॥
यः श्रावणे श्रवति शीतजलं सुरेन्द्रे
रक्षाविधानमिदमाचरते मनुष्यः।
आस्ते सुखेन परमेण स वर्षमेकं
स पुत्रपौत्रसहितः ससुहृज्जनश्च॥

इति भविष्योत्तरे रक्षाबन्धन पौर्णमासीव्रतं।

---ooo---

अथ उवाचेत्यनुवृत्तौ।

पञ्च पञ्चदशीः स्थित्वा एकभक्तेन मानवः।
संपूज्य पूर्णिमां देवीं लिखितां चन्दनादिना॥
पूर्णिमाप्रतिमा तु परिभाषायां द्रष्टव्या।
ततः पञ्च घटान् पूर्णान् पयोदधिघृतेन च॥
मधुना सितखण्डेन ब्राह्मणायोपपादयेत्।
मनोरथान् पूरयस्व यथा त्वं पूर्णिमाह्यसि॥
पञ्चकुम्भप्रदानेन भूतानां तुष्टिरस्तु मे।

दानमन्त्रः ।

द्विजानेवं नमस्कृत्य सर्व्वान् कामानवाप्नुयात् ।
एतत् पञ्चघट नाम व्रतं तुष्टिप्रदायकं ॥

इति भविष्योत्तरे पञ्चघटपूर्णिमाव्रतं ।

———000———

कृष्ण उवाचेत्यनुवृत्तौ ।

त्रिंशत्संपूज्य दम्पत्यान्युपवासी विभूषणैः ।
पौर्णमास्यामवाप्नोति मोक्षमिन्द्रव्रतादिह* ॥

इति भविष्योत्तरे इन्द्रपौर्णमासीव्रतं ।

———

शङ्कर उवाच ।

मघत्पूर्व्वा भवत्येषा पौर्णमासी द्विजोत्तम ।
प्रतिसंवत्सरं तस्याः सोपवासो जनार्द्दनं ॥
यः पूजयति धर्म्मज्ञ तेन संवत्सरं हरिः ।
पूजितः पौर्णमासीषु भवतीति विनिश्चयः ॥
तस्यां दानं स्वल्पमपि महद्भवति भार्गव ।
दानं तप जपो होमो यच्चान्यत्सुकृतं भवेत् ॥

भार्गव उवाच ।

संवत्सरे पौर्णमासी मघापूर्व्वा वृषध्वज ।
कथं ज्ञेया जगन्नाथ तन्ममाचक्ष्व पृच्छतः ॥

---

* धर्म्ममिति पुस्तकान्तरे पाठः ।

शङ्कर उवाच।

यस्यां पूर्णेन्दुना योगं याति जीवो महाबलः।
पौर्णमासीति सा ज्ञेया महापूर्व्वा द्विजोत्तमैः॥

जीवो वृहस्पतिः

इति भविष्यत्पुराणे महापौर्णमासीव्रतं।

———ooo———

ऋषय ऊचुः।

श्रुतमेतत्त्वयाख्यातं पशुपाशविमोक्षणं।
व्रतं पाशुपतं लैङ्गं पुरा देवैरनुष्ठितं॥
वक्तुमर्हसि चास्माकं यथापूर्व्वं त्वया श्रुतं।

सूत उवाच।

पुरा सनत्कुमारेण शैलादिः पृष्टवान् प्रभुः।
नन्दो प्राह च तस्मै यत् प्रवक्ष्यामि समासतः॥
देवैर्दैत्यैस्तथा यक्षै र्गन्धर्व्वैः सिद्धचारणैः।
ऋषिभिश्च महाभागैरनुष्ठितमनुत्तमम्॥
व्रतं द्वादशलिङ्गाख्यं पशुपाशविमोक्षणं।
भोगदञ्चैव भक्तानां कामदं मोक्षद शुभम्॥
अवियोगकरं पुण्यं भक्तानां भयनाशनं।
देवैरनुष्ठितं पूर्व्वं ब्रह्मणा विष्णुना तथा॥
कृत्वा कनीयसं लिङ्गं स्थाप्य चन्दनवारिणा।
चैत्रमासादि विप्रेन्द्राः शिवलिङ्गव्रतं शुभम्॥
कृत्वा हैमं शुभं पद्मं कर्णिकाकेसरान्वितम्।

नवरत्नैस्तु खचितमष्टपत्रं यथाविधि॥
कर्णिकायां न्यसेल्लिङ्गं स्फाटिकं पीठसंयुतं।
तत्र भक्त्या यथान्यायमर्चयेद्बिल्वपत्रकैः॥
सितैः सहस्रकमलैरक्तै र्नीलोत्पलैरपि।
जातैरन्यै र्यथालाभं गायत्र्या स्नाप्य सुव्रत॥
संपूज्य चैव गन्धाद्यैर्धूपदीपैश्च मङ्गलैः।
नीराजनीयैश्चान्यैश्च लिङ्गमूर्त्तिं महेश्वरम्॥
अगरुं दक्षिणे दद्यादघोरेण द्विजोत्तमः।
पश्चिमे सद्यमन्त्रेण दद्याच्चैव मनःशिलां॥
उत्तरे वामदेवाय चन्दनञ्चापि दापयेत्।
पुरुषेण मुनिश्रेष्ठ हरितालञ्च पूर्व्वतः॥
सितागुरुद्भवं विप्रा स्तथा कृष्णागुरोर्भवम्।
तथा गुग्गुलधूपञ्च दद्यादीशाय भक्तितः॥
महाचरुं निवेद्यास्मादाढकान्नमथापि वा।
एतद्वः कथितं पुण्यं शिवलिङ्गं महाव्रतं॥
सर्व्वमासेषु सामान्यं विशेषोऽपि च कीर्त्यते।
वैशाखे वज्रलिङ्गन्तु ज्यैष्ठे मरकतं शुभम्॥
आषाढे मौक्तिकं लिङ्गं श्रावणे नीलनिर्मितं।
मासि भाद्रपदे लिङ्गं पद्मरागमयं शुभम्॥
आश्विने चैव विप्रेन्द्रा गोमेदकमयं शुभम्।
प्रवालेन च कार्त्तिक्यां तथा वै मार्गशीर्षके॥
माघे च सूर्य्यकान्तेन फाल्गुने स्फाटिकेन तु।
सर्व्वमासेषु कमलं हैममेकं विधीयते॥

अलाभे राजतञ्चापि बिल्वपत्रैः प्रपूजयेत् ।
रत्नानामप्यलाभे तु हेम्ना वा रजतेन वा ॥
रजतस्याप्यलाभे तु ताम्रलोहेन कारयेत् ।
शैलं वा दारुजं वापि मृन्मयं वा सवेदिकम् ॥
सर्व्वगन्धमयं वापि क्षणिकं परिकल्पयेत् ।
हैमन्तिके महादेवं श्रीपत्रेणैव पूजयेत् ॥

श्रीपत्रं कमलं ।

सर्व्वमासेषु कमलं हैममेकमथापि वा ।
राजतं वापि कमलं हेमकर्णिकमुत्तमम् ॥
रजतस्याप्यलाभे तु बिल्वपत्रैश्च पूजयेत् ।
सहस्रकमलालाभे तदर्द्धेनापि पूजयेत् ॥
तदर्द्धार्द्धेन वा चाष्टोत्तरशतेन वा ।
बिल्वपत्रे स्थिता लक्ष्मीर्देवी लक्षणसंयुता ॥
नीलोत्पले विशालाक्षी उत्पले षण्मुखः स्वयं ।
पाद्यैर्गणैर्महादेवः सर्व्वदेवपतिः शिवः ॥
तस्मात्सर्व्वप्रयत्नेन श्रीपत्रं न त्यजेद्बुधः ।
नीलोत्पलं सितपद्ममुत्पलञ्च विशेषतः ॥
सर्व्ववश्यकरं धारः शिला सर्व्वार्थसिद्धिदा ।
कृष्णागरुसमुद्भूतं सर्व्वपापनिकृन्तनं ॥
गुग्गुलप्रभृतीनाञ्च धूपानाञ्च निवेदनं ।
सर्व्वरोगक्षयकरञ्चन्दनं सर्व्वसिद्धिदं ॥
सौगन्धिकं तथा धूपं सर्व्वकामप्रसाधनं ।
श्वेतागुरुभवञ्चैव तथा कृष्णागुरूद्भवं ॥

सौम्यं सितारधूपञ्च साक्षान्निर्व्वाणसिद्धिदं।
श्वेतार्ककुसुमे साक्षाच्चतुर्व्वक्त्रः प्रजापतिः॥
कर्णिकारस्य कुसुमे मेधा साक्षाद्व्यवस्थिता।
करवीरे गणाध्यक्षो बके नारायणः स्वयं॥
सुष्टुगन्धिषु सर्व्वेषु कुसुमेषु नगात्मजा।
तस्मादेतैर्यथालाभपुष्पैर्धूपादिभिस्तथा।
पूजयेद्देवदेवेशं भक्त्या वित्तानुसारतः।
निवेदयेत्ततो भक्त्या पायसञ्च महाचरुं॥
सघृतं सोपदंशञ्च सर्व्वद्रव्यसमन्वितं।
शुद्धान्नञ्चापि मुद्गान्नं आढक्यन्नमथान्तु वा॥
उपहाराणि पुष्पाणि न्यायेनैवार्ज्जितानि च।
नानाविधानि चान्नानि प्रोक्षितान्यम्भसा ततः॥
क्षीराज्यैः सर्व्वदेवानां स्थित्यर्थममृतं कृतं।
विष्णुना जिष्णुना साक्षात्तोयेषु सुप्रतिष्ठितं॥
तस्मात्संपूजयेद्देवमन्ने प्राणः प्रतिष्ठितः।
उपहारे तथा पुष्टिर्व्यजने पवनः स्वयं॥
सर्व्वात्मको महादेवो गन्धतोये ह्यपांपतिः।
पटे वै प्रकृतिः साक्षान्महादेवो व्यवस्थिता॥
तस्माद्देवं यजेद्भक्त्या प्रतिमासं यथाविधि।
पौर्णमास्यां पौर्णमास्यां सर्व्वकार्य्यार्थसिद्धये॥
सत्यं शौचन्दयाक्षान्तिः सन्तोषो दानमेव च।
पौर्णमास्यां तथा विप्रा उपवासञ्च कारयेत्।
सम्वत्सरान्ते गोदानं वृषोत्सर्गं विशेषतः॥

भोजयेद्ब्राह्मणान् भक्त्या श्रोत्रियान् वेदपारगान् ।
तल्लिङ्गं पूजितं तेन सर्व्वद्रव्यसमन्वितं ॥
स्थापयेद्वा शिवक्षेत्रे दद्याद्वा* ब्राह्मणाय च ।
एवं सर्व्वेषु मासेषु शिवलिङ्गं महाव्रतं ॥
कुर्य्याद्भक्त्या मुनिश्रेष्ठास्तदेव तपसां परं ।
सूर्य्यकोटिप्रतीकाशैर्व्विमानै रत्नभूषितैः ॥
गत्वा शिवपुरं दिव्यं नेहायाति कदाचन ।
अथ वा ह्येकमासेऽपि† च चरेदेवं व्रतोत्तमं ॥
शिवलोकमवाप्नोति नात्र कार्य्या विचारणा ।
अथवापि वित्तहीनस्तल्लिङ्गं चिन्तयेन्नरः ॥
वर्षमेकं वरं देवं स्थानं प्राप्य शिवं व्रजेत् ।
देवत्वञ्च पितृत्वञ्च देवराजत्वमेव च ॥
गाणपत्यं पदं वापि शक्तोपि लभते नरः ।
विद्यार्थी लभते विद्यां भोगार्थी भोगमाप्नुयात् ॥
द्रव्यार्थी च धनं पुत्त्रआयुः कामांश्च नित्यजान् ।
यान्यांश्चिन्तयते कामांस्तांस्तान् प्राप्येह मोदते ॥
एकमासव्रतादेव चान्ते रुद्रमवाप्नुयात् ।

इदं पवित्रं परमं रहस्यं
व्रतोत्तमं विश्वसृजा च दृष्टं ।
हिताय देवासुरमर्त्त्यमिद्ध
विद्याधराणां परमं शिवेन ॥

---

* दापयेदिति पुस्तकान्तरे पाठः ।

† अथवाप्येकमासेति पुस्तकान्तरे पाठः ।

संपूज्य देवं विधिनैव मौशं
प्रणम्य मूर्ध्ना सह भृत्यपुत्रैः।
व्यपोहनं नाम जपस्तवञ्च
प्रदक्षिणीकृत्य शिवं प्रयत्नात्॥
पुरा कृतो विष्णुकृता स्तवश्च
हिताय देवेन जगत्त्रयस्य।
पितामहेनैव सुरेन्द्रनाथैः
महानुभावात्तु महार्हमेतत्॥

अधिकृत्य स्तवं वक्ष्ये सर्वसिद्धिप्रदं शुभं।
नन्दिनश्च मुखात् श्रुत्वा कुमारेण महात्मना॥
व्यासेन कथितं तस्मादृहुमानेन वा श्रुतं।
नमः शिवाय शुद्धाय निर्मलाय यशस्विने॥
दुष्टान्तकाय सर्व्वाय भवाय परमात्मने।
पञ्चवक्त्रो दशभुजो ह्यक्षिपञ्चदशैर्युतः॥
शुद्धस्फटिकसङ्काशः सर्व्वाभरणभूषितः।
सर्व्वज्ञः सर्व्वगः शान्तः सर्व्वोपरि सुसंस्थितः।
पद्मासनस्थः सोमोऽयं पापमाशु व्यपोहतु॥
ईशानः पुरुषश्चैव अघोरः सद्य एव च।
वामदेवश्च भगवान् पापमाशु व्यपोहतु॥
अनन्तः सर्व्वविद्येशः स मे पापं व्यपोहतु।
एको रुद्रो लोकगुरुस्त्रैलोक्यानुमितो विभुः॥
शिवध्यानैकसंपन्नः स मे पापं व्यपोहतु।
त्रिमूर्त्तिर्भगवानीशः शिवभक्तिप्रबोधकः।

शिवध्यानैकसम्पन्नः स मे पापं व्यपोहतु ॥
श्रीकण्ठः श्रीपतिः श्रीमाञ्छिवध्यानरतः सदा ।
शिवार्च्चनरतः साक्षात्स मे पापं व्यपोहतु ॥
शिखण्डी भगवान् शान्तः शिवभस्मानुलेपनात् ।
शिवार्च्चनरतः श्रीमान् स मे पापं व्यपोहतु ॥
त्रैलोक्यनमिता देवी श्रींकारा च पुरातनी ।
दाक्षायणी महादेवी गौरी हैमवती शुभा ॥
एकवर्णाग्रजा माया पाटलायास्तथैव च ।
अपर्णा वरदा देवी वरदानैकतत्परा ॥
उमासुरहरी साक्षात् कौशिकी पापमर्द्दिनी ।
खट्वाङ्गधारिणी देवी करायतनुपल्लवे ।
नैष्कर्म्म्यकादिभिर्द्दिव्यैस्तनुभिः पुनकैर्वृता ॥
मेनया नन्दया देवी कालिका वारिजेक्षणा ।
अम्बा या वीतशोकस्य नन्दिनश्च महात्मनः ।
शुभावत्या सुशीर्षा वा पञ्चचूडा वरप्रदा ॥
सृष्ट्यर्थं सर्व्वभूतानां प्रकृतिश्च गताव्यया ।
त्रयोविंशतिभिस्तत्त्वैर्महदाद्यैर्व्विजृम्भिता ॥
लक्ष्म्यादिशक्तिभिर्नित्यं नमिता नगनन्दिनी ।
मनोन्मनी महादेवी मायावी मण्डनप्रिया ।
मायया हि जगत्सर्व्वं ब्रह्माद्यं सचराचरं ॥
क्षोभणी मोहनी नित्यं योगिनीहृदि संस्थिता ।
एकादशे स्थिता लोके इन्दीवरनिभेक्षणा ॥
भक्त्या परमया नित्यं सर्व्वदेवैरभिष्टुता ।

गणेन्द्राम्भोजगर्भेन्द्रयमवित्तेशपूर्व्वकैः ॥
सम्भूता जननी तेषां सर्व्वोपद्रवनाशिनी।
भक्तानामार्त्तिहा भव्या भवभावविलासिनी॥
भुक्तिदा मुक्तिदा देवी भक्तानामभयप्रदा।
सा मे साक्षादुमा देवी पापमाशु व्यपोहतु॥
चण्डः सर्व्वगणेशानो मुखाच्छम्भोर्व्विनिःसृतः।
शिवार्च्चनरतः श्रीमान् स मे पापं व्यपोहतु॥
शालङ्कायनपुत्रस्तु हलमार्गे स्थितः प्रभुः।
याम्यतां मनुतान्देवः सर्व्वभूतगणेश्वरः॥
सर्व्वदः सर्व्वगः सर्व्वप्रभवः प्रभुरीश्वरः।
सनारायणकैर्द्देवैः सेन्द्रचन्द्रदिवाकरैः॥
सर्व्वैश्च यक्षगन्धर्व्वैर्भूतैर्भूतिविधायकैः।
उरगैर्ऋषिभिश्चैव ब्रह्मणा च महात्मना॥
स्तुतस्त्रैलोक्यनाथस्तु मुनिरन्तः पुरे स्थितः।
सर्व्वदा पूजितः सर्व्वैर्नन्दी पापं व्यपोहतु॥
महाकालो महातेजा महादेवइवापरः।
शिवार्च्चनरतः श्रीमान् स मे पापं व्यपोहतु॥
वृषभो मुनिशार्दूलः शिवध्यानपरायणः*।
शिवार्च्चनरतो नित्यं स मे पापं व्यपोहतु॥
मेरुमन्दरसङ्काशमनवकोटिप्रमाणतः।
ऐरावतादिभिर्द्दिव्यैर्द्दिव्यैर्योगसमन्वितैः॥
यथा हृत्पुण्डरीकाद्येस्तस्मै हस्तिं निवध्य च।

---

* प्रभावत इति पुस्तकान्तरे पाठः।

गजेन्द्रवक्त्रो यः साक्षाद्रा समपाताल पादकः ॥
समद्वीपोभुजङ्गकाः।
समार्णवकुक्ष्यश्चैव सर्व्वतीर्थानुगः शिवः।
आकाश वा देवो दिवो दिग्बाहुः सोमसूर्य्याग्निलोचनः ॥
हतासुरा महाक्षया महाविद्या महोत्कटा।
अघोरा भारवैर्दिव्यै र्योगपाशसमन्वितः ॥
हरो ह्रत्पुण्डरीकाक्षस्तान्ते हन्तिनिहन्ति च।
गजेन्द्रवक्त्रो यः साक्षाद्ब्रह्मकोटिशतैर्वृतः॥
शिवध्यानैकसम्पन्नः स मे पापं व्यपोहतु।
भृगीशः पिङ्गलाक्षोऽसौ भसितासितदेहयुक्॥
शिवार्च्चनरतः श्रीमान् स मे पापं व्यपोहतु।
चतुर्भिस्तनुभिर्नित्यं सर्व्वारिविनिमर्द्दनः॥
स्कन्दः शक्तिधरः शान्तः सेनानीर्गजवाहनः।
शिवासेनापतिः श्रीमान् स मेपापं व्यपोहतु ॥
मन्थागर्व्वस्तथेशानो रुद्रः पशुपतिस्तथा।
उग्रो भीमो महादेवः शिवार्च्चनरतः सदा।
येते पापं व्यपोहन्तु मूर्त्तयः परमेष्ठिनः॥
महादेवः शिवो रुद्रः शतमुर्नीललोहितः'।
ईशानो विजयो भीमो देवदेवोभवोद्भवः ॥
कपीशश्चदिवाकरः।
एतेवै भैरवाद्यास्तु रुद्रारुद्रसमा भवाः।
शिवप्राणसमापन्ना व्यपोहन्तु मलं मम॥
वैकर्त्तनो विवस्वांश्च मार्त्तण्डो भास्करो रविः।

लोकप्रकाशकश्चैव लोकसाक्षी त्रिविक्रमः ॥
आदित्यश्च तथा सूर्य्यः अंशुमांश्च दिवाकरः।
एते वै द्वादशादित्या अपोहन्तु मलं मम ॥
गगनःस्पर्शनस्तेजो रसश्च पृथिवीचया।
चन्द्रः सूर्य्यस्तथा चात्मा वसवः शिवभाविताः ॥
पापं अपोहन्तु मलं भयं नानाविधं मम।
वसवः पावकश्चैव चयोनैर्ऋतिरेवच ॥
वरुणो वायुः सोमश्च ईशानो भगवान् हरिः।
पितामहश्च भगवान् शिवध्यानपरायणः ॥
एते पापं अपोहन्तु मनसा कर्म्मणा कृतं।
गभस्तिश्चार्य्यमो वायुरनिलो मरुतस्तथा ॥
प्राणोपानश्च जीवेशो मरुतश्चैव भाषिताः ॥
शिवार्चनरतः सर्व्वो अपोहन्तु मलं मम।
खेचरी वसुचारी च ब्रह्मणा ब्रह्मवित्सुधीः ॥
सुषेणः शाश्वतः पुष्टः अपुष्टश्च महाबलः।
एते वै चारणाः शम्भोः पूजयातीव शोभिनः ॥
अपोहन्तु मलं सर्व्वं पापञ्चैव मया कृतं।
मन्त्रज्ञो मन्त्रवित्प्राज्ञो हंसराट् सिद्धपूजितः ॥
सिद्धिविस्तरमः सिद्धिः सर्व्वं सिद्धिप्रदायिनः।
अपोहन्तु मलं सर्व्वं सिद्धाः शिवपदार्चकाः ॥
यक्षो यक्षेशधनदो जम्भको मणिभद्रकैः।
पूर्णभद्रःखेरमालो शिविः पुष्कलिरेव च ॥
नरेन्द्रश्चैव यक्षेशा अपोहन्तु मलं मम।

अनन्तः कुलिकश्चैव वासुकिस्तक्षकस्तथा ॥
कर्कोटको महापद्मः शङ्खपालो महाबलः ।
शिवप्रणामसम्पन्नः शिवदेवप्रभूषणः ॥
मलं पापं व्यपोहन्तु विषं स्थावरजङ्गमं ।
वीणाज्ञः किन्नरश्चैव शूरसेनः प्रमर्दनः ॥
अतिशयः सुप्रभोगी गीतश्चेति किन्नराः ।
शिवप्रणामसम्पन्ना व्यपोहन्तु मलं मम ॥
विद्या विनीता विद्याशीराशिर्व्वेदविदाम्बरः ।
प्रबुद्धो विबुधः श्रीमान् कृतज्ञश्च महायशाः ॥
एते विद्याधराः सर्व्वे शिवध्यानपरायणाः ।
व्यपोहन्तु मलं सर्व्वं महादेवप्रसादतः ॥
हयग्रीवो महाजम्भः कालनेमिर्महायशाः ।
सुग्रीवो मर्द्दकश्चैव पिङ्गलो देवमर्द्दनः ॥
प्रह्लादश्चानुह्लादश्च शिविर्बाष्कल एव च ।
कुम्भकुम्भो च मायावी कार्त्तवीर्य्यः कृतञ्जयः ॥
एते सुरा महात्मानो महादेवपरायणाः ।
व्यपोहन्तु महाघोरं पापभारं ममैव च ॥
गरुत्मांश्च हरिश्चैव पक्षिराजोऽतिमर्द्दनः ॥
नागप्रस्तु हिरण्याभो वैनतेयः प्रभञ्जनः ।
नागानां विषनाशश्च विष्णुवाहन एव च ॥
एते हिरण्यवर्णाभा गरुडा विष्णुवाहनाः ।
नानाभरणसम्पन्ना व्यपोहन्तु भयं मम ॥
अगस्त्यश्च वसिष्ठश्च अङ्गिरा भृगुरेव च ।

कश्यपो नारदश्चैव दधीचिश्च्यावनस्तथा।
उपमन्युस्तथान्ये च ऋषयः शिवभाविताः।
शिवार्चनरता घ्नन्तु मनसा कर्मणा कृतं॥
गभस्तिश्चाशनी वायुरनिलो मरुतस्तथा।
प्राणः प्राणेशजीवेशौ जीवो मरुत एव च॥
शिवार्चनरताः सर्वे व्यपोहन्तु मलं मम।
खेचरी वसुचारी च ब्रह्मेशा ब्रह्मविद्बुधीः॥
पितरः पितामहाश्चैव तथैव प्रपितामहाः।
अग्निष्वात्ता बर्हिषदस्तथा मातामहादयः॥
व्यपोहन्तु भयं पापं शिवध्यानपरायणाः।
लक्ष्मीश्च धरणी चैव गायत्री च सरस्वती॥
दुर्गा उमा शची ज्येष्ठा मातरः सुरपूजिताः।
देवतानां मताश्चैव गणा मातामहादयः॥
व्यपोहन्तु भयं पापं शिवध्यानपरायणाः।
लक्ष्मीश्च धरणी चैव गणानां मातरस्तथा॥
भूतानां मातरः सर्व्वाः पन्नगा गणमातरः।
प्रसादाद्देवदेवस्य व्यपोहन्तु भयं मम॥
उर्व्वशी मेनका चैव रम्भा चैव तिलोत्तमा।
सुमुखी दुर्म्मुखी चैव कामुकी कामवर्द्धिनी॥
तथान्याः सर्व्वलोकेषु दिव्याश्चाप्सरसः शुभाः।
शिवाय ताण्डवं नित्यं कुर्व्वन्ति शिवभाविताः॥
गेये शिवार्चनरता व्यपोहन्तु मलं ममः।
अर्कः सोमोऽङ्गारकश्च बुधश्चैव बृहस्पतिः॥

शुक्रः शनैश्चरश्चैव राहुः केतुर्म्महाबलः।
व्यपोहन्तु भयं घोरं शिरःपीडां शिवार्च्चकाः।
मेषो वृषोऽथ मिथुनं तथा कर्कटकाः शुभाः॥
सिंहश्च कन्या विपुला तुला वै वृश्चिकस्तथा।
धनुश्च मकरश्चैव कुम्भो मीनस्तथैव च॥
राशयो द्वादशैवैताः शिवपूजापरायणाः।
व्यपोहन्तु परं पापं प्रसादात्परमेष्ठिनः।
अश्विनी भरणी चैव कृत्तिका रोहिणी तथा॥
श्रीमान्मृगशिरास्त्वार्द्रा पुनर्व्वसुपुष्यसर्पकाः।
मघा वै पूर्व्वफाल्गुन्या उत्तराफाल्गुनी तथा॥
हस्ता चित्रा तथा स्वाती विशाखा चानुराधका।
ज्येष्ठा मूलं महाभागा पूर्व्वाषाढ़ा तथैव च॥
श्रवणश्च धनिष्ठा च तथा शतभिषापि च।
पूर्व्वभाद्रपदा चैव तथा प्रोष्ठपदा शुभाः।
पौष्णा च देव्या सततं व्यपोहन्तु मलं मम।
ज्वरङ्कुशोदकश्चैव शतकर्णो महाबलः॥
महाकर्णः प्रभूतश्च प्रभुर्व्वा प्रीतिवर्द्धनाः।
कोटिकोटिशतैश्चैव भूता नो परिवारिताः॥
व्यपोहन्तु भयं पापं महादेवप्रसादतः।
शिवध्यानैकसम्पन्नाः शिशिरा इन्दुमूर्त्तिभाः॥
कुन्देन्दु सदृशाकाराः कुन्देदुवडवामुखः।
वडवामुख्यशत्रुर्य्योवडवामुखभेदनः।
वपुष्यांश्चैव सदभक्तः क्षीराद् इव पाण्डुरः।

रुद्रलोके स्थितो नित्यं रौद्रैः सार्द्धं स्थितो गणैः।
वृषेन्द्रोविस्तृतिर्द्देवोविश्वस्य जगतः पिता॥
वृतोनन्दादिभिर्नित्यं मातृभिर्म्मेषमर्द्दनः।
शिवार्च्चनरतो नित्यं मम पापं व्यपोहतु॥
गवां माता जगन्माता रुद्रलोके व्यवस्थिता।
माता गवां महाभागा सम मे पापं व्यपोहतु।
सुशीला शीलसम्पन्ना शिवभक्तिपरायणा।
शिवलोके स्थिता नित्यं सा मे पापं व्यपोहतु।
वेदशास्त्रार्थसर्व्वज्ञः सर्व्वशास्त्रार्थचिन्तकः॥
समस्तगुणसम्पन्नः सर्व्वदेवेश्वरोऽमरः।
ज्येष्ठः सर्व्वेश्वरः सौम्यो महाविष्णुचतुष्टयं॥
आद्यः सेनापतिः शास्ता मोदते मेषमर्द्दनः।
ऐरावतगजारूढ़ः कृष्णकुञ्चितमूर्द्धजः॥
कृष्णगौराङ्गनयनः शशिपन्नगभूषणः।
एतैः प्रेतैः पिशाचैश्च कूष्माण्डैश्चैव संवृतः॥
शिवार्च्चनरतः साक्षात्स मे पापंव्यपोहतु।
ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा॥
वाराही चैव माहेन्द्री चामुण्डाग्नायिका तथा।
एता वै मातरः सर्व्वाः सर्व्वलोकप्रपूजिताः॥
योगिनीभिर्म्महापापं व्यपोहन्तु समाहिताः।
वीरभद्रो महातेजा हिमकुन्देन्दुसन्निभः॥
रुद्रस्य तनयो रौद्रः शूलासक्तमहाकरः।
सहस्रबाहुः सर्व्वज्ञः सर्व्वायुधधरः स्वयं॥

त्रेताग्निनयनोपेतो त्रैलोक्याभयदः प्रभुः ।
मातॄणां रक्षको नित्यं महावृषभवाहनः ॥
त्रैलोक्यनमितः श्रीमान् शिवपादार्चने रतः ।
यज्ञस्य च शिरश्छेत्ता पूषदन्तविनाशनः ॥
वह्नेर्हस्तहरातः साक्षाद्भगनेत्रनिपातनः ।
गणेश्वरो यशो नारी स मे पापं व्यपोहतु ॥
ज्येष्ठा वरिष्ठा वरदा सर्व्वाभरणभूषिता ।
महालक्ष्मीर्जगन्माता सा मे पापं व्यपोहतु ।
महामोहा महाभागा महाभूतगणैर्वृता ।
शिवार्चनरता नित्यं सा मे पापं वपोहतु ॥
लक्ष्मीः सर्व्वगुणोपेता सर्व्वलक्षणलक्षिता ।
शर्म्मदा सर्व्वदा देवी सा मे पापं व्यपोहतु
सिंहारूढ़ा महादेवी महिषासुरमर्द्दिनी ॥
शिवार्चनरता रुद्रा मम पापं व्यपोहतु ।
रुद्राणी रुद्रदयिता ब्रह्माण्डगणनायका ।
कुष्माण्डेति मे पापं व्यपोहन्तु समाहिताः ॥
अनेन देवीं स्तुत्वा तु चान्ते सर्व्वं समापयेत् ।
प्रणम्य शिरसा भूमौ प्रतिमासं द्विजोत्तमाः
व्यपोहन स्तवमिमं यः पठेत् शृणुयादपि ।
विधूय सर्व्वपापानि रुद्रलोके महीयते ।
कन्यार्थी लभते कन्यां जयकामो जयं लभेत् ॥
अर्थकामो लभेदर्थं पुत्रकामो बहून् सुतान् ।
विद्यार्थी लभते विद्यां भोगार्थी भोगमाप्नुयात् ॥

यान् यान् कामान् प्रार्थयते यज्ञानाञ्चैव यत्फलं।
दानानाञ्चैव यत्पुण्यं व्रतानाञ्च विशेषतः॥
तत्पुण्यं कोटिगुणितं जप्त्वा प्राप्नोति मानवः।
गोघ्नश्चैव कृतघ्नश्च वीरहा ब्रह्महा तथा॥
शरणागतघातीच मित्रविश्वासघातकः।
दुष्टः पापसमाचारो मातृहा पितृहा तथा॥
निहत्य सर्व्वपापानि शिवलोके महीयते।

इति लिङ्गपुराणोक्तं माघ्यपौर्णमं पाशुपतव्रतं।

भगवन् श्रोतुमिच्छामि व्रतं पाशुपतं वरं।
ब्रह्मादयोऽपि यत् कृत्वा सर्व्वे पाशुपताः स्मृताः॥

वायुरुवाच।

रहस्यं यत् प्रवक्ष्यामि सर्व्वपापनिकृन्तनं।
व्रतं पाशुपतं श्रेष्ठं मया च शिरसि श्रुतं॥
कालश्चैत्रपौर्णमासी देशः शिवपरिग्रहः।
क्षेत्रारामादिरन्यो वा प्रशस्तः शुभलक्षणः॥
तत्र पूर्व्वत्रयोदश्यां सुस्नातस्तु कृताह्निकः।
अनुलाप्यं समाचार्य्यं संपूज्य प्रणिपत्य च॥
पूजां स्वशाखिकीं कृत्वा शुक्लाम्बरधरः स्वयं।
शुक्लयज्ञोपवीती च शुक्लमाल्यानुलेपनः॥
दर्भासने समासीनो दर्भमुष्टिं प्रगृह्य च।
प्राणायामत्रयं कृत्वा प्राङ्मुखोवाप्युदङ्मुखः॥

ध्यात्वा देवञ्च देवीञ्च तद्विज्ञापनवर्त्मना ।
व्रतमेतत् करोमीति भवेत्सङ्कल्प्य दीक्षितः ॥
यावत् शरीरपातञ्च द्वादशाब्दमथापि वा ।
तदर्द्धं वा तदर्द्धं वा मासद्वादशकन्तु वा ।
तदर्द्धं वा तदर्द्धं वा मासमेकं मथापि वा ।
दिनद्वादशकं वात्र व्रतसङ्कल्पनं विधिः ॥
समिद्धमग्निमाधाय विरजा होमकारणात् ।
हुत्वाज्येन समिद्भिश्च चरुणा च यथा क्रमं ॥
पूर्णायाः पुरतो भूप तत्त्वानां शुद्धिमुद्दिशेत् ।
जुहुयान्मूलमन्त्रेण तारे च समिधादिभिः ॥
तत्त्वान्येतानि मद्देहे शुद्धान्यन्यानि संस्मर ॥
पञ्चभूतानि तत्त्वानि पञ्चपञ्चेन्द्रियाणि च ।
ज्ञानकर्म्मविभेदेन पञ्च पञ्च विभागशः ॥
त्वगादिधातवः सप्त पञ्चप्राणादिवायवः ।
मनश्चाहं* कृतं तद्वन्निर्गुणौ प्रकृतिपूरुषौ ॥
रागोविद्या कला चैव नियतिः काल एव च ।
मायाच शुद्धविद्याच महेश्वरसदाशिवौ ।
शक्तिश्च शिवतत्त्वानि तानि च क्रमशो विदुः ॥
मन्त्रैस्तु विरजो हुत्वा होतास्तैर्लिङ्गतो भवेत् ।
अथ गोमयमादाय पिण्डीकृत्य निमन्त्र्य च ॥
अस्याये तन्तु संरक्ष्य दिने तस्मिन् हविष्यभुक् ।
प्रभाते च चतुर्द्दश्यां तच्च सर्व्वं यथोदितं ॥

---

* मनश्चाहं कृतमहङ्कारमिति पुस्तकान्तरे पाठः ।

दिने तस्मिन् निराहारः कालशेषं समापयेत्।
प्रातः पर्व्वणि वाप्येवं हुत्वा होमञ्च तत्त्वतः।
उपसंहृत्य रुद्राग्निं गृह्णीयाद्भस्म पावतः॥
ततस्तु जटिलो मुण्डः शिखैव कजएव च।
हुत्वा स्नौ तु पुनर्व्वीतलज्जश्च स्याद्दिगम्बरः।
अन्यः कषायवसनश्चर्म्मचीराम्बरो यथा॥
रक्ताम्बरो वल्कली च भवेद्दण्डी च मूषली।
प्रक्षाल्य चरणौ पश्चाद्दिराचम्यात्मनस्तनुं॥
सकली कृत्य तद्भस्म विटजामलसम्भवं।
अग्निरित्यादिभिर्म्मन्त्रैः षड्भिराथर्व्वणैः क्रमात्
निर्म्मथ्याङ्गानि मूर्द्धादिचरणान्तञ्च संस्पृशेत्।

अग्निरिति भस्मवायुरिति भस्मजलमिति भस्मस्थलमिति भस्मसर्व्वं हुत्वा इदंभस्मणाङ्गएतानि चक्षुषि इत्याथर्व्वण मन्त्राः षट्॥

ततस्तेन क्रमेणैव समुन्मृल्य च भस्मनः।
सर्व्वाङ्गोद्दलनं कुर्य्यात् प्रणवेन शिवेति च॥
तत स्त्रिपुण्ड्रं रचयेत्त्रिरायुषसमाह्वयं।
शिवभाव समागम्य शिवयोगमथाचरेत्॥
कुर्य्यात्त्रिसन्ध्यमित्येवमेतत्पाशुपतं व्रतं।
भुक्तिमुक्तिप्रदञ्चैतत् पशुत्वं विनिवर्त्तयेत्॥
तत्पशुत्वं परित्यज्य कृत्वा पाशुपतं व्रतं।
पूजनीयो महादेवो लिङ्गमूर्त्तिः सनातनः॥
पद्ममष्टदलं हैमं नवरत्नैरलङ्कृतं।

कर्णिकाकेशरोपेतमग्रमं परिकल्पयेत्॥
श्वेतकृष्णनिभं भानुं सित रक्तमथापि वा।
पद्मं तस्याप्यभावे तु केवलं भावनामयं॥
पद्मस्य कर्णिकामध्ये क्षत्वा लिङ्गं कनीयसं।
स्फाटिकं पीठको पेतं पूजयेदन्वितः क्रमात्॥
प्रतिष्ठाप्य विधानेन लिङ्गं क्षतसुशोभनं।
परिकल्प्यासने मूर्त्तिंपञ्चवक्रं प्रभाकरं।
पञ्चगव्यादिभिः पुण्यैर्यथाविभवसंभृतैः॥
स्नापयेत् कलशैः पूर्णैः सहस्राणि समम्भवैः।
गन्धद्रव्यैः सकर्पूरैश्चन्दनाद्यैश्च कुङ्कुमैः॥
सवेदिकं समालिप्य लिङ्गं भूषणभूषितं।
विल्वपत्रैश्च पद्मैश्च वाथ रक्तैस्तथोत्पलैः॥
उत्पलैर्नीलोत्पलैः।
नीलोत्पलैस्तथान्यैश्च पुष्पैस्तैस्तैः सगन्धिभिः।
पुष्पैः प्रशस्तैश्चैतैश्च पुष्पैर्दूर्व्वाक्षतादिभिः॥
समभ्यर्च्य यथालाभं महापूजाविधानतः।
धूपं दीपं तथा चार्घ्यं नैवेद्यञ्च विशेषतः॥
निवेदयित्वा विधिवत् कल्याणञ्च समाचरेत्।'
इष्टानि च विशिष्टानि न्यायेनोपार्जितानि च॥
सर्व्वद्रव्याणि देयानि व्रतेत्वस्मिन्विशेषतः।
(श्रीपत्रोत्पलपद्मानां सङ्ख्यामाह त्रिकामता॥)
प्रत्येकममणव्यापितमष्टोत्तरं द्विजाः।
तत्रापि च विशेषान् यद्बिल्वपत्रकं परं प्राहुः॥

परान् पद्मसहस्रकान् नीलोत्पलादिष्टोत्पलकमानं बिल्वपत्रकं॥
पुष्पान्तरे न नियमो यथालाभं प्रपूजयेत्।
अष्टाङ्गमर्घ्यमुत्कृष्टं धूपदीपौ विशेषतः॥
कृष्णागरुरघोराख्ये रक्ता सद्यमनःशिला।
चन्दनं वामदेवाख्ये मुखे कृष्णागुरुः पुनः॥
पौरपेगुग्गुलं सव्ये सौम्ये सौगन्धिके मुखे।
ईशानेऽपि तु सीतादीन् दद्याद्धूपं विशेषतः॥
शर्करा मधुकर्पूरं कपिलाघृतसंयुतं।
चन्दनागुरुकुष्ठाख्य माल्यं वै सम्प्रचक्षते।
कर्पूरवर्त्तिजोपाद्या देवी दीपावलिस्ततः॥
अघोरचन्दनन्देयं प्रतिचक्रमतः परं।
प्रथमावरणे पूज्य क्रमाद्विवखरामुखौ।
ब्रह्माङ्गानि ततश्चैवं प्रथमावरणेऽर्चयेत्।
द्वितीयावरणे पूज्या विघ्नेशाश्चक्रवर्त्तिनः॥
तृतीयावरणे पूज्या भवाद्याश्चाष्टमूर्त्तयः।
महादेवादयस्तत्र तथैकादशमूर्त्तयः॥
चतुर्थावरणे पूज्याः सर्व्व एव गणेश्वराः।
बहिरेव तु पद्मस्य पञ्चमे ज्योतिषांगणः॥
सर्व्वे देवाश्च देव्यश्च सर्व्वाः सर्व्वेऽपि खेचराः।
पातालवासिनश्चैव सर्वे मुनिगणा अपि॥
योगिनो मुरवः सर्व्वे पञ्चगोमातरस्तथा।
क्षेत्रपालाश्च सगणाः सर्व्वं चैतच्चराचर॥
पञ्चावरण पूजान्ते संपूज्य परमेश्वरम्।

शय्यासनं स्रजं द्रव्यं हविर्भक्त्या निवेदयेत् ॥
मुखवासादिद्रव्याणां ताम्बूलं सोपदंशकं ।
अलंकृत्य च भूपोऽपि नानायुक्तविभूषणैः ॥
नीराजनान्तां विस्तीर्य पूजाशेषं समापयेत् ।
क्रमुकं सोपदंशञ्च शयनञ्च समर्पयेत् ॥
यद्यत् यस्य हितं द्रव्यं तत्सर्वमनुरूपतः ।
कृत्वा च कारयित्वा च स्थित्वा च प्रतिपूजनं ॥
स्तोत्रव्ययोद्दृत्तं जप्त्वा विद्यां पञ्चाक्षरीं जपेत् ।
(पञ्चाक्षरी विद्या च वायुसंहितोक्ता ।)
अस्याः परमविद्यायाः स्वरूपमधुनोच्यते ।
आदौ नमः प्रयोक्तव्यं शिवायेति ततःपरं ।
सैषा पञ्चाक्षरी विद्या सर्वश्रुतिशिरोगता ।
शब्दजो तस्य सर्वस्य बीजभूतः समासतः ॥
प्रथमं तन्मुखाद्दीर्णा मम सैवात्मवाचिका ।
तप्तचामीकरप्रख्या पीनोन्नतपयोधरा ॥
चतुर्भुजा त्रिनयना बालेन्दुकृतशेखरा ।
पद्मोत्पलधरा सौम्या वरदाभयपाणिका ॥
सर्वलक्षणसम्पन्ना सर्वाभरणभूषिता ।
सितपद्मासनासीना नीलकुञ्चितमूर्द्धजा ॥
अस्याः पञ्चविधावर्णाः प्रस्फुरद्रश्मिमण्डलाः ।
पीतकृष्णास्तथा धूम्रवर्णाभारक्तएव च ॥
पृथक् प्रयुक्तायेवैता बिन्दु नादविभूषिता ।
अर्द्धचन्द्राकृति बिन्दुनाददीपशिखाकृतिः ॥

बीजं द्वितीयबीजेषु मन्त्रस्यास्य वरानने।
दीर्घपूर्वंतुरीयस्य पञ्चमं शक्तिमादिशेत्॥
वामदेवोनाम ऋषिः पङ्क्तिश्छन्दश्च आदितः।
देवताशिवएवाहं मन्त्रस्यास्य वरानने॥
उमाच वै वरारोहा विश्वामित्रस्तथाङ्गिराः।
भारद्वाजश्च वर्णानां क्रमश्च ऋषयः स्मृताः॥
गायत्र्यनुष्टुप्त्रिष्टुप च च्छन्दांसि बृहतीविराट्।
इन्द्रोरुद्रोहरिर्ब्रह्मास्कन्दस्तेषां च देवताः॥
मम पञ्च मुखान्याहुः स्थाने तेषां वरानने।
पूर्व्वादिर्वाद्र्ध्वपर्य्यं तं नकारादि यथा क्रमं॥
उदात्तः प्रथमोवर्णं चतुर्थश्च द्वितीयकः।
पञ्चमःस्वरितश्चैव मध्यमोनिहतः स्वयं॥
मूलविद्या शिवं शैवं सूत्रं पञ्चाक्षरं तथा।
नामान्यस्य विजानीयाद्देवं मे हृदयं मतं॥
नकारःशिव उच्येत मकारस्तु शिखोच्यते।
शकारः कवचं तद्वद्वाकारोनेत्रउच्यते॥
यकारोस्त्रं नमः स्वाहावषट्हुंवौषडित्यतः।
फडित्यपि च वर्णानामन्ते ङ्गत्वं यदा तदा॥
तत्रापि मूलमन्त्रोऽयं किञ्चिद्भेदमन्वितं।
तत्राप्यपञ्चमोवर्णो द्वादशस्वरभूषितः॥
तस्मादनेन मन्त्रेण मनोवाक्कायभेदतः।
शिवयोरर्चनं कुर्य्यात् जपहोमादिकं तथा॥
प्रदक्षिणं प्रणामञ्च कृत्वा स्थानं समर्चयेत्।

ततः पुरस्ताद्देवस्य हुविर्येण प्रपूजयेत् ॥
दत्त्वार्घ्यपुष्टो पुष्पाणि देवमुद्दिश्य लिङ्गतः।
अभिषाभिष संरक्ष यथा देवस्य नामतः ॥
प्रत्यहं जगयत्नेवं कुर्य्यात् सर्वं पुरोहितः।
ततस्तस्यास्बुजं लिङ्गं सर्व्वोपकरणान्वितं ॥
समर्पयेत्सगुरवे स्थापयेद्वा शिवालये।
संपूज्य च गुरूनन्यान् व्रतिनश्च विशेषतः॥
भक्तान् द्विजानभुक्तांश्च दीनानाथांश्च तोषयेत्।
स्वयञ्चानशनप्रायः फलमूलाशनोऽथवा ॥
पयोव्रतो वा भिक्षाशी द्विर्वैकाशनोभवे।
नक्तं मुक्ताशनं नित्यं भूशयोविरतः शुचिः ॥
भस्मशायी शयाशायी वीरासनशयोऽथ वा।
ब्रह्मचर्य्यरतोनित्यं व्रतमेतत्समाचरेत् ।
अर्कवारे तथेन्दौ वा पञ्चदश्याञ्च पक्षयोः।
अष्टम्याञ्च चतुर्दश्यां शक्त्याद्युपवसेदपि ॥
पाषण्डपतितोदक्या सूतकान्त्यजपूर्व्विकान्।
वर्जयेत्सर्व्वयत्नेन मनसा कर्म्मणा गिरा ॥
क्षमा, दानं दया, सत्यमहिंसा शीलता भवेद्।
सन्तुष्टश्च प्रशान्तश्च जपध्यानरतस्तथा ॥
कुर्य्यात्त्रिषवणं स्नानं भस्मस्नानमथापि वा।
पूजा वैशाखिकञ्चैव मनसा कर्म्मणा गिरा ॥
बहुनात्र किमुक्तेन नाचरेदशिव व्रती।
प्रमादात्तु सदाचारे निरूप्य गुरुलाघवं।

उच्छितां निष्कृतिं कुर्यात् पूजाहोमजपादिभिः ।
आसमाप्तौ व्रतस्यैवमाचरेदप्रमादतः ।
गोदानहोमोत्सर्गं कुर्यात् पूजाञ्च वत्सरः ॥
सामान्यमेतत् कथितं व्रतस्यास्य विधानतः ।
प्रतिमासं विशेषञ्च प्रवक्ष्यामि यथाक्रमं ॥
वैशाखे वज्रलिङ्गन्तु ज्यैष्ठे मारकतं शुभं ।
आषाढ़े मौक्तिकं विद्यात् श्रावणे नीलनिर्म्मितं ॥
मासे भाद्रपदे देवं पद्मरागमयं शुभं ।
आश्वयुज्यान्तु विधिवद्गोमेदकमयं शुभं ॥
कार्त्तिक्यान्तु हुमं लिङ्गं वैदूर्य्यं मार्गशीर्षके ।
पुष्परागमयं पुष्ये माघे तु मणिजोरयं ॥
फाल्गुन्याञ्चन्द्रकान्तोत्थं चैत्रमासेऽथवा तथा ।
सर्व्वमासेषु रत्नानामलाभे हेममेव वा ॥
हेमालाभे राजतं वा ताम्रजं लोह मेव वा ।
मृन्मयं वा यथालाभं क्षणिकं वाप्यदेव वा ॥
सर्व्वं गन्धमयं वाथ लिङ्गं कुर्य्याद्यथारुचि ।
व्रतावसानसमये समाचरितमैत्यकं ॥
कृत्वा वैशाखिकीं पूजां हुत्वा चैव यथारुचि ।
संपूज्य यजमाचार्य्यं व्रतिनञ्च विशेषतः ॥
देशिकेनाभ्यनुज्ञातः प्राङ्मुखो वाप्युदङ्मुखः ।
दर्भासनो दर्भपाणिः प्राणापानौ नियम्य च
जपित्वा शक्तितो मूलं ध्यात्वा लिङ्गं शिवात्मकं ।
अनुज्ञाप्य यथापूर्व्वं नमस्कृत्य कृताञ्जलिः ॥

अनुत्सृजामि भगवान् व्रतमेतत्त्वदाज्ञया ।
इत्युक्त्वा दीर्घमूलान्तु दर्भानुत्तरतस्त्यजेत् ॥
ततो दर्भजटाधारमेखला यपिवीतत्यजेत् ।
पुनराचम्य विधिवत् पञ्चाक्षरमुदीरयेत् ।
यः कुर्यात् व्रतिकोद्दीक्षामादेहान्तमनाः किल ॥
व्रतमेतत् प्रकुर्वीत स तु वै नैष्ठिकः स्मृतः ।
सत्यः शमी च विज्ञेयो महापाशुपतस्तथा ॥
स एव तपसा श्रेष्ठः स एव च महाव्रती ।
न तेन सदृशः कश्चित् कृतकृत्योमुमुक्षुषु ॥
यतिश्च नैष्ठिको ज्ञातः समाहुर्नैष्ठिकोत्तमं ।
या नार्य्यं तद्वादशाहं व्रतमेतत् समाचरेत् ॥
सोऽपि नैष्ठिकतुल्यः स्यात् शिवव्रतसमन्वयात् ।
घृताशीयश्चरेदेतत् व्रतं व्रतपरायणः ॥
दिनैकदिवसस्यापि स च कश्चन नैष्ठिकः ।
कृतकृत्यश्च निष्कामोयश्चरेद्व्रतमुत्तमं ॥
शिवार्पितात्मा सततं तेनान्यः सदृशः क्वचित् ।
भवच्छिन्नोद्विजोविद्वान् महापातकसम्भवैः ॥
पापैर्विमुच्यते सद्यो मुच्यते न च संशयः ॥
रुद्राग्रे पदवीं कीर्त्यं तस्य परिकीर्त्तितं ॥
यस्मात् सर्वेषु लोकेषु वीर्यवान् कृतसंयतः ।
भस्मनिष्ठस्य दह्यन्ते दोषा भस्माग्निसङ्गमात् ॥
भस्मस्नानविशुद्धात्मा भस्मनिष्ठ इति स्मृतः ।
भस्मसन्दिग्धसर्वाङ्गो भस्मनिष्ठ इतिस्मृतः ॥

भूतप्रेतेषु सर्व्वेषु लोकेष्वन्येषु वा भवेत्।
अरोगः सर्व्वसिद्धार्थी भवेज्ज्ञातो वटुःसह॥
भस्मनिष्ठस्य सान्निध्याविद्रवीतिन संशयः॥
मासकम्पसिकं प्रोक्तं भस्मकल्पषभक्षणात्।
भूति भूति करं पुंसां रक्ष रक्ष पर परं॥
किमर्थ मिह वक्तव्यं भस्ममाहात्म्यकारणं।
व्रती च भस्मना स्नातः स्वयं देवो महेश्वरः॥
परमास्त्रञ्च शैवानां भस्मैतत्पारमेश्वरं।
धौम्यग्रजस्य तपसि आपादोयं निवारितः॥
यस्मात्सर्व्वं प्रयत्नेन कृत्वा पाशुपतं व्रतं।
धनवस्त्रसंग्रह्य भस्मस्नानरतो भवेत्॥

इति वायुसंहितोक्तं * पाशुपतं व्रतं।

———000———

अथ गजपूजा।

तत्र श्रीगजेश्वर प्रार्थनमधिकृत्याह पालकाप्यः।

एवमस्त्विति देवैस्तमुवाच मतङ्गजं॥
आषाढ्यां पूर्णचन्द्रायां मामभ्यर्च्य नराधिपाः।
तवपूजां करिष्यन्ति दत्तोऽयमवरस्तव॥
तस्मात्प्रवसमाराज पूजा कार्य्या नरोत्तमैः।
श्रीगजाय विधानेन शुचिभिस्तूपवासितैः॥

* इति पुराणोक्तं पाशुपतव्रतमिति पुस्तकान्तर पाठः।

श्रीकामैव विशेषेण सदैश्वर्य्यकरी शुभा ।
दत्त्वा तस्य वरं देवो भगवान् भूतभावनः ।
गतः स्वमालयं देवो गताः सर्व्वाश्च देवताः ॥
श्रियं ददाति विपुलां यस्मात् पूजाविधानतः ।
प्रख्यातः श्रीगजस्तस्माज्जयदो नृपसत्तम ॥
तेनैषा क्रियते पूजा द्विरदानान्तु नित्यशः ।
इदमन्यत् प्रवक्ष्यामि कल्पमस्य नराधिप ॥
चतुर्णां चौरहस्ताणां द्रव्यमन्यत् बन्धुभिः ।
तर्पाश्च वाहयेद्विप्रो बलिं होमांश्च कारयेत् ।
पुण्याहघोषेण ततः स्वस्ति वाच्य द्विजोत्तमान् ।
पश्चाद्बलिप्रमाणंस्यादश्यिक्रमकोटरं ॥
शतस्त्रैवानुपूर्व्वस्य भक्तैः साधुवर्ज्जितं ।
शागामातास्यच भवेत् कर्णिका द्वादशाङ्गुला ॥
त्रिंशत्यङ्गुलनाहाच कार्य्या तु सुसमाहिता ।
वेलागवाचनलिनीमग्निव्यञ्जनकं तथा ॥
वैदलं यास्त्रिकं भाण्डमशेषवामनकङ्कतं ।
सचन्दनांश्च कलशांश्चतुरः† मोदकांस्तथा ।
सामान्यं यच्चवस्त्रस्य गौपन्द्रव्यमुपाहरेत ॥
ततो विप्रः शुचिर्भूत्वा नमस्कृत्य महेश्वरं ।
सनत्कुमारं वरदं श्रीगजञ्च महाबलं ॥
सर्व्वान् देवान् नमस्कृत्य दिगपाशो समाहितः ।
सर्व्वानृषिगणांश्चैव तथा नक्षत्रमण्डलं ॥

---

† विशामयां दर्शिनौ पुष्करिणीति पुस्तकान्तरे पाठः ।

समुद्रानापगाः सर्व्वाः सयक्षोरगराक्षसाः ।
पर्व्वताः सर्व्वभूतानि जङ्गमाजङ्गमं जगत् ॥
ऐरावतांश्चाथ पुनर्नमस्कृत्य दिगाङ्गजान् ।
उपोष्य सम्विशेद्रात्रौ वासोभिरहतैर्द्विज ॥
सेनान्यांश्च नमस्कृत्य शुचिर्भूत्वा कृताञ्जलिः ।
कुशास्तरणसंवृत्ते स्वपिते प्रयतः शुचिः ॥
श्वोभूते पुनरुत्थाय स्नातो भूत्वा समाहितः ।
तस्ये यन्ता गजेन्द्रस्य नमस्कृत्याधिरोहयेत् ॥
सच्छत्रं तालव्यजनं माल्यदामोपशोभितं ।
नन्दितूर्य्येण महता वाद्यमानेन शोभितं ॥
सालङ्करणकैः पूरं हेमजालविभूषितं ।
नानाकारैस्तथावर्णैःसमन्तात् परिवेष्टितं ॥
चन्दनागुरुमिश्रैश्च सर्व्वगन्धैरलङ्कृतं ।
स्त्रीरूपवेशैः पुरुषैः परिचर्य्योपशोभितैः ।
जल्पद्भिर्निष्ठुरं वाक्यं प्रहसद्भिस्तथैव च ॥
चतुष्पथे वीथिमार्गे तथैव चत्वरेषु च ।
राजमार्गेषु च भृशं घोषयन्तस्ततस्ततः ॥
अर्च्चयन्ति† तथैवं राजानो विजयैषिणः ।
सेनापतिरमात्याश्च ये चान्ये तद्विजानतः ॥
पूजयन्ति यथा न्यायं तथैव गजजीविनः ।

---

* चात्रयिन्तीति पुस्तकान्तरे पाठः ।

† विघर्षैषिण इति पुस्तकान्तरे पाठः ।

अतोऽन्यथा तु कुर्व्वाणाः ससमिबलवाहनाः* ।
ज्वराजालैर्व्विनश्यन्ति देवताविक्रमेण वै ॥
प्रयुञ्जते च वै तस्मै सम्यक् पूजां नराधिप ।
सपुत्रदारा वर्द्धन्ते सराष्ट्रबलवाहनाः ॥
श्चार्यां माहेश्वरस्यैतां प्रतिगृह्णन्ति ये नृपाः ।
संग्रामे शत्रुसंघाते भवन्ति च विदारिणः ॥
काले बीजानि रोहन्ति सम्यग्वर्षति वासवः ।
न भवत्यत्र मरको व्याधिश्चानिरशैवच ॥
निरामयश्च भुञ्जीत राजा कृत्स्नां वसुन्धरां ।
रत्नाकरवतीं देवीं सशैलवनकाननां ॥
अरोगा बलवन्तश्च जायन्ते च मतङ्गजाः ।
राजोपजीविनः सर्व्वे कामभोगैः समन्विताः ॥
पुत्रैश्च पशुभिश्चैव जीवन्ति च शतं समाः ।
अरोगा बलवत्यश्च जायन्ते प्रजा अत्र ॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनं ।
यांश्च प्रार्थयते कामान् सर्व्वांस्तान् प्राप्नुयान्नरः ॥
एवं वृत्तं महाराज शम्भो भक्त्यान्वितं विभो ।
गजस्य भयाद्विरि त्रिषु† लोकेषु विश्रुतं ॥
मया ख्यातं महाबाहो विस्तरेण यथाक्रमं ॥

इति पालकाप्रोक्तगजपूजाविधिः ।

———॥(वि २०——

* सराष्ट्रबलवाहना इति पुस्तकान्तरे पाठः ।

† भयं विद्रवित्रिषु लोकेषु पूजितमिति पुस्तकान्तरे पाठः ।

अथार्व्वणगोपथब्राह्मणं।

अथाश्वयुजे मासे पौर्णमास्या
मपराह्ने हस्तिनो नीराजनं कुर्य्यात्।

प्रागुदक्प्लवने देशे यत्र दिशि वा मनोरमते गिरय
स्ते पर्व्वता इत्येतया हस्तगतमर्हम्वा मण्डलं
प्रगृह्य याभिर्य्यमितिसंप्रोच्चयेत् तत्र श्लोकाः

दशहस्तसमुत्सेधं पञ्चहस्तं सुविस्तृतं।
शान्तवृक्षमयं कुर्य्यात्तोरणं पुष्टिवर्द्धनं॥
शक्तैः शुक्लाम्बरधरैस्तन्माल्यैरपि भूषित।
कारयेत् स्थण्डिले शुभ्रे रसैश्च परिपूरिते॥
रसैस्त्वामभिषिञ्चामि भूमे मह्यं शिवा भव।
असपत्ना सपत्नघ्नी मम यज्ञविवर्द्धनी॥
इमौस्तम्भौ घृताभ्यक्तौ शुभौ भावसमावृतौ†॥

योमा कश्चाभिदामेति तमिमौ स्तम्भौ निर्द्दहतामित्पुच्छयस्य ब्राह्मणस्य त इत्यभाभ्यांसुवर्णमालापताकैस्तम्भौ संयोजय तस्या धस्ताच्चतुर्हस्तां वेदीं कृत्वा तन्त्रमित्युक्तदर्भैः पवित्रपाणिर्बलि पुष्पाणि च दत्त्वा मधुलाजामिश्रैःस्वस्तिकं संयावदधिकृशर कृपसघृतविविधान्नपानभक्ष्यलक्षफलैरग्निं परिस्तीर्य्य आपो अस्मान्मातरः शुन्ध*न्त्विति चतुरोडुम्बरान् कलशान् कुशोदकेन पूरयित्वा प्रतिदिशमवस्थाप्य दध्यादुद्राग्नेयं वायव्यवारुणा मन्त्रारचोघ्नं कृत्या दूषणं यशस्यवर्च्चस्यानिच इत्योषधिंसमादाय द्विहस्तमण्डलमित्युक्ता। तत्र श्लोकाः।

---

* वायसमन्वृतामिति पुस्तकान्तरे पाठः।

† मदयन्निति पुस्तकान्तरे पाठः।

सिंही व्याघ्री च हरिणी अमृता चापराजिता।
पृश्निपर्णी च दूर्वा च पद्मनुत्पलमालिनी॥

तामनुमन्त्रयेदेतं कटकसदृद्यादापि वैयाघ्रमनडुच्चर्म्म परिस्तीर्य, वैतस्याङ्कुशमनुमन्त्र्य, ततोऽस्याकादधिदेवता तस्यै च बलिं दत्त्वा, पिण्डानि च दद्यात्।

हस्तिनाम वा चयेयस्यां दिशि स रिपुर्भवति तां दिशं गत्वा हस्तिनमानयेद्धिरण्येन रजतेन वस्त्रे च मणिमुक्ताप्रबालेन चन्दनेन भद्रदारुचया कुष्ठेन नलदेन रोचनयाञ्जनेन मधिकुम्भिलया पद्मकुमुदोत्पलैर्म्ममाग्ने त्वं चेद्रति सूक्तं दक्षिणोत्तरप्रतिमुखं प्रतिजपेच्छेषेण गाथास्त्वभ्यंजयेत् जपेत्। तत्रश्लोकाः। हस्तिनोरचणे दक्षः कर्त्तव्यो वैचणोमयः। षोडशारस्तिमाचस्तु चातुपर्व मनोहरः। तेन वारयान्तारयते दक्षाये पु हटचानि कृत्वा ग्रसति जातं जातं। जातवेदसमित्यग्निं प्रज्वालयेत् सुजातं जातवेदसमिति नीराजयित्वा निधिं विभ्रतीति शालास्तु प्रवेशयेयेन-प्रेचमाणाः स्वानि स्थानानि व्रजन्ति दीर्घायुषो बलवन्तश्च भवति गोसहस्रं कर्त्तुर्दक्षिणायामवरञ्च।

इति गजनीराजन विधिः।

———000———

सनत्कुमार उवाच।

अथ पर्व्वणि यत्कृत्यं तच्छृणुष्व महामते।
यज्ज्ञात्वा मनसः शान्तिं* सुसम्भूतिश्च विन्दति॥

* कान्तिमिति पुस्तकान्तरे पाठः।

यत्पर्व्वणि कृतन्तावत्[१] शुभम्वा यदि वाशुभं ।
षष्टिवर्षसहस्राणि तत्फलं भुञ्जते नराः ॥
दयितं जीवितं पुंसां सर्व्वेषामपि सम्मतं ।
यतस्तत्क्षयसंप्राप्तपरिक्लेशयुता नराः ॥
अतस्तच्छान्तिजननमायुःप्रदमनाकुलं ।
सर्व्वसौख्यप्रदं भद्रं तादृग्व्रतमिहोच्यते ॥
चतुर्द्दश्यां शुचिः स्नात्वा दन्तधावनपूर्व्वकं ।
चरितब्रह्मचर्य्यश्च यतवाक्कायमानसः ॥
पौर्णमास्यान्तथा कृत्वा देवपूजां समाचरेत् ।
मण्डलं चतुरस्रन्तु कारयेत् कुसुमाचितैः ॥
तस्मिन् श्रीशं श्रियं देवीमर्च्चयेत् सुसमाहितः ।
बृहन्तं पयसापूर्णं गन्धेन स्थापयेद्घटं ।
चतुरस्तोयपूर्णांस्तु कलशांस्थापयेत् क्रमात् ।
मध्ये वावाहयेत् पञ्च चक्रादीन्यायुधान्यपि ॥
इन्द्रियाणि तथा पञ्च बुद्धिप्राणं तथा मनः ।
न्यसेद्देयानि सर्व्वाणि कलशेषु चतुर्ष्वपि ॥
सर्व्वापद्भ्यस्तरेम्मर्त्त्यशाधिव्याधिभयादपि ।
रक्षन्तु सर्व्वदा मान्तु बुद्धिप्राणं मनस्तनः ॥
अवन्तु सर्व्वदापद्भ्यो मङ्गलानि दिशन्तु नः ।
इति मन्त्रेण चाभ्यर्च्य समिद्धे जातवेदसि ॥
षड्भिर्म्मन्त्रैस्तु जुहुयात् संस्कृते तु यथा विधि ।
तिलेनाक्षतयुक्तेन त्रिमध्वक्तेन संयतः ॥

---

१ नाचरन्ति पुस्तकान्तरे पाठः ।

मन्त्राः।

अनामयाय पूर्णाय विमलायाच्युताय च।
मृत्यवे कालरूपायेत्येते मन्त्रास्तथा च षट्॥
अथैवायुधमन्त्रैश्च प्राणेन करणैरपि।
हुत्वा तु करुणायेति‡ तच्छेषेण बलिन्त्यजेत्॥
अथासने स्थितं साध्यं कृत्वाचार्य्यस्तदग्रतः।
अभिषेकं ततः कुर्य्यात् पयसा तज्जलेन च॥
कुटुम्बिने दरिद्राय निष्कमात्रञ्च हाटकं।
तिलान्नलवणादीनि दद्याद्विप्रायताय च॥
पूर्णकुम्भांस्ततो वास्मै हरिद्राचूर्णसंयुतान्।
बीजपूर्णांस्तु कलसान् लवणेन प्रपूरितान्॥
चतुरश्चतुरो दद्याद्यो विप्रः परमायुषे।
गुरवे च वरं दत्त्वा कृत्वा ब्राह्मणतर्पणं॥
उपवासविधानेन दिनशेषं नयेत् सुधीः।
अनन्तरे च दिवसे कुर्य्याद्भगवदर्च्चनं॥
बान्धवैः सह भुञ्जीत नियमांश्च विसर्जयेत्।
एवं पर्व्वणि यः कुर्य्याच्चिरञ्जीवी भवेत् स तु॥
सर्व्वव्याधि समुत्थाने सर्व्वदुःखोदये सति।
स्नानं पर्व्वणि यः कुर्य्यात्तच्छान्तिं सोऽश्नुते परां॥

इति गारुड़पुराणोक्तमायुर्व्रतं।

---

‡ पुरुषायेति पुस्तकान्तरे पाठः।

अगस्त्य उवाच।

सर्व्वेषाञ्चैव पात्राणामतिपात्रन्तु शङ्करी।
तान्तु पूजय विप्रेशां दृष्टादृष्टप्रदायिकां॥
पात्राणान्तुपूज्यता विप्रेशाम्बिप्रेश्वरीं।
ब्रह्मणा यो विधिः शक्रे कथितो विजयावहः।
शक्रेण पूर्णिमा तात* श्रावणस्य शुभावहा॥

शक्र उवाच।

विजया या समाख्याता सर्व्वकामप्रसिद्धये।
तामहं श्रोतुमिच्छामि तत्त्वतः सुरसत्तम॥

ब्रह्मोवाच।

पुत्रार्थं राज्यविद्यार्थं यशःसौभाग्यतोऽपि वा।
विजयार्थं ग्रामकामो जयां कुर्वीत पूर्णिमां॥
हैमं वा राजतं वापि खड्गं वा चर्म्मपादुके।
प्रतिमां वापि कुर्वीत सर्व्वलक्षणसंयुतां॥

शाङ्कर्या इति शेषः।

तामादाय शुभे स्थाने शुक्लवस्त्रविभूषितां।
यवशाल्यङ्कुरोपेतां पानपात्रविभूषितां॥
दीर्वीसुशोभनां वस्त्रैः कल्पयेत्तत्र विन्यसेत्।
हुत्वा हुताशनं मन्त्रैः तत्रदेवीन्तु विन्यसेत्॥
तत्र सयवाङ्कुरादियुक्तायां वेद्यां।
रोचनाचन्दनं चन्द्रैरुपलिप्याथ पूजयेत्॥

---

* चयेति पूर्णिमातातइति पुस्तकान्तरेपाठः।

नानापुष्पविशेषैस्तु धूपगन्धान्नभोजनैः ।
पूजयेद्विधिवद्देवीं तथा वीजानि चाहरेत् ॥
यवगोधूममुद्गांश्च शालिषष्टिकशाटकीः ।
तिलान्माषान् प्रसृतींश्च श्यामाकांश्चणकालकान् ॥
विल्वाम्रदाड़िमकपित्थमोचकापिच्छनागरान् ।
बदरान् वीजपूरांश्च उडुम्बरअपोड़कान्* ॥
दापयेच्चैव देव्यास्तु नैविद्यान्यपराणि च ।

आवेर्णा आशुब्रीहिः ।

ऐरावतं नारिकेलं नारङ्ग कदलीफलं ।

नारङ्गं पानीयामलकं ।

फलार्थन्तु फलान्येव जपार्थञ्च यवाङ्कुरान् ।
पुष्पं सौभाग्यकामाय रत्नान्यायुर्धनानि च ॥
धनुः शत्रुविनाशाय तत्कामाय तदेव हि ।
अन्नं सर्व्वार्थकामाय यथालाभन्तु दापयेत् ॥
ततः क्षमापयेद्देवीं विद्यां गृह्णे च पार्थितां† ।

विद्याञ्चवक्ष्यमाणमन्त्रं ।

पुत्रार्थं पूजयेद्बालान्विजयाय स्त्रियो द्विजान् ।
धर्म्मार्थञ्चैव भोज्येन मन्त्रितं विद्यया तथा ॥
मन्त्रितं भोज्येत भोजयितव्यं व्रतिना ।
दक्षिणा तद्ददाचार्य्ये कन्यकां ब्राह्मणेषु च ।
दापयेद्यास्वशक्त्यात्तु तया त मनुगृह्णयेत् ॥

---

* चपचकामिति पुस्तकान्तरे पाठः ।

† प्रार्थयेत इति पुस्तकान्तरे पाठः ।

भोज्याग्रं पुत्रकामेन ग्रासं विद्याभिमन्त्रितं।
भोक्तव्यं पृथक् पात्रेण न च कुर्व्वीत सङ्करं॥
अनया विधिपूर्व्वन्तु मन्त्रोप्यत्रैव लिख्यते।

ओं यः पृथिव्यां रेततमेहाद्रवतयोमामन्त्रितानि विद्याप्रयच्छ-त्यष्टौपुत्रान् जनयति वेदवेदाङ्गपारगान्। योऽधीत्य न प्रयच्छत्य पुत्रो नपुंसको भवति। अहं वीर्य्येणाहं बलेन तु ओं नमो भगवते अक्षीणरेतसे स्वाहा रतिकाले वा चिन्तयेद्देवतां तान्विदशेखरो।

यस्य रेतेन लोकोऽयं भूषितः पावनो भुवि।
ओं रेताय महारेताय सर्व्ववीर्य्यमहाबले।
कामाय कामदेवाय मम कामान् प्रयच्छतु।

अनयाभिमन्त्रितं शयनं भजेत्।

प्रयच्छत्यष्टौ पुत्रान् यदिमोहं न गच्छति॥
एवं विद्यां गृहीत्वा तु देवीं नित्यं प्रपूजयेत्।
भवते सर्व्वकामानां सिद्धिरिष्टापराजितां॥
यानीह फलपुष्पाणि उत्पद्यन्ते च प्रावृषि।
तानि देव्याः सकन्यायागुरवेऽपि प्रदापयेत्॥
यथालाभभक्तिकं वस्त्र देयं पुष्पफलानि च।
श्रावणी शुभदा या च आश्विनी कार्त्तिकीति वा॥
स्नातव्येतेन विधिना अवश्यं सिद्धिमिच्छता।
होमेन ब्रह्मचर्य्येण बहुमन्त्रोपसाधनात्॥
अपुत्रो लभते पुत्रान् धनं सौभाग्य जीवितं।
अथवा अनघाविद्या लक्षणात्द्द्वती मिता॥

बीजपूरकबीजानि बटशृङ्गाणि नावनात् ॥
नागकेशरपुष्पाणि कृत्वा यो लभते फलं ।
वृहतीसिता श्वेतवृहती । वट शृङ्गाणि वटाङ्कुराः ।
नावनात् नास्येन
फलसर्प्पिरपांपानात् फलं प्राप्नोति विद्यया ।
अजेयो भवते लोके विद्याधरधनाधिपः ॥
फलसर्पिरायुर्व्वेदसिद्धं ।
एतत्तु सर्व्वमाख्यातं विजयार्थं व्रतोत्तमं ।
सिद्धिदं सर्व्वलोकानां विधिनात्तूपसेवनात् ॥

इति देवीपुराणोक्तं पुत्रप्राप्तिव्रतं ।

———000———

मार्कण्डेय उवाच ।

कार्त्तिक्यान्तु तथारभ्य संपूर्णग्रग्रलक्षणं ।
पूजयेदुदये राजन् सदानक्षाग्रनोभवेत् ॥
लावणं मण्डलं कृत्वा चन्दनेनानुलेपितं ।
दग्रनक्षत्रसहितं ततः सोमन्तु पूजयेत् ॥
(लावणं सैन्धवलवणकृतं ।)
कृत्तिकारोहिणीयुक्तं कार्त्तिके मासि पूजयेत् ।
सौम्यार्द्रासहितं राजन् मासि सौम्ये तथैव च ॥
आदित्यपुष्यसहितं मासि पौषे च यादव ।
मघासर्पयुतं माघफाल्गुणे शृणु पार्थिव ॥

आर्यं स्ततोऽथ सावित्रैः सहितं पूजयेद्विभुं ॥
चित्रास्वातियुतश्चैत्रे वैशाखे शृणु पार्थिव।
विशाखया च मैत्रेण युतं संपूजयेत्तथा॥
ज्येष्ठामूलयुतं ज्यैष्ठे आषाढ़ाख्यानमुत्तरे।
श्रावणे श्रवणोपेतं वारुणेन श्रविष्टया॥
तथाभाद्रपदे पौष्णा अजाहिर्बुध्नसंयुतं।
अश्विनीभरणीयुक्तं तथाचाश्वयुजे विभुं॥

(कार्त्तिकादौकृत्तिकादिक्रमेण फाल्गुनश्रावणभाद्रपदेषु त्रीणि त्रीणि।)

गन्धमाल्यनमस्कारदीपधूपान्नसंपदा।
शुभ्रेण परमान्नेन लवणेन घृतेन च॥
इक्षुणेक्षुविकारैश्च पयसा पायसेन च।
पूज्यास्वविधवानार्य्यस्तथा तल्लक्षणैः शुभैः॥
ततोऽनन्तरमभ्यर्च्याश्विन्यां प्रयतो नरः।
ब्राह्मणानां व्रतान्ते तु महारजतरञ्जितं॥

महारजतं कुसुम्भः।

भक्त्या तु चासनं* दद्यान्नारी वा यदि वा नरः।
रूपसौभाग्यलावण्यधनयुक्तो भवेन्नरः।
व्रतेनानेन चीर्णेन स्वर्गलोकञ्च गच्छति॥
सोपवासश्च यः कुर्य्याद्व्रतमेतदनुत्तमं।
अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः॥
सौभाग्यादि च यत् प्रोक्तं तदाप्नोति विशेषतः।

---

* वसनं न दद्यादिति पुस्तकान्तरे पाठः।

मनसा काङ्क्षितान् कामान् सर्वानाप्नोत्यसंशयं॥
अनाभिरामश्च यथाङ्गचरस्था
अनाधिपाश्च तथैव लक्ष्मा।
शक्रेच तुल्यश्च तथैव भर्त्ता
मानुष्यमासाद्य भवेत्स राजा॥

इति विष्णुधर्मोत्तरोक्तं* मनोरथपूर्णिमा व्रतं।

मार्कण्डेय उवाच।

कार्त्तिके पौर्णमास्यान्तु पूर्व्वं शिशिरदीधितिं।
पद्मे षोड़शपत्रे तु कर्णिकायान्तु पूजयेत्॥
केशरे पूजयेत्तत्र नक्षत्राण्यष्टविंशतिं।
पत्रेषु तिथिदेवांश्चततोऽर्थोत्क्रमाच्च पूजयेत्॥
अग्निब्रह्माम्बिकेभाख्य नागस्कन्दविरीचमाः।
शिवदुर्गायमेन्द्राश्च विष्णुकामशिवेन्दुकाः॥
पितरश्चेत्यमी प्रोक्ता मुनिभिस्तिथिदेवताः।
गन्धमाल्यनमस्कार दीपधूपान्नसम्पदा॥
शुक्लेन परमान्नेन दध्ना च लवणेन च।
अपूपैश्च महाभाग फलैः कालोद्भवैस्तथा॥
व्रतावसाने दद्याच्च वस्त्रयुग्मं द्विजातये।
ब्राह्मणाय महाभाग महारजतरञ्जितैः॥
पञ्चाशाविधाः सम्यक् कालविद्याय तावुभो।

---

* श्रीमद्विष्णुधर्मोत्तरोक्तं इति पुस्तकान्तरे पाठः।

सोपवासस्त्वभक्ताशी* व्रतमेतत् समाचरेत्।
नक्ताशनो वा धर्म्मज्ञस्तथैव च हविष्यभुक्※॥

सौभाग्यदं रूपविवर्द्धनञ्च
लावण्यदं स्त्रीरतिभोगदञ्च।
कार्य्यं प्रयत्नेन नरेन्द्र पुंसा
कार्य्यन्तथा स्त्रीभिरदीनसत्त्वं॥

इति विष्णुधर्मोत्तरोक्तं* सौभाग्यव्रतं।

———000———

मार्कण्डेय उवाच।

मार्गशीर्षाद्यथारभ्य चन्द्रमण्डलके नरः।
सोपवासः पौर्णमास्यां पूज्य यज्ञफलं लभेत्॥
यज्ञफलं सर्व्वयज्ञफलं।
नक्ताशनस्तु संपूज्य वह्निष्टोमफलं लभेत्॥
सोपवासश्च नक्ताशी वाजिमेधफलं लभेत्।
सोपवासः सुव्रतः।

कृत्वा व्रतं वत्सरमेतदिष्टं
प्राप्नोति लोकांश्च निशाकरस्य।
उपोष्य कालं सुचिरं सकालं
सायोज्यमायाति तमस्त्वशम्भोः॥

इति विष्णुधर्मोत्तरोक्तं चन्द्रव्रतं।

---

* सोपवासस्तु नक्ताशीति पुस्तकान्तरे पाठः।
● अनश्नाति एक भक्तोमक्तं धान्ना वा कार्येव च इति पुस्तकान्तरे पाठः।
* भविष्योत्तरोक्तं सौभाग्य व्रत इति पुस्तकान्तरे पाठः।

मार्कण्डेय उवाच ।

प्रोष्ठपदान्तमारभ्य संपूर्णे प्रथमाब्दके ।
संपूज्य वरुणं देवं गन्धमाल्यान्नसंपदा ॥
जलाशयजले ध्यात्वा एवं संवत्सरं बुधः ।
दद्यात् व्रतावसाने तु जलधेनुं द्विजातये ॥
छत्रोपानहसंयुक्तां वासोयुग्मविभूषितां ।
प्राप्नोति लोकं वरुणस्य राजं
स्तत्रोष्य कालं सुचिरं मनुष्यः ।
मानुष्यमासाद्य भवत्यरोगो
रूपान्वितो वित्तयुतस्तथैव ॥

इति विष्णुधर्मोत्तरोक्तं वरुणव्रतं ॥

मार्कण्डेय उवाच ।

आश्वयुज्यां* सपूर्व्वन्तु पौर्णमास्यां नरो भुवि ।
सोपवासः सुरेन्द्रञ्च देवं संपूजयेत्तथा ॥
शचीमैरावणस्थञ्च मातुलिङ्गं नराधिप ।
गन्धमाल्यनमस्कार दीपधूपान्नसम्पदा ॥
संवत्सरान्ते कनकञ्च दत्त्वा
प्राप्नोति लोकं सपुरन्दरस्य ।
मानुष्यमासाद्य नरेन्द्रपूज्यो
राजा भवेद्वा द्विजपुङ्गवो वा ॥

इति विष्णुधर्मोत्तरोक्तं शक्रव्रतं ।

---

* आश्वयुजमस पूर्णमिति पुस्तकान्तरपाठः ।

मार्कण्डेय उवाच।

उपोषितश्चतुर्दश्यां पौर्णमास्यां नरोत्तम।
पञ्चगव्यं पिबेत्तत्र ब्रह्मचारी तथा भवेत्॥
ब्रह्मव्रतमिदं कृत्वा* मासपापात् प्रमुच्यते।
तस्मात्सर्वप्रयत्नेन मासि मासि समाचरेत्॥

संवत्सरात् प्राप्य सुरेन्द्र लोकं
तस्मोच्य राजा सुचिरं मनुष्यः।
मानुष्यमासाद्य नरेन्द्रपूज्यो
राजा भवेद्वा द्विजपुङ्गवो वा॥

इति विष्णुधर्मोत्तरोक्तं ब्रह्मकूर्च्चव्रतं।

———ooo———

कार्त्तिक्यामुपवासी यः कन्यां दद्यात् स्वलङ्कृतां।
स्वकीयां परकीयां वा नदीसङ्गमके शुभे॥
एतत्सन्तानदं नाम व्रतं सुगतिदायकं।

इति भविष्योत्तरोक्तं सन्तानदव्रतं।

———ooo———

कृष्ण उवाच।

कार्त्तिक्यां नक्तभुक् दद्यान्मेषं हेमविनिर्मितं।
मार्गशीर्षे नृपं पश्चेन्मिथुनं तद्वदेव हि॥
एवं क्रमेण यो दद्याद्दासीं वस्त्रविभूषितां।

पौर्णमास्यां पौर्णमास्यां कर्त्तव्यं।

* सवत्सरमिदं कृत्वा इति पुस्तकान्तरे पाठः।

पौर्णमास्यां पौर्णमास्यां कौन्तेय बहुदक्षिणं ।
एतद्राशिव्रतं नाम महोपद्रवनाशनं ।
सर्व्वाशापूरकं तद्दल्लीमल्लोकप्रदायकं ॥

इति भविष्यत् पुराणोक्तं राशिव्रतं ।

———०८०———

पयोव्रतः पञ्चदश्यां व्रतान्ते गोयुगप्रदः ।
लक्ष्मीलोकमवाप्नोति देवीव्रतमुदाहृतं ॥

इति पद्मपुराणोक्तं देवीव्रतं ।

———०००———

कालोत्तरात् ।

माघशुक्ल चतुर्दश्यामुपोष्य नियमस्थितः ।
शिवाय पौर्णमास्यान्तु कर्त्तव्यं घृतकम्बलं ॥
कृष्णगोमिथुनं पश्चात सुरूपं विनिवेदयेत् ।
दिव्यं वर्षशतं सार्द्धं शिवलोके महीयते ॥

शिवधर्म्मे ।

आलिङ्गवेदिपर्य्यन्तं यो दद्याद्घृतकम्बलं ।
तस्यानन्तं भवेत्पुण्यं माघपूर्णिमपर्व्वणि ॥
जागरं गीतनृत्याद्यैः सकृत् कृत्वा तु पर्व्वणि ।
मन्वन्तरशत सार्द्धं रुद्रलोके महीयते ॥
इति शिवधर्म्मोत्तरोक्तो घृतकम्बलविधिः ।
पौर्णमास्यान्तु यः सोमं पूजयेद्भक्तिमान्नरः ॥

सौभाग्यत्वं भवेत्तस्य इति मे निश्चिता मतिः॥
मूलमन्त्राः समंत्राभि रङ्गमन्त्राश्च कीर्त्तिताः।
पूर्व्ववत्सूपचारैः कर्त्तव्यश्चातिथीश्वरः॥

तिथीश्वरः सोमः तद्रूपश्च चतुर्दशीस्थितमहाराजव्रतोक्त वेदितव्यं।

गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते।
पूजाशाठ्येन शाठ्येन कृतापि तु फलप्रदा॥
आज्यधारासमिद्भिश्च दधिक्षीरान्नमाक्षिकैः*।
पूर्व्वोक्तफलदो सोमः कृतः शान्तेन चेतसा॥
एतद्व्रतं वैश्वानरप्रतिपद्व्रतवद्द्रष्टव्यं।

इति भविष्यत्पुराणोक्तं सोमव्रतं।

——ooo——

भोजनं घृतसंयुक्तं मधुनोपरिशोभितं।
दद्यात् कृष्णतिलानान्तु प्रस्थमेकन्तु मानधं॥
द्विगुणन्तण्डुलानाञ्च पृथक्प्रस्थं प्रकल्पयेत्।
अण्डजैर्व्वाण्डजैर्व्वापि विविधं परिवेष्टितं॥
अण्डजानि कौशेयानि वोण्डजानि कार्पासानि।
लिङ्गं संवेष्ट्य मन्त्रैश्च बलिमेतं निवेदयेत्।
अर्च्चयित्वा विधानेन पौर्णमास्यां समाहितः॥
युगकोटिसहस्राणि† शिवलोके महीयते।

* पायसान्नैर्नवैर्नवैरिति पुस्तकान्तरे पाठः।
† युगकोटि सहस्राणीति पुस्तकान्तरे पाठः।

पुण्यक्षयादिहागत्य सद्वंशे जायते कुले॥
मेधावी सुभगः श्रीमान्वेदवेदाङ्गपारगः।

इति श्रीशिवधर्मोक्तं घृतभाजनव्रतं॥

———ooo———

पौर्णमास्यामुपवसेदब्दमेकं सुयन्त्रितः।
वर्षान्ते सर्व्वगन्धाग्रीं प्रतिमाञ्चनिवेदयेत्॥
सुविचित्रैर्म्महायानैर्हिव्यगन्धविभूषितैः।
युग कोटि शतं साग्रं शिवलोके महीयते॥
यथेष्टमैश्वरे लोके भोगमासाद्य यत्नतः।
क्रमादागत्य लोकेस्मिन् राजानं पतिमाप्नुयात्॥

इति शिवधर्मोक्तं गन्धव्रतं।

———on'D)uo———

सनत्कुमार उवाच।

उपोष्य च चतुर्दश्यां पौर्णमास्यां हरिं यजेत्।
चैत्रे मासि निकुम्भश्च पिशाचैः सहितो बली॥
यातियोद्धुं पिशाचांश्च सिकताद्वीपवासिनः*।
तदन्ते गच्छतां तेषां मध्याह्ने तु गृहे गृहे॥
पूजा कार्य्या प्रयत्नेन नित्यं शक्त्या यथाक्रमं।
पिशाचं मृन्मयं कृत्वा रम्यं हेममयञ्च वा॥
गन्धैर्म्माल्यैस्तथा वस्त्रैरलङ्कारैर्म्मनोहरैः।
भक्ष्यैस्तु पूरिकापूपैर्म्मांसैर्हिव्यैश्च पानकैः॥

---

* सिन्धुद्वीपनिवासिन इति पुस्तकान्तरे पाठः।

95–2

स्वजातिविहितैः पेयैर्नैवेद्यैश्च पृथग्विधैः ।
आयुधैर्विविधाकारैश्छत्रोपानहयष्टिभिः ॥
शष्कापूपरिकायुक्तैश्चिरैर्भक्ष्यैश्च भक्तया ।
मिश्रउद्दालपिष्टैर्वा ढक्कावाद्यैश्च चर्मणा ॥
तन्त्रीवाद्यैर्घनोत्थैश्च तथा पार्श्वोपयोगिभिः ।
मध्याह्ने तन्तु संपूज्य प्राप्ते चन्द्रोदये पुनः ॥
पूर्ववत् पूजयेत्तन्तु वित्तशाठ्यविवर्जितः ।
ततः कृत स्वस्त्ययनो ब्राह्मणस्तं विसर्जयेत् ॥
अनुव्रजेद्यथैतन्तु द्वितीये दिवसे सति ।
गृहा द्दूरंयोयस्य पर्य्यन्तस्तु महीरुहात् ॥
पुनर्गृहे प्रविश्यैव कर्त्तव्यः सुमहोत्सवः ।
गीतवादित्रनिर्घोषो जनकोलाहलस्तथा ॥
कृत्वा तृणमयं सर्पं दृढैः काष्ठैस्तु वेष्टितं ।
क्रीड़ितव्यं पुनर्ग्रामनगरेषु च सर्व्वदा ॥
तत्रासो दुष्टसर्पाणां तत्क्षणाद्येन जायते ।
त्रिभिश्चतुर्भिर्द्दिवसैः कर्त्तव्यं खण्डखण्डकं ॥
सर्व्वोपस्कारसमन नवखण्डं गृहे गृहे ।
पूजितव्यं सुगुप्ते तु रक्षितव्यश्च वत्सरं ॥

इत्यादि पुरानोक्ता निकुम्भपूजा ।

———000———

कार्त्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाचरेत् ।
शैवं पदमवाप्नोति वृषव्रत मिदं स्मृतं ॥

इति पद्मपुराणोक्तं वृषव्रतं ।

या प्रेरयति कर्म्माणि लोकेषु द्विजसत्तम ।
तस्याः संपूजनं कार्य्यं शुक्लपञ्चदशीं सदा ॥
माल्यानुलेपनैः शुक्लैर्धूपेन च सुगन्धिना ।
रक्तवस्त्रप्रदानेन दीपदानेन चाथवा ॥
वैदलैश्च तथाभक्ष्यैरपूपैश्च तथैव च ।
पूजयित्वा च तां देवीं भोक्तव्यं निशि भार्य्यया ॥
यदि पञ्चदशीं सर्व्वां न शक्नोति कथञ्चन ।
देव्याः संपूजनं कार्य्यं पञ्चम्यामपि कार्त्तिके ॥
उमामन्तु* पूजयेद्यावत् तावत् नारी पतिव्रता ।
सदा धर्म्मरता नारी लोके भवति भार्गव ॥
नाधर्म्मे च मतिस्तस्याः कदाचिदपि जायते ॥

इति विष्णुधर्म्मोत्तरोक्तं पूर्णिमाव्रतं ।

प्राप्य पञ्चदशीं राम तथा शुक्लाञ्च कार्त्तिकीं ।
आरामप्रभृतिं वै उमे गौरीं समालिखेत् ॥
तस्याश्चापि गृहे चारु नानावर्णैस्तु वर्णितं ।
गृहोपकरणं सम्यक् तथैवाभितो लिखेत् ॥
पीठं यथासमाम्नातं खट्वोपस्करमादिकं ।
ततस्तौ पूजयेन्नारी स्नात्वा भर्त्तृपरा शुचिः ॥
गन्धमाल्यनमस्कारधूपदीपान्नसम्पदा ।
इक्षूणां तु विकारैर्वा विविधैश्च च पूजयेत् ॥

---

* उपार्णिमिति पुस्तकान्तरे पाठः ।

तयोस्तु पूजनं कृत्वा पश्येत्तु सिकतामयं।
शुक्लांशिचं न्यसेत् चीरं तच्चदद्याद्दिजातये॥
ततश्च नक्तं भुञ्जीत तिलतैलविवर्जितं।
अनयोः पूजनादुग्रा तु गृहभङ्गन्तु नाप्नुयात्॥
पतिव्रता महाभागा दीर्घमाप्नोति जीवितं।
पूर्वमिन्दुं ततोऽभ्यर्च्य सौभाग्यं महदाप्नुयात्॥
इष्टमहमवाभ्यर्च्य नचत्रमथ वा नृप।
तस्याःचेममवाप्नोति कामञ्च यदुनन्दन
मासनामसनचत्रं पूर्णिमायोगपञ्च वा।
पूजयित्वा तदाराजन् सौभाग्यं महदाप्नुयात्॥
नृसिंहप्रतिपच्चन्तु पूर्वं चन्द्रं समर्चयेत्।
नरोमातृगणा राजन् सर्व्वान् कामानवाप्नुयात्॥
एकां वा मातरं राजन् कामानाप्नोत्यभीप्सितान्।
वानस्पत्यमवाप्नोति पूजयित्वा वनस्पतीन्॥

इति विष्णुधर्मोक्तं नानाफलपूर्णिमाव्रतं।

श्रावण्यां पौर्णमास्याञ्च सोपवासो जितेन्द्रियः।
प्राणायामशतं कृत्वा मुच्यते सर्व्वकिल्विषैः॥

इति वह्निपुराणोक्तं पूर्णिमाव्रत।

चन्द्रव्रतं पञ्चदश्यां शुक्लायां नक्तभोजनं॥
दश पञ्च च वर्षाणि व्रतमेतत् समाचरेत्।

अश्वमेधसहस्राणि राजसूय शतानि च ॥
इष्टानि तेन राजेन्द्र एतद्व्रतं समाचरेत् ।

इति वाराहपुराणोक्तं चन्द्रव्रतं ।

ईश्वर उवाच ।

ज्यैष्ठस्य पौर्णमास्यान्तु दम्पती यस्तु भोजयेत् ।
परिधाय यथा शक्त्या दौर्भाग्यैर्मुच्यते नरः ॥
गन्धपुष्पोपहारैश्च पौर्णमास्यान्तु योऽर्चयेत ।
ब्राह्मणं जायते तस्य सप्तजन्मनि सुन्दरि ॥

इति प्रभासखण्डोक्तं ब्राह्मण्यावाप्तिव्रतं ।

इति श्रीमहाराजाधिराजश्रीमहादेवस्य सकलकरणा-
धीश्वरसकलविद्याविशारदश्रीहेमाद्रिविर-
चिते चतुर्वर्गचिन्तामणौ व्रतखण्डे
पूर्णिमाव्रतानि ।

अथ विंशोऽध्यायः ।

अथामावास्याव्रतानि ।

येनात्मीयं बलिभिरनिशमन्तर्पितो नागलोको*
राहूच्छिष्टामिव शशिकलां मन्यमानो न भुङ्क्ते ।
सोऽयं साधुद्विजपरिवृढः सूरिहेमाद्रिरस्मि-
न्नामावास्याव्रतसमुदयं व्यातनोत्ख्यातकीर्त्तिः ॥

अगस्त्य उवाच ।

भगवंस्त्वत् प्रसादेन श्रुतोऽयं व्रतविस्तरः ।
अर्द्धोदयन्तु मे ब्रूहि दुर्लभं सचराचरे ॥
जीवितं प्राणिनां पुण्यं यदि वेदयसि प्रभो ।
कथं कार्य्यं कृते किं स्यात् फलं कथय षण्मुख ॥
श्रूयतां पुण्ययोगोऽयं दुर्लभोऽर्द्धोदयाह्वयः ।
तिर्य्यङ्मनुष्यदेवानां दुष्प्राप्यं सर्व्वकामदं ॥
माघामायां व्यतीपात आदित्ये विष्णुदैवते ।
अर्द्धोदयं तदित्याहुः सहस्रार्कग्रहैः समं ॥
पुराकृतं वसिष्ठेन जामदग्न्येन सुव्रत ।
सनकाद्यैर्मनुष्यैश्च बहुभिर्बहुभिःस्तुतैः ॥
अन्यैः शतसहस्रैश्च दृष्टं भवतु कुम्भज ।
दानानां यच्च तीर्थानां फलं येन कृतं भवेत् ॥

* नागलोक इति पुस्तकान्तरे पाठः ।

ससागरधरा तेन सप्तद्वीपसमन्विता।
दत्ताऽभात् सर्व्वभावेन येन घर्मोदयं व्रतं॥
मानसादिषु तीर्थेषु यत्पुण्यं स्नानदानत:।
गङ्गासागप्रयागे च पुष्करार्ण्णवे तथा॥
तत्सर्व्वं वा न वा विप्र व्रतेनानेन कुत्र्च।
अश्वमेधायुतं श्रेष्ठमिष्टापूर्त्तञ्च यद्भवेत्॥
धर्मोदयकृतं यैस्तु विधिदृष्टेन कर्मणा।
वाञ्छि नत्रं गृहे लक्ष्मी: सन्ततिस्तानपायिनी॥
आयुर्य्यशोहि विपुलं व्रतकर्त्ता फलं लभेत्।
इन्द्राग्नियमलोकेषु निर्ऋतौनामपांपते:॥
वायो:कुवेरमीशस्य लोकेषु सुकृती प्रभु:।
वसेच्चन्द्रार्कलोकेषु लोकपालैश्च सेवित:॥
गोकोटिदानाद्यत् पुण्यं क्षेत्रतीर्थनिवासिनां।
धर्मोदयजपुण्यस्य कलां नार्हन्ति षोड़शीं॥
भूर्लोकाधिपतिश्चैव भुवर्लोकाधिपस्तुत:।
स्वर्लोकेगो जनानाञ्च तयोर्लोकस्येश्वर:॥
महर्लोके वसेन्नित्यं यावदिन्द्राश्चतुर्दश।
ततो हिरण्यगर्भस्य पुरुषो व्रतकारक:॥
तस्य लोकाधिप: साक्षी लोकानां पुरुषोऽव्यय:।
धर्मोदयप्रसादेन ब्रह्मलोके वसेत्तत:॥
तथा वानेन विष्णुत्वं ब्रह्म रुद्रस्तथा भवेत्।
शिव लोको गुणै: पूज्यो देवराजसमन्वित:॥
वसेच्छाकेष मानेन व्रतस्यास्यप्रभावत:।

ततो विष्णुस्वरूपेण त्रैलोक्याधिपतिर्भवेत् ॥
शङ्खचक्रगदाधारी वनमाली हरिः स्वयं।
व्रतप्रभावात्तन्योगी देवो नारायणो भवेत् ॥

अगस्त्य उवाच।

स्कन्द केन विधानेन कर्त्तव्यं व्रतमुत्तमं।
सर्व्वादय मनुष्याणां जीवितं दुर्लभं भुवि ॥

स्कन्द उवाच।

कृते कृतं वसिष्ठेन त्रेतायां रघुणा कृतं।
द्वापरे धर्म्मराजेन कलौ पूर्णोदरेण च ॥
अन्यैर्देवमनुष्यैश्च दैत्यैश्च द्विजसत्तम।
कृतमर्व्वोदयं सम्यक् पूर्णकामफलप्रदं ॥
माघमासे कृष्णपक्षे पञ्चदश्यां रवेर्दिने।
वैष्णवेन चक्षत्रेण व्यतीपाते सुदुर्लभे ॥

वैष्णवर्क्षं श्रवणं।

पूर्व्वाह्ने सङ्गमे स्नात्वा शुचिर्भूत्वा समाहितः।
सर्व्वपापविशुध्यर्थं नियमस्थो भवेन्नरः ॥
त्रिदैनत्यंव्रतं देवाः करिष्ये भक्तिमुक्तिदं।
भवन्तु सन्निधौमेऽद्य त्रयोदेवास्त्रयोऽग्नयः॥

इति नियममन्त्रः।

ब्रह्मविष्णुमहेशानां सौवर्णपलसंख्यया।
कर्त्तव्यार्चा तदर्द्धेन तदर्द्धेन द्विजोत्तम ॥
शाकं शतत्रयं शम्भोर्द्रोणानां तिलपर्व्वतः।

मत्स्यपुराणे ब्रह्मा।

कर्त्तव्यो विष्णुरुद्रार्कशिखरैः पूर्व्वोक्तसंख्यया।
शय्यात्रयं ततः कुर्य्यादुपस्करसमन्वितं॥
देवानां त्रयमुद्दिश्य कर्त्तव्यं भक्तिसंयुतैः।
ब्रह्मविष्णुशिवप्रीत्यै दातव्यन्तु गवां त्रयं॥
हिरण्यभूमिधान्यादिदानं विभवसारतः।
दातव्यं वस्त्रसंयुतं[१] ब्राह्मणेभ्यः प्रयत्नतः॥
मध्याह्ने तु नरः स्नात्वा शुचिर्भूत्वा समाहितः।
तिलपर्व्वतमध्यस्थं पूजयेत् देवतात्रयं॥

आदौ ब्रह्मपूजा।

नमो विश्वसृजे तुभ्यं[२] सत्याय परमेष्ठिने।
देवाय देवपतये यज्ञानां पतये नमः॥
ओँ ब्रह्मणे नमः पादौ हिरण्यगर्भाय नम ऊरुभ्यां।
धात्रे नमो जानुभ्यां जङ्घाभ्यां परमेष्ठिने नमः।
वेधसे नमो गुह्ये पद्मोद्भवाय वै नमो नाभौ।

हंसवाहनाय नमः कटिदेशे शतानन्दाय वक्षसि नमः सावित्रीपतये नमोनमोऽस्तु बाहुषु। ओँ ऋग्वेदाय नमः पूर्व्ववक्त्रे यजुर्व्वेदाय नमो दक्षिणवक्त्रे। सामवेदाय नमः पश्चिमवक्त्रे। अथर्व्ववेदाय नमः उत्तरवक्त्रे। ओँ चतुर्वक्त्राय नमः शिरसि। कपोलौ ओँ कपालाय नमः।

---

१ वस्त्रोपेतमिति पुस्तकान्तरे पाठः।
२ पूर्व्वमिति पुस्तकान्तरे पाठः।

ततः कार्य्या लोकपालपूजा विप्रैः समन्ततः।
हिरण्यगर्भ पुरुषप्रधानाव्यक्तरूपवत् ॥
प्रसीद सम्मुखो भूत्वा पूजां गृह्ण नमोऽस्तु ते।

ब्रह्मप्रार्थनमन्त्रः।

नारायण जगन्नाथ नमस्ते गरुडध्वज।
पीताम्बर नमस्तुभ्यं जनार्द्दन नमोऽस्तु ते ॥

अनन्ताय नमः पादौ विश्वरूपाय ते नमः मुकुन्दाय नमो जानुभ्यां ऊरुभ्यां गोविन्दाय नमो जङ्घाभ्यां। गुह्ये प्रद्युम्नाय नमः पद्मनाभाय नमो नाभौ। भुवनोदराय नम उदरे वक्षसि कौस्तुभवक्षसे नमः। चतुर्भुजाय नमो बाहुषु वदने विश्वतोमुखाय नमः। नमः सहस्रशिरसे देवायानन्ताय मौलौ।

आदित्य चन्द्रनयन दिग्बाहो दैत्यसूदन।
पूजां दत्तां मया भक्त्या गृहाण करुणाकर१ ॥

इति विष्णुप्रार्थनामन्त्रः।

महेश्वर महेशान नमस्ते त्रिपुरान्तक।
नमो जीमूतकेशाय नमस्ते वृषभध्वज ॥
ईशानाय नमः पादौ जङ्घाभ्यां चन्द्रशेखरः।
जानुभ्यां पशुपतिर्द्देव ऊरुभ्यां शङ्करः स्मृतः ॥
उमाकान्ताय गुह्ये तु नाभौ वै नीललोहितः।
उदरे कृत्तिवाससे वक्षो नागोपवीतिने ॥
भोगिरूपाय वै बाहू नीलकण्ठस्तु कण्ठगः।

---

१ करुणापर इति पुस्तकान्तरे पाठः।

मुखे वै पञ्चवक्त्राय मौलौ चैव कपर्दिने ॥
अन्धकारे प्रमेयात्मन् नमो लोकान्तकाय च ।
पूजां दत्तां मया भक्त्या गृहाण वृषभध्वज ॥

इति महेश्वरप्रार्थनमन्त्रः ।

इति पूजाक्रमः प्रोक्तो मन्त्रैरेतैः प्रयत्नतः ॥
आचार्य्यं पूजयेद्भक्त्या वस्त्रालङ्कारभूषणैः ।
हस्तमात्रा कर्णमात्रा पीठछत्रं कमण्डलुः ।
श्वेतवस्त्रयुगं देयं ब्रह्मणे सर्व्वमूर्त्तये ।
पीतवस्त्रयुगं विष्णो[१] लोहितं शङ्करस्य च ॥
पञ्चामृतेन स्नपनं पूजनं कुसुमैः शुभैः ।
कमलैरुत्पलैर्नीपैर्बिल्वपत्रैरखण्डितैः ॥
तत्कालसम्भवैर्दिव्यैः पूज्या देवा यथाक्रमं ।
यथाशक्त्या प्रकर्त्तव्यं व्रतमेतत् सुदुर्लभं ॥
जीवितं प्राणिनामेतदनित्यं निश्चितं यतः ।
अथ व्रताङ्गहोमस्य विधानं शृणु तत्त्वतः ॥
देवतात्रयमुद्दिश्य शास्त्रदृष्टेन कर्म्मणा ।
प्रजापते विश्वरूपाय रुद्राय च नमो नमः ।
इत्यनेनैव मन्त्रेण वह्निं संस्थाप्य भक्तितः ।
ततो होमं प्रकुर्व्वीत यथाविभवसम्भवं ॥
अग्नये प्रजापतये स्वाहा । अग्नये विष्णवे स्वाहा ।

---

१ वर्णमिति पुस्तकान्तरे पाठः ।

अग्नये रुद्राय स्वाहा। एवं विधश्च होमः१। प्रजापते नत्वदेतान्यान्येन मन्त्रेण प्रजापतये। इदं विष्णुरिति विष्णवे। त्र्यम्बकमिति महादेवाय। इत्येतैर्मन्त्रैर्घृतहोमः२।

ब्रह्मणे विष्णवे महादेवाय स्वाहेति पूर्णाहुत्या सर्व्वान् कामानवाप्नोति प्राप्नोति होमोव्रताङ्गहोमः।

अथ होमावसाने च गाञ्च दद्यात्पयस्विनीं।
स्वर्णशृङ्गीं रौप्यखुरां घण्टाभरणभूषितां॥
ताम्रपृष्ठीं कांस्यदोहां सर्व्वोपस्करसंयुतां।
सदक्षिणां सुशीलाय आचार्य्याय निवेदयेत्॥
तेन दत्तं हुतं जप्तमिष्टं यज्ञैः सहस्रधा।
कृतकृत्यो भवेद्विप्र व्रतस्यास्य प्रभावतः॥
एतत्सर्व्वं मयाख्यातं दुर्लभं व्रतमुत्तमं।
अर्कोदयं यथा दृष्टं किमन्यत् श्रोतुमिच्छसि३॥

इति स्कन्दपुराणोक्तमर्कोदयव्रतं।

———०००———

अमावस्यां निराहारः अब्दमेकं नियन्त्रितं।
शूलपिष्टमयं कृत्वा वर्षान्ते विनिवेदयेत्॥
शिवाय राजतं पद्मं सौवर्णं कृतकर्णिकं।
भक्त्या च विन्यसेत् मूर्ध्नि शेषं४ पूर्व्ववदाचरेत्॥

---

१ एवम्विधचरुहोम इति पुस्तकान्तरे पाठः।

२ चरुहोम इति पुस्तकान्तरे पाठः।

३ परिपृच्छतीति पुस्तकान्तरे पाठः।

४ शङ्खमिति पुस्तकान्तरे पाठः।

कामतोऽपि कृतं पापं भ्रूणहत्यादिकञ्च यत् ।
तत्सर्व्वं मूलदानेन हत्वा नारीर्न संशयः ॥
महापद्मविमानेन नरो नारीसमन्वितः ।
युगकोटिशतं साग्रं शिवलोके महीयते ॥

पूर्व्ववदिति अहिंसा ब्रह्मचर्य्य भूशयन पाषण्डानालापादिकमाचरेदित्यर्थः ।

ईशलोकादिलोकेषु भुक्त्वा भोगाननेकशः ।
इह लोके क्रमात्प्राप्य यथेष्टं पतिमाप्नुयात् ॥

इति शिवधर्म्मोक्तं मूलदानव्रतं[1] ।

———000(D)000———

अगस्त्य उवाच ।

सर्गादौ ब्रह्मणा सृष्टास्तमूचुः पितरस्तदा ।
वृत्तिर्नो धेहि भगवान् ब्रह्मावदिशदेवयं ॥

ब्रह्मोवाच ।

अमावास्यादिनं वोऽस्तु तस्यां तिलकुशोदकैः ।
तर्पिता मानुषैस्तृप्तिं परां गच्छन्तु नान्यथा ॥
तिला देयास्तथैतस्मादुपोष्य पितृभक्तितः ।
चिराय तस्य सन्तुष्टा वरं यच्छन्तु मा चिरं ॥
तस्मादस्यान्तिथौ विद्वानेतत्सर्व्वं समाचरेत् ।

इति वराहपुराणोक्तं पितृव्रतं ।

———000———

१ विष्णुधर्म्मोत्तरोक्तं शिवव्रतमिति पुस्तकान्तरे पाठः ।

ब्रह्मोवाच ।

पितरः स्वर्दितैः पिण्डैरिष्टाः कुर्व्वन्ति सर्व्वदा ।
प्रजावृद्धिं धनं रक्षामायुष्यं बलमेव च ॥
मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः ।
गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते ॥
पूजाशाठ्येन शाठ्येन कृतापि तु फलप्रदा ।
आज्यधारासमिश्रैश्च दधिक्षीरान्नमाक्षिकैः ॥
पूर्व्वोक्तफलदो होमः कृतः शान्तेन चेतसा१ ।

एतद्व्रतं वैश्वानरप्रतिपद्व्रतवद्व्याख्येयं ।

इति भविष्यत्पुराणोक्तं पितृव्रतं ।

——oo(ii)oo——

पुलस्त्य उवाच ।

वर्षमेकं भवेद्यस्तु पञ्चदश्यां पयोव्रतः ।
पञ्चदश्यामित्यमावास्यायां पुराणान्तरसंवादात् ॥
समाप्ते श्राद्धकृद्दद्यात्२ घटा३ पञ्च पयस्विनीः ।
वासांसि च पवित्राणि जलकुम्भयुतानि च ॥
स याति वैष्णवं लोकं पितृणां तारयेच्छतं ।
जन्मान्तरे भवेद्राजा पयोव्रतमिदं कृतं ॥

इति पद्मपुराणोक्तममावस्यापयोव्रतं ।

——o——

१ परमात्मेन चेतसेति पुस्तकान्तरे पाठः ।
२ श्रद्धावद्द्यादिति पुस्तकान्तरे पाठः ।
३ गावइति पुस्तकान्तरे पाठः ।

मार्कण्डेय उवाच ।

प्रभास्वरा वर्हिषद अग्निस्वात्तास्तथैव च ।
क्रव्यादाश्चैव भताश्च आज्यपाश्च सुकालिन. ॥
पूज्याः पितृगणा राजन् सोपवासेन नित्यशः ।
चैत्रे कृष्णारथारभ्य पञ्चदश्यां नराधिप ॥
आदन्तदक्षि कुर्वीत यावत् संवत्सरं भवेत् ।
गन्ध-माल्य-नमस्कार-धूप दीपान्नसम्पदा ॥
संवत्सरान्ते दद्याच्च तथा धेनुं पयस्विनीं ।
ब्राह्मणाय महाभाग पितृभक्ताय यक्षितः१ ॥
कृत्वा व्रतं वत्सरमेतदिष्टं
प्राप्नोति लोकान् स तथाच तेषां ।
तत्रोच्च कालं सुचिरं सुखी स्यात्
प्राप्नोति मोक्षं पुरुषप्रधानः२ ॥

इति विष्णुपुराणोक्तं पितृव्रतं ।

———ooo———

श्रीमार्कण्डेय उवाच ।

कृष्णपक्षे पञ्चदश्यां चैत्रादारभ्य यादव ।
वह्निसंपूजनं कृत्वा गन्धमाल्यान्नसम्पदा ॥
तिलहोमस्तथा कुर्य्यात्मा वह्नेर्नराधिप ।
संवत्सरान्ते दद्याच्च सुवर्णं ब्राह्मणाय च ॥

१ भक्षित इति पुस्तकान्तरे पाठः ।
२ सुरप्रधानइति पुस्तकान्तरे पाठः ।

कृत्वा व्रतं वत्सरमेतदिष्टं
प्राप्नोति वित्तं सततं यशश्च ।
धर्मं मतोरूपमनुत्तमञ्च
कामान् यथेष्टान् पुरुषप्रधानः ॥

इति विष्णुपुराणोक्तं वह्निव्रतं ।

——000——

मार्कण्डेय उवाच ।

अमावास्यान्तवेलायां सोपवासो नरोत्तम ।
पद्मद्वये पूजयन्ति चन्द्रार्कावेकराशिगौ ॥
आदित्यमष्टदलके शशिनं षोडशाकरे ।
आदित्यं सर्व्वरत्नेन चन्द्रं शुक्लेन यादव ॥
मास्यादिना महाभाग होमयेत्तिलतण्डुलान् ।
घृतक्षीरयुतान् राजन् तथार्च्चयेद्य[1]थाविधि ।
व्रतान्ते ब्राह्मणेन्द्राय कनकं[2] प्रतिपादयेत् ॥
रजतञ्च महाभाग य इच्छेद्गतिमात्मनः ।
कृत्वा व्रतं वत्सरमेतदिष्टं
दद्याच्च दीपान् विधिवत् प्रभूतान्
चान्द्रं पदं प्राप्य विवर्द्धतेसदः
धनान्वितः स्यात्त्रिदिवे इहैव ॥

इति विष्णुधर्म्मोत्तरोक्तं चन्द्रव्रतं[3] ।

---

१ मवोर्मोत्स्यादिति पुस्तकान्तरे पाठः ।

२ करकमिति पुस्तकान्तरे पाठः ।

३ चन्द्रकव्रतमिति पुस्तकान्तरे पाठः ।

भगवानुवाच ।

अमावस्यामनुप्राप्य ब्राह्मणाय कुटुम्बिने ।
यत् किञ्चित् वेदविदुषे दद्यादुद्दिश्य शङ्करं ॥
प्रीयतामीश्वरः सोमो महादेवः सनातनः ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥

इति कूर्म्मपुराणोक्तममावास्याव्रतं ।

अमावस्यायां ब्रह्माणं समुद्दिश्य पितामहं ।
ब्राह्मणांस्त्रीन् समभ्यर्च्य मुच्यते सर्व्वपातकैः ॥

इति कूर्म्मपुराणोक्तममावास्याव्रतं ।

इति श्रीमहाराजाधिराज-श्रीमहादेवस्य-सकल-करणा-
धीश्वर-सकलविद्या-विशारद-श्रीहेमाद्रिविरचिते
चतुर्व्वर्गचिन्तामणौ व्रतखण्डे
अमावस्याव्रतानि ॥

अथ एकविंशोऽध्यायः।

अथ नानातिथिव्रतानि।

प्रत्येकमुक्तेषु तिथिव्रतेषु

लब्धावकाशं पुनरादद्दे तत्।

हेमाद्रिरत्यन्तफलप्रदायि

नानातिथीनां व्रतवृन्दमाह॥

युधिष्ठिर उवाच।

श्रावयामि हृषीकेश यन्नोक्तं भवता मम।

तत्सावित्रीव्रतं ब्रूहि प्रसादसुमुखो भव॥

श्रीकृष्ण उवाच।

कथयामि कुलस्त्रीणां महिम्नोवर्द्धनं परं।

यथा चीर्णं व्रतं पूर्व्वं सावित्र्या राजकन्यया॥

आसीन्मद्रेन्द्रो धर्मात्मा सर्व्वभूतहिते रतः।

पार्थिवोऽश्वपतिर्नाम पौरजानपदप्रियः॥

सर्व्वरोऽनपत्यश्च सत्यवाक् संयतेन्द्रियः।

स सभार्य्यो व्रतमिदञ्चकारापत्यकाम्यया॥

सावित्रीति प्रसिद्धं यत् सर्व्वकामप्रदायकं।

तस्य तुष्टा तु सा देवी सावित्री ब्रह्मणः प्रिया॥

भूर्भुवः स्वरितीत्यस्याः साक्षान्मूर्त्तिरिह स्थिता।

कमण्डलुकरा देवी वरदा स्मितभाषिणी ॥
उवाच दुहिता ह्येका तव राजन् भविष्यति ।
तस्याः प्रसादादप्येतत्सर्व्वं तव समागतं ॥
मत्ताज्ञा सा च वक्तव्या महाकीर्त्तिमती तु सा ।
भविष्यति महाराज मा शोकं कर्त्तुमर्हसि ॥
एवमुक्ता तु सा देवी जगामादर्शनं तदा ।
कालेन बहुना जाता दुहिता देवरूपिणी ॥
सावित्रीप्रीतये हुत्वा सावित्र्यापूजया तथा ।
आदिष्टा चैव सावित्र्या सावित्रीसदृशी यतः ॥
सावित्रीत्येवनामास्याश्चक्रु विप्रास्तथापि सा ॥
सावित्री विग्रहवती[१] व्यवर्द्धत पितुर्गृहे ।
काले बहुतिथे याते यौवनस्था बभूव सा ॥
सा सुमध्या पृथुश्रोणी प्रतिमां काञ्चनीमिव ।
प्राप्तेयं देवकन्येति संभ्रमं मेनिरे जनाः ॥
सा तु पद्मपलाशाक्षी प्रज्वलन्तीव तेजसा ।
चचार सापि सावित्रीव्रतं तद्गुरुणोदितं ॥
अथोपोष्य शिरः स्नाता सम्यक् सम्पूज्य देवताः ।
हुत्वाग्निं विधिवद्विप्रान् वाचयित्वेन्दुपर्व्वणि ॥
तेभ्यः सुमनसो मूर्ध्ना प्रतिगृह्य नृपात्मजा ।
सखीपरिवृताभ्येत्य[२] देवश्रीरिव रूपिणी ॥

१ साक्षीकविग्रहवतीति पुस्तकान्तरे पाठः ।

२ भर्त्तेरिति पुस्तकान्तरे पाठः ।

साभिवाद्य पितुः पादौ विनीता चारुहासिनी।
कृताञ्जलिर्वरारोहा नृपतेःपार्श्वतः स्थिता॥
तां दृष्ट्वा यौवनप्राप्तां स्वां सुतां देवरूपिणीं
उवाच राजा संमन्त्र्य मृत्यर्थं सह मन्त्रिभिः॥
पुत्री प्रदानकालास्ति नच कश्चिद्वृणोति मां।
विचारयन्न[1] पश्यामि वरंतुल्यमिहात्मनः॥
तथापि देयासि मया दोषः स्यादन्यथा मम।
देवादीनां तथा वाच्यो न भवेय तथा कुरु॥
पठ्यमानं मया पुत्रि धर्मशास्त्रेषु विश्रुतं।
पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता॥
ब्रह्महत्या पितुस्तस्य सा कन्या वृषली स्मृता।
अतोऽत्र प्रेषयामि त्वां कुरु पुत्रि स्वयम्बरं॥
वृद्धैरनुमतासि त्वं शीघ्रं गच्छ च मा चिर।
देवादीनां यथा वाच्यो न भवेयं तथा कुरु॥
एवमस्त्विति सावित्री प्रोक्त्वा शीघ्रं विनिर्ययौ।
स्यन्दनेन महार्हेण मन्त्रिभिः परिवारिता॥
तपोवनानि रम्याणि राजर्षीणां जगाम सा।
मान्यानां तत्र वृद्धानां कृत्वा पादाभिवन्दनम्॥
ततो बभ्राम तीर्थानि पर्वतांश्च वनानि च।
देशांश्च विविधान् रम्यानाश्रमान् सुमनोहरान्॥
एकस्मिन्नाश्रमपदे कृतकृत्या बभूव सा।
वरयित्वा वरं सा तु आजगाम स्वमालयं॥

१ विचारयन् इति पुस्तकान्तरे पाठः।

सावित्री सखिसहिता परितुष्टेन चेतसा ।
तत्र पश्यति देवर्षिं नारदं पुरतः पितुः ॥
आसीनमासने विप्रं प्रणम्य स्मितभाषिणी ।
कथयामास तत्सर्वं येनारण्यं गतागता ॥

सावित्र्युवाच ।

आसीच्छाल्वेषु धर्म्मात्मा क्षत्रियः पृथिवीपतिः ।
द्युमत्सेन इति ख्यातो दैवादन्धो बभूव सः ॥
तस्याप्यभवद्भार्य्या वै रुक्मिणी नाम सुन्दरी ।
तस्य प्रतिहृतं राज्यं वैरिभेदेन योगतः ॥
स बालया तया सार्द्धं भार्य्यया प्रस्थितो वनं ।
स तस्य वनसंवृद्ध पुत्रः परमधार्म्मिकः ॥
सत्यवान् नामरूपाढ्यो भर्त्तेति मनसा वृतः ।

नारद उवाच ।

अहो कष्टमहो कष्टं सावित्रि किमिदं कृतं ।
कृतस्ते बालभावाद्यद्गुणवान् सत्यवान् नृपः ॥
सत्यं वदत्यसौ राजा सत्याश्वस्तेन स स्मृतः ।
नित्यमश्वाः प्रियास्तस्य करोत्यश्वान् स मृण्मयान् ।
चित्रेऽपि लिखयत्यश्वान् चित्राश्वस्तेन कथ्यते ॥
किं वर्ण्णो रन्तिदेवस्य भक्त्या दानगुणैः समः ।
ब्राह्मणः सत्यवाग्दक्षः शिविरौशीनरो यथा ॥
ययातिरिव चोदारः सोमवत् प्रियदर्शनः ।
अश्विनाविव रूपेण द्युमत्सेनसुतो बभौ ॥

एको दोषोऽस्ति नान्योऽसावद्यप्रभृतिसत्यवान्।
संवत्सरेण क्षीणायुर्देहत्यागं करिष्यति॥

श्रीकृष्ण उवाच।

नारदादेतदाकर्ण्य दुहितुःप्राह पार्थिवः।
पुत्रि सावित्रि गच्छान्यं वरं वरय सत्पतिं॥
संवत्सरेण सोऽल्पायुर्देहत्यागं करिष्यति।

सावित्र्युवाच।

सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति पण्डिताः।
सकृत्कन्या प्रदीयन्ते त्रीण्येतानि सकृत्सकृत्॥
दीर्घायुरथवाल्पायुः सगुणो निर्गुणोऽपि वा।
सकृद्वृतो मया भर्त्ता न द्वितीयं वृणोम्यहं॥
मनसा निश्चयं कृत्वा ततो वाचाभिधीयते।
क्रियते कर्म्मणा पश्चादेषधर्म्मः सनातनः॥

नारद उवाच।

यद्येतदिष्टं दुहितुस्ततः शीघ्रं विधीयतां।
अविघ्नमस्तु सावित्रि भद्रन्तव करिष्यति॥
एवमुक्त्वा खमुत्पत्य नारदस्त्रिदिवं ययौ।
उत्पाद्य दुःखमतुलं तस्य राज्ञो युधिष्ठिर॥
राजापि दुःखसंविग्नचित्तं ध्यानपरोऽभवत्।
अहोऽतिकष्टमुत्पन्नमपारं मादृगात्मनां॥
एतत् दुःखमहो दृष्ट्वा वरमेषानपत्यता।
सत्यमुक्तं पुराचार्य्यैः कन्या दुःखैकभाजनं॥

देवैर्यदुक्तं तत्सर्वं व्यलीकं प्रतिभाति मे ।
एवं संशोध्य बहुधा दधावात्मानमात्मना ॥
देवीं संस्मृत्य सावित्रीं यया दत्तो वरः पुरा ।
जगौ स्वदुहितुः सर्व्वं वैवाहिकमथाकरोत् ॥
स्वयं गत्वा तु सामग्या वनं मुनिनिषेवितं ।
शुभे मुहूर्त्ते पार्श्वस्थै र्ब्राह्मणैर्वेदपारगैः ॥
समर्थयित्वा कन्यां तां दत्त्वा पूपांश्च पुष्कलान् ।
उवाचेदं महाभागां व्यथितेनान्तरात्मना ॥
द्युमत्सेन महाभाग शृणु मे परमं वचः ।
इयं मे दुहितातीववल्लभा जीवितादपि ॥
भर्त्ता समुचितो ह्यस्याः सत्यवान् सत्यवल्लभः ।
त्वमप्यस्याः समुचितः श्वशुरो धर्म्मवल्लभः ॥
अतोऽपराधाः क्षन्तव्याः बालेयं राज्यलालिता ।
यदाभीष्टं च जामातुर्युवयोर्यदभीप्सितं ॥
तत्तदास्थेयमस्माकं स्वस्ति तेऽस्तु व्रजाम्यहं ।

श्रीकृष्ण उवाच ।

इत्यामन्त्र्य गतो राजा नारदोक्तं व्यथान्वितः ।
सावित्र्यपि च तल्लब्ध्वा भर्त्तारं मनसेप्सितं ॥
मुमुदेऽतीव तन्वङ्गी देयं प्राप्येव पुण्यकृत् ।
एवं तत्राश्रमे तेषां तदा निवसतां सतां ॥
कालस्तत्पश्यतां कश्चिदतिचक्राम भारत ।
सावित्र्यास्तु शयानाया श्चिन्तयन्त्या दिवानिशं ॥
नारदेन यदुक्तन्तद् दयाचापसर्पति ॥

ततः काले बहुतिथे व्यतिक्रान्ते कदाचन।
प्राप्तःकालोहि मर्त्तव्यं यत्र सत्यवता नृप॥
प्रौष्ठपदे सिते पक्षे द्वादश्यां रजनीमुखे।
गणयन्त्याश्च साविश्या नारदोक्तं वचो हृदि॥
चतुर्थेऽहनि मर्त्तव्यमिति सञ्चिन्त्य भामिनी।
व्रतं त्रिरात्रमुद्दिश्य सावित्र्याख्यं महाफलं॥
उपोष्य संस्थिता साध्वी सावित्री सा पतिव्रता।
ततस्त्रिरात्रं निर्व्वर्त्त्य स्नात्वा सन्तर्प्य देवताः॥
श्वश्रूश्वशुरयोः पादौ ववन्दे चारुहासिनी।
अथ प्रतस्थे परशुं गृहीत्वा सत्यवान्वनं।
सावित्र्यपि च भर्त्तारं गच्छन्तं पृष्ठतोऽन्वयात्॥
वार्य्यमाणापि सा भर्त्रा श्वश्रूभ्याञ्चाभिभाषिता।
ऊचतुस्तौ च मा भद्रे गच्छ कण्टकिनं वनं॥
सुकुमारासि कल्याणि लालिता पृथिवीभृता।
श्वापदाश्वापदैर्य्यातु कथं गच्छसि[१] तद्वनं॥
उपवासात्त्रयस्तेऽद्य तस्माद्गृहे सुमध्यमे।

सावित्र्युवाच।

नैष धर्म्मो वरस्त्रीणां यद्भर्त्तरि बुभुक्षिते॥
स्वयमेव च भोक्तव्यमित्याहुर्धर्म्मदर्शिनः॥
अपरं कौतुकमेऽस्ति वनस्यास्य प्रदर्शने।
भर्त्रा सह प्रयास्यामि सहाया स्वामिनोऽचिरं॥

---

१ गच्छाभीति पुस्तकान्तरे पाठः।

युष्मत्पादप्रसादेन सा निषेधं करिष्यथ।
ततो ज्ञात्वा च सा बाला जगामाथ पतिव्रता॥
सावित्र्यनुपदं भर्त्तुर्वने तस्मिन् मनोरमे।
गत्वासौ दूरमध्वानं जग्राहाथ फलादिकं॥
समित्कुशांश्च कुसुमं भार्य्यया स वदन् प्रियं।
काष्ठानि शुष्काण्यादाय काष्ठभारमकल्पयत्॥
काष्ठं कुठारेण तथा पाटयामास लीलया।
अथ पाटयतस्तस्य जाता शिरसि वेदना॥
ततः संत्यज्य तत्सर्वं वटच्छायामुपाश्रितः।
सत्यवान् वेदनाक्रान्तः किञ्चिद्दर्शितमानसः॥
वटशाखामवष्टभ्य सत्यवान् प्राह गद्गदं।
सावित्रि पश्य शिरसि वेदना मां प्रबाधते॥
न च किञ्चित् प्रवक्ष्यामि भ्रमत्येव हि मे मनः।
तवोत्सङ्गे क्षणन्तावत् स्वप्तुमिच्छामि सुन्दरि॥
विश्रमस्व महाबाहो सावित्री प्राह दुःखिता।
पश्चादपि गमिष्यावः श्रमम समनोहरं॥
यावदुत्सङ्गगं कृत्वा शिरश्चास्ते महीतले।
तावत् करालवदनाः शतशोथ सहस्रशः॥
आजग्मुर्यमदूताश्च रौद्राश्चातिभयङ्कराः।
न शेकुर्द्दृष्टिपातेऽस्याः सावित्र्या ह्यात्मसन्निधौ॥
गत्वाचचक्षुस्तत्सर्वं सावित्र्यास्ते तु चेष्टितम्।
दृष्टिपातेन नाम्माभिः शक्यतेऽस्याः प्रबाधितुं।
दहतीव च नो देहं दृष्टिपातेन सा सती।

तत् स्वयं याहि नोऽस्माऽभिः साध्यते सत्यवान् क्वचित्॥
इत्याकर्ण्य यमः कोपादुत्थायाथ वरासनात्।
आरुह्य महिषं रौद्रं रौद्रः प्राणहरो बली॥
आजगाम त्वरायुक्तो यत्रास्ते सा पतिव्रता।
सावित्र्यपि च सम्भ्रान्ता वीक्ष्यमाणा इतस्ततः॥
सावधाना कथं कोऽद्य भर्त्तारं मम नेष्यति।
तावद्ददर्श सा बाला पुरुषं कृष्णपिङ्गलं॥
किरीटिनं पीतवस्त्रं साक्षात् सूर्य्यमिवोदितं।
तमुवाचाथ सावित्री प्रणम्य मधुराक्षरं॥
कस्त्वन्देवोऽथ दैत्यो वा मान्धर्षितुमुपागतः।
न चाहं केनचिच्छक्या स्वधर्मादवरोपितुं॥
प्रष्टुं वा पुरुषश्रेष्ठ दीप्तामग्निशिखामिव॥
यम उवाच।
यमः संयमनश्चाहं सर्व्वभूतभयङ्करः।
क्षीणायुरेष ते भर्त्ता सन्निधौ ते पतिव्रते॥
न शक्तः किङ्करैर्जेतुं ततोऽहं स्वयमागतः।
एवमुक्त्वा सत्यवतः शरीरात् पाशसंयुतं॥
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्।
अथ प्रयातुमारेभे पन्थानं पितृसेवितं॥
सावित्र्यपि वरारोहा कृत्वा पादेन मङ्गलं१।
रक्षार्थं भर्तृकायस्य यथावदनुपद्दस्ततः॥

---

१ मण्डलमिति पुस्तकान्तरे पाठः।

पतिव्रतत्वादश्रान्ता ध्यायमाना निजं पतिं[१] ।
तच्चित्ता तद्गतप्राणा तामुवाच यमस्तदा ॥
निवर्त्य गच्छ सावित्रि सुदूरं त्वमिहागता ।
एष मार्गो विशालाक्षि न केनाप्यनुगम्यते ॥

सावित्र्युवाच ।

न श्रमो न च मे ग्लानिः कदाचिदपि जायते ।
भर्त्तारमनुगच्छन्त्यास्तव शिष्टस्य सन्निधौ ॥
सतां सन्तो गतिर्नान्या स्त्रीणां भर्त्ता सदा गतिः ।
वेदा वर्णाश्रमाणाञ्च शिष्याणाञ्च गतिर्गुरुः ॥
सर्वेषामेव जन्तूनां स्थानमस्ति महीतले ।
मुक्त्वा भर्त्तारमेकन्तु स्त्रीणां नान्यः समाश्रयः ॥
एभिरन्यैः समुचितैर्वाक्यैर्धर्म्मार्थसंयुतैः ।
तोषितो धर्म्मराजस्तु सावित्रीमिदमब्रवीत् ॥
तुष्टोऽस्मि तव भद्रे ऽद्य वरान् वरय सुव्रते ॥
सा च वव्रे वरान् पञ्च विनयावनता सती ।
चक्षुःप्राप्तिस्तथा राज्यं श्वशुरस्य महात्मनः ॥
जीवितञ्च तथा भर्त्तुर्धर्म्मप्राप्तिञ्च शाश्वतीं ।
पितुः पुत्रशतञ्चैव तथा च शतमात्मनः ॥
धर्म्मराजो वरं दत्त्वा प्रेषयामास तान्ततः ।
आजगामाथ सावित्री न्यग्रोधविटपन्तथा ॥
कृत्वोत्सङ्गे शिरस्तस्य पूर्व्ववन्निषसाद सा ।
गात्रसंवाहनं चक्रे भर्त्तुःशान्तस्य भारत ॥

---

१ निजं पदमिति पुस्तकान्तरे पाठः ।

लब्धचेतनां प्राप्य नीरुक् प्राहेदमादरात्।
कथं न बोधितो भद्रे कालोऽतीव गतो मम॥
किं वक्ष्यति हि मे तातः किञ्च माता च दुःखिता।
विरुद्धं ह्यद्य संजातं कालोऽतीव गतो वने॥
विहाय मातापितरौ कालो न क्वापि मेऽत्यगात्।
इति मत्वा विरुध्येते ह्यतं नेह प्रबोधनं[१]॥

सावित्र्युवाच।

कथं त्वां बोधयाम्यत्र पीड़ितस्तु शिरोरुजा।
मम नाथ विलम्बोऽभूदकार्येण तवानघ॥
प्रहृष्टोत्थाय सावित्री जग्राह शिरसेन्धनं।
समित्कुशादिकं साथ जग्मतुस्तौ स्वमाश्रमं॥
ततः पित्रा स्वनेत्राभ्यां दृष्टौ तौ परया मुदा॥
आलिङ्ग्य मूर्धन्याघ्राय पुत्रमङ्के निवेश्य सः।
उवाच दिष्ट्या पश्यामि सभार्य्यस्त्वां समागत॥
विलम्बकारणं पृष्टः समाचष्टे यथातथा।
विदितार्थोऽतिसंहृष्टः पूजयामास तां सतीं॥
अथाप[२] पूर्व्वजैर्भुक्तं राज्यं निहतकण्टकं।
द्युमत्सेनो महाभाग इयाज क्रतुभिस्तदा॥
ततोऽन्तपतिरासाद्य पुत्रानात्मगुणाधिकान्।
सावित्र्या चेष्टितं ज्ञात्वा जामातुर्जीवितं तथा॥
राज्यप्राप्तिं च विपुलां परां मुदमवाप सः।

१ न त्वामेवप्रबोधनमिति पुस्तकान्तरे पाठः।
२ आचार्यैरिति पुस्तकान्तरे पाठः।

सावित्र्याख्यानकमिदं सर्व्वपापप्रणाशनं ॥
अवैधव्यप्रदं स्त्रीणां स्वर्गमोक्षप्रदायकं ।
सुखसौभाग्यदं पार्थ प्रातर्जप्यमिदं सदा ॥
भाद्रपदे पौर्णमास्यामाभ्यु चीर्णं व्रतं त्विदं ।
माहात्म्यमस्य नृपतेः कथितं सकलं मया ॥

युधिष्ठिर उवाच ।

कीदृशं तद्व्रतं कृष्ण सावित्र्या यदनुष्ठितं ।
तस्मिन् भाद्रपदे मासि विधानं तस्य शंस मे ॥
का देवता व्रते तस्मिन् को मन्त्रः किं फलं विभो ।
एतदाख्याहि मे नाथ न हि तृप्यामि माधव ॥

श्रीकृष्ण उवाच ।

श्रूयतां पाण्डवश्रेष्ठ सावित्रीव्रतमादरात् ।
कथयामि यथा चीर्णं तया सत्या युधिष्ठिर ॥
त्रयोदश्यां भाद्रपदे दन्तधावनपूर्वकं ।
त्रिरात्रं नियमं कुर्य्यादुपवासस्य भक्तितः ॥
अशक्ता च त्रयोदश्यां नक्तं कुर्य्याज्जितेन्द्रिया ।
अयाचितं चतुर्दश्यां पौर्णमास्यामुपोषणम् ॥
नित्यं स्नात्वा महानद्यां तडागे निर्झरेऽपि वा ।
विशेषतः पूर्णमास्यां स्नानं सर्षपमृज्जलैः ॥
गृहीत्वा वालुकां पात्रे प्रस्थमात्रां युधिष्ठिर ।
अथवा धान्यमादाय यवशालितिलादिकं ॥
ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टिते ।
सावित्रीप्रतिमां कृत्वा ब्रह्मणश्चैव शोभनं ॥

सौवर्णीं मृण्मयीं वापि स्वशक्त्या रौप्यनिर्मितां।
ब्रह्मणोरूपनिर्म्माणं पूर्व्वमभिहितं वेदितव्यं।
रक्तवस्त्रयुगं दद्यात्सावित्र्या ब्रह्मणः सितं॥
सावित्रीं ब्रह्मणासार्द्धमेवं भक्त्या प्रपूजयेत्।
गन्धैः पुष्पैश्च नैवेद्यैर्दीपकैर्मोदकैः शुभैः॥
पूर्णं कोशातकैः पक्कैः कूष्माण्डैः कर्कटीफलैः।
नारिकेलैश्च खर्ज्जूरैः कपित्थैर्दाड़िमैस्तथा॥
बीजपूरैः सनारङ्गैराखोटैः पनसैस्तथा।
धान्यकैर्जीरकैर्हृद्यैर्गुडेन लवणेन च।
विरूढैः सप्तधान्यैश्च वंशपात्रप्रकल्पितैः॥
हरिद्रया कण्ठसूत्रैः शुभैः कुङ्कुमकेसरैः।
अवतारं करोत्येव सावित्री ब्रह्मणः प्रिया॥
तामर्च्चयीत मन्त्रेण सावित्रीं ब्राह्मणीं स्वयं।
इतरासां तथा स्त्रीणां पुराणोक्तो विधिः स्मृतः॥
ओं कारपूर्व्वके देवि वीणापुस्तकधारिणि।
वेदमातर्नमस्तुभ्यमवैधव्यं प्रयच्छ मे॥
रूपं देहि यशोदेहि सौभाग्यं देहि देवि मे।
यथा प्रसन्ना सावित्रा स्तथा मां पाहि पाविनि॥
एवं संपूज्य विधिवज्जागरं तत्र कारयेत्।
गीतवादित्रनिर्घोषैर्हृष्टनारीकदम्बकैः॥
पुण्याख्यानैश्च विविधैस्तां रात्रिमतिवाहयेत्।
उत्सवेन नयेद्रात्रिं सावित्र्याश्च कथानकैः॥
ततः प्रभातसमये रवावनुदिते सति।

सावित्रीं ब्राह्मण श्रेष्ठ नैवेद्यानि निवेदयेत् ॥
अथ सावित्रिकल्पज्ञे सावित्राख्यानवाचके ।
वेदज्ञे तु स्वधर्मस्थे दरिद्रे वा कुटुम्बिनि ॥
मन्त्रेणानेन कौन्तेय प्रणम्य विधिपूर्व्वकं ।
दूर्व्वाक्षततिलैर्म्मिश्रां पूर्व्वाशाभिमुखस्थितां ॥
शुचिवस्त्रधरो विप्रश्चोंकारस्वस्तिपूर्व्वकं ।
सावित्रीयं मया दत्ता सहिरण्या हिरण्मयी ॥
ब्रह्मणः प्रीणनार्थाय ब्राह्मण प्रतिगृह्यतां ।
एवं दत्त्वा द्विजेन्द्राय सावित्रीं तां युधिष्ठिर ॥
नैवेद्यादि च तत्सर्व्वं ब्राह्मणस्य गृहं नयेत् ।
स्वयं दशपदं गच्छेत्स्ववेश्म तत आविशेत् ॥
गौरिण्यो भोजयेद्भक्त्या हविष्यान्नेन शक्तितः ।
पुष्पैः कुङ्कुमसिन्दूरैस्ताम्बूलैः कण्ठसूत्रकैः ॥
वासोभिर्भूषणैः[१] शक्त्या वित्तशाठ्यविवर्जिता ।
विसर्जयेत्ततस्तांश्च सावित्रीप्रीयतामिति ॥
वक्तव्यं ब्राह्मणैः सर्व्वैस्तुष्टैर्भक्तोत्तरे भृशं ।
सावित्री वरदा तुभ्यं भवतां भावसुव्रता[२] ॥
पुत्रा भ्रष्टो तथा भर्त्ता परमायुरनामयः ।
पुत्रैःपौत्रैश्च संबद्धं वर्द्धतान्तव सत्कुलं ।
व्रतञ्च सुव्रतं तत्तद्विधिनानेन निर्म्मितं ॥
पञ्चदश्यां तथा ज्येष्ठे वटमूले महासती ।

---

१ वासोभिर्भूषणैरिति पुस्तकान्तरे पाठः ।

२ भवन्तु तव सुव्रतेति पुस्तकान्तरे पाठः ।

त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत् ॥
सार्द्धं सत्यवता साध्वीं फलनैवेद्यदीपकैः।
वटावलम्बिनं कृत्वा काष्ठभारं युधिष्ठिर ॥
रात्रौ जागरणं कृत्वा गीतनृत्यपुरःसरं।
ततः प्रभाते विधिना पूर्व्वोक्तेन नरोत्तम ॥
तामपि ब्राह्मणे दद्यात् प्रणिपत्य समापयेत्।
एतद्व्रतवरं पार्थ कथितं विधिवन्मया ॥
याश्चरिष्यन्ति लोकेऽस्मिन् पुत्रपौत्रसमन्विताः।
भुक्त्वा भोगांश्चिरं भूमौ यास्यन्ति ब्रह्मणः पदम् ॥
एतत् पुण्यं पापहरं धन्यं दुःस्वप्ननाशनं।
जपतां शृण्वतां चैव सावित्री व्रतमादरात् ॥
सत्यर्थवेदजननीं सहभर्त्तृकां या
सम्पूजयेत् कृतदिनत्रितयोपवासा।
सावित्रिवत् पितृकुलञ्च तथैव भर्त्तु
स्तद्वत्यया भुवि भुनक्ति चिरं सुखानि॥

इति भविष्योत्तरोक्तं ब्रह्मसावित्री व्रतं।

स्कान्दपुराणात्।

धर्म्मराजवरप्रदानानन्तरं सावित्र्युवाच।
मदीयन्तु व्रतं देव भक्त्या नारी करिष्यति।
भर्त्तुः सान्निहिता साध्वी समस्तफलभाजना ॥

धर्म्मराज उवाच ।

नारी वा विधवा वापि अपुत्रा पतिवर्जिता[१] ।
सभर्त्तृका[२] सपुत्रा वा कार्य्यं व्रतमिदं शृणु ॥
ज्यैष्ठमासे तु संप्राप्ते पौर्णमास्यां पतिव्रता ।
स्नात्वा चैव शुचिर्भूत्वा वटं सिञ्च्य जलोदकैः ॥
सूत्रेण वेष्टयेद्भक्त्या गन्धपुष्पाक्षतैः शुभैः ॥
नमो वैवस्वतायेति भ्रमयन्तीप्रदक्षिणं ।
रात्रौ कुर्वीत नक्तञ्च अष्टमेकं समाहिता ।
तथैव वटवृक्षञ्च पक्षे पक्षे च पूजयेत् ॥
संप्राप्ते च पुनर्ज्यैष्ठे लघुभुक् द्वादशीर्न्नयेत् ।
दन्तानां धावनं कृत्वा नियमं कारयेत्ततः ॥
त्रिरात्रं लङ्घयित्वा च चतुर्थे दिवसेऽह्नि ।
चन्द्रायार्घ्यं प्रदत्त्वा च पूजयित्वा च तां सतीं ॥
मिष्टान्नानि यथाशक्त्या पूजयित्वा द्विजोत्तमान् ।
सोतिऽहन्तु जगन्नाथ निर्व्विघ्नं कुरु मे मुने ॥

नियममन्त्रः ।

कृत्वा वंशमये पात्रे वालुकाप्रस्थमेव च ।
सप्तधान्यभृतं पात्रं प्रस्थेकेन द्विजोत्तम ॥
वस्त्रद्वयोपरि स्थाप्य सावित्रीं ब्रह्मणा सह ।
हैमीं कृत्वा तयोः प्रोक्ते त्रिरात्रमुपवासयेत् ॥
न्यग्रोधस्य तले तिष्ठेद्यावच्चैव दिनत्रयं ।

---

१ पुत्रवर्जिता इति पुस्तकान्तर पाठः ।

२ सपुत्रका इति पाठान्तर ।

सौवर्णीञ्चैव सावित्रीं सत्येन सह कारयेत् ॥
रौप्यपर्य्यङ्कमारोप्य रथोपरि निवेशयेत्।
पलादर्द्धं यथाशक्त्या रथं रौप्यमयं शुभं ॥
तथा च काष्ठभारे च वटेचैव सुविस्तरं।
एवञ्च मिथुनं कृत्वा पूजयेद्गतमत्सरा ॥
वर्त्तुलं मण्डलं कृत्वा गोमयेन तपोधन१।
पञ्चामृतेन स्नपनं गन्धपुष्पोदकेन च ॥
चन्दनागुरुकर्पूरैर्माल्यवस्त्रविभूषणैः।
संपूज्य तत्र सावित्रीं मण्डले स्थापयेद्बुधः ॥
पीतपिष्टेन पद्मञ्च अथवा चन्दनेन च।
न्यसेच्चैव ततोदेवीं कमले कमलासनां२ ॥
अनेन विधिना स्थाप्य पूजयेद्गतमत्सरा।

अथ सावित्रीपूजा मन्त्रः।

———ooo———

नमः सावित्र्यै पादौ तु प्रसवित्र्यै च जानुनी।
कटिं कमलपत्राक्ष्यै उदरं भूतधारिणी ॥
ओं गायत्र्यै नमः कण्ठे शिरसि ब्रह्मणः प्रिया।
अथ ब्रह्मसत्यवतोः पूजा ॥
पादौधात्रे नमः पूज्यौ जरुज्येष्ठाय वै नमः।
परमेष्ठी च मेढ्रञ्च अग्निरूपाय वै कटिं।
वेधसे चोदरं पूज्य पद्मनाभाय वै हृदि ॥

---

१ तपोधम इति पुस्तकान्तरे पाठः।
२ कमलासना इति पुस्तकान्तरे पाठः।

कण्ठन्तु विधये पूज्य हिरण्यगर्भाय वै मुखं ।
ब्रह्मणे वै शिरः पूज्य सर्व्वाङ्गे विष्णवे नमः ॥
अभ्यर्च्चैवं क्रमेणैव शास्त्रोक्तविधिना नृप ।
ततो रजतपात्रेण अर्घ्यं दद्याद्द्वयोरपि ॥

सावित्र्या अर्घ्यमन्त्रः ।

ओँकारपूर्व्वके देवि वीणापुस्तकधारिणि ।
देवमातर्नमस्तुभ्यमवैधव्यं प्रयच्छ मे ॥
पतिव्रते महाभागे वह्निजाते शुचिस्मिते ।
दृढव्रते दृढमते भर्त्तुश्च प्रियवादिनी ॥
अवैधव्यन्तु सौभाग्यं देहि त्वं मम सुव्रते ।
पुत्रान् पौत्रांश्च सौख्यञ्च गृहाणार्घ्यं नमो नमः ॥

अथ ब्रह्मसत्यवतोरर्घ्यमन्त्रः ।

त्वया सृष्टं जगत्सर्व्वं सदेवासुरमानुषं ।
सत्यव्रतधरो देव ब्रह्मरूप नमोऽस्तु ते ॥

अथ यमस्यार्च्चनमन्त्रः ।

त्वं कर्म्मसाक्षी लोकानां शुभाशुभविवेचकः ।
वैवस्वत गृहाणार्घ्यं धर्म्मराज नमोऽस्तु ते ॥
धर्म्मराज पितृपते शास्तिभूतेषु जन्तुषु ।
कालरूप गृहाणार्घ्यमवैधव्यञ्च देहि मे ॥
गन्धपुष्पैः सनैवेद्यैः फलैः कुङ्कुमदीपकैः ।
रक्तवस्त्रैरलङ्कारैः पूजयेद्गतमत्सरा ॥

अथ सावित्रीप्रार्थन मन्त्रः।

सावित्री ब्रह्मगायत्री सर्व्वदा प्रियभाषिणी।
तेन सत्येन मां पाहि दुःखसंसारसागरात्॥
त्वं गौरी त्वं शची लक्ष्मीस्त्वं प्रभा चन्द्रमण्डले।
त्वमेव च जगन्माता त्वमुद्धर वरानने।
सौभाग्यं कुलवृद्धिञ्च देहि त्वं मम सुव्रते॥
यन्मया दुष्कृतं सर्व्वं कृतं जन्मशतैरपि।
भस्मीभवतु तत्सर्व्वमवैधव्यञ्च देहि मे॥

अथ ब्रह्मसत्यवतोः प्रार्थनामन्त्रः।

अवियोगो यथा देव सावित्र्या सहितस्तव।
अवियोगस्तथास्माकं भूयाज्जन्मनि जन्मनि॥

यम प्रार्थनामन्त्रः।

कर्म्मसाक्षी जगत्पूज्य सर्व्ववन्द्य प्रसोद मे।
संवत्सरव्रतं सर्व्वं परिपूर्णं तदस्तु मे॥
सावित्री त्वं यथा देवी चतुर्वर्षशतायुषं।
पतिं प्राप्तासि गुणिनं मम देवि तथा कुरु॥
सावित्री प्रसवित्री च सतत ब्रह्मणः प्रिया।
पजितासि द्विजैः सर्व्वै स्त्रीभिर्मुनिगणैस्तथा॥
त्रिसन्ध्यं देवि भूतानां वन्दनीयासि सुव्रते।
मया दत्तेव पूजेयं त्वं गृहाण नमोऽस्तु ते॥
जागरन्तत्र कुर्व्वीत गीतनृत्यादिमङ्गलैः।
स्त्रबासिन्यस्ततः पूज्या दिवसे दिवसे गते॥

सिन्दूरं कुङ्कुमञ्चैव ताम्बूलं सपवित्रकं।
तथा दद्याच्च सर्व्वाणि१ भैक्ष्य सौभाग्यमष्टकं॥
सतोष्वेव दिवारात्रौ कामक्रोधविवर्जिता।
दिनत्रयेऽपि कर्त्तव्यमेवं मार्जारपूजनं॥
ततश्चतुर्थदिवसे यत् कार्य्यन्तच्छृणुष्व मे।
मिथुनानि चतुर्व्विंश षोड़श द्वादशाष्ट वा॥
पूजयेद्वस्त्रगोदानैर्भूषणाच्छादनासनैः।
अथवा गुरुमेकञ्च व्रतस्य विधिकारकं॥
सर्व्वलक्षणसम्पन्नं सर्व्वशास्त्रार्थपारगं।
वेदविद्याव्रतस्नातं शान्तञ्च विजितेन्द्रियं॥
सपत्नीकं समभ्यर्च्च्य वस्त्रालङ्कारभूषणैः।
शय्यां सोपस्करां दद्यात् गृहञ्चैवातिशोभनं॥
अशक्तस्तु यथाशक्त्या स्तोकं स्तोकञ्च कल्पयेत्।
सौवर्णीं प्रतिमां पुत्रि पतिना सह दापयेत्॥

कल्पनामन्त्रः।

सावित्रि त्वं यथा देवि चतुर्व्वर्षशतायुषं।
सत्यवन्तं पतिं लब्धा मया दत्ता तथा कुरु॥

प्रतिमादानमन्त्रः।

सावित्री जगतो माता सावित्री जगतः पिता।
मया दत्ता च सावित्री ब्राह्मण प्रतिगृह्यतां॥

अथ प्रतिग्रहमन्त्रः।

मया गृहीता सावित्री त्वयादत्ता सुशोभना।

---

१ सर्व्वाणीति पुस्तकान्तरे पाठः।

यावच्चन्द्रश्च सूर्य्यश्च सह भर्त्त्रा सुखी भव ।
गुरुञ्च गुरुपत्नीञ्च ततो भक्त्या समापयेत् ॥
यन्मया कृतवैकल्यं१ व्रतेऽस्मिन् दुरधिष्ठितं ।
तत्सर्व्वं पूर्णतां यातु युवयोर्वचनेन तु ॥

प्रतिमासं वटसेचनमन्त्रः

धर्म्मराजो यमो धाता नीलः कालान्तकोऽव्ययः ॥
वैवस्वतश्चित्रगुप्तो दध्नाभृत्युः क्षयोवटः ।
मासि मासि तथाद्येतैर्नामभिः सेचयेद्वटं ॥
न्यग्रोधोहं वसेत् पुत्रि तस्माद्यत्नेन सेचयेत् ।
ततो गुरुं सपत्नीकं पूजयेद्वतविस्मया ॥
भूषणैश्च सवस्त्रैश्च कुङ्कुमैश्च मनोहरैः ।
न्यग्रोधस्य समीपे तु गृहे वा स्थण्डिले शुभे ॥
सावित्र्याश्चैव मन्त्रेण घृतहोमन्तु कारयेत् ।
पायसं जुहुयाद्भक्त्या घृतेन सह भाविनि ॥
व्याहृत्याचैव मन्त्रेण तिलव्रीहियवं तथा ।
होमान्ते दक्षिणां दद्याद्वित्तशाठ्यविवर्ज्जिता ॥
समापयेत्ततो विप्रं वन्द्य पादौ प्रयत्नतः ।
भुञ्जीत वासरान्ते तु नक्तं शान्ता तपस्विनी ॥
अर्घ्यं दत्त्वा त्वरुन्धत्या दृष्ट्वा चैव प्रणम्य च ।
अरुन्धति नमस्तेऽस्तु वसिष्ठस्य प्रिये शुभे ॥
सर्व्वदेवनमस्कार्य्ये पतिव्रते नमोस्तु ते ।
सर्व्वं गृहाण मया दत्तं फलं पुष्पसमन्वितं ॥

---

१ व्रतवैकल्यमिति पुस्तकान्तरे पाठः।

पुत्रान् देहि सुखं देहि गृहाणार्घ्यं नमोऽस्तु ते ।
सखीभिर्ब्राह्मणैः सार्द्धं भुञ्जीत विजितेन्द्रिया ॥
एवं करोति या नारी व्रतमेतदनुत्तमं ।
भ्रातरः पितरः पुत्राः श्वशुरः स्वजनास्तथा ॥
चिरायुषस्तथारोगाः स्वयं जन्मशतत्रयं ।
भर्त्रा च सहिता साध्वी ब्रह्मलोके महीयते ॥

इति स्कन्दपुराणोक्तं वटसावित्रीव्रतं ।

इन्द्राण्युवाच ।

दृष्ट्वा मां नहुषो ब्रह्मन् कामेनातीवपीड़ितः ।
मां धर्षयितुमारब्ध स्ततस्त्वां शरणङ्गता ॥
गुरो कश्चिदुपायोऽस्ति व्रतं वा दानमेव वा ।
येन शोकाद्विमोक्ष्यामि तन्मे वद महामुने ॥
तस्यास्तु वचनं श्रुत्वा गुरुर्वाक्यमथाब्रवीत् ।

बृहस्पतिरुवाच ।

अस्त्यशोकत्रिरात्राख्यं व्रतंशोकहरं परं ।
त्रिरात्रं तत्र कर्त्तव्यं व्रतं शोकविनाशनं ॥
पापघ्नञ्चारोगदञ्च पुत्रपौत्रविवर्द्धनं ।
आयुःप्रदं कीर्त्तिकरं धनधान्यप्रदं परं ॥
भुक्तिमुक्तिप्रदं दिव्यं सर्व्वमायाविनाशनं ।
तच्छृणु त्वमशोकाख्यं त्रिरात्रव्रतमुत्तमं ॥
मासि मार्गशिरे चैव ज्यैष्ठे भाद्रपदे तथा ।

शुक्लपक्षे पञ्चदश्यामेकभक्तन्तु कारयेत् ॥
ततः प्रातः समुत्थाय स्नानं कुर्य्यात्ततो व्रती ।
आचम्य तु शुचिर्भूत्वा प्रणम्य च पुनः पुनः ॥
अशोकं पूजयेद्भक्त्या ब्रह्मविष्णुस्वरूपिणं१ ।
क्रमेणानेन देवेशि पुराणोक्तेन२ विस्तरात् ॥
अशोक शोकनाशार्थं सम्भूतोसि३ चिताविह ।
अर्घ्यं गृहाण भो वृक्ष ब्रह्मविष्ण्वीशरूपभृत् ॥

अत्र ब्रह्मविष्णुरुद्राणां सशक्तिकानां मूर्त्तिकरणं । उत्तरत्र तद्दानदर्शनात् । तत्र ब्रह्मसावित्रीरूपं पुत्रकामपूर्णिमाव्रते । लक्ष्मीनारायणरूपन्तु पूर्णिमास्थलक्ष्मीनारायणव्रते । उमामहेशयोस्त्ववियोगद्वादशीव्रतेऽभिहितं । परिभाषोक्तं वा प्रतिमाद्वयं वेदितव्यं ।

अर्घ्यमन्त्रः ।

इदं पाद्यं नमस्तुभ्यं कल्पितं पुण्यवारिणा ।
पुष्पाक्षत४ फलैर्मिश्रमशोक प्रतिगृह्यतां ॥

पाद्यमन्त्रः ।

चन्दनं विविधं वृक्षमत्र देवनिर्म्मितं ।
तत्गृहाण द्रुमश्रेष्ठ कृपां कुरु ममोपरि ॥

---

१ व्रत विष्णुस्वरूपिणमिति पुस्तकान्तरे पाठः ।
२ क्रमेणोक्तेन इति पुस्तकान्तरे पाठः ।
३ त्व भतोसि इति पुस्तकान्तरे पाठः ।
४ पुष्पाक्षत इति पुस्तकान्तरे पाठः ।

गन्धमन्त्रः ।

पुष्पाणीमानि वृक्षेन्द्र मालत्यादीनि यानि च ।
गृहाणेमानि दिव्यानि मम सन्तु मनोरथाः ॥

पुष्पमन्त्रः ।

गुग्गुल्वाद्याश्च ये धूपास्तथा चागुरुसन्निभाः ।
निवेदिता मया भक्त्या गृहाणैतान्महातरो ॥

धूपमन्त्रः ।

आरात्रिकं महावृक्ष कल्पितं दीपसंयुतं ।
उद्योतार्थं जगत्पूज्यं कुलस्य मम सोऽस्तु वै१ ॥

दीपमन्त्रः ।

अर्चितस्त्वं सुरैर्दिव्यैर्दानवैश्च महोरगैः ।
अप्सरोभिश्च गन्धर्वैस्ततस्त्वामर्चयाम्यहं ॥

अर्चनमन्त्रः ।

परमान्नं मयाशोक भक्ष्यभोज्यसमन्वितं ।
भक्त्या निवेदितं तुभ्यं षड्भिरेभीरसैर्युतं ॥
एवं संपूज्य तं वृक्षं प्रणिपत्य पुनः पुनः ।
अशोकं प्रार्थयेत्पश्चान्मन्त्रेणानेन भक्तिमान् ॥
यद्न्यूनं कृतं किञ्चिदतिरिक्तं कृतं व्रते ।
तत्सर्व्वं पूर्णतां यातु प्रसादात्ते द्रुमोत्तम ॥

प्रार्थनामन्त्रः ।

अनेनैव विधानेन प्रतिमासञ्च पूजयेत् ।
यावद्द्वादश मासान्वै कुर्य्यादुद्यापनं ततः ॥

१ मम भ्रातुर्वै इति पाठान्तरं ।

सम्यग्गृहीत्वा नियमं त्रिरात्रं समुपोषयेत्।
अशोकं कारयेद्रौप्यं नानाशाखं फलान्वितं॥
वस्त्रयुग्मेन संस्थाप१ गन्धपुष्पैः सुधूपितं।
नानाफलसमायुक्तं पुष्पमाल्योपशोभितं॥
गीतवाद्यविनोदैश्च नानाभावकथानकैः।
पुराणश्रवणं कार्य्यं व्रतस्यास्य च यत् फलं॥
एवं जागरणं कृत्वा कुर्य्याद्दानान्यनेकशः।
मिथुनानि तु संपूज्य ब्राह्मणानान्तु षोड़श॥
तेभ्यस्तु करका देयाः शूर्पाणि वसनानि च।
गुरोस्तु मिथुनं पूज्य वस्त्रैराभरणैः शुभैः॥
गोदानैर्भूमिदानैश्च वेश्मदानादिभिस्तथा।
प्रथमेऽह्नि ततो दद्यात् सावित्रीं ब्रह्मणा सह॥
उमामहेश्वरं देयं द्वितीयेऽह्नि वरानने।
लक्ष्मीनारायणञ्चैव तृतीयेऽह्नि सुशोभनं॥
सोपस्करमशोकन्तु दद्यात् सर्व्वं समापयेत्।
ततोऽहं भोजयेद्बन्धून् दीनानाथांश्च तर्पयेत्२॥
पारणन्तु ततः कुर्य्यात् पारणान्तु३ पुनः पुनः।
एवं कृते त्रिरात्रन्तु फलं यत् कथितं बुधैः॥
तच्छृणुष्व महाभागे संक्षेपात् कथयामि ते।
अश्वमेधादिभिर्य्यज्ञैरिष्टैर्यत्फलमश्नुते॥

---

१ सवाससमिति पुस्तकान्तरे पाठः।

२ दीनान्धांश्चैव पूजयेदिति पुस्तकान्तरे पाठः।

३ प्राशनञ्च इति पाठान्तरं।

तत्फलं कोटिगुणितं त्रिरात्रेण न संशयः।
गां दत्त्वा विविधैर्दानैर्गोमहिष्यादिभिस्तथा॥
तत्रायज्जायते पुण्यं३ तीर्थानुस्मरणे कृते।
यत्प्रोक्तं ऋषिभिः पुण्यं तत्सर्व्वं लभते फलं॥
इति श्रुत्वा वचस्तस्य गुरोरमिततेजसः।
चकार सा तदा देवी पौलोमी व्रतमुत्तमं॥
सा तद्व्रतप्रभावेन शक्रेण सह सङ्गता।
एतद्व्रतं कृतंपूर्व्वं सावित्रा राजकन्यया॥
व्रतस्यास्य प्रभावेण प्राप्तोभर्त्ता श्रिया सह।
अरुन्धत्या वेदवत्या दमयन्त्यानसूयया॥
रुक्मिण्यादिभिरन्याभिः प्राप्ताः सर्व्वे मनोरथाः।

पठन्ति शृण्वन्ति च ये मनुष्याः
कुर्व्वन्ति भक्त्या भुविमद्व्रतं ये४।
ते यान्ति नाकं सुचिरैर्विमानैः
विमुक्त पापाः सुखिनो भवन्ति॥

इति भविष्योत्तरोक्तमशोकत्रिरात्रव्रतं।

नन्दिकेश्वर उवाच।

अवैधव्यकरं ब्रूहि व्रत किञ्चिन्महेश्वर।
भर्त्तुर्दुःखमवाप्नोति पुत्रदुःखं तथैव च॥
अपुत्रता महद्दुःखं दुःखञ्चापि कुपुत्रता।

---

३ तत्रायत् क्रियतं पुण्यमिति,पुस्तकान्तरे पाठः।
४ यच्चव्रतं च इति पुस्तकान्तरे पाठः।

एतान्येव तु दुःखानि या च नारी वृषध्वज ॥
नाप्नोति मर्त्यलोकेऽस्मिन् वैधव्यं सुरसत्तम।
नारीणाञ्च हितार्थाय ब्रूहि यद्यस्ति शङ्कर ॥
सौभाग्यमतुलं याति भर्त्तारं चाति पूजितं
सर्व्वावयवसंपूर्णमनङ्गमिव चापरं ॥
सद्वृत्तं वित्तसम्पन्नं सर्व्वशास्त्रविशारदं।
ज्ञातिश्रेष्ठं पूज्यतममेतन्मे ब्रूहि शङ्कर ॥

ईश्वर उवाच।

शृणुष्वैकमना भूत्वा रम्भाख्यं व्रतमुत्तमं।
येन चीर्णेन नन्दीश कृतकृत्याश्च योषितः ॥
न भवेद्विधवा नन्दिन्नानपत्या कदाचन।
विधानं शृणु नन्दीश यथा तत् क्रियते नृभिः ॥
शुक्लपक्षे त्रयोदश्यां मासि ज्यैष्ठे च सुव्रत।
त्रिरात्रं व्रतमुद्दिश्य भक्त्या तां कदलीं शुभां ॥
स्नात्वा चैव शुचिर्भूत्वा व्रती सिञ्चेद्दृढदकैः ॥
सूत्रेण वेष्टयेद्भक्त्या गन्धपुष्पादि दापयेत्।
रात्रौ कुर्व्वीत नक्तं च अब्दमेकं समाहितः ॥
तथैव कदलीवृक्षं नित्यमेव प्रसेचयेत्।
ज्यैष्ठे मासि ततः प्राप्य द्वादश्याञ्चैव सुव्रत ॥
नद्यां वाथ तडागे वा शिवं संपूज्य चाक्षतैः।
स्नात्वा च पूजयेन्नन्दिन्नुमादेहार्द्धधारिणं ॥
एकभक्तं ततः कृत्वा नियमं कारयेत् व्रते।
भोक्ष्येऽहं त्रिदिनं लङ्घ्य सम्यगिष्ट्वा सुरेश्वरीं ॥

त्वत्प्रसादात् व्रतं मेऽस्तु निर्व्विघ्नेन महेश्वरि ।
रम्भायाः स्थण्डिलं कृत्वा विचित्रञ्च सुशोभनं ॥
रम्भाया निकटे स्थित्वा गीतवाद्यसमन्वितं ।
मण्डपं कारयेत्तत्र पुष्पमालाविभूषितं ॥
वितानेन च संयुक्तं सर्व्वशोभासमन्वितं ।
मध्ये कुर्व्वीत कदलीं फलपुष्पादिसंयुतां ॥
राजतीं शोभनाकारां जातरूपफलोचितां[१] ।
वस्त्रयुग्मन्ततो दद्यात् सर्व्वालङ्कारभूषितां ॥
कदल्यै कामदायिन्यै मेधायै ते नमोनमः ।
रम्भायै रतिसारायै सर्व्वसौख्यप्रदे नमः ॥
कदल्यै कामदायिन्यै मोचायै ते नमोनमः ॥

पूजामन्त्रः ।

चिन्तिता त्वं हि कदली चिन्तितं कामदायिनी ।
शरीरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते ॥

प्रार्थनामन्त्रः ।

पूजयेत् कुसुमैर्म्मन्त्रैः कणठमूत्रैश्च सुव्रत ।
हरिद्रारञ्जितैः सूत्रैः कुष्टनारीकदम्बकैः ॥
सप्तधान्यैर्भृते पात्रे प्रस्थमात्रेण पूरिते ।
उमामहेश्वरं शम्भुं कृत्वा तस्मिन्निवेशयेत् ॥
रूप्यपर्य्यङ्कमारूढं पूजयेत्रुक्मिणीं हरिं ।
वस्त्रयुग्मेन संवेष्टा चन्दनेन विलेपयेत् ।
पूजयेच्च सुगन्धाढ्यैः पुष्पैः कान्तोद्भवैर्व्रती ॥

---

१ फलान्विततामिति पुस्तकान्तर पाठः ।

मन्त्रैरेभिस्तु नन्दीश पादादारभ्य नामभिः।
त्रिपुरायै च इत्यङ्घ्रियुग्मङ्गौर्य्यास्तु पूजयेत्॥
जानुनी चन्द्रनेत्रायै१ अपर्णायै नमोनमः।
कटिं मन्मथनाशाय२ स्मरायै गिरिजां ततः॥
नाभिं सर्वेश्वरायेति गिरिजायै तथाम्बिकां।
हृदये हृदिवासिन्यै शूलिने च महेश्वरं॥
मुखं कामविनाशाय पार्व्वत्यै परमेश्वरीं।
शिरः सौभाग्यदायिन्यै शूलिने तु कपर्द्दिने॥
एवं संपूज्य देवेशमुमया सहितं प्रभुं।
नृत्यवादित्रगीताद्यैरुपोष्य कदलीं ततः॥
जागरस्तत्र कर्त्तव्यः पुराणाख्यानकैः शुभैः।
एवं त्रिरात्रं नन्दीशं नयेद्भक्त्यासुभावितः॥
दिनानि त्रीणि नन्दीश प्रतिपक्षं च सुव्रती।
मिथुनानि च संपूज्य यथाविभव सारतः॥
गुरुञ्चैव सपत्नीकम्भोजयित्वा प्रपूजयेत्।
दिनसंख्यैरश्विंश्वपत्रैर्घृतहोमस्ततो भवेत्॥
पृषदाज्येन दध्ना वा पयसा वाथ वाग्यतः।
तत्सवितुरिति मन्त्रेण जुहुयादनले सुधीः॥

त्रयोदश्यां त्रयोदश चतुर्दश्यां चतुर्दश पञ्चदश्यां पञ्चदशा हुतय इति दिनसंख्यात्वं॥

गुरवे पाण्डुरच्छत्रं तस्य पत्नीं तथानघ।

---

१ चन्द्रचक्षायै इति पुस्तकान्तरे पाठः।

२ नाशाय इति पुस्तकान्तरे पाठ।

रक्तवस्त्रं प्रदातव्यं वाचमेतामुदीरयेत्॥
गौर्य्या मे सहितो देवः प्रीयतां वृषभध्वज॥

दानमन्त्रः।

यथैवेन्द्रसमीपे तु शची तिष्ठति शोभने।
अहमेव सदा रम्भे पत्युः पार्श्वे स्थिता भवे॥
रूपं देहि धनं देहि यशः सौभाग्यमेव च।
पुत्रान् देहि धनं देहि सर्व्वान् कामांश्च देहि मे॥

प्रार्थनामन्त्रः।

कपिला तत्र दातव्या सर्व्वोपस्करसंयुता।
उमामहेश्वरं चैव रुद्रस्या सहितं तथा॥
गर्भिणी वालवत्सा च[१] यथाकुर्य्यात्तथा शृणु।
द्वादश्यामेकभक्तन्तु त्रयोदश्यां तथैव च॥
नक्तं समाचरेयस्तिं श्चतुर्दश्यामयाचितं।
पञ्चदश्याञ्चोपवासमेवञ्चैव व्रतं चरेत्॥
एतद्व्रतन्तु नन्दीश पुत्रपौत्रप्रदायकं॥
या करोति व्रतं नन्दिन् विधिनानेन सुव्रत।
न तस्यास्ति कुले काचिदपुत्रा विधवा तथा॥
अरुन्धतीव मोदेच्च यावदाभूतसंप्लवं।
सदाकीर्त्तियुता साध्वी यावदिन्द्राश्चतुर्दश।
व्रतमेतत्[२] कृतं पूर्व्वं देवपत्नीभिरादरात्॥
ताभिर्भोगाश्च संप्राप्ता दिव्याश्चातिमनोरमाः।

---

१ वालगर्भा च इति पुस्तकान्तर पाठ.।
२ एवमेतदिति पाठान्तरं।

विराजन्ते स्वर्गलोके रवेरिव च रश्मयः ॥
व्रतस्यैव तु माहात्म्यादवाप्नोति न संशयः।
एवं प्रभावो नन्दीश व्रतस्यास्य महामते ॥
यः पठेच्छृणुयाद्वापि सोऽपि स्वर्गे महीयते।

इति स्कन्दपुराणोक्तरम्भात्रिरात्रव्रतं।

स्कन्द उवाच।

देवदेव महादेव परब्रह्म महेश्वर।
आयुरैश्वर्यपुत्राणां धर्म्मं सत्कुलकारक ॥
व्रतं ब्रूहि महेशान सर्व्वशोकप्रणाशनं।
जाताः पुत्राश्च जायन्ते अरोगाः सुखिन स्तथा ॥
तेषां पुत्राश्च वध्वश्च दृश्यन्ते च सुशोभनाः।
सौभाग्यञ्चातुलं प्राप्य सपत्नी नैव जायते ॥
येन सर्व्वं सुखं भुक्त्वा वैकुण्ठभवनं व्रजेत्।

ईश्वर उवाच।

व्रतानामुत्तमं स्कन्द तव वक्ष्ये सनातनं।
येनैव चीर्णमात्रेण सर्व्वयज्ञफलं लभेत् ॥
यत् कृत्वा सर्व्वदानस्य फलमाप्नोति मानवः।
गोत्रिरात्रमितिख्यातं सर्व्वपापप्रणाशनं ॥
नारी वाथ नरो वाथ त्रिरात्रव्रतमाचरेत्।
कृष्णपक्षे त्रयोदश्यां मासि चाश्वयुजे तथा ॥
द्रोणात्वसमीपे तु व्रतमेतत् समाचरेत।

प्रातः स्नात्वा त्रयोदश्यां कृत्वा वै दन्तधावनं ॥
त्रिरात्रं नियमं कुर्य्याद्गोविन्दभक्तिभावितः ।
गोविन्द जगतांनाथ गोवर्द्धनधरानघ ॥
गोत्रिरात्रं करिष्यामि शरणं मे भवाच्युत ।

नियममन्त्रः ।

गोष्ठे वा गोपथे वाथ कृत्वा भूमिगृहं शुभं ।
अष्टहस्तं चतुर्हस्तं चतुरस्रं सुशोभनं ॥
वितानं पुष्पमालाभिः फलैर्नानाविधैरपि ।
मध्ये वेदिं ततःकृत्वा मण्डलं तत्र कारयेत् ।
सर्व्वतोभद्रनामाथ शतनालमथापि वा ॥
तन्मध्ये विन्यसेद्देवं गोवर्द्धनधरं हरिं ।
रुक्मिणी मित्रविन्दा च शैव्या जाम्बवती तथा ॥
वामभागे तु देवस्य पूज्या वै भक्तिभावतः ।
सत्यभामा च राधा च वासुदेवाग्निजित्तथा ॥
दक्षिणे चैव पूज्यास्तु नन्दश्च पुरतो यजेत् ।
बलभद्रं यशोदाञ्च पृष्ठतः पूजयेत् शुभं ॥
सुरभी च सुनन्दा च सुभद्रा नाम धेनवः ।
एताश्चतस्रो देव्यश्च लक्ष्माश्च पुरतोन्यसेत् ॥
सुवर्णमाषकाः कार्य्याः षोडश प्रतिमाः शुभाः ।
गोवर्द्धनश्च कर्त्तव्यो राजतः पलसंमितः ॥
कृत्राकारैर्महावृक्षैः शोभितः पक्षिभिः शुभः ।
गोपीगोपसमाकीर्णो महावृक्ष१ समन्वितः ॥

---

१ महावर्ष्मेति पुस्तकान्तरे पाठः ।

एवं संस्थाप्य यत्नेन ततः पूजां समाचरेत्।
ओं आगच्छ भगवान् कृष्ण गोपगोपीसमन्वितः॥
रुक्मिण्यादिभीराज्ञीभिर्मम पूजां गृहाण च।

आवाहनमन्त्रः।

नमः कृष्णाय पादौ च हरये जानुनी नमः।
उदरं बलदेवाय मुकुन्दाय नमः कटिं॥
चक्रिणे च भुजौ पूज्यौ कण्ठं श्रीकण्ठधारिणे।
मुखं पद्ममुखायेति गोविन्दाय नमः शिरः।
प्रणवादिनमोन्तैश्च अष्टाङ्गं पूजयेद्धरेः।

रुक्मिण्यै नमः। मित्रविन्दायै नमः। शाम्ब्यै नमः। जाम्बवत्यै नमः। सुरभ्यै नमः। सत्यभामायै नमः। राधायै नमः। नाग्नजिते नमः। यशोदायै नमः। बलभद्राय नमः। नन्दाय नमः। सुनन्दायै नमः। सुभद्रायै नमः। नाग्नजिते नमः। कामधेनवे नमः।

गोवर्धनधराधार गोकुलत्राणकारक।
विष्णुबाहुकृतोद्दार पूजयामि नगोत्तम॥
एवं संपूज्य विधिवत्ततश्चार्घ्यं प्रदापयेत्।
गवामाधार गोविन्द रुक्मिणीवल्लभ प्रभो॥
गोपगोपीसमीपे त्वमर्घ्यं गृह्ण नमोस्तु ते।
एवं पूजां समाप्यैव भक्तिभावपुरःसरं॥
गवामर्घ्यं [1]प्रदातव्यं सायाह्ने तु दिनत्रयं।

---

१ गवामर्घमिति पुस्तकान्तरे पाठः।

मन्त्रेणानेन विधिवद्विग्रन्तीनां स्वशक्तितः ॥

रुद्राणाञ्चैव या माता वसूनां दुहिता च या ।

आदित्यानाञ्च भगिनी सा नः शान्तिं प्रयच्छतु ॥

अर्घ्यमन्त्रः ।

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।

नमो ब्रह्मसुताभ्यश्च१ पवित्राभ्यो नमोनमः ॥

पूजामन्त्रः ।

सुरभी वैष्णवी माता नित्यं विष्णुपदे स्थिता ।

प्रतिगृह्णातु मे ग्रासं सौरभी मे प्रसीदतु ॥

गोग्रासमन्त्रः ।

गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।

गावो मे हृदये सन्तु गवां मध्ये वसाम्यहं ॥

मा वियोगोऽस्तु मे पुत्रैर्भर्त्रा च२ सह बान्धवैः ।

त्वत्प्रसादेन मे भक्तिर्नियतास्तु सदा त्वयि३ ॥

प्रार्थनामन्त्रः ।

एवं संपूज्य गाश्चैव४ गोविन्दञ्च विशेषतः ।

पुष्पैर्गन्धैश्च दीपैश्च धूपैर्नानाविधैरपि ॥

---

१ ब्रह्मसुताभ्यश्चेति पुस्तकान्तरे पाठः ।

२ माचावेति पुस्तकान्तरपाठः ।

३ नियता मे सदात्वयीति पुस्तकान्तरपाठः ।

४ गावश्चेति पुस्तकान्तरे पाठः ।

नैवेद्यैर्घृतपक्वैश्च फलैर्नानाविधैरपि।
सप्तधान्यैर्विरूढैश्च वंशपात्रस्थितैः शुभैः॥
सुवासिन्यस्तथा पूज्या नित्यं ताम्बूलकुङ्कुमैः।
कण्ठसूत्रैस्तथा पुष्पैस्तथा च कनकादिभिः॥
एवं संपूज्य विधिवद्गोविन्दन्तु दिनत्रयं।
कृत्वोपवासत्रयञ्चैव चतुर्थे दिवसे पुनः॥
ततः शुचिः समुत्थाय कृत्वा स्नानं प्रयत्नतः।
प्रणम्याचार्य्यमुख्येन होमं तत्रैव कारयेत्॥
तिलैरष्टोत्तरशतं गायत्र्या होममाचरेत्।
ततो विसृज्य देवेशं गुरवे प्रतिपाद्य च॥
गावः पुच्छे समालभ्य पुरस्कृत्य द्विजर्षभान्।
हृष्टेन मनसा स्कन्द गृहमागम्य यत्नतः॥
मिथुनानि द्वादशाष्टौ भूषणाच्छादनादिभिः।
संपूज्य भोजनं दत्त्वा गोदानानि च दापयेत्॥
गुरोर्दपत्यमर्चित्वा वासोभूषणसंयुतं।
भक्त्या गोवर्द्धनं कृष्णं गोपीगोपसमन्वितं॥
गृहोपकरणैर्युक्तं यथा शक्त्या च भक्तितः।
गुरोःसम्पादयेद्धीमान् दक्षिणासहितं हरिं॥
समाप्य च गुरुं तत्र भुञ्जीत शुचि संस्कृतं।
इष्टै.१ शिष्टैः समासीनो वाग्यतो विष्णुतत्परः॥
दीपोत्सवैव्रतमिदं शुचिमानसेन
कृत्वा नरः सकलसन्ततिवृद्धिकारि।

१ इष्टैरितीति पुस्तकान्तरे पाठ.।

भुक्त्वोपभोगनिचयं सुखसंप्रयुक्तो
ह्यन्ते प्रयाति भवनं मनुजो मुरारेः ॥

इति स्कन्दपुराणोक्तं गोत्रिरात्रव्रतं१ ।

———ooo@ooo———

निवृत्ते भारते युद्धे कुरुसैन्ये क्षयं गते ।
राजा धर्म्मसुतः श्रीमान् भ्रातृभिः सह मोदितः ॥
मागधैस्तूयमानश्च स्वसैन्यगणशोभितः ।
श्रीकृष्णेन समायुक्तः प्रययौ हस्तिनापुरं ॥
अभिषेकं ततश्चक्रे पुरोधा मुनिसंयुतः ।
दूर्व्वायवाङ्कुरैर्युक्तं चक्रुर्व्वर्द्धापनं स्त्रियः ॥
वस्त्रैर्दुकूलैर्द्धर्मात्मा तोषयामास तान् गणान् ।
नृपांश्च स्वनरोपेतान् मागधांश्चानतोषकान् ॥
ऋषींश्च सर्व्वान् प्रस्थाप्य स्वे स्वे स्थाने नृपानपि ।
स्तुत्या सन्तोषयामास श्रीकृष्णं पाण्डुनन्दनः ॥
देवदेव जगन्नाथ भक्तानामभयप्रद ।
प्रसादात्तव गोविन्द कौरवा युधि निर्जिताः ॥
राज्यं निष्कण्टकं प्राप्तं भक्तियोगात्तवानघ ।
सत्सेवापरियुक्तानां प्रसादं कुरु केशव ॥
एवमुक्त्वा स्थिते पाण्डौ पुत्रभ्रातृसमन्विते ।
पाञ्चाली परया भक्त्या प्रणम्य पुरुषोत्तमं ॥
बद्धाञ्जलिपुटा साध्वी प्रोवाच परमेश्वरं ।

१ गोत्रिरात्रव्रतमिति पुस्तकान्तरे पाठः ।

करुणाकारसंपूर्ण कंसासुरनिकृन्तन ॥
दुकूलहरणाद्यच्च दुःखं त्वत्सन्निभाविता ।
न ज्ञातं देवदेवेश प्रसादं कुरु केशव ॥
किमपि श्रोतुमिच्छामि त्वत्तो व्रतमनुत्तमं ।
येन चीर्णेन नारीणां सौभाग्यं पतिभक्तितः ॥

कृष्ण उवाच ।

गौर्याः स्कन्दस्य पुरतः शम्भुना कथितं व्रतं ।
गोत्रिरात्रमिदं ख्यातं पवित्रं कथयामि ते ॥
सावित्रीपुरतो धात्रा वसिष्ठेन महर्षिणा ।
अरुन्धत्या प्रागुदितं तद्व्रतं शृणु सुव्रते ॥

द्रौपद्युवाच ।

कस्मिन्मासे प्रकर्त्तव्यं यथा दानं तथा विधिः ।
तत्सर्वं कथयाद्य त्वं यदि तुष्टोऽसि माधव ॥

श्रीकृष्ण उवाच ।

नभस्ये च सिते पक्षे त्रयोदशीति या तिथिः ।
कार्त्तिके वा प्रकर्त्तव्यं सौभाग्यधनवाञ्छया ॥
सूर्य्योदये समुत्थाय दन्तधावनपूर्व्वकम् ।
लक्ष्मीनारायणस्याग्रे त्रिरात्रोपोषणं व्रजे ॥
कुर्य्यात् स्नानं ततश्चैव स्नापयेत् कमलापतिं ।
पञ्चामृतेन श्रीखण्डैः कुसुमैरर्च्चयेत्ततः ॥
शतपत्रैश्च पद्माद्यैः पुष्पैः पूजां प्रकल्पयेत् ।

पादौ नमामि बलिदानवमर्दनाय
जानू नमामि भुवनत्रयपालनाय ।
सक्थी नमामि [illegible]कारणाय चित्ते
योगीश्वराय शरणागतवत्सलाय ॥

पूजामन्त्रः ।

क्षीराब्धितनयाकान्त वासुदेव जगत्प्रभो ।
यथा चार्घ्यं मया दत्तं सौभाग्यं देहि मे सदा ॥

अर्घ्यमन्त्रः ।

कूष्माण्डैर्नारिकेलैश्च बीजपूरैश्च दाडिमैः ।
अर्घ्यं दत्त्वा च संपूज्य कामधेनुं प्रसादयेत् ॥

कामधेनुपूजा ।

करसंपुटकं कृत्वा कामधेनोरग्रे इति वाच्यं ।

रोगाणि हन्तु मम कामदुघा प्रसन्ना
पापानि हन्तु मम कामदुघा प्रसन्ना ।
सौख्यं ददातु मम कामदुघा प्रसन्ना
पुत्रान् ददातु मम कामदुघा प्रसन्ना ॥

तृतीये दिवसे प्राप्ते संगपात्रचयान्वितः ।
विरूढकलमापन्नं सम्यक् फलसमन्वितं ।
दद्यात् कामदुघायै च व्रतसंपूर्णहेतवे ।
रात्रौ च सर्वतोभद्रं मण्डलञ्च प्रकल्पयेत् ॥
माषैकस्य सुवर्णस्य लक्ष्मीनारायणं प्रभुं ।

कृत्वा तत्र ग्रसेद्देवं व्रतसंपूर्णहेतवे ॥
रात्रौ जागरणं कुर्य्याद्गीतवादित्रकौतुकैः।
ततः प्रभातसमये होमं कुर्य्याद्यथाविधि ॥
दम्पत्योः परिधानाय शुभैर्वस्त्रैः स्वशक्तितः।
देया धेनुश्च विप्राय निवेद्य प्रणतोऽव्रजेत् ॥
पदे पदेऽश्वमेधस्य फलं प्राप्नोति निश्चितं।
अथान्यदपि ते वच्मि इतिहासं पुरातनं ॥
व्याघ्रधेन्वोः सुसंवादं नीतिशास्त्रमयं शुभं।
वसिष्ठस्याश्रमात् काचिद्दिव्यगोवंशसम्भवा ॥
स्वेच्छया प्रययौ धेनुश्चरति गह्वरे वने।
सिंहव्याघ्रादिजीवेभ्यो निर्भया तपसो बलात् ॥
मुनीश्वरस्य सा धेनुः प्रययौ गिरिगह्वरं।
शिवशापपरिभ्रष्टव्याघ्रव्यापी महाबलः ॥
महादंष्ट्रो महाकायो नाम्नासौ जलवर्द्धनः।
प्रसारितकरो घोरो ययौ वृत्तिं शुभाशुभां ॥

व्याघ्र उवाच।

दिवसा बहवो जाताः क्षुधया पीड़ितस्य मे।
त्वं दृष्टा दैववशत आहाराय प्रकल्पिता ॥

धेनुरुवाच।

वसिष्ठस्य प्रभावेन दुष्टजीवैर्महाबलैः।
न हिंस्याहमवश्यं हि जानीयाद्याघ्रसत्तम।

वाक्यमेकं महावाहो शृणुष्वैकाग्रमानसः ।
स्वीयजीवाशया चाहं न ब्रवीमि तवाग्रतः ॥
अध्रुवेण शरीरेण मलमूत्रयुतेन च ।
परोपकृतिहीनेन किं कार्यं क्षयिणेण च ॥
वाङ्मनः कर्म्मणा ये वै शरीर नाशनेऽपि वा ।
उपकारं न कुर्व्वन्ति तेषां जन्म निरर्थकं ॥
मरणे वान्धचित्ता ये रणे दीनवर्चा भटाः ।
ते यान्ति नरकं घोरमित्याहुः पूर्व्वसूरयः ॥
कलत्रपुत्रबन्धूनां मायारहितमानसाः ।
पुराणपुरुषे भक्तास्ते यान्ति परमाङ्गतिं ॥
सोमवासरसञ्जातो बालो मम गृहे स्थितः ।
ममागमनसंदृष्टिः स्नेहदुःखश्च मे हृदि ॥
संत्री दुग्धेन तम्बालं स्वेच्छया परितोषयति ।
सखीमकथयित्वाशु आयामि तव सन्निधौ ॥

व्याघ्र उवाच ।

वेदशास्त्रपुराणेषु पठाते पूर्व्वसूरिभिः ।
स्त्री विप्र धेनु पीड़ासु विवाहे राजविग्रहे ॥
प्राणात्ययेऽप्यसत्यं हि वाच्यमन्यत्र नैव हि ।
आपद्गतश्च योजन्तुर्यश्च वैरिवशङ्गतः ॥
आत्मा वै रक्षितो येन तत् करोति न संशयः ।
यस्यचाग्रे स्थितं भक्ष्यमादिष्टं परमेष्ठिना ॥
न गृह्णाति च यो मूर्खोऽशनन्दानकरं व्रजेत् ।
सुरैर्न न मनुष्यैश्च न यक्षैर्न पिशाचकैः ॥

सत्यं हि निश्चितं वाक्यं प्राणिभिः प्राप्यवापदं।
जलतृणसमाहारज्ञातसन्तोषवर्त्तिनां॥
आपन्नतानामनृतं तत् पशूनाञ्च का कथा।
पृथिवी च तथादित्याः सत्ये तिष्ठन्ति देवताः॥
तस्मात्सत्यं त्वपाकार्य्य व्याघ्रश्चैव वृथाकृपे।
तस्य तद्वचनं श्रुत्वा बालकस्नेहपीड़िता॥
चक्रे तत्र प्रतिज्ञाञ्चै व्याघ्रस्याग्रे पुनः पुनः॥

धेनुरुवाच।

द्विजोभूत्वा ततो व्याघ्र वेदभ्रष्टोऽभिजायते।
स्वाध्यायसम्भ्यारहितः सत्यशौचविवर्जितः॥
अविक्रेयाणां विक्रेता अयाज्यानाञ्च याजकः।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः॥
दुष्टवृद्धौ शठे धूर्त्ते यत् पापं परवञ्चके।
दाने दत्ते प्रदत्तस्य प्रसक्तिं कुरुते नरः॥
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः।
वेदविक्रयणे चैव शवसूतकभोजने॥
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः।
सुतवत्सां गृहीता यो मातापित्रोरपोषकः॥
देवद्रव्यं गुरुद्रव्यं ब्रह्मद्रव्यं हरेत्तु यः।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः॥
स्वदत्तां परदत्तां वा यो हरेच्च वसुन्धरां।
अवैष्णवे तु यत्पापं यत्पापं दम्भकर्तृके॥
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः।

सुप्तेन्द्रिये च धूर्त्ते च परदोषापवादके।
कृतघ्ने च कदर्य्ये च परद्रव्यरते शठे॥
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः।
सदाचारविहीने च परपीड़ाप्रदायके॥
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः।
परापवादसंतुष्टे सर्व्वधर्म्म विवर्ज्जिते॥
यत्पापं ब्रह्महत्यायां पितृमातृवधे तथा।
तेषान्तु पातकं मह्यं यद्यहं नागमे पुनः॥
द्विभार्यः पुरुषोयस्तु यश्चादेकां विवर्ज्जयेत्।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः॥
यत् पापं कुम्भकानाञ्च स्वस्थानां विपदायिनां।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः॥
यत्पापं नास्तिकानाञ्च पौराणां विपर्ययेषिणां।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः॥
यस्तीन् हले बलीवर्दान् विषमं वाहयेत्तु यः।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः॥
गोरवज्ञां प्रकुर्व्वन्ति दण्डेन ताडयन्ति ये।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः॥
सकृत् कन्यान्तु योदत्त्वा द्वितीये दातुमिच्छति।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः॥
कथायां कथ्यमानायामन्तरायं करोति यः।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः॥
यतिनिन्दाकरोनित्यं वेदनिन्दापरस्तथा।

तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
यस्य संग्रहणी भार्य्या ब्राह्मणी च विशेषतः ॥
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
अकर्म्मनिरते क्रूरे कुलधर्म्मविवर्जिते ॥
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
मूर्खे पाषण्डके चौरे तिलविक्रयकारके ॥
एकोमिष्टान्नमश्नाति भार्य्यापुत्रमपोषकः ।
आत्मम्भरा दुराचारा देवद्रव्यविलोपकः ॥
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
ब्रह्मघ्ना गुरुनिन्दाद्याः स्वामिनिन्दाकरास्तथा ॥
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
कुरुक्षेत्रे महापर्व्वे ग्रस्ते चन्द्रे दिवाकरे ॥
ये गृह्णन्ति महादानं हव्यकव्यविवर्जितं ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ॥
कूटसाक्षी मृषावादी परद्रव्याभिलाषुकः ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ॥
परदाराभिगामी च ये च विश्वासघातकाः ।
भर्त्तारमर्थहीनञ्च महाव्याधिप्रपीड़ितं ॥
या न पूजयते नारी रूपयौवनगर्व्विता ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ॥
अथ किं बहुनोक्तेन मृगराज तवाग्रतः ।
यदि नायामि शीघ्राहं मम सत्यं भवेन्न च ॥
तेन वाक्येन सन्तुष्टो व्याघ्र आहारनिस्पृहः ।

प्रसारितकरं त्यक्त्वा गच्छ धेनो स्वकं गृहं ।
व्याघ्रेण मुक्ता सा धेनुरागता च स्वमाश्रमं ॥
उत्कर्षं तर्णकं दृष्ट्वा जाता प्रस्नवती भृशं ।
बालं पयसा सन्तर्प्य सखीषु च विनिक्षिपेत् ॥
ता दृष्ट्वा दुःखिता गावो मातृस्नेहसमन्विताः ।
दृष्ट्वा दुःखतरो बालो न जाने च तथास्तु मे ॥
तस्माद्बालमुपादाय पप्रच्छुस्तत्र कारणं ।
विश्राव्य तासु वृत्तान्तं बालकन्तमुवाच सा ॥
अनुयाहि व्रज त्वं हि सत्यवाक्यसमन्विता ।
व्रजामि तद्वनं शीघ्रं व्याघ्रो वसति यत्र च ॥

सख्युवाच ।

कृतप्रतिश्रमूढासि नन्दिनीवंश सम्भवे ।
व्याघ्रधेन्वोः परं वैरन्त्रिषु लोकेषु विश्रुतं ॥
विप्र-स्त्री-बाल-कार्य्येषु संग्रामे वैरिसङ्कटे ।
प्राणापहारे मुनिभिरसत्यं नैव दूषितं ॥
देवेशेन पुरा जघ्ने वृत्रः सुररिपुर्बली ।
शपथान् कृत्वा तथा विष्णुः शक्रं विश्वासवर्ज्जितं ॥
तत्र त्वं स्वगृहे तिष्ठ परिवारेण संयुता ।
मुनिप्रवरास्तिष्ठन्ति न दुष्टा जन्तवः कदा ॥

धेनुरुवाच ।

सत्येन तपते भानुः सत्येन तपते शशी ।
चतुर्मुखोऽपि सत्येन सत्येन सकलं जगत् ॥

सत्यवाक्यपरिभ्रष्टो लोभी जीवेत् कदाचन।
सत्येन सत्यलोकोऽस्ति सत्यं वेदे प्रतिष्ठितं॥
व्रजामि सत्यवाक्येन तद्व्याघ्रं प्रति निर्भया
तद्वने चैव मांहृष्टो व्याघ्रो यातामुपागतां॥

व्याघ्र उवाच।

अहो मे भाग्यमतुलं कामधेनुः समागता।
दुष्टयोनिविनिर्मुक्तो यास्यामि हरसन्निधौ॥
यावत् प्राप्ता कलिमलहरा पावनी कामधेनु
स्तावद्व्याघ्रः[१] मगधरगणः सर्व्वसम्पत्तिदेहः।
बद्धा पाणौ विमलमणिभिर्दीप्यमाने किरीटे
धेनुं भक्त्या मधुरवचनैरात्तसंपूज्य सम्यक्॥
धन्योऽस्मि कृतकृत्योऽस्मि कामधेनोः प्रसादतः।
सर्व्वपापविनिर्मुक्तो याम्यहं हरसंनिधौ॥
गावो रक्षन्तु मे पुण्यं गावो रक्षन्तु मेयशः।
गावो रक्षन्तु मे वर्गं कलत्रपुत्रपोषकं॥
संपूजितास्तु ता गावो मादृशां बहुसम्पदाः।
सर्व्वपापहरा गावः सर्व्वपुण्यफलप्रदाः॥
नमोऽस्तु कामधेनुभ्यो याः पुनन्ति जगत्त्रयं।
यदाधारस्थितं विश्वं नन्दादिभ्यो नमोनमः॥

धेनुरुवाच।

महाभाग वरं ब्रूहि जगतां प्रीतिकारकं।

---

१ तावद्व्याघ्रस्य मुक्तोरिति पुस्तकान्तरे।

यदिच्छसि वरं काम्यं ददामि तव भक्तितः ॥

गाव ऊचुः ।

विश्वोपकारकरणे समर्थाः कामधेनवः ।
भवद्दर्शनात्तु विश्वासात् सदास्तु सुखितं जगत् ॥
भवत्प्रजारता ये वा भवत्प्रजापरायणाः ।
तेषाञ्च सर्व्वा सिद्धिः स्यात्त्वदीयप्रसादतः ॥

श्रीकृष्ण उवाच ।

एवमस्त्विति साप्युक्त्वा व्याघ्रः शिवपुरं ययौ ।
कामधेनुश्च सन्तुष्टा वशिष्ठाश्रममाययौ ॥
एवमुक्तं गोत्रिरात्रं कृत्वा नारी नरोऽपि वा ।
प्राप्नोति सकलान् कामान् सप्तजन्मानि सुव्रते ॥

इति श्रीकृष्णेनोक्ता गोत्रिरात्रव्रतकथा समाप्ता ॥

———ooo@ooo———

याम्योत्तरगता रेखा कुर्य्यादेकोनविंशतिं ।
खण्डेन्दुत्रिपदा कोष्ठे शृङ्खला पञ्चकोष्ठिका ॥
एकादशपदा वाप्यो भद्रन्तु नवभिः पदैः ।
चतुर्त्रिंशत् पदा वापी विंशत्या परिधिः स्मृता ।
सितेन्दुशृङ्खला कृष्णा वह्नी नीले च पूरयेत् ।
कृष्णं भद्रं सिता वापि परिधिः पीतकर्णिका ॥
सत्वरजस्तमोपेतं सर्व्वतो भद्रमण्डलं ॥

इति मण्डलविधिः

युधिष्ठिर उवाच।

भगवन् त्वत्प्रसादेन बहूनि सुकृतानि मे।
श्रुतानि बहुपुण्यानि कृतानि मधुसूदन॥
सर्व्वपापहराणि स्युः सर्व्वकामप्रदानि च।
साम्प्रतं श्रोतुमिच्छामि व्रतानामुत्तमं व्रतं॥
किञ्चिद्योगव्रतं ब्रूहि यदि तुष्टोऽसि माधव।
यत् कृत्वा सर्वपापेभ्यो नरो नारी विमुच्यते॥

कृष्ण उवाच।

कथयामि नृपश्रेष्ठ व्रतानामुत्तमं व्रतं।
यन्न कस्यचिदाख्यातं तच्छृणुष्व नृपोत्तम॥
यान्यान् कामान्वाञ्छयति लभते तांस्तथैव च।
तत्क्षणादेव मुच्यन्ते नरा नार्य्यश्च सर्व्वशः॥
धेनो भगवति राजन् कामधेनोः प्रसादतः।
सौभाग्यं सन्ततिं लक्ष्मीं प्राप्नोति सुखमुत्तमं॥

युधिष्ठिर उवाच।

यदि तुष्टोऽसि भगवान् व्रतस्यास्य विधिं शुभं।
ब्रूहि मे नरशार्दूल करोमि त्वत्प्रसादतः।
के मन्त्राः के नमस्काराः देवताः काः प्रकीर्त्तिताः।
किं दानमर्घ्यमन्त्रश्च कथयस्व सुरोत्तम॥

कृष्ण उवाच।

नारदेन पुरा राजन् यदुक्तं सगरादिषु।

चारितस्त्वया राजन् शृणुष्वैकमना व्रतं॥
मासि भाद्रपदे शुक्ले त्रयोदश्यां समारभेत्।
त्रयोदशीप्रभाते तु समुत्थाय शुचिर्भवेत्॥
गृहीयान्नियमं पूर्व्वं दन्तधावनपूर्वकं।
आचम्योदकमादाय इमं मन्त्रमुदीरयेत्॥
गोत्रिरात्रव्रतस्यास्योपवासकरणे मम।
शरणं भव देवि त्वं नमस्ते धेनुरूपिणि॥
प्रसीदतु महादेवो लक्ष्मीनारायणः प्रभुः।
लक्ष्मीनारायणं देवं सौवर्णञ्च स्वशक्तितः॥
पञ्चामृतेन गव्येन स्नापयेत् कमलापतिं।
स्थापयेत्सर्वतोभद्रमण्डलेऽष्टदलेऽपिवा॥
गन्धपुष्पैः सुनैवेद्यैस्तुतिगीतादिनर्त्तनैः।
नारिकेलार्घ्यदानेन प्रीणयेद्वै हरिं तथा॥
लक्ष्मीकाम जगन्नाथ गोत्रिरात्रं व्रतं मम।
परिपूर्णं कुरुष्वेदं गृहाणार्घ्यं नमोऽस्तु ते॥

इत्यर्घ्यमन्त्रः।

आरात्रिकं ततः कुर्याद्भक्त्या कृष्णस्य तुष्टये।
नवं कुम्भं जलभृतं हविष्यान्नेन पूरितं॥
कृत्वा दिनत्रयं पार्श्वे तथाच विनिवेशयेत्।
धेनुं पूज्य ततः कुर्यात् जलधारां प्रदक्षिणां॥
पुरा दत्वा कुण्डलकं कुम्भहस्तकमण्डलुं।
वस्त्राच्छादनगन्धादिदिव्यपुष्पैः सदीपकैः॥

अहोरात्रमवक्लृप्तं घृतदीपं दिनत्रयं।
प्रबोधयेद्व्रती धेनोरग्रे वा देवमण्डले॥
अर्घ्यदानन्ततः कुर्यात् नारिकेलादिभिः फलैः॥

अर्घमन्त्रः।

पञ्च गावः समुत्पन्ना मथ्यमाने महोदधौ।
तासां मध्ये तु या नन्दा तस्यै धेन्वै नमोनमः॥
प्रदक्षिणीकृतायेन धेनुमार्गानुसारिणी।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा॥
गावोममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः।
गावोमे हृदये सन्तु गवां मध्ये वसाम्यहं॥
आरात्रिकं सनैवेद्यङ्गीतवाद्यमहोत्सवं।
कुङ्कुमं कुसुमञ्चैव धेनोर्दद्याद्विचक्षणः॥
एवं सम्पूज्य तां धेनुं सम्यक् भक्त्या दिनत्रयं।
यवांश्च यवसञ्चैव चारयेत्पाययेदपः॥
गोमयादक्षतैर्धान्यैः१ कुर्यात्तैरेव पारणं।
तारयेदश्व हेयकान् पतत्यनपि दुःखदम्॥
धेन्वग्रे जागरं कुर्यात्सर्व्वपापप्रणाशनं।
त्रिविधान्मुच्यते पापात् प्रहरार्द्धेन पाण्डव॥
तस्मोत्तरं कृतात्पापात् प्रहरार्द्धेन मुच्यते।
चत्वारि वेणुपात्राणि कारयित्वा प्रपूजयेत्॥
नारिकेलोदकद्राक्षाखर्ज्जूरदाडिमैः शुभैः।

१ गोमयादक्षतैर्धान्यैरिति पुस्तकान्तरे पाठः।

विरूढैः पुष्पसिन्दूरवस्त्रकुङ्कुमकज्जलैः ॥
प्रथमे बीजपूरार्घ्यं द्वितीये दाडिमं शुभं ।
तृतीये नारिकेलेन दद्यादर्घ्यं दिनत्रय ॥
करकास्तु त्रयः कार्य्याः हविष्यान्नेन पूरिताः ।
लक्ष्मीनारायणं देवं ब्राह्मणं भार्य्यया सह ॥
पूजयेत् कुसुमैर्वस्त्रैर्हेमसूत्रैर्युधिष्ठिर ।
दम्पत्योर्भोजनं देयं धेनुं भक्त्या दिनत्रयं ॥
पारणे गौरिणो विप्रानिष्टबन्धूंश्च भोजयेत् ।
गुरवे विष्णुरूपाय तां धेनुं प्रतिपादयेत् ॥
सकुङ्कुमां सवस्त्रां च घण्टामुकुटभूषितां ।
गीतवादित्रनृत्यादिशान्तिपाठपुरःसरां ॥
पापाद्विप्रगृहं यावत् प्रापयेन्नृतएव वा ।
एवं या कुरुते पार्थ गोत्रिरात्रव्रतोत्तमं ॥
दुर्लभं तु सदा स्त्रीणां नराणां नृपसत्तम ।
अश्वमेधसहस्राणि वाजपेयशतानि च ॥
कृत्वा यत् फलमाप्नोति गोत्रिरात्रव्रते कृते ।
प्रभासे च कुरुक्षेत्रे चन्द्रसूर्य्यग्रहे तथा ॥
हेमभारशतं दद्यात् तत् फलप्राप्तये नृप ।
धेनुदानं कृतं येन सवत्सं सर्वकामकं ॥
सागराम्बरसंयुक्ता दत्ता तेन वसुन्धरा ।
एवं या कुरुते पार्थ त्रिरात्रव्रतमुत्तमं ॥
भवान्तरकृतात् पापात् विविधान्मुच्यते नरः ।
सा कदाचिन्नपश्येत भर्त्तदुःखं नराधिप ॥

पुत्रपौत्रसुखं तस्य भविष्यति न संशयः ॥
जन्मान्तरे च सा नारी वैधव्यं न च पश्यति।
वैधव्यं न महादुःखं भविष्यति भवान्तरे ॥
अपुत्रो लभते पुत्रान् धनहीनो धनं लभेत्।
कायेन मनसा चैव कर्मणा यदुपार्जितं ॥
तत्सर्व्वं पातकं याति गोत्रिरात्रव्रते कृते।
इह भोगान् विपुलान् कृत्वा आयुः सम्पूर्णमेव च ॥
व्रतस्यास्य प्रभावेन गोलोके च महीयते।
कीर्त्तिदन्धनदं चैव सौभाग्यकरणं नृप ॥
आयुरारोग्यकरणं सर्व्वपापप्रणाशनं।
तत्त्वमात्यादरादाजन् सभार्य्यस्त्वं कुरु व्रतं ॥
यदि राज्यं कुरु कीर्त्तिं नित्यं प्राप्यमिहेच्छसि।
तच्छ्रुत्वा पाण्डवश्रेष्ठो व्रतं चक्रे समाहितः ॥
व्रतस्यास्य प्रभावेन लब्धं राज्यमकण्टकं।

इतिश्रीभविष्योत्तरोक्तं गोत्रिरात्रव्रतं।

——oo(i)oo——

ब्रह्मोवाच।

शृणुष्वावहितो भूत्वा यन्मां त्वं परिपृच्छसि।
कथयामि व्रतं श्रेष्ठं सर्वकामार्थसिद्धिदं ॥
येन चीर्णेन नारीणां वैधव्यमप्रजायते।
आयुष्यं वर्द्धते भर्त्तुः पुत्राश्च धनसंयुताः ॥
तदहं संप्रवक्ष्यामि व्रतानामुत्तमं व्रतं।

यत् प्रसादादुमा रुद्रं कृष्णं लक्ष्मीः शची हरिं ॥
सावित्री मां यथा प्राप्ता सीता रामं यथा मुने ।
दक्षकोपादुमा देवी देहन्त्यक्त्वा स्वकं पुरा ॥
जाता हिमवतो गेहे१ जटावल्कलधारिणी ।
चचारोग्रं तपोऽनाद्या निराहारा जितेन्द्रिया ॥
एकाङ्गुष्ठे स्थिता बाला पञ्चाग्निपरिसंयुता२ ।
तपस्ये निश्चयं दृष्ट्वा गतः शम्भुस्ततः स्वयं३ ॥
कस्मादेवं त्वया कष्टं क्रियते गौरि साम्प्रतं ।

उमोवाच ।

महादेवो भवेदेव यथा मे पतिरुत्तमः ।
तदर्थं क्रियते घोरन्तपस्तपनदुःसहम् ॥

ब्रह्मोवाच ।

शृणु बाले सुखोपायं व्रतानामुत्तमं व्रतं ।
येन चीर्णेन ते शम्भुः स्वदेहार्धं प्रदास्यति ॥
सा त्वं कुरु व्रतं४ भद्रे चिराय विष्णुसंश्रितं५ ।
तच्चीर्णमनया भक्त्या पतिर्लब्धो महेश्वरः ॥
कार्त्तिकेयः सुतस्तस्मात्तवैव च महामुने ।

---

१ जाताथाहिमवद्गेहेति पुस्तकान्तरे पाठः ।
२ पञ्चाग्निपरिसमाप्यते इति पुस्तकान्तरे पाठः ।
३ तस्याश्च निश्चयं दृष्ट्वा ततः शम्भोमतः स्वयमिति पुस्तकान्तरे पाठः ।
४ तच्च कुरु व्रतमिति पुस्तकान्तरे पाठः ।
५ हिराय विष्णुं संश्रितमिति पुस्तकान्तरे पाठः ।

इत्युक्तो ब्रह्मणा पूर्व्वं अगस्तिमुनिसत्तम॥
विस्मयाविष्टचेताश्च विधिं प्रष्टुं१ प्रचक्रमे।

अगस्त्य उवाच।

कस्मिन् काले दिने कस्मिन् स्थाने चैव नरोत्तम।
विधिनाकेन कर्त्तव्यं कथं पूज्यो वनस्पतिः॥

ब्रह्मोवाच।

ज्यैष्ठे मासि च संप्राप्ते पूर्णमास्यां द्विजोत्तम।
ज्येष्ठाऋक्षदिने कुर्य्यात्सिद्धार्थैः स्नानमुत्तमं॥
श्रीवृक्षं सिञ्चयेत्पश्चाद्गन्धपुष्पैश्च पूजयेत्।
वत्सरन्त्वेकभक्तन्तु हविष्यान्नेन कारयेत्॥
श्वशूकरखरादीनां दर्शने भोजनं त्यजेत्।
अनेन विधिना सम्यक् मासि मासि समाचरेत्॥
ततः संवत्सरे पूर्णे गत्वा विल्वसमीपतः२।
गृहीत्वा वालुकां पात्रे प्रस्थमात्रं महामुने॥
अथवा धान्यमादाय यवशालितिलादिकं३।
ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टयेत्॥
उमामहेश्वरं हैमं शक्त्या कुर्य्यात् सुभूषितं।
रक्तवस्त्रयुगं दद्यान्नैवेद्यं फलसंयुतं॥
पुष्पैश्च बहुविधैश्चापि फलैर्नानाविधैस्तथा।

---

१ विधि द्रष्टुमिति पुस्तकान्तरे पाठः।
२ विल्वसतीमूर्त्तिं पुस्तकान्तरे पाठः।
३ यवशालि तिलोदकमिति पुस्तकान्तरे पाठ.।

गुडेक्षुजीरकैर्धान्यैर्लवणेन विकङ्कतैः।
सप्तधान्यैस्तथा दीपैर्वंशपात्रप्रकल्पितैः॥
रजन्या कण्ठसूत्रैश्च शुभैः कुङ्कुमकेशरैः।
अवतारं करोत्येषा उमादेवी हरप्रिया॥
श्रीनिकेत नमस्तुभ्यं शिवप्रिय नमोऽस्तु ते[1]।
अवैधव्यञ्च मे देहि श्रियं वै जन्मजन्मनि॥
श्रियं धनं पतिपुत्रानारोग्यं कुलसन्ततिं।
सौभाग्यं रूपसम्पत्तिं पूजितस्त्वं प्रयच्छ मे॥
सहस्रं विल्वपत्राणां होमयेत्तु यथाविधि।
पायसं तत्र जुहुया द्विजः शान्तोऽथ मन्त्रवित्॥
राजतं श्रीतरुं कृत्वा सुवर्णफलशोभितं।
अष्टोत्तरशतं यावत् पीतवस्त्रेण वेष्टयेत्॥
त्रयोदश्यां समारभ्य यावत्पूर्णं भवेत्तिथिः।
त्रिरात्रं जागरं कृत्वा उपवासैर्जितेन्द्रियः॥
रमापते[2] पशुपते त्रैलोक्याधिपतिः प्रभो।
गृहाणार्घ्यं मया देव गौर्य्या सह महेश्वर॥
ततः प्रभाते सञ्जाते स्नात्वा च तिलसर्षपैः।
वस्त्रालङ्कारपुष्पैश्च गुरोर्दम्पत्यमर्चयेत्॥
पादुकोपानच्छत्रशय्या गाश्च सुभूषिता।
गुरुं प्रपूज्य भक्त्या तु दद्यादेतत् प्रयत्नतः॥
षोडशाष्टौ चतस्रोवा द्विजदम्पत्यो भूषिताः।

---

१ नमस्तुतं इति पुस्तकान्तरे पाठः।
२ उमापते इति पुस्तकान्तरे पाठः।

वस्त्रालङ्कारगोदानैस्तस्मिन्नहनि पूजयेत्।
मिष्टान्नं भोजनं दद्यादात्मनः श्रेय इच्छता॥
या नारी कुरुते चैतद्व्रतं पापप्रणाशनं।
सर्व्वसिद्धिकरं पुण्यं शिवलोके महीयते॥
कल्पकोटिशतं यावदास्थाय शिवसन्निधौ।
ततो राज्ञी भवेन्मर्त्ये पुत्रपौत्रसमन्विता॥

इति स्कन्दपुराणोक्तं बिल्वत्रिरात्रव्रतं।

———000———

बिल्वमूलं समाश्रित्य त्रिरात्रोपोषितः शुचिः।
हरनाम१ जपेन्मन्त्रं भ्रूणहत्यां व्यपोहति॥

इति सौरपुराणोक्तं हरत्रिरात्रव्रतं२।

———000———

स्कन्द उवाच।

अरुन्धतीव्रतं वक्ष्ये सदा सौभाग्यदायकं।
येन चीर्णेन वै सम्यक् नारी सौभाग्यभाजना॥
जायते रूपसम्पन्ना पुत्रपौत्रसमन्विता।
वसन्तन्तु समासाद्य तृतीयायां सुरर्षभ॥
स्नानं कृत्वा तु विधिवत्त्रिरात्रोपोषिता सती।
मिथुनानि च चत्वारि समाहूय यतव्रता॥

१ चरित्राय इति पुस्तकान्तरे पाठः।

२ चरित्रव्रतमिति पुस्तकान्तरे पाठः।

पूजयेत् पुष्पताम्बूलैश्चन्दनैश्च तथाक्षतैः ।
कुङ्कुमागुरुकर्पूरसिन्दूरैर्मृगनाभिभिः ॥
शिलापट्टे च संस्थाप्य गुडाज्यलवणान्वितं ।
लोष्टकेन समायुक्तं वस्त्रयुग्मेन वेष्टितं ॥

लोष्टको नाम शिलापट्टोपरि स्थितपेषणोपलः एतद्दृषदुपलोपधानमभिहितं भवति ।

आवाहयेन्महादेवीं वसिष्ठप्राणमन्वितां ।
आयाहि वरदे देवि सान्निध्यं कुरु सुव्रते ॥
पतिव्रतानां सर्व्वासां मुख्या त्वं देवि भामिनि ।
आवाह्यारुन्धतीं देवीं पूजयेत् कुसुमैः शुभैः ॥
द्विभुजाञ्चारुसर्व्वाङ्गीं साक्षसूत्रकमण्डलुं ।
प्रतिमां काञ्चनीं कृत्वा नामभिः प्रतिपूजयेत् ॥
देववन्द्ये नमः पादौ जानुनी लोकवन्दिते ।
कटिं संपूजयेत्तस्या महासती च सर्व्वदा ॥
नाभिं गम्भीरनाभीति ऋषिपत्नीं ततस्तनौ ।
जगद्धात्रीं तथा कण्ठबाहू शान्त्यै नमः सदा ॥
हस्तौ तु वरदायै तु मुखं धृत्यै नमोनमः ।
अरुन्धती तथा पूज्या शिरस्तु कमलप्रिया ॥
एवं संपूज्य तान्देवीं गन्धपुष्पै निवेदयेत्[१] ।
पूजयित्वा सतीन्देवीं ततश्चार्घ्यं निवेदयेत् ॥
अरुन्धति महाभागे वसिष्ठप्रियवादिनी ।
सौभाग्यं देहि मे देवि धनं पुत्रांश्च देहि मे ॥

---

१ गन्धपुष्पैर्निवेदयेदिति पुस्तकान्तरे पाठः ।

अर्घ्यमन्त्रः।

अर्घ्यं दत्त्वा तु भक्त्या वै गृहीतकुसुमाञ्जलिः।
प्रार्थयेत्तां महाभागां१ लोकवन्द्यां महासतीं॥
पुत्रान् देहि धनं देहि सौभाग्यं देहि सुव्रते।
पौत्रांश्च सर्व्वकामांश्च देहि देवि नमोऽस्तु ते॥

प्रार्थना मन्त्रः।

सुवासिन्योऽथ संपूज्या दिवसे दिवसे तथा।
शुभगन्धाक्षतैस्तद्वद्दद्यात् सर्व्वेषु भक्षकान्॥
होमांश्चैव तथा कुर्युः समिद्भिश्च तिलैः शुभैः।
अष्टोत्तरशतं तद्दिनसंख्यामथापि वा॥
मिथुनानि च संपूज्य भूषणाच्छादनादिभिः।
चतुर्व्विंशतिसंख्याकान् यथा षोड़शसंख्यया॥
आचार्य्याय सभार्य्याय वस्त्राण्याभरणानि च।
शय्यां सोपस्करां दद्यात् कांस्यपात्रं सदीपकं॥
आदर्शञ्चामरञ्चैव धेनुं दद्यात् पयस्विनीं।
दद्यात्तु भोजयित्वा च स्त्रियः शूर्पान् समोदकान्॥
मोदकान् करकांस्तद्वत्तयोर्वस्त्रं यथाविधि।
पोलिकां घृतपूपांश्च पूरिकाश्च विशेषतः।
सोमालिकाश्च दातव्या एकैकं द्विगुणं तथा॥

द्विगुणं भोजनं दापयेदिति शेषः।

दीनानाथांश्च२ संपूज्य स्वयं नक्तं समाचरेत्।

धर्म्ममिति शेषः।

---

१ प्रार्थयन्ती महाभागामिति पुस्तकान्तरे पाठः।

२ दीनानन्धांश्च संपूज्य इति पुस्तकान्तरे पाठः।

अनेनैव विधानेन नारी या कुरुते व्रतं ॥
अवैधव्यं समाप्नोति तथा जन्मसहस्रकं।
पुत्रपौत्रसमायुक्ता धनधान्यसमन्विता।
जीवेद्वर्षशतं साग्रं भर्त्रा सह महासती।
एवमभ्यर्च्चयित्वा तु पदं गच्छत्यनामय।
देवभार्य्या तथा स्वर्गे ऋषिभार्य्या तथैव च।
राजभार्य्या महाभागा सर्व्वकामप्रदं व्रतं ॥

इति स्कन्दपुराणोक्तं अरुन्धतीव्रतं[१]।

———००———

पुलस्त्य उवाच।

अथान्यत्संप्रवक्ष्यामि दूर्व्वात्रिरात्रमुत्तम।
नारीणां सुखसम्पत्तिपुत्रपौत्रप्रदायकं ॥
तनूरुहेभ्यः सम्भूता दूर्व्वा विष्णोरियं पुरा।
तस्यामुपरि विन्यस्त मथितामृतमुत्तम ॥
देवदानवगन्धर्वयक्षविद्याधरोरगैः।
तत्र येऽमृतकुम्भस्य पेतुर्निस्यन्दविन्दव ॥
तैरियं स्पृष्टगात्राभूत दूर्व्वा तेनाजरामरा।
वन्द्या पवित्रा देवैश्च वन्दितार्च्चिता तथा ॥
शृणु दूर्व्वात्रिरात्रस्य विधिं कार्त्स्न्येन सुव्रत।
मासि भाद्रपदे चैव शुक्लपक्षे त्रयोदशीं ॥
त्रिरात्रं समुपोष्यन्तु यावत् पूर्णा तिथिर्भवेत्।
उमामहेश्वरं देव सावित्रीं धर्म्ममेव च ॥

---

१ अवन्ध्यतीत्रिरात्र व्रतमिति पुस्तकान्तरपाठः।

दूर्व्वामूले तु संस्थाप्य मण्डपं कारयेत्ततः।

उमामहेश्वररूपन्तु प्रथमकृष्णाष्टमीव्रते, सावित्रीरूपं पुत्रकामपूर्णिमायां द्रष्टव्यं, धर्म्मरूपन्तु विष्णुधर्म्मोत्तरात्।

चतुर्व्वक्त्रश्चतुष्पादश्चतुर्व्वाहुः सिताम्बरः।
सर्व्वाभरणवान् श्वेतो धर्म्मः कार्य्यो विराजते।
दक्षिणे चाक्षमाला च तस्य वामे तु पुस्तकं॥

दूर्व्वासिञ्चनमन्त्रः।

दूर्व्वां सिञ्चामि ते मूलमुदकैरमृतोपमैः।
अवैधव्यञ्च मे देहि दूर्व्वायै ते नमोनमः॥
दूर्व्वे ह्यमृतजन्मासि वन्दितासि सुरासुरैः।
सौभाग्यं सन्ततिञ्चैव सर्व्वकार्य्यकरी भव॥
यथा शाखाप्रशाखाभिर्व्विस्तृतासि महीतले।
तथा ममापि सन्तानन्देहि त्वमजरामरे॥
एवमुच्चार्य्य सिञ्चेत भ्रमयन्त्र प्रदक्षिणं।
देवतापूजनं कृत्वा पूर्व्वोक्तविधिना ततः॥
सुवासिन्यः स्त्रियः पूज्या वंशपात्रैः सवाससैः।
अनेन विधिना तिष्ठेद्यावदेव दिनत्रयं॥
जागरं तत्र कुर्व्वीत नृत्यवादित्रनिस्वनैः।
शान्तिपाठं पुराणञ्च सावित्र्याख्यानमुत्तमं॥
ततः प्रभाते विमले प्रतिपद्दिवसे शुभे।
होमं तत्र प्रकुर्व्वीत तिलाज्यसमिधादिभिः॥
काण्डात् काण्डात्तु मन्त्रेण सहस्रेण तु संख्यया
वसोर्धारां ततो दद्याद्गतक्रोधो विमत्सरः॥

ब्राह्मणे दक्षिणां दद्याद्वित्तशाठ्यं न कारयेत्।
आचार्य्यञ्च तथा पूज्य उमामहेशरूपिणं॥
गावस्तत्रैव दातव्या नीलवर्णा विशेषतः।
अलाभे[१] सर्व्ववर्णानां सवत्साङ्गीं पयस्विनीं॥
ताम्रपृष्ठीं रौप्यखुरां शृङ्गे कनकसम्भृतां।
घण्टाभरणभूषाञ्च रत्नपुच्छां पयोमुचं॥
ईदृशीन्यास्तथा गाश्च दद्याद्दूर्व्वाविरात्रके।
आचार्य्यं वेदविद्वांसं ह्रस्वञ्चैव कुटुम्बिनं॥
सर्व्वज्ञं शास्त्रविद्वांसं आचार्य्यं तत्र कारयेत्।
आचार्य्याय सभार्य्याय परिधानं[२] प्रदापयेत्॥
हस्तमात्रा कर्णमात्रा स्त्रीणां भूषणमेव च।
मिथुनानि तथा पूज्य द्वादशं परिसंख्यया॥
भोजनान्ते प्रदातव्यं भूषणाच्छादनादिकं[३]।
शयनं तेषु दातव्यं वंशपात्रं दृढं तथा॥
सौभाग्याष्टकसंयुक्तं स्त्रीणां प्रीतिकरं परं।
दत्त्वा दानानि विप्रेभ्यः फलानां पायसानि च॥
भोजयित्वा कुटुम्बिनं सर्व्वतः स्वजनं तथा।
या नारी समुपोष्यैव व्रतमेतत् पुरातनं॥
दूर्व्वाविरात्रं पवित्रं पुण्यं सन्तानदायकं।
ऐश्वर्य्यं सुखसौभाग्यं पुत्रसन्तानवृद्धिदं॥

---

१ अभावे इति पुस्तकान्तरे पाठः।

२ पटीधानं भूषणञ्च इति पुस्तकान्तरे पाठः।

३ भोजनं तेषु दातव्यं दातव्यं भूषणादिकमिति पुस्तकान्तरे पाठः।

मर्त्यलोके चिरन्तिष्ठंस्ततः स्वर्गमवाप्नुयात्।
देवैरानन्दितास्तत्र पितृभिः सह गोत्रजैः॥
वसन्तिरममाणास्ता यावदाभूतसंप्लवं।
अर्घं दद्यात्ततो रात्रावरुन्धत्याः प्रयत्नतः॥
शङ्खे तोयं समादाय सपुष्पफलचन्दनं।
भूमौ जानुद्वयं विन्यस्य अर्घं दद्यात् प्रयत्नतः॥

अर्घ्यमन्त्रः।

अरुन्धती सती देवी वसिष्ठप्रियवादिनी।
अवैधव्यञ्च सौभाग्यं देहि त्वं वरदे सदा॥

इति पद्मपुराणोक्तं दूर्वात्रिरात्रव्रतं।

नारद उवाच।

व्रतानां यत् परं पुण्यं जन्मदुःखक्षयङ्करं।
विष्णोराराधनायालं तद्वदस्व जगद्गुरो॥

ब्रह्मोवाच।

गर्भजन्मजरारोग्य दुःख संसारनाशनं।
परितुष्टिकरं विष्णोः शृणुष्व गदतो मम॥
दत्तं मुमुक्षुभिः शान्तैस्तपोनिष्ठैस्तथापरैः।
समुद्दिश्य हरिं भक्त्या मरीचिप्रमुखैः पुरा॥
यत्ते राजशताख्यं तु व्रतं पुंभिः सुदुष्करं।

विधानं तस्य देवर्षे फलञ्च सुमहोदयं ॥
यस्त्रिरात्रव्रतं कुर्य्यात् समुद्दिश्य जनार्द्दनं ।
कुलानां शतमादाय स याति भवनं हरेः ॥
नवम्यादिसिते पक्षे नरोमार्गशिरस्य च ।
प्रारभेत त्रिरात्राणां सततं विधिवत् व्रती ॥
श्रद्दधानो जितक्रोधो नित्यस्नायी क्षमान्वितः ।
अभ्यर्च्चयेत्सदा विष्णुं कर्म्मणा मनसा गिरा ॥
अष्टोत्तरसहस्रन्तु शतं वासुदिनं जपेत् ।
ॐनमो वासुदेवेति समभ्यर्च्य जनार्द्दनं ॥
असत्यस्तेयपारुष्यपापैश्च सह संकथा ।
मधुमांसासवरसान् सदैव परिवर्ज्जयेत् ॥
ब्रह्मचर्य्यरतः शान्तः सर्व्वभूतहिते रतः ।
वासुदेवपरो नित्यं भवेच्च विधिवद्व्रती ॥
अष्टम्यामेकभक्ताशी१ दिनत्रयमुपावसेत् ।
एकादश्यां शुचिःस्नातो वासुदेवार्च्चने रतः ॥
द्वादश्यां पूजयेद्देवं गन्धमाल्यविलेपनैः ।
नैवेद्यधूपदीपाद्यैर्गीतनृत्यैश्च केशवं ॥
अनेन विधिना कृत्वा त्रिरात्राणां शतं नरः ।
निर्व्वापयेत्ततो भक्त्या विशेषविधिना व्रतं ।
संप्राप्ते कार्त्तिके मासि व्रतमेतदनुत्तमं ॥

प्रतिमासं त्रिरात्रद्वयमिति पञ्चाशता मासैः शतं तत्राधि-मासद्वययोगाच्चतुर्भिर्वर्षैरिति कार्त्तिके समाप्तिः ।

१ अष्टम्यां नक्तभक्ताशीति पुस्तकान्तरे पाठः ।

एवं भोज्य द्विजातिभ्यो दद्याद्वस्त्रयुगानि च ॥

एवं प्रतिमासविधिना।

तथोपवीतछत्राणि शृणु तान्यासनानि च२।

एवं विप्रान् समभ्यर्च्य गुरुञ्चैव विशेषतः ॥

प्रणम्य शिरसा देव सर्व्वमुद्यापयेद्व्रतं।

यथोक्ताद्द्विगुणं तस्य विप्रे भक्तिमतः फलं ॥

प्रलीयन्ते परे तत्त्वे वासुदेवेऽव्यये व्रती।

श्रुत्वाचैतद्व्रतं पुण्यं विमानं तद्द्विजोत्तमाः।

सर्व्वपापैर्विनिर्मुक्ता प्रयान्ति परमाङ्गतिं ॥

इति विष्णुरहस्योक्तं त्रिविक्रमत्रिरात्रव्रतं।

———000———

युधिष्ठिर उवाच।

अनुसूया शरीरे तु ब्रह्मविष्णुमहेश्वराः।

उत्पन्नाः केन तपसा कौतुकं मम केशव ॥

अनुसूया सतीनान्तु त्रैलोक्ये विहिता किल।

दानेन तपसा चैव तीर्थस्नानेन वा भुवं ॥

श्रेष्ठजातौ समुत्पन्ना सर्व्वलोकनमस्कृता।

एतन्मे कथयस्वेह अनुतपस्या महामते ॥

श्रीकृष्ण उवाच।

तया कृते३ पार्थ महाव्रतं वै

परा त्रिरात्रस्तकजाति भद्रं।

---

२ कुण्डस्नान्यासनानिचे ति पुस्तकान्तरे पाठः।

३ तयोत्थमिति पुस्तकान्तर पाठ।

तस्य प्रभावात् सुतजातिरूपं
सतीस्वभावं विविदे त्रिलोक्यां ॥

युधिष्ठिर उवाच ।

कस्मिन् काले दिने कस्मिन् स्थाने कस्मिन् सुरोत्तम ।
विधिना केन कर्त्तव्यं जातिः ख्याप्या कथं वद ॥

नारायण उवाच ।

ज्येष्ठे मासि च कर्त्तव्यं त्रयोदश्यान्तु पाण्डव ।
नियमश्च ग्रहीतव्यमाचार्य्यानुज्ञया तत. ॥
तत्रैकभक्तं द्वादश्यामुपवासत्रयञ्चरेत् ।
मण्डपं कारयेत्तत्र सपताकं मनोहरं ॥
तत्र जातिः प्रकर्त्तव्या स्वर्णादिभवसारतः ।
रौप्यपुष्पाणि कार्य्याणि वंशपात्रे निधापयेत् ॥
तत्र देवास्त्रयः पूज्या ब्रह्मविष्णुमहेश्वराः ।
सपत्नीकाः शुभैः पुष्पैः फलैश्च विविधैस्तथा ॥
अत्र विष्णुशिवमूर्त्तिकरण अशोकत्रिरात्रवद्द्रष्टव्यं ।
यवशालितिलाद्यैश्च वंशपात्रं प्रपूरयेत् ।
देवतात्रितयं पूज्यवंशपात्रे त्रिवस्त्रकैः१ ॥
पीतरक्तसितैश्चैव नानापुष्पैः फलैस्तथा ।
वस्त्रालङ्कारपुष्पैश्च गुरोर्दम्पत्यमर्चयेत् ॥
पादुकोपानहं शय्याञ्छत्रं गौश्च सुभूषिता ।

१ त्रिवस्त्रकैरिति पुस्तकान्तरे पाठ ।

तिलतण्डुलमिश्रैश्च यवहोमं प्रकल्पयेत् ॥
गुडेक्षुक्षीरकैर्धान्यैर्लवणेन विकङ्कतैः।
सप्तधान्यैस्तथा दीपैर्धूपैः धूपानुप्रकल्पितैः ॥
रक्तया कण्ठसूत्रैश्च शुभैः किंशुककेसरैः।
व्रतेनानेन भूपाल व्रतेन शृणु यत् फलं।
आर्त्तिं[१] धनपतिं पुत्रानारोग्यं कुलसंस्थितिं ॥
सौभाग्यं[२] रूपसम्पत्तिं पूजिता सा प्रयच्छति।

इति भविष्योत्तरोक्तं आर्त्तित्रिरात्रव्रतं।

त्रिरात्रोपोषितो[३] दद्यात् फाल्गुन्यां भवनं शुभं।
आदित्यलोकमाप्नोति धामव्रतमिदं स्मृतं ॥
सूर्य्योऽत्र देवता।

इति पद्मपुराणोक्तं धामत्रिरात्रव्रतं।

मार्कण्डेय उवाच।
अहस्यक् दिवसं प्राप्य त्रिरात्रोपोषितो नरः।
मार्गशीर्षात्तथारभ्य पूजयेत्तु त्रिविक्रमं ॥
त्रिवर्णैः कुसुमैर्देवं त्रिभिः प्रयतमानसः।
त्रिवर्णैः श्वेतपीतरक्तैः ॥
त्रयो नुलेपना देया त्रिमारं धूपमेव च।

१ पुत्रानारोग्य भुजसतः इति पुस्तकान्तरे पाठः।
२ आरोग्यमिति पुस्तकान्तरे पाठः।
३ त्रिरात्रोपोषितादद्यादिति पाठान्तरं।

त्रिसारं गुग्गुलु कुटकश्रीवेष्टिका: ।
बलिं त्रिमधुरं दद्यात् चीरं च दोपाबरोत्तम ।
यवैस्तिलैस्तथा होम: कर्त्तव्य: सर्षपान्वितै: ॥
दद्यात्त्रिलोहञ्च तथा द्विजेभ्य:
ताम्रं सुवर्णं रजतञ्च राजन् ।
न केवलं स कुलदं व्रतन्तु
यथेष्टकामाप्तिकरं प्रदिष्टं ॥

इति विष्णुधर्मोत्तरोक्तं सुकुलत्रिरात्रव्रतं ।

———ooo———

श्रीकृष्ण उवाच ।

चैत्रे तु कृष्णदेवं त्रिभि: प्रयतमानस: ।
त्रिरात्रं तत्र नक्ताशी नद्यां स्नात्वाद्विजातये ।
अजा: पञ्च पयस्विन्य: प्रदद्यात् स सुवर्णका: ॥
न जायते पुनरसौ जीवलोके कदाचन ।
एतद्वस्त्रव्रतं प्रोक्तं सर्व्वव्याधिविनाशनं ॥
सूर्य्योऽत्र देवता ।

इति भविष्योत्तरोक्तं वस्त्रत्रिरात्रव्रतं ।

———ooo———

श्रीकृष्ण उवाच ।

पार्थ भाद्रपदे मासि शुक्लपक्षे दिनोदये ।
तृतीयायां चतुर्थ्याञ्च श्रद्धया परिवत्सरं ॥

उपवासेन गृह्णीयाद्व्रतं गत्वा तु गोष्पदं।
स्नात्वा नरोऽथ नारी वा पुष्पधूपविलेपनैः॥
दध्ना च घृतमिश्रेण मिष्टान्नैर्व्वनमालया।
अभ्यर्च्चयेद्गवां शृङ्गे सपुच्छे चैव भारत॥
दद्याद्दवाह्निकं भक्त्या वासः पूर्व्वापराह्णयोः।
अनग्निपक्वं भुञ्जीयात् तैलाचारविवर्ज्जितं॥

पूर्व्वापराह्णयोः द्वितीया पञ्चम्योः गवां पदेषु माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिःप्रनुवोचं चिकितुषे जनायमागामनागामदितिवर्दिष्ट यमावायुव्रेति।

अर्घ्यमन्त्रः।

गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहं॥

इति गोप्रार्थनामन्त्रः।

व्रजन्तीनां गवां नित्यमायान्तीनां कुरूद्वह।
पुरद्वारेऽथ वा गोष्ठे मन्त्रेणानेन भक्तिमान्॥
अर्घ्यं दद्यात्तथाग्रासं तुष्टये पुष्टये गवां।
इत्थं संपूज्य दत्त्वार्घ्यं ततो गच्छेद्गृहं प्रति॥
पञ्चम्यां क्रोधरहितो भुञ्जीयाद्गोरसन्दधि।
शालिपिष्टं फलं शाकं तिलपिष्टं विरूढकं॥
दिनावसाने राजेन्द्र संयतस्तां निशां स्वपेत्।
प्रभाते गोपदं दत्त्वा ब्राह्मणाय कुटुम्बिने॥
विप्राय वेदविदुषे यथा शक्त्या हिरण्मयीं।

समापयेद्व्रतं नाथ गोविन्दं गरुडध्वजं ॥
तथा गोवर्द्धनं शैलं कृत्वा गुड़मयं शुभं ।
यथाशक्त्या समभ्यर्च्य पुष्पधूपादिभिः पृथक् ।
यथैवं गोपदं पार्थ तथा गोवर्द्धनं गिरिं ॥
दद्याद्भक्त्या द्विजेन्द्राय गोविन्दः प्रीयतामिति ।
गोभक्तो गोव्रतं चीर्त्वा भक्त्या दत्त्वा च गोष्पदं ॥
सौभाग्यं रूपलावण्यं प्राप्नोति विपुलां श्रियं१ ।
गोवत्सकाकुलगृहं गोभक्तिं समवाप्नुयात् ॥
भुक्त्वा भोगान् सुविपुलान्२ ततः स्वर्गपुरं व्रजेत् ।
दिव्यान् भोगांस्ततो भुक्त्वा पुण्यशेषेण पार्थिव ॥
धनधान्यजनोपेतमारोग्युरत्नवद्विमान् ।
कुलञ्च निर्मलं लब्ध्वा पुनर्गोभक्तिमान् भवेत् ॥
एवं जन्मशतं पार्थ व्रतस्यास्य प्रभावतः ।
ततो गोलोकमासाद्य पुनरावृत्तिवर्जितं ॥
तिष्ठते देववद्भूत्वा३ यावदाचन्द्रतारकं ।
दिव्यरूपधरः स्रग्वी दिव्यालङ्कारभूषितः ॥
गन्धर्वगीतवाद्येन सेव्यमानोऽप्सरोगणैः ।
दिव्यं युगशतं स्थित्वा ततो विष्णुपुरं व्रजेत् ॥
यो गोष्पदव्रतमिदं कुरुते चिराय
गावश्च पूजयति गोरसभोजनश्च ।

१ प्राप्नोतिचाचिरश्रियामिति पुस्तकान्तरे पाठः ।
२ पुण्यवर्चान् इति पुस्तकान्तरे पाठः ।
३ देवबद्भूत्वा इति पाठान्तरं ।

गोविन्दमादिपुरुषं प्रणिधाय चित्ते
लोकं स पुण्यमुपयाति गवां पवित्रं ॥

इति भविष्योत्तरोक्तं गोपदत्रिरात्रव्रतं।

———ooo———

साधु भक्तोऽसि धर्म्मज्ञ कालरात्रिव्रतं मम।
शृणु वक्ष्याम्यहन्तेऽद्य कर्त्तव्यं विधिवद्यथा॥
मासि चाश्वयुजेऽष्टम्यां शुक्लपक्षे जितेन्द्रियः।
सत्यवाक् स्थिरचित्तात्मा नियमस्थो भवेत्सुधीः॥
कृत्वादौ मण्डपं श्रीमान् भूमिभागे१ समे शुभे।
चतुरस्रं समं कृत्वा पताकाध्वजशोभितं॥
सूत्रेणसूत्रितं कृत्वा कुण्डं हस्तप्रमाणतः।
धेन्वाकृतिसमं तत्र कारयेद्विधिवच्छुभं॥
ततो हरेत्सम्भारान् दर्भांश्चैव तिलांस्तथा।
पालाशीःपिप्पलीश्चैव समिधः सप्तविंशतिं॥
गर्गरीः कलशांश्चैव नवांश्चैवाहरेत् शुभान्।

गर्गरी मन्थनी।

सुवर्णपूर्णपात्राणि वैदलानि शुभानि च।
नैवेद्यपुष्पतोयार्घ्यं द्रव्यानि च नवानि तु॥
आहरेत् सर्व्वमेतद्धि व्यञ्जनञ्च सुशोभनं।
सुरभीणि च पुष्पाणि जातीर्नीलोत्पलानि च॥
अन्यानपि पवित्रांश्च कृत्वादौ नाहरेद्बुधः२।

---

१ समभागे इति पुस्तकान्तरे पाठः।

२ कुम्भादीनाहरेद्बुध इति पुस्तकान्तरे पाठः।

गन्धानि चैव चित्राणि धूपं गुग्गुलपूर्व्वकं ॥
प्रणीतान् विष्टरांश्चैव स्रुवञ्च स्रुचमेव च ।
एवं सम्भृत्य सम्भारांश्चतुरः सुकुलोद्भवान् ॥
अधिवासार्थमाचार्य्यान् समुद्दिश्य प्रकल्पयेत् ।
ये शुद्धा विगतक्रोधा देवब्राह्मणपूजकाः ॥
आहाग्नित् सत्कुले जाताः सत्यशौचसमान्विताः ।
चतुर्भिरीदृशैर्व्विप्र आचार्य्यैर्नियमस्थितैः ॥
समरात्रोषितैः पूज्य अष्टाहं नक्तभोजनैः ।

एवं पञ्चसाध्यव्रतं ।

ततो निगममादाय तत्कुण्डे धनुषाकृतौ ।
होमस्तु कारयेत्तत्र विप्रैः शाङ्करवंशजैः ॥
शाङ्करवंशजाः शैवदीक्षावन्तः१ ।
तदभावेन चैवेह होमस्तद्भूमिमिच्छता२ ॥
कारयेत् कुशलान् शास्त्र३ मध्यस्कुलजांस्तथा ।
होमाभावे प्रामिशैवतुल्यानां विधान ॥
गणानामधिपं मातृभूपालं वृषभध्वजं ।
आदावेव च संपूज्य ततो होमं समाचरेत् ॥

मातृभूपालः स्कन्दः ।

जातरूपेण देवेशं सर्व्वकर्म्मसुसिद्धये ।

---

१ शाङ्करेतिविप्रैश्चतुर्भिर्मिति पुस्तकान्तरे पाठः ।
२ होमं कुर्य्याद्विनिश्चयं इति पुस्तकान्तरे पाठः ।
३ सत्कुलानशास्त्रा इति पुस्तकान्तरे पाठः ।

आग्नेयं मातृभिः सार्द्धं स्वरूपेण हरं यजेत् ॥

भूपालः क्षेत्रपालः आग्नेयः कार्त्तिकः। जातरूपःसुवर्णं विनायककल्पं कृष्णचतुर्थीव्रते। स्कन्दरूपन्तु कार्त्तिकेयषष्ठी व्रते वेदितव्यं। मातृरूपन्तु विष्णुधर्म्मोत्तरे।

जातस्य प्रादुर्भूतस्य रूपकुजमुखादि तेन देवेशादीन् पूजयेत्।

हरस्वरूपेण लिङ्गरूपेण देवेशो गणेशः।

जुहोति सप्तपालाशानुदिते जुहुयात्तदा।
पुनश्चास्तं गते भानावाचत्वसन्निधौ हुनेत् ॥
अर्द्धरात्रे तिलैः कृष्णै राज्येनाक्तैस्तु भक्तितः।
अष्टोत्तरं शतं यावत् कारयेद्धोममुत्तमं ॥
मन्त्रेणानेन तत्रैव सर्व्वाशुभविनाशनात्।
वरदेन सुसिद्धेन पुष्टिप्रीतविधायिना ॥

ओँ ह्रीँ नमः। कृष्णवाससा शतसहस्रकोटिसिंहवाहने सहस्रवदने महाबलेऽपराजिते प्रत्यङ्गिरे सर्व्वसैन्यपरकर्म्मनिर्व्वासिनि परमन्त्रच्छेदनि सर्व्वसत्त्वोत्सादनि सर्व्वभूतदमनि। सर्व्वदोषान्बंधयबधय विद्याउच्छेदय निकृन्तय सर्व्वदुष्टान् भक्षय भक्षय ज्वालाजिह्वेकरालवक्त्रे सर्व्वजम्भून नयस्फोटय शृङ्खलान् त्रोटय त्रोटय प्रत्यङ्गिरे नमोऽस्तु ते स्वाहा।

होमं कृत्वा बलिन्दद्यात्तत्र सर्व्वदिशासु च।
कृशराज्येन रक्तेन पयसा योजितेन च ॥
कृशराज्यैः सुराक्षीरैः कृतश्च सुबलिं द्दद्यात्।
कुर्य्यात् सप्तदिनञ्चैव सप्तमेह्नि शृणुष्व वै ॥

आहुतीः पञ्च पञ्चशा बलिद्द्यकं हुनेत्।

सप्ताहं बलिहोमे तत्र सप्तमेऽहनि पञ्चपञ्चाशता निवर्त्तनाभ्यस्तमहा-व्याहृतीः कृत्वा दशकं जुहुयात् दशपूर्णाहुत्यर्थः पृथक् सकृत् ।

चतुर्भिः स कुलोत्पन्नैस्त्रिरेकसप्तशर्व्वरी ।
उषित्वाचाथ नक्तेन स्नातव्यं ह्यर्च्चनाय वै ॥

सप्तरात्रं त्रिरात्रमेकरात्रं यथा शक्त्युपवासेन बलिहोमौ कृत्वा पूजां कुर्व्वीत नक्तेन पश्चोधारणीयः ।

पञ्चमे पूजनं वत्स कर्त्तव्यं विधिवत्सदा ।
धर्म्मयशोद्भवैः१ विप्रैस्तृष्टार्थन्तत्वतः शृणु ॥

धर्म्मयशोद्भवैः मैत्रैः ।

दिनानि सप्तसप्तैकं चन्दनागुरुणा तथा ।
देव्याः परमया भक्त्या क्षालयेन्मुखमण्डलं ॥
सर्व्वलेख्यस्य कर्त्तव्या क्षालनेयं मुखस्य तु ।
इयं चन्दनागरुवर्णा पूर्व्वकृता ॥
प्रतिमा मृण्मयी या तु स्थाप्य तां पूजयेत्सदा ।
प्रक्षाल्य मन्त्रपूतेन प्रमृज्यामलवाससा२ ॥
मधुना मधुपर्क्कन्तु कारयेत् पूजयेत्ततः ॥
ततोऽमृतं पुनर्योज्य मुखं गात्रञ्च३ कारयेत् ।
प्रदक्षिणं ततो भूयो दण्डवत्प्रणिपत्य च ॥
धर्म्मपालोद्भवेतान्नमस्तव्या सुस्तवेन वै ।

---

१ सर्व्वयशोद्भवैरिति पुस्तकान्तरे पाठः ।

२ पञ्चगव्यैर्मध्याज्येक्षुसाराभ्यां मन्त्रपूतेन वारि रुधुनेति क्वचित् पाठः ।

३ मुखमावर्मिति पाठान्तरं ।

धर्म्मपालोभद्रस्यनामस्तोत्रं।

स्तुत्वा च तत्रैव भक्त्या ब्राह्मणान् विधिवत्ततः।
काञ्चनैरर्च्चयेद्वस्त्र समासैर्व्वयोजितैः॥
पुनर्गीतं तथा नृत्यं वाद्यञ्चैव विशेषतः।
देव्याश्च पुरतोत्यन्तयत्नादेवन्तु कारयेत्॥
स्वात्ममेव कृतं यस्य गृह्णाति भक्तितः सदा।
सर्व्वस्वञ्चैव मे युक्तं मद्भक्ताय ददाम्यहं॥
प्रीत्यर्थं ममभक्तेन शुचिः स्नात्वा जितेन्द्रियः।
दान्त्याक्षान्त्या समायुक्तां तथाभक्तिं समाचरेत्॥
न धारयेदलङ्कारे यतस्तस्यायमीरितं।
न चैतं वैनयेत्स्वर्गं नतपोमोक्षमेव च॥
एवं निष्पादयित्वा तु गृहं गच्छेच्छनैस्ततः।
गत्वा प्राश्य शुचिर्भूत्वा पञ्चगव्यं मुदान्वितः॥
अष्टौ चैव कुमारीश्च अष्टौ च द्विजसत्तमान्।
होमयेद्विधिवद्धोमामुद्दिश्य च मातरं॥

मातरं मातृगणानादिवाष्टौ।

अष्टौचैव द्विजान् भोज्य व्रतस्थान् शिवधार्म्मिकान्।
उद्दिश्य शङ्करं देवं तत्पत्नीं च विनायकं॥
प्रत्येकमष्टौ सम्प्राप्य होतारश्च विशेषतः।
ततः क्षमापयेत्पश्चात् प्रणिपत्य मुहुर्मुहुः॥
एतत्सर्व्वं समुद्दिष्टं भक्त्या विस्तरतो भवेत्।
दीनान्धकृपणांश्चैव कारुण्यात्तत्र भोजयेत्॥
यद्दत्तं वेद विप्रेभ्यो यद्दत्तं ब्रह्मचारिणे॥

ततोऽतिथिषु१ यद्दत्तं कान्याश्चैव तत्तथा।
तत्सर्व्वमक्षयं दानं वैमूल्येन विधानतः॥
नूनञ्चैवेश्वरे दत्तं सत्यमेतन्नसंशयः।
अर्हानर्हाश्च सम्भोज्याः सर्व्वे चैवोत्सवे मम॥
आज्ञया परया प्राप्ताः२स्त्रीबालवृद्धकलाखिलं।
बन्धुभिश्च ततः सार्द्धमुदया परया युतः।
हुतमुग्यज्ञशेषन्तु भुञ्जीत प्रयतात्मवान्॥
अकाले कौमुदीं कुर्य्यात् कृष्णपक्षे च यः सदा॥
अकालकौमुदी दीपालिकोत्सवं।
मासि चाश्वयुजेऽष्टम्यामारभेत्सर्व्वं णाचरेत्।
उषित्वा वाथ नक्तेन एकभक्तेन वा पुनः॥
विहाय पापमज्ञातं स गच्छेत्परमां गतिं।
पर्व्वणा पञ्चदश्या, प्रथमुत्सवो व्रतस्योत्तराङ्गं, अतएव देवकीकार्य्यः।
ब्राह्मणाः क्षत्रियाः पार्थ वैश्या वा शूद्रजातयः।
चरिष्यन्ति व्रतञ्चेदस्तेऽपि यास्यन्त्यनामयं॥
एवन्तु विधिवत् कुर्य्यात् पुत्रवान् सधनो भवेत्३॥
नालिङ्गस्यापदोघोराः शत्रुभिर्न च बाध्यते।४
कालीव्रतमिदं ख्यातं कर्त्तव्यं सत्कुलोद्भवैः।

१ तिथिषु दत्त मिति पुस्तकान्तरं पाठः।
२ आज्ञया प्रवराविमा इति पुस्तकान्तरे पाठः।
३ धर्मतोभवेदिति पुस्तकान्तरं पाठः।
४ शत्रुभिस्तत्रबाध्ये इति पुस्तकान्तरं पाठः।

शान्ति पुष्टिरमाकामैः[१] विद्याकामैश्च यत्नतः।

रमाकामैर्लक्ष्मीकामैः।

सिंहायुतसहस्रेण उह्यमानेन सञ्चरेत्।
विमानेनार्कवर्णेन दिवं गच्छेद्यथाचरेत्॥
एतद्व्रतं तदा त्वं हि मयोक्तं पापनाशनं।
भक्त्या च परया वत्स कर्त्तुमर्हस्यतन्द्रितः॥
प्रतिजातिषु सम्बन्धं यः करिष्यति शङ्करं।
हीनवर्णेन क्रुद्धं च स्यादनेनापकारकः॥

इति कालिकापुराणोक्तं कालरात्रिव्रतं।

ब्रह्मोवाच।

आश्विने वाथ माघे वा चैत्रे वा श्रावणेऽपि च।
कृष्णादारभ्य कर्त्तव्यं व्रतं शुक्लावधिं हरेत्॥

शुक्लावधिर्भवति शुक्लपक्षावधिः।

एतच्चोक्तमासेष्वेव वक्ष्यमाण प्रकारेण कृष्णाष्टम्यामारभ्य शुक्लाष्टमीं यावत् कर्त्तव्यं।

अष्टमीमाश्विनीं कृष्णा मेकभक्तेन कारयेत्।
मङ्गलारूपिणीं देवीमथवा रुद्रवातिनीम॥
पूजयेन्नवभेदेन गन्धमाल्यनिवेदनैः॥

नवभेदेन नवकृत्वो गन्धधर्पणेन।

कन्यका भोजयेद्वत्स देवीभक्तांश्च मानवान्॥

१ शान्ति पुष्टिक कामैश्च इति पुस्तकान्तर पाठः।

नक्तेन नवमीं कार्य्या यावन्न दशमीं क्षिपेत् ।
एकादश्यामुपवसेत् पुनरेष विधिर्भवेत् ॥

पुनरेषविधिरिति यथा कृष्णाष्टम्यां दिनचतुष्कमेकभक्तनक्ता याचितोपवासात्परमपि दिनचतुष्कत्रयं नेयमित्यर्थः ।

यावच्छुक्लाष्टमीं शक्र उपोष्य तु विधानतः ।
दानं होमो जपः पूजा कन्याभोज्यन्तु प्रत्यहं ॥
कर्त्तव्यं जितरोषेण देव्या भक्तिरतेन च ।
नवधा पशुघातेन महिषाजाविकादिषु ॥
कर्त्तव्य भूतवैताले नचैवात्मचिकीर्षया ॥
कन्याद्यलङ्कृतास्तत्र[1] द्विजा देवीपरायणाः ।
नवधापशुघातेन नखण्डकरणे न च[2] ॥

भूतवैताले भूतवैतालार्थं आत्मचिकीर्षया आत्मभोगेच्छया । अलङ्कृताः कार्य्या इति विशेषः ।

नटनर्त्तनप्रत्ताश[3] रथयात्रा सजागरं ।
दानं देयं यथाशक्त्या सर्व्वेषामपि शक्तितः ॥
महाभैरवरूपेण अस्थिमालाधराश्च से ।
पूजनीया विशेषेण वस्त्रशोभाः पुरादिषु ।
कर्त्तव्याः सर्व्वकामार्थप्रापणाय सुरोत्तम ॥
अनेन विधिना शक्र यथेष्टं लभते फलं ॥

---

१ स्तद्दिति पुस्तकान्तरे पाठः ।

२ नखण्डकरणेन च इति पुस्तकान्तरे पाठः ।

३ नटनर्त्तनमुख्याश्च इति पुस्तकान्तरे पाठः ।

मङ्गला भैरवी दुर्गा वाराही त्रिदशेश्वरी।
उमा हैमवती कन्या कपाली कैटभेश्वरी॥
काली ब्राह्मी महेशी च कौमारी मधुसूदनी।
वाराही वासवी चर्चा नामान्येतानि वै जपेत्।
पूजयेद्भोजयेत् कन्याः शास्त्रदृष्टेन कर्म्मणा॥
वस्त्रालङ्कारकांस्यादिकारकाः कटिसूत्रकाः।
दातव्या चात्मनः शक्त्या देव्या भक्तैः सुखार्थिभिः॥
अथवा नवरात्रञ्च सप्तपञ्चत्रिकं हि वा।
एकभक्तेन नक्तेनायाचितोपोषितैः क्रमात्॥

नवरात्रिरेकभक्तेन सप्त नक्तेन पञ्चायाचितेन तिस्र उपवासेनेति क्रमः। अष्टमीमन्तं कृत्वा नवादिगणना। पूर्व्वत्रासमर्थस्येते पक्षाः।

सप्तमेताश्विने शक्र यावच्छुक्ला तु अष्टमी।
पूजयेन्मङ्गलां तत्र मण्डले विधिवत्क्रते॥
सर्व्वसम्भारसम्पन्ने सर्व्वसिद्धिविधायके।
सर्व्वकामप्रदे शक्र सर्व्वकामानवाप्नुयात्॥
अर्थकामस्य अर्थन्तु राज्यकामस्य राज्यदं।
आरोग्यं पुत्रदं वत्स महापातकनाशनं॥
सर्व्ववर्णैश्च कर्त्तव्यं पुंस्त्रीबालनपुंसकैः।
सर्व्वदा सर्व्वगा देवी यस्माच्छक्र महाफला॥
अनेन विधिना वत्स स ददाति विचारणा।
सर्व्वेषां व्रतयानीनां सर्व्वव्रतमहाफलं॥
नवम्याख्यं महापुण्यं तव सम्यक् प्रकाशितं।

नाख्येयं भक्तिहीनस्य मूर्खस्य हेतुवादिनः॥
देयं भक्ताय शान्ताय शिवविष्णुरताय च।
देवीभक्तः सदाचारः कन्यापूजारतो नरः॥
इहैव सर्व्वकामानि साधयेदविचारणात्।
विप्रा यथा च पूज्यानां दानानां काञ्चनं यथा॥
भूर्लोकः सर्व्वलोकानां तीर्थानां जाह्नवी तथा।
यथाश्वमेधो यज्ञानां मथुरा मुक्तिकाङ्क्षिणां॥
वीणां यथाहिभुक् श्रेष्ठो देवानामच्युतो यथा।
तथा सर्व्वव्रतानान्तु वरोक्तं भीष्मपञ्चकं॥
वसिष्ठभृगुगर्गाद्यैश्चीर्णं कृतयुगादिषु।
नभागाम्बरीषाद्यैश्चीर्णं त्रेतायुगादिषु॥
वीरभद्रादिभिर्व्विप्रैः शूद्रैरन्यैः कलौ युगे॥
दिनानि पञ्च पूज्यानि चीर्णमेतन्महाव्रतं।
ब्राह्मणैर्ब्रह्मचर्य्येण जपहोमक्रियादिभिः॥
क्षत्रियैश्च तथा सत्यशौचव्रतपरायणैः।
नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत्॥
संसारपूजितो नित्यं[१] महानेकोपिजायते।
श्रवणात् सर्व्वकार्य्याणि सिध्यन्ति नात्र संशयः॥'

इति देवीपुराणोक्तं मङ्गलाव्रतं।

---

१ मङ्गलार्ह्जितानित्यमि त पुस्तकान्तरे पाठः।

अथ भीष्मपञ्चकव्रतं ।

नारदीयपुराणात् ।

नारद उवाच ।

यदेतदचलं पुण्यं व्रतानां परमं व्रतं ।
कर्त्तव्यं कार्त्तिके मासि प्रयत्नाद्भीष्मपञ्चकं ॥
विधानं तस्य विस्पष्टं[१] फलञ्च सुरसत्तम ।
कथयस्व प्रसादान्मे मुनीनां हितकाम्यया ॥

ब्रह्मोवाच ।

प्रवक्ष्यामि महापुण्यं व्रतं व्रतवताम्बर ॥
भीष्मेणैतद्यतः प्राप्तं व्रतं पञ्चदिनात्मकं ।
सकाशाद्वासुदेवस्य तेनोक्तं भीष्मपञ्चकं ॥
व्रतस्यास्य गुणान्वक्तुं कः शक्तः केशवादृते ।
व्रतञ्चैतन्महापुण्यं महापातकनाशनं ॥
अतो नरैः प्रयत्नेन कर्त्तव्यं भीष्मपञ्चकं ।
कार्त्तिकस्यामले पक्षे स्नात्वा सम्यग्यतव्रतः ॥
एकादश्यान्तु गृह्णीयाद्व्रतं पञ्चदिनात्मकं ॥
प्रातस्स्नात्वा विधानेन मध्याह्ने च तथाव्रती ।
नद्यां निर्झरगर्त्ते वा समालभ्यञ्च गोमय ॥
यवव्रीहितिलैः सम्यक् पितॄन् सन्तर्पयेत् क्रमात् ।
स्नात्वा मौनं ततः कृत्वा धौतवासा दृढव्रतः ॥

---

१ विधानं तस्य फलञ्चामिति आ॰ का॰ सर्व पाठः ।

ततः संपूजयेद्देवं सर्व्वपापहरं हरिं।
स्नापयेदच्युतं भक्त्या मधुक्षीरघृतादिभिः॥
तथैव पञ्चगव्येन गन्धचन्दनवारिणा।
चन्दनेन सुगन्धेन कुङ्कुमेनाथ केशवं॥
कर्पूरोशीरमिश्रेण लेपयेद्गरुडध्वजं।
अर्च्चयेदुचितैः पुष्पैर्गन्धधूपसमन्वितैः॥
गुग्गुलं घृतसंयुक्तं दहेदथभक्तिमान्[1]।
दीपकन्तु दिवारात्रौ दद्यात् पञ्चदिनानि तु॥
नैवेद्यं देवदेवस्य परमान्नं निवेदयेत्।
एवमभ्यर्च्च देवेशं स्तुत्वाचैव प्रणम्य च॥

ओं नमोभगवते वासुदेवेति जपेदष्टोत्तरं शतं।
जुहुयाच्च घृताभ्यक्तं तिलव्रीहियवं व्रती॥
षडक्षरेण मन्त्रेण स्वाहाकारान्वितेन च॥

ओं नमोविष्णवेति षडक्षरोमन्त्रः।

उपास्य पश्चिमां सन्ध्यां प्रणम्य गरुडध्वजं।
जपित्वा पूर्व्ववन्मन्त्रं क्षितिशायी भवेन्नरः॥
सर्व्वमेतद्विधानन्तु कार्य्यं पञ्चदिनेष्वपि।
विशेषोक्तं व्रते चास्मिन् यदन्यूनं[2] शृणुष्व तत्॥
प्रथमेऽह्नि हरेः पादौ पूजयेत् कमलैर्नरः।
द्वितीये बिल्वपत्रेण जानुदेशं समर्च्चयेत्॥
पूजयेच्च तृतीयेऽह्नि नाभिं भृङ्गारकेण तु।

---

१ दद्याच्च भक्तिमानिति पुस्तकान्तरे पाठः।
२ यदपूर्व्वमिति पुस्तकान्तरे पाठः।

वाण-विल्व-जयाभिश्च ततस्त्वन्यो समर्च्चयेत्।
ततोऽनुपूजयेच्छीर्षं मालत्या चक्रपाणिनं॥
कार्त्तिक्यां देवदेवस्य भक्त्या तद्गतमानसः।
पूजयेज्जपमन्त्रेण गन्धधूपं निवेदयेत्॥
अर्च्चयित्वा हृषीकेशमेकादश्यां समाहितः।
विःप्राश्य गोमयं सम्यक् एकादश्यामुपावसेत्॥
गोमूत्रं मन्त्रवद्भूयो द्वादश्यां पूजयेद्व्रती।
क्षीरञ्चैव त्रयोदश्यां चतुर्दश्यां तथा दधि।
संप्राश्य कायशुद्ध्यर्थं लङ्घनीयञ्चतुर्द्दिनं१॥

प्राशनं, होममन्त्रेण।

पञ्चमे तु दिने स्नात्वा विधिवत्पूज्य केशवं।
भोजयेद्ब्राह्मणान् भक्त्या तेभ्यो दद्याच्च दक्षिणां॥
तथोपदेष्टारमपि पूजयेद्वस्त्रभूषणैः।
ततोनक्तं समश्नीयात्पञ्चगव्यपुरःसरं॥
एवं सम्यक् समाप्यं स्यात् यथोक्तं व्रतमुत्तमं।
सर्व्वपापहरं पुण्यं प्रख्यातं भीष्मपञ्चकं॥
जन्मप्रभृति जन्मांमन्यक्ता पुण्यमवाप्नुयात्।
तत्फलं समवाप्नोति सन्त्यक्ता भीष्मपञ्चके॥
मद्यपोयः पिवेन्मद्यं जन्मनोमरणान्तिकं।
तद्भीष्मपञ्चके त्यक्तसम्प्राप्नोत्यधिकं फलं॥

भविष्योत्तरात्।

---

१ लङ्घयेत चतुर्द्दिनमिति पुस्तकान्तरे पाठः।

कृष्ण उवाच ।

कार्त्तिके शुक्लपक्षस्य शृणु धर्म्मं पुरातनं ।
एकादश्यां समारभ्य विधेयं भीष्मपञ्चकं ॥
दुष्करं सत्वहीनानामशक्यं बालचेतसां ।
पापधीः परिहर्त्तव्या ब्रह्मचर्य्येण नित्यशः ॥
मद्यं मांसमसत्यञ्च वर्ज्जयेत् पापभाषणं ।
शाकाहारेण मुन्यन्नैः कृष्णार्च्चनपरैर्नरैः ॥
स्त्रीभिर्व्वाक्येन कर्त्तव्यं१ स्वसत्यः पुण्यवर्द्धनं ।
विधवाभिस्तु कर्त्तव्यं पुत्राणां शुभवृद्धये२ ॥
सर्व्वकामसमृद्ध्यर्थं मोक्षार्थञ्चैव पाण्डव ।
नित्यं स्नानेन दानेन कार्त्तिकीं यावदेव तु ॥
वैश्वदेवस्तु कर्त्तव्यो विष्णुध्यानपरायणैः ।
वैश्वदेवः सर्व्वदेवताहोमः तात्र विष्णुविभूतित्वेन भावनीयाः ।
या यस्य प्रतिमा कार्य्या रौद्रवक्त्रातिभीषणा३ ।
खड्गहस्तातिविकृता सा हि दंष्ट्राकरालिनी ॥
तिलप्रस्थोपरि स्थाप्या कृष्णवस्त्रेण वेष्टिता ।
रक्तपुष्पाकृतापीडां ज्वलत्काञ्चनकुण्डलां ॥
संपूज्य परया भक्त्या धर्म्मराजस्य नामभिः ।

---

१ स्त्रीभिर्व्वाक्यैर्न्नकर्त्तव्यमिति पुस्तकान्तरे पाठः ।

२ विधवाभिस्तु कर्त्तव्या पुत्राणां शुभवृद्धये इति पुस्तकान्तरे पाठः ।

३ रौद्रवक्त्रातिभीषणा इति पुस्तकान्तरे पाठः ।

इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ॥
यदन्यजन्मनि कृतमिह जन्मनि वा पुनः।
पापं प्रशममायातु तवपादप्रसादतः।
एवं संपूज्य विधिवत् प्रतिमाञ्च सकाञ्चनां ॥

सकाञ्चना सुवर्णदक्षिणायुक्ता।

वाचकाय प्रदातव्या धर्म्मो मे प्रीयतामिति ॥
तद्दच्च देवदेवस्य कृष्णस्याक्लिष्टकारिणः ॥

तद्दद्दिति हरिप्रतिमा देया।

कृत्वा पूजां यथा शक्त्या विप्राणां वेदवेदिनां।
दद्याद्धिरण्यं गाश्चैव कृष्णो मे प्रीयतामिति ॥
अन्येषामपि दातव्यं सत्कृत्य वसुवाञ्छितं।
कृतकृत्यः स्थितोभूत्वा विरक्तः संयतोभवेत् ॥
शान्तचेता निराबाधः परम्पदमवाप्नुयात्।
नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुजः ॥
अष्टपादैकनयनः शङ्कुकर्णो महास्वनः।
जटी द्विजिह्वस्ताम्रास्यो मृगराजतनुच्छदः ॥
चिन्तनीयो महादेवो यस्य रूपं न विद्यते।

व्रतदेवताया महाविष्णोरिदं रूपं चिन्त्यं पूजा देया च मृग-
राजतनुच्छदः सिंहत्वक्।

इदं भीष्मेण कथितं शरतल्पगतेन मे।
तदेतत्ते मया ख्यातं दुष्करं भीष्मपञ्चकं ॥
व्रतं तच्छ्रागमादूर्लं प्रवरं भीष्मपञ्चकं।

यस्तस्मिंस्तोषयेद्भक्त्या तस्मै मुक्तिप्रदोऽच्युतः॥
ब्रह्मचारी गृहस्थोवा वानप्रस्थोऽथवा यतिः।
प्राप्नोति वैष्णवं स्थानं तत् कृत्वा भीष्मपञ्चकं।
ब्रह्महा मद्यपस्तेयी गुरुगामी सदानृती।
मुच्यते पातकात् सम्यक् कृत्वैकं भीष्मपञ्चकं॥
अथास्मिंस्तोषितोविष्णुर्नृणां मुक्तिप्रदोभवेत्।
श्रुत्वैतत् पठ्यमानन्तु पवित्रं भीष्मपञ्चकम्॥
मुच्यते पातकान्मर्त्यः पाठकोविष्णुलोकभाक्।
धन्यं पुण्यं पापहरं युधिष्ठिर महाव्रतं॥
यच्चीर्त्वा ब्रह्महा गोघ्नः सर्व्वपापैः प्रमुच्यते।

यद्भीष्मपञ्चकमिति प्रथितं पृथिव्या
मेकादशीप्रभृति पञ्चदशीनिबद्धं।
मुन्यन्नभोजनपरस्य नरस्य तस्मि
न्निष्टं फलं दिशति पाण्डवशार्ङ्गधन्वा॥

इति भीष्मपञ्चकव्रतं।

—000—

व्यास उवाच।

यद्जन्मोहानवा पूर्व्वं चार्थयित्वा जनार्द्दनं।
तां योगनिद्रामवज्ञदेवीं रक्षार्थमात्मनः॥
एकांशतोभगवतो सिद्धिमिकां तदेव तु।
शुक्लपक्षे तु संपज्या कार्त्तिके केशवाज्ञया॥

चतुर्थ्यामथवाष्टम्यां नवम्यां वा सुसिद्धिदा।
चतुर्दश्यामथो स्त्रीभिः सुस्नाताभिर्यथाक्रमं॥
गृहाद्दाह्ये तु यत्र स्यादेकान्ते तु फलद्रुमः।
तत्तथा पुष्पधूपान्नसम्पदा पूजयेच्च तां॥
एका पुत्रवती नारी मनोवाक्कायसंयुता।
सर्वोपकरणैर्युक्तं गृहीत्वा ग्राममुत्तमं॥
ततो ददाति श्येनाय सुप्रीता प्रीतिकामिनी॥
इममासनवस्त्राद्यं भगवत्यै निवेदय।
इत्युक्त्वा स्वगृहं याति ततः पूर्णमनोरथाः॥
कृते युगे प्रसिद्धोऽयं दासवद्भृतको यथा।

दास इव भृतक इव प्रेष्यत्वेन कृते युगे प्रसिद्ध इत्यर्थः।

अयोध्याधिपरी राजा ऋतुपर्णः पुरे स्वके।
निधाय प्रददौ नेतुं श्येनाय स्वां प्रियां प्रति॥
युगेष्वन्येषु मन्त्रस्तु जपेत्त्वनल इत्यपि।
जहाति भूमौ संप्राप्ता[१] प्राप्नु त्वौ याति वेश्म च॥
ग्रामस्तगन्तु यस्यास्ति पक्षिणा निर्म्मितं पुरा।
स एव पक्षी गृह्णाति सग्राममिति निश्चयः॥
आदौ गृहे ततो भुङ्क्ते सा नारी सुसमाहिता।
पश्चात् गृहपति र्भुङ्क्ते समृत्यज्ञातिबान्धवः॥
गृहदेवो तु तेनैव विधिना पूजयेत् पतिं॥
श्येनमयासो न देयश्च न च हव्यं समाश्रये।

---

१ नं ग्रामविति पुस्तकान्तरे पाठः।

किन्तु गुप्तं गृहेत्वार्थ्या पूजयीत पतिव्रता ॥
युगेष्वन्येषु सद्भावो दम्पत्योर्नो भवेद्यदा ।
तदा स्वकुलधर्म्मन्तु तावन्मात्रं करोति सः ॥

याश्विनयापत्युरनुज्ञां विना तु श्येनया गृह एव देवी पूजयितव्येत्यर्थः ।

इत्यादित्य पुराणोक्तं श्येनयासनविधिः ।

———000———

ईश्वर उवाच ।

अतःपरं प्रवक्ष्यामि व्रतानान्तु यथाक्रमं ।
अष्टम्यान्तु चतुर्दश्यां पक्षयोरुभयोस्तथा ॥
उपोष्य संयतो भूत्वा त्रिविधेनान्तरात्मना ।
ततोपराह्णे शुचिना विशेषात् पूजयेच्छिवं ॥
पूर्वोक्तेन विधानेन जपहोमादिमाचरेत् ।
पूजयेत्परया भक्त्या गुरुं वा साधनादिकैः ॥
ततस्तु पञ्चगव्यैश्च प्राशयेच्छुक्लकत्रयं ।
समानश्चोपसंस्पृश्य हविष्यान्नेन वर्त्तनं ॥
अनेन विधिना यश्चाप्यायज्जीवं व्रतं चरेत् ।
पिता पितामहश्चैव तथैव प्रपितामहः ॥
वसन्ति शिवलोकेषु शिवव्रतप्रभावतः ।
एतच्छिवव्रतं नाम व्रतानामुत्तमोत्तमं ॥

इति कालोत्तरोक्तं शिवव्रतं ।

———000———

मैत्रेय उवाच ।

कार्त्तिकः खलु मासो वै सर्व्वदेवमयो महान् ।
कृष्णपक्षे विशेषेण तत्र पञ्चदिनानि तु ॥
पुण्यानि तेषु यद्दत्तमक्षयं सर्व्वकामिकं ।
एकादश्यां परैर्दत्तं दीपं प्रज्वाल्य मूषिका ॥
मानुष्यं दुर्लभं प्राप्य पराङ्गतिमवाप सा ।
लुब्धकोऽपि चतुर्दश्यां पूजयित्वा जनार्दनं ॥
निर्भक्तिः परसंगत्या विष्णुलोकं जगाम सः ।
श्वपाकास्त्रियोदश्यां दीपान् दत्त्वा परैः कृतान् ।
वेश्या लीलावती भूत्वा जगाम स्वर्गमक्षयं ।
कोपः कश्चिदमावास्यां पूजां दृष्ट्वा च शार्ङ्गिणः ॥
सुहृद्दयस्त्वजापालो राजराजेश्वरोभवेत् ।
तस्माद्दीपाः प्रदातव्या रात्रावस्तमितेरवौ ॥
गृहेषु सर्व्वगोष्ठेषु चैत्येष्वायतनेषु च ।
देवागारेषु रथ्यासु श्मशानेषु सरःसु च ।
ममाभिमा शुभार्थाय यदा पञ्चदिनानि तु ॥
व्यापिनः पितरो ये च लुप्तपिण्डोदकक्रियाः ।
चतुर्दश्याममावस्यां पिण्डदस्याप्नुवन्ति ते ॥
स्वर्गतिमिति शेषः ।
तत्र श्रीः पूजनीया तु मनुष्याणां प्रयत्नतः ॥
नीराजैस्तत्रगव्यर्थ्यां क्रीडितव्यं प्रयत्नतः ।
बन्धुभिः सहितैः पश्चात् नृत्यगीतप्रजागरैः ॥

यदि हर्षं प्रयातीह तस्य संवत्सरं जयं ।
द्युते तु क्रीडिते हानौ हानिःस्याद्विजये ध्रुवं ॥
सुखप्रीतिसुलाभःस्याद्वत्सरं मनुजस्य तु ।
गौर्य्या जिता पुरा शम्भुर्नग्नो द्यूतैर्विसर्जितः ॥
तेनासौ शङ्करी दुःखी सर्व्वदोमा सुखान्विता ।
श्रिया सार्द्धं जगद्योनिः शेते विष्णुः सुखान्वितः ।
तस्यां रात्रौ जगन्मातुः पयोऽर्ब्धं सुखसुमिका(१) ॥
नन्दा सुनन्दा सुरभी सुशीला सुमना तथा ।
निर्गता मथ्यमानाब्धौ उषः कामं शुभप्रदं ॥
कामधेनोराविर्भावभावितत्वदेशात् उषः प्रशस्त इत्यर्थः ।
तत्र स्नात्वा समभ्यर्च्य धेनुं पूज्य प्रयत्नतः(२) ।
गोदानफलमाप्नोति नरो विगतकल्मषः ॥
एकादश्यामुपोष्याथ नरो दिनचतुष्टयं ।
घृतेन स्नापयेद्विष्णुं गव्येन पयसापि वा ॥
नक्ताशी गोरसैर्द्रव्यैः पूजयेन्मधुसूदनं ।
गन्धपुष्पैः सुनैवेद्यैर्वस्त्रालङ्कारकुण्डलैः ॥
शङ्खासिचक्राङ्कितबाहुविष्णोः
गदाब्जहस्तस्य तु शार्ङ्गपाणेः ।
अर्घ्यं प्रयच्छामि जनार्द्दनस्य
श्रिया युतस्यापि धराधरस्य ॥

---

(१) सुख पूजिका इति क्वचित् पाठः ।
(२) धेनूः पञ्च प्रयत्नत इति पुस्तकान्तरे पाठः ।

श्रियःपतिं श्रीधरमेव कान्तं
श्रियः सखायं हि श्रियोनुमूलं।
नामान्यहं श्रीधरश्रीनिवासं
समर्चितो मे प्रददातु कामान् ॥
एवं पूज्य विधानेन श्रियायुक्तन्तु नामभिः।
पृथक् जागरणं कुर्य्यात् श्रिया सार्द्धं जगत्पतेः ॥
या देवी भार्गवं तेजः कुलं सर्वत्र पूजिता।
आयातु सा गृहे नन्दा सुप्रीता वरदा मम ॥
याङ्गिरसं सदा देवी सुनन्दा प्रत्युपस्थिता।
आयातु मे गृहे सा तु सुप्रीता वरदा सती ॥
सुरभी या भरद्वाजं कामधेनुः सुकामदा।
सदा भजेत् गृहं सात्र ममायातु सुरार्चिता ॥
सुशीला कश्यपं या तु भजे सर्व्वत्र कामदा।
सा मे भवतु सुप्रीता कामधेनुर्गृहे सदा ॥
सुमना या वसिष्ठन्तु संप्राप्य मुमुदे शुभा।
सा मे गृहं सदायातु कामदा सुरपूजिता ॥
एवं पूज्य विधानेन प्रभाते विमले शुभे(१)।
शुक्लाम्बरधरःस्नातः शुक्लमाल्यानुलेपनः ॥
कृतनित्यक्रियो हृष्टः कुण्डलाङ्गदभूषितः।
प्रातःप्रतिपदि प्रीतः कामधेनुप्रदो भवेत् ॥

कामधेनुस्तु वह्निपुराणोक्ता विज्ञेया सा च दानखण्डे एव द्रष्टव्या ॥

---

(१) शुभमिति पुस्तकान्तरे पाठः।

वर्ष्यं हरेः सर्व्वमिदं पवित्रं
तत्रापि वर्ष्या शरदेव तासां(१)।
तस्मिञ्छुभः कार्त्तिकनाममास
स्तत्रापि पुण्यो हि बभूव दर्शः॥
यस्यां हरीदैत्यभयाद्विमुक्तो
उरस्थलं प्राप्य सुखेन शेते।
लक्ष्म्यां पुराद्यापि विनिर्म्मिता वै
कामप्रदा धेनव एव यत्र॥
वहिर्म्मुखे यत्र दिने समस्ताः
सुधेनवो भूमितले भ्रमन्ति।
स्नेहेन यस्मिन् कथयन्ति लोला
ह्यामित्त्ययस्तत्र च सत्यमेतत्॥
तस्मात्त्वमत्रैव च कामधेनुं
दद्याः समुद्दिश्य तु केशवन्तु।
विप्राय वै सर्व्वगुणाय यत्र
कृत्वा व्रतं कृत्स्नमतो हरेस्तु॥
सप्तापरान् सप्तवरानात्मानञ्चैव मानवः।
सप्तजन्मकृतात्पापात् मोचयत्यवनीपते॥
पदे पदेऽश्वमेधस्य फलं प्राप्नोति मानवः।
दानानामेव सर्व्वेषामुत्तमं परिकीर्त्तितं॥
सर्व्वकामप्रदं धन्यं पापघ्नं सर्व्वदं शुभं।

(१) वर्षं हरे सर्व्वमिदं पवित्र तत्रापि वर्ष्या शरदेव तासामिति पाठान्तर।

सर्व्वेषामेव पापानां पापानां(१) महतामपि ॥
प्रायश्चित्तमिदं शस्तं कथितं ब्रह्मणा नृप ।
ब्रह्मविट्क्षत्रशूद्राणां कर्त्तव्यञ्च व्रतं नृप ॥
सर्व्वकाम फलार्थाय कामधेनुव्रतं सतां ।
व्रतान्ते(२) तिलहोमश्च कामधेनोः प्रयत्नतः ॥

इति वह्निपुराणोक्तं कामधेनुव्रतं१ ।

———ooo@ooo———

सनत्कुमार उवाच ।

अमावास्यान्तु देवाश्च कार्त्तिके मासि केशवं ।
अभयं प्राप्य सुप्तास्तु सुखात्क्षीरोद(३) सानुषु ॥
लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्ता भुजोदरे ।
चतुर्भूजस्य हस्तान्ते ब्रह्मा सुप्तस्तु पङ्कजे ॥
अतोऽर्थं विधिवत् कार्य्या मनुष्यैः सुखसुप्तिका ।
दिवा तत्र न भोक्तव्यमृते बालातुरान् जनान् ॥
प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात् ।
दीपहक्षाश्च दातव्याः शक्त्या देवगृहेषु च ॥
चतुष्पथे श्मशानेषु नदीपर्व्वतवेश्मसु ।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गुहासु च ॥

(१) घातानामिति पाठान्तरं।
(२) इदार्द्धं न क्वचित् पाठः।
(३) चौर्य्यैरिति पाठान्तरं।

वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः ।
दीपमालापरिक्षिप्ते प्रदेशे तदनन्तरं ॥
ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षितान् ।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना ॥
स्निग्धैर्मुग्धैः विदग्धैश्च बान्धवैर्विभूतैः(१) सह ।
शङ्करस्तु पुरा द्यूतं ससर्ज्ज सुमनोहरं ॥
कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि सत्यवत् ।
जितश्च शङ्करस्तत्र जयं लेभे च पार्व्वती ॥
अतोऽर्थं शङ्करो दुःखी उमा नित्यं सुखोषिता ।
तस्माद्द्यूतं प्रवर्त्तव्यं प्रभाते तत्र मानवैः ॥
तस्मिन् भवेज्जयोयस्य(२) तस्य संवत्सरं शुभं ।
पराजये विरुद्धस्तु लब्धनाशस्ततोभवेत् ॥
श्रोतव्यं गीतवाद्यादि स्वमुलिप्तैः स्वलङ्कृतैः ।
विशेषवञ्च भोक्तव्यं प्रशस्तैर्बान्धवैः सह ॥
तस्यां निशायां कर्त्तव्यं शय्यास्थानं(३) सुशोभनं ॥
गन्धपुष्पैस्तथा वस्त्रै रत्नैर्माल्यैरलङ्कृतं ।
दीपमालापरिक्षिप्तं तथा धूपेन धूपितं ॥
दयिताभिश्च सहितैर्नेया सा च भवेन्निशा ।
नवैर्वस्त्रैश्च संपूज्य द्विजसम्बन्धिबान्धवान् ॥

इत्यादित्यपुराणोक्तं सुखसुप्तिव्रतं ।

---

(१) स्त्रिग्धैरिति पुस्तकान्तरे पाठः ।

(२) तस्मिन् द्यूते जयी यस्येति पाठान्तरं ।

(३) शय्यास्थानमिति पाठान्तरं ।

अथ कौमुदीमहोत्सवः।

पद्मपुराणे।

कार्त्तिके मास्यमावास्या तस्यां दीपप्रदीपनं।
शालायां ब्रह्मणः कुर्यात् स गच्छेत्परमं पदं॥
प्रतिपदि ब्राह्मणश्च गुडमिश्रैः सदीपकैः।
वासोभिरहतैः पूज्या गच्छेद्वै ब्रह्मणः पुरं॥
गन्धैः पुष्पैर्नवैर्वस्त्रैः सम्मानं भूषयेत्तु यः।
तस्यां प्रतिपदायां तु स गच्छेद्ब्रह्मणः पदं॥
महापुण्या तिथिरियं बलिराज्यप्रवर्त्तिनी।
ब्रह्मणस्तु प्रिया नित्यं बलेर्या परिकीर्त्तिता॥
ब्राह्मणान् भोजयेत् योऽस्यामात्मानञ्च विशेषतः।
स याति परमं स्थानं विष्णोरमिततेजसः॥
चैत्रे मासि महाबाहो पुण्या प्रतिपदा वरा।
तत्र यश्च तिलांस्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः॥
न तस्य दुरितं किञ्चिन्नाधयो व्याधयो नृप।
भवन्ति कुरुशार्दूल तस्मात् स्नानं समाचरेत्॥
दिव्यनीराजनं तद्वत् सर्व्वरोगप्रणाशनं।
गोमहिष्यादि यत्किञ्चित्तत्सार्द्धं भूषयेन्नृप॥
तैलवस्त्रादिभिः सर्व्वांस्तोरणाधस्ततो नयेत्।
ब्राह्मणानां ततो भोज्यं कुर्या कुरुकुलोद्वह॥
तिस्र एताः पुरा प्रोक्ताः तिथयः कुरुनन्दन।
कार्त्तिकाश्वयुजे मासि चैत्रे वापि तथा नृप॥

स्नानं दानं शतगुणं कार्त्तिकायां तथा नृप।
बलिराज्येषु शुभदा पांशुनाशुभनाशनी॥

वामनपुराणे।

बलिं प्रति त्रिविक्रम उवाच।

तथा यदुद्भवं पुण्यं वृत्ते शक्र महोत्सवे।
वीरप्रतिपदा नाम तव भावी महोत्सवः।
तत्र त्वां नरशार्दूल हृष्टाः पुष्टाः स्वलङ्कृताः॥
पुष्पधूपप्रदानेन अर्चयिष्यन्ति शक्रतः।
तत्रोत्सवो मुख्यतमो भविष्यति दिवानिशं॥
यथैव राज्ये भवतस्तु साम्प्रतं
तथैव भाविन्यपि कौमुदी च।

भविष्योत्तरात्।

श्रीकृष्ण उवाच।

पुरा वामनरूपेण प्रार्थयित्वा धरामिमां।
बलियज्ञे हरिः पूर्व्वं क्रान्तवान् विक्रमैस्त्रिभिः॥
इन्द्राय दत्तवान् राज्यं बलिं पातालवासिनं।
कृत्वा दैत्यपतेर्दत्तमहोरात्रत्रयं नृप॥
एकमेवार्थभागार्थं बलिराज्येति चिह्नितं।
सरहस्यं तदेतत्ते कथयामि नरोत्तम॥
कार्त्तिके कृष्णपक्षस्य पञ्चदश्यां निशागमे।
यथेष्टचेष्ट दैत्यानां राज्यस्तेषां महात्मनं॥

युधिष्ठिर उवाच।

विशेषेण हृषीकेश कौमुदीं ब्रूहि मे प्रभो।
किमर्थं दीयते दानं तस्यां का देवता भवेत् ॥
किञ्च तत्र भवेद्देय केभ्यो देयं जनार्दन।
प्रहर्षः कीदृश निर्दिष्टः क्रीड़ा कात्र प्रकीर्त्तिता ॥

श्रीकृष्ण उवाच।

कार्त्तिके कृष्णपक्षे तु चतुर्दश्यां दिनोदये।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः ॥
अपामार्गान् पल्लवान् वा भ्रामयेच्छिरसोपरि।
शीतलोष्णसमायुक्त सकण्ठकदलान्वित ॥
हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः।

ब्राह्मण मन्त्रः।

पल्लवान् चौरद्रुमाणां।
ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः।
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ॥
वैवस्वताय कालाय सर्व्वभूतक्षयाय च।
औडुम्बराय दध्नाय नीलाय परमेष्ठिने ॥
वृकोदराय चित्राय चित्रगुप्ताय वै नमः।
नरकाय प्रदातव्यो दीपः संपूज्य देवता ॥
ततः प्रदोषसमये दीपान् दद्यान्मनोरमान्।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ॥

कूटागारेषु चैत्येषु सभासु च नदीषु च ।
प्राकारोद्यानवापीषु प्रतोलीनिस्कुटेषु च ॥
सिद्धार्हद्बुद्ध चामुण्डाभैरवायतनेषु च ।
मन्दरेषु विविक्तेषु हस्तिशालासु चैव हि ॥
एवं प्रभातसमये ह्यमावास्यां नराधिप ।
स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च ॥
कृत्वा तु पार्व्वणश्राद्धन्दधिक्षीरघृतादिभिः ।
भोज्यैर्नानाविधैर्विप्रान् भोजयित्वा क्षमापयेत् ॥
ततोऽपराह्णसमये घोषयेन्नगरे नृपः ।
स्वस्वराज्यं बलेर्लोको यथेष्टं चेष्टतामिति ॥
लोकश्चापि पुरा हृष्टः सुधाधवलिताजिरे ।
पुष्पचन्दनमालाभिस्त्वार्चिते च गृहे गृहे ॥
द्यूतपानरतोद्रिक्तनरनारीमनोहरे ।
नृत्यवादित्रसन्तुष्टसंप्रज्वलितदीपके ॥
अन्योन्यप्रीतिसंहृष्टदत्ततालनके जने ।
ताम्बूलहृष्टवदने कुङ्कुमक्षोदचर्चिते ॥
दुकूलपट्टनेपथ्यस्वर्णमाणिक्यभूषणे ।
अद्भुतोद्भतशृङ्गारप्रदर्शितकुतूहले ॥
युवतीजनसङ्कीर्णे वस्त्रोज्ज्वलविहारिणि ।
दीपमालाकुले रम्ये विध्वस्तध्वान्तवभ्भने ॥
प्रदीपरहिते शस्ते दोषादिरहिते शुभे ।
यात्राविहारसञ्चारजयजीवेति वादिभिः ॥

क्षुद्रोपसर्गरहिते चौरजायाभयोद्धृते ।
मित्रस्वजनसम्बन्धिसुहृत्प्रेमाभिरञ्जिते(१) ॥
ततोऽर्द्धरात्रसमये स्वयं राजा व्रजेत्पुरं ।
अवलोकयितुं रम्यं पद्भ्यामेव शनैः शनैः ॥
महता तूर्य्यघोषेण ज्वलद्भिर्हस्तदीपकैः ।
हर्म्यशोभासु संपश्यन् चतरत्नैः स्वकैर्नरैः ॥
संदृष्ट्वा महदाश्चर्यं चिन्तयित्वात्मनः शुभं ।
बलिराज्यप्रमोदञ्च ततः स्वगृहमाव्रजेत् ॥
एवं गते निशीथे तु जने निद्रार्द्धलोचने ।
तावन्न नरनारीभिः सूर्य्यडिण्डिमचन्दनैः ॥
निष्क्राम्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाङ्गणात् ।
ततः प्रवृत्ते(२) सकले जने जातमहोत्सवे ॥
माल्यदीपकहस्ते च स्नेहनिर्भरवत्सले ।
वेश्या विलासिनी स्वार्थं स्मितमङ्गलचारिणी ॥
गृहात् गृहं व्रजन्ती च पादाभ्यङ्गप्रदायिनि ।
पिष्टकोद्वर्त्तनपरे गुरुशुश्रूषणाकुले ॥
द्विजाभिवादनपरे सुस्वरात्माद्विवादिनि ।
सुवासिनीभ्यो दाने च दीयमाने यदृच्छया ॥
राजा प्रभातसमये यथार्हं पूजयेज्जनं ।
सद्भावेनैव सन्तोष्या देवाः सत्पुरुषा द्विजाः ॥
इतरेवान्नपानेन वाक्प्रदानेन पण्डिताः ॥

---

(१) प्रभृति रञ्जिते इति पाठान्तरं।

(२) प्रसुप्ते इति पुस्तकान्तरे पाठः।

वस्त्रैस्ताम्बूलदानैश्च पुष्पकर्पूरकुङ्कुमैः ।
भक्ष्यैरुच्चावचैर्भोज्यैरन्तःपुरविलासिनी ॥
ग्रामैर्विषय(१) दानैश्च पुष्पकर्पूरकुङ्कुमैः ।
भक्ष्यैरुच्चावचैर्भोज्यै रन्तःपुरविलासिनी ॥
ग्रामैर्विषमदानैश्च सामन्तनृपतीन् धनैः ।
पदातिजनसंलग्नान् ग्रैवेयैः कण्ठकैः शुभैः ॥
सनामाङ्कैः स्वयं राजा तोषयेत् स्वजनान् पृथक् ।
यथार्हं तोषयित्वा तु ततो मल्लान् भटान् नटान् ॥
वृषभान् महिषांश्चैव युध्यमानान् परैः सह ।
गजानश्वांश्च योधांश्च पदातीन् समलंकृतान् ॥
मञ्चारूढः स्वयं पश्येन्नटनर्त्तनचारणान्(२) ।
क्रुधापयेत्त्रासयेच्च गोमहिष्यादिकं ततः ॥
वृषान् दर्पापयेद्गोभिरुक्तिप्रत्युक्तिवादितान् ।
ततोऽपराह्णसमये पूर्व्वस्यां दिशि भारत ॥
मार्गपालीं प्रबध्नीयाद्दुर्गे स्तम्भे च पादपे ।
कुशकाशमयीं दिव्यां लम्बकैर्बहुभिर्नृप ॥
दर्शयित्वा(३) गजानश्वान् सायमस्यास्तले नयेत् ।
गावो वृषाः समहिषा मण्डिता(४) घण्टिकोत्कटाः ॥

---

(१) वृषभ इति पुस्तकान्तरे पाठः ।
(२) चारणानिति पुस्तकान्तरे पाठः ।
(३) तोषयित्वेति पुस्तकान्तरे पाठः ।
(४) मण्डलैर्घण्टिकोत्कटा इति पुस्तकान्तरे पाठः ।

कृते होमे द्विजेन्द्रैश्च वध्नीयान्मार्गपालिकान् ।
दुर्गामन्त्रेण होमस्तु सर्व्वलोकसुखप्रदः ॥
घृतेनाष्टोत्तरशतं ।
नमस्कारं ततः कुर्य्यात् मन्त्रेणानेन सुव्रत ।
मार्गपालि नमस्तेऽस्तु सर्व्वलोकसुखप्रदे ॥
विषयैः पुत्रदाराद्यैः पुनरेहि व्रतस्य मे ।
राष्ट्रभोज्येन वै राजा सहस्रेण शतेन वा ॥
स्वशक्त्यापेक्षया वापि गृह्णीयात् ग्राम्यभोजनैः ।
मातुःकुलं पितृकुलं वालांश्च सह बन्धुभिः ॥
सन्तारयेत् ससकलं मार्गपालीं ददाति यः ॥

यथोत्तरे दानफलाधिक्यार्थं शतसहस्रायुतलक्षभोजनान्येतानि प्रतिज्ञया मार्गपालीं स्वीकृत्य सर्वेभ्यश्च तुष्टार्थं यो ददाति तस्येदं फलं ।

ग्रामराष्ट्रशब्दावयुतलक्षोपलक्षणौ ।
नीराजनञ्च तत्रैव कार्य्यं राष्ट्रजयप्रदं ।
मार्गपालीतले नेत्थं यान्ति गावो गजा हयाः ॥
राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः ।
मार्गपालीं समुल्लङ्घ्य नीरुजः स्युः(१) सुखान्विताः ॥
कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः ।
पूजां कृत्वा नृपः साक्षाद्भूमौ मण्डलके व्रते ॥
बलिमालिख्य दैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः ।

(१) निरुजः स्यात् सुखी सदा इति पुस्तकान्तरे पाठः ।

सर्व्वाभरणसम्पूर्णं विन्ध्यावल्या सहासिनं ।
कूष्माण्डबाणजयोरुमुरदानवसंवृतं ।
संपूर्णहृष्टवदनं किरीटोत्कटकुण्डलं ॥
द्विभुजं दैत्यराजानं कारयित्वा नृपः स्वयं ।
गृहमध्ये च शालायां विशालायां ततोऽर्च्चयेत् ॥
भ्रातृमातृजनैः सार्द्धं सन्तुष्टो बन्धुभिस्ततः ।
कमलैः कुसुमैः पुष्पैः कह्लारै रक्तकोत्पलैः ॥
गन्धपुष्पान्ननैवेद्यैरक्षतैर्गुडपूपकैः ।
मद्यमांससुरालेह्यदीपवर्य्योपहारकैः ॥
मन्त्रेणानेन राजेन्द्र समन्त्री सपुरोहितः ।
बलिराज नमस्तुभ्यं विरोचनसुत प्रभो ॥
भविष्येन्द्र सुराराते पूजेयं प्रतिगृह्यतां ।
एवं पूजां नृपः कृत्वा रात्रौ जागरणं ततः ॥
कारयेत् प्रेक्षणीयादिनटनृत्यकथानकैः ।
लोकश्चापि गृहस्यान्तः शय्यायां शुक्लतण्डुलैः ॥
संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत् ।
बलिमुद्दिश्य दीयन्ते दानानि कुरुनन्दन ॥
यानि तान्यक्षयाण्याहुर्म्मयैव संप्रदर्शितं ।
यदस्यां दीयते दानं स्वल्पं वा यदि वा बहु ॥
तदक्षयं भवेत्सर्व्वं विष्णोःप्रीतिकरं परं ।
विष्णुना वसुधा लब्धा तुष्टेन बलये पुनः ॥
उपकारकरं दत्तमसुराणां महोत्सवं ।
ततः प्रभृति राजेन्द्र प्रवृत्ता कौमुदी शुभा ॥

सर्व्वोपद्रवविद्रावा सर्व्वविघ्नविनाशनी।
लोकशोकहरी काम्या धनपुष्टिसुखावहा॥
कुशब्देन मही ज्ञेया मुद हर्षे ततो द्वयं।
धातुज्ञैर्निगमज्ञैश्च तेनैषा कौमुदी स्मृता॥
कौ मुदन्ति जना यस्मान्नानाभावैः परस्परं।
हृष्टास्तुष्टाः सुखायाः स्युस्तेनैषा कौमुदी स्मृता॥
कुमुदानि बलेर्यस्माद्दीयतेऽस्मै युधिष्ठिर।
अर्थार्थ्यैः पार्थिवैः पार्थ तेनैषा कौमुदी स्मृता॥
एवमेकमहोरात्रं वर्षं वर्षं विशाम्पते।
दत्तं दानवराजस्य आदर्शमिव भूतले॥
यः करोति नरो(१) राष्ट्रे तस्य व्याधिभयं कुतः।
कुत इति तत्र भयं नास्ति मृत्युकृतं भयं॥
सुभिक्षं क्षेममारोग्यं सस्यसम्पदमुत्तमं।
नीरुजश्च जनः सर्व्वः सर्व्वोपद्रववर्जितः॥
कौमुदीकरणाद्राजन् भवतीह महीतले।
यो यादृशेन भावेन तिष्ठत्यस्यां युधिष्ठिर॥
हर्षदैन्यादिरूपेण तस्य वर्षं प्रयाति हि।
रुदितो रोदिति(२) वर्षं हृष्टो वर्षं प्रहृष्यति॥
भुक्तो भोक्ता भवेद्वर्षं स्वस्थः स्वस्थो भविष्यति।
तस्मात् प्रहृष्टैस्तुष्टैश्च कर्त्तव्या कौमुदी नरैः॥

---

(१) नृप इति पुस्तकान्तरे पाठः।
(२) रुदितमिति पुस्तकान्तरे पाठः।

वैष्णवी दानवी चेयं तिथिः(१) पैत्री युधिष्ठिर।
दीपोत्सवेन जनित सर्व्वजनप्रमोदे
कुर्व्वन्ति ये सुमनसो बलिराजपूजां।
दानोपभोगसुखबुद्धियुताकुलानां
राजन् प्रयान्ति सकलं प्रमुदैव हर्षं॥

इति भविष्योत्तरोक्तः कौमुदीमहोत्सवः।

अथ भूतमहोत्सवः।

स्कन्दपुराणात्।

रतावसानं संप्राप्य निष्क्रान्ते पार्व्वतीपतौ।
उत्थाय शयनाद्देवी शौचंचक्रेतिशौचदा॥
ततः स्नानमन्त्यां पार्व्वत्यां वारिधारासरःप्रभा।
अभवदिति शेषः। सरो निर्झरः।
चिन्ता समभवत्तस्या न पुत्रो दुहितापि वा।
तस्याश्चिन्तयमानाया हृदयाम्बुसमुद्भवा॥
जज्ञे कमलपत्राक्षी कन्या मृगमदपङ्किता।
नीलवस्त्राभिवसना रक्तवस्त्रावगुण्ठिता।
गिरिकन्यान्तु तां कन्यां हृदयाम्बुसमुद्भवां।
उवास संपरित्यज्य मूर्ध्नि चाघ्राय पार्वती॥
भूमिपङ्काङ्कलिताङ्गी सम्भूतासि यदङ्गने।

---

(१) निथिरिति पुस्तकान्तरे पाठः।

तस्मादुदकसेवेति(१) भविष्यति महोत्सवः ॥
यस्मिन्निन्द्रमहीलोके दिनेपातमुपैष्यति ।
तस्मिन् दिने तत्र जना चाराध्यन्ते महोत्सवं ॥
यः कामो भैरवस्यासीत् भगवत्या भवस्य च ।
स महाभैरवो भूत्वा कन्यां गृह्य करे स्थितः ॥
ततोऽम्बिका भगवती पत्नी भगवतः प्रिया ।
पुमांसमब्रवीत् कस्त्वं किञ्च गृह्णासि मे सुतां ॥
ततो दंष्ट्राकरालास्यो भैरवो भैरवाकृतिः ।
उमां नोचेस्ततः प्राह विद्युन्मत्त इवाम्बुदः ॥
योभवद्भैरवः कामो भगवत्या भवस्य च ।
तत्सम्भूताविमौ चैषा भार्या मम भविष्यति ॥
दम्पती विकृताङ्गौ तौ कुवेषाच्छादनौ स्थितौ ।
वीक्षां चक्रे सोमभूषः काविमाविति शङ्कितः ॥

तावुभावपि भवो भवपाल
श्चन्द्रचिह्नितजटस्त्रिपुरारिः ।
प्राह पादपतितः स्वसमीपे
कौ युवां भवथ किञ्च करोमि ॥
अम्बिकाथ च वदतिस्म गिरीशं
सूर्य्यकोटितडिदग्निसवर्णा ।
हासपूर्णवदना वदमाना
लीलयात्र भवती चलमाना ॥

---

(१) उत्कृष्टसेवेति पुस्तकान्तरे पाठः ।

योऽभवत्तव ममेह च कामो
भैरवो भयकरस्त्रिदृगाना ।
एष ते किल पुमान् भवजातः
स्त्रीयमेव मम यो मदनाग्निः ॥

सोमलचम्ततः प्रोक्तः उमया सोमभावनः ।
गोपवेषधरो देवो दम्पतीत्यब्रवीदचः ॥
यदैव हि त्वया ध्याने ध्यातेयं स्त्री वराङ्गणा ।
तदैव मत्प्रभावेन भैरवो ह्येष तेऽभवत् ॥
नाहं त्वया विना देवि त्वं वापि न मया विना ।
अत एष मया तेऽद्य दत्तो लम्बोदरेण च ॥
उत्सवस्तेषु भविता त्वया प्रोक्तो मम प्रिये ।
पूर्व्वागमोऽस्य भविता दत्तकामं महात्मनं ॥
अतस्तदात्मको लोकः सर्व्वः सुरवरार्च्चिते ।
सञ्जाते तेन चान्योन्यं नरा नार्य्यश्च पास्यन्ति ॥
लिङ्गेषु हृदयं स्त्रीणां भगेषु हृदयं नृणां ।
भगलिङ्गाङ्कितं सर्व्वं तदिदं जगदङ्गने ॥
भगलिङ्गसमुत्क्रीणं कुर्व्वाणाः सामरा नराः ।
अन्योन्यं पातयिष्यन्ति प्रक्रीणन्तः परस्परं ॥
आरम्भेवावमाने न भविता भैरवोत्सवः ।
उदसेविकया(१) ग्रीष्म कालश्च भवितोत्सवः ॥
यत्पुरं नगरं ग्रामं भैरवोयं प्रवेक्ष्यति ।
उन्मत्तमिव तत् सर्व्वं सक्षोहहो भविष्यति ॥

---

(१) उत्सवमे विषयान्विति पाठान्तर ।

उन्मत्तवदनुन्मत्तं चातुवर्णं गिरेः सुते।
भविष्यति पुरं मत्तं भैरवागमहर्षितम्॥
यथा नियुक्ताः पित्रर्थे विशन्ते देवता द्विजान्।
एवं भैरवि माहात्म्याद्भैरवो विशते नरान्॥
ततो रासभमारूढ़ाः शकृत्कर्दमलेपनाः।
कटुका ताम्बूलवल्लीभिः कृतवेष्टनभूषणाः॥
तत् फलावद्धकुचकाः प्रकटोत्कटनिस्वनाः।
भस्मभूषितसर्व्वाङ्गा विण्मूत्रमलपङ्किलाः॥
तालतालैर्वाद्यमानैः क्रूरावद्धवचोन्वितैः।
अवद्धमसंवद्धं पूर्व्वापरानन्वितं यद्वच इत्यर्थः।
सूच्यमाने(१) वरारोहे भैरवो भार्य्यया सह॥
प्रवेक्ष्यति पुरं क्षिप उत्सवं जनयन्नृणां।
प्रविष्टे भैरवे भीरु पुरुहूतार्च्चितं पुरं॥
जनस्य रोचको घोरो भविष्यति तदोत्सवः।
रोचकः प्रियः। घोरः उत्कटः।
येषां वयोगतं भीरु जरयाचैव जर्ज्जराः।
तेऽपि वत्सकवत्सर्वे करिष्यन्त्युत्सवं नराः॥
नानाभूषणसृष्टाङ्गाः कुङ्कुमागुरुभूषिताः।
पीतैरनेकैर्व्वस्त्रैश्च वासोभिः परिवेष्टिताः॥
कर्णपूरैः समाल्यैश्च सदामालाः सचूड़िनः।
सदामालाः सस्रजः सचूड़िनः सबाहुभूषणाः।
तद्वत्पुष्पैश्चम्पकाद्यैः रूषितु गिरीरुहाः।

सू्च्यमाने इति पुस्तकान्तरे पाठ।

आस्फोटयन्तो गात्राणि श्रावयन्ति प्रियाणि च ॥
रथ्यासु राजमार्गेषु श्रावयन्तो यतस्ततः।
कुलपुत्राः कुलस्त्रीणामनङ्गप्रकृतानि च ॥
व्यङ्गानि यानि गुह्यानि कुलाङ्गनाकृतानि च ॥
तेषां च सर्वसन्देहं दर्शयन्तः पदे पदे ॥
गायन्तश्च प्रनृत्यन्तः कुर्व्वन्तश्चिन्तितानि च।
पूर्व्वं सलज्जा भूत्वा च निर्लज्जत्व मुपागताः।
लज्जनीयेष्वपि गुरूनाक्रोशन्तः परानपि(१) ॥
उद्दामरुचयो मर्त्याः करिष्यन्ति यथा मनः।
न मातुर्लज्जते पुत्रो न पुत्रस्य तथा रमणी ॥
पितुर्न पुत्रः पुत्रस्य न पिता न पितामहः।
न मातुलस्य स्वस्रीयः स्वस्रीयस्य न मातुलः ॥
मुहूर्त्तेनैव स्वजने निर्लज्जत्वमुपागते।
अन्योन्यरूक्षवचनैस्तर्ज्जयिष्यन्ति मूढवत् ॥
व्रह्मरूक्षा(२) वचो रूक्षा श्वेताङ्गा मृदयापि च।
भक्तिच्छेदविलिप्ताङ्गायाश्चाङ्गायारुचेष्टिताः ॥
सारमेयानुदहन्त आरूढा गर्द्दभीषु च।
दाड़िम्ववेषा गोपवेषा वहुवेषाविशः परे ॥
राजवेषाश्ववेषाश्च तरुणा ब्रह्मरूपिणः।
नापितानाश्च वेषेण नयतामपि चापरे ॥
पलाण्डुं सीधुवर्षञ्च स्वगन्धमुग्धिग्धितं भृशं।

---

(१) मात्रीयमात्मपरस्परमिति क्वचित्पाठः।
(२) भस्मरूक्षेति पुस्तकान्तरे पाठः।

धूपं सञ्चारयिष्यन्ति प्राणवैराग्यकारकं ॥
जलेचरमलस्राव्ये नरा नृणामजानतां।
नासिकायां प्रदास्यन्ति दुर्गन्धमशुभैः समं ॥
अन्येषु पुरुषा देवि देववेशविभूषिताः।
काव्यानि श्रावयन्तो हि ते हृष्यन्ति यथा नराः।
अस्रानां क्रोशते तत्र यथा नाक्रोशते परं।
विभ्यति तस्य पितरो व्रह्मन्ते तु यथा तथा ॥
राजानो हि यथास्रानां कुञ्जराणां यथा नराः।
हिताय जायते तद्वत् नराणां मुदसेचिका ॥
न तस्य देव अश्नाति हविः पितर एव च।
मध्यस्य भावं कुरुते उदसेविकया हि यः ॥
नत्वन्तुष्यति नैवाहन्तस्य तुष्यामि पार्व्वति।
विरमेव महाशोका पुत्रालाभे त्वया कृते ॥
उदसेविकमात्रेवं भवती भैरवागमे।
अतुला हर्षसम्पत्तिः पश्यादेति यथा तव ॥
न भ्राजते यथाचेदं तच्छोकाद्भवनं तव।
उदसेविकया हीनं यथा तद्भविता पुरं ॥
नरानार्थेय गिरिजे भस्मना कर्द्दमेन च।
निःप्रभाणि करिष्यन्ति गृहाण्यायतनानि च ॥
चौरैरुद्वासितमिव पुरं देवि भविष्यति।
मृत्पिण्डभस्मविण्मूत्रैर्नरैः प्रेतैरिवाहृतं।
भैरवोयं मतइति घोषयन्तस्ततो नराः ॥
तृणैश्छन्नतरस्तत्र संवेश्यान्नरमंहृतं।

इति वाचा प्रकुर्वाणा भैरवोयं जहाति नः॥
निर्हरिष्यन्ति तं मर्त्त्या मृतं गुप्तमृतं प्रियं।
तड़ागकूले तं न्यस्य सरित्कूले तथापि वा॥
स्नानाविर्मुक्तकलुषा प्रयास्यन्ति ततो गृहं।
संसाध्यं भैरवस्नाता उत्सवोत्कूलवेदिता:॥
सुनिव्रता इव नरा भविष्यन्ति प्रियायुताः।
यथैव ते पार्व्वति भैरवागमे
नराः सलज्जा मुहुरेव लज्जिताः।
तथैव सम्भावितभैरवाः पुनः
बभूवुरेकान्ततपोधनावृताः॥
इमन्तु यः सुन्दरि भैरवोत्सवं
पठेद्धि विप्रो द्विजदेवसंसदि।
पुत्रप्रपौत्रः समये च वर्द्धते
महागणेशत्वमवाप्नुयात् क्षमं॥

इति भविष्योत्तरात्।

युधिष्ठिर उवाच।

भूतमातेति संहृष्टो ग्रामे ग्रामे पुरे पुरे।
गायन् नृत्यन् हसन् लोकः सर्व्वतः परिधावति॥
उन्मत्तवत् प्रलपति क्षितौ पतति मत्तवत्।
क्रुद्धवद्धावतितरां मृतवत् क्रन्दते(१)बहिः॥
मुखाङ्गभङ्गं कुरुते लोकोवायुगृहीतवत्।

(१) कम्पते इति पुस्तकान्तरे पाठः।

भूतवद्भस्मभूषन्तु कर्द्दमानवगाहते ॥
किमेषशास्त्रनिर्दिष्टो मार्गः किमुत लौकिकः।
मुह्यति मे मनः कृष्ण त्वमेव वक्तुमर्हसि ॥

श्रीकृष्ण उवाच।

शृणु पार्थ प्रवक्ष्यामि यत्ते किञ्चिन्मनोगतं।
आस्तिकः श्रद्दधानश्च भवानीति मतिर्मम ॥
पार्व्वत्या सहितः पूर्व्वं मन्दरे चारुकन्दरे।
क्रीड़न्नास्ते मुदायुक्तो दिव्यक्रीड़नकैर्हरः ॥
पीनोन्नतनितम्बेन कुम्भभ्राजत्कुचद्वयां।
शीतांशुवदनां हृष्टां दृष्ट्वा गौरीं जगद्गुरुः ॥
दग्धकामतरोः कन्दकदलीमिव विस्तृतां ॥
कामयामास मुदितो महार्हशयने शिवः।
रममाणे महाकान्तं दिव्यंवर्षशतं यदा ॥
तदा देवी समुत्थाय निरोधान्निर्गता वहिः।
सुतोत्सर्गात्समुत्तस्थौ नारी निर्द्दारितोदरात् ॥
कृष्णा करालवदना पिङ्गाक्षी रक्तमूर्द्धजा।
कपालमालाभरणा वद्धमुण्डावपीड़का ॥
खट्टाङ्गकङ्कालधरा मुद्राङ्कितकरा शिवा।
द्वीपिचर्म्माम्बरधरा रणत्किङ्किणीमेखला ॥
डमरुमरुकाराच फेत्काराप्रूरिताम्बरा।
तस्यास्तु पार्श्व गायान्या(१)गीतवाद्यलयानुगाः ॥

(१) पार्श्वे या चान्येति पुस्तकान्तरे पाठः।

उत्तालतालमतुलं नृत्यन्ति च हसन्ति च ।
कपालखट्वाङ्गधरा गजचर्म्मावगुण्ठिता ॥
तथैव गङ्गराज्जातस्तद्रूपाभरणः पुमान् ।
अनुगम्यमानो बहुभिर्भूतैरतिभयङ्करैः ॥
सिंहशार्दूलवदनै रदनोल्लिखिताम्बरैः ।
एकीभूतौ क्षणेनैव तौ भवानीभवोद्भवौ ॥
दृष्ट्वा हृष्टमना देवः प्राह देवीं सविस्मितां ।
कल्याणि पश्य पश्यैतौ मत्त्वदङ्गसमुद्भवौ ॥
बीभत्साद्भुतशृङ्गारभयानकविदारिणौ ।
भ्रातृभाण्डौ यथा देवि तद्वदेतौ मतौ मम ॥
नानयोरन्तरं किञ्चित् सादृश्यात् प्रतिभासते ।
भ्रातृभाण्डा भूतमाता तथैवोदकसेविका ॥
संज्ञात्रयं तयोः कृत्वा ततः प्रादाद्वरं हरः ।
भग्नार्थावागताश्चैनां जगत्तलतले स्थितां ॥
सेवयिष्यन्ति ये भक्त्या जलसम्पूर्णगण्डुकैः ।
चन्दनेन समालभ्य पुष्पधूपैरथार्चयेत् ॥
भोजयेत् क्षिप्रं संयाव कृशरापूपपायसैः ।
य एवं कुरुते देवि पुरुषो भक्तिभावितः ॥
स पुत्रपशुवृद्धिञ्च शरीरारोग्यमाप्नुयात् ।
न शाकिन्यो गृहे तस्य न पिशाचा न राक्षसाः ॥
क्रीडां कुर्वन्ति शिशवो यान्ति वृद्धिं निरामयाः ।

युधिष्ठिर उवाच ।

कदा पूजा प्रकर्त्तव्या भूतमातुः सुखार्थिभिः ।

पुरुषैः पुरुषव्याघ्र एतन्मे वक्तुमर्हसि॥

श्रीकृष्ण उवाच।

सर्वदैषा भगवती बालानां हितकारिणी॥
नामभेदैः क्रियाभेदैः कालभेदैश्च पूज्यते।
प्रतिपत्प्रभृति ज्येष्ठे यावत्पञ्चदशी तिथिः॥

पौर्णमास्यान्तमासाभिप्रायेण ज्येष्ठइत्युक्तिः।

तावत् पूजा प्रकर्त्तव्या प्रेरणैः प्रेक्षणीयकैः॥
विकर्म्मफलनिर्द्देशः पाषण्डानां विडम्बनं।
प्रदर्श्यते हास्यपरैर्नरैरङ्गतचेष्टितैः॥
विश्वस्य धनलोभेन स्वाध्यायो नियतः पथि।
आरोप्यमाणं शूलाग्रे ते न पश्यन्ति पश्यतः॥
दृष्टो भवद्भिः संहृष्टः परदारावमर्षकः।
छिन्नास्य हस्तौ चिप्तोऽयं विभुना पुष्करोदके॥
शीर्णः सूर्य्यातपत्रेण बालातालानुमोदितः।
शुक्लसिंहासनारूढ़ः सुकृती यात्यसौ सुखं॥ ७०
हे जनाः किन्न पश्यध्वं स्वमिन्द्रत्वं करे परं।
करपत्रैर्द्दीर्य्यमानमुच्छलच्छोणितच्छटं॥
चौरः किलासौ संप्राप्तः सर्व्वोद्वेगाकरः परं।
दण्डप्रहाराभिहतो नीयते दण्डपाशकैः॥
प्रेक्षकैर्वेष्टितस्तेनो रटद्भिर्यमडिण्डिमैः।
संयम्य नीयते हन्तुं मुखमभ्यवलेक्षण।
शितकेशं शितश्मश्रुं सिताम्बरधरं द्विजं॥
विटवेश्याचपेटाभिर्हन्यमानञ्च पश्यतः।

गृहाभिष्क्रम्यतां रक्षा हरिं नीत्वा यथोदरं ॥
कस्मादसौ च कुरुते मूढो भरणपोषणं।
भैरवाभैरवानेतान् बालान् बालोपजीविनः॥
प्रहसताण्डवपदा व्यसध्वं घृतदीपकान्।
निर्वेदः कोऽस्य हृदये चेतश्लोधनकारिणः॥
गृहीतं यद्दनेनापि बालेनापि महाव्रतं।
रक्तोदककाककण्णाङ्गं स चरन् किमपश्यति॥
तरुकोटरान्तर्गतां विचित्रां शुकसारिकां।
बहुभिः कोष्ठकीकृत्य शरीवैः सबलीकृतां॥
विमुक्तशिखाङ्कुरार सुप्रहारनिरीक्षितां।
इमां कृष्णार्धवदनां गृहीतासि दुहितृका॥
विमुक्तकेशां नृत्यन्तीं पश्यध्वं योगिनीमिव।
गम्भीर्यतूर्यध्वनिना प्रहृष्टोद्धततापडवा॥
उन्मत्तवेषाभरणा भाव्येषा डिण्डिमण्डली।
कटीतटस्थपिटका कालकम्बलधारिणी॥
चारटस्थटतेडोम्वी तस्मो सूर्यपहान् गृहं।
इत्येवमेभिर्बहुभिः प्रेक्षणैः प्रेक्षणीयकैः॥
प्रेरयेत्तान् अहातीथ्यं पुषभ्याद्दसुन्दरं।
एकादश्यां नवम्यां वा दीपमान्याव कुण्डके॥
रथिभिर्बहुभिर्गुप्तं तूर्यध्वनिपुरःसरं।
नयेत् प्रदोषसमये यत्र देवी जनैर्वृता॥
वीरचर्यासु कथिता दीपः सर्वार्थसाधकः।
एवं निष्क्रामयेद्दीपं यावत्स्यादष्टमी तिथिः॥

पञ्चदश्यां प्रकुर्वीत भूतमातुर्महोत्सवं।
स्नापयेत् पूजयेद्द्यान्नैवेद्यं पललोदनं॥
प्रणम्य स्वजनैः सार्द्धं क्षमयित्वा गृहं व्रजेत्।
य एवं कुरुते पार्थ वर्षे वर्षे महोत्सवं॥
तस्य संवत्सरं यावत् गृहे विघ्नं न जायते।

ये मानयन्ति जनहासकरैर्विलासै
राखेचयेदभयदां भुवि भूतधात्रीं।
ते भ्रातृभृत्यसुतबन्धुजनैः सहाब्दं
सर्व्वोपसर्गरहिताः सुखिनो भवन्ति॥

इति भूतमातृत्सवः।

——oo(D)oo——

पृथिव्युवाच।

पितृमातृपतिभ्रातृपुत्रशोकविवर्जिता।
व्रतेन येन भवति नारी तद्वद केशव॥

वराह उवाच।

दक्षः प्रजापतिः पूर्व्वं तस्य कन्याभवत्सती।
महादेवाय सा दत्ता धर्म्मपत्नी शुभव्रता॥
दक्षेण यज्ञः प्रारब्धो देवाः सर्व्वे निमन्त्रिताः।
अर्च्चिताश्च यथान्यायं शङ्करो न निमन्त्रितः॥
तेनापमानिता देवी देहत्यक्ताभवत् पुनः।
हिमवत्पर्वतसुता जाता जाति स्मृता धरे।
सग् नर्मेरुधरा तत्र वत्समानाष्टवार्षिकी।

वार्य्यमाणा पितृ-भ्रातृ-मातृभिस्तपसे गता ॥
उग्रं तपः समास्थाय सखीभिः सहिताचले ।
याते वर्षे सहस्रन्तु शुष्कपर्णमभुङ्क्त सा ॥
अन्यवर्षसहस्रन्तु जलपानेन सा स्थिता ।
तृतीयञ्च पुनस्तद्वदाहाराभावतो महत् ॥
एवं वर्षसहस्राणि दश तप्तं तया तपः ।
तथापि च न तुष्टोऽसौ देवेशो वृषशूलधृक् ॥
तथा खिन्नापरा दीना क्षामासावनिशन्ततः ।
पुनरग्निप्रवेशाय मतिं चक्रे त्वरान्विता ॥
ततः काली समुत्थाय कृत्वा पूर्व्वाह्निकीं क्रियां ।
कथा ह्यनेकाश्च ततः सहसा चावदत् चिते ॥
सखीभिर्भक्तियुक्ताभिर्वेष्टिता स्थानकाङ्क्षिणी ।
देवर्षिर्नारदः प्राप्तो लोकालोकविचारणः ॥
हिमवद्दुहिता गौरी शिवाराधनतत्परा ।
भर्त्तारं देवमिच्छन्ती तथा वर्षगणान् बहून् ॥
देवो न तुष्यति यदा निर्विण्णेयं तदामुने ।
अग्निं प्रवेष्टुमुद्युक्तेत्याह गौर्य्याः सखी मुनिं ॥
तस्या वाक्यमिदं श्रुत्वा नारदः करुणान्वितः ।
तत्समीपे ततोगम्य वाक्यमाह वसुन्धरे ॥

नारद उवाच ।

हिमवद्दुहिता कामं नाग्निं प्रविश शोभने ।
हरस्तुष्यति येनेह कर्म्मणा तत् शृणुष्व मे ।
व्रतं सङ्घाटनं नाम तत् कुरुष्वाचलात्मजे ॥

व्रतं सङ्घाटकं कृत्वा ततः प्राप्स्यसि तं पतिं।

देव्युवाच।

तद्व्रतं मे कृपां कृत्वा कथयस्व मुने मम।
प्राप्स्येऽहं तेन चीर्णा वै भर्त्तारं तं महेश्वरं॥

नारद उवाच।

शृणुष्वैकमना भद्रे सङ्घाटकमिदं व्रतं।
कथयामि महापूर्वं ब्रह्मणा कथितं मम॥
मासस्य कार्त्तिकस्यापि शुक्लप्रतिपदि व्रतं।
गृहीयादेकभक्तन्तु कृत्वा दन्तादिशोधनं।
सायं सङ्कल्प मादाय द्वितीयायामुपावसेत्॥
तृतीयायामपि तथा चतुर्थ्यां पारणं भवेत्।
शिवं संपूजयेद्भक्त्या उपवासद्वयेऽपि च॥
यत्र विनोपचारेण(१) रात्रौ दद्यात्ततो भुवि।
स्वपेत् प्रातः समुत्थाय स्नात्वा देवं समर्चयेत्॥
दम्भेन विना वरं पत्रं दध्यान्नं ददते न रक्तं।
भोजयेद्ब्राह्मणान् सप्त शक्तितो वापि भोजयेत्॥
तेभ्योपि दक्षिणां दत्त्वा नमस्कृत्य विसर्जयेत्।
पश्चाच्च पारणं कार्य्यं सप्तसंघाटके विधिः॥
उपोष्य तु ततः सप्तमासैः सार्द्धं त्रिभिः शुभैः।
उद्यापनं ततः कार्य्यं सङ्घाटे सप्तमे ततः॥

---

(१) भक्तविनोपचारेणेति पुस्तकान्तरे पाठः।

एतच्च व्रतं शुक्लपक्षेऽपि कर्त्तव्यं(१)। एवं पक्षद्वये कुर्व्वन् ततः सार्द्धैस्त्रिभिर्मासैः सप्तसप्ताटका भवन्ति ।

विधिवद्ब्रह्मपुत्त्रस्य(२) तदिहैकमनाः शृणु ।
स्त्रीपुंसौ काञ्चनौ कार्य्यौ शक्तितो भक्तिपूर्व्वकं ॥
सर्व्वाभरणशोभाढ्यौ मञ्चकस्योपरि स्थितौ ।
पञ्चामृतेन संस्नाप्य ततो गन्धोदकेन तु ॥
सर्व्वौषधिजलेनापि कुङ्कुमेन समालभेत् ।
कौसुम्भवस्त्रसंछन्नैर्नानापुष्पस्रगन्वितैः ॥
मञ्चकोपरि विन्यस्य रात्रौ जागरमारभेत् ।
गीतवाद्यादिनृत्यैस्तु जागरं कारयेन्निशि ॥
महामाङ्गल्यनिर्घोषैर्मृदङ्गपटहादिकैः ।
निर्व्वर्त्य जागरं रात्रौ प्रभाते समुपस्थिते ।
विप्रानिमन्त्र्य भक्त्या तु शक्तितो भोजनं ततः ॥
तेभ्योऽपि दक्षिणां दद्यात् स्त्रीपुंसौ मञ्चके स्थितौ ।
सर्व्वोपस्करणैः सर्व्वमुपदिष्टं निवेदयेत् ॥
भार्य्यया सहितायैव वस्त्राद्यैः पूजिताय च ।
निवेदयेत् स्वयं सर्व्वं ततो विप्रं क्षमापयेत् ॥
पूजामन्त्रैः प्रकर्त्तव्या त्रिभिर्भक्तिसमन्वितैः ।
त्रिभिर्होमस्तथा कार्य्यो व्रतमेवं समाप्यते ॥

ॐ शम्भवाय नमः । उमया भवाय नम.(३) । ॐ शङ्कराय नमः ।

---

(१) एतच्च व्रतं शुक्लपक्षे समारभ्य कृष्णपक्षेऽपि कर्त्तव्यमिति पुस्तकान्तरे पाठः ।

(२) विधिवद्ब्रह्मपुत्त्रस्येति पुस्तकान्तरे पाठः ।

(३) भवाभवायनमः न पुस्तकान्तरे पाठः ।

इति पूजामन्त्र:।

ॐ मयस्कराय नम: स्वाहा। ॐ शिवाय नम: स्वाहा ॐ शिवतराय स्वाहा।

इति होममन्त्रा:।

भार्य्यया सहितं विप्रं भोजयित्वा समापयेत्।
समर्पयित्वा तत्सर्व्वं नमस्कृत्य विसर्ज्जयेत्॥
समाप्यैवं व्रतं नारी सम्यं प्राप्नोति यत्फलं।
तत् शृणुष्व महाभागे कथयामि सुनिश्चितं॥
यावत् कल्पशतं नारी भवेज्जन्मनि जन्मनि।
पतिपुत्रवियोगोत्थशोकदु:खविवर्ज्जितं॥
तस्मिन् कुले न जायेत जन्मान्तरशतेष्वपि।
धनधान्यसमापूर्णं तत्कुलं जायते ध्रुवं॥
रूपसौभाग्यसंयुक्तं सुख सम्पन्नमायुतं(१)।
माहात्म्येन व्रतस्यास्य भवेज्जन्मनि जन्मनि॥
पठनाममं व्रतं नारी नरो वा शृणुयाद्यदि।
सर्व्वदु:खविनिर्म्मुक्त: स्वर्गलोके महीयते॥

वराह उवाच।

नारद: कथयित्वा तु व्रतं सम्यग्विधानत:।
गतो अविघ्नया गत्वा देवी व्रतपराभवत्॥
षट्‌ाटव्रतमाहात्म्यात्सोभ्रं लब्धा पतिं शिवं।
सञ्जाता सुखिनी गौरी स्त्री तथान्यापि जायते॥

(१) सर्व्वं दु:ख विवर्ज्जितं इति पाठान्तरं।

एतत् श्रुत्वा धरित्रि त्वं व्रतमेतत् कुरु प्रिये।
यथाभिलषितं सर्व्वं प्राप्स्यसे नात्र संशयः॥

इति वराहपुराणोक्तं सङ्घाटकव्रतं।

———000———

पौर्णमास्याममावास्यामेकभक्तं समाचरेत्।
तत्रैकभक्तं कुर्व्वाणो नरकं नोपसर्पति॥
तत्र पुण्याहवाद्येन जयशब्दादिमङ्गलैः।
हरिश्चैवार्च्चयेद्यत्नात् स्नाप्य सौवर्णपङ्कजैः॥
ततस्तु पात्रमादाय गीतवेदादिनिस्वनैः(१)।
कुर्य्यात् प्रदक्षिणं तस्मै विष्णवे प्रभविष्णवे॥
ततश्च मन्त्र विधिवत् पूजयेत्तं विशेषतः।
एकं प्रियन्तु(२) सम्भोज्य प्रणम्य च क्षमापयेत्॥
एकं विप्राय संमन्त्र्य संपूज्य तत् प्रदक्षिणं।
घृतदुग्धमयपात्रं सम्भोज्य च क्षमापयेत्॥
ब्राह्मणान् परमान् भोज्य दक्षिणाभिश्च दर्पयेत्।
व्रतिनश्चान्नदानेन वस्त्राद्येन च तर्पयेत्॥
ये तु दीनान्धकृपणा अनिवार्य्यो दिनं व्रजेत्(३)।

इति नरसिंहपुराणोक्तं हरिव्रतं।

——0——

(१) वाद्यमङ्गलैः इत्यपि पुस्तकान्तरे पाठः।
(२) एकं विप्रमिति पुस्तकान्तरे पाठः।
(३) अनिवार्य्यो दिनं व्रजेदिति पुस्तकान्तरे पाठ।

अनिलाद उवाच।

नरसिंहमथो रौप्यं कृत्वा देवं चतुर्भुजं।
ताम्रपात्रे प्रतिष्ठाप्य वज्रदंष्ट्रं प्रकल्पयेत्॥
बाहुभ्यां पद्मरागौ तु नखानां विद्रुमास्तथा।
पुष्परागौ स्तनोद्देशे कर्णयोर्नीलकावुभौ॥
राजावर्त्तमयं कृत्वा(१) नीलवैदुर्य्यमस्तकं।
कृत्वा रूपमिदं रम्यं तत्पात्रे मधुना युते।
पूरयेद्वारिमिश्रेण पूरितन्तु पुनर्द्ददेत्॥

इदं रूपं तत्पात्रे मधुयुक्तेन कृत्वा संस्थाप्य वारिमिश्रेण मधुना पात्र पूरयेत्। पुनरन्यत्पात्रं मधुवारिपूर्णं तदुपरि दद्यात्।

वस्त्रयुग्मे नवाच्छन्नमासने विनिवेशयेत्।
गन्धपुष्पैस्तथाधूपैः पूजनञ्चास्य कल्पयेत्॥
नैवेद्यं कल्पयेद्भव्यं भक्ष्यैर्नानाविधैर्बुधः।
वितानोपरि संयुक्तं पुष्पदामभिरर्चयेत्॥
कार्त्तिक्यां वाथ वैशाख्यामाश्रित्य द्वादशीमथ।
कृत्वा निवेदयेत् सम्यक् यतस्तत्पदमश्नुते॥

द्वादशीमाश्रित्य तदादिदिनचतुष्टयं हस्तिक्रीडा यतस्तमुत्सवं कृत्वा कार्त्तिक्यां वैशाख्यां वा दानं कर्त्तव्यं।

परस्ये वाथ संग्रामे दस्युसंघसमाकुले।
नभयं जायते तस्य सकृत्पविदमाचरेत्॥
नविघ्नस्यापदो घोरा धनमायुः प्रयच्छति।

(१) मध्ये राजावर्त्तो कृत्वा इति पुस्तकान्तरे पाठः।

सन्ततिश्चैव रूपञ्च सौभाग्यं च मनोरमं ॥
एतत्ते कथितं सम्यक् हरेः क्रीडायनं महत् ।
तत्स्थानप्रापकश्चैव धर्म्मास्संक्षेपतः क्रियाः ॥
श्रुत्वा यातिपदं पुण्यं सर्व्वपापैः प्रमुच्यते ।
धनमायुर्व्विवर्द्धेत श्रावकस्य विशेषतः ॥
श्रावणे दक्षिणां दद्याच्छक्त्यायुग्मं विभूषयेत् ।
श्रोतव्यन्तेन वर्षासु पुराणश्चापरेऽहनि ॥

इति नरसिंहपुराणोक्तं हरिक्रीडायनं ।

———o§o———

यजिष्णुः पञ्चमीं षष्ठीं यमान् यो भोजयेद्द्विजान् ।
अष्टमीमथ कौन्तेय शुक्लपक्षे चतुर्द्दशीं ॥
उपोष्य व्याधिरहितो रूपवानिति जायते ।

इति महाभारतोक्तं यमव्रतं ।

———ooo———

अनिलाद उवाच ।

महाव्रतमहोवक्ष्ये येनारोहति तत्पदं ।
सुरासुर मुनीनाञ्च दुर्लभं विधिना शृणु ॥
पर्वश्चाश्वयुजस्यान्ते पायसञ्च घृतप्लुतं ।
नक्तं भुञ्जीत धर्म्मात्मा चन्दनञ्चैवचान्वितं ॥
आश्वयुजस्यान्ते . कार्त्तिके । पर्वणि अमावस्यायां कार्त्ति-
कस्य इत्यर्थः । ऐन्द्रवदुत्तरः ।
आचम्याथ शुचिर्भूत्वा विस्तजं दन्तधावनं ।

भुक्ता चैतन्महादेवं नत्वा भक्तियुतो व्रती ॥
अहं देव व्रतमिदं कर्त्तुमिच्छामि शाश्वतं।
तवाज्ञया महादेव तन्निर्व्विहनं कुरु ॥
उक्तमिन्नियमं गृह्णन् वर्षाण्येव तु षोडश।
तिथिः प्रतिपदायास्तु पारयिष्याम्यनुत्तमं ॥
ततो मार्गशिरे मासि प्रतिपद्यपरेऽहनि।
उपवासेन गुरुं दृष्ट्वा महादेवं स्मरन् मुहुः ॥
महादेवरतान्विप्रान् भस्मसंच्छन्नविग्रहान्।
षोडशाष्टौ तदर्द्धं वा दम्पत्यश्च निमन्त्रयेत् ॥
देवस्य भक्तमासाद्य दीपान् प्राज्वाल्य षोडश।
पशुनाथं महादेवं भक्त्या नत्वा निवेदयेत् ॥
आमन्त्र्य च गृहं गत्वा महादेवं स्मरन् व्रती।
शुचिवस्त्रास्तृतायान्तु निराहारो निशि स्वपेत् ॥
अथोदये सहस्रांशोः स्नात्वाथादाय दीपकान्।
नैवेद्यं स्नपनाद्यं वा समगच्छेत् शङ्करालयं ॥
गत्वा वितानकं तत्र वस्त्रयुग्मस्य घण्टिकां।
धूपोत्क्षेपं पताकाश्च दत्त्वा स्नानन्तु कारयेत् ॥
एवमभ्यर्च्य देवेशं कथावैकजभक्तयेव्रतं।
स्नापयेत् पञ्चगव्येन घृतेन तदनन्तरं ॥
मधुना च तथा दध्ना भूयश्च पयसा तथा।
रसेन वाथ खण्डेन फलैश्च स्नापयेत् पुनः(१) ॥
तिलाम्बुना ततः स्नाप्य पश्चादुष्णेन वारिणा।

---

१ उपायेतपुनरिति पुस्तकान्तरे पाठः।

लेपयेत् सुघनं पश्चात् कर्पूरागुरुचन्दनैः ॥
एवं संपूज्य तं भक्त्या हैम न्यस्य प्रकोष्ठं ।
हैम न्यस्य भुजोपरि सुवर्णपुष्पं निधाय ॥
नानावर्णफलैश्चैव दद्यान्नैवेद्यमेव हि ।
गृहं गत्वा यथान्यायं हिरण्यरेतसम्विभुं ॥
जातवेदसमाधाय तर्पयेत्तिलसर्पिषा ।
प्रतिनच तथाचार्य्यं मिथुनानि च भोजयेत् ॥
हेमवस्त्रादिदानेन यथाशक्त्या तु दक्षयेत् ।
एवं विसृज्य तान् सर्व्वान् सार्द्धं बन्धुजनैः स्वयं ॥
पीत्वादौ पञ्चगव्यञ्च हृष्टो भुञ्जीत वाग्यतः ।
यत्किञ्चिदेतदुच्छिष्टं महादेवमुदीरयेत् ॥
तमुद्दिश्य च तत्सर्व्वं कर्त्तव्यं श्रेय इच्छता ।
प्रारम्भे तु विधिं कुर्य्यद्दरिद्रोऽप्यथवेश्वरः ॥
वित्तसामर्थ्यतश्चैव प्रतिमासञ्च तत्क्रमः ।
स्वल्पवित्तोऽथ वा कश्चित् पुष्यादौ कार्त्तिकावधौ ॥
स्नात्वा तत्त्वमावास्यां प्रागुक्तविधिना ततः ।
प्रतिपदामुपोष्यैवं पञ्चगव्यं पिबेच्छुचिः ॥
महादेवं स्मरन् सार्द्धं भक्त्या भुञ्जीत निक्रिभिः ।
मासस्य कार्त्तिकस्यान्ते कृत्स्नं प्राग्विधिमाचरेत् ॥
प्रतिपदा द्वितीयाच उभे तिथी उपोषयेत् ।
एवं पौषे तु संप्राप्ते प्रतिपत्क्रममाचरेत् ॥
द्वितीयेऽब्दे द्वितीयायामुपवसेत् कार्त्तिकावधौ ।
चाद्रवीत तिथिश्चैका मार्गमासे तथापरा ॥

पूर्व्ववत्सन्त्यजेत्पौषे प्रत्यब्दमेवमाचरेत्।

अस्य श्लोकस्य फलितार्थः।

अमावस्यायां नक्तं प्रतिपद्युपवास इति प्रथमवर्षं प्रथमस्या-ममावास्यायां नक्तं प्रतिपदि द्वितीयायामुपवासः शेषेषु प्रतिपदि न-क्तं द्वितीयायामुपवास इति द्वितीयं प्रथमे मासि प्रतिदि नक्तं द्वितीयातृतीययोरुपवासः शेषेषु द्वितीयायां नक्तं तृतीयायामुप-वास इति तृतीयं। एवं शेषेषु वर्षेषु कृत्वैवं षोडशवर्षं पौर्ण-मास्याः कार्त्तिक्याः समुद्यमे उदयकाले।

पूर्व्ववद्देवमभ्यर्च्च क्रमात्तु' धवितर्प्ययेत्।

ध्वजि भक्षिप।

महादेवाय गान्दद्याद्दौचिताय द्विजाय च॥

हेमशृङ्गीं सवत्साञ्च सघण्टां कांस्यदोहनां।

शिवव्रत धरान् विप्रान् सहाचार्य्यांश्च षोडश॥

सम्भोज्य हेमवस्त्राद्यैर्यथाशक्ति तु दक्षयेत्।

छत्रोपानद्दकुम्भांश्च दद्यात्तेभ्यः पृथक् पृथक्॥

भोजयेत्ताम्विसृष्टैव मिथुनानि तु षोडश।

विसृष्टा विसृज्य।

ब्राह्मणांश्च यथा शक्त्या भोजयेत् वेदपारगान्।

अन्येषां च क्षुधार्त्तानां दद्यादन्नञ्चतद्दिने॥

एवं महाव्रतञ्चैतत्कुर्य्याद्योप्यचमर्षणं।

भूर्भुवादिषु शेषेषु लोकेषु बहुभोगदं॥

चतुर्णामपि वर्णानां यस्तु सोपानवत्स्थितं -

तत् कुर्य्याद्यौवनं प्राप्य समुद्दिष्टमिहैव हि ॥
धन्यमायुःप्रदं नित्यं रूपसौभाग्यदं परं,
स्त्रीपुंसयोश्च निर्द्दिष्टं व्रतमेतत् पुरातनं ।
विधवयापि कर्त्तव्यं भवेदविधवा च या ॥
मुग्धयापि च कर्त्तव्यमवियोगाय तद्व्रतं ।
उपोष्य प्रतिमासन्तु भुञ्जीत व्रतिभिः सह ॥
एतद्विभिश्चतुर्भिर्व्वा(१) सर्व्वेष्वब्देषु शक्तितः ।
अन्ते च भिन्नवर्षाणां प्रारम्भे विधिमाचरेत् ॥
पुण्यसम्भारमन्विच्छन्ननामयपदञ्च तत् ।
अथारब्धव्रते कश्चिदसमाप्ते मृतो भवेत् ॥
सोऽपि तत् फलमाप्नोति सत्प्रारम्भप्रभावतः ।
वाचकः श्रावकश्चैव श्रोतारश्च व्रतस्य ये ॥
भवन्ति पुण्यसंश्लिष्टास्तत्पदाभिमुखाश्च ये ।

इति कालिकापुराणोक्तं महाव्रतं ।

———ooo———

उपोष्यैकादशीं शुक्लां माघमासेऽथ पूर्णिमां ।
कुर्य्याद्विधिमिमं सम्यक् सदा तस्य व्रजेत्पदं ॥
तच्चिरूपप्रदञ्चैतद्व्रतं(२) सौभाग्य दायकं ।
पुत्रदं सुखदञ्चैव विधिना चरितं त्विदं ।
व्रतस्यास्य प्रवक्तारं समयुक्तं गुणान्वितं ॥

(१) चतुर्भिर्वा च वर्षाणामिति पुस्तकान्तरे पाठः ।
(२) तद्विरूपार्द्ध्रदञ्चैतद्व्रतमिति पुस्तकान्तरे पाठः ।

पूजयेद्भूमिकामीष पादुकाद्यैः सुभावितः(१)।
कुम्भमाल्ययुतञ्चाथ पात्रं नीलाञ्च गामपि ॥
अभावे च तथा हेम्नः कर्षार्द्धेन तु राजतं।
वस्त्रयुग्मं नवं सूक्ष्मं पुष्पप्रकरचित्रितं॥
आश्रित्य तत्र तत्पात्रं शुचौ देशे निवेशयेत्(२)।
ततो जागरणं कुर्य्यात् गीतवाद्यादिमङ्गलैः॥
प्रभाते तु नयेत्पात्रं हरेरायतनं महत्।
स्नाप्य क्षीरादिभिर्देवं विष्णुं संपूज्य वै स्वयं॥
निवेदयेत्तु तत्पात्रं प्रीयतामित्युदीरयेत्।
ततो नानाविधैर्भक्ष्यैः सुगन्धेनोदकेन च॥
दधिखण्डाज्य दुग्धाद्यं नैवेद्यञ्च बलिं हरेत्।
ततो नत्वा गृहं गच्छेदाचार्य्यं प्रीणयेत् पुनः॥
प्रणम्य भोजयेद्भक्त्या व्रतिनश्च द्विजैः सह।
कल्पयेद्भोजनं श्रेष्ठं सर्व्वेष्वेव तपस्विषु॥
दीनान्धकृपणानाञ्च सर्व्वेषामनिवारितं।
अनेनापि व्रतेनैव सम्यक् प्राप्य पदं शुभं॥
मोदते सुचिरं कालमायुष्मान् धनवानिह।

इति नरसिंहपुराणोक्तं पात्रव्रतं।

---000---

(१) पूजयेद्भूमिकादींस्तु तथा भक्त्या सुभावित इति पाठान्तरं।

(२) निवेदयेदिति पुस्तकान्तरे पाठः।

युधिष्ठिर उवाच।

जातिस्मरत्वं देवेश दुष्प्राप्यमिति मे मतिः।
तदहं श्रोतुमिच्छामि प्राप्यते केन कर्मणा॥

कृष्ण उवाच।

ब्राह्मणश्चैव शूद्रोपि कुले महति जन्मवान्।
दाता क्षमी धनी वाग्मी रूपवान् भद्रकैर्भवेत्॥
चत्वारि राजन् भद्राणि चतुष्पादानि तानि वै।
तान्येव बहुविघ्नानि दुःप्राप्याण्यकृतात्मभिः॥
मार्गशीर्षे तु प्रथमं द्वितीयं फाल्गुने तथा।
ज्येष्ठे तृतीयं राजेन्द्र ख्यातं भाद्रपदे परं॥
फाल्गुनामलपक्षादौ त्रीन् मासांस्तु नरोत्तम।
त्रिपुष्करं समाख्यातमौदार्य्यकरणं परं॥
ज्येष्ठस्य शुक्लपक्षादौ त्रीन्मासांश्च युधिष्ठिर।
तत्त्रिपुष्करमाख्यातं सत्वशौर्य्यप्रदायकं(१)॥
तथा भाद्रपदस्यादौ त्रीन्मासान् पाण्डुनन्दन।
वरदानेन देवानामृषीणां सेवनेन वा।
तीर्थस्नानेन वा देव तपोहोमव्रतेन वा॥

कृष्ण उवाच।

चत्वारि राजन् भद्राणि समुपोष्याणि यत्नतः।
तत् प्रभावाद्भवेन्नूनं राजन् जातिस्मरो नरः॥
शुभोदयः पुरा वैश्यो बभूव यमुना तटे।

---

(१) रूपौदार्य्यगुणान्वित मिति पुस्तकान्तरे पाठः।

तेन व्रतपदृचीर्णं यतः कालक्रमादसौ ॥
सञ्जयस्य सुतो जातः स्वर्णष्ठीवीति विश्रुतः।
व्रतप्रभावाज्ज्जातिश्च स च चौरैर्निपातितः॥
नारदस्य प्रभावेन पुनरुज्जीवितोऽप्यसौ।
सञ्चार पूर्ववृत्तान्तं सकलं व्रतचर्यतः॥

युधिष्ठिर उवाच।

सञ्जयस्य कथं पुत्रः स्वर्णष्ठीवीति वा कथं।
दस्युभिश्च कथं नीतो कस्माद्वै जीवितः कथं॥

कृष्ण उवाच।

सञ्जयो नामराजासीत् कुशावत्यां नराधिप।
तस्य मित्रे च देवर्षी सदा नारदपर्वतौ॥
एकदा सञ्जयगृहं संप्राप्तौ तौ यदृच्छया।
स्वागतावर्ध्यदानाद्यैरुपचारैरपूजयत्।
तेषामथोपविष्टानां पूर्ववृत्तान्तभाषिणां।
सञ्जयस्य सुता प्राप्ता वरवर्णा पितुरन्तिकं॥
पर्वतः प्राह राजानं कन्येयं वरवर्णिनी।
गूढगुल्फा संहतोरुःपीनश्रोणिपयोधरा॥
पद्मपत्रारुणनखा पद्मकिञ्जल्कसन्निभा।
आकुञ्चितमृदुस्निग्धैः केशैरतिततैर्घनैः॥
सविलासागजगता सुनासा कोमलस्वरा।
अहो रूपमहो धैर्य्यमहो लावण्यमुत्तमं॥
तिलपुष्पस्फुटा नासा रूपं सं परिलक्ष्यते।

कस्येयं भद्रिका भद्रा ममातिहृदयङ्गमा ॥
एवं ब्रुवाणं तं विप्रं विस्मयोत्फुल्ललोचनं ।
राजा प्राह ततो ब्रह्मन् दुहिता मम पर्व्वत ॥
अथोवाच वचो धीमान्नारद: क्षुभितेन्द्रिय: ।
राजर्षिर्वोढुकामोऽहं कन्येयं दीयतां मम ॥
ईप्सितन्ते प्रदास्यामि वरमत्यन्तदुर्लभं ।
एवमुक्तो नारदेन प्रीतात्मा सञ्जयस्तदा ॥
कृताञ्जलिरुवाचेदं प्रहर्षोत्फुल्ललोचन: ।
पुत्रो मे दीयतां विप्रमयीपकनकाकर: ॥
यस्य मूत्रं पुरीषं वा श्लेष्माणं चिपति चितौ ।
जातरूपं हि तत्सर्व्वं सुवर्णं भवतु स्थिरं ॥
एवमस्त्विति तं राजा नारदं प्रत्यभाषत ।
सुवर्णष्ठीविनं पुत्रं ददामि तव सुव्रत ॥
एवमुक्त्वा सतीं कन्यां सालङ्कारां सुमध्यमां ।
विवाहयामास तदा नारदो हृष्टमानस: ॥
ततस्य चेष्टितं दृष्ट्वा पर्व्वत: क्रोधमूर्च्छित: ।
उवाच नारदं रोषाद्दीप्तास्यस्फुरिताधर: ॥
मयेयं प्रार्थिता पूर्व्वं त्वया या स्याद्विवाहिता ।
तस्मान्मया समं स्वर्गान्नगन्तासि कदाचन ॥
दत्तस्त्वयास्य य: पुत्रो वरदानेन नारद ।
सोऽपि चौरैरुपहत: पञ्चत्वमुपयास्यति ॥
एवमुक्त: पर्व्वतेन नारद: प्राह दुर्म्मना: ।
न त्वं धर्म्मं विजानासि किञ्चिन्मूढोऽसि दुर्म्मते ॥

सामान्या सर्व्वभूतानां कन्या भवति सुव्रत।
न तस्या वरणे दोषं पश्यन्तीह बहुश्रुताः॥
न सेविता त्वया ह्येष तेन मां शपसे वृथा।
पाणिग्रहणमन्त्राणां निष्ठा स्यात् प्रथमे पदे(१)॥
यस्मादेतदविज्ञाय शपसे मामनागसं।
तस्मात्त्वमप्यशो स्वर्गं न गन्तासि मया विना॥
सञ्जयस्य सुतःशापाद्यदि पञ्चत्वमेष्यति।
आनयिष्ये तथाप्येनं यमलोकान्न संशयः॥
एवं शप्ता तदान्योऽन्यं देवर्षी तावुभौ पुनः।
पूजितौ सञ्जये नाथ जग्मतुः स्वाश्रमं प्रति॥
अथास्य सप्तमे मासि जातः पुत्रो नृपस्य सः।
स्वर्णष्ठीवीति(२) नामास्य यथार्थमकरोत्पिता॥
जातिस्मरः स्मरवपुः सुवर्णोत्पत्तिकारणं।
सर्व्वभूतस्य तज्ज्ञोऽभून्नृव्रतफलादिह॥
तत्र श्लेष्मपुरीषादि यत् किञ्चित् क्षिपते क्षितौ।
जायते कनकं सर्व्वं प्रसादान्नारदस्य च॥
तेनासौ यजते राजा विविधैर्भूरिदक्षिणैः।
राजसूयादिभिर्यज्ञैर्विविधैरभिपूजितः॥
बभार भृत्यान्नितरान् पुपोष स्वजनातिथीन्।
चकार देवतागारान् सरारामादिवापिकाः।
जातस्नेहस्तु तं पुत्रं ररक्ष रक्षिभिर्वृतं॥

(१) सप्तमे पदे इति पुस्तकान्तरे पाठः।

(२) षर्णाष्ठीवीति पुस्तकान्तरे पाठः।

राज्यः कनकनाम्ना वभूवुर्भूपतिः सुतात्।
अथास्य दस्यवः केचित् श्रुत्वा तं कनकाकरं॥
धनलोभेन तं जघ्नुर्दाक्षिणात्या महोद्धताः।
तस्मिन् विनष्टे तन्नष्टं वरदानसमुद्भवं॥
कनकं नश्यते राज्ञो जगामान्योऽन्यतः स्वयं।
घातितं दस्युभिः पुत्रं ज्ञात्वा राजा सुदुःखितः॥
विललापाकुलमतिः सम्मोहेन पपात च।
विलपन्तं तु तं दृष्ट्वा नारदः प्राह सत्वरं॥
राजन् विषादं माकार्षीः शृणुमामाभारतीं कथां।
इत्युक्त्वा स समाचख्यौ चरितानि महौजसां॥
विनष्टानां नरेन्द्राणां यतीनां दक्षिणावतां।
श्रुत्वा राजा नरेन्द्राणां चरितानि महात्मनां॥
विनष्टशोकः सहसा प्रकृतिस्थो बभूव सः।
नारदोऽपि नरेन्द्रस्य मृतं पुत्रं यमालयात्॥
आनयामास तरसा यथारूपं यथाहृतं।
दृष्ट्वा स्पृष्ट्वा स पुत्रन्तं परितुष्टेन चेतसा॥
व्रीड़ितो विस्मितश्चैव कृताञ्जलिरथाब्रवीत्।
किमाश्चर्यं प्रसन्नेन भवता मम नारद॥
दत्तः पुत्रस्तथा भूतो दस्युभिर्निहतो यथा।
षण्मासान्ते पुनरसौ जीवितं सर्व्वमेव तत्॥
सस्मार पूर्व्ववृत्तान्तं जातिस्मरणकारणं।
व्रतं व्रतश्रेष्ठमिदं किमन्यत कथयामि ते॥
तथा भाद्रपदस्यादौ त्रीन्मासान् पाण्डुनन्दन।

तन्निपुष्करमाख्यातं बहुविद्याप्रदायकं ॥
तथा मार्गशिरस्यादौ त्रीन् मासांश्च नराधिप।
तद्विष्णुपदमित्युक्तं सर्व्वधर्म्मप्रदायकं ॥
मुनिभिः कथितान्येवं भद्राख्येतानि भारत।
कर्त्तव्यानि नरैः स्त्रीभिर्ब्राह्मणानुमतेन वै ॥

युधिष्ठिर उवाच।

विस्तरेणैव मे ब्रूहि देवदेव जनार्दन।
भद्राणां नियमाधानं प्रधानं मधुसूदन(१) ॥

श्रीकृष्ण उवाच।

शृणु राजन्नवहितो भद्राणां विस्तरं परं।
कथयिष्ये न कथितं यन्मया कस्यचित् पुरा ॥
शुक्ला मार्गशिरस्यादौ चतस्रस्तिथयो वराः।
द्वितीया च तृतीया च चतुर्थी पञ्चमी तथा ॥
एकभक्ताशनस्तिष्ठेत् प्रतिपदि जितेन्द्रियः।
प्रभाते तु द्वितीयायां कृत्वा यत् करणीयकं ॥
प्रहरे वै समधिके गते स्नानं समाचरेत्।
मृद्गोमयं तु संगृह्य मन्त्रैरेभिर्विचक्षणः ॥
अहन्ते प्रवक्ष्यामि विप्राणां विधिमुत्तमं।
एतन्न देयं देयान् वा कथयिष्यामि तानपि ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये सुधियोऽमलाः।
तेषां मन्त्राः प्रदेया वै न तु सङ्कीर्णधर्म्मिणां ॥

(१) मधोर्मधुसूदन इति पुस्तकान्तरे पाठः।

या स्त्री भर्त्रा विमुक्तापि स्वाचारविरताः सदा।
सापि व्रतं प्रकुर्व्वीयाद्भर्त्री शीलसंयुता(१)॥
स्नानं नद्यां तडागेषु वापीकूपगृहेषु च।
दशवारं फलं ज्ञेयमधिकं हि समन्त्रकं॥
मृदं मन्त्रेण संगृह्य सर्व्वगात्रेषु दापयेत्।
त्वं हि मृद्वन्दिता देवैः समला विमलाः कृताः॥
मयापि वन्दिता भक्त्या मामद्यैवामलं कुरु।
एवं जपन् मृदं दत्त्वा स्वहस्ताग्रे समन्त्रकं॥
जलावगाहनं कुर्य्यात् कुण्डमालिप्यधर्म्मवित्।
सिद्धार्थकैः कृष्णतिलैर्व्वचासर्व्वौषधैः क्रमात्॥
त्वमादिः सर्व्वदेवानां जगताञ्च जगन्मय।
भूतानान्तु विश्वेषां रसानां पतये नमः॥
गङ्गासागरजन्तोयं पौष्करं नार्म्मदन्तथा।
यामुनं सन्निधातव्यं(२) सन्निधौ तदिहास्तु मे॥
शरीरालम्भनं कृत्वा पूर्व्वं मृद्गोमयाम्बुभिः।
एवं स्नात्वा समाप्लुत्य त्रिराचम्य तटस्थितः॥
निवस्य वाससी शुभ्रे शुचिः प्रयतमानसः।
देवान् पितॄन् मनुष्यांश्च तर्पयेत् सुसमाहितः॥
एवं गृहीतनियमो गृहं गच्छेत् शुचिव्रतः।
न हसेन्न च संजल्पेत् यावच्चन्द्रस्य दर्शनं॥
स्नात्वा चैव ततो नाम द्वितीयादौ चतुर्द्दिने॥

---

(१) स्वभर्त्तोपलब्धव्रता इति पुस्तकान्तरे पाठः।
(१) यामुनं चाग्निरत्न इति पुस्तकान्तरे पाठः।

नमः कृष्णाच्युतानन्तहृषीकेशेति च क्रमात्।
चतुर्द्दिने द्वितीयादिष्वेवमभ्यर्चयेद्व्रतं॥
प्रथमेऽह्नि स्मृता पूजा पादयोश्चक्रपाणिनः।
नाभिपूजा द्वितीयेऽह्नि कर्त्तव्या विधिवन्नरैः॥
पुरद्विषस्तृतीयेऽह्नि पूजां वक्षसि विन्यसेत्।
चतुर्थेऽह्नि जगद्धातुः पूजां शिरसि विन्यसेत्॥
पुष्पैर्विलेपनैर्धूपैरर्घ्यं दद्याद्विभूषणैः।
प्रवरैर्भूरिनैवेद्यैर्दीपदानैश्च भक्तितः॥
पूजयित्वा विधानेन विष्णुं विश्वेश्वरं व्रती।
ततो दिनावसाने तु मुहूर्त्ते विमले सती॥
अर्घ्यं प्रदद्यात्सोमाय भक्त्या तद्भावभावितः।
स चार्घ्यो यादृशो देय ऋग्भिर्भृङ्गिस्तथेतरैः॥
तत्ते सम्यक् प्रवक्ष्यामि युधिष्ठिर निबोध मे।
चन्दनागुरुकर्पूरदधिदूर्व्वाक्षतादिभिः॥
रत्नैः समुद्रजैश्चान्यैर्वज्रवैदूर्य्यमौक्तिकैः।
पुष्पैः फलैश्च कङ्कोलैः खर्जूरैर्नारिकेलकैः॥
वस्त्राच्छादनगोवाजि भूमिहेमसमन्वितैः।
सत्त्व युक्तस्य तस्यस्य विधिरेष प्रकीर्त्तिता॥
इतरस्य यथा शक्त्या फलपुष्पाक्षतोदकैः।
लवणाज्यगुडैस्तैलपयःकुम्भतिलैःसह॥
शशिन् चन्द्र शशाङ्केन्दो नामानि क्रमशो नरः।
द्वितीयादिषु चन्द्रस्य सङ्कोर्त्यार्घ्यं निवेदयेत्॥
अर्च्चयित्वा निशायान्तु शशितुष्ट्या विवर्द्धयेत्।

प्रत्यहं वर्षयेदर्घ्यं यथिमष्टया नृपोत्तम ॥
एवमर्घ्यः प्रदातव्यः शृणु मन्त्रविधिक्रमं ।
नवो नवोऽसि मासान्ते जायमानः पुनः पुनः ॥
त्रिरश्मिसमवेतान् वै देवानाप्यायसे हविः ।
गगनाङ्गणसन्दीप दुग्धाब्धिमथनोद्भव ॥
भाभासितदिगाभोग रामानुज नमोऽस्तु ते ।
दत्त्वार्घ्यं द्विजराजाय तद्विप्राय निवेदयेत् ॥
निर्वर्त्यार्घ्यं क्रमेणैव ततो भुञ्जीत वाग्यतः ।
भूमिन्तु भाजनं कृत्वा पद्मपत्रसमाश्रितं ॥
पालाशैर्मधुपत्रैर्वा(१) सुधौते वा शिलातले(२) ।
समालभ्य धरां देवीं मन्त्रेणानेन मन्त्रवित् ॥
त्वत्तले भोक्तुकामोऽहं देवि सर्व्वरसोद्भवे ।
मदनुग्रहाय सुस्वादु कुर्व्वन्नममृतोपमं ॥
एवं जप्त्वा च भुक्त्वा च शाकपाकगुणोत्तरं ।
आचम्य त्वान्यथालभ्य स्मृत्वा सोमं स्वपेद्भुवि ॥
भोक्तव्यन्तु द्वितीयायां चतुर्थ्यां गोरसोत्तरं(३) ।
घृताक्ताः सगुडा राजन् पञ्चम्यां कृशरा भुवि ॥
भोज्याः सर्व्वेषु भद्रेषु सदा श्यामाकतण्डुलाः ।
प्रसाधितघृतं गव्यं फलं शाकमयान्वितं ॥
प्रातः स्नानं ततः कृत्वा सन्तर्प्य पितृदेवताः ।

(१) चर्म्मपत्रैर्वा इति पुस्तकान्तरे पाठः।
(२) शिलातले इति पाठान्तरं।
(३) घृताररुचकं भुवि इति पुस्तकान्तरे पाठः।

भोजयेद्ब्राह्मणान् भक्त्या दत्त्वा दानं विसर्जयेत् ॥
भृत्यबन्धुजनैः सार्द्धं पश्चाद्भुञ्जीत काम्यया।
एवं भद्रेषु सर्वेषु त्रिमासेषु यतव्रतः(१) ॥
करोत्येवं नरो भक्त्या वर्षमेकममत्सरी।
तस्य श्रीर्व्विजयश्चैव नित्यं सोमः प्रसीदति ॥
एतत्करोति या कन्या भव्यं प्राप्नोति सा पतिं।
दुर्भगा सुभगा साध्वी भवत्यविधवा सदा ॥
राज्यार्थी लभते राज्यं धनार्थी धनमाप्नुयात्।
पुत्रार्थी प्राप्नुयात् पुत्रानित्याह भगवान् रविः ॥

योषित्कुलाकुलविलासमनोरमाणि
शय्यासपान(२) शयनासनशोभितानि।
भद्राण्यवाप्य धनपुत्रकलत्रजातो:
जातिस्मरो भवति भारतभद्रकर्त्ता ॥

इति भविष्योत्तरोक्तं भद्रचतुष्टयव्रतं।

———०००———

सुमन्तुरुवाच।

शृणु कौरव कर्म्माणि तिथियुग्माश्रितानि तु।
श्रुत्वैव पापहानिः स्यात् कृत्वानन्तं फलं लभेत् ॥
क्षीराशनः प्रतिपदि। पुष्पाहारो द्वितीयायां(३)।

(१) एवं भाद्रत्रिमासेषु नियतात्मा यतव्रत इति पुस्तकान्तरे पाठः।
(२) शय्यासपाम इति पुस्तकान्तरे पाठः।
(३) पुष्पप्राशनो द्वितीयायामिति पाठान्तरं।

लवणवर्ज्जितं तृतीयायां। तिलाक्षाशी(१) चतुर्थ्यां। क्षीराशनः पञ्चम्यां। फलाशनः षष्ठ्यां। शाकाशनः सप्तम्यां। विल्वाहारोऽष्टम्यां। पिष्टाशनो नवम्यां। अनग्निपक्काहारी दशम्यां। एकादश्यामुपवासः। घृताशनो द्वादश्यां। पायसाहारस्त्रयोदश्यां। यवान्नाहारश्चतुर्दश्यां। गोमूत्राहारः कुशोदकप्राशनः पौर्णमास्यां। एवं प्राशनविधिः॥

उक्तानि प्राशनान्येवं विधिपूर्व्वमुदाहृतं।
क्षीरप्रतिपदाशान्तु स सर्व्वासु विधीयते॥

स क्षीरप्रतिपदोक्तो विधिः कथ्यते॥ तत्र व्रतदिनात् पूर्व्वदिने त्रिकालस्नानमुपवासश्च पवित्रः सूक्तजपः शिरसा सह गायत्रीजपश्च तत्पूर्व्वदिने एकभक्तं त्रिधाशोपवाससङ्कल्पः व्रतदिवसे द्विजेभ्यो दक्षिणादानमिति एष पूर्व्वः प्राशनविधिस्तिथीनां। एवमनेन विधिना पक्षमेकं यो वर्त्तयति अश्वमेधफलं दशगुणं प्राप्नोति स्वर्गे मन्वन्तरं यावत् प्रतिवसति उपगीयमानाप्सरोगन्धर्व्वैः सह वासः। मासचतुष्टये तु सोऽश्वमेधराजसूयानां शतगुणं फलमाप्नोति। स्वर्गे उपगीयमानाप्सरोभिर्गन्धर्व्वैश्चतुर्युगानां सप्ततिं यावत् प्रवसति। सप्तकः संवत्सरः। य एवं नियमाद्राजन्नाश्वयुजनवम्यां वैशाखतृतीयायां कार्त्तिके पौर्णमास्यां वा तिथिव्रतानि गृह्णाति।

---

(१) तिलभक्षायीति पुस्तकान्तरे पाठः।

ब्रह्मचारी गृहस्थो नारी नरो वा शुचिः प्रयतमानसः पुष्प-दन्तविभुसालोक्यं व्रजति॥

पुष्पदन्तविभुः सूर्य्यः।

इति भविष्यत्पुराणोक्तं महाफलव्रतं।

ज्यैष्ठे पञ्चतपाः सायं हेमधेनुप्रदो दिवं।

यात्यष्टमी चतुर्दश्यो रुद्रव्रतमिदं स्मृतं॥

अष्टमीचतुर्द्दश्याविति च। चत्वारि दिनानि पञ्चाग्नि-साधनं तच्चतुर्थे दिने सायं सुवर्णधेनुं दद्यात्।

इति पद्मपुराणोक्तं रुद्रव्रतं।

द्वे पञ्चम्यौ हि मासस्य द्वे च प्रतिपदौ नरः।

सोपवासः सुगन्धाढ्यः शयीत प्रियया सह॥

खगनिश्चलचित्तस्तु रतिप्रीतिविवर्जितः।

खगनिश्चलचित्तः सूर्य्यध्यानपरः॥

समस्य स्मृतिशीलस्य तस्य पुण्य फलं शृणु।

दिव्यं वर्षसहस्रं तु दिव्यं वर्षशतं तथा॥

ततस्तु भावयत्येनं(१) महादेवं न संशयः।

इति भविष्यत्पुराणोक्तं सम्भोगव्रतं।

(१) ततस्तत्र वसेन इति पुस्तकान्तरे पाठः।

पौर्णमास्याममावास्यां चतुर्दश्याष्टमीषु च ।
नक्तमब्दन्तु कुर्व्वीत हविष्यैर्ब्रह्मचारिणी ॥
उमामहेशप्रतिमां हेम्ना कृत्वा सुशोभनां ।
राजतीं वापि कर्षार्द्धं स्नापयित्वा घृतादिभिः ॥
गन्धपुष्पैरलङ्कृत्य वस्त्रयुग्मैश्च शोभनैः ।
भक्ष्यभोज्यैरशेषैश्च वितानध्वजचामरैः ॥
भोजयेच्छिवभक्तांश्च दीनानाथान् प्रतर्पयेत् ।
शक्त्या च दक्षिणां दद्याच्छिवमन्त्रैः समापयेत् ॥
ताम्रकांस्यादिपात्रं वा सितवस्त्रावगुण्ठितं ।
कृत्वा वायतनं मध्ये प्रतिमान्तूपकल्पयेत् ॥

पात्रमेवायतनं उपकल्पयेत् स्थापयेत् ।

शिरस्याधाय तत्पात्रं शोभितं पुष्पमालया ॥
ध्वजशंख्यादिविभवैः शिवस्यायतनं नयेत् ।
लिङ्गमूर्त्तेर्महेशस्य व्रतस्यान्ते निवेदयेत् ॥
तद्वेधा स्थापयेत्पात्रमुपशोभासमन्वितं ।
शिवं प्रदक्षिणीकृत्य प्रणिपत्य समापयेत ॥
समाप्यैतद्व्रतं पुण्यं शृणु यच्च फलं लभेत ।
द्वादशादित्यसंकाशैर्महायानैर्मनोहरैः ॥
यथेष्टमैश्वरे लोके रुद्रैः सार्द्धं प्रमोदते ।
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥
तदन्ते स महाभागो विष्णुलोके महीयते ।

इति शिवधर्म्मोक्तमुमामहेश्वरव्रतं ।

अष्टम्याञ्च चतुर्द्दश्यां नियतब्रह्मचारिणी ॥
वर्षमेकं न भुञ्जीत महीभोगजिगीषया ।
वर्षान्ते प्रतिमां कृत्वा पूर्व्ववद्विधिमाचरेत् ॥
स्नानाद्यैस्तद्व्रतं प्राप्य पूर्व्वोक्तांस्तु गुणान् लभेत् ।

अत्राप्युमामहेश्वर प्रतिमा कर्त्तव्या । पूर्ववदिति पूर्व्वव्रतोक्त वदित्यर्थः ।

जाम्बूनदमयैर्यानैश्चतुर्द्वारैरलङ्कृतैः ॥
गत्वा शिवपुरन्दिव्यं अशेषं भोगमाप्नुयात् ।
उमामहेश्वरं नाम व्रतमीश्वरभाषितं ॥
कारुण्यात् सर्व्वनारीणां नराणाञ्च विशेषतः ।
तस्मात् सर्व्वप्रयत्नेन उमामहेश्वरव्रतं ॥
कार्य्यं नरनारीभिः सुखमक्षयमाप्नुयात् ।
उमादेवीप्रियार्थन्तु नष्टेन परमार्थतः ॥

इति शिवधर्म्मोत्तरोक्तमपरमुमामहेश्वरव्रतं ।

विल्वव्रतं समाश्रित्य द्वादशाहमभोजनं ।
यः कुर्य्याद् भ्रूणहात् पापान्मुक्तो भवति नारद ॥

शिवोऽत्र देवता ।

इति सौरपुराणोक्तं पापमोचनव्रतं ।

सूतउवाच।

पौर्णमास्याममावास्यां वर्षमेकमतन्द्रिता।
उपवासरता नारी नरो वा द्विजसत्तमाः॥
वर्षान्ते सर्वगन्धाढ्यां प्रतिमाञ्च निवेदयेत्।
साभवान्यास्तु सायोज्यं सारूप्यं वाथ सुव्रता॥
लभते नात्र सन्देहः सत्यं सत्यं मुनीश्वराः।

इति लिङ्गपुराणोक्तं भवानीव्रतं।

—— ००० ——

द्वेधाष्टम्यौ तु मासस्य चतुर्द्दश्यौ तु द्वे तथा।
अमावस्यापौर्णमास्यौ सप्तमीद्वादशीद्वयं॥
संवत्सरमभुञ्जानः सततञ्च जितेन्द्रियः।
ब्रह्मचर्य्य फलं यच्च यत्फलं सत्रयाजिनं(१)॥
ऋतुगामिफलं(२) यच्च तदवाप्नोत्यभोजनात्।
एषु तिथिस्वामिनो देवताः।

इति यमस्मृत्युक्तं तिथियुगलव्रतपञ्चकं।

—— ०००(a,०००) ——

चतुर्द्दश्यां तथाष्टम्यां पक्षयो शुक्लकृष्णयोः।
योऽब्दमेकं न भुञ्जीत शिवार्चनरतः शुचिः॥
यत्पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनां।
तत् पुण्यं सकलं तस्यां शिवलोकञ्च गच्छति॥

इति भविष्यत्पुराणोक्तं शैवोपवासव्रतं।

(१) सर्वयाजिनामिति पुस्तकान्तर पाठः।
(२) ऋतुगामिफलमिति पुस्तकान्तर पाठः।

कृष्णाष्टम्यां तु नक्तेन कृत्वा कृष्णचतुर्द्दशीं।
इह भोगानवाप्नोति( ) परत्र शिवमृच्छति॥
इति श्रीभविष्यत्पुराणोक्तं शिवनक्तव्रतं।

———000———

सूत उवाच।

अष्टम्याञ्च चतुर्द्दश्यां पक्षयोरुभयोरपि।
वर्षमेकं ततो भुक्त्वा नक्तं यः पूजयेच्छिवं॥
सर्व्वयज्ञफलं प्राप्य स याति परमाङ्गतिं।
इति लिङ्गपुराणोक्तं महाव्रतं(२)।

———000———

पौषमासे तु संप्राप्ते पक्षयोरुभयोः सुत।
चतुर्द्दश्यामथाष्टम्यां पौर्णमास्यामथापि वा॥
नित्यं निर्व्वर्त्य विधिवत् ततः काम्यं समाचरेत्।
विशेषपूजा तत्रैव कर्त्तव्या शुद्धचेतसा॥
नैवेद्यं यावकप्रस्थं खण्डं चाराज्यसंस्कृतं।
रुद्रसंख्यांस्तु वै विप्रान् भोजयेच्चैव दक्षयेत्॥
वितस्तिमात्रां प्रकृतिं यावपिष्टेन निर्म्मितां(३)।
सशृङ्गखुरलाङ्गूलीकृतभूषान्तु कारयेत्॥
शिवाय तु प्रदातव्या कपिला गुरवे ततः।
सवाहनसमायुक्ता व्रतपुण्यमतः शृणु॥

---

(१) इह लोकानवाप्नोतीति पुस्तकान्तरे पाठः।
(२) मंत्रस्वर व्रतमिति पुस्तकान्तर पाठः।
(३) यवापिष्टं न निर्म्मितामिति पुस्तकान्तरे पाठ.।

सूर्य्यकोटिप्रतीकाशैर्व्विमानैः सर्व्वकामिकैः ।
रुद्रवृन्दसमाकीर्णे रुद्रकन्यासमावृतैः ॥
वृषभस्यन्दनैर्युक्तो नानागीतरवान्वितः ।
त्रिःसप्तकुलसंयुक्तो यात्यसौ यत्र शङ्करः ।
यावत्तद्रोमसंख्यानं तत् प्रसूते कुलेषु च ॥
तावद्युगसहस्राणि रुद्रलोके महीयते ।
सामीप्यं तु समासाद्य सायोज्यं याति वा ततः ॥
अनेन विधिमार्गेण खड्गं पिष्टमयं शिवे ।
समर्प्य च विधानेन चक्रवर्त्तिपदं लभेत् ॥
फाल्गुने तु तथा चक्रं निवेद्य तत्पदं लभेत् ।
चैत्रे शिवं पिष्टमयं निवेद्य च शिवाग्रतः ॥
स मुञ्चति ब्रह्महत्यां शिवलोकमवाप्नुयात् ।
वैशाखे मासि दण्डाग्रं शिवस्याग्रे निवेदयेत् ॥
हस्तार्धं(१)पिष्टजं कार्य्यं पूजान्ते तु निवेदयेत् ।
मुच्यते सर्वपापेभ्यो रुद्रलोके महीयते ॥
ज्यैष्ठे पिष्टमयं खड्गं शिवाय विनिवेदयेत् ।
मुच्यते तु कृतघ्नत्वाद्रुद्रलोके तु गच्छति ॥
आषाढे पिष्टजं पाशं शिवाय विनिवेदयेत् ।
मुच्यते दुष्कृतैः सर्वैरिह जन्मनि सञ्चितैः ॥
ध्वजं पिष्टमयं यस्तु शिवस्याग्रे निवेदयेत् ।
श्रावणे तु विधानेन सोऽक्षय मोक्षमाप्नुयात्(२) ॥

---

(१) हस्तार्धमिति पुस्तकान्तरे पाठः ।
(२) मनुजः मोक्षमाप्नुयादिति पुस्तकान्तरे पाठः ।

मासे भाद्रपदे यस्तु गदां पिष्टमयीं ददेत्।
निधीशत्वं तु सम्प्राप्य शिवलोके महीयते ॥
मासि चाश्वयुजे शूलं दत्त्वा पिष्टसम्भवं ॥
शिवाय पुरतो देयं भ्रूणहत्यां व्यपोहति।
कार्त्तिके तु गदाचक्रं शिवस्याग्रे निवेदयेत् ॥
सप्तजन्मकृतं पापं दहत्यग्निरिवेन्धनं।
मासे वै मार्गशीर्षे तु कमलं पिष्टसम्भवं ॥
शिवाय विधिना देयं(१) सर्व्वैश्वर्य्यमवाप्नुयात्।
सर्व्वेषाञ्चैव नक्तन्तु व्रतानां कीर्त्तितं मया ॥
नित्यपूजान्तु निर्व्वर्त्त्य काम्यपूजान्तु कारयेत्।
मासि मासि गुरोः पूजा कर्त्तव्यन्तु व्रतार्पणं ॥
महापूजा(२) वत्सरान्ते कर्त्तव्या तु विधानतः।
गुरवो दक्षितव्यास्तु हेमवस्त्राश्ववाहनैः ॥
ततः फलमिदं प्रोक्तं यथोक्तं कृत्तिकासु च।
वित्तशाठ्यान्महासेन इष्टापूर्त्तैर्वियुज्यते ॥

इति कालोत्तरोक्तं शिवव्रतं।

---

(१) पुरतोदेयमिति पुस्तकान्तरे पाठः।
(२) महीपूजादिति पुस्तकान्तरे पाठः।

अथ शक्रध्वजोच्छ्रायविधिः ।

देवीपुराणे ।

शक्र उवाच ।

केन सा विधिना लब्धा मम वंशक्रमागतैः ।
ध्वजयष्टिर्व्विशेषेण तद्विधिं कथय प्रभो ॥

ब्रह्मोवाच ।

गङ्गायाः सिकतासंख्या क्रियते सुरसत्तम ।
न भवेद्दैत्यवंशस्य देवराज जिगीषतः ॥
विष्णुना घातिताः केचित् केचिद्देवेन शम्भुना ।
गुहेन निहताः केचित् मया केचिज्जिघांसिताः ॥
देवीभिर्व्विद्रवन्त्यन्ये न तथापि क्षयङ्गताः ।
सुबलोनाम दैत्येन्द्रो हंसकेतुर्म्महाबलः ॥
मम वंशसमुत्पन्नोदण्डघातश्च वासव ।
तेन पूर्व्वं जिता देवाः भानोर्म्मन्वन्तरे(१) विभो(२) ॥
समागताः समस्तास्ते सह शक्रेण वासव ।
यथा न शक्ताः समरे दैत्यान् योद्धुं पितामह ॥
शत्रुणा परिभूताश्च शरणं त्वाङ्गता वयं ।
तदाहं चिन्तयन्(३) शक्र विष्णुरक्षां दिवौकसां ॥

---

(१) भौत्येमन्वन्तरं विभोरिति पुस्तकान्तरे पाठः ।

(२) भौत्य मन्वन्तरं विभो इति पाठान्तरं ।

(३) तदाहं चिन्तयन् तेषां वधोपायं परामृषमिति पुस्तकान्तरे पाठः

केतुना शत्रुदत्तेन उच्छ्रितेन न संशयः।
उक्ता मया सुराः सेन्द्रा विष्णुराराध्यतां प्रभुः॥
स दास्यति महाकेतुं सर्व्वदैत्यविमोहनं।
ते गता मम चादेशात् चीरोदे यत्र केशव॥
परापरस्वरूपस्थमज-मव्यय-शाश्वतं।
श्रीवत्साङ्कं महाबाहुं कौस्तुभोरस्कभूषितं॥
स्तुवन्त्येते तदा सेन्द्रा देवाः शत्रुभयार्द्दिताः।
तुतोष केशवस्तेषां वरं ब्रूहि पुरन्दर॥
तदा तैर्याचितोदेवः केतुन्देहि सुरारिहं।
तेना सौ भूषयित्वा तु दत्तो देवभयापहः॥
श्वेतछत्रं महातेजः सुमालाकटकान्वितं।
सूर्य्यायुतसमप्रख्यं किङ्किणीरवकान्वितं॥
चामरव्यजनोपेतं शत्रुलक्षणलक्षितं(१)।
तं दृष्टासौ बलं सैन्यं भग्नं स च निपातितः॥
तदा प्रभृति हे शक्र केतुस्तव कुलागतः।
अन्येषाञ्चैव राज्ञां तदुच्छ्रायो विजयावहः॥
मया हरेण देवेन विष्णुना वासवेन च।
दत्तं यः कश्चिदेवेमं नृपतिस्तं श्रयिष्यति(२)॥
स समस्ताधिपोभूमौ अजेयश्च भविष्यति।
एवं शक्रस्य ब्रह्मणा कथितं केतुकारणं॥
मयापि तव विप्रेश सर्व्वमस्य प्रकाशितं।

(१) शत्रुलक्षणलक्षितमिति पुस्तकान्तरे पाठः।
(२) दत्तं यः कश्चिदेवेदं नृपतिस्त्वाश्रयिष्यतीति पाठान्तरं।

नृपवाहन उवाच।

भगवन् श्रोतुमिच्छामि तस्यचोच्छ्रायणं यथा।
क्रियते दिनकृत्ये तु द्रव्यं मन्त्रविधिम्वद॥

अगस्त्य उवाच।

ब्रह्मणा कथितं शक्रे बृहस्पतिसमीपतः।
यथा प्रवक्ष्यामि तथा विधिर्ध्वजोः समुच्छ्रये॥
शुभाहे कृत्यकरणे मुहूर्त्ते शुभमङ्गले।
दैवज्ञः सूत्रधारश्च वनं गच्छेत् सहायवान्॥
देवीप्रतिष्ठा विधिना यात्रा या च प्रचोदिता।
यात्राविधिना च वनं गच्छेत्।
गत्वा वृक्षं शुभं वीक्ष्य धवार्जुनप्रियङ्गुकं।
उडुम्बराश्वकर्णौच पञ्चैते शोभना नृप॥
प्रियङ्गुको वीजकः अश्वकर्णः सर्ज्जः।
ध्वजार्थं वर्ज्जयेत् वत्स देवतोद्यानजान्द्रुमान्।
कन्यमध्योत्तमा यष्टिः करमानेन कल्पयेत्॥
एकादशकरा वत्स नवपञ्चकरापरा।
अवनद्धां कृमिचितां शयापक्षिनिकेतनां॥
वल्मीकपिहितमजां सुशुष्कां कोटरान्वितां।
कुब्जाश्मपद्मसिक्ताञ्च तथा स्त्रीनामगर्हितां॥
विद्युद्वज्रहताञ्चैव दग्धां च परिवर्ज्जयेत्।
अलाभे चन्दनं चाम्रं शालं शाकमयं तथा।
कार्य्यं शक्रचिह्नार्थं नान्यवृक्षोद्भवं क्वचित्।

शुभभूमिभवं ग्राह्यं शुभतोयं शुभावहं ॥
ततः संपूजयेद्वृक्षं प्राङ्मुखोदङ्मुखोऽपि वा ॥
नमो वृक्षपते वृक्ष त्वामाचरति पार्थिवः ।
ध्वजार्थं तत्त्वतोनाथ(१) नान्यथा उपगम्यतां ॥

पूजा मन्त्रः ।

रात्रौ देयो बलिस्तत्र युगवृक्षे तथैव च ।
वासवार्थं महावृक्ष कृत्वान्यत्र च गम्यतां ॥
ध्वजार्थे देवराजस्य न क्षान्तिस्तव तत्र च ।

बलिमन्त्राः ।

वराह संहितोक्तास्तात्र मन्त्राः ।

यानीह वृक्षे भूतानि तेभ्यः स्वस्ति नमोस्तु ते ।
उपहारं गृहीत्वेमं क्रियतां वासमर्पय ॥
पार्थिवस्त्वां वरयते स्वस्तितेस्तु नगोत्तम ।
ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यतामिति ॥
पूजयित्वा ततोवृक्षं बलिं भूतेषु दापयेत् ।
प्रभाते च्छेदयेद्वृक्षं सुभस्वप्नादिदर्शनैः ॥
शुक्लाम्बरं नरश्चैव समुद्रतरणं नदी ।
वृक्षान् ग्रामान् शुभान् कौरानारोहेद्देवतालयं ॥
देवद्विजास्तथा साधुलिङ्ग मन्त्रहरैरपि ।
प्रतिमा पूजिता स्वप्ने क्षिप्रं सिद्धिप्रदायका ॥
मत्स्यमांसं दधिलाभं रुधिरं मृतरोदनं ।
अगम्यागमनं कृत्वा चाशुसिद्धिफलप्रदा ॥

---

(१) ध्वजार्थं देवराजस्येति पाठान्तरं ।

द्रुमाद्रिलङ्घनं धन्यं शत्रुनाशं तथाशुभं ।
फलं पुष्पं सितं दूर्व्वां स्वप्ने लब्ध्वा जयेच्छ्रीं ॥
शङ्खा गावस्तथादन्तिलाभो राज्यप्रदायकः ।
गौः सवत्सा नवसूता दृष्टा पुत्रफलप्रदा ॥
पङ्के उत्तरणं कूपे व्याधिमोक्षकरश्चिरात् ।
एवं स्वप्नान् शुभान् दृष्ट्वा ततश्छिन्देत पादपं ॥
उदङ्मुखः प्राङ्मुखो वा मधुवत् प्राक् पशुं ददेत्(१) ।
पूर्व्वोत्तरे पतन् शस्तो चशब्दो श्रवणः शुभः ॥
अनन्यपादपेनाघ्ने अन्यथा तु परित्यजेत् ।
अष्टाङ्गुलं त्यजेन्मूलमग्रांशन्तु जले क्षिपेत् ॥
अर्द्धं चतुरङ्गुलं शेषवृक्षं जले क्षिपेत् ।
तथा तमानयेवक्ष शकटेन द्रुमैरपि ॥
तं जलक्षिप्तं वृक्षं ।
प्रधानैर्लक्षसम्पन्नैर्नयेत पुरतः पुरं ।
नीयमाना यदा यष्टिः समा वा चतुरस्रका ।
हन्ता वा भङ्गमाधत्ते राज्ञः पुत्रपुरोहितान् ।
आरभङ्गे बलिं भिंद्यात्सैन्यनाशे जयन्तथा ॥
[भिंद्यात् नाशयेत्] राजादीन् नैम्यवेमिसम्बन्धि काष्ठं ।
रज्जुभञ्जभङ्गेन शान्तिस्तत्र तु कारयेत् ।
इन्द्रचक्रेतिमन्त्रेण जातवेदसयापि वा ॥
तथा नीत्वा शुभे लग्ने(२) पुरस्तादुपवेशयेत् ।

(१) मधुरस्तानपां शुना इति पुस्तकान्तरे पाठः।
(२) यथा शास्त्रे इति पुस्तकान्तरे पाठः ।

द्वारशोभां पथिरथ्यागृहे च देव कारयेत् ॥
पटुपटहनिनदांश्च वेश्याः शङ्खद्विजातयः ।
मङ्गलैर्वेदघोषैश्च नयेयुर्ध्वज चोच्छ्रयः ॥
वस्त्रैरण्डजलोमोत्थैः(१) शुभैः स्वस्थैर्यथाक्रमं ।
नन्दोपनन्दसंज्ञाश्च कुमार्य्यः प्रथमांशकाः ॥
देव्यौ जयविजयाख्या षोडशांशव्यवस्थिताः ।
अधिके शक्रजननी जयन्तश्चैव देवताः ॥

षोडशेषु अधिके सति अयमर्थः । अथोत्तरं षोडशाधिकाः । ध्वजभागात्ध्वज(२) स्तम्भस्तस्य भाग्याः । तत्र प्रथमे द्वितीये च भागे प्रतिदिशं द्वे कुमार्य्यौ कार्य्ये तृतीयेत्वेका । तासामायामविस्तारौ भागाविमौ तत्र प्रथमांशगाः कुमार्य्यः प्रतियुग्मं नन्दोपनन्दावेति द्वितीयांशगा जया विजया चेति । तृतीयांशगाः प्रत्येकं शक्रजननी देव्यौ ज्ञेयाः । ध्वजमस्तके दत्तोपदत्ताश्च यादेवताः ध्वजप्रमाणतः शोयं परिधिः प्रथमः (षोडशांशविहीनानि कुर्य्याद्रूपाणि बुद्धिमान् ।) वक्ष्यमाण भूषणानामिदं मानं । ध्वजं त्रिभागं कृत्वा एकस्य भागस्य दैर्घ्येण प्रथमभूषणपरिधिं निर्द्धार्य्य शेषाणि यथोत्तरं षोडशांशहीनपरिधीनि कुर्य्यात् । अतएव भूषणप्रवेशयोग्यं ध्वजस्य-स्थौल्यं कार्य्यमित्युक्तं भवति । भूषणानि विचित्रवर्णानि स्वयम्भुवे प्रथमे दद्यात्(३) ।

(१) वीरूत्तोर्ण्वैरिति पुस्तकान्तरे पाठः ।
(२) ध्वजोभागादिति पाठान्तरं ।
(३) एवमं विचित्रवर्णां स्वयम्भुवे प्रथमोदद्यादिति पाठान्तरं ।

सुरक्तां चतुरस्राञ्च विश्वकर्म्मा द्वितीयकां।
अष्टम्यान्तु स्वयं शक्रो नीलरक्तां प्रदापयेत्॥
कृष्णां यमस्य हस्ताञ्च वरुणस्य षडस्रिकाः।
मञ्जिष्ठाजलदाकारा वायुर्देवो मयूरकां॥
नीलवर्णां च तां दद्यात् स्कन्दो बहुविचित्रितां।
हस्तान्तु दहनेद्यात् स्वर्णाभां विष्णुरष्टमीं।
वैदूर्य्यसदृशमिन्द्रो ग्रैवेयन्दापयेत् स्वयं॥
अर्द्धचन्द्राकृतिः सूर्य्यो विश्वेदेवास्तु पद्मवत्।
ऋषयोनिवसन्दद्यान्नीलनीलोत्पलोपमं॥
गुरुणा शक्रेण ततो नक्षत्रैश्च समन्ततः।
न्यस्तं गृहे विचित्रञ्च तथैव बहुमाल्यभिः॥
यद्यद्येनैव दत्तन्तु केतो यत्तस्य भूषणं।
तद्दैवतं विजानीयाद्यश्चाहनि समुच्छ्रयेत्॥
उच्छ्रयदिने तां तान्देवतां पूजयेदित्यर्थः।

प्रथमं प्रविशति भूमौ यष्टिः साहस्य राष्ट्रस्य प्रथमं पुरुष प्रयत्नात् पूर्व्वं उच्छ्रितमात्रैव। बालानां तालशब्दैर्दुर्गत्रिघातं समाचष्टे। नृपबन्धकरीविशीर्णा शुभावहा सर्व्वशान्ता च शम्भुसूर्य्ययमशक्रसोमधनदवारुणाः।

वह्नीश ऋषिमन्त्रैश्च होतव्यादधिपाश्चताः।
शम्भुब्रह्मेश्वरः दध्यक्षतैश्चमिश्रा होतव्याः॥
शक्रस्कन्दगुरुरुद्रमप्सरादीन् प्रपूजयेत्।
हुत्वा तु विधिवच्छक्रयात्रां लभेत बुद्धिमान्॥
सुतेजाः शुभभाद्दीप्तः संहतो रविसप्रभः।

रक्तांशुकसमाकारोरथभेरी स्वनशुभः॥
शङ्खदुन्दुभिमेघानां नादाः शस्तास्तु पावके।
ततः कदलीसुदण्डान् पताकांश्च समुच्छ्रयेत्॥
अन्याश्च विविधाः शोभाः शक्रकेतुसमुच्छ्रये।
प्रोष्ठपदेतु अष्टम्यां शुक्लायां शोभनर्चके॥
आश्विने वाथ शुक्लायां श्रावणे वा समुच्छ्रयेत्।
पौरजनजनशब्दैः पटुभेरीविनोदितं॥
वितानध्वज शोभाढ्यं पताकाभिः समुज्वलं।
विष्णोश्शक्रमन्त्रेण सिद्धरचाकृतेन च॥
सिद्ध जनितानिशयं रचा कृते न भस्मना प्रयुक्तेन।
दृढ़ मातृकदण्डस्य शुभतोरणमङ्गलं॥
मातृकदण्डौ तोरणस्तम्भौ।
अविलम्बितमुत्थानमभग्नपीटकं समं।
पीटकं भूषणं।
मद्गुतं वा समुत्थाप्य केतुवासवयोर्व्विभो।
वराह संहितायां।
छत्रं ध्वजादर्शफलार्द्धचन्द्र
विचित्रमालाकदलीसुदण्डैः।
सव्यालिसिंहैः पिटकैर्गवाचै
रलङ्कृतो दिक्षु च लोकपालैः॥
अच्छिन्नरज्जुं दृढ़काष्टमातृकं
सुश्लिष्टयन्त्रागलयादतोरणं।
उत्थापयेत्तच्च सहस्रचक्षुषः

सारद्रुमा शक्रकुमारिकाखिति ॥
उच्छ्रितं स्थापयेत् प्राज्ञः काकोलूककपोतकैः।
नचोपवेशनं दद्यादन्येषामपि पक्षिणां ॥
पश्चाद्दिशं ततः कुर्य्याद्वस्त्रखण्डैर्य्यथाविधि।
उद्देशो भूभागः।
तथास्तु संस्थितं पूज्य सुखयज्ञसुयन्त्रितां ॥
रात्रौ जागरणं कुर्य्यादिन्द्रमन्त्रानुकीर्त्तनैः।
पुरोहितः सदैवात्र शुभशान्तिरतः सदा ॥
यन्त्रपाते नृपं हन्यात्पातकान्महिषी वधं।
पिटके युवराजस्य मवितानानुकम्पने ॥
राष्ट्रे तोरणपातेन ध्वजे चक्रक्षयो भवेत्।
ध्वजे ध्वजोत्सवे क्रियमाणे।
पतने शक्रदण्डस्य नृप मन्युं समादिशेत्।
कृमिजालकउत्थानशलभातस्कराद्दयं ॥
सप्तमे संस्थिते शान्तिर्नृपस्य नगरस्य च।
यावचोच्छ्रित आस्तेतावत्पौराः सदा हृष्टाः ॥
केतोर्निरतायजने भुञ्जीरन् विप्रकन्याश्च।
भुञ्जीरन् भोजयेत्।
विहृतश्चिह्नकेतुस्तिष्ठति दिवसाष्टकं यावत्।
पाते पाते कुर्य्यादुच्छ्रायणे यादृशी पूजा ॥
रात्रौ शुभकृत्पतनस्त्रीदृष्टं काककपोतिकाद्यैः।
नृपं याति सहराष्ट्रं यश्चैवं कारयेत् केतुम् ॥
नगरे वा पुरे वा खेटे वा यद्येवं कुर्व्वन्ति पौराः।

पुरनगरस्य द्वारे वृषसिंहध्वजगस्तृपीत् पुनःकेतुं ॥
समस्तु दोषाणां नाशनं जयदं परं।
एवं पूर्वं हरिः केतुं प्राप्तवान् वृषवाहनात्।
तथा ब्रह्माध्यनेनैव शाक्रश्च शक्रमागतः ॥
तेन सोमाय दत्तोऽसौ ततो दक्षं समागतः।
तदा प्रभृति कुर्व्वन्ति नृपा अद्यापि चोत्सवं ॥
एवं यः कारयेद्राजा केतुर्व्विजयकारकः(१)।
तस्य पृथ्वी वनोपेता सद्वीपा वशगा भवेत्(२) ॥

विष्णुधर्म्मोत्तरात्।

पुष्कर उवाच।

शिविरात् पूर्व्वदिग्भागे भूमिभागे तथा शुभे।
प्रागुदक्प्लवने कुर्याच्छक्रार्थं भवनं शुभं ॥
वासोभिः शयनैः शुभ्रैर्नानारागैस्तथैव च।
ततः शक्रध्वजस्थानं मध्ये संस्थाप्य यत्नतः ॥
मघवन्तं पटे कुर्यात्(३) तस्य भागे तु दक्षिणे।
वामभागे पटे कुर्याच्छचीं देवीं तथैव च ॥
प्रोष्ठपदे सितेपक्षे प्रतिपत्प्रभृतिक्रमात्।
तयोस्तु पूजा कर्त्तव्या सततं वसुधाधिपैः ॥

---

(१) केतुं विजयकारकमिति पुस्तकान्तरे पाठः।
(२) वशद्वीपा वशभवेदिति पुस्तकान्तरे पाठः।
(३) मघवन्तं पटे कुर्य्यादिति पुस्तकान्तरे पाठः।

शक्रप्रवेशविधिना शक्रयष्टिं ततो नृपः।
आनयेन्नीरथेनाश आनयेत्(१) पुरुषैरथ॥
अर्जुनस्याजकर्णस्य प्रियकस्य वटस्य च।

प्रियको बीजकः।

सुरदारुकस्य तथा(२) तथैवोडुम्बरस्य च।
चन्दनस्याथ वा राम पद्मकस्याथ वापदि॥
अलाभे सर्व्ववृक्षाणां यष्टिं कुर्वीत वैणवीं(३)।
सुवर्णवर्णां धर्म्मज्ञस्ताश्च सम्यक् प्रवेशयेत्॥
प्रौष्ठपदे सितेपक्षे षष्ठ्यां रिपुसूदन।
द्रुमप्रमाणा विज्ञेया शक्रयष्टिर्द्विजोत्तम॥
चतुर्भिरङ्गुलैर्हीना साग्रे भवति शर्म्मदा।
अष्टाभिश्च तथा मूले छित्वा तोये च संक्षिपेत्॥
तोयादुद्धृत्य नगरं सम्यगेव प्रवेशयेत्।
तोयादुद्धृत्य(४) नगरं पताकाध्वजमालि च॥
सिक्तराजपथं कुर्यात्तथालङ्कृत वासक।
नटनर्त्तक सङ्कीर्णं तथा पूजितदैवतं॥
संपूजितगृहं राम तथा पूजितवाहनं।
पौरैरनुगतोराजा सुवेशैः फलपाणिभिः॥

(१) अथवैः पुरुषैरेव इति पुस्तकान्तरे पाठः।
(२) दारवस्य तथाश्विनेति पुस्तकान्तरे पाठः।
(३) वैणवीमिति पुस्तकान्तरे पाठः।
(४) ध्वजाः प्रवेश इति पुस्तकान्तरे पाठः।

अष्टम्यां वाग्यतोनेव तान्तु यष्टिं प्रवेशयेत्।
ततस्तु पटयोर्मध्ये सम्यग्न्यस्तां तु कारयेत्॥
तस्मिन्नेवाह्नि धर्म्मज्ञ वस्त्रछन्नां निधापयेत्।
प्राक्छन्नां तां ततः कुर्य्याद्दस्त्रैः संच्छादितां शुभैः॥
पूजितां पूजयेत्तान्तु यावत्सा द्वादशी भवेत्।
एकादश्यां सोपवासो नृपः कुर्यात् प्रजागरं।
सम्वत्सरेण सहितो मन्त्रिणां सपुरोधसा॥
रात्रौजागरणं कार्य्यं नागरेण जनेन तु।
स्थाने स्थाने महाभागैर्देयाः प्रेङ्खास्तथा मधु॥
प्रेङ्खा हिन्दोलिका। मधु मद्यं।
पूजयेन्नृत्यगीतेन रात्रौ शक्रं नराधिपः।
द्वादश्यान्तु शिरस्नातो नृपतिः प्रयतस्ततः॥
मन्त्रेणोत्थापनं कुर्य्याच्छक्रकेतोः समाहितः।
देवीपुराणोक्तस्योत्थापनमन्त्रं तेनानयोर्विकल्पः॥
सुयन्त्रितं तु कुर्य्यात्तद्दृढरज्जुचतुष्टयं।
पूजयेत्तं महाभाग गन्धमाल्यान्नसम्पदा॥
नित्यञ्च पटयोः पूजां यष्टिपूजान्तु कारयेत्।
वलिभिस्तु विविधाभिस्तथा ब्राह्मणपूजनैः॥
नित्यञ्च जुहुयात् मन्त्रान् स पुरोधाश्च वैष्णवान्।
नित्यं गीतेन नृत्येन तथा शक्रञ्च पूजयेत्॥
द्वादश्यां पूजयेद्राजा ब्राह्मणान् धनसञ्चयैः।
विशेषेण च धर्म्मज्ञ साम्वत्सरपुरोहितौ॥

उत्थाने च प्रवेशे च शक्रं सुयाज्ञराधिपः ।
वक्ष्यमाणेन मन्त्रेण कालविज्ञपुरोहितः ॥
प्रयतः पूजयेद्राजा तदा दिनचतुष्टयं ।
पञ्चमे दिवसे प्राप्ते शक्रकेतुं विसर्जयेत् ॥
पूजयित्वा महाभाग बलेन च तुरङ्गिणा ।
नीत्वा करीन्द्रैस्तितयजलतोमयीं प्रवाहयेत् ॥

पटहयं ध्वजश्चेति चितयं ।

वाद्यघोषेण महता सङ्गीतिस्तत्र कीर्त्तिता ॥
पौरजानपदास्तत्र क्रीडां कुर्युस्तथाऽसि ।
उत्सवश्च तथा कार्य्यो जलतीरगतैर्महान् ॥

एतद्विधानं नृपतिस्तु कृत्वा
प्राप्नोति हृद्धिं धनवाहनानां ।
नागस्तथा शत्रुगणस्य राम
महत् प्रसादन्निदशाधिनाथात् ॥

इन्द्रध्वजशिरोभङ्गेत् पतेदिन्द्रध्वजो यदि ॥
भज्यते शक्रयष्टिर्वा नृपतेर्नियतस्तथः ।
यन्त्रभङ्गे तथाग्नेयं रज्जुच्छेदे तथैव च ॥
मातृकायास्तथा भङ्गे परचक्रभयं द्विज ।

मातृका तोरणस्तम्भः ।

दिव्यान्तरिक्षभौमाश्च उत्पातास्तत्र वै सदा ।
तेषां तीव्रभयाग्नेयं फलमत्यन्तदारुणं ॥
निलीयते च क्रव्यादाः शक्रयष्टौ तथा द्विज ।
राजा वा म्रियते तत्र सर्व्वदेशो विनश्यति ॥

इन्द्रध्वजापचारं यत्किञ्चिद्द्विजसत्तम ।
विनाशेऽस्य च विज्ञेया पीडा नगरवासिनां ॥
अन्यच्च एकतमञ्च ।
इन्द्रध्वजनिमित्ते तु प्रायश्चित्तमिदं स्मृतं ।
इन्द्रयागं पुनः कुर्यात् सौवर्णे गन्धके वने(१) ॥
राज्यं दत्त्वा च गुरवे बन्धनानि प्रमोचयेत् ।
सप्ताहं पूजयित्वा च ध्वजं दद्याद्विजातिषु ॥
शान्तिरैन्द्रीभवेत्(२)कार्य्या ब्राह्मणानां दिने दिने ।

गावश्च देया द्विजपुङ्गवेभ्यो
हिरण्यवासोरजतैः समेताः ।
एवं कृते शान्तिमुपैति पापं
दृष्टिस्तथास्य मनुजाधिपस्य ॥

श्रीराम उवाच ।

शक्रोच्छ्रायेति ये मन्त्राः सोपवासो नृपः पठेत् ।
तानहं श्रोतुमिच्छामि सर्व्वधर्मभृताम्वर ॥

पुष्कर उवाच ।

शृणु मन्त्रानिमान् सम्यक् सर्व्वकल्मषनाशनान् ।
प्राप्ते शक्रध्वजोच्छ्राये यान् पठेत् प्रयतो नृपः ॥
वरस्येन्द्रजितामित्र वृत्रहन्पाकशासन(३) ।

---

(१) सौवर्णं सिन्धकेतुना इति पुस्तकान्तरे पाठः ।
(२) शान्तिरौद्री इति पाठान्तरं ।
(३) वरदेन्द्रजितामित्र वृत्रघ्नाक शासन इति पाठान्तरं ।

देव देव महाभाग त्वं हि भूयिष्ठतां गतः ॥
त्वं प्रभुः शाश्वतश्चैव सर्व्वभूतहिते रतः ।
अनन्ततेजा विरजा यशोविजयवर्द्धनः ॥
प्रयतस्त्वं प्रभुर्नित्यमुत्तिष्ठ सुरपूजितः ।
ब्रह्मा स्वयम्भूर्भगवान् सर्व्वलोकपितामहः(१) ॥
रुद्रः पिनाकभृद् ग्रः शतरुद्रियसंयुतः ।
यज्ञस्य नेता कर्त्ता च तथाविष्णुरुरुक्रमः ॥
तेजस्तद्वर्द्धयत्वर्को नित्यमेव महाबलः ।
तेजो धारय देवेश जय शक्र सुहृद्धिद ॥
विष्णुर्गदाधरः श्रीमान् शङ्खचक्रासिशार्ङ्गवान् ।
स ते तेजोदधात्वद्य जय शक्र महाबल ॥
अनादिनिधनो देवो ब्रह्मकायः सनातनः ।
अमिततेजा महाभागो रुद्रात्मा पार्व्वतीसुतः ॥
कार्त्तिकेयः शक्तिधरः षण्मुखोऽसि गदाधरः ।
स ते वरेण्योवरदः तेजोवर्द्धयतां प्रभो ॥
देवसेनापतिस्कन्दः सुरप्रवरपूजितः ।
आदित्या वसवो रुद्राः साध्या देवास्तथाश्विनौ ।
भार्गवोऽङ्गिरसश्चैव दिव्यदेवा मरुद्गणाः ॥
लोकपालास्त्रयश्चैव चन्द्रःसूर्य्योऽनिलोऽनलः ।
देवाश्च ऋषयश्चैव यक्षगन्धर्व्वराक्षसाः ॥
समुद्रा गिरयश्चैव नद्योभूतानि यानि च ।

(१) ब्रह्मलोक पितामह इति पुस्तकान्तरे पाठः ।

तेजस्तु प्राप्तिःसत्यञ्च लक्ष्मीः श्रीः कीर्त्तिरेव च॥
प्रवर्त्तयन्तु ते तेजो जय शक्र शचीपते।
तवचापि जयं नित्यमिहसंपद्यते शुभं॥
प्रसीद राज्ञां विप्राणां पूजनादपि सर्व्वशः।
तव प्रसादात् पृथिवी नित्यं सस्यवती भवेत्(१)॥
शिवं भवतु निर्व्विघ्नं शाम्यन्तां भुवयोभृशं।
नमस्ते देवदेवेश नमस्ते बलसूदन॥
नमो विघ्नमनस्तेस्तु सहस्राक्ष शचीपते।
सर्व्वषामेवलोकानां त्वमेकः परमा गतिः॥
त्वमेव परमः प्राणः सर्व्वस्यास्य जगत्पते।
ईशो ह्यसि च संहृष्टः त्वमनन्तः पुरन्दरः॥
त्वमेव मेघस्त्वम्वायुस्त्वमग्निर्वैद्युतो रविः।
त्वमत्र घनविभ्रमा मेघवाहुः पुनर्घनः॥
त्वञ्च तेजः परञ्चोरं घोषवांस्त्वम्बलाहक।
स्रष्टा त्वमेव लोकानां संहर्त्ता चापराजितः॥
त्वं ज्योतिः सर्व्वलोकानां त्वमादित्यो विभावसुः।
त्वं महाभूतमाश्चर्य्यं त्वं राजा त्वं सुरोत्तम॥
त्वं विष्णुस्त्वं सहस्राक्षस्त्वं देवस्त्वं परायणः।
त्वमेवममृतन्देव त्वं मोक्षः परमार्च्चितः॥
मुहूर्त्तस्त्वं स्थितिः सर्व्वः नरस्त्वं वै पुनःक्षणः।
शुक्रस्त्व वहुलश्चैव कलाः काष्ठास्त्रुटिस्तथा॥
संवत्सरर्त्तवो मासा रजन्यश्च दिनानि च।

(१) सत्यवती भवेदिति पुस्तकान्तरे पाठः।

त्वं मुहूर्त्तसगिरिवरा वसुन्धरा
स भास्करं वितिमिरमम्बरं तथा ।
महोदधि: सतिमिङ्गिलस्तथा
ऊर्म्मिमान् बहुकरमाकराकुल: ॥

महद्यशस्त्वमिह सदाभिपूज्य:
महर्षिभिर्मुदितमनोमहात्मभि: ।
अभिष्टुत: पिबसि च सोममध्वरे
वषट्कृतान्यपि च हवींषि भूतये ॥

त्वं विप्रै: सततमिहेज्य सफलार्थं
वेदार्थेष्वतुल बलौघगीयसे च ।
त्वं वेदैर्यजन परायणा द्विजेन्द्रा:
वेदाङ्गान्यभियन्ति सर्व्ववेदै: ॥

यज्ञस्यहर्त्ता भुवनस्य गोप्ता
वृत्तस्य हन्ता नमुचेर्निहन्ता ।
कृष्णेवमाने च सदा महात्मा
सत्यानृते यो विविनक्ति लोके ॥

यं वाजिनं गर्भमेवासुराणां
वैश्वानरं वाहनमभ्युपैति ।
नम: सदास्मै त्रिदशेश्वराय
लोकत्रयेशाय पुरन्दराय ॥

अजोऽव्यय: शाश्वत एकरूपो
विष्णुर्वराह: पुरुष: पुराण: ।

त्वमध्वरः सर्व्वहरः कृशानुः
सहस्रशीर्षः तमशन्युरिन्द्रः॥

कविं सप्त जिह्वं त्रातारमिन्द्रं सवितारमिन्द्रं सुरेशं शशाङ्कं शङ्करं शङ्कराम्तुं तृणहरणं सुखेन मह्यमस्माकं वीरा उत्तरे भवन्तु।

त्रातारमिन्द्रेन्द्रियकारणात्मा
जगत् प्रधानञ्च हिरण्यगर्भं।
लोकेश्वरं देववरं वरेण्य
मानन्दनित्यं प्रणतोस्मि नित्यं।
एवं देववरस्य कीर्त्तने
महात्मन स्त्रिदशपतेः सुसंयतः।
अवाप्य कामान् मनसोभिरामान्
स्वर्गाल्लोकानायाति च देह भेदैः॥

वराह संहितायां॥

संपूरणे योच्छ्रयणे प्रवेशे
स्नानं यथा माल्यविधौ विसर्ज्जे।
पठेदिमान्नृपतिः सोपवासो
मन्त्राः शुभाः पुरुहूतस्यकेतोः॥

संपूरणं पताकारोपणं तत्र विशेषमन्त्रय।

हरार्क वैवस्वतयक्ष सोमे
धनेश वैश्वानर पाशभृद्भिः॥
महर्षिसङ्घैः सदिगप्सरोभिः
श्रुक्राङ्गिरस्कन्द मरुद्गणैश्च।

यथार्कपूज्य स्फुरतैक रूपैः
समर्थितथा भरणैरुदारैः ॥
तथेहताम्याभरणानि देव
शुभानि संप्रीतमना गृहाण ।

इति शक्रध्वजो च्छायविधिः ।

श्रीमार्कण्डेय उवाच ।

इदमन्यत् प्रवक्ष्यामि पञ्चमूर्त्तिव्रतं तव ।
संवत्सरः स्मृतो वह्निस्तथार्कपरिवत्सरः ॥
इष्टापूर्त्तस्तथा सोमो ह्यनुपूर्व्वः प्रजापतिः ।
उत्पूर्व्वश्च तथा प्रोक्तो देवदेवो महेश्वरः ॥
तेषां मण्डलविन्यासः प्राग्वदेवविधीयते ।
प्राग्वदिति नीलश्वेतरक्तश्वेत पीत कृष्णकैः ।
मण्डल विन्यासाः कर्त्तव्याः ।
प्राग्वत् प्रपूजनं कार्य्यं होमः कार्य्यस्तथा विधिः ।
तिलैर्व्रीहियवैश्चैव घृतेन सितसर्षपैः ॥
तल्लिङ्गै रथकामन्त्रै र्नामभिः प्रत्यहं क्रमात् ।
नक्ताशनस्तथा तिष्ठेत् प्राग्वद्दिवसपञ्चकं ॥
चैत्रशुक्लं समारभ्य पञ्चमीप्रभृतिक्रमात् ।
संवत्सराख्ये वर्षेतु व्रतमेतत् समाचरेत् ॥
पूजावसाने दातव्याः सुवर्णाः पञ्च यादव ।
चतुर्व्वेदविदे देयं ग्रामाभिदेन यादव ॥
एकैकं पञ्चमं देयं तथा काल विदो भवेत् ।

यथेष्टं लोकमाप्नोति कामचारी विहङ्गमः ॥
व्रतेनानेन धर्म्मज्ञः पूज्यमानः सुरासुरैः।

मानुष्य माषाद्य भवत्यरोगो
वरेण रूपेण वलेन युक्तः।
नृपप्रतापान्वितमत्तु सक्तो
द्विजोत्तमो वा बहुयज्ञयाजी ॥

इति विष्णुधर्मोत्तरोक्तं संवत्सरव्रतं।

— —000—

ब्रह्मोवाच।

भूयस्ते सम्प्रवक्ष्यामि देव्याराधनमुत्तमं।
यत् कृत्वा सर्वकामानां प्राप्तिस्तृप्तिर्भविष्यति ॥
दन्तिदन्तमयैर्दण्डैर्हेमबन्धैः सुशोभनैः।
विचित्र पद्मरागाद्यैर्मणिभिस्तु सुशोभितं ॥
तथातैः कारयेद्देव्याः सार्वभौमं मनोरमं।
दुकूलवस्त्रसञ्छन्नं अर्द्धचन्द्रोपशोभितं ॥
घण्टाकिङ्किणिशोभाढ्यं दर्पणैरुपशोभितं।
तं रथं पूजयेच्छक्र जातीकुसुममल्लिकैः ॥
पारिजातकपुष्पैश्च यक्षकर्द्दमचन्दनैः।
सुगन्धिधूपितं कृत्वा देवीं तत्र निवेशयेत् ॥
प्रतिमां शोभनां वत्स मन्वादैत्य चयं करीं।
पूजयेद्रथ विन्यस्तां विन्यस्तां सर्वमङ्गलां ॥
दुर्गा कात्यायनी देवी वरदा विन्ध्यवासिनी।

निशुम्भशुम्भमथनी महिषासुरविमर्द्दिनी ॥
उमा क्षमावती माता शङ्करस्यार्द्धकायिनी ।
प्रसीदतु सदा मेऽस्तु यच्च नो वाञ्छितं हृदि ।
अनेन बलिपूर्व्वेण नमस्कारयुतेन च ।
पूजयित्वा ततो राजा समन्तादृराप्य गीतकैः ॥
पञ्चमीसप्तमीपूर्णानवम्येकादशीषु च ।
तृतीयाशिवविघ्नेशदिवसेषूत्सवेषु च ॥
महानदीवनोत्सङ्गपर्वतश्रवणेषु च ।
तत्र मण्डपविन्यासं महदिष्टकनिर्म्मितं ॥
शैलं वा मृण्मयं वापि कृत्वा वास्तुविभागवित् ।
सर्व्वलक्षणसम्पूर्णां सर्व्वशोभासमन्विताम् ।
पूर्व्वं च कारयेच्छक्रं पश्चाद्यात्रां समारभेत् ॥
महाजनपदोपेतां महास्त्रीसङ्घसङ्कुलां ।
सर्व्वान्नपाननैवेद्यैः समस्तैरपि पूजयेत् ॥
दद्याद्दिग्बलिं शक्र पूर्व्वदिक्षु समं ततः(१) ।
भूतवेतालसङ्घस्य मन्त्रेणानेन सुव्रत ॥
जयत्वं कालिका भूते सर्व्वभूतसमावृता ।
रक्ष मां निज भूतेभ्यो बलिं गृह्ण सदा प्रियं ॥
मातर्म्मातर्व्वरे दुर्गे सर्व्वकामप्रसाधनि ।
अनेन बलिदानेन सर्व्वान् कामान् प्रयच्छ मे(२) ॥
एवं दत्त्वा बलिं शक्र तथा देव्यावतारयेत् ।

(१) पूर्व्वादिषु समन्तत इति पाठान्तरं ।

(२) दिव्यान् लोकान् प्रयच्छ मे इति पुस्तकान्तरे पाठः ।

विन्यसेद्भद्रपीठे तु मण्डलैरुपशोभितां ॥
तत्रस्थां स्नापयेद्देवीं हेमरूप्यैस्ताम्रजैः।
कलशैरष्टसहस्रेण गन्धोदकसुपूरितैः ॥
समस्तफलसम्पूर्णैर्य्याज्ञियैरथ पल्लवैः।
स्नापयेदेकभक्तेन रत्नगर्भैर्नवैर्दृढैः ॥
वेदमङ्गलशब्देन शङ्खवादित्रनिस्वनैः।
वेणुवीणामृदङ्गैश्च घण्टाकिङ्किणिरावितैः ॥
स्नापयित्वा ततो देवीं निर्म्मञ्छेद्दर्पणैः शुभैः।

निर्म्मञ्छेदवरोयजेत्।

गोमयादि कृतैः पद्मैः दीपवर्त्यादिवोधितैः।
स्वस्तिकैर्नन्दिकावर्त्तैः शङ्खैर्नीलोत्पलोदजैः ॥
यवशाल्यङ्कुराद्भिन्नैर्यवचारैर्निमन्थयेत्।

उदजैः कमलैः।

यवचारैर्यवलवणैः।

प्रत्येकं तु दद्देद्धूपं प्रत्येकं कलशं क्षपेत्।
तथा कर्पूरतोयेन चन्दनं कुङ्कुमेन च ॥
गोरोचना समेतेन देवीं मालिप्य पूजयेत्।
हेमजैर्जातिमाल्यैश्च रत्नन्यासैरनेकधा ॥
वासोभिः सुमनोभिश्च पादद्वयं समुत्क्षिपेत्।
वस्त्र पुष्पोपरि चंक्रमणं कारयेदित्यर्थः ॥
दर्पयेच्च तथा कन्याद्विजान् दीनान्धदुःखितान्।
भक्ष्य भोज्यान्नपानेन तत्र सर्व्वांश्च प्रीणयेत् ॥
भोजयित्वा क्षमापयेद्देवी मे प्रीयतामिति।

तथा देवीं रथे कृत्वा पुनरेव गृहं नयेत् ॥
महता जनसंघेन समस्तविभवान्वितैः ।
सान्तरेण रथं सर्व्वं पुष्पदूर्व्वाक्षतैजलैः ।
प्रक्षिप्यमाणैः कन्याभिस्त्रीभिर्म्मङ्गलवादिभिः ॥
सलिलेन पथे पांशुं कृत्वा पश्च ततःक्रमात् ।
पुरशोभां पथः शोभां द्वारशोभां गृहे गृहे ॥
कारयीत तथाशक्र सर्व्वबाधां निवारयेत् ।
अच्छेद्यास्तरवस्तस्मिन् प्राणिहिंसां विवर्ज्जयेत् ॥
बन्धनस्थाश मोक्तव्या वध्याः क्रोधादिशत्रवः ।
अकाले कौमुदीं शक्र रथयात्रान्तु कारयेत् ॥

अकालेकौमुदीं दीपोत्सवः । तस्मिन्नकाले कुर्यादित्यर्थः

सर्व्वदा सर्व्वदेवैस्तु शङ्कराद्यैः प्रतिष्ठिता ।
रथयात्रा तथाशक्र सुरैःस्वर्गे सदा कृता ॥
तथा किन्नरगन्धर्वैर्भूपातालनिवासिभिः ।
रथयात्रा प्रभावेन मोदन्ते दिवि देवता ॥
आदित्ये रथराजेन्द्र रथेन नभसः क्रमेत् ।
देवादित्याविमानस्था रथयात्राप्रभावतः ॥
क्रीड़न्ति विविधैर्भोगैः सर्व्वातङ्कविवर्जिताः ।
तथात्वमपि देवेन्द्र रथमात्राकरोभव ॥
शिवाया शिवदायास्तु परमेण समाधिना ।

अगस्त्य उवाच ।

रथयात्रा समं पुण्यं ब्रह्मणा वासवस्य तु ।

पूर्व्ववत् कथितं तात तत्ते सर्व्वं मयाखिलं ॥
स्थापित नात्र सन्देहो देवीमाहात्म्यमुत्तमं।
यः पठेच्छृणुयाद्वापि भक्तिमान्नृप सत्तम ॥
स सुखं यशः सौभाग्यं पुत्रप्राप्तिमभीप्सिताम्।
लभते नात्र सन्देह इत्येव ब्राह्मणोऽब्रवीत् ॥
सुबलेन हृते राज्ये पुरा शक्रस्य कीर्त्तिता।
धनदस्य पुरीप्राप्तिर्वरुणस्य च वायुना ॥
हृते स्थाने कृता तेन तथा सुत्वाच नैर्ऋते।
भञ्जते परया तुष्ट्या पुरीं नागवतीं शुभां ॥

इति देवीपुराणोक्ता रथयात्रा।

रुद्र उवाच।

रथयात्रा कथं कार्य्या भास्करस्येह मानवैः।
फलञ्च किं भवेत्तेषां यात्रां कुर्व्वन्ति यत्न वै ॥
विधिना केन कर्त्तव्या कस्मिन् काले सुरोत्तम।
कथञ्च भ्रामयेद्देवं रथारूढं दिवाकरं ॥
देवस्येमं रथं भक्त्या भ्रामयन्ति ददन्ति च।
तेषां किञ्च फलं प्रोक्तं येच कल्यकरा नराः ॥
भ्रमन्तमर्च्चयन्त्येनं नृत्यगीतपरा नराः।
प्रजागरञ्च कुर्व्वन्ति भक्त्या श्रद्धासमन्विताः ॥

तेषाञ्च किं फलं प्रोक्तं रथं यच्छन्ति ये रवेः ।
वर्षभक्तञ्च यो भक्त्या दंशकानिच भोजनं ॥
वर्षभक्तं धान्योदनं दंशकानि खाद्यानि ।
एतन्मे ब्रूहि निखिलं सुरश्रेष्ठ सुविस्तरं ॥
लोकानां श्रेयसे देव परं कौतूहलन्तु मे ।

ब्रह्मोवाच ।

साधु पृष्टोसि भूतेश गणेशेश त्रिलोचन ।
शृणुष्वैकमना वच्मि यथा पृष्ट सुविस्तरं ।
देवस्य रथयात्रैषा भास्करस्य महात्मनः ॥
इन्द्रोत्सवस्तथा रुद्र मतौ द्वौ समौ यतः ।
मर्त्यलोके शान्तिहेतोर्लोकालोक प्रपूजितौ ॥
प्रवर्त्तिते इमौ तस्मिन् देशे देशे महोत्सवौ(१) ।
इमौ इन्द्रध्वजरविरथौ ।
न तत्रोपद्रवाः सन्ति राजतस्करसम्भवाः ।
तस्मात् कार्य्याविमौ भक्त्या दुर्भिक्षस्यापशान्तये ॥
शुक्लपक्षे तु सप्तम्यां मासि मार्गशिरे हर ।
घृतेनाभ्यञ्जयेद्देवं पश्च भूतान यजेत वै ॥
अभ्यञ्जयेत् ग्रहेशं यः सर्पिषा श्रद्धयान्वितः ।
दिने दिने जगन्नाथप्रविष्टं वर्णके रविं ॥

वर्णके उद्वर्त्तन गृहे ।

स गच्छेद्यानमारुह्य गैरिकं किङ्किणीवृतं ।

---

(१) देवोत्सवसमीतायौ इति पाठान्तरं ।

वैश्वानरपुरन्दिव्यं गन्धर्व्वाप्सरशोभितं॥
शाल्योदनं खण्डमिश्रं वहुवज्रसमन्वितम्।
वज्रसमन्वितं आज्यसमन्वितमित्यर्थः(१)।
वर्णभक्तं प्रयच्छेद्यो भास्कराय दिने दिने॥
आरूढ़ः सद्विमानं तु ध्वजमालाकुलं शुभं।
गच्छेन्मम पुरन्देव स्तूयमानो महर्षिभिः॥
तस्मात् सर्व्वप्रयत्नेन भास्कराय नरैः सदा॥
वर्ण भक्तं प्रदातव्यं प्रतिष्ठाप्येह वर्णकं।
घृतपूर्णां खण्डवेष्टां कासारं मोदकांश्च यः॥
दध्योदनं पायसञ्च संयावं गुडपूपकान्।
ये प्रयच्छन्ति देवस्य भास्करस्येह वर्णकं॥
ते गच्छन्ति न सन्देहो नरा वै मन्दिरं मम।
अहन्यहनि यो भक्त्या भास्कराय प्रयच्छति॥
अभ्यङ्गाय घृतं देव स याति परमां गतिं।
तथा यो वर्णभक्तञ्च अहन्यहनि भक्तितः।
सम्प्राप्येह शुभान् कामान् गच्छेत्सोपि ममालयं।
चूर्णमुद्वर्त्तनं नित्यं यः प्रयच्छेच्छुभं रवेः॥
स याति परमं स्थानं यत्र देवोदिवाकरः।
ततस्तं तर्पयेद्देवं(२) पौषे मासि विधानतः॥
सप्तम्यां शुक्लपक्षस्य शृणुष्वैकमना यथा।
तीर्थोदकं समानीय अभ्यङ्गाय जलं शुभं॥

---

(१) वज्रं घृतमिति पाठान्तरं।

(२) ततस्तं स्नापयेद्देवमिति पाठान्तरं।

यथाशा विमलाः सर्व्वाः सूर्य्यभास्करभानुभिः॥
तथाशा सकला मह्यं कुरु नित्यं मयार्च्चितः।

अर्घ्यमन्त्रः।

एवं तमर्च्चयेत्तावद्यावद्वर्षं समाप्यते।
समाप्ते तु व्रते वत्स कुर्य्यादुद्यापने विधिं॥
गोमयेनानुलिप्तायां भूमौ मण्डलमालिखेत्।
रक्तचन्दनरेखाभिः कुङ्कुमेन विशेषतः॥
तन्मध्ये द्वादशदलं पद्ममाकारयेद्बुधः।
सिन्दूरपूरितदलं जवाकुसुमपूरितं॥
तन्मध्ये स्थापयेत् कुम्भं प्रवालाङ्कुरसन्निभं।
शालितण्डुलसंपूर्णं शर्कराचन्दनान्वितं॥
तस्योपरि न्यसेत्पात्रं ताम्रं शक्त्या विनिर्म्मितं।
सौवर्णं भास्करं कृत्वा पद्महस्तं स्वशक्तितः॥
आदित्यरूपन्तु निष्कभाभास्करसप्तमीव्रतोक्तं वेदितव्यं।
रक्तवस्त्रयुगोपेतं पात्रोपरि निवेशयेत्॥
स्नाप्य पञ्चामृतेनादौ जवाकुसुमलेपितं।
रक्तपुष्पैस्तु नैवेद्यैः फलैः कालोद्भवैस्तथा॥
पूजयेज्जगतामीशं दीपधूपैस्तथोत्तमैः।

सूर्य्याय नमः। वरुणाय नमः। माधवाय नमः। धात्रे नमः। हरये नमः। भगाय नमः। सुवर्णरेतसे नमः। अर्यम्णे नमः। दिवाकराय नमः। तपनाय नमः। भानवे नमः। हंसाय नमः। इति द्वादशभिः पूजा कार्य्या।

नमोनमः पापविनाशनाय
विश्वात्मने सप्ततुरङ्गमाय।
सामर्ग्यजुर्धामनिधे विधातर्-
भवाब्धिपोताय नमः सवित्रे॥

प्रार्थनामन्त्रः।

अनेन मन्त्रेणार्घ्यं।

एवं संपूज्य मार्त्तण्डं नक्तं भुञ्जीत वाग्यतः।
आचार्य्यं पूजयित्वा तु वस्त्रैराभरणैः शुभैः॥
तस्मै तां प्रतिमां कुम्भं सहिरण्यं प्रदापयेत्।
प्रीयतां भगवान् देवो मम संसारतारकः॥
ब्राह्मणान् भोजयेत्पश्चाद्द्दगान्नादिविस्तरैः।
तेभ्यस्तु कलशान् दद्याद्यथा शक्त्या तु दक्षिणां॥
एवं यः कुरुते सम्यक् व्रतमेतदनुत्तमं।
आशादित्येति विख्यातं तस्य पुण्यफलं महत्॥
निर्व्याधिर्निपुनो(२) जस्वी पुत्रपौत्रसमन्वितः।
भुक्त्वा च भोगानमलानमरैरपि दुर्लभान्॥
देहान्ते रविसायुज्यं प्राप्नुयादुत्तमोत्तमं(१)।
प्राप्स्यसे परमामृद्धिं विमुक्तः कुष्ठरोगतः॥
आशाभङ्गो न तस्यास्ति कदाचिज्जन्मजन्मनि।
एतस्मात् कारणाद्वत्स कुरुष्व व्रतमुत्तमं॥
एतच्छ्रुत्वा वचः शाम्बः पित्रा कृष्णेन भाषितं।

---

(१) प्राप्नुयाद्धाम सप्तम इति पाठान्तरं।

(२) निरोगोबलीति पाठान्तरं।

व्रतं चरित्वा संप्राप्तः सर्वसिद्धिं सुदुर्लभां ॥
इदं यः शृणुयाद्भक्त्या श्रावयेद्वापि मानवः ।
तावुभौ पुण्यकर्माणौ रविलोकमवाप्नुतः ॥

इति स्कन्धपुराणोक्तं आशादित्यव्रतं ।

———000———

अथातः संप्रवक्ष्यामि रहस्यं ह्येतदुत्तमं ।
येन लक्ष्मीर्धृतिस्तुष्टि पुष्टिःकान्तिश्च जायते ॥
सर्व्वग्रहाः सदा सौम्या जायन्ते यत् प्रसादतः(१) ।
आदित्यवारहस्तेन पूर्व्वं संगृह्य भक्तितः ॥
मन्त्रोक्तविधिना सर्व्वं कुर्य्यात्पूजादिकं रवेः ।
प्रत्येकं सप्तनक्तानि कृत्वा भक्तिपरो नरः ॥
ततस्तु सप्तमे प्राप्ते कुर्य्याद्ब्राह्मणवाचनं ।
भास्करं शुद्धसौवर्णं कृत्वा यत्नेन मानवः ॥

आदित्यरूपं, आशादित्यव्रतवद्देदितव्यं ।

ताम्रपात्रे स्थापयित्वा रक्तपुष्पैः प्रपूजयेत् ॥
रक्तवस्त्रयुगच्छत्रं छत्रोपानद्युगान्वितं ।
घृतेन स्नापयित्वा तु लड्डुकान्विनिवेद्य च ॥
होमं घृततिलैः कुर्य्याद्रविनाम्ना तु मन्त्रवित् ।
समिधोष्टोत्तरशतमष्टाविंशतिरेव वा ॥
होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन वा ।

समिधोत, अर्कसमिधः ।

(१) येन पापञ्च इति पाठान्तरं ।

मन्त्रेणानेन विदुषे ब्राह्मणायोपपादयेत्।
आदिदेव नमस्तुभ्यं सप्तसप्ते दिवाकर॥
त्वं रवे तारयस्वास्मानस्मात् संसारसागरात्।
व्रतेनानेन राजेन्द्र भवेदारोग्यमुत्तमं॥
द्रव्य-संपत्सुतप्राप्तिरिति पौराणिका विदुः।
अविसम्वादिनी चेयं शान्तिः पुष्टिः सदा नृणां(१)॥

इति भविष्यपुराणोक्तमादित्यशान्तिव्रतम्।

——००——

नारद उवाच।

यदारोग्यकरं नृणां यदनन्तफलप्रदं।
व्रतं तत् ब्रूहि मे नन्दिन् सर्व्वपापप्रणाशनं॥

नन्दिकेश्वर उवाच।

यत्तद्विश्वात्मनो धाम परं ब्रह्म सनातनं।
सूर्य्याग्नि चन्द्ररूपेण त्रिधा जगति संस्थितं॥
तदाराध्य शुभं विप्र प्राप्नोति कुशलं सदा।
तस्मादादित्यवारेण सदा नक्ताशनो भवेत्॥
यदा हस्तेन संयुक्तमादित्यस्य च वासरं।
उत्पद्यते यदा भक्तिर्भानोरुपरि शाश्वती।
तदा दित्यदिने कुर्य्यादेकभक्तं विमत्सरः॥
तदारभ्य सदा कार्य्यं नक्तमादित्यवासरे।
नक्तमादित्यवारेण भोजयित्वा द्विजोत्तमान्॥
ततोऽस्तसमये भानो रक्तचन्दनपङ्कजं।

(१) सूर्य्यघोरा सुघोरासु सता शान्ति. शुभप्रदा इति पुस्तकान्तरे पाठः।

विलिख्य द्वादशदलं पूज्य सूर्येति पूर्व्वतः ॥
दिवाकरं तथाग्नेये विवस्वन्तमतःपरं ।
भगन्तु नैर्ऋते देवं वरुणं पश्चिमे दले ॥
महेन्द्रं मारुतदले आदित्यन्तु तथोत्तरे ।
शान्तमीशानभागे तु नमस्कारेण विन्यसेत् ।
कर्णिका पूर्व्वभागे तु सूर्य्यस्य तुरगान्न्यसेत् ॥
दक्षिणे यमनामानं मार्त्तण्डं पश्चिमे दले ।
उत्तरेण रविं देवं कर्णिकायान्तु भास्करं ॥
अर्घ्यं दत्त्वा ततो विप्र सतिलारुणचन्दनं ।
यथाचतममायुक्तमिमं मन्त्रमुदीरयेत् ॥
कालात्मा सर्वभूतात्मा सविता सर्व्वतोमुखः(१) ।
यस्मादग्नीन्दुरूपस्त्वमतः पाहि प्रभाकरः ॥
अग्निमोले नमस्तुभ्यमिषेत्वोर्जेति भास्करः ।
अग्न आयाहि वरदं नमस्ते ज्योतिषाम्पते ॥
अर्घ्यं दत्त्वा विसृज्याथ निशि तैलविवर्जितं ।
भुञ्जीत भावितमना भास्करं संस्मरन् मुहुः ॥
प्राक्तनेऽह्नि शनौ चैव तैलाभ्यङ्गं विवर्ज्जयेत् ।
वत्सरान्ते कारयित्वा काञ्चनं कमलात्तमं ॥
पुरुषन्तु यथा शक्त्या कारयेद्द्विभुजन्तथा(२) ।
सुवर्णशृङ्गीं कपिलां महार्घ्यां
रौप्यैः खुरैः कांस्यदोहां सवत्सां ।

---

(१) वेदात्मा सर्व्वतो मुख इति पाठान्तरं ।

(२) कारयेच्च द्विभोगममिति वा पाठ. ।

पूर्णं गुडस्योपरि ताम्रपात्रे
निधाय पद्मं पुरुषस्य दद्यात् ॥
संपूज्य रक्ताम्बरमाल्यधूपैः
द्विजस्य रक्तैरथवा पिशङ्गैः।
प्रक्षालयित्वा पुरुषं सपद्मं
दद्यादनेकव्रतदानकाय ॥
अव्यङ्गरूपाय जितेन्द्रियाय
कुटुम्बिने शुद्धमनुव्रताय।
नमोनमः पापविनाशनाय
विश्वात्मने सप्ततुरङ्गमाय ॥
सामर्ग्यजुर्धामनिधे विधात्रे
भवाब्धिपोताय जगत् सवित्रे।
त्रयीमयाय त्रिगुणात्मने नमः
त्रिलोकनाथाय नमो नमस्ते ॥
इत्यनेन विधानेन वर्षमेकन्तु यो नरः ॥
नक्तमादित्यवारेण कुर्य्यात्स निरुजो भवेत्।
धनधान्यसमायुक्तः पुत्र-पौत्रसमन्वितः ॥
मर्त्ये स्थित्वा चिरं कालं सूर्य्यलोकमवाप्नुयात्।
कर्म्मसंचयमवाप्य भूपति-
र्दुःख-शोक-भय-रोगवर्ज्जितः।
द्वीपसप्तकपतिः पुनः पुन-
र्धर्म्ममूर्त्तिरमितौजसा युतः ॥

या च देवगुरुभर्त्तृतत्परा
वेदमूर्त्तिदिननक्तमाचरेत्।
सापि लोकममरेशपूजिता
याति नारद रवेर्न संशयः॥
वेदमूर्त्तिः सूर्य्यस्तद्दिने नक्तमित्यर्थः।
यः पठेदथ शृणोति वा नरः
पश्यतीदमथवानुमोदयेत्।
सोपि शक्रभवने दिवौकसैः
कल्पकोटिशतमेव मोदते॥

इति मत्स्यपुराणोक्तं सूर्य्यनक्तव्रतं।

अथ वेश्याव्रतं।

युधिष्ठिर उवाच।
वर्णाश्रमाणां प्रभवः पुराणेषु मया श्रुतः।
पण्यस्त्रीणां समाचारं श्रोतुमिच्छामि तत्त्वतः॥
का ह्यासां देवता कृष्ण किं व्रतं किमुपोषितं॥
केन धर्मेण चैवैताः स्वर्गमाप्नुवन्त्यनुत्तमं।
कृष्ण उवाच।
मम पत्नीसहस्राणि शतं पाण्डव षोडश।
रूपौदार्य्यगुणोपेता मन्मथायतनाः शुभाः॥
ताभिर्व्वसन्तसमये कोकिलालिकुलाकुले।
पुष्पितोपवनोत्फुल्लकल्हारसरसस्तटे॥

निद्रापानगोष्ठीभिरथदामैरलङ्कृतः ।
कुसुमानयनः श्रीमान् मालतीकृतशेखरः ॥
गच्छेत् समीपमेतासां ग्राम्यः पुरपुरञ्जयः ।
साक्षात् कन्दर्परूपेण सर्व्वाभरणभूषितः ॥
अनङ्गशरतप्ताभिः साभिलाषमवेक्षितः ।
प्रवृत्तो मन्मथस्तासां सर्व्वाङ्गक्षोभदायकः ।
तदीक्षितं मया सर्व्वं विकारं ध्यानचक्षुषा ।
अशपं रुषितः सर्व्वा हरिष्यन्तीह दस्यवः ॥
मयि स्वर्गमनुप्राप्ते भवतीः काममोहिताः ।
एतद्वाक्यमुपाश्रुत्य वाष्पपर्य्याकुलेक्षणः ॥
मामूचुर्वद गोविन्द कथमेतद्भविष्यति ।
भर्त्तारं जगतामीशं त्यक्त्वा यामो परान्तिकं(१) ॥
दिव्यानुभावञ्च पुरीं रत्नवन्ति गृहाणि च ।
द्वारकावासिनः सर्व्वे देवरूपाः कुमारकाः ।
भगवन् सर्व्वलोकस्य कथं भोगं भजाम्यहं ॥
दासभावमनुप्राप्ता भविष्यामः कथं पुनः ।
को धर्म्मः कः समाचारः कथं वृत्तिर्भविष्यति ॥
तथा लालप्यमानास्ता वाष्पपर्य्याकुलेक्षणाः ।
मया प्रोक्ता युवतयः सन्तापं त्यजतामिमं ॥

पद्मपुराणे दाल्भ्य गोपी सम्वादे ।

दाल्भ्य उवाच ।

जलक्रीडाविहारेषु पुरा सरसि मानसे ।

(१) तं वाञ्छमापराश्च ममिति क्वचित्पाठः ।

भवतीनाञ्च सर्व्वासां नारदोऽभ्यासमागतः ॥
हुताशनसुताः सर्व्वा भवत्योऽप्सरसः पुरा।
अप्रणम्यावलेपेन परिपृष्टः स योगवित् ॥
कथं नारायणोऽस्माकं भर्त्ता स्यादित्युपादिश।
तस्माद्वरप्रदानञ्च शापश्चायमभूत्पुरा ॥
यस्मादेषा प्रधानेव मधुमाधव मासयोः।
सुवर्णोपस्करोत्सर्गं द्वादशी शुक्लपक्षतः।
भर्त्ता नारायणो नूनं भविष्यत्यन्यजन्मनि ॥
यद्कृत्वा प्रणामं मे रूपसौभाग्यमत्सरात्।
परिपृष्टोऽस्मि ते नाथवियोगो वो भविष्यति ॥
चौरैरपहृताः सर्व्वा वेश्या त्वं समवाप्स्यथ।
एवं नारदशापेन केशवस्य च धीमतः ॥
वेश्यात्वमागताः सर्व्वा भवत्यः शापमोहिताः।
इदानीमपि यद्वच्मि तच्छृणुध्वं वराङ्गनाः।
पुरा देवासुरे युद्धे हतेषु शतशः सुरैः ॥
देवतासुरसैन्येषु राक्षसेषु ततस्ततः।
तेषां नारी सहस्रेषु शतसोऽथ सहस्रशः(१) ॥
परिनीतानि यानि स्युः बलाद्भुक्तानि यानि च।
तानि सर्व्वाणि देवेश प्रोवाच वदतांवर ॥
वेश्याधर्मेण वर्त्तध्वमधुना नृपमन्दिरे।
भक्तिमत्यो वरारोहास्तथा देवकुलेषु च ॥
राजानः स्वामिनस्तुल्यं ब्राह्मणाय बहुश्रुताः।

---

(१) तेषां शतसहस्राणि शतान्यपि च योषितामिति वा पाठः।

तेषां गृहेषु तिष्ठध्वं सूतकं वापि तत्समं ॥
भविष्यति च सौभाग्यं सर्व्वासां मयि भक्तितः।
न कदाचिद्रतिः कार्य्या पुंसि धनविवर्जिते ॥
अनुमानाः प्रसाद्यश्च शुल्कदो देववत्सदा।
सुरूपो वा विरूपो वा द्रव्यं तत्र प्रयोजनं॥
द्रव्योपहार्थमेवात्र सर्व्वदम्भविवर्जितं।
यः कश्चित् मुनिश्रेष्ठोपि गृहमेष्यति वः सदा ॥
निश्छद्मत्वेन सेव्यो वः स एवान्यत्र दाम्भिकान्।
द्वेषाचारो न कर्त्तव्यः स्वामिना सह कर्हिचित् ॥
रूपयौवनदर्पेण धनलोभेन वा सदा।
कामश्च कान्ते या काचित् व्यभिचारं करोति च ॥
स्वामिना सह पापिष्टा पापिष्ठो यात्यधोगतिं।
देवतानां पितॄणाञ्च पुण्येऽह्नि समुपस्थिते ॥
गो भू हिरण्य दानानि(१) प्रदेयानि च शक्तितः।
ब्राह्मणेभ्यो वरारोहा कार्य्याणि सुव्रतानि च ॥
यथाप्यन्यत् व्रतं सम्यक् उपदेक्ष्यामि तत्त्वतः।
अविचारेण सर्व्वाभिरनुष्ठेयञ्च तत्पुनः ॥
संसारोत्तरणायालमेतद्वेदविदो विदुः।
यदा सूर्य्यदिने हस्तः पुष्यो वाथ पुनर्व्वसुः ॥
भवेत्सर्व्वौषधीस्नानं सम्यङ्नारी समाचरेत्।
तदा पञ्चशरव्यापिसन्निधानत्वमिष्यते ॥

(१) धान्यानीति क्वचित् पाठः।

अर्चयेत् पुण्डरीकाक्षमनङ्गस्यापिकीर्त्तनं ।
कामाय पादौ संपूज्य जङ्घे मन्मथाय च(१) ॥
मेढ्रं कन्दर्पनिधये कटिं प्रीतिपतयेनमः ।
नाभिं सौख्यसमुद्राय वामनाय तथोदरं ॥
हृदयं हृदयेशाय स्तनावाह्लादकारिणे ।
उत्कण्ठायेति वै कण्ठमास्यमानन्दजाय च ॥
वामांशं पुष्पचापाय पुष्पबाणाय दक्षिणं ॥
ललाटं पुष्पबाणेति शिरः पञ्चशराय वै ।
नमोऽनङ्गाय वै मौलिं विलोमायेति जङ्घयोः(२) ॥
सर्व्वात्मने शिरःपूज्यं देवदेवस्य पूजयेत् ।
नमः श्रीपतये तार्क्ष्यध्वजाङ्कधराय च ॥
गदिने पद्महस्ताय(३) शङ्खिने चक्रपाणये ।
नमोनारायणायेति कामदेवात्मने नमः ॥
नमः शान्त्यै नमस्तुष्ट्यै, नमो रत्यै नमः श्रियै(४) ।
नमः स्तुष्ट्यै, नमपुष्ट्यै, नमः सर्व्वप्रदेति च ॥
एवं संपूज्य गोविन्दमनङ्गात्मकमीश्वरं ।
गन्धैर्माल्यैस्तथा धूपैर्नैवेद्यैर्नवभामिनि(५) ॥
तत आहूय: धर्मज्ञं ब्राह्मणं वेद पारगं ।

(२) अङ्गे कामोपकारिणे इति क्वचित् पाठः ।
(२) ध्वजमिति वा पाठः ।
(३) पीतवस्त्राय इति वा पाठः ।
(४) नमः प्रज्ञै नम शान्त्यै इति क्वचित् पाठः ।
(५) शोभने इति वा पाठः ।

अथांगावयवं पूज्य गन्धपुष्पादिभिस्तथा(१) ॥
शालेयतण्डुलप्रस्थं घृतपात्रेण संयुतं।
तस्माद्विप्राय दातव्यं कृष्णः प्रीयतामिति।
यथेच्छाहारभुक्तन्तं तमेव द्विजसत्तमं ॥
रत्यर्थं कामदेवोयमिति चित्तेन भाव्यतां(२)।
यद्यदिच्छति विप्रेन्द्रस्तत्तत् कुर्य्यात् विलासिनी ॥
सर्व्वाभावेन चात्मानमर्पयेत् स्मितभाषिणी।
एवमादित्यवारेण सदा तद्व्रतमाचरेत(३)॥
तण्डुलप्रस्थदानादियावन्मासास्त्रयोदश।
ततस्त्रयोदशे मासि संप्राप्ते तस्य कामिनी ॥
विप्रस्योपस्करैर्युक्तां शय्यां दद्याद्विलक्षणां(४)।
सोपधानकविश्रामं स्वास्तरावरणां शुभां ॥
दीपकोपानहच्छत्रपादुकासनसंयुतां।
सपत्नीकमलंकृत्य हेमसूत्रांगुलीयकैः ॥
सूक्ष्मवस्त्रैः सकटकैः धूपमाल्यानुलेपनैः(५)।
कामदेवं सपत्नीकं गुड़कुम्भोपरिस्थितं ॥
कामदेवरूपन्तु मदनत्रयोदशीव्रतोक्तं विज्ञेयं।
ताम्रपात्रासनगतं हैमनेत्रपटावृतं।

---

(१) पुष्पमण्डूकचन्दनैरिति वा पाठः।
(२) यथाचित्तेनधारयेदिति क्वचित् पाठः।
(३) सर्व्वमेतत् समाचरेदिति वा पाठः।
(४) विप्रश्रोत्रियैर्युक्तां शय्यांदद्याद्विचक्षण इति वा पाठः।
(५) गन्धमाल्यानुलेपनैरिति क्वचित् पाठः।

शुक्लास्यभाजनोपेतमिक्षुदण्डसमन्वितं ॥
दद्याद्यथोक्तविधिना (१) तथैकां गां पयस्विनीं ।
यथान्तरं न पश्यामि कामकेशवयोः सदा ॥
तथैव सर्वकामाप्तिरस्तु विष्णोः सदा मम ।
यथा न कमला देहात् प्रयाति मम केशवे ॥
तथा ममापि देवेश शरीरस्थं पतिं कुरु(२) ॥
तथैव काञ्चनं देवं प्रतिगृह्य द्विजोत्तमः ।
कोदादिति पठेन्मन्त्रं ध्यायंश्चेतसि माधवं ॥

कोदादिति, यजुर्व्वेदशाखाप्रसिद्धोमन्त्रः ।

ततः प्रदक्षिणीकृत्य विसृज्य द्विजपुङ्गवं ।
शय्यासनादिकं सर्व्वं ब्राह्मणस्य गृहं नयेत् ।
ततः प्रभृति योन्योपि(३) रत्यर्थी गृहमागतः ।
स सम्यक् सूर्य्यवारेण स सुपूज्यो यथेच्छया (४) ।
एवं त्रयोदशं यावत् मासमेकं द्विजोत्तम ॥
तर्पयीत यथा कामं प्रोषितो रविमन्दिरे ।
तदनुज्ञां निषेवेत यावदस्यागमो भवेत् ।
एवमेकं द्विजं शान्तमाचारज्ञं विचक्षणं ॥
संपूजयेच्चतुःप्राश्रमपरं वरदाज्ञया ।
आत्मनोपि यदा विघ्नं गर्भसूतकजन्मजं(५) ॥

---

(१) यथोक्तमन्त्रैरिति क्वचित पाठः।
(२) स्वयं त्वं पतिं कुर्व्विति क्वचित् पाठः।
(३) यो विप्र इति वा पाठः।
(४) सम्मान्यः सूर्य्यवारे च स्नानमद्यादिभोजनैरिति वा पाठः।
(५) गर्भसूतकरोगजमिति वा पाठः।

दैवं वा मानुषं वाप्यादुपरागेषु वा पुनः।
लक्ष्मीर्वियुज्यते देव न कदाचिद्यथा तव॥
शय्या ममापि शून्यास्तु तथैव मधुसूदन।
गीतवादित्रनिर्घोषं देवदेवस्य कारयेत्॥
एतद्धि कथितं सम्यग्भवतीनां विशेषतः।
सुधर्म्मोयं परो भावो वेश्यानामिह सर्व्वथा॥
पुरुहूतेन यत् प्रोक्तं दानवेषु पुरा मया।
तदिदं साम्प्रतं सर्व्वं भवतीष्वपि युज्यते॥
सर्व्वपापप्रशमनमनन्तफलदायकं।
साचारानष्टदश वा(१) यथा शक्त्या प्रपूजयेत्॥
एवप्रोक्तं मया राजन् दानवेषु ततो मया।
तदिदञ्च व्रतं सर्व्वं वेश्यानाञ्च प्रकाशितं॥
पुराणं धर्म्मसर्वस्वं वेश्याजनसुखप्रदं।

करोति याशेषमखण्डमेतत्
कल्याणिनी माधवलोकसंस्था।
सा पूजिता देवगणैरशेषै-
रानन्दकृत्स्थानमुपैति विष्णोः॥

इति श्रीभविष्योत्तरे कामदाने वेश्याव्रतं नाम(२)।

---

(१) चतुष्पञ्चाशद्विति वा पाठः।

(२) इति पद्मपुराणोक्त वेश्याव्रतमिति वा पाठः।

सूत उवाच ।

मेरुपार्श्वे भद्रपीठे सुखासीनं जगद्गुरुं ।
कश्यपं सृष्टिकर्त्तारं तापसं शुद्धमानसं ॥
नारदो वैष्णवश्रेष्ठस्त्रैलोक्यभ्रमणप्रियः ।
कदाचिद्दुर्दशां प्राप्य कश्यपं शरणं ययौ ॥

नारद उवाच ।

देव-दानव-गन्धर्व्व-ऋषि-पन्नग-मानवाः ।
स्रष्टा त्वं सर्वभूतानां धर्म्माधर्मौ हि वेत्सि च ॥
दुष्टग्रहाभिभूतानां दुर्दशाहतचेतसां ।
उपायं वद तेषां त्वं शरणागतवत्सल ॥

कश्यप उवाच ।

तां छेत्तुं ब्रूहि विप्रेन्द्र केन मुक्ता भवन्ति ते ।
साधु पृष्टं महाभाग जगदानन्दकारक ॥
वक्ष्ये सौरव्रतं पुण्यं दुर्दशान्तकरं परं ।
दयाकरं हि भूतानां मनोरथकरं परं ॥
भानुवारे सिते पक्षे दशम्यां चैव नारद ।
प्रातः कालेऽथ मध्याह्ने स्नानं कुर्य्याद्यथाविधि ॥
भानुर्ध्यायेत्त्रिमूर्त्तिं हि सर्व्वदैन्यविनाशनं ।
सूर्य्यपूजा प्रकर्त्तव्या तथा गन्धानुलेपनैः ॥
उपचारैः षोडशभिर्नैवेद्यैस्तु फलान्वितैः ।
पूजयेद्दुर्दशां तत्र लिखित्वा दशपुत्रिकाः ॥
दुर्मुखा दीनवदना मलिनाऽसत्यवादिनी ।

सुबुद्धिनाशिनी हिंस्रा बहुचिन्ताप्रदायिनी॥
उच्चाटकारिणी नाम दुश्चरित्रविरोधिनी।
एताः पूज्याः कृष्णवर्णा भक्तियुक्तेन चेतसा॥
आदौ पूज्या प्रयत्नेन गोमयेनोपलेपयेत्।
नित्यं पापकरा पापा देवद्विजविरोधिनी॥
गच्छ त्वं दुर्दशे देवि नित्यं शत्रुविवर्द्धिनि।
अनेन प्रार्थये लौहि प्रयत्नेन विसर्जयेत्॥
ततः पूजा प्रकर्त्तव्या डोरकूपे च भास्करे।
दशग्रन्थिसमायुक्तं दशसूत्रोपशोभितं॥
डोरकं तु प्रतिष्ठाप्य पूजां कृत्वा करे न्यसेत्।
आवाहनादिदानान्तं पूजनं कारयेत्ततः॥
तत्र देवं समाध्याय दशापूजां समारभेत्।
भूमिभागे च पीठे वा लिखित्वा दशपुत्तिकाः।
सुवृद्धिदा सुखकरी सर्व्वसम्पत्तिदायिनी।
हृत्यष्टभोगप्रदा लक्ष्मीः कीर्त्तिदा दुःखनाशिनी॥
बुद्धिदात्री सुखकरा सर्व्वसम्पत्तिदायिनी।
पुत्रश्रेष्ठा च विजया दशमी धर्म्मदायिनी॥
एभिस्तु नामभिर्मन्त्रैः पूजनीयाः पृथक् पृथक्।
प्रतिष्ठापूजनं कार्य्यं नैवेद्यञ्च यथा विधि॥
विचित्रवसनां देवीं सर्व्वाभरणभूषितां।
ध्यायेद्दशदशादेवीं वरदाभयदायिनीं॥
इति ध्यानं प्रकुर्व्वीत दशायाः शासने रतः।

फलस्तु दशसंख्याकैर्भुञ्जीयात्तैलवर्जितं ॥
एवं व्रतं प्रकर्त्तव्यं दशाप्राप्तिकरं परं ।

नारद उवाच ।

कश्यप त्वत्प्रसादेन श्रुतं हि व्रतमुत्तमं ।
दशाव्रतं कृतं केन कस्य तुष्टो हि भास्करः ॥

कश्यप उवाच ।

पुरा तु नलभूपालश्चक्रवर्त्तिषु धार्म्मिकः ।
राज्यभ्रष्टो दशाहीनो द्यूतेनैव हि नारद ॥
तेनापि पूजितः सूर्य्यो व्रतं कृत्वा प्रयत्नतः ।
दुर्द्दशां नाशयित्वा तु राज्यं प्राप्तं स्त्रिया सह ।
ततश्च द्वापरे विप्राः पीड़या दुर्द्दशान्विताः ।
भ्रममाणा वने घोरे प्राप्ताः सत्यवतीसुतं ॥

युधिष्ठिर उवाच ।

राज्यभ्रष्टो दशाहीनो राजाहं केन कर्म्मणा ।
इदानीं मे हितं ब्रूहि राज्यप्राप्तिकरं परं ॥
चूर्णिं ध्यात्वा मुनिश्रेष्ठो दृष्ट्वापि च दशाकरं ।
व्रतोपदेशनं चास्य चकार मुनिपुङ्गवः ॥
चस्य व्रतस्य सामर्थ्यात् प्राप्तं राज्यमकण्टकं ।
व्रतं कृत्वा च विधिना चतुर्भिर्भ्रातृभिः सह ॥
श्रुत्वेदं नारदो वाक्यं पुनः पप्रच्छ कश्यपं ।

नारद उवाच ।

केन कर्म्मविपाकेन दुर्द्दशाभिहतो नरः ।
जायते मुनिशार्दूल तत्त्वं मे वक्तुमर्हसि ॥

कश्यप उवाच।

शृणु नारद तत्सर्व्वं दुर्दशा प्राप्यते नरैः।
तुष-भस्मा-स्थि-मुसलं कदाचिल्लङ्घयेन्न तु॥
कुमारीं रजकीं वृद्धां पशुयोनिरताश्च ये।
अयोनिगुदगामी च ब्राह्मणीगमनेन च॥
सन्ध्यासु पर्व्वसमये रमते च रजस्वलां।
पितृमातृपरित्यागी स्वामिनं रणसङ्कटे॥
त्यजेत् स्वधर्म्मपर्व्वौ यो दुर्दशा प्राप्यते नरैः।
तस्मात्सर्व्वप्रयत्नेन मान्यमार्गेण वर्त्तयेत्॥
तस्मात्तु तद्व्रतं कार्य्यं सर्व्वकामार्थसिद्धये।

इति श्रीब्रह्माण्डपुराणे कश्यपनारदसम्वादे दशादित्यव्रतं।

सौरधर्म्मे मान्धातृवशिष्ठसंवादे मान्धातोवाच।

भगवन् ज्ञानिनां श्रेष्ठ कथयस्व प्रसादतः।
त्वद्वक्त्राच्छ्रोतुमिच्छामि व्रतं पापप्रणाशनम्॥
सर्व्वकामप्रदञ्चैव सर्व्वामयविनाशनं।
पूजार्घ्यदानसहितं नैवेद्यं प्राशनाचितं॥
एतत् कथय सर्व्वं त्वं प्रसन्नो यदि मे प्रभो।

वसिष्ठ उवाच।

शृणु राजन् प्रवक्ष्यामि यद्व्रतं व्रतमुत्तमं।
सर्व्वकामप्रदं पुंसां कुष्ठादिव्याधिनाशनं।
भानोस्तुष्टिकरं राजन् भुक्तिमुक्तिप्रदायकं॥
यस्योदये सुरगणा मुनिसङ्घाः सचारणाः।

देव दानव-यक्षाद्य कुर्व्वन्ति सततार्चनम् ॥
यस्योदये तु सर्व्वेषां प्रबोधो नृपसत्तम ।
तस्य देवस्य वक्ष्यामि व्रतं राजन् सविस्तरं ॥
पूजार्घ्यप्राशनं दानं नैवेद्यं शृणु तत्वत: ।
सर्व्वतीर्थेषु यत्पुण्यं सर्व्वयज्ञेषु यत्फलं ॥
सर्व्वदानेन तपसा यत्पुण्यं समवाप्यते ।
प्रात:स्नानेन यत्पुण्यं यत्पुण्यं रविवासरे ॥
मार्गशीर्षादिमासेषु द्वादशस्वपि भूपते ।
सूर्य्यव्रतं करिष्यामि यावद्वर्षं दिवाकर ॥
व्रतं संपूर्णतां यातु त्वत्प्रसादात् प्रभाकर ।

नियममन्त्र: ।

तत: प्रात: समुत्थाय नद्यादौ विमले जले ।
स्नात्वा सन्तर्पयेद्देवान् पितृंश्च वसुधाधिप ।
उपलिप्य शुचौ देशे सूर्य्यं तत्र समर्च्चयेत् ।
संलिखेत्तत्र पद्मन्तु द्वादशारं सकर्णिकं ॥
ताम्रपात्रे तथा नद्या रक्तचन्दनवारिणा ।
तत्र संपूजयेद्देवं दिननाथं सुरेश्वरं ॥
मासे मासे च ये राजन् विशेषास्तान् शृणुष्व वै ।
मार्गशीर्षे यजेन्मित्रं नालिकेरार्घ्यमुत्तमं ॥
नैवेद्यं तण्डुला देया: सश्राज्या: सगुडा: स्मृता: ।
पत्रत्रयं तुलस्यास्तु प्राश्य तिष्ठेज्जितेन्द्रिय: ॥
दद्याद्द्विप्राय भोज्यन्तु दक्षिणासहितं नृप ।
पौषे विष्णुं समभ्यर्च्य नैवेद्यं क्षशरं तथा ॥

बीजपूरेण चैवार्घ्यं प्राश्यं घृतपलत्रयं।
दद्यात् घृतन्तु विप्राय भोजनेन समन्वितं॥
माघे वरुणनामानं संपूज्य सतिलं गुड़ं।
भोजनं दक्षिणां दद्यान्नैवेद्यं कदलीफलं॥
अर्घ्यं तेनैव दत्त्वा तु प्राश्या मुष्टित्रयञ्जलाः।
फाल्गुने सूर्य्यमभ्यर्च्य जम्बीरार्घ्यं निवेदयेत्॥
पलत्रयं दधि प्राश्यं नैवेद्यं सघृतं दधि।
दधितण्डुलदानञ्च भोजने समुदाहृतं॥
चैत्रे भानुन्तु संपूज्य नैवेद्यं घृतपूरिका।
फलं तु दाड़िमं प्रोक्तं प्राश्यं दुग्धपलत्रयं॥
विप्राय भोजनं दद्यात् मिष्टान्नन्तु सदक्षिणं।
वैशाखे तपनः प्रोक्तो माषान्न सघृतं स्मृतं॥
अर्घ्यं दद्यात्तु द्राक्षाभिः प्राशनं गोमयस्यतु।
कुर्यान्मासानुमासन्तु सघृतं वै सदक्षिणं॥
इन्द्रं ज्येष्ठे यजेद्राजन् नैवेद्यन्तु करम्भकम्।
अर्घ्यञ्च सहकारेण प्राश्यं जलाञ्जलित्रयं॥
दध्योदनसमायुक्तं भोजनं ब्राह्मणाय तु।
आषाढ़े रविमभ्यर्च्य पूजा विभीतकन्तथा॥
विप्राय भोजनं दद्यात् प्राशयेत् मरिचत्रयं।
गभस्तिमांश्छ्रावणेऽर्घ्यं त्रपुषाफलमेव च॥
मुष्टित्रयञ्च सक्तूनां प्राशने समुदाहृतं।
विप्राय भोजनं दद्याद्दक्षिणा सहितं नृप॥
यदा भाद्रपदे पूज्यः कुष्माण्डं तण्डुलात्मकं।

गोमूत्रं प्राशने युक्तं प्राशने भोजनं तथा ॥
हिरण्यरेता आश्विने च नैवेद्यं शर्करा स्मृतं ।
दाड़िमे नार्घ्यदानन्तु प्राश्यं खण्डपलत्रयं ॥
विप्राय परया भक्त्या भोजने शालिशर्करा ।
कार्तिके चैवरम्भायाः प्राशने फलमेव च ॥
पायसञ्चैव नैवेद्यं पायसं प्राशने स्मृतं ।
एवं व्रतं समाप्यैतत्तत उद्यापनं चरेत् ॥
ततो गुरुगृहं गत्वा गृह्णीयाच्चरणावुभौ ।
उद्यापनं करिष्येहं मागच्छ मम वेश्मनि ॥
माषकेन सुवर्णस्य प्रतिमाङ्कारयेद्रवेः ।
रथो रूप्यमयः कार्य्यः सर्व्वोपस्करसंयुतः ॥
कृत्वा द्वादशपत्रन्तु कमलं रक्ततण्डुलैः ।
स्थापयेद्व्रणं कुम्भं पञ्चरत्नसमन्वितं ॥
तस्योपरि न्यसेत्पात्रं ताम्रं तण्डुलपूरितं ।
रक्तवस्त्रसमाच्छन्नं पुष्पमालाभिवेष्टितं ॥
पञ्चामृतेन स्नापयेत मन्त्रुच्चारणपूर्व्वकं ।
प्रतिष्ठाप्य ततः कृत्वा पूजां देवस्य कारयेत ॥
चन्दनैः कुसुमैरन्यैर्विविधैः कालसम्भवैः ।
अखण्डपट्टवस्त्रैश्च कमण्डलुमुपानहौ ॥
वर्द्धनीत्रितयं तत्र स्थापयेद्देवसन्निधौ ।
संख्यया वस्त्रयुग्मन्तु कौसुम्भन्तु महीपते ।
प्रतिपदेषु संपूज्यः सूर्य्यद्वादशनामभिः ॥
मित्रो विष्णुः सवरुणः सूर्य्यो भानुस्तथैव च ।

तपनेन्द्रो रविः पूज्यो गभस्तिः यमनः स्तथा ॥
हिरण्यरेता दिनकृत् पूज्य एते प्रयत्नतः।
मध्ये सहस्रकिरणः संपूज्य संज्ञया सह ॥
पूगीफलैर्धूपदीपैर्वस्त्र-नैवेद्यसंयुतैः।
नारिकेलेन चैवार्घ्यं दद्याद्देवस्य भक्तितः॥
मन्त्रेणानेन राजेन्द्र व्रतस्य परिपूर्त्तये।
नमः सहस्रकिरण सर्व्वव्याधिविनाशन ॥
गृहाणार्घ्यं मया दत्तं संज्ञया सहितो रवे।

अर्घ्यमन्त्रः।

आरात्रिकं ततः कृत्वा पूजा-सहस्रमेव च।
संकल्पश्च ततः श्राद्धं कार्य्यं वै सूर्य्यदैवतं।
ब्राह्मणान् भोजयेद्भक्त्या मिष्टान्नैर्द्वादश प्रभो।
दम्पत्योर्भोजनं देयं परमान्नसमन्वितं॥
ततस्तु दक्षिणां दद्यात् समभ्यर्च्च स्रगादिभिः।
उपहारादितत्सर्व्वं गुरवे प्रतिपादयेत्॥
गुरुं तत्रैव सन्तोष्य ब्राह्मणांश्च विसर्ज्जयेत्।
मन्त्रहीनं क्रियाहीनं विधिहीनन्तु यत्कृतं॥
तत्सर्व्वं पूर्णतां यातु भूमिदेवप्रसादतः।
अनुव्रज्य गुरुं विप्रान् भोजनन्तु समाचरेत्॥
इष्टांश्च बन्धुभिः सार्द्धं नत्वा देवं दिवाकरं।
एवं यः कुरुते मर्त्यो वित्तशाठ्यविवर्जितः॥
सूर्य्यव्रतं महाराज तस्य पुण्यफलं शृणु।
ब्राह्मणो लभते विद्यां क्षत्रियो राज्यमाप्नुयात्॥

वैश्यो धनसमृद्धिञ्च शूद्रः सुखमवाप्नुयात्।
अपुत्रो लभते पुत्रं कुमारी लभते पतिं॥
रोगार्त्तो मुच्यते रोगात् बद्धो मुच्येत बन्धनात्।
यं यश्चिन्तयते कामं स तस्य भवति ध्रुवं॥
य इदं शृणुयान्नित्यं ह्येकचित्तो नृपोत्तमः।
सर्व्वान् कामानवाप्नोति प्रसादाद्भास्वतो नृप॥

इति सौरधर्म्मोक्तं सूर्य्यव्रतं समाप्तं।

———000———

अथ सोमवारव्रतानि।

अथातः संप्रवक्ष्यामि रहस्यं तदनुत्तमं(१)।
येन लक्ष्मीर्धृतिस्तुष्टिः पुष्टिःकान्तिश्च जायते॥
तद्दिवाद्य संगृह्य सोमवारं विचक्षणः।
नक्तोक्तविधिना सर्व्वं कुर्य्यात् पूजादिकं विधोः॥
सप्तमे तु तत प्राप्ते दत्त्वा ब्राह्मणभोजनं।
कांस्यपात्रे तु संस्थाप्य सोमं रजतसम्भवं॥
सोमरूपन्तु चतुर्दश्योक्तमहाराजव्रतोक्तं वेदितव्यं।
पात्रे कृत्वा सोमराजं(२) श्वेतवस्त्रैः प्रपूजितं॥
पादुको-पानह-छत्र-भाजना-सनसंयुतं।
होमं घृततिलैः कुर्य्यात्सोमनाम्ना तु मन्त्रवित्॥
समिधोष्टोत्तरशतमष्टाविंशतिरेव च।
होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन तु॥

(१) होतदुत्तममिति क्वचित् पाठः।
(२) श्वेतपुष्पमाल्यमिति क्वचित पाठः।

पलाशसमिधो ज्ञातव्याः।

दध्यन्नशिखरे कृत्वा ब्राह्मणाय निवेदयेत्॥

मन्त्रेणानेन राजेन्द्र सम्यग्भक्त्या समन्वितः।

महादेव जटाजूटी पुष्पगोक्षीरपाण्डुर॥

सोम सौम्यो भवास्माकं सर्व्वदा ते नमोनमः।

एवं कृते महासौम्य सोमतुष्टिकरो भवेत्॥

सन्तुष्टेऽस्मिन् सुते तस्य सर्व्वे सन्तु ग्रहा ग्रहाः।

इति भविष्योत्तरोक्ता चन्द्रनक्षत्रशान्तिः।

———000———

ईश्वर उवाच।

अथ व्रतविधानं हि कथयामि समासतः।

यथा चरन्ति मनुजाः सिद्धसर्वार्थ कामदं।

व्युक्रान्ते(१) कार्त्तिके मासि शुक्लमार्गदिने भवेत्॥

प्रथमः सोमवारस्तु तं नक्तेन प्रपूजयेत्।

यदा श्रद्धा भवेत्कर्त्तुः सोमवारव्रतं प्रति॥

तदा सर्व्वं कारयित्वा ब्राह्मणाद्यैः समारभेत्।

मार्गमासे(२) तथा चैत्रे गृह्णीयात् सोमवारकं॥

यस्मिन्मासे प्रारभेत तस्मिन्मासे प्रपारयेत्(३)।

सुस्नातस्तु शुचिर्भूत्वा शुक्लाम्बरधरो नरः(४)॥

काम-क्रोधाद्य-हङ्कार-द्वेष-शून्यविवर्जितः।

---

(१) प्रक्रान्ते इति क्वचित् पाठः।

(२) सर्व्वं शुक्लदिने भावदिति क्वचित् पाठः।

(३) माघे मासीति क्वचित् पाठः।

(४) तस्मिन् तत्प्रारभेद्व्रतमिति क्वचित् पाठः।

आहरेत् श्वेतपुष्पाणि मल्लिकामालतीस्तथा ।
श्वेतपद्मानि दिव्यानि चम्पकं बिल्वपाटलाः ॥
कुन्दमन्दारजैः पुष्पैः पुन्नागशतपत्रकैः ।
चर्चयेन्मलयजेनाथ दिव्यधूपेन धूपयेत् ॥
अन्नानि यान्यभीष्टानि तानि सर्व्वाणि दापयेत् ।
पूजयेद्भक्तिभावेन सोमनाथं जगत्पतिं ॥
कामिकेन तु मन्त्रेण(१) प्रायकेन महेश्वरं ।
निवेदयेत सर्वमेव शृणु मन्त्रवरं हितं ॥
ओं नमो दशभुजाय त्रिनेत्राय पञ्चवदनाय शूलिने ।
श्वेतवृषभरूढाय सर्व्वाभरण भूषिते(२) ॥
उमादेहार्द्धसंस्थाय नमस्ते सर्वमूर्त्तये ।
अनेनैव तु मन्त्रेण पूजाहोमन्तु कारयेत् ॥
सिध्यन्ति सर्वकार्य्याणि मनसा चिन्तितानि च ।
पूजयेन्नक्तवेलायां नक्षत्राणां दर्शनेन तु ॥
प्रदाय भोजनं पूर्व्वं ब्राह्मणाय सुभक्तितः ।
संयुक्तशाकताम्बूल-दक्षिणाभिस्तथैव च ॥
एतद्विधिसमायुक्तो रागद्वेषविवर्जितः(३) ॥
एकभक्तस्य यत्पुण्यं कथयामि समासतः ।
शतजन्मार्जितं पापमसह्यं(४) देवदानवैः ॥

---

(१) कामिकेन सुमन्त्रेणेति वा पाठः ।
(२) सर्व्वाभरणभूषिते इति क्वचित् पुस्तके पाठः ।
(३) मद्क्रोधविवर्जित इति क्वचित् पाठः ।
(४) दानमसह्यमिति क्वचित् पाठः ।

नश्यते ह्येकभक्तेन नात्र कार्या विचारणा।
मासस्यैकस्य यत्पुण्यं शृणु तत्त्वेन(१) सुन्दरि॥
अभाग्यं जायते भाग्यं दुर्भगं सुभगं भवेत्।
पुत्रार्थी लभते पुत्रान् दरिद्रो धनवान् भवेत्॥
गृहे तस्य(२) वरारोहे सौख्यानि विविधानि च।
बहुभागी धनभागी स्या(३)द्विघ्नहीनः क्षितिश्चरेत्॥
अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः।
स्वर्गे भुक्त्वाखिलान् भोगान् जायते मानवोत्तमः॥
नक्तानि सोमवारस्य पौषमासे महेश्वरि।
तेषां पुण्यफलं वक्ष्ये संक्षेपेण तवाग्रतः॥
अग्निष्टोमस्य यज्ञस्य फलं शतगुणं भवेत्।
तत्फलं लभते देवि पूर्वदेवसमन्वितः॥
माघस्यैव तु मासस्य सोमवारेण पूजयेत्।
स्नापयेन्मधुदुग्धाभ्यां तथैवेक्षुरसेन तु॥
द्विजहत्यादिपापानि तानि सर्वाणि नाशयेत्।
विद्युद्वत्तेजसा युक्तो जायतेऽत्यन्तनिर्मलः॥
वसुस्वर्णस्य यत्पुण्यं दुर्लभं त्रिदशैरिह।
लभते नात्र सन्देहो मम भक्तिप्रचोदितः॥
फाल्गुने कथयिष्यामि सोमवारफलं शुभं।
कृते नक्ते तु कल्याणि शृणुष्व विस्तरेण तु॥
चतुर्दशसहस्राणि शतानि दशपञ्च च।

---

(१) माहात्म्यं द्रुतवर्तनेति वा पाठः।
(२) सर्वस्वमिति क्वचित् पाठः।
(३) धर्मभागेश्च इति क्वचित् पाठः।

यज्ञानां सर्वयाज्ञानामेकस्मिन्नस्य समे: ॥
गवां लक्षस्य दत्तस्य चन्द्रसूर्यग्रहे प्रिये ।
फलमप्यधिकं तस्य लभते नात्र संशयः ॥
चैत्रेऽपि शृणु कल्याणि ममैव ब्रुवतो वचः ।
सोमवारेण नक्तेन व्रतेन सुरसुन्दरि ॥
यत्फलं लभते नारी सर्वकेन तु पार्वति ।
गङ्गोदकस्य नीतस्य सोमनाथादिसङ्गमे ॥
घृतस्य मधुना वापि शतधा हि व्रतं फलं ।
गुग्गुलस्य तथा पञ्चसहस्रं परमेश्वरि ॥
एवं पुण्यं भवेदस्य मानवस्य न संशयः ।
वैशाखे कारयेन्नक्तं सोमवारे न संशयः ॥
पूजयेच्छ्वेतपुष्पैश्च यथालब्धैः सुरेश्वरि ।
अपूपा हि प्रदातव्याः कदलीफलसम्भवाः(१) ॥
एकचित्तेन भावेन निर्मलेन यशस्विनि ।
कन्यानां सुरयोग्यानां सहस्रेण वरानने ॥
दानेन विधिवद्देवि नराणां रूपशालिनां ।
एतद्दानेन यत्पुण्यं लभते मानवो भुवि(२) ॥
तत्फलं लभते सद्यः सोमवारव्रतेन तु ।
ज्यैष्ठमासे महादेवि सोमवारव्रतस्य तु ॥
चीर्णस्य यद्भवेत् पुण्यं तत्सर्वं कथयामि ते ।
गवां सुवर्णशृङ्गीणां पुष्करे विधिवत् प्रिये ॥

---

(१) अदृष्या हि प्रदातव्या कदलीफलसम्भवा इति वा पाठः ।

(२) पुरुषोभुवीति वा पाठः ।

दत्तानां दशसाहस्रं फलं प्राप्नोति मानवः।
पदञ्च लभते पुण्यं दुर्लभं देवदानवैः॥
ईशस्य कल्पमयुतं क्रीड़ते तत्र सुन्दरि॥
आषाढ़े सोमवारस्य भावितात्मा चरेद्व्रतं।
विधिपूर्व्वन्तु कल्याणि श्रेयः शृणु वदामि ते॥
नरमेधशतैकेन(१) विधियुक्ते न यत्फलं।
तद्भवेन्मानवे देवि पुण्यं सर्व्वशुभान्वितं॥
साधितुं नैव शक्यन्ते देवि नक्तमिदं यतः।
तस्माद्व्रतमिदं सारं यतः कष्टेन सिद्ध्यति॥
श्रावणे तु महादेवं सोमवारेण पूजयेत्।
रात्रौ तु भोजनं कुर्य्यान्मदकौटिल्यवर्जितः॥
भवेद्गणवरः प्राणी जीवमानो महेश्वरि।
इह त्वेतादृशी चेष्टा परत्र कथयामि ते॥
अश्वमेधशतं साग्रं पुण्यं प्राप्नोति मानवः।
मम लोके स वसति यावच्चन्द्रार्कतारकाः॥
भाद्रे च भावसंयुक्तः पूजयेत्परमेश्वरीं।
पुण्यं वानुत्तमं तस्य शृणु देवि विशेषतः॥
गवां कोटिप्रदानस्य सवत्सस्य सुशीलिनः।
यत्तत् फलमवाप्नोति मानवो नात्र संशयः।
आश्विने कथयिष्यामि त्वग्निष्टोमफलं शतं।
रसधेनुसहस्रस्य गुड़धेनुशतस्य च॥
सूर्य्यग्रहे कुरुक्षेत्रे ब्राह्मणे वेदपारगे।

(१) अश्वमेधशतैकेनेति क्वचित् पाठः।

दत्तस्य फलमाप्नोति मानवो नात्र संशयः ॥
कार्त्तिके वरदं देवि कामिकं मोक्षदायकं ।
स्मरणात्पापसंघानां भेदकं परमेश्वरि ॥
सोमवारव्रतपरो विधिवत् पूजयेच्छिवं ।
नक्ताशी श्रद्धयायुक्तो दयासत्यसमन्वितः ॥
दत्तस्य वेदपारज्ञे(१) रथानाञ्च शतस्य च ।
वाजिभिः शुभचिह्नैश्च युक्तानां वेदवादिभिः ॥
चतुर्विदेषु विप्रेषु प्रदत्तस्य च यत्फलं ।
तत्फलं लभते देवि मानवो भक्तिसंयुतः ॥
व्रतान्ते प्रतिमां कुर्याद्रौप्यं सोमं चतुर्भुजं ।
त्रयोदशघटान् श्वेतवस्त्रयुग्मसमन्वितान्(२) ॥
संपूर्णानि सुभक्ष्यैश्च वंशपात्राणि पार्वति ।
तेषामुपरि यत्नेन दद्यात्सर्वार्थसिद्धये ॥
सुशुभेन सुगन्धेन सुस्निग्धेनोज्ज्वलेन च ।
सक्तेन घृतपक्वैश्च(३) सद्दशाल्निघृतैस्तथा ॥
ब्राह्मणानथ संपूज्य भक्तियुक्तेन चेतसा ।
त्रयोदशघटान् दद्याद्दाश्च श्वेता मनोरमाः ॥
तथानेन विधानेन विप्रा वस्त्रविचित्रिताः(४) ।

---

(१) वेदशास्त्रज्ञ इति वा पाठः ।

(२) पयोऽन्वितानिति वा पाठः ।

(३) पूर्णपात्राणीति वा पाठः ।

(४) इविकाश पवित्रकः इति वा पाठः ।

उपानद्द्वयुताः कार्य्या यथावित्तानुसारतः ॥
दद्यात् स्वाचारसंपन्नब्राह्मणेषु मनीषिषु।
दक्षयेत् गृहसारेण पुनरेव समापयेत् ॥
ततो गुरुं भक्तिपूर्वमासने चोपवेशयेत्।
अर्च्चयेद्गन्धपुष्पाद्यैर्धूपदीपविलेपनैः ॥
न गुरोः सदृशी माता न गुरोः सदृशः पिता ॥
संसारादुद्धरेद्योहि व्रतदानोपदेशतः।
गोस्वामी पूजितो यस्मात्पार्व्वत्या सहितः प्रभुः ॥
तस्मात् संपूजयेद्भक्त्या गुरुं भार्य्यासमन्वितं।
अर्च्चयेत् प्रथमं तत्र पूजया पादसंस्थया ॥
दद्याद्वस्त्राणि दिव्यानि सुवर्णाभरणानि च।
अमूल्यानि तु रत्नानि(१) ग्रामक्षेत्रपुराणि च ॥
नगराणि गृहं दिव्यं यच्चान्यत् सुरसुन्दरि।
वाहनानि विचित्राणि गजवाजिरथादिकं ॥
अन्यानि यान्यभीष्टानि तानि सर्वाणि दापयेत्।
गौर्गुरोः संप्रदातव्या सुवत्सा च सुरूपिणी ॥
स्वर्णशृङ्गी रौप्यखुरा कांस्यदोहा पयस्विनी।
ताम्रपृष्ठा सुशीला च वस्त्राच्छादितदेहिका ॥
अभ्यर्च्य विधिना दद्याद्व्रतसंपूर्णहेतवे।
सप्तधान्यं यथाशक्त्या दापयेत् प्रयतो व्रती ॥
दीपदानं प्रकर्त्तव्यं गुरवे ज्ञानदायिने।
एवं गुरुं प्रणम्याथ शक्त्या दक्षिणया यजेत् ॥

(१) वरचामीति वा पाठः।

द्रौपदाम्नं प्रकर्त्तव्यं गुरवे ज्ञानदायिने ।
समापयेच्च तत् सर्व्वं देवादिप्रतिमां ददेत् ॥
ततस्तपस्विनां देवि मम दर्शनहेतुना ॥
सुगन्धघृतसंमिश्रधूपैः कृशरपायसैः ।
धारिकाशोकवर्त्तीभिः पूरिकामण्डकैस्तथा ॥
दधिदुग्धसमोपेतं भोजनं दापयेत् सुधीः ।
तपस्विनो ब्राह्मणांश्च लिङ्गमूर्त्तिचतुर्विधा ॥
मम रूपमिदं यस्मात् तस्मात् पूज्यं चतुष्टयं ।
शिवाश्रितैश्च शास्त्रज्ञैर्दंशकैर्धर्मचिन्तकैः ॥
जटामुद्रादिसंयुक्तैर्भस्मोद्धूलितविग्रहैः ।
ब्रह्मचर्य्यरतैः शान्तैर्लोभमत्सरवर्जितैः ॥
ईदृशैः शिवपात्रैश्च भुक्तैः फलमनुत्तमम् ।
भोजनान्ते प्रदातव्यं ताम्बूलं मुखवासकम् ॥
श्वेतचन्दनकौपीनं दत्त्वा तांश्च विसर्ज्जयेत् ।
शक्तितो भोजनं देयं यथा विभवविस्तरैः ॥
कृपणानाथदीनानां सुहृदां याचतामपि ।
एवं विधिसमायुक्तो गच्छते परमं पदं ॥
भोगान् भुङ्क्ते सर्व्वलोके शतकोटियुगान्तरेत् ।
कन्याभिर्वेष्टितो देवि रमते स्वेच्छया प्रिये ॥
मम लोके वसेत्तावद्यावदाभूतसंप्लवं ।
मम वीर्य्यबलोपेतस्त्रिनेत्रः शूलपाणिकः ॥
माहात्म्यात् सोमवारस्य चान्ते मुक्तिमवाप्नुयात् ।
पूर्व्वं कृष्णेन सञ्चीर्णं तथा वै पद्मयोनिना ॥
देवदानवगन्धर्व्वैः पिशाचोरगराक्षसैः ।

ऋषिभिः चितिपैस्तद्वत् स्वायम्भुवमुखैः प्रिये॥
अन्यैश्च मानवैः शुद्धैरास्तिकैर्धर्म्मतत्परैः।
न देयं दुष्टचित्ताय शुद्धिहीनाय न क्वचित्॥
शास्त्रधर्म्मद्विषे नैव विडम्बकजनाय च।
आचार्य्यदेवविप्राणां व्रतिनां व्रतशीलिनां॥
वह्निवेदसुतीर्थानां निन्दकाय न वै क्वचित्।
आर्त्तौ नैव परित्याज्यं व्रतमेतत् सुदुर्लभं॥
व्रतत्यागान्महादोष इति ज्ञात्वा समारभेत्॥
गुरोः समीपे कुर्व्वीत व्रतमेतन्न संशयः।
अन्यथा गुरुहीनस्य निष्फलं जायते व्रतं॥
सन्देहः सर्व्वकार्य्येषु गुरुहीनस्य वै भवेत्।
तस्मात्सर्व्वं प्रयत्नेन गुरुमेव समाश्रयेत्॥
अथ संक्षेपतो वक्ष्ये व्रतमाहात्म्यमुत्तमम्।
ये चरन्ति नरा देवि स्त्रियश्चापि सुभाविताः॥
तेषां जन्मसहस्रेऽपि न शोको जायते क्वचित्॥
न दारिद्र्यं न रोगश्च सन्ततिच्छेद एव च।
कुलकोटिं समुद्धृत्य स्थापयेदिन्द्रसद्मनि॥
इत्थं शृणोति माहात्म्यं पठ्यमानं व्रतस्य च।
श्रावयेद्भक्तिसंयुक्तो रुद्रस्यानुचरो भवेत्॥
क्रियमाणं तथा पश्येद्व्रतमेतत् प्रियं मम।
भक्तियुक्तो नरः श्रुत्वा यथैवानुप्रमोदते॥
मतिं ददाति यश्चापि स याति शिवमन्दिरं॥

इति स्कन्दपुराणोक्तसोमव्रतं।

अथ भौमव्रतं ।

———०००———

स्नात्वाङ्गारकं गृह्य क्षपयेन्नक्तभोजनः ।
सप्तमे त्वथसंप्राप्ते स्थापितं ताम्रभाजने ॥
हैमं रक्ताम्बरच्छन्नं कुङ्कुमेनानुलेपनं ।
नैवेद्यं शुभ्रकं सारं पूज्य पुष्पाक्षतादिभिः ॥
मन्त्रेणानेन तं दद्यात् ब्राह्मणाय कुटुम्बिने ।
कुजन्मप्रभवोपि त्वं मङ्गलः पठ्यसे बुधैः ॥
अमङ्गलं निहत्याशु सर्वदा यच्छ मङ्गलम् ।

इति भविष्योत्तरोक्तं भौमव्रतं ।

———०००———

भौमोयमेश्वरः पुत्रः पृथिव्यां जनितो महान् ।
रूपेणैव सदा रम्यो वरदानाद्दिवौकसां ॥
अस्यैव दिवसे प्राप्ते ताम्रपात्रं सुशोभनं ।
परिपूर्णं गुडेनैव वर्षमेकं प्रदापयेत् ॥
व्रतान्ते दापयेदेनं यथोक्तफलसंयुतां ।
ब्राह्मणाय सुरूपाय अव्यङ्गितशरीरिणे ॥
एवं व्रतविधिं दिव्यं यः कश्चित् कुरुते नरः ।
रूपवान् धनवांश्चैव जायते नात्र संशयः ॥

इति स्कन्दपुराणोक्तं भौमवारव्रतं ।

———०००———

युधिष्ठिर उवाच।

देवदेव जगन्नाथ पुराणपुरुषोत्तम:।
सर्व्वार्थसाधनं पुण्यं व्रतं कथय मे प्रभो॥
भौमीयमर्च्चनं ब्रूहि माहात्म्यं तस्य मे प्रभो।
व्रतेन येन चीर्णेन नरो दुःखात् प्रमुच्यते॥

श्रीभगवानुवाच।

यदुक्तं कथयिष्यामि सर्व्वकामार्थसाधनं।
ग्रहाणामधिपो भौमः पूजयेद्भौमवासरे॥
मङ्गलो भूमिपुत्रश्च ऋणहर्त्ता धनप्रदः।
स्थिरासनो महाकायः सर्वकामार्थसाधकः॥
लोहितो लोहिताङ्गश्च सामगानां कृपाकरः।
धरात्मजो कुजो भौमो भूतिदो भूमिनन्दनः॥
अङ्गारको यमश्चैव सर्वरोगापहारकः।
सृष्टिकर्त्ता प्रहर्त्ता च सर्वकामफलप्रदः॥
एतानि कुजनामानि प्रातरुत्थाय यः पठेत्।
ऋणं न जायते तस्य धनं प्राप्नोत्यसंशयं॥
त्रिकोणञ्च सदाकार्य्यं मध्ये छिद्रं प्रकल्पयेत्।
कुङ्कुमेन सदा लेख्यं रक्तचन्दनमेव च।
कोणे कोणे प्रकल्प्यानि त्रीणि नामानि भूमिज॥
धारं वक्रं भूमिजञ्च रक्तगन्धैश्च पूजयेत्।
स्थापयेद्व्रणे कुम्भे जलपूर्णे सवस्त्रके॥
रक्तधान्यैश्च नैवेद्यैरर्घ्यैः रक्तफलैस्तथा।
रक्तगन्धैश्च धूपैश्च पुष्पदीपादिभिस्तथा॥

मङ्गलं पूजयेद्यस्तु मङ्गलेऽहनि सर्व्वदा ।
ऋणरेखा प्रकर्त्तव्या अङ्गारेण तदग्रतः ॥
तास्तु प्रमार्जयेत्पश्चाद्वामपादेन संस्पृशन् ।
एकविंशतिनामानि पठित्वा तु दिनान्तके ॥
रूपवान् धनवांश्चैव जायते नात्र संशयः ।
एककालं द्विकालं वा यः पठेत् सुसमाहितः ॥
एवं कृते न सन्देहो ऋणं हत्वा सुखी भवेत् ।
पूजितो देवदेवेशो मङ्गलो मङ्गलप्रदः ॥
उज्जयिन्यां समुत्पन्नो भौमो भौमश्चतुर्भुजः ।
भरद्वाजकुले जातः शक्तिशूलगदाधरः ॥
वरदो मेषमारूढः स्कन्दप्रायस्तडित् प्रभः ।
स्थोनापृथिवी मन्त्रेण दले याम्ये प्रतिष्ठितः ।

प्रतिष्ठामन्त्रः ।

भूमिपुत्रो महातेजाः कुमारो रक्तवस्त्रकः ।
ज्वलदङ्गारसदृशो भौमः शान्तिं प्रयच्छ मे ॥

पूजामन्त्रः ।

प्रसीद देवदेवेश विघ्नहर्त्ता धनप्रद ।
गृहाणार्घ्यं मया दत्तं मम शान्तिं प्रयच्छ वै(१) ॥
भूमिपुत्रो महातेजाः स्वेदोद्भवः पिनाकिनः ।
धनार्थी त्वां प्रपन्नोऽस्मि गृहाणार्घ्यं नमोऽस्तु ते ॥

अर्घ्यमन्त्रः ।

गौतमेन पुरा दृष्टो लोहिताङ्गो महाप्रभः ।

---

(१) प्रदोभवदानि वा पाठः ।

कथय त्वं महाभाग गुह्यं पूजार्चने विधिम्(१)॥

गौतम उवाच।

मन्त्रमाराधनं ब्रूहि सर्व्वप्राणिभयापहं।
सर्वपाप प्रशमनं सर्व्वोपद्रवनाशनं॥
सर्वयज्ञफलं येन सर्वदानफलं लभेत्।
तपोजप्याद्यनेकानां फलं येनैव लभ्यते॥
रूपञ्च सकलं येन वाहनायुधसंयुतं।
येन पूजितमात्रेण जायते सुखमुत्तमं(२)॥
धर्मार्थकाममोक्षाणां कालेनवफलप्रदं(३)।
सर्वपापप्रशमनं सर्वव्याधिविनाशनं(४)॥
सर्वसौख्यप्रदानानां फलं येन च लभ्यते।
तद्व्रतं ब्रूहि मे देव लोहिताङ्गो महाग्रह:॥

भौम उवाच॥

शृणु साधो महाभाग धर्मशारद गौतम।
व्रतं पूजा परं दानं वक्ष्योऽहं भुवनत्रये॥
आसीत् पूर्वं सुनन्दिको ब्राह्मणो वेदपारगः।
तस्य भार्य्या सुनन्दीका वन्ध्या तु बहुलोभिनी॥

---

(१) शुभमिति पाठान्तरं।
(२) प्राप्यते परमं सुखमिति वा पाठः।
(३) कालेनैवाभयप्रदमिति वा पाठः।
(४) सर्व्वोपद्रवनाशनमिति वा पाठः।

तस्यापत्यं न सञ्जातं दुष्टलक्ष्मप्रभावतः ।
तेनान्यस्य सुता जातु सुशीला रूपसंयुता ॥
ब्राह्मणस्य कुले जाता गृहीत्वा पोषिता स्वयं ।
सर्वलक्षणसंपूर्णा महतेन तु गौतम ॥
पूर्वजन्मनि तेनाहं पूजितश्चैव भावितः ।
तां पुत्रीञ्च गृहे तस्य ब्राह्मणी सा ह्यपालयेत् ॥
नित्यं प्रसूयते(१) स्वर्णं अष्टाङ्गात् कनकद्युतिः ।
तेन स्वर्णेनासौ विप्रो धनाढ्यो वेदपारगः ॥
कोटि कोटीश्वरो विप्रो राजते भूमिमण्डले ।
वर्षैः कतिपयैर्विप्र सा कन्या यौवनोत्तमा ॥
दृष्ट्वा नन्दीकविप्रेण दशवर्षां मनःस्विनीं ।
विवाहार्थन्तु विप्रस्य दत्त्वा सोमेश्वरस्य च ॥
वेदोक्तविधिना तत्र विवाहमकरोत्तदा(२)।
वर्षैः कतिपयैर्विप्रस्तां कन्यां प्रौढ़यौवनां ॥
आदाय श्वशुरगृहान्निर्गता शुभवासरे ।
स्वदेशोपरिमार्गेण गच्छमानस्त्वरन्निगम् ॥
वनान्ते गह्वरे घोरेऽरण्ये पर्वतमध्यगे ।
सुनन्दी च वने तस्मिन् मन्दलोभप्रभावतः ॥
सर्वसुन्ये वने तस्मिन् महालोभेन भावितः ।
मार्गे चलति विप्रोऽसौ घाति तु विहतिं स्वकां ॥
तेनासौ घातितो विप्रश्चौररूपेण सादरात् ।

---

(१) पुष्टीयते इति वा पाठः ।
(२) शुभवासरे इति वा पाठ ।

पतिं मृतञ्च तं दृष्ट्वा सा नारी भयपीड़िता(१)॥
यावत् प्रविश्य काष्ठानां मध्ये चैव हुताशनं।
पतिदेहमुपादाय चिक्षेप चितिमध्यतः॥
पतिना सह विप्रेन्द्र मरणे कृतनिश्चया।
पतिर्मृत्युञ्जयं देवं ध्यायन्ती च पदेपदे॥
पतिं प्रदक्षिणी कृत्य चितायाश्च समीपतः।
चितायां यावत् प्रविशति तदाहमवदञ्च तां॥
तस्मिन् काले च तुष्टोहं याचयस्व मनोरथं।
ब्राह्मणी उवाच।
यदि तुष्टोसि मे देव तदा जीवतु मे पतिः।
भौम उवाच।
अजरोप्यमरो बाले त्वद्भर्तायं भविष्यति।
अन्यच्चा च महासाध्वि चिरं त्रिभुवनचमं॥
ब्राह्मणी उवाच।
यदि तुष्टोसि देवेश ग्रहाणामधिप प्रभो।
ये त्वां घटे समालिख्य रक्तचन्दनचर्चितं।
रक्तपुष्पैश्च संपूज्य प्रत्यूषे भौमवासरे॥
वैधव्यन्तु चणं तेषां व्याधिराजभयं तथा।
सर्पाग्निशत्रुसम्बादं वियोगं स्वजनस्य च॥
माकुरुष्व महीपुत्र यदि तुष्टोसि मे प्रभो॥
श्रीभौम उवाच।
एकविंशति भौमाश्च मद्भक्ताश्च जितेन्द्रियाः।

---

(१) शोकपीड़ितेति वा पाठः।

एकाहारैः शीतार्त्तैश्च चतुर्दीपालिकैर्गृहे ॥
षष्ठ्यां तु दशकालैश्च त्र्यैर्वदपौराणिकोद्भवैः ।
स्वशक्त्या भोजनं विप्रे दातव्यं सहिरण्यकं ॥
गुडान्नं रक्तमनड्वाहं सर्वोपस्करसंयुतं ।
तेषां पीड़ा कदा कस्य ग्रहस्य न भविष्यति ॥
भूतवेतालशाकिन्यः प्रभवन्ति न हिंसकाः ।
एवमस्तु तदा तस्य इत्युक्त्वान्तरधीयते ॥
व्रतमार्गे तु ये लोकाः पीड़िता विपदं गताः ।
यः पठति इमं व्रतं स प्राप्नोति विष्णुपुरं ॥
तत्प्राप्नोति नरः सम्यक् गतिःस्याच्च प्रभावतः ।
उद्यापनं प्रकर्त्तव्यं मङ्गलस्य समासये ॥
उद्यापनं विना विप्र फलं पूर्णं न जायते ।
एकविंशतिभौमाश्च कर्त्तव्या एकभावतः ॥
आपदो विलयं यान्ति सुखञ्चैव प्रवर्त्तते ।
यः शृणोति व्रतं विप्र मानवः संयतेन्द्रियः ॥
तस्य मासकृतं पापं विलयं यान्ति वर्द्धते(१) ।
सदा नियमसंयुक्तः प्रत्यूषेसु समाश्रितः(२) ।
यावज्जीवं व्रतं पुण्यं करोति भुवनत्रये ॥
सुसम्पन्नो भवेद्विप्रः पुत्रपौत्रैस्तु वर्द्धते ।
अन्ते चापि परं स्थानं यत्र सूर्य्यादयो ग्रहाः ॥

---

(१) मत्प्रसादादिति पाठान्तरं ।

(२) शुभमाश्रित इति पाठान्तरं ।

एवमुक्का तदा तत्र मङ्गलोऽपि दिवङ्गतः॥
इदं व्रतं त्वया ख्यातं सर्व्वसौख्यप्रदायकं।
इदं व्रतं करिष्यन्ति तेषां पीड़ा न जायते॥
स्त्रीभिर्व्रतं प्रकर्त्तव्यं पुरुषैश्च विशेषतः।
तेषां मुक्तिर्नसन्देहः स्वर्गवासी न संशयः॥

इति पद्मपुराणे भौमव्रतं।

कनकमयशरीरस्तेजसा दुर्निरीक्ष्यो
हुतवहसमकान्तिर्म्मालवे लब्धजन्मा।
अवनितनय एष स्तूयते भारतेयो
ददतु मम विभूतिं मङ्गलः सुप्रसन्नः॥

गौतम उवाच(१)।

उद्यापनविधिं तस्य सम्यग्ब्रूहि प्रसादतः।
येन व्रतेन जगत उपकारो महान् भवेत्॥

मङ्गल उवाच।

विप्र(२)योमण्डप स्वस्मिंस्त्वष्टहस्त प्रमाणतः।
स्थण्डिलं मध्यतः कार्य्यं हस्तैकस्य प्रमाणतः॥
मण्डलन्तु प्रकर्त्तव्यं मामकं रक्तमालिनं।
पूर्व्वोक्तानि च नामानि मण्डले पूजयेत्ततः॥

---

(१) मङ्गलउवाचेति पाठान्तरं।

(२) विद्धि इति पाठान्तरं।

मण्डलन्तु प्रकर्त्तव्यं पद्मैर्विंशतिभिर्युतं(१) ॥
द्वारोपद्वारसहितं वीथिकाकरकैर्युतं ।
पूजा तत्र प्रकर्त्तव्या रक्तचन्दनपूर्विका ।
जवापुष्पैस्तु पूज्यानि मम नामानि पूर्व्वतः ।
सक्तव्या धूपदानञ्च नैवेद्यं पौलिकः स्मृतः ॥
पूजाफलैश्चैवार्घ्यञ्च दातव्यो नारिकेलयुक् ।
जवापुष्पेण दातव्यो(२) व्रतोद्यापनसिद्धये ।
कुम्भे मे प्रतिमां स्थाप्य सौवर्णीञ्च स्वशक्तितः ॥
रक्तवस्त्रेण संच्छाद्य पूजां पूर्व्वोक्तमन्त्रतः ।
अष्टोत्तरशतं होमं पूजान्ते कारयेद्बुधः ॥
जवायाः कुसुमानान्तु घृतस्य तु यथाविधि ।
तिलाक्षतानामाचार्य्यऋत्विग्भिर्वेदपारगैः ॥
अग्निर्मूर्द्धेतिमन्त्रेण रक्तशालियवैस्तथा ।
शान्तिकन्तु प्रकर्त्तव्यं यथोक्तेन(३) विधानतः ॥
पद्ममध्ये कर्णिकायां मम सूक्तमतन्द्रितः ।
पूजयेच्छयमानस्तु शेषनामानि पूर्व्वतः ॥
मङ्गलाय नमः पादौ भूमिपुत्राय जानुनी ॥
ऋणहर्त्रे नमस्तूरू कटिं धनप्रदाय च ।
स्थिरासनाय गुह्ये तु महाकायाय चोरसि ।
सर्व्वकामप्रदात्रे तु वामबाहुं प्रपूजयेत् ॥

---

(१) पात्रकैरिति पाठान्तरं ।
(२) पूर्व्वमन्त्रेण दातव्य इति पाठान्तरं ।
(३) सप्तकोष्ठ इति वा पाठः ।

लोहिताय दन्तवासो लोहिताक्षाय कण्ठतः।
आस्ये संपूजयेच्चाथ सामगानां क्षपाकरं ॥
धरात्मजं नासिकायां कुजञ्च नयनद्वये।
भौमं ललाटपट्टे च भूमिजाय नमो भुवो ॥
मूर्द्ध्नि संपूजयेच्चाथ भूमिनन्दननामतः।
अङ्गारकं शिखायान्तु यमकृच्च्छदेशतः ॥
सर्व्वरोगापहारञ्च अस्त्रे संपूजयेत्सदा।
आकाशे वृष्टिकर्त्तारं प्रहर्त्तारमधस्तथा ॥
सर्व्वाङ्गेषु प्रपूज्योऽसि सर्वकामफलप्रदः।
एवं पञ्चोपचारेण पूजान्ते व्रतकारिणा ॥
अच्छिद्रं याचनीयन्तु भक्तियुक्तेन चेतसा।
आचार्य्यऋत्विजो ब्रूयुः संपूर्णं व्रतमस्त्विति ॥
व्रतान्ते पूजयेद्विप्रं गुरुं पत्नीसमन्वितं।
रक्तवस्त्रं परीधाप्य पदं दद्याद्यथोदितं ॥
शय्यां सोपस्कराञ्चैव भोजनं विविधं तथा।
भक्त्या दद्यादनड्वाहं(१) व्रतान्ते मम तुष्टये ॥
ऋत्विजोऽपि तदा पूज्या मत्प्रीत्यर्थं स्वशक्तितः।
भोजनाच्छादनाद्यैश्च संस्कारैर्विविधैर्गिरा ॥
इत्थमुद्यापनं ये तु कुर्व्वन्ति व्रतकारकाः।
तेषां पीडा कदा कस्य ग्रहस्य न भविष्यति ॥
भूतवेतालशाकिन्यः प्रभवन्ति न हिंसकाः।
न ऋणञ्च भवेत्तेषां धनं तेषां भवेद्ध्रुवं ॥

(१) दद्याद्गामिति पाठान्तरं।

येषां सन्तानवाञ्छा स्यात् ते लभन्ते बहून् सुतान् ।
इत्युक्त्वा गौतमस्याग्रे दिवं प्राप्तो महाग्रहः ॥
व्रतमात्रे तु ये लोकाः पीड़िता विपदाङ्गणैः(१) ।
आपदो विलयं यान्ति सुखञ्चैव प्रवर्द्धते(२) ॥
य स्तवीति व्रतं भक्त्या मानवस्तु जितेन्द्रियः ।
तस्य मासकृतं पापं विलयं याति तत्क्षणात् ॥
सदा तु नियमारूढ़ः प्रत्यूषे सुसमाहितः ।
यावज्जीवं व्रतं पुण्यं करोति भुवनत्रये ॥
सुसमृद्धो भवेद्विप्रः पुत्रपौत्रैः स वर्द्धते ।
अन्ते याति परं स्थानं यत्र सूर्य्यादयो ग्रहाः ॥
अवाप्नोति नरः सम्यग्(३)व्रतस्यास्य प्रभावतः ।
यावज्जीवं न शक्नोति व्रतं कर्त्तुं नरो यदि ॥
उद्यापनं विधायैव मोक्तव्यं व्रतमुत्तमं ।
उद्यापनन्तु शास्त्रोक्तं कर्त्तव्यं सुसमाहितैः ॥
अशक्तो ब्राह्मणानुज्ञां गृहीत्वा तु विसर्ज्जयेत् ।
अन्यथा कुरुते यस्तु कुष्ठी चान्ध(४) प्रजायते ॥
तस्मात्सर्व्वप्रयत्नेन ब्राह्मणानुज्ञया व्रतं ।
कर्त्तव्यन्तु सुसंपूर्णमुद्यापनसमन्वितं ॥

(१) विपदागमे इति पाठान्तरं ।
(२) सर्व्वासंपाक्रान्तत्वादिति पाठान्तरं ।
(३) इत्यस्य मतेन सम्यगिति पुस्तकान्तरे पाठः ।
(४) कुष्ठी वन्ध्यश्च जायते इति पाठान्तरं ।

धरामराणां वचनैरवस्थिता(१)
दिवौकसस्तोयमखैः समेताः(२) ।
न लङ्घयेन्नापि वचांसि तेषां
श्रेयोऽभिकामो पुरुषो विजानन् ॥

इति पद्मपुराणोक्तं मङ्गलव्रतोद्यापनं ।

अथ बुधव्रतं ।

कृष्ण उवाच ।

विशाखासु बुधं प्राप्य सप्त नक्तानि चाचरेत् ।
बुधं हेममयं कृत्वा स्थापितं कांस्यभाजने ॥
शुक्लमाल्याम्बरधरं शुक्लगन्धानुलेपनं(३) ।
गुडौदनोपहारन्तु ब्राह्मणाय निवेदयेत ॥
बुधस्त्वं बुद्धिजननो बोधदः सर्व्वदा नृणां ।
तत्त्वावबोधं कुरुते राजपुत्राय ते नमः ॥

इति भविष्योत्तरे बुधव्रतं ।

---

(१) वचनैर्व्यवस्थिता इति पुस्तकान्तरे पाठः ।

(२) यतैः समेता इति पाठान्तरं ।

(३) शुक्लवस्त्रयुगच्छन्न शुक्लमाल्यानुलेपनमिति पाठान्तरं ।

अथ गुरुव्रतं ।

अनुराधास्वथाचार्य्यं देवानां पूज्य भक्तितः ।
पूर्व्वोक्तक्रमयोगेन सप्त नक्तान्यथाचरेत् ॥
हैमं हेममये पात्रे स्थापयेच्च बृहस्पतिं ।
पीताम्बरयुगच्छन्नं पीतयज्ञोपवीतकं ॥
पादुकाच्छत्रसहितं सदण्डं सकमण्डलुं ।
संपूज्य पुष्पनिकरैर्धूपदीपाक्षतादिभिः ।
खण्डखाद्योपहारैश्च द्विजाय प्रतिपादयेत् ॥
धर्म्मशास्त्रार्थशास्त्रज्ञ ज्ञानविज्ञानपारग ।
प्रलम्बबुद्धिगाम्भीर्य्य देवाचार्य्य नमोऽस्तु ते ॥

इति भविष्योत्तरोक्तं गुरुव्रतं ।

अथ शुक्रव्रतं ।

शुक्रं ज्येष्ठासु संप्राप्य(१) पूजयेन्नक्तभोजनः ।
पूर्व्वोक्तक्रमयोगेन द्विजसन्तर्पणेन तु ॥
सप्तमे त्वथ संप्राप्ते सौवर्णं कारयेत्सितं(२) ।
रौप्ये वा कांस्यपात्रे वा स्थापयित्वा भृगोः सुतं ॥
संपूज्य परया भक्त्या सितवस्त्रानुलेपनैः ।
अग्रे तस्य प्रदातव्यं पायसं घृतसंयुतं ॥

---

(१) शुक्रं [illegible] नक्तभोजन इति पुस्तकान्तरे पाठः.

(२) कारयेच्च भर्मिति पाठान्तरं

दद्यादनेन मन्त्रेण ब्राह्मणाय विचक्षणः।
भार्गवो भृगुशिष्यो वा शुक्रः क्रमविशारदः॥
हत्वा ग्रहकृतान् दोषान् आयुरारोग्यदो भव॥

इति भविष्योत्तरोक्तं शुक्रव्रतं।

———000———

विषमस्थे भृगुसुते महाशान्तिकरं व्रतं।
कर्त्तव्यं मनुजैर्विद्वान्महापातकनाशनं॥
होतव्यं मधुसर्पिर्भ्यां दध्ना क्षीरैर्घृतेन च।

इति भविष्योत्तरोक्ता महाशान्तिः।

अथ शनिव्रतं।

——00——

भविष्यपुराणात्।

श्रीकृष्ण उवाच।

कदाचिदाश्रमपदं पिप्पलादस्य नारदः।
जगाम कामचारेण पर्य्यटन्नवनीतलं॥
तमातिथेयः श्रेयोऽर्थी पिप्पलादोऽथ नारदं।
विहितायां सपर्य्यायां योगक्षेममथाब्रवीत्(१)॥
मुने वने चिरंकालमालम्ब्य स्थितवानहं।
अश्वत्थवृक्षमक्षीणच्छायमायतसत्फलं॥

(१) पर्य्यायागममब्रवीदिति पाठान्तरं।

क्व गतौ मां निधायेह मदीयौ पितरौ मुने ।
तं प्राह नारदः पूर्व्वं सर्व्वलोकाशनिः शनिः(१) ॥
पीड़यामास वसुधां सर्वेषामसुधारिणां(२) ।
रोगांश्चकार देहेषु गेहेषु धनसंक्षयं ॥
तदा पुण्यान्यरण्यानि परिभ्रम्य फलादिकं ।
आदाय कायपोषाय सायमायाति ते पिता ॥
क्लीवभावं पुरस्कृत्य शनेर्दुर्भिक्षशिक्षितं ।
त्वां विहाय सचापत्न्य गतश्चैतस्ततः क्वचित ॥
एवमुक्तः शिशुक्रोधात् प्रज्वलन्निव पावकः ।
आलोक्य गगनाद्भूमौ पातयामास वै शनिं ॥
पतमानो गिरेः शृङ्गे लग्नः खञ्जो बभूव ह ।
धरण्यां पतितं दृष्ट्वा भास्करात्मजमातुरं ॥
ननर्त्त भुजमुत्क्षिप्य नारदो हृष्टमानसः ।
हर्षाद्देवानथाहूय दर्शयामास तं शनिं ॥
अथ देवास्तदा प्राप्ता ब्रह्मरुद्रेन्द्रपावकाः ।
शनिन्ते सान्त्वयामासुः क्रोधमुग्धं मुनिश्च तं ॥
स्वस्ति तेऽस्तु महाभाग पिप्पलाद महामुने ।
भद्रन्तेऽत्र कृतं नाम नारदेन महर्षिणा ॥
अन्वर्थयुक्तं विप्रेन्द्र जीवितं पिप्पलादनात् ।

---

(१) सर्व्वलोकानल शनिरिति पाठान्तरं ।

(२) क्रीडया पीडयामास वसुधामसुधारिणामिति पाठान्तर ।

अतस्त्वं पिप्पलादेति लोके ख्यातिं गमिष्यसि ॥
ये च त्वां पूजयिष्यन्ति स्नात्वा पुष्पाक्षतादिभिः ।
गृहाश्रमपदे रम्ये क्षिपेयुर्भक्तिभाविताः ॥
सप्तजन्मान्तरं यावत् पुत्रपौत्रानुगामिनी ।
तेषां लक्ष्मीर्न दूरस्था भविष्यति कदाचन ॥
स्मरिष्यन्ति च येऽपि त्वां पिप्पलादेति नामतः ।
तेषां शनैश्चरकृता न पीडापि भविष्यति ॥
समस्तास्य महाभाग निर्दोषोऽयं ग्रहाग्रणीः ।
चरन् ऋक्ष(१) शनैरेष शुभाशुभफलप्रदः ॥
हठसाध्या ग्रहाश्चैते न भवन्ति कदाचन ।
बलिहोमनमस्कारैः शान्तिं यच्छन्ति पूजिताः ॥
अतोऽस्य मस्य दिवसे स्नानमभ्यङ्गपूर्वकं ।
कार्यं देयञ्च विप्राय तैलमभ्यङ्गहेतवे ॥
यस्तु संवत्सरं यावत् प्राप्ते शनिदिने नरः(२) ।
तैलं ददाति विप्राणां स्वशक्त्यान्यजनस्य तु ॥
ततः संवत्सरस्यान्ते प्राप्ते तस्य दिने पुनः ।
लोहघटार्पितं सौरिं तैलकुम्भे विनिक्षिपेत् ॥
लौहे वा मृण्मये वापि कृष्णवस्त्रयुगान्वितं ॥

---

(१) चरन् भन्निति पाठान्तरं ।

(२) प्रतिदिनं नरः इति पुस्तकान्तरे पाठः ।

शनिकल्पस्तु मत्स्यपुराणात् ।

इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः(१) ।
बाणबाणासनधरः किरीटार्कसुतः सदा ॥
कृष्णगोदक्षिणायुक्तं कृष्णकम्बलशायिनम् ।
अभ्यङ्गेन स्वयं स्नात्वा कृष्णपुष्पैश्च पूजयेत् ॥
धूपैर्दीपैश्च नैवेद्यैः(२) कृशरान्नैस्तिलोदनैः(३) ।
पूजयित्वा सूर्य्यपुत्रं क्षमस्वेति पुनः पुनः ॥
कृष्णाय द्विजमुख्याय तदभावेतराय च(४) ।
देयः शनैश्चरो भक्त्या मन्त्रेणानेन वै द्विज ॥
शन्नोदेवीति विप्राणामितरेषां शृणुष्व यः(५) ।
क्रूरावलोकनवशाद्भुवनं नाशयति यो यदा रुष्टः ।
तुष्टो धनजनकसुखं ददाति सोऽस्मान् शनैश्चरः पातु ॥
यः पुरा नष्टराज्याय नलाय परितोषितः(६) ।
स्वप्ने ददौ निजं(७) राज्यं स मे सौरिः प्रसीदतु ॥
कोणं नीलाञ्जनप्रख्यं मन्दचेष्टाप्रसारिणम् ।
छायामार्तण्डसम्भूतं नमस्यामि शनैश्चरम् ॥

---

(१) गृध्रवाहन इति पुस्तकान्तरे पाठः ।
(२) सुगन्धगन्धपुष्पैश्च इति पाठान्तरम् ।
(३) सरक्तैस्तिलसौदनैरिति पाठान्तरम् ।
(४) तां शूद्रायाथ कल्पकमिति पाठान्तरम् ।
(५) इतरेषाञ्च सर्वेषां शृणु मन्त्रं द्विजोत्तम इति पुस्तकान्तरे पाठः ।
(६) नलाय प्रददौ किल इति पुस्तकान्तरे पाठः ।
(७) स्वप्ने तस्मै निजमिति पुस्तकान्तरे पाठः ।

नमोऽर्कपुत्राय शनैश्चराय
नीहारवर्णाञ्जनमेचकाय।
श्रुत्वा रहस्यं तव कामदस्त्वं
फलप्रदो मे भव सूर्य्यपुत्र॥
नमोऽस्तु प्रेतराजाय कृष्णदेहाय वै नमः(१)।
शनैश्चराय क्रूराय शुद्धबुद्धिप्रदायिने॥
य एभिर्नामभिस्तौति तस्य तुष्टो ददात्यसौ।
तदीयन्तु भयं तस्य स्वप्नेऽपि न भविष्यति॥
इत्यनेन विधानेन शक्तिं दत्वा विसर्ज्जयेत्।
एतद्व्रतन्तु ये विप्र चरिष्यन्तीह मानवाः॥
शनेस्तु वासरे प्राप्ते वत्सरं यावदेव तु।
तेषां शनैश्चरो पीडां देशेऽपि न भविष्यति॥
भविष्योत्तरात्। कृष्ण उवाच।
पुरा त्रेतायुगे पार्थ नावर्षत्पाकशासनः।
कथञ्चिद्दैवयोगात्तु तस्य राष्ट्रे समन्ततः॥
ततो राष्ट्रं क्षुधाविष्टं बभूवातीव दारुणं।
पतङ्गमूषकाकीर्णं चौरव्यालभयाकुलं॥
तस्मिन् घोराकुले काले सपत्नीकः सबालकः।
कौशिकः स्वाटनं त्यक्त्वा परराष्ट्रमगाच्छनैः॥
मार्गे च गच्छता तेन वने केन महर्षिणा।
त्यक्तः स बालकस्त्वेको दुर्भरं हि कुटुम्बिकं॥
तस्मिन् काले विशेषेण क्षोणे घोषधिसञ्चये।

(१) कृष्णदेहाय वै नम इति पुस्तकान्तरे पाठः।

कृत्वा तन्निर्घृणं कर्म्म ततोऽसौ कौशिको गतः ॥
सोऽपि बालः क्षुधादीनो दिशा वीक्ष्य दृशा अपि ।
उत्थाय पिप्पलस्याधोमूलान्यत्तुं प्रचक्रमे ॥
कूपे जलं पपौ नित्यं तत्रैवाश्रममण्डले ।
कृत्वा समाश्रितो रौद्रं तेपे च विपुलं तपः ॥
अथाजगाम भगवान्नारदो वेदपारगः ।
तं दृष्ट्वा दीनवदनं क्षुधार्त्तं द्विजपोतकं ॥
तदासौ तस्य संस्कारं चक्रे मौञ्ज्यादिबन्धनं ।
वेदानध्यापयामास सरहस्यपदक्रमात् ।
ददौ च वैष्णवं मन्त्रं द्वादशाक्षरमाच्युतं ॥
वेदाभ्यासरतस्यास्य विष्णुध्यानपरस्य च ।
प्रत्यहं पिप्पलादस्य विष्णुः प्रत्यक्षतां ययौ ॥
वैनतेयसमारूढ़ो नीलोत्पलदलच्छविः ।
चतुर्भुजः पीतवासाः शङ्खचक्रगदाधरः ॥
स उवाच तदा तुष्टो वरं ब्रूहि यमिच्छसि ॥
तच्छ्रुत्वा नारदमुखं समालोक्य शिशुस्तदा ।
नारदेनाभ्यनुज्ञातो योगविद्यामवाप च ॥
दत्त्वा ज्ञानं सोपदेशं योगाभ्यासमनु निर्म्मलं ।
नागारिगमनो विष्णुस्तत्रैवान्तरधीयत ॥
ततोऽभवन्महाज्ञानी महर्षिः स शिशुस्तदा ।
नारदं परिपप्रच्छ केनाहं पीड़ितो मुने ॥
ग्रहेण ग्रहरूपेण बालरूपोऽतिदुःखितः ॥
न मे पिता न मे माता जीवितोऽस्म्यस्य पीड़या ॥

ब्राह्मण्यं भवता दत्तं मम देवाद्विजोत्तम ।
एतच्छ्रुत्वा ततो वाक्यं कथयामास नारदः ॥
शनैश्चरेण क्रूरेण ग्रहेण त्वं हि पीड़ितः ।
पीड़ितश्च समस्तोऽपि देशोऽयं मन्दचारिणा ।
तथैव च फलं प्राप्त एष सौरिः शनैश्चरः ॥

श्रीकृष्ण उवाच ।

एवमुक्ता सुराः सर्व्वे प्रतिजग्मुर्य्यथागतं ।
शनैश्चरोऽपि स्वे स्थाने ग्रहत्वेण प्रतिष्ठितः ॥
पिप्पलादोऽपि ब्रह्मर्षि र्ब्रह्माज्ञां प्रतिपालयन् ।
शनैश्चरन्तु संपूज्य तुष्टाव रचिताञ्जलिः ॥
कोणस्थः पिङ्गलो वक्रः कृष्णो रौद्रोऽन्तकोपमः ।
सौरिः शनैश्चरो मन्दः प्रीयतां मे ग्रहोत्तम ॥
शनैश्चरमितिस्तुत्वा पिप्पलादो महामुनिः ।
रवेर्ज्वलन् विमानस्थो दृश्यतेऽद्यापि मानवैः ॥
इदं शनैश्चराख्यानं ये पठिष्यन्ति मानवाः(१) ।
तेषां कुरुकुलश्रेष्ठ पुनः पीड़ा न बाधते ॥

कृष्णाश्मेन घटितां ग्रहराजमूर्त्तिं
लौहे निधाय कलशे तिलतैलपूर्णे ।
यो ब्राह्मणाय रविजं प्रददाति भक्त्या
पीड़ा शनैश्चरकृता न हि बाधते तं ॥

---

(१) ये श्रोष्यन्ति समाहिताः इति पुस्तकान्तरे पाठः ।

इति भविष्योत्तरे शनैश्चरव्रतं ।

श्रीकृष्ण उवाच ।

अथातः संप्रवक्ष्यामि रहस्यं व्रतदुत्तमं ।
येन लक्ष्मीर्धृतिस्तुष्टिः पुष्टिः कान्तिश्च जायते ॥
मूलेन सूर्य्यतनयं गृहीत्वा भरतर्षभ ।
तस्मिन्दिने पूजनीयं ग्रहत्रितयमादरात् ॥
शनैश्चरश्च राहुश्च केतुश्चेति क्रमान्नृप ।
होमं घृततिलैः कुर्य्याद्ग्रहनाम्ना च मन्त्रवित् ॥
पृथगष्टोत्तरशतमष्टाविंशतिरेव वा ।
होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन तु ।
यथाक्रमं शमीदूर्व्वाकुशाश्च समिधस्तु ताः ।
सप्तमे चैव संप्राप्ते नक्षत्रे सूर्य्यसुतस्य च ।
ग्रहास्त्रयोऽपि कर्त्तव्या राजन् लौहमयाः शुभाः ॥
लौहपात्रे स्थिताः सर्वे सौवर्णे वा कुरूद्वह ।
कृष्णवस्त्रयुगं दद्यादेकैकस्य क्रमान्नृप ॥
अत्र शनिरूपं निरन्तरव्रतोक्तं वेदितव्यं ।

राहुकेतोश्च, मत्स्यपुराणात् ।

करालवदनः खड्गचर्मशूली वरप्रदः ।
नीलसिंहासनयुतो राहुरत्र प्रशस्यते ॥
धूम्रा द्विबाहवः सर्व्वे गदिनो विकृताननाः ।
गृध्रासनगता नित्यं केतवस्युर्व्वरप्रदाः ॥
मृगनाभ्या समालेप्य धूपं कृष्णागुरुस्तथा ।

दत्त्वा नैवेद्यकं सारं ब्राह्मणायोपपादयेत् ॥
शनैश्चर नमस्तुभ्यं नमस्ते राहवे तथा ।
केतवेऽथ नमस्तुभ्यं सर्वशान्तिप्रदो भव ॥
एवं कृते भवेद्यत्तु तन्निबोध द्विजोत्तम ॥
यदि भौमो रवियुतो भास्करो राहुणा सह ।
केतवो मूर्ध्नि तिष्ठन्ति सर्वे पीडाकरा ग्रहाः ॥
अनेन कृतमात्रेण सर्वे शाम्यन्त्युपद्रवाः ॥
य एवं कुरुते राजन् सदा भक्तिसमन्वितः ।
तस्य सानुग्रहाः सर्वे यच्छन्ति विजयं सुखं ॥
य एतां शृणुयाच्छान्तिं ग्रहाणां पठतेऽपि वा ।
तस्य सानुग्रहाः सर्वे शान्तिं यच्छन्ति भूपते ॥
सूर्यं विधुं कुजबुधौ गुरुशुक्रसौरीन्
हस्तादिकृष्टपसहितानुदितक्रमेण ।
संपूज्य हेमघटितान् द्विजपुङ्गवाय
दत्त्वा पुमान् ग्रहगणेन न पीड्यतेऽत्र ॥
शनैश्चरं राहुकेतून् लौहपात्रे व्यवस्थितान् ।
कृष्णागुरुः स्मृतो धूपो दक्षिणा चात्मशक्तितः ॥

इति भविष्योत्तरोक्ता शनैश्चरादिशान्तिः(१) ।

नक्षत्रतिथियोगेन तिथीनां ग्रहयोगतः ।
पुनरेव प्रवक्ष्यामि व्रतानि तु यथा स्थितं ॥
रोहिण्याश्चाष्टमीयोगो यदा भवति सौम्यके ।

---

(१) प्रत्यनुग्रहादिशान्तिरिति पाठान्तरं ।

विशेषपूजा कर्त्तव्या पुत्रकामेन यत्नतः॥
पुष्ये शुक्लचतुर्द्दश्यां गुरुयोगो यदा भवेत्।
अथवा सोमसंयोगो विशेषात् पूज्य शङ्करम्॥
पायसं घृतसंयुक्तं शिवाय विनिवेदयेत्।
धूपदीपोपहाराद्यैः पूर्व्ववत् पूजयेच्छिवं॥
प्राशनन्तु घृतं कार्य्यं सर्व्वकामप्रदं व्रतम्॥
आदित्यरेवतीयोगश्चतुर्द्दश्यां यदा भवेत्।
अष्टम्यां वा मघायोगे शिवं संपूज्य पूर्व्ववत्॥
तिलास्तु प्राशने शस्ता आदित्यव्रतमीरितं।
आरोग्यं जायते तस्य पुत्रबन्धुगणैः सह॥
रोहिणीचन्द्रयोगश्च चतुर्द्दश्यां यदा भवेत्।
अष्टम्यां सोमसंयोगात्तदा चन्द्रव्रतं चरेत्॥
प्रागुक्तेन विधानेन शिवं संपूज्य यत्नतः।
दधि क्षीरन्तु नैवेद्यं प्राशनं क्षीरमेव च।
कीर्त्तिमारोग्यमैश्वर्य्यं प्राप्नुयान्नानृतं वचः॥
अश्विनीभौमसंयोगश्चतुर्द्दश्यां यदा भवेत्।
अष्टम्यां भरणीयोगस्तदा भौमव्रतं चरेत्॥
संपूज्य परया भक्त्या शिवं पञ्चोपचारतः।
रक्तोत्पलप्राशनन्तु साम्राज्यं प्राप्नुयाच्छुभं।
रोहिणीबुधसंयोगश्चतुर्द्दश्यां यदा भवेत्।
अष्टम्यां वा समासेन बुधव्रत समाचरेत्॥
शिवः पूज्यो विधानेन महास्नानपुरःसरं।
सहावर्त्तिसमोपेत प्राशनं पायसङ्कृत।

पुत्रार्थं दाराश्च यशो वर्द्धते तस्य नान्यथा ॥
रेवतीगुरुसंयोगश्चतुर्द्दश्यां यदा भवेत्।
अष्टम्यां तिष्यसंयोगाद्गुरुव्रतं तदा चरेत् ॥
प्राशनं कपिलाज्यन्तु ब्राह्मीरससमन्वितं।
वागीशत्वमवाप्नोति व्रतस्यास्य प्रभावतः ॥
श्रवणं भार्गवयुतं चतुर्द्दश्यां यदा भवेत्।
शुक्रव्रतं तदा विद्धि पुनर्व्वस्वष्टमी यदा।
संपूज्य परमेशानं यथाविभवविस्तरैः।
प्राशनं मधु चैवात्र कर्त्तव्यं संयतात्मना।
महाफलमवाप्नोति व्रतस्यास्य प्रभावतः ॥
भरणीशनियोगस्तु चतुर्द्दश्यां यदा भवेत्।
आर्द्रायोगस्तथाष्टम्यां तदा शनिव्रतं चरेत् ॥
शिवं संपूज्य विधिवत् प्राशनं मस्यमेव च।
शनिरेकादशस्थो हि फलं यच्छति शोभनं ॥
विरुद्धं शोभते यस्य तदर्थं व्रतमाचरेत्।
हेमकुप्यप्रवालञ्च कम्बलन्तु क्रमेण च।
शङ्खञ्च तीक्ष्णलौहञ्च क्रमाद्दुयत्नेन दापयेत्।
यथा सम्भवते यस्य आचार्य्याय प्रयत्नतः ॥

इति कालोत्तरोक्तानि तिथिनक्षत्रवारव्रतानि।

———000———

इन्द्र उवाच।

स्वल्पेनैव तु द्रव्येण महापुण्यं यथा भवेत्।
तदहं श्रोतुमिच्छामि यज्ञयागं सुरेश्वर ॥

ब्रह्मोवाच ।

शृणु वत्स प्रवक्ष्यामि यथा त्वं परिपृच्छसि ।
अल्पक्लेशान्महापुण्यं प्रहर्त्ततिथियोगिकं ॥
भृगुपौष्णाष्टमीयोगं शिवयोगेषु चोत्तमं ।
मृदुवर्गस्त्रसौ भाग्यं भद्रया भृगुवासरे ॥
दैवयोगाद्यदा षष्ठी पुष्यर्त्तरविवासरे ।
स्कन्दयागस्तदा कार्य्यः सर्व्वकामप्रसाधकः ॥
वारे चैव यदा सूर्य्ये सप्तमी विजया मता ।
तदा तु शोभनो योगो भवेत् सर्व्वगुणावहः ॥
शशिरिक्तासु संयोग आर्द्रेत्यस्य सुरेश्वर ॥
नवम्यां मङ्गलो योगो भानुभूतदिनं यदा ।
अष्टम्यां चाथ चन्द्रो हि श्रवणेन सुखावहः ॥
अहिब्रघ्ने कुजाहे तु गणनाथस्य चाहनि ॥
पुनर्वसौ गुरोर्व्वारे द्वादश्यां श्रवणेन च ।
सोमगश्च तदा यागं विष्णोः सर्व्वार्थसाधकं ॥
द्वितीयायां यदा सौम्ये कृत्तिकर्त्तं भवेत् क्वचित् ।
यक्षयागस्तदा कार्य्यः सर्व्वशान्तिप्रदायकः ॥
स्वात्यां शनिचतुर्थी च उमायागे वरा स्मृता ॥
उत्तरासु च पूर्व्वासु भानुपूर्णाष्टमीषु च ।
यक्षशान्त्यादिकं कृत्वा सर्व्वान कामानवाप्नुयात् ।
गुरोरेकादशीपुष्ये रोहिण्यां वा शनैश्चरे ।
सुतसौभाग्यकामाय यागो रौद्रविनायकः ॥
पूर्णिमासु च सर्व्वासु अष्टमीद्वादशीषु च ।

चतुर्दश्यां तृतीयासु ग्रहर्क्षेषु शुभेषु च ।
सर्व्वेषां सम्भवेद्यागो भक्तिपूर्व्वो महामुने ॥
मन्त्रसाधनसिद्धाय कृद्रयागादवाप्यते ॥
श्रीमेधाज्ञानमायुष्यमसायागान्महामुने ।
योगज्ञानं यशः सिद्धिं महादेवादवाप्नुयात् ॥
आरोग्यं सुव्रतीयत्वं भास्करात् प्राप्यते ध्रुवं ।
गतिमिष्टां यथाकामं प्रयच्छति त्रिविक्रमः ॥
विज्ञानं सम्भवेत्तस्य यस्तु पश्येद्विनायकं ॥
विगतारिर्भवेत् षष्ठ्यां दृष्ट्वा स्कन्दन्तु तत्क्षणात् ।
मातृयागान्महासिद्धिः सर्व्वेषामपि जायते ।
भवेत्स धनवान् पुंसां प्रथमाहे हुताशनात् ॥
स्वर्गापवर्गससिद्धिर्दुर्गायागात् प्रजायते ।
मायाद्यैर्मङ्गलाद्यैश्च ज्येष्ठायां ब्रह्मवित्तमैः ॥
दुर्गाद्याः कालिकाद्यास्तु यष्टव्या विधिना मुनेः ॥
इत्याद्ये देवीपुराणे ग्रहतिथ्यादियागमाहात्म्यकीर्त्तनम् ।

इति श्रीमहाराजाधिराजश्रीमहादेवस्य समस्तकरणाधीश्वर-
सकलविद्याविशारदश्रीहेमाद्रिविरचिते-
चतुर्व्वर्गचिन्तामणौ व्रतखण्डे
वारव्रतानि ।

अथ त्रयोविंशोऽध्यायः ।

अथ नक्षत्रव्रतानि ।

मनीषी हेमाद्रिर्नयविनयसम्पत्तिभवनं
द्विजन्मा सन्मार्गप्रथितपदसञ्चारचतुरः ।
त्रिलोकीलोकानामविकलफलश्रेणिरचना
विचित्रं नक्षत्रव्रतगणमिदानीं वितनुते ॥

पुष्कर उवाच ।

अतः परं प्रवक्ष्यामि काम्यं कर्म्म तवानघ ।
उपोषितौ सदा पुष्ये यजमानपुरोहितौ ।
अग्निगृहे शुभे स्नानं कुर्य्यातां तन्निबोधत ॥
अकीलभूमौ द्वौ कुम्भौ मधूककुसुमान्वितौ ।
अन्नगन्धयुतौ कृत्वा स्थापयेथ सदा समौ ॥
ततः संपूजयेद्विद्वान्नासत्यौ शशिनन्तथा ।
अग्निं वरुणञ्चैव शुचिवासास्तथा हरिं(१) ।
गन्धमाल्यनमस्कारैर्दीपधूपान्नसम्पदा ॥
ततोऽन्नमिश्रं कार्य्यं सर्व्वौषधियुतं मृदा ।
प्रणतेन ततो मूर्द्धा नासत्याभ्यां निवेदयेत् ॥
धूपमष्टाङ्गकं दद्याद्देवानान्तु द्विजोत्तम ॥
अश्वलोम तथाश्वत्थफलमूले च वा सदा ।

---

(१) शुक्लवासास्तथापरमिति पाठान्तरं ।

एकत्र निभृतं कृत्वा मणिर्वीर्य्यमुत शोभनः ॥
अलं दधत्त्वाश्विनमेतदेव
स्नानं प्रकुर्व्वन् प्रयतो मनुष्यः।
अश्वानवाप्नोति निरस्तसङ्गान्
कुलोद्भवान् वीर्य्यबलोपपन्नान् ॥

इति विष्णुधर्मोत्तरोक्तं(१)अश्विनीस्नानं।

——000——

ब्रह्मोवाच।

इत्येते कथिताः कृष्ण तिथियोगा मया तव।
नक्षत्रदेवताः सर्व्वाः नक्षत्रेषु व्यवस्थिताः ॥
इष्टान् कामान् प्रयच्छन्ति यथास्थानं सुरेश्वर।
चन्द्रमा यत्र नक्षत्रे यदा समधितिष्ठति।
उक्तस्तु देवयज्ञस्तु तदा स सफलो भवेत् ॥
देवताश्च प्रवक्ष्यामि नक्षत्राणां यथातथं।
नक्षत्राणि च सर्वाणि यज्ञश्चैव पृथक् पृथक् ॥
अश्विन्यामाश्विनाविष्ट्वा दीर्घायुर्जायते नरः।
व्याधिभिर्मुच्यते क्षिप्रं योऽत्यर्थं व्याधिपीड़ितः ॥
भरण्यां यमराड़िष्टः कुसुमैरसितैः शुभैः।
तथा गन्धादिभिः शुभ्रैरपमृत्युं विमोचयेत् ॥
अनलः कृत्तिकायान्तु क्षतिं संपूजितः परां।
रक्तमाल्यादिभिर्दद्यादघृतहोमेन च ध्रुवं ॥
प्रजाः प्रजापतिः प्रीत इष्टो(२) दद्यात्पशूंस्तथा।

(१) भविष्योत्तरोक्तमिति पुस्तकान्तरे पाठः।

(२) पश्चः प्रजापतिः प्रीत इष्टमिति पाठान्तरं।

रोहिण्यां देवशार्दूल गोजमाह जगत्पते ॥
मृगशीर्षे तथा सोमं ज्ञातिमारोग्यमेव च ॥
आर्द्रायान्तु शिवं पूज्य पशून् विजयमेव च ।
सितैः पद्मादिभिर्द्दिव्यैर्द्देवत्वं पयसा च वै ।
पुत्रान् पुनर्व्वसौ दद्याच्चरणा तर्प्पिता दितिः ॥
तिष्ये वृहस्पतिर्बुद्धिं विपुलं सुखमेव तु ।
भोगान् गन्धादिभिर्नागा अश्लेषायां प्रपूजिताः ॥
तर्पिताश्च प्रयच्छन्ति भक्ष्याद्यैर्मधुरैः शुभैः ।
मघासु पितरः पुष्टिं घृतपायसतर्पिताः ॥
पूर्व्वायां विजयं दद्याद्भगो देवः सुतर्पितः ॥
भक्त्या प्रपूजितो दद्यादुत्तरायां तथार्य्यमा ।
भर्त्तारमीप्सितं नार्य्याः पुंसश्च वरयोषितं ॥
नीरोगत्वं तथायुष्यं सम्पदं चारुरूपतां ।
पुष्पवस्त्रार्च्चितो हस्ते दद्यात्तेजोनिधिस्तथा ॥
चित्रासु पूजितस्त्वष्टा दद्यादारोग्यमेव च(१) ।
स्वात्यां संपूजितो वायुः पुत्रानिष्टान् प्रयच्छति(२) ॥
इन्द्राग्नी तु विशाखायां पीतरक्तैः प्रपूज्य च ।
धनं राज्यञ्च लब्ध्वेह तेजस्वी नित्यमेतदा ॥
रक्तैर्मित्रमनूराधास्विवं संपूज्य भक्तितः ।
प्रियो जनानां सर्व्वेषां चिरञ्जीवति सर्व्वदा ॥
ज्येष्ठायां पूर्व्ववत्त्विन्द्रमिष्ट्वा पुष्टिमवाप्नुयात् ।

---

(१) राज्यं मित्रञ्च चित्रायां मित्रवर्गं प्रयच्छतीति पाठान्तरं ।

(२) रक्तवस्त्रार्च्चितः प्रीतः स्वात्यां वायुर्व्वलं परमिति पुस्तकान्तरे पाठः ।

गुणैः सर्वैस्तु संपूर्णः कर्मणा वचनेन च ॥
मूले निर्ऋतिमिष्ट्वा च भक्तैस्तु पललादिभिः।
पूर्व्ववत् फलमाप्नोति स्वस्थाने च ध्रुवो भवेत् ॥
अप इष्ट्वा जलैरेतैर्हुत्वा तथैव पूर्व्ववत्।
सन्तापान्मुच्यते क्षिप्रं शारीरान्मानसात्तथा ॥
आषाढ़ासु तथा विश्वान् विरिञ्चं तुरयोगतः।
संपूज्य श्रियमाप्नोति परं विजयमेव तु(१) ॥
श्रवणे पूजितो विष्णुः सर्व्वान् कामान् प्रयच्छति(२)।
धनिष्ठासु वसूनिष्ट्वा न भयं प्राप्नुयात् क्वचित् ॥
महतोऽपि भयात्तीर्णो गन्धपुष्पादिभिः शुभैः(३)।
वरुणं शतभिषास्वर्च्य व्याधिभिर्मुच्यते नरः ॥
अजभ्याद्रपदायान्तु शुद्धस्फटिकसन्निभं।
संपूज्य मुक्तिमाप्नोति नात्र कार्य्या विचारणा ॥
उत्तरायामहिर्बुध्न्यं परां शान्तिमवाप्नुयात् ॥
रेवत्यां पूजितः पूषा ददाति विविधान् पशून्।
सितैः पुष्पैस्तथा दीपैर्धूपैर्व्विजयवर्द्धनैः ॥
य एते वै समाख्याता यज्ञाः संक्षेपतो मया।
नक्षत्रदेवतानां हि साधकानां हिताय वै।
तस्माद्धितानुसारेण भवन्ति फलदायकाः ॥
गन्तुमिच्छेद्यदान्यत्र क्रियापारम्भ एव च।

---

(१) विशाखं परमं लब्ध्वा, सर्व्वमाप्नोति मानव इति पाठान्तरं।
(२) दीपैर्धूपैश्च भक्तित इति पाठान्तरं।
(३) रक्तैश्च कुसुमैः शुभैरिति पाठान्तरं।

नक्षत्रदेवतायच्च ज्ञात्वा तं सर्व्वमाचरेत् ॥
एवं कृते हि तत्सर्वं यात्राफलमवाप्नुयात्।
क्रियाफलन्तु संपूर्णमित्युक्तं भानुना स्वयं॥

इति भविष्यत्पुराणोक्तो नक्षत्रपूजाविधिः।

———000———

श्रीराम उवाच।

अभ्यं देवमवाप्नोति शत्रुनाशमथापि वा।
स्वेच्छया कर्म्मणा येन सदा मनुजपुङ्गव ॥
पूजयेद्वासुदेवन्तु कुङ्कुमेन सुगन्धिना।
श्वेतैश्च कुसुमैर्श्चैर्धूपं दद्याच्च गुग्गुलं ॥
घृतेन दीपं दद्याच्च रक्तवस्त्रं तथैव च।
निवेदनीयं देवाय तथा सर्व्वं निवेदयेत् ॥
होतव्यश्च समृद्धोऽग्नो तथैव च सुरर्षभ।
आयुधानि च देयानि ब्राह्मणेभ्यस्तु दक्षिणा ॥

ज्ञात्वैतदन्यं रिपुनाशकारि
कार्य्यं सदा शत्रुगणप्रमाथि।
कृत्वैतदन्यं रिपुनाशमाशु
प्राप्नोति मर्त्त्यो न हि संशयोऽत्र ॥

इति विष्णुधर्म्मोत्तरोक्तं शत्रुनाशनव्रतम्।

———000———

श्रीराम उवाच।

कर्म्माणि श्रोतुमिच्छामि काम्यानि यदुनन्दन।
यतः सर्व्वत्र धर्म्मज्ञ यादीमथरुपाक्षण।

पुष्कर उवाच।

कृतोपवासो याम्यर्क्षे सोपवासस्य भार्गव।
पुरोधाःस्नपनं कुर्य्यात् कृत्तिकासु यथाविधि॥
प्रकीर्णमूलैः कलशैर्मृन्मयैरथ काञ्चनैः।
पूर्णैः सर्व्वौषधिगणैस्तथा तीर्थोदकैः शुभैः॥
अश्वत्थखदिरशिरीषाणां न्यग्रोधानां फलैस्तथा।
पात्रपूर्णैस्तथा युक्तैस्तिलैः कृष्णैर्द्विजोत्तम॥
रक्तमाल्येन सूत्रेण बद्धकण्ठैस्तथैव च।
आग्नेय्याशामुखः स्नाप्यो नीलवासा द्विजोत्तमः॥
वह्निं कुमारं यमिनं स्कन्दं ववषमेव च।
पूजयेत् कृत्तिकास्वेव गन्धमाल्यानुसम्पदा॥
पीतरक्तैस्तथा वस्त्रैर्घृतदीपैस्तथैव च।
दध्ना गव्येन लाजाभिरन्निमन्त्रैश्च वाप्यथ॥
कृसरापूपिकाभिश्च अपूपैश्च पृथग्विधैः।
देवतानां यथोक्तानां प्रियकं जुहुयात्ततः॥
गर्द्दभाश्वमयूराणां लोमानि मनुजोत्तम।
धारयेद्दक्षिणे सम्यक् गत्वा कनकमेव च।
सितवासास्ततः पश्चात्पूजयेन्मधुसूदनं।
कामं तत्ततस्तं कृत्वा गच्छेद्वह्नेः पुरं सदा॥

इति विष्णुधर्मोत्तरोक्तं कृत्तिकास्नानं।

———ooo———

नन्दिरुवाच।

रोहिणी जन्मनक्षत्रं यस्य देवस्य चक्रिणः

ताम्रवर्णमयीं कृत्वा पञ्चरत्नेन संयुतां॥
स्थापयेद्वस्त्रयुग्मेन पुष्पधूपैः(१) प्रपूजयेत् ।
कालोद्भवफलैर्हृद्यैर्नैवेद्यैश्च तथार्चितैः ॥
द्वितीयेऽह्नि समाप्यैतद्ब्राह्मणायोपपादयेत् ।
श्रोत्रियाय सुरूपाय भिक्षुकाय कुटुम्बिने ॥
स्वयं नक्तेन भुञ्जीत रोहिण्या दर्शने कृते ।
एवं विधं व्रतं दिव्यं दिवि देवाश्च चक्रिरे ॥
वर्षे वर्षे समायाते देवाश्चापि कुर्वते ।
यं यं काममभिध्यायन् तं तमाप्नोत्यसंशयं ॥

इति स्कन्दपुराणोक्तं रोहिणीव्रतं ।

———000———

पुष्कर उवाच ।

उपोषितौ कृत्तिकासु यजमानपुरोहितौ ।
रोहिण्यां स्नपनं कुर्य्याद्यजमानस्य भार्गव ॥
क्षीरवृक्षप्ररोहाड्यसितमाल्यविभूषितान् ।
प्रियङ्गुचन्दनोपेतान् पञ्च कुम्भान् प्रकल्पयेत् ॥
प्राङ्मुखो ब्रीहिराशिस्थं कुम्भैस्तैरभिषेचयेत् ।
विष्णुं गङ्गाञ्च वरुणं रोहिणीञ्च प्रजापतिं ॥
पूजयेत्संयतः सम्यौ गन्धमाल्यानुलेपनैः ।
धूपः प्रजापतेर्देयस्तथा विष्णुगङ्गयोः ॥

(१) गन्धधूपैरिति पाठान्तरं ।

पञ्च पिष्टवृषान् दिव्यान् धूपञ्च विनिवेदयेत्।
पूजाविधाय होमन्तु देवतानाञ्च कारयेत्॥
घृतेन सर्व्वबीजैश्च शुक्लवासा जितेन्द्रियः।
दक्षिणा गुरवे देया कांस्यं गौर्वाससी शुभे॥
सुवर्णञ्च महाभाग विप्राणामथ भक्तितः।
पांशुकर्द्दमसंयुक्तमश्मलोम शफं तथा॥
शृङ्गञ्च विहृतं ज्ञात्वा मणिधार्य्यः शुभप्रदः।
अलं क्रियार्थं तदिदं सदैव
स्नानन्तु कुर्व्वन् पुरुषोऽथवा स्त्री।
पुत्रानवाप्नोति तथेप्सितांश्च
पुष्टिं तथाग्र्यां विपुलाञ्च कीर्त्तिं॥

इति विष्णुधर्म्मोत्तरोक्तं रोहिणीस्नानं।

———000———

मनुरुवाच।

ग्रहदोषोपसृष्टस्य राज्ञो राजसुतस्य च।
महिष्यो वा मृतापत्या द्विजादिष्वथ वा जने।
विपद्यते फलं यत्र सुप्रयत्नकृतोद्यमे।
गजाश्वगोवृषाणाञ्च यत्र हानिः प्रजायते॥
यत्र भौमान्तरीक्षे च उपसर्गः प्रदृश्यते।
तत्र कुर्य्यान्महाभाग यागं पुष्याभिषेचनं॥
मूल राजा समाख्यातस्तस्य शाखा प्रजादिकं।
उपसंहारसंस्कारे शुभे वाप्यशुभेऽपि वा॥

यत्नः कार्य्यः सदा वत्स मूले शाखादिकं भवेत् ।
मूले विनष्टे नश्यन्ति शाखाद्याः फलसञ्चयाः ॥
तदर्थं मूलरक्षायां यतितव्यं महामुने ।
धर्मार्थकाममोक्षाणां स हि हेतुः प्रपद्यते ॥
ब्रह्मणा या पुरा शान्तिर्महेन्द्रार्थं बृहस्पतेः ।
व्याख्याता कीर्त्तयिष्यामि तान्ते शौनक शृणुष्व ॥
पुण्यस्नानं महापुण्यं सर्व्वपापप्रणाशनम् ।
उत्पातशमनं दिव्यं यत्न कुर्वायधारय ॥
वल्मीकतुषकेशास्थिकट्कण्टकविवर्जिते ।
शिगुल्मेषातदौर्गन्धिविगते च महीतले ।
कङ्ककापोतगृध्रोलूककाकपरिवर्जिते ॥
सुप्लुते चम्पकाशोकवकुलाम्रातशाद्वले ।
तरुणवल्लिविततेनिकपहतदलान्विते ।
सुमधुरहृत्प्राये(१) फलपल्लवशोभिते ।
पक्षिशावगणाकीर्णे क्लकवाकूपशोभिते ।
जीवजीवकहारीतशतपत्रशुकाकुले ॥
चकोरचाससंयुक्ते चक्रवाकोपशोभिते ।
शिखिपारावताश्रीककोककोकिलनादिते ॥
मधुपुष्पासवसुरामधूककुसुमाकुले ।
यागं कुर्य्याद्दिनोद्देशे चैत्रेऽरण्येऽथवा शुभे ॥
हिमाद्रावुज्जयन्ते वा सह्ये विन्ध्याचलेऽपि वा ।
नदीनां पुलिने वापि सङ्गमे वा मनोरमे ॥

---

(१) सुमधुरहृत्प्राये इति पाठान्तरं ।

गोरोचनालक्तककाश्मीरकुङ्कुमशोभिते ।
समुद्रतीरे कुर्य्याच्च आश्रमे वा गृहेऽपि वा ॥
पूर्वोदक्प्लवभूभागे प्रदक्षिणपथे जले ।
श्वाविन्मूषिकविरते कर्कटावासवर्जिते ॥
वर्णगन्धरसोपेता घना स्निग्धा समा मही ।
या कृष्टबीजरोहाद्यैर्बहुशः सुपरीक्षिता ॥
गत्वा तां सुमुहूर्त्तेऽथ कौबेर्य्यामधिवासयेत् ।
बलिपुष्पोपहारैश्च मन्त्रयुक्तं निवेदयेत् ॥
आगच्छन्तु सुराः सर्व्वे येऽत्र पूजाभिलाषिणः ।
दिशो नागा द्विजाश्चैव ये चान्ये अंशभागिनः ॥
आवाह्ये वन्ततः सर्व्वानेवं ब्रूयात्पुरोहितः ।
श्वः पूजां प्राप्य यातारो दत्त्वा शान्तिं महीभुजे ॥
कृत्वा पूजां ततस्तेषां रात्रौ तस्यां व्रती वसेत् ।
स्नात्वा शुभाश्वगोवत्सदधिशर्षपदर्शनं ॥
पुष्पदूर्व्वाक्षतफललाजदर्शनमेव च ।
छत्रचामरशङ्खाश्रितवस्त्रादिदर्शनं ।
लाभो वा सर्व्वकामानां पूरणाय प्रकीर्त्तितः ॥
फलपुष्पयुता वृक्षाः क्षीरिणः शुभदा मताः ।
तेषामारोहणं श्रेष्ठं प्रासादे भवनादिषु ॥
चन्द्रार्कग्रहणं शस्तं पर्व्वतारोहणं शुभं ।
निगड़ं बन्धनं स्वप्ने विद्विषश्च जयावहः ।
परिवर्त्तं गिरेः कुर्य्याच्छक्तं वाचावगूहति(१) ॥

---

(१) अथ वाचावगूहति इति पाठान्तरं ।

वेष्टयेद्यस्तु प्रासादं स्वप्ने तस्य जयो भवेत्।
लभते चेप्सितं सर्वं लाभो तस्य तु वै भवेत्॥
मृतरोदनहीनस्त्रीगमनञ्च शुभावहं(१)।
स्वप्ने तु कूपपङ्केषु गर्त्तेषु तरणं शुभं।
नदीषु तरणं शस्तं समुद्रतरणं तथा।
निर्ज्जित्य शत्रुसैन्यञ्च जयं प्राप्नोति मानवः॥
कटकाद्या अलङ्काराः पुत्रराज्यसुखप्रदाः।
सुहृदश्चनवैपद्मोलाभाः स्त्रीधनदायकाः॥
रुधिरारक्तः पिबेद्यस्तु तरते वा यदि क्वचित्।
मांसास्थिभक्षणे लाभो लभते वा हितं फलं॥
हास्यनृत्यचरोत्साहपतनाः कलिकारकाः॥
याम्ये यातागताकृष्टानयनं भयमृत्युदं।
पश्चिमे यानगामित्वं तथाकूपप्रवेशनं।
उत्तरे भयदः स्वप्ने रक्तमाल्याम्बरागमः॥
खरोष्ट्रकपिकापोतवराहाहिनिशाचरान्।
दृष्ट्वाशुभान् जयः कार्य्यो घातपातफलप्रदान्॥
वातपित्तकफोत्थेषु यानाग्नितरणादिषु।
शीघ्रशरदसन्तेषु प्रपादानफलप्रदाः॥
श्रुतानुकीर्त्तणं दृष्टमनुभूतं विगर्हितं।
न चेष्टा यदि वा दृष्टाः प्रदोषप्रथमे तथा॥
मध्ये मध्यफलाः सर्व्वे चान्ते शीघ्रफलप्रदाः।
गोविसर्गेच ये दृष्टास्ते तथा परिकीर्त्तिताः॥

---

(१) मृतस्त्रीगमन शुभमिति पुस्तकान्तरे पाठः।

दृष्ट्वा स्वप्नान् शुभान् यागं कुर्य्यात्त्विष्टन्तु कारयेत्।
स्नानं देवार्च्चनं होमं जयं शान्तिं समारभेत्॥
कृत्वा सर्व्वान् लभेत् वत्स ततो मण्डलमालिखेत्।
चतुर्हस्तं समारभ्य यावद्धस्तशतं भवेत्॥
मण्डलं तत्र कर्त्तव्यमत ऊर्द्ध्वं न कारयेत्।
विमलं विजयं भद्रं विमानं शुभदं शिवं॥
वर्द्धमानञ्च देवस्य लताख्यं कामदायकं।
सचक्रं स्वस्तिकाख्यञ्च इति द्वादश मण्डलाः॥
सितादिहरितानाञ्च रजःकार्य्यैः सुशोभनः।
शालिपिष्टककौसुम्भरजनीहरिपत्रजाः।
मणिविद्रुमरागाश्च भवना अभिमन्त्रिताः।
सितसर्षपधूपाढ्यं रजः कृत्वा तु पातयेत्॥
अस्त्रराजं न्यसेन्मन्त्री सप्तवन्ति पदानि वा।
सौम्यं स्थानं शुभङ्कृत्वा गोमयेनोपलेपितं॥
चन्दनागुरुकर्पूरचोदधूर्णादिवासितं।
भूभागं सुमितं सिद्धं पूर्व्वं पश्चिममुत्तरं।
याम्यं स्वस्तिकशङ्काद्यैः सूत्रैः काण्डकमण्डितैः।
पद्मपत्राष्टकं मध्ये त्रिगुणं त्रिगुणीकृतं॥
द्वाराणि समसूत्राणि कर्णिकाकेशरोज्ज्वलं।
पद्मं तथा च शेषाणि स्वस्तिकान्युत्पलानि च॥
सव्येऽवलम्ब्य हस्ते तु रजःपातं समारभेत्।
मध्यमानामिकाङ्गुष्ठैरुपरिष्टादुपेक्षया॥
अधोमुखाङ्गुली कृत्वा पातयेत्तु विचक्षणः।

समा रेखा तु कर्त्तव्याविच्छिन्ना पुष्पवर्ज्जिता ॥
अङ्गुष्ठपर्व्ववत्स्थूला समा कार्य्या विजानता ॥
ससत्त्वं विषमं स्थूलं विच्छिन्नं कश्मलावृतं ।
पर्य्यस्तमर्पितं कृष्णमालिखेन्न कदाचन ॥
ससत्त्वे कलहं विद्याद्वक्ररेखे च विग्रहं ।
अतिस्थूले भवेद्व्याधिर्नित्यं पीड़ा विमिश्रिते ॥
विन्दुभिर्भयमाप्नोति शत्रुपक्षान्न संशयः ।
कश्मलायाश्चार्थहानिः स्याद्विच्छिन्ने मरणं ध्रुवं ।
वियोगो वा भवेत्तस्य इष्टद्रव्यसुतस्य च ॥
अविदित्वा लिखेद्यस्तु मण्डलन्तु यथेच्छया ।
सर्व्वदोषानवाप्नोति ये दोषाः पूर्व्वभाषिताः ॥
चतुरस्रं चतुर्द्वारं लिखेन्मण्डलमुत्तमं ।
मण्डलस्य प्रमाणेन पद्मं द्वारे समालिखेत् ॥
ह्रस्वोनं न च कर्त्तव्यं पद्मं विप्र कदाचन ।
नाधिकं चतुरूर्द्ध्वन्तु लिखितव्यं विजानता ॥
प्रतापायुः श्रियो धर्म्मो राज्यस्तोरुपसम्पदः ।
अवाप्यन्तेऽर्थलाभश्च पूर्व्वद्वारे च मण्डले ॥
बुद्धिर्मेधा यशः सौख्यमारोग्यं जनवल्लभ ।
सर्व्वकामार्थसिद्धिश्च उत्तरद्वारि मण्डले ॥
पुत्र आयुर्बलञ्चैव सौभाग्यं रिपुमर्द्दनं ।
यज्ञकर्म्माभिवृद्धिश्च पश्चिमद्वारि मण्डले ॥
तस्य मध्ये पुनः पद्ममष्टपत्रं सकर्णिकं ।
चतुर्वितस्तिकं विप्र राजन्ये त्रिवितस्तिकं ।

अर्द्धहयन्तु वैश्यस्य स्त्रीशूद्रैर्हि वितस्तिकं ॥
पद्मस्यैवानुपूर्व्वेण नालन्तदनुपूर्व्वशः।
वारुणीन्दिशमाश्रित्य नालन्तु परिकल्पयेत् ॥
सप्तपातालगं नालं भुवनाख्यं प्रकीर्त्तितं ।
कर्णिका तु भवेन्मेरुर्बीजैर्यच्छगणैः स्थिता।
केशरास्तु भवेयुर्वा कर्णिकैः पर्व्वताः स्थिताः
अष्टौ दला दिशः प्रोक्ता ऋषयः पद्मसंस्थिताः ॥
सप्तपातालभूर्लोको नालन्तु परिकीर्त्तितं।
ईदृशं कल्पितं पद्मं देवदेवेन शम्भुना॥
ध्वजतोरणसंयुक्तं पताकाभिरलङ्कृतं।
भूर्लोकस्तु दला ज्ञेया दिगात्मा शून्यगोचरः ॥
स्वर्लोकः कर्णिका ख्यातस्त्रैलोक्यं पद्मसंश्रितं।
कर्णिकायां न्यसेद्देवं पूजाकाले महेश्वरं ॥
मातरो यक्षनागाश्च यक्षरक्षादिवाकराः।
वसवो मुनिलोकेशाः सरुद्रा भुवनाधिपाः ॥
कलाः काष्ठाः(१) क्षणा यामा रात्र्यहः सितासिताः।
पक्षा मासा ऋतुभागाः समा युगयुगान्तराः।
कल्पान्ताश्च महाकल्पाः पद्मे चैवं समालिखेत् ॥
प्रथमे मण्डले देवं शिवं विघ्नेशसंयुतं।
गणनायकसंयुक्तं द्वितीये वरणे यजेत् ॥
सग्रहं भास्करं प्राच्यां ऐशान्यान्तु पिनाकिनं ॥
सौम्यास्यं केशवं रक्षेत् पश्चिमास्यं पितामहं।

---

(१) लवाः काष्ठा इति पाठान्तरं।

तृतीये वरणे चैवं मेदिन्यामुपकल्पयेत् ॥
नानारत्नाकराकीर्णे भूयो देवान् समालिखेत् ।
पुरोहितो यथास्थानं नागान् यक्षान् पितॄन् सुरान् ॥
गन्धर्व्वाप्सरसश्चैव मुनीन् सिद्धान्निवेशयेत् ।
ग्रहांश्च सह नक्षत्रैः सरुद्रांश्चैव मातरः ॥
स्कन्दं विष्णुं विशाखाश्च लोकपालान् सुरस्त्रियः ।
सुवर्णैर्विविधैः कृत्वा द्रव्यैर्गन्धगुणान्वितैः ॥
यथा संपूजयेद्विद्वान् गन्धमाल्यानुलेपनैः ।
भक्ष्यैरन्यैश्च विविधैः फलमूलादिभिस्तथा ॥
पानैश्च विविधैर्हृद्यैः सुराक्षीरासवादिभिः ।
विशेषाद्विहिता पूजा ग्रहयज्ञे मया पुरा ॥
मातॄणाञ्च सुराणाञ्च साध्यतैवोपकल्पाते ।
पिशाचान् दानवान् रक्षान् मांसमयैः प्रपूजयेत् ॥
अभ्यञ्जनाञ्जनतिलैर्म्मांसेन पितरस्तथा ।
मुनयः सामगर्जुभिर्माल्यैस्त्रिमधुरेण च ॥
नागानशेषरत्नैश्च वर्णकैश्चैव पूजयेत् ।
धूपाद्याहुतिदानैश्च देवान् रत्नैः प्रदक्षिणैः ॥
गन्धर्व्वाप्सरसो गन्धैर्माल्यैः सुमनसा तथा ।
शेषांस्तु सर्व्वान् बलिभिः पुष्पगन्धैश्च पूजयेत् ॥
प्रतिनाम्ना पताकाश्च वस्त्राण्याभरणानि च ।
सर्व्वेषाञ्च प्रदेयानि सुयत्नोपहितानि च ॥
दक्षिणे पश्चिमे वापि वायव्यां मण्डलस्य च ।
ग्रहयज्ञविधानेन होमं मातृमखोदितं ॥

कृत्वा द्रव्यैरिमैर्वत्स यथोक्तैर्लक्षणान्वितैः।
लाजाक्षतघृतं क्षौद्रं दधि क्षीरं तु सर्षपाः॥
सिद्धार्थाः सुमनोगन्धा धूपाश्च ससितोत्कटाः।
गोरोचना तिला दर्भा मुद्गजातिफलानि च॥
घृतपायससम्पूर्णान् सरावान् विनिवेदयेत्।
पश्चिमायान्तु वै वेद्यां पूजायां स्नातको भवेत्॥
कलशान् सुदृढ़ान् कुर्य्यात् लक्षणेन वदामि ते।
उत्पत्तिलक्षणं स्नानं कथयामि महामुने।
वाचकाः कलशाश्चैव येन लोके प्रकीर्त्तिताः॥
अमृते मथ्यमाने तु सर्व्वैर्देवैः सदानवैः।
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिं॥
उत्पन्नममृतं तत्र महावीर्य्यपराक्रमं।
तस्य सन्धारणार्थाय कलशः परिकीर्त्तितः॥
कलां कलां गृहीत्वा च देवानां विश्वकर्म्मणा।
निर्म्मितोऽयं सुरैर्यस्मात् कलशस्तेन उच्यते॥
कलशस्य मुखे ब्रह्मा ग्रीवायान्तु महेश्वरः।
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः॥
शेषास्तु देवताः सर्व्वा वेष्टयन्ति चतुर्द्दिशं॥
कुक्षौ तु सागराः सप्त सप्त द्वीपास्तु मध्यतः।
नक्षत्राणि ग्रहाःसर्व्वे तथैव कुलपर्व्वताः॥
हिमवान् हेमकूटश्च निषधो मेरुरेव च।
रोहितो माल्यवांश्चैव सूर्य्यकान्तिश्च पर्व्वताः॥
गङ्गा सरस्वती सिन्धुसुभगा यमुना नदी।

ऐरावती शतद्रुश्च तथा वैतरणी नदी ।
गोदावरी नर्म्मदा च मही नाम महानदी ॥
कुरुक्षेत्रं प्रयागश्च एकहस्तं पृथूदकं ।
अमरेशं पुण्डरीकं गङ्गा सागर एव च ॥
पृथिव्यां यानि तीर्थानि कलशे निवसन्ति वै ।
स्वाहा शान्तिश्च पुष्टिश्च प्रीतिर्गायत्रिरेव च ॥
ऋग्वेदोऽथ यजुर्वेदः सामवेदस्तथैव च ।
अथर्व्ववेदसहिताः सर्व्वे कलशसंस्थिताः ॥
नवैव कलशाः पुण्याः शम्भुमूर्त्तिसमुद्भवाः ।
गोप्योपगोप्यो मरुतः सुमन्दश्च तथापरः ॥
मनोहरः खलुभद्रः पञ्चमः परिकीर्त्तितः ।
विरुजस्सनदूषश्च षष्ठसप्तमकावुभौ ।
अष्टमस्त्विन्द्रियातीतो नवमो विजयः स्मृतः ॥
नवैव कलशाः ख्याता अधिदैवं निबोध मे ।
शृणु वत्स यथा तेषान्दिग्गोन्यासे व्यवस्थिताः ॥
नवमो यः समाख्यातो विजयो नाम नामतः ।
शिवस्तत्र स्थितः साक्षात्सर्व्वपापहरः शुभः ॥
स तु पञ्चमुखः ख्यातो लोके सर्वार्थसाधकः ।
पञ्चब्रह्मात्मको यस्मात्तेन पञ्चमुखः स्मृतः ॥
पश्चिमे तु मुखे सद्यो वामदेवस्तथोत्तरे ।
पूर्व्वे तत्पुरुषं विद्यादघोरश्चापि दक्षिणे ॥
ईशानः पञ्चमो मध्ये सर्व्वेषामुपरिस्थितः ।
एते पञ्च मुखा वत्स पापघ्ना मदनाशनाः ॥

सद्योजातो भवेच्छुक्लो वामदेवस्तु पीतकः।
रक्तस्तत्पुरुषो ज्ञेयो अघोरः कृष्ण एव च॥
ईशानः पश्चिमे तेषां सर्व्ववर्णैः समन्वितः।
कामदः कामरूपो स्यात् ज्ञानाधारः शिवात्मकः॥
क्षितीन्द्रो ज्येष्ठकलशो द्वितीयो जलसम्भवः।
तृतीयः पवनश्चैव चतुर्थस्तु हुताशनः।
पञ्चमो यजमानस्तु षष्ठश्चाकाशसम्भवः॥
सोमस्तु सप्तमः प्रोक्त आदित्यश्च तथाष्टमः।
एते चोत्पादिता दिव्याः शिवेनाधिष्ठिताः पुरा॥
इन्द्रस्य मूर्त्तयश्चाष्टौ सूर्य्यस्य तु नव स्थिताः।
क्षितीन्द्रः पूर्व्वतो न्यस्यः पश्चिमे जलसम्भवः॥
वायव्ये वायवो न्यस्य आग्नेये अग्निसम्भवः।
नैर्ऋते यजमानस्तु ऐशान्यां कामसम्भवः॥
सौम्य उत्तरतो योज्यः सौरं दक्षिणतो न्यसेत्।
न्यस्यैवं कलशानान्तु पूर्व्वरूपं विचिन्तयेत्॥
कलशानां मुखे ब्रह्मा ग्रीवायां विष्णुरेव हि।
मध्ये मातृगणाः सर्व्वे सेन्द्रा देवाश्च पन्नगाः(१)॥
कुक्षौ तु सागरास्तेषां सप्तद्वीपा च मेदिनी।
श्रिया चैव तथोमा च गन्धर्वा ऋषयस्तथा।
पञ्चभूतास्तथा घोरास्तेषामधरतः स्थिताः॥
पूर्णाः पूतेन तोयेन सितास्ते कान्ततोज्ज्वलाः।
सरित्सरःखातजेन ताड़ागेन जलेन वा।

(१) राद्रा देवाश्च इति पाठान्तरं।

वापीकूपादितोयेन सामुद्रेण सुखावहाः ॥
सर्व्वमङ्गलमाङ्गल्याः सर्व्वकिल्बिषनाशकाः ।
अभिषेके सदा शस्ताः कलशा ईदृशाः शुभाः ॥
यात्राविवाहकाले वा प्रतिष्ठायज्ञकर्म्मणि ।
योजनीया विशेषेण सर्व्वकामप्रसाधकाः ॥
मृतापत्या तु या नारी या च वन्ध्या प्रकीर्त्तिता ।
मूढ़गर्भा स्रवगर्भा च दुर्भगा व्याधिपीड़िता ।
एतासाञ्च सदा कार्य्यं स्नापनं पुष्पमण्डले ॥
सर्व्वरत्नौषधीगन्धफलपुष्पसमन्विताः ।
ग्रहदीपे प्रकर्त्तव्याः कल्याणे मङ्गले तथा ॥
ग्रहान् धारयते यस्मान्मातरो विविधास्तथा ।
दुरितांश्च महाघोरांस्तेन ते धारकाः स्मृताः ॥
एकैकान्तु कलां मूर्त्तैः शिल्याद्यैश्च यथाक्रमं ।
संहृत्य संस्थिता यस्मात्तेन ते कलशाः स्मृताः ॥
हैमराजतताम्रा वा मृन्मया लक्षणान्विताः ।
पञ्चाङ्गुलाश्च विस्तीर्णा उत्सेधाः षोड़शाङ्गुलाः ॥
कलशानां प्रमाणन्तु मुखमष्टाङ्गुलम्भवेत् ।
अष्टमूर्त्तिस्थितो योऽसौ स शिवः पद्मसम्भवः ॥
मूर्त्तयोऽष्टौ गणास्तस्य कर्णिकायां शिवःस्थितः ।
ये गणास्ते दला नागा ये नागाः कलशाश्च ते ॥
कलशाश्च ग्रहाः प्रोक्ता लोकपाला दिशश्च ते ।
एतैः सर्व्वमिदं व्याप्तमाब्रह्मभुवनं जगत् ॥
दुराधर्षैर्महासत्त्वैः सर्व्वपापविशोधकैः ।

रत्नानि बीजपुष्पाणि फलानि कलशे क्षिपेत्।
पुष्पमालाश्च वस्त्राणि सितचन्दनचर्चिताः॥
वज्रमौक्तिकवैदूर्य्यमहापद्मैश्च स्फाटिकैः।
सर्व्वैः शुभैः फलैर्बिल्वनारङ्गोडुम्बरैस्तथा॥
बीजपूरकजम्बीरआम्राम्रातकदाड़िमैः।
यवशालिनिवारैश्च गोधूमसितशर्षपैः॥
कुङ्कुमागुरुकर्पूरमदरोचनचन्दनैः।
मांस्येलाकुष्ठकर्पूरपत्रचण्डासुराजलं॥
निर्य्यासाम्बुदशैलेयसर्ज्जदेवदलं फलं।
जातीपत्रकनागाह्वाः पृक्का गौरी सपर्णिका॥
वचा रात्रिः समञ्जिष्ठा तुरष्कं मङ्गलाष्टकं।
दूर्व्वा मोहनभृङ्गारं शतमूली शतावरी॥
बाला नागबला देवी सहदेवीजयाशुभाः।
पुन्नागीमासितापाठा गुञ्जा सुरसिकालता॥
बालकं गजदन्तन्तु शतपुष्पा(१) पुनर्नवा।
ब्राह्मी देवी शिवा रुद्रा सर्व्वशस्यानि काञ्चनं।
समाहृत्य शुभान्येवं कलशेषु निधापयेत्॥
कल्याणं विजयं धूपं चन्द्रं दद्यात् समङ्गलं।
सर्व्वरत्नमलङ्कारं रोचनाख्यन्तु पट्टकं॥
द्वाङ्गुलं द्वाङ्गुलं वृद्ध्या षट्त्रिंशदङ्गुलावधि।
वृत्तं वा चतुरस्रं वा पद्मकं त्रिकगार्भिकं॥
वासवं पद्ममध्ये तु भगस्वस्तिविनायकैः।

(१) शतपत्रमिति पाठान्तरं।

श्रीशौण्डसमारोहैः सर्व्वदेवैः शुभान्वितं ।
सर्व्वरत्नसमोपेतं पद्मं कुर्य्याद्विहस्तकं ॥
हस्तविस्तारमुच्छ्राये दशाङ्गुलसुशोभनं ।
ध्यानाख्यं सार्द्धहस्तन्तु पद्मं हस्तसमन्वितं ॥
शय्याख्यं द्विगुणं दद्यात्तनुमानं सपीठकं ।
गजसिंहपदाकीर्णं हेमरत्नविभूषितं ॥
सिंहाख्यं सार्द्धविस्तारं दद्यादासनमथापि वा ।
समपादं महाख्यं वा हेमपत्रविभूषितं ॥
वज्रेन्द्रनीलवर्णाख्यं महार्घमणिचर्च्चितं ।
चतुष्पादोऽथवा कार्य्यस्त्रिमण्डलसमोऽपिवा ॥
व्याघ्रचित्रकपट्टैर्वा उपधानानि कारयेत् ।
अन्यैर्व्वा रञ्जितैर्वस्त्रै र्मृदुतूलकपूरिता ॥
शय्या दैर्घ्याथ विस्तीर्णा चतुर्हस्ता सुलक्षणा ।
पद्मपादाश्वपादा वा गजसिंहपदाथ वा ॥
दन्तिदन्तविचित्रा वा हेमरत्नविभूषिता ।
शुभपत्रोर्णया कार्य्याः करिण्यो हस्तमुच्छ्रिताः ॥
किन्नराद्याश्च कर्त्तव्याः सर्व्वशोभासमन्विताः ।
शुभवस्त्रसमोपेताः सकुम्भा अथ संयुताः ॥
शिवोपलसमं स्थानं कार्य्यं वै शिरधारणं ।
पद्मस्वस्तिकसंस्थानमुत्पलं विहगान्वितं ॥
पत्रवल्लीलतापीठं हेमदन्तसमन्वितं ।
वज्रपद्ममहापद्मरागवैदूर्य्यभूषितं ॥
गजकुम्भसमाकारमर्द्धचन्द्राकृतिमिव वा ।

सहस्रकिञ्चरोमानं समपञ्चशतैरपि॥
नृपेशं सर्व्वलोकानां शिशतञ्चिशतम्परं।
तूला शय्यासमा कार्य्या मृदुकोमलपूरकैः।
उपधानं विचित्रन्तु कर्त्तव्यं मृदु वर्त्तुलं॥
वृत्तं शृङ्गाटकाकारं श्रवणाख्यानमुत्तमं।
यानं शय्यासनं कार्य्यं हस्तपादं सुशोभनं।
वितस्ति उच्छ्रितं कार्य्यं पादस्थानं सुशोभनं॥
एवं समस्तं प्रत्ययं कृत्वा शय्यासनादिकं।
वस्त्रालङ्कारशोभाढ्यमभिषेकं समारभेत्॥
ततो वृषस्य योधस्य चर्म्मरोहितमव्ययं।
सिंहस्याथ तृतीयस्य व्याघ्रस्य च ततः परं॥
चत्वारि तानि चर्म्माणि तस्यां वेद्यामुपस्तरेत्।
शुभे मुहूर्त्ते सम्प्राप्ते पुष्ययुक्ते निशाकरे॥
हैमं वा राजतन्ताम्रं क्षीरवृक्षमयं शुभं।
भद्रासनं प्रकर्त्तव्यं सार्द्धहस्तं समुच्छ्रितं॥
सपादहस्तमानन्तु राज्ञां मण्डलिकं तथा।
सुसंहृष्टमना राजा शोभान्ते चात्र संविशेत्॥
दैवज्ञामात्यकञ्चुकिवन्दिपौरसुसंवृतः।
द्विजवेदध्वनियुतः शुभवाद्यरवान्वितः॥
मृदङ्गशङ्खतूर्य्यैश्च शब्दैश्च शुभावहैः।
अहतक्षौमनिवसं नृपं कम्बलशायिनं
कलशैर्व्वि लिपुष्पाद्यैः सर्पिःपूर्व्वैश्च स्नापयेत्॥
अष्टषोडशविंशाष्टशतमष्टाधिकं भवेत्।

कलशानां समाख्यातमधिकन्तूत्तरोत्तरं ॥
कल्याणेन तु मन्त्रेण मङ्गलेन जलेन वा ।
देवीगव्यप्रसवेनाथ च्छायादाज्येन वा विभो ॥
आज्यन्तेजः समुद्दिष्टं आज्यम्पापहरं शुभं ।
आज्यं सुराणामाहारमाज्ये लोकाः प्रतिष्ठिताः ॥
भौमान्तरिक्षं दिव्यं वा यच्चिकल्मषनाशनं ।
सर्व्वं तदाज्यसंस्पर्शात् प्रणाशमुपगच्छतु ॥

कम्बलमुपनीय ततः पुष्पाम्बुपूरितैः कलशैः स्नापयेद्राजा-नमाचार्य्योऽनेन मन्त्रेण ।

सुरास्त्वामभिषिञ्चन्तु ये च सिद्धाः पुरातनाः ।
ब्रह्मा विष्णुश्च रुद्रश्च साध्याश्च समरुद्गणाः ॥
आदित्या वसवो रुद्रा अश्विनौ च भिषग्वरौ ।
अदितिर्देवमाता च स्वाहा सिद्धिः सरस्वती ॥
कीर्त्तिर्लक्ष्मीर्धृतिः श्रीश्च सिनीवाली कुहूस्तथा ।
दितिश्च सुरसा चैव विनता कद्रुरेव च ॥
देवपत्न्यश्च पूर्व्वोक्ता देवमातर एव च ।
सर्व्वास्त्वामभिषिञ्चन्तु शुभाश्चाप्सरसाङ्गणाः ॥
नक्षत्राणि मुहूर्त्ताश्च पक्षाहोरात्रसन्धयः ।
संवत्सरदिनेशश्च कलाःकाष्ठाः क्षणा लवाः ॥
सर्व्वे त्वामभिषिञ्चन्तु कालस्यावयवाः शुभाः ।
वैमानिकाः सुरगणा मनवः सागरैः सह ॥
सरितश्च महाभागा नागाः किंपुरुषास्तथा ।
वैखानसा महाभागा वानप्रस्थद्विजैः सह ॥

द्विजा वैहायसा वीरा ध्रुवस्थानानि यानि च।
मरीचिरत्रिपुलहःपुलस्त्यः क्रतुरङ्गिराः॥
भृगुः सनत्कुमारश्च सनकोऽथ सनन्दनः।
सनातनश्च दक्षश्च तथा सनकनन्दनः॥
एकतश्च द्वितश्चैव त्रितो जावालिकश्यपौ।
दूर्व्वासा दुर्व्विनीतश्च कण्वः कात्यायनस्तथा॥
मार्कण्डेयो दीर्घतपाः शुनःशेफो विदूरथः।
शर्व्वः सम्वर्त्तकश्चैव च्यवनोऽत्रिः पराशरः।
द्वैपायनो यवक्रीतो देवरातः सहानुजः॥
एते चान्ये च मुनयो वेदव्रतपरायणाः।
सशिष्यास्तेऽभिषिञ्चन्तु सदाराश्च तपोधनाः॥
पर्व्वतास्तरवो वल्लाः पुण्यान्यायतनानि च।
प्रजापतिर्द्दितिश्चैव गावो विश्वस्य मातरः॥
वाहनानि च दिव्यानि सर्व्वलोकाश्चराचराः।
अग्नयः पितरस्तारा जीमूताः खन्दिशो जलं॥
एते चान्ये च बहवः पुण्यसङ्कीर्त्तनाः शुभाः।
तोयैस्त्वामभिषिञ्चन्तु सर्व्वोत्पातनिवर्हणैः॥
कल्याणन्ते प्रकुर्व्वन्तु आयुरारोग्यमेव च।
यथाभिषिक्तो मघवानेतैर्मुदितमानसैः॥
इत्येवं शुभदैरेतैर्मन्त्रैर्द्दिव्यैस्तथापरैः।
शैवैर्नारायणै रौद्रैश्च शमकसमुद्भवैः॥
आपोहिष्ठा हिरण्येति शन्नवेति तथैव च।
सर्व्वमङ्गलमाङ्गल्यैर्व्वस्त्रं कार्पासिकन्धियात्॥

शङ्खवेणुरवैस्तूर्य्यैरायान्तो मङ्गलैर्नृपः ।
ततः सम्पूजयेद्देवान् गुरून् विप्रान् ध्वजायुधान् ॥
छत्रं वाद्यङ्गजानश्वान् परिजप्तानि धारयेत् ।
वेदेन च जयेनेति अलङ्काराणि पार्थिवः ॥
द्वितीयायां ततो वेद्यां गत्वा हुत्वा हुताशनं ।
देवानां वदने स्थाने निमित्तानि तु लक्षयेत् ॥
स्वाहा रुद्राय चन्द्राय(१) विष्णवे ब्रह्मणे शिवे ।
प्राजापत्ये कुमाराय विघ्नहाय विनायके ॥
सूर्य्याय ग्रहराजाय वराहाय त्रिविक्रमे ।
मातृणां वरदे मात्रे चामुण्डायै स्वधेति च ॥
नागराजमनन्ताय ततो राजा समाहरेत् ।
क्रमेण संस्थिते चर्मण्युपविष्टो नराधिपः ॥
वृषस्य वृषदंशस्य खराश्वमृषतस्य च ।
तेषामुपरि सिंहस्य व्याघ्रस्य च ततः परं ॥
उपविष्टे पुनर्होममन्त्रैर्मन्त्रैः सघृतैस्तिलैः ।
कृत्वा शेषसमाप्तिं स प्राञ्जलिः संस्थितो वदेत् ॥
यान्तु देवगणाः सर्व्वे पूजामादाय पार्थिवात् ।
सिद्धिन्दत्त्वा सुविपुलां पुनरागमनाय च ॥

आपोहिष्ठा इतित्र्यृचं । हिरण्यवर्णा इति चतुर्भिर्ऋग्भिः । नमः शम्भवे च मयो भवेत्यादिमन्त्रं आप्यमानो जपेदिति शेषः ।

यदाह गर्गः ।

आपोहिष्ठात्र्यृचश्चैव हिरण्येति चतुर्ऋचं ।

(१) स्वाहा वराहवेन्द्राय इति पुस्तकान्तरे पाठः ।

पुण्याहमङ्गलनिनदैर्जपेत् स्नातो नराधिपः।
धृत्वा चैवाहते वस्त्रे युगवस्त्राभिमन्त्रिते॥

इति सर्व्वमङ्गलमाङ्गल्यैश्चन्दनादिभिः सह धौतं कार्पासयुतं बिभृयात्।

विष्णुधर्म्मोत्तरे।

एवं स्नातो घृते दृष्ट्वा वदनं दर्पणे तथा।
मङ्गलालम्भनङ्कृत्वा धौतवासाः समाहितः॥
अभ्यर्चनं ततः कुर्य्याद्देवादीनां पृथक् पृथक्।
आयुधाभ्यर्चनङ्कृत्वा वाहनाभ्यर्चनन्तथा॥
राजचिह्नार्चनं कृत्वा ह्यलङ्कुर्य्यात्तनुं स्वकं।
अनुलेपनमादद्यात् श्रीसूक्तेनाभिमन्त्रितं॥
श्रियन्धातर्म्मयि धेहि मन्त्रः सुमनसां भवेत्।
आयुष्यं वर्चस्यमिति मन्त्रोऽलङ्करणे स्मृतः॥
ततोऽनुलिप्तसुरभिः स्रग्वी रुचिरभूषणः।
केशवाभ्यर्चनं कृत्वा वह्निस्थानं व्रजेदिति॥

अथर्व्वपरिशिष्टे।

पुण्याहं वाचयित्वास्य प्रारब्धं कारयेद्बुधः।
तिथिनक्षत्रसंयुक्तमुक्तसंस्करणे शुभे॥
उच्चैर्घोष इति तूर्य्याण्यभिमन्त्र्य पुरोहितः।
सर्व्वं तूर्य्यनिनादेन ह्यभिषेके ह्यलङ्कृतः॥
ततः सम्पूजयेदिति शेषः।

अभिषेकानन्तरं धौतवासाः स्नाचान्तो देवगुरुविप्रान्

सम्पूजयेत् । ध्वजायुधादीनि तु सम्पूज्य स्वस्वमन्त्राभिमन्त्रितानि अपरस्मात् पुष्यस्नानाद्यथाकालं धारयेत् । दैवेनेत्यादिविजयाख्येन देवीमन्त्रेण शैवागमप्रसिद्धेनालङ्कारधारणं ।

ध्वजादिमन्त्रास्तु । विष्णुधर्म्मोत्तरे ।

——oo@oo——

राम उवाच ।

छत्राश्वकेतुकरिणां पताकाखड्गचर्म्मणां ।
तथा दुन्दुभिचापानां ब्रूहि मन्त्रानमानघ ॥

पुष्कर उवाच ।

शृणु मन्त्रान् महाभाग भगवान् यान् पराशरः ।
गालवाय पुरोवाच सर्व्वधर्म्मभृताम्बरः ॥
यथाम्बुदश्छादयति शिवायेमां वसुन्धराम् ।
तथाच्छादय राजानं विजयारोग्यवृद्धये ॥

छत्रमन्त्रः ।

गन्धर्व्वपतिराजस्त्वं माभूयाः कुलदूषकः ।
ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥
प्रभावाच्च हुताशस्य वर्द्धस्व त्वं तुरङ्गम ।
तेजसा चैवसूर्य्यस्य मुनीनान्तपसा तथा ।
रुद्रस्य ब्रह्मचर्य्येण पवनस्य बलेन च ॥
स्मर त्वं राजपुत्रोऽसि कौस्तुभं च [illegible]णिं स्मर ।
यां गतिं ब्रह्महा गच्छेत् पितृहा मातृहा तथा ॥
भूम्यर्थेऽनृतवादी च क्षत्रियश्च पराङ्मुखः ।

सूर्य्याचन्द्रमसौ वायुर्य्यावत्पश्यति दुष्कृतं।
व्रजेतैताङ्गतिं क्षिप्रं तच्च पापं भवेत्तव॥
निष्कृतिं यदि गच्छेत्त्वो युद्धे तस्मिन् तुरङ्गम।
रिपून् विजित्य समरे सह भर्त्रा सुखी भव॥

अश्वमन्त्रः।

शक्रकेतो महावीर सुपर्णस्त्वामुपाश्रितः।
पविचार्द्धेन ते यस्तु तथा नारायणध्वजः॥
काश्यपेयोऽमृताहर्त्ता नागारिर्विष्णुवाहनः।
आयामयो दुराधर्षो रणे देवारिसूदनः॥
गरुत्मान्मारुतगतिस्त्वयि सन्निहितःस्थितः।
साश्ववर्म्मायुधान् योधान् यत्रास्माकं रिपून् दह॥

ध्वजमन्त्रः।

कुमुदैरावणः पद्मः पुष्पदन्तोऽथवामनः।
सुप्रतीकोऽञ्जनो नील एतेऽष्टौ देवयोनयः॥
तेषां पुत्राश्च पौत्राश्च बलान्यष्टौ समाश्रिताः।
भद्रो मन्दो मृदुश्चैव गजः सङ्कीर्ण एव च॥
वने वंशे प्रसूतास्ते स्मर योनिं महागज।
पान्तु त्वां वसवो रुद्रा आदित्याः समरुद्गणाः।
भर्त्तारं रक्ष नागेन्द्र समयः प्रतिपाल्यतां॥
अवाप्नुहि जयं युद्धे गमने स्वस्ति नो व्रज।
श्रीस्ते सोमाद्बलं विष्णोस्तेजः सूर्य्याज्जवोऽनिलात्॥
स्थैर्य्यं गिरेर्जयं रुद्राद्यशो देवात् पुरन्दरात्।
युद्धे रक्षन्तु नाग त्वां दिशश्च सहदैवतैः।

अश्विनौ सहगन्धर्वैः पान्तु त्वां पर्व्वताः सदा ॥

हस्तिमन्त्राः।

हुतभुग्वसवो रुद्रा वायुः सोमो महर्षयः।
नागकिन्नरगन्धर्वा यक्षभूतगणग्रहाः॥
प्रमथास्तु सहादित्यैर्भूतेशो मातृभिः सह।
शक्रः सेनापतिस्कन्दो वरुणश्चाश्रितस्त्वयि।
प्रदहन्तु रिपून् सर्व्वान् राजा विजयमृच्छतु॥
यानि प्रयुक्तान्यरिभिर्भूषणानि समन्ततः।
पतन्तूपरि शत्रूणां हतानि तव तेजसा॥
कालनेमिवधे यद्वद्यद्वत्त्रिपुरघातने।
हिरण्यकशिपोर्य्यद्वद्वधे सर्व्वासुरेषु च।
नीलां श्वेतामिमां दृष्ट्वा नश्यन्त्वाशु नृपारयः॥
व्याधिभिर्व्विविधैर्घोरैः शस्त्रैश्च युधि निर्जिताः।
पूतना रेवतीनाम्ना कालरात्रीति पठ्यते।
दहन्त्वाशु रिपून् सर्व्वान् पताके त्वामुपाश्रिताः॥

पताकामन्त्रः।

असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः(१)।
श्रीगर्भो विजयश्चैव धर्मपालो नमोऽस्तु ते(२)॥,
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा।
नक्षत्रं कृत्तिकाख्यं त्वं गुरुर्देवो महेश्वरः॥
रोहिणाश्च शरीरन्ते दैवतन्तु जनार्द्दनः।

---

(१) तीक्ष्णवर्त्मा दुरासद इति पुस्तकान्तरपाठः।

(२) धर्म्मदारस्तथैव च इति पाठान्तरं।

पिता पितामहो देवः स त्वं पालय सर्व्वदा ॥

खड्गमन्त्रः।

चर्म्मप्रदस्त्वं समरे चर्म्मसैन्योपमो ह्यसि।
रक्ष मां रक्षणीयोऽहन्तवानघ नमोऽस्तु ते ॥

चर्म्ममन्त्रः।

दुन्दुभे त्वं सपत्नानान्तथा विजयवर्द्धनः।
यथाजीमूतघोषेण हृष्यन्ति जलचारिणः।
तथास्तु तव शब्देन हर्षोऽस्माकं मुदावह ॥
यथाजीमूतशब्देन स्त्रीणान्त्रासोऽभिजायते ॥
तथा च तव शब्देन नश्यन्त्वस्मद्द्विषो रणे ॥

दुन्दुभिमन्त्रः।

सर्व्वायुधमहामात्र सर्व्वदेवारिसूदन।
चाप त्वं सर्व्वदा रक्ष साकं शरवरैः सदा ॥

चापमन्त्रः।

द्वितीयायां वेद्यामिति पूर्व्वन्तावद्वेदिचयं कार्य्यमित्युपपादितं। तत्र पश्चिमवेद्यां स्नानं। दक्षिणवेद्यां ग्रहयज्ञः। इयन्तु ग्रहहोमापेक्षया वक्ष्यमाणद्वितीयहोमसम्बन्धितया वायव्यवेदौ वस्तुगत्या तृतीयापि द्वितीयाशब्देनोच्यते। देवानां वदने स्नान इति स्वगृह्योक्तहोमविधिना कृते अग्निमुखे रुद्रादिदेवताभ्यः पूर्व्वपूजितमण्डलदेवताभ्यश्च प्रणवादिभिश्चतुर्थ्यन्तैः स्वाहायुक्तैर्नामभिः प्रत्येकमष्टाविंशतिः अष्टोत्तरशतं वा घृताहुताहुतीर्जुहुयात्।

तदुक्तं विष्णुधर्म्मोत्तरे ।

तेषामेव ततो वह्नौ चतुर्थ्यन्तैःस्वनामभिः ।
ओंकारपूर्व्वं जुहुयादाज्यं वहु पुरोहित इति ॥

निमित्तानीत्यादि होमे क्रियमाणे प्रदक्षिणशिखत्वमुद्दामदीप्तत्वं शुभध्वनित्वमधूमत्वमित्यादीनि शुभसूचकानि निमित्तानि वह्नौ लक्षयेत् ।

आह गर्गः ॥

ततः पुरोहितो वह्नावन्वारब्धे नृपे यजेत् ।
त्र्यम्बकं यजामहे यत इन्द्र भजामहे ॥
हव्यस्तेः परिदीयत इदं विष्णुर्विचक्रमे ।
आवायो भूषशुचिना मन्त्रैरेतैर्यथाक्रमं ॥
समित्तिलाज्यदूर्व्वाभिस्तथा विल्वफलैरपि ।
प्रत्येकं शतमष्टौ च होमो वा स्यात्ततोऽपराः ॥

आथर्व्वणपरिशिष्टे ।

चतुर्होत्रविधानेन जुहुयाच्च पुरोहितः ।
चतुर्दिक्षु स्थितैर्विप्रैर्वेदवेदाङ्गपारगैः ॥
विल्वाहारः फलाहारः पयसा वापि वर्त्तयेत् ।
समरात्रं हुताग्नौ वा ततो होमं प्रयोजयेत् ॥
गव्येन पायसं कुर्य्यात् सौवर्णेन स्रुवेण तु ।
वेदानामादिभिर्मन्त्रैर्महाव्याहृतिपूर्व्वकैः ॥
शर्म्मवर्म्मगणश्चैव तथा स्यादपराजितः ।
आयुष्याश्चाभयश्चैव तथा स्वस्त्ययनो गणः ॥

एतान् पञ्च गणान् हुत्वा वाचयेत्तु द्विजोत्तमान्॥

शर्म्मवर्म्माद्यः सपत्न इत्यादिः।

अपराजितः विश्वस्य मान इत्यादिः। आयुष्याद्यः प्राणापानादीत्यादिः। अभयः स्वस्तिदाविशामित्यादिः। स्वस्त्ययनो सुपारेपातमित्यादिः। ततो गृह्योक्तविधिना पुण्याहवाचनं। ततोराजासनमिति। ततो होमानन्तरं तस्यामेव वेद्यामग्नेरुत्तरभागे प्रागुक्तानडुहानि चर्म्माण्यास्तीर्य्य तदुपरि राजासनं सिंहासनमाहृत्य स्थापयेत्। तस्य तर्थ्योपरिक्रमेण वृषदंशादिचर्म्माण्यास्तीर्य्य राजोपवेशयेत्। उपविष्टे तु राजनि स्वस्वमन्त्रैस्ताभ्य एव देवताभ्यः घृताक्तैस्तिलैः पुरोहितो हुत्वा शेषस्य स्विष्टकृत् प्रायश्चित्त पूर्णाहुत्यन्तस्योत्तरोत्तरस्य समाप्तिं कृत्वा यान्तु देवगणा इत्यादिमन्त्रेण प्राञ्जलिर्द्देवताविसर्जनं कुर्य्यात्।

तदुक्तं विष्णुधर्म्मोत्तरे।

वह्नेरुत्तरदिग्भागे तथा प्रागुक्तचर्म्मणा।
सिंहासनं न्यसेत् पृष्ठे शुभास्तरणसंयुतं॥
ततस्तु तत्र चर्म्माणि प्राग्ग्रीवाणि तु विन्यसेत्।
वृषस्य वृषदंशस्य रुरोश्च पृषतस्य च।
तेषामुपरि सिंहस्य व्याघ्रस्य च ततः परं॥
ध्रुवासिऽद्योरसि मन्त्रेण नृपं तत्रोपवेशयेत्।

वृषोवलीवर्द्दः। वृषदंशो मार्जारः। रुरुर्गौरमृगः। पृषतश्चित्रमृगः।

दर्भपाणिर्भवेद्राजा तथैव च पुरोहितः ।
तयोर्हस्तगतावन्यो दर्भौ संग्रन्थयेद्द्विजः ॥

तयोर्नृपपुरोहितयोः पाणिगतौ दर्भावन्यो द्विजो होमकाले ग्रहदेशे संग्रन्थयेत् ।

ततः पुरोधा जुहुयाद्ब्राह्मैर्मन्त्रै घृतं शुचिः ।
रौद्रवैष्णववायव्यशाक्रसौम्यैः सवारुणैः ।
बार्हस्पत्यैस्ततः कुर्यात्तन्त्रमुत्तरसंज्ञकं ।

ब्राह्मा ब्रह्मजज्ञानमित्यादयः । रौद्रा अस्मिन्रुद्रा इत्यादयः । वैष्णवा विष्णोर्नुकमित्यादयः । वायव्या आवाय इत्यादयः । शाक्राः त्रातारमिन्द्र इत्यादयः । सौम्या आप्यायस्वेत्यादयः । वारुणा इमं मे वरुण इत्यादयः । बार्हस्पत्या बृहस्पते अतीय इत्यादयः ।

नृपतिस्तत्र दैवज्ञान् पुरोधसमथार्चयेत् ।
गोभूहिरण्यरत्नैश्च अन्यानपि समागतान् ॥
स्थानदेवान् पुरादेवान् नदीकूपं चतुष्पथं ।
अभयञ्च जने देयं गोगोसर्गं समाचरेत् ॥
अलङ्कृत्य यथान्याय सितौ तौ वस्त्रभूषितौ ।
देवन्देवीञ्च विज्ञाप्य ग्रस्यनस्यांश्च मोचयेत् ॥
न मोचिद्राश्चः सन्दृशानन्तःपुरकृतागमः ।
विभवानुरूपभावैः पुरे पूजां समारभेत ॥
सिंहासनं समास्थाय चतुष्कोष्ठतयान्वितैः ।
दीपैः रजतपात्रस्थैस्तोयार्घ्याक्षतवन्दितैः ।
गोरोचनादि तथा पञ्चदर्पणं मङ्गलानि च ॥

ततो ज्योतिषिकान् पुरोहितञ्च गोभूहिरण्यादिभिरभ्यर्च्य अन्यानपि श्रोत्रियादीन् क्रमागतांश्च सम्पूज्य गृहदेवान् पुरो-देवांश्च नदीकूलञ्च चतुष्पथञ्च पूजोपहारैरर्चयेत्। 'गोगोत्सर्गं गोमिथुनमित्यर्थः'। तौ च धेनुवृषभौ श्वेतवर्णौ वस्त्रालङ्कारादि-भूषितौ। देवं महेश्वरं देवीञ्च भगवतीं प्रीत्यर्थं उत्सृजामीति विज्ञाप्योत्सृजेत्। नृपशरीरे अन्तःपुरे च कृतापराधान्विहाय बन्धनं मोचयित्वा पताकातोरणादिभिः पुरे पूजां कुर्य्यात्। चतुष्की रङ्गवल्लीरचना सभाविशेषो वा। दीपैर्नीराजित इति शेषः। वन्दितं वन्दनं विशेषणे तृतीया। ततो गोरोचनादधि-दूर्व्वादीनि च दर्पणं मङ्गलानि च पश्येत्।

आथर्वणपरिशिष्टे।

प्रोक्तानि मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः।
भूमिसिद्धार्थकाः सर्पिः शमी व्रीहियवौ तथा(१)॥
एतानि सततं पश्यन् नृपश्चाभ्यर्चयन्नपि।
न प्राप्नोत्यापदं राजा श्रियं प्राप्नोत्यनुत्तमां॥
तथा सिंहासनं कृत्वा पताकां वा क्रमागतां।
चामरच्छत्रसंयुक्तं प्रतीहारविभूषितं।
मत्तद्विपं चतुष्कञ्च चतुर्द्दिक्षूपकल्पयेत्॥
उपविष्टस्ततो राजा प्रजानां कारयेद्धितं।
आकरा ब्राह्मणा गावस्त्रीबालजडरोगिणः॥
ततस्तु दर्शनं देयं ब्राह्मणानां नृपेण तु।
श्रेणीप्रभृतिमुख्यानां स्त्रीजनञ्च नमस्करेत्।

(१) चिरवं चर्पिरादित्य आपोराजा तथाष्टम इति क्वचित् पाठः।

आशिषश्च प्रदद्युस्ते तुष्टा जनपदा भुवि ।
एवं प्रजानुरज्येत पृथ्वी च वशगा भवेत् ॥
पुरोहितं मन्त्रिणश्च सेनाध्यक्षं तथैव च ।
अश्वाध्यक्षं गवाध्यक्षं गोष्ठागारपतिं तथा ॥
भाण्डागारपतिं वैद्यं दैवज्ञञ्च यथाक्रमं ।
यथार्हेण तु योगेन सर्व्वान् संपूजयेन्नृपः ॥
दूर्व्वासिद्धार्थकान् सर्पिः शमीर्ब्रीहियवौ तथा ।
शुक्लानि चैव पुष्पाणि मूर्ध्नि दद्यात् पुरोहितः ॥
अथर्व्वविहितो ह्येष विधिः पुष्याभिषेचने ।
राजा स्नातो महीं भुङ्क्ते शक्रलोकञ्च गच्छति ॥

देवीपुराणे ।

एवं पुष्ये अवाप्नोति कर्त्ता राज्यायुसम्पदः ।
विनापि चार्थफलदं पुण्यं पुष्याभिषेचनं ॥
राष्ट्रोत्पातोपसर्गेषु धूमकेतोश्च दर्शने ।
ग्रहोपमर्द्दने चैव पुष्यस्नानं समाचरेत् ॥
नास्ति लोके स उत्पातो यो ह्यनेन न शाम्यति ।
मङ्गलञ्चापरं नास्ति यदस्मादतिरिच्यते ॥
आधिराज्यार्थिनो राज्ञः पुत्रजन्माभिकाङ्क्षिणः ।
तत्पूर्व्वमभिषेके च विधिरेष प्रशस्यते ॥
देवेन ब्रह्मणे दत्तं तेनाप्युशनसे पुनः ।
उशनसो गुरोःप्राप्तं ततो देवमभाषितं ॥
महेन्द्रार्थमुवाचेदं बृहत्कीर्त्तिर्बृहस्पतिः ।
स्नानमायुःप्रजावृद्धिसौभाग्यकरमुत्तमं ॥

अनेनैव च तोयेन हस्त्यश्वं स्नापयेन्नृपः।
तत्रामयविनिर्मुक्तं परां वृद्धिमवाप्नुयात्॥
प्रतिसंवत्सरं कार्य्यमभिषेकस्तु पार्थिव।
मण्डलीकनरेन्द्राणां सामन्ताधिपतेरपि॥
सामन्तानां सदा कार्य्यं विष्विष्वरमखं शुभं।
स्त्रियो लक्षणयुक्ताया यस्या न भवने सुखं।
तस्येद्धारयेत् स्नानं सर्व्वकामार्थसिद्धिदं॥

इति पुष्यस्नानविधिः।

उदगयन आपूर्य्यमाणपक्षस्यैकरात्रमवरार्द्धमुपोष्य तिष्येण पुष्टिकामः स्थालीपाकं श्रपयित्वा महाराजमिष्ट्वा तेन सर्प्पिष्मता ब्राह्मणान् भोजयित्वा पुष्यार्थेण सिद्धिं वाचयेत्। एवमपरापरस्मात्तिष्याद्द्वौ द्वितीये त्रीस्तृतीये एवं संवत्सरमभ्युच्चयेन महान्तम्पोषं पुष्णाति आदित एवोपवासः। अवरार्द्ध अवरं। अवरतायैकरात्रोपवासस्यापूतस्य पुंसोबहूपवासपक्षापेक्षया ‘महाराजः कुबेरः। तेन हुतमिष्टेन चरुणा पुष्यार्थेण सिद्धिं वाचयेत् पुष्टिः सिद्धिरस्त्विति वाचयेत्। एवं पूर्व्ववच्चरुणा महाराजेष्टिब्राह्मणभोजनादि कार्य्यं। द्वौ द्वितीये द्वौ ब्राह्मणौ द्वितीये पुष्ये भोजयेदित्यर्थः। एवं संवत्सरमभ्युच्चयेन पूर्व्ववत्तृतीयं चतुर्थं तिष्येषूत्तरोत्तरबहवा ब्राह्मणा भोजनीया इत्यर्थः। आदित एव प्रथमपुष्ये पूर्व्वेष्वुत्तरे चेत्यर्थः।

इत्यापस्तम्बोक्तं पुष्यव्रतं।

दाल्भ्य उवाच।

स्त्रीणां धर्म्मं द्विजश्रेष्ठ उपवाससमुद्भवं।

कथयस्व यथातत्त्वमुपवासविधिश्च यः॥
कुमार्य्याः स्वगृहस्थाया विधवायाश्च सत्तम।
धर्म्मं प्रब्रूह्यशेषेण भगवन् प्रीतिकारकं॥

पुलस्त्य उवाच।

श्रूयतामखिलं ब्रह्मन् यदेतदनुपृच्छसि।
उपकाराय च स्त्रीणां त्रिषु लोकेषु विश्रुतं॥
प्रश्नमेतं पुरा देवी शैलराजसुता पतिं।
पप्रच्छ शङ्करं ब्रह्मन् कैलासशिखरस्थितं॥

देव्युवाच।

कुमारीभिश्च देवेश गृहस्थाभिश्च केशवः।
विधवाभिस्तथा स्त्रीभिः कथमाराध्यते वद॥

ईश्वर उवाच।

साधु साधु त्वया पृष्टमेतन्नारायणाश्रयं।
उपवासादियत् कर्म्म श्रूयतामस्य यो विधिः॥
यच्च परिसमासाद्य नारीह सुखमेधते।
दुःशीलेऽपि हि कामार्थौ नारी प्राप्नोति भर्त्तरि।
अनाधारा जगन्नाथं सर्व्वलोकेश्वरं हरिं।
कथमाप्नोति चेन्नारी सर्व्वलोकगुणान्वितं॥
सुकलत्रयुतस्तस्मादुत्तमश्चुततुष्टिदं।
कर्त्तव्यं लक्षणं तस्य श्रूयतां वरवर्ण्णिनि।
यच्चोक्त्वा सर्व्वनारीणां श्रेयः प्राप्नोत्यसंशयं।
ऐहिकञ्च सुखं प्राप्य मृता स्वर्गसुखान्यपि॥
समुत्प्राप्य स्वपितृती मातृतश्च कुमारिका।

पूजयेत्तु जगन्नाथं भक्त्या पापहरं हरिं ॥
विमूलरेवथ र्चेषु पतिकामा कुमारिका।
माधवायेति वै नाम जपेन्नित्यमतन्द्रिता ॥
प्रियङ्गुणा रक्तपुष्पैर्मधुकैः कुसुमैस्तथा।
समभ्यर्च्याच्युते दद्यात् कुङ्कुमेनानुलेपनं ॥
सर्वौषधिभिः सुस्नाता तमाराध्य जगत्पतिं।
नमोऽस्तु माधवायेति होमयेन्मधुसर्पिषा ॥
सदैवमुत्तरायोगे समभ्यर्च्य जनार्दनं।
शोभनं पतिमाप्नोति प्रेत्य स्वर्गञ्च गच्छति ॥
पतिलाभे च यत्किञ्चित्तया पापमनुष्ठितं।
तस्माद्विमुच्यते पापात् सुखिनी चैव जायते ॥
अब्देनैकेन तस्यास्तु व्रतं प्राप्ता यदिच्छति।
तदेव प्राप्नुयाद्भद्रे नारायणपरायणा ॥
अस्मात्समाप्तिगमनं कार्यं यथाशक्त्या च वै हरेः।
पारणान्ते महाभागे भोजयेद्ब्राह्मणोत्तमान् ॥
इति विष्णुधर्मोत्तरोक्तं सुकलत्रप्राप्तिव्रतं।

——— 000 ———

अथ ज्येष्ठाव्रतं।

तत्र लिङ्गपुराणात्।

ऋषय ऊचुः।

मायाविन्यं श्रुतं विष्णोर्देवदेवस्य चक्रिणः।
कथं ज्येष्ठासमुत्पत्तिर्देवदेवाज्जनार्दनात्।
वक्तुमर्हसि चास्माकं रोमहर्षण तत्त्वतः ॥

सूत उवाच ।

अनादिनिधनः श्रीमान् ध्यात्वा नारायणः प्रभुः ।
जगद्द्विधमिदञ्चक्रे मोहनाय जगत्पतिः ॥
त्रिपुर्वे ब्राह्मणान् वेद वेदधर्म्मान् सनातनान् ।
श्रियं पद्मां तथा योज्य भागमेकमकारयत् ॥
ज्येष्ठामलक्ष्मीमशुभां वेदबाह्यां नराधमान् ।
अधर्म्मञ्च महातेजा भागमेकमकारयत् ॥
अलक्ष्मीमग्रतः सृष्ट्वा पश्चात्पद्मां जनार्द्दनः ।
ज्येष्ठा तेन समाख्याता ह्यलक्ष्मीर्द्विजसत्तमाः ॥
अमृतोद्भववेलायां सुधानन्तरमुत्थिता ।
अग्रतः सा समुत्पन्ना ज्येष्ठा इति च वैश्रुता ॥
श्रीरनन्तरमुत्पन्ना पद्मा विष्णुपरिग्रहा ॥
दुःसहो नाम विप्रर्षिरुपयेमेऽशुभां तदा ।
ज्येष्ठां तां परिपूर्णाङ्गीं मनसा वीक्ष्य निष्ठितां ॥
लोके चचार हृष्टात्मा तया सह मुनिस्तदा ॥
यस्मिन् घोषो हरेश्चैव हरस्य च महात्मनः ।
वेदघोषस्तथा विप्रा होमधूमस्तथैव च ॥
श्रोत्रियो वाथ यत्रासीत् तत्र तत्र भयार्द्दिता ।
पिधाय कर्णौ संयाति धावमाना इतस्ततः ॥
ज्येष्ठामेवं विधां दृष्ट्वा दुःसहो मोहमागतः ।
तया सह वनं गत्वा चचार स तदा मुनिः ॥
तत्रायान्तं महात्मानं मार्कण्डेयमपश्यत ।
प्रणिपत्य महात्मानं दुःसहो मुनिमब्रवीत् ।

भार्य्येयं भगवन् मह्यं न स्थास्यति कथञ्चन ॥
किं करिष्यामि विप्रर्षे ह्यनया सह भार्य्यया।
प्रविशाम्यनया कुत्र कुत्र न प्रविशामि वै ॥

मार्कण्डेय उवाच।

शृणु दुःसह सर्व्वं त्वमकीर्त्तिरशुभान्विता।
अलक्ष्मीरतुला चेयं ज्येष्ठा इत्यभिशब्दिता ॥
नारायणपरा यत्र वेदमार्गानुसारिणः।
रुद्रभक्ता महात्मानो भस्मोद्धूलितविग्रहाः।
स्थिता यत्र जना नित्यं न विशेथाः कथञ्चन ॥
नारायण हृषीकेश पुण्डरीकाक्ष माधव।
अच्युतानन्द गोविन्द वासुदेव जनार्द्दन।
नृसिंह वामनाचिन्त्य राघवेति च ये जनाः।
वक्ष्यन्ति सततं हृष्टास्तेषां धनगृहादिषु।
आरामे चैव गोष्ठेषु न विशेथाः कथञ्चन॥
ज्वालाजालकरालं यत् सहस्रादित्यसन्निभं।
चक्रं विष्णोरतीवोग्रन्तेषां हन्ति सदाशुभं ॥
स्वाहाकारो वषट्कारो गृहे यस्मिन् प्रवर्त्तते।
तद्दिशा चान्यतो गच्छ सामघोषोऽथ यत्र वा ॥
वेदाभ्यासरता नित्यं नित्यकर्म्मपरायणाः।
वासुदेवार्च्चनरता दूरतस्तान् विसर्जय ॥
अग्निहोत्रं गृहे येषां लिङ्गार्च्चा वा गृहेषु च।
वासुदेवतनुर्व्वापि चण्डिका यत्र तिष्ठति ॥
दूरतो व्रज तान् हित्वा सर्व्वपापविवर्ज्जितान्।

नित्यनैमित्तिकैर्यज्ञैर्ये यजन्ति महेश्वरं ।
तान् हित्वा व्रज वान्यत्र दुःसह त्वं सहानया ॥
श्रोत्रिया ब्राह्मणा गावो गुरवोऽतिथयः सदा ।
रुद्रभक्ताश्च पूज्यन्ते यैर्नित्यं तान् विसर्ज्जय ॥

दुःसह उवाच ।

यस्मिन् प्रवेशो योग्यो मे तद्ब्रूहि मुनिसत्तम ।
त्वद्वाक्याद्भयनिर्मुक्तो विशाम्येषां गृहे सदा ॥

मार्कण्डेय उवाच ।

यत्र भार्य्या च भर्त्ता च परस्परविरोधनौ ।
सभार्य्यस्त्वं गृहं तस्य विशेथा भयवर्ज्जितः ॥
देवदेवो महादेवो रुद्रस्त्रिभुवनेश्वरः ।
विनिन्द्यो यत्र भगवान् विशेथा भयवर्ज्जितः ॥
वासुदेवे रतिर्नास्ति यत्र नास्ति सदा हरिः ।
जपहोमादिकं नास्ति भस्म नास्ति गृहे नृणां ॥
पर्व्वण्यभ्यर्च्चनं नास्ति चतुर्द्दश्यां विशेषतः ।
कृष्णाष्टम्याञ्च रुद्रस्य सन्ध्यायां भयवर्जितः ॥
चतुर्द्दश्यां महादेवं न यजन्ति च यत्र वै ।
विष्णोर्नामविहीनास्तैरशुभास्तैर्दुरात्मभिः ॥
नमस्कारश्च सर्व्वाय शिवाय परमेष्ठिने ।
ब्राह्मणे च नरा मूढ़ा न वदन्ति दुरात्मकाः ।
तत्र वै सततं वत्स सभार्य्यस्त्वं समाविश ॥
वेदघोषो न यत्रास्ति गुरुपूजा न यत्र च ।
पितृकर्म्मविहीनाश्च सभार्य्यस्त्वं समाविश ॥

रात्रौ रात्रौ गृहे यस्मिन् कलहो वर्त्तते मिथः।
अनया सार्द्धमनिशं विश त्वं भयवर्जितः॥
लिङ्गार्च्चा नास्ति यस्यैव यस्य नास्ति तपो दमः (१)।
रुद्रभक्तिविनिन्दा वा तत्रैव विश निर्भयः॥
अतिथिः श्रोत्रियो वापि गुरुर्व्वा वैष्णवोऽपि वा।
न सन्ति यद्गृहे गावः सभार्य्यस्त्वं समाविश॥
बालानां प्रेक्षमाणानां यत्र हृष्टा हि भक्ष्यकं।
भक्षन्ति तत्र संहृष्टः सभार्य्यस्त्वं समाविश॥
अनभ्यर्च्य महादेवं वासुदेवमथापि वा।
अहुत्वा विधिवद्धव्यं यत्र तत्र समाविश॥
पापकर्म्मरता मूढ़ा दयाहीनाः परस्परं।
गृहे यस्मिन् समासन्ने देशे तत्र समाविश॥
प्राकारागारभिद्याऽसावन्यवेश्या कुटुम्बिनी।
तद्गृहन्तु समासाद्य वस नित्यमनन्यधीः॥
यत्र कण्टकिनो वृक्षा यत्र निष्पावबल्लरी।
ब्रह्मवृक्षश्च यत्रास्ति सभार्य्यस्त्वं समाविश॥
अगस्त्यार्कादयो वापि बन्धुजीवो गृहेषु वै।
करवीरं विशेषेण नन्द्यावर्त्तमथापि वा।
मल्लिका वा गृहे येषां सभार्य्यस्त्वं समाविश॥
कन्या च यत्र वै वल्ली द्रोणिकाऽथ जटी गृहे।
बकुलः कदली यत्र सभार्य्यस्त्वं समाविश॥
तालस्तमालो भल्लातस्तिन्तिड़ीखण्डमेव च।

(१) जपोदम इति पुस्तकान्तरे पाठः।

कदम्बः खदिरं वापि सभार्य्यस्त्वं समाविश ॥
न्यग्रोधो वा गृहे येषामश्वत्थश्च तथैव च ।
उदुम्बरः सपनसः सभार्य्यस्त्वं समाविश ॥
यस्य काको गृहं विन्देदारामे वा गृहेऽपि वा ।
छिन्नेन मुण्डितो वापि सभार्य्यस्त्वं समाविश ॥
एकच्छागं छिरावेयं त्रिगवं पञ्चमाहिषं ।
षडश्वं सप्तमातङ्गं सभार्य्यस्त्वं समाविश ॥
यस्य काली गृहे देवी प्रेतरूपा च डाकिनी ।
क्षेत्रपालोऽथवा तत्र सभार्य्यस्त्वं समाविश ॥
भिक्षुबिम्बश्च वै यस्य गृहे क्षपणकं तथा ।
बौद्धं वा बिम्बमाकृष्टं तत्र तूर्णं समाविश ॥
शयनासनकालेषु भोजनासनवर्त्तिषु ।
येषां वदति वै वाचो नामानि न हरेः सदा ।
तद्गृहस्ते समाख्यातं सभार्य्यस्त्वं समाविश ॥
पापरक्ता वारनिरताः शौतस्मार्त्तबहिष्कृताः ।
विष्णुभक्तिविनिर्मुक्ता महादेवविनिन्दकाः ।
नास्तिकाश्च शठा ये च सभार्य्यस्त्वं समाविश ॥
ब्रह्मा च भगवान् विष्णुः शक्रः सर्व्वसुरेश्वरः ।
शिवप्रसादजाश्चेति न वदन्ति दुरात्मकाः ॥
ब्रह्मा च भगवान् विष्णुः शिवस्य सम एव च ।
वदन्ति मूढाः खद्योतं भानोर्वा मूढचेतसः ।
तेषां गृहे तथा चैत्रे चाषाढे वा सदाशया ।
विश भुङ्क्ष्व गृहे तेषां मिष्टान्नं त्वमनन्यधीः ॥

अश्नन्ति केवलं मूढाः पक्कमन्नं विचेतसः।
स्नानमङ्गलहीनाश्च तेषां त्वं गृहमाविश॥
या नारी शौचविभ्रष्टा देहसंस्कारवर्जिता।
सर्व्वभक्षरता नित्यं तस्या स्थानं समाविश॥
मद्यपानरताः पापा मांसभक्षणतत्पराः।
परदाररता मर्त्त्यास्तेषां त्वं गृहमाविश॥
पर्व्वण्यनर्चनरता मैथुने वा दिवा रताः
सन्ध्यायां मैथुने वापि गृहे तेषां समाविश॥
पृष्ठतो मैथुनं स्त्रीणां स्नानवस्त्रं गवस्य यः।
जले वा मैथुनं कुर्य्यात् सभार्य्यस्त्वं समाविश॥
रजस्वलाङ्गनां गच्छेच्चाण्डालीं वा नराधमः।
कन्यां वा गामजां वापि सभार्य्यस्त्वं समाविश॥
बहुना किं प्रलापेन नित्यकर्म्मबहिष्कृताः।
रुद्रभक्तिविहीना ये गृहे तेषां समाविश॥
शृङ्गैर्हि व्योषधैः चौद्रैः शेपमालिप्य गच्छति।
भगद्रावं करोत्यस्य सभार्य्यस्त्वं समाविश॥
इत्युक्त्वा स मुनिः श्रीमान् निमील्य नयने तदा।
ब्रह्मर्षिर्ब्रह्मसङ्काशस्तत्रैवान्तरधीयत॥
दुःसहोऽपि यथोक्तानि स्थानानि समुपेयिवान्॥
विशेषाद्देवदेवस्य विष्णोर्मिन्दारतात्मनां।
सभार्य्यो मुनिशार्दूल सैषा ज्येष्ठा इति स्मृता।
दुःसहस्तामुवाचेदं तडागाश्रयसंस्तरे।
आस्स्व त्वमत्र चैवाहं प्रपत्स्यामि रसातलं।

आवयोः स्थानमालोक्य निवासार्थं ततः पुनः ॥
आगमिष्यामि ते पार्श्वमित्युक्ता तमुवाच सा ।
किमश्नामि महाभाग को मे दास्यति वै बलिं ॥
इत्युक्तस्तां मुनिः प्राह यास्त्रियस्त्वां यजन्ति वै ।
बलिभिः पुष्पधूपैश्च न तासां त्वं गृहं विश ॥
इत्युक्ता प्राविशत्तत्र पातालनिलयङ्गतः ।
अद्यापि स च नायातस्तेन सा जलसंस्तरे ।
ग्रामे कर्कटवाहो तु नित्यमास्तेऽशुभा पुनः ॥
प्रसङ्गाद्देवदेवेशो विष्णुस्त्रिभुवनेश्वरः ।
लक्ष्मीजुष्टस्तथाऽलक्ष्मीः सा तमाह जनार्द्दनं ॥
भर्त्ता गतो महाबाहो बलिं त्यक्ता मम प्रभो ।
अनाथाहं जगन्नाथ वृत्तिं देहि नमोऽस्तु ते ॥
इत्युक्तो भगवान् विष्णुः प्रसन्नाह जनार्द्दनः ।
ज्येष्ठामलक्ष्मीं देवेशो माधवो मधुसूदनः ॥
ये रुद्रमनघं सर्व्वं शङ्करं नीललोहितं ।
अम्बां हैमवतीं वापि जनित्रीं जगतामपि ॥
मद्भक्ता निन्दयन्त्यत्र तेषां वित्तन्तवैव च ॥
एवमेव महादेवं विनिन्द्यैव यजन्ति मां ।
मूढा ह्यभाग्या मद्भक्ता अपि तेषां धनन्तव ॥
यस्याज्ञया ह्ययं ब्रह्मा प्रमादादसते सदा ।
ये विनिन्द्य यजन्त्येनं मत्पदम्भ्रंशकारकाः ॥
मद्भक्ता नैव ते भक्ता एवं वर्त्तन्ति दुर्म्मदाः ।
तेषां धनं गृहं क्षेत्रं इष्टापूर्त्तन्तवैव च ॥

इत्युक्त्वा तां परित्यज्यालक्ष्मीं लक्ष्मीजनार्द्दनः।
अवाप भगवान् पद्ममलक्ष्मीनाशसिद्धये॥
तस्मात् प्रदेयस्तस्यै च बलिर्नित्योनरेश्वरैः।
विष्णुभक्तैर्न सन्देहः सर्व्वं यत्नेन सर्व्वदा।
अङ्गनाभिः सदा पूज्या बलिभिर्विविधैर्द्विजैः॥

भविष्योत्तरात्।

युधिष्ठिर उवाच।

मृतवत्सा तु या नारी काकवन्ध्या तथाऽपरा।
गर्भस्रावा तृतीया च नानादोषैश्च दूषिता॥
निर्द्धनाश्च नराश्चैव दारिद्र्योपहता स्थिताः।
कर्म्मणा केन मुच्यन्ते तन्मे ब्रूहि जनार्द्दन॥
व्रतेन केन तत्सर्व्वं सुखं प्राप्नोति मानवः।
चीर्णेन च जगन्नाथ तत्सर्व्वं कथयस्व मे॥

श्रीकृष्ण उवाच।

मासे भाद्रपदे शुक्ले पक्षे ज्येष्ठा यदा भवेत्।
रात्रौ जागरणं कृत्वा गीतवादित्रनिःस्वनैः।
एवंविधविधानेन एभिर्मन्त्रैः सुपूजयेत्॥
एह्येहि त्वं महाभागे सुरासुरनमस्कृते।
ज्येष्ठे त्वं सर्व्वदेवानां मत्समीपा सदा भव॥

आवाहनमन्त्रः।

श्वेतसिंहासनस्था तु श्वेतवस्त्रैरलङ्कृता।
वरञ्च पुस्तकं पाशं बिभ्रत्यै ते नमोनमः॥

आसनमन्त्रः ।

ज्येष्ठे श्रेष्ठे तपोनिष्ठे ब्रह्मिष्ठे ब्रह्मवादिनि ।
क्षीराब्धौ च समुद्भूते अर्घ्यं ज्येष्ठे नमोऽस्तु ते ॥

अर्घ्यमन्त्रः ।

शार्ङ्गबाणैश्च खड्गैश्च तोरनारीहृदर्पणैः ।
अन्यैरप्यायुधैर्युक्तां ज्येष्ठे त्वामर्चयाम्यहम् ॥

प्रार्थनामन्त्रः ।

सुरासुरनरैर्वन्द्या यक्षकिन्नरपूजिता ।
पूजितासि मया देवि ज्येष्ठे त्वामर्चयाम्यहं ॥
पुत्रदारसमृद्ध्यर्थं लक्ष्म्याश्चैव विवृद्धये ।
अलक्ष्म्याश्च विनाशाय ज्येष्ठे त्वामर्चयाम्यहं ॥

पूजामन्त्रः ।

मन्त्रेण पूजयेज्ज्येष्ठां स्त्री वाऽथ पुरुषोऽपि वा ।
लक्ष्मीः सन्तानवृद्धिश्च अणिमादिगुणो भवेत् ॥
अर्चिता चर्चिता ज्येष्ठा सदा काले नृपोत्तम ।
गुरुं संपूजयेद्भक्त्या वस्त्रैराभरणादिभिः ॥
द्वादशैव च वर्षाणि पूजनीया प्रयत्नतः ।
यावज्जन्म तथा पूज्या विधिनानेन मानवैः ॥
ददाति वित्तं पुत्रांश्च अर्चनीया सदा स्त्रिया ।
अनेन विधिना युक्तो यो हि पूजयते नरः ॥
नारी च पूजयेज्ज्येष्ठां तस्या लक्ष्मीर्विवर्द्धते ।
वन्ध्या च लभते पुत्रान् दुर्भगा सुभगा भवेत् ॥
मृतवत्सा जीववत्सा काकवन्ध्या प्रजावती ।

दुःखितो हि नरः कश्चिन्न सुखी वसते सदा ॥
एवं विधविधानेन ज्येष्ठां यस्त्वर्च्चयेत्सदा।
विघ्नस्तस्य प्रणश्येत यथाप्सु लवणं तथा ॥
एतद्व्रतं महाश्रेष्ठं पुण्यं पापविनाशनं।
तन्मया कथितं सर्व्वं ज्येष्ठायास्ते व्रतं महत् ॥
यथा ग्राह्यं कुरुश्रेष्ठ ज्येष्ठाव्रतं सुशोभनं।
नीराजने कृते चैव दीपो ग्राह्यः सुभक्तितः ॥
नैवेद्यसहितं ग्राह्य व्रतस्याग्रे युधिष्ठिर।
गुरुहस्तात्सदा ग्राह्यो दीपः प्रज्वलितो महान् ॥
व्रतस्थो भक्तियुक्तस्तु शुचिः प्रयतमानसः।
अनेन विधिना चैव व्रतं ग्राह्यं युधिष्ठिर ॥
ज्येष्ठा नाम परा देवी भुक्तिमुक्तिफलप्रदा।
यस्तु पूजयते राजंस्तस्मै स्वर्गं प्रयच्छति ॥

स्कन्दपुराणे। ईश्वर उवाच।

मासे भाद्रपदे पक्षे शुक्ले ज्येष्ठार्क्षसंयुते।
तस्मिन् काले दिने कुर्य्यात् ज्येष्ठायाः परिपूजनं ॥
तत्राष्टम्यां यदा भानुदिनं ज्येष्ठर्क्षमेव च।
नीलज्येष्ठा तु सा प्रोक्ता दुर्लभा बहुकालिका।
कृतस्नानो नरः कुर्य्यात्तस्यामन्यत्र वा दिने ॥
भक्तियुक्तः शुचिः कुर्य्यात् ज्येष्ठादेव्याः प्रपूजनं।
नद्याः पूर्व्वद्युः आहृत्य सिकताः शुद्धदेशजाः ॥
देवीरूपन्तु तत्रैव ध्यात्वा वै ब्राह्मणैः सह।
मण्डले तान्तु संस्थाप्य देवीं हेममयीन्ततः।

स्थापयेद्राजतीन्ताम्रीं लेख्यां वा द्विजसत्तम(१) ।
आवाहयेत्ततो देवीमथवा पुस्तकेऽपि वा ॥
त्रिलोचनां शुक्लदन्तीं बिभ्रतीं राजतीं तनुं ।
वितता रत्नमयनां ज्येष्ठामावाहयाम्यहं ॥
एह्येहि त्वं महाभागे सुरासुरनमस्कृते ।
ज्येष्ठा त्वं सर्व्वदेवानां मत्समीपगता भव ॥
इति मन्त्रेण तां देवीमावाह्य सुकृतव्रती ।
दद्याद्गन्धजलैः पाद्यं पादयोरुभयोर्द्विजः ॥
श्रीखण्डकर्पूरयुतन्दद्यादम्भस्तथार्हणं ।
भक्त्या प्रयत्नेन मया यदत्र दीयते तव ।
तद्गृहाण सुरेशानि ज्येष्ठे श्रेष्ठे नमोनमः ॥
इत्युक्त्वार्घ्यं सुवर्णादिपात्रेणाञ्जलिनापि वा ।
अर्घ्यं दत्त्वा स्मरेद्देवीं गन्धधूपैस्तथार्चयेत् ।
गोधूमयवशाल्यादितद्द्रव्यैः सुपारयेत् ॥
पञ्चप्रसृतिमात्रैस्तैः पूरिकादीनि सर्पिषा ।
निवेदयेच्च तैरेव दद्याद्द्रव्यै यतव्रतः ॥
ततः स्तुत्वा महादेवीं सर्व्वकामफलप्रदां ।
ज्येष्ठायै ते नमस्तुभ्यं श्रेष्ठायै ते नमो नमः ॥
ज्येष्ठे श्रेष्ठे तपोनिष्ठे वरिष्ठे सत्यवादिनि ।
एह्येहि त्वं महाभागे अर्घ्यं गृह्ण सरस्वति ॥

अर्घ्यमन्त्रः ।

स्तुत्वा स्तोत्रकथानृत्यगीतानि पुरतस्ततः ।

---

(१) लेख्यां वा पटकुड्ययोरिति पुस्तकान्तरे पाठः ।

सौवीरे चैव संयुक्तां दद्यात्क्षुद्रेभ्य एव च ॥
सुवासिनीभ्यः शक्त्या तत् प्रदद्यात् सुकृतव्रती।
देवीमनुज्ञयार्चित्वा ततो भुञ्जीत वाग्यतः॥
सखिभिः सह चान्नानि स व्रती सुकृतव्रतः।
भुक्त्वा पीत्वा तदाचम्य देवीं नत्वा पुनः पुनः।
शयीत ब्रह्मचर्य्येण कुर्य्यात् प्रातर्विसर्जनं॥
एवमेव प्रकुर्य्याद्धि व्रतन्तु प्रतिवत्सरं।
विसर्जनान्ते तु ततः शिवां तां वारिणि क्षिपेत्॥
अपूपवटकान्दद्याद्ब्राह्मणेभ्यस्ततो द्विजः।
कुर्य्यादेवं प्रयत्नेन सायं वाथ विसर्जयेत्॥
विद्यार्थी प्राप्नुयाद्विद्यां स्त्रीकामस्त्रियमाप्नुयात्।
शिरस्त्राणकारी तु देव्यै दद्यादसंशयः॥
सौवर्णं राजतन्ताम्रं कृतकृत्यो भवेत्तदा।
व्रतं स्वयञ्च कृतवान् सिद्धिं वाथ कृतार्हणः॥

देव्या महत्त्वं कथितन्तवेदं
विधिश्च मन्त्रार्चनसंप्रयुक्तः।
मन्त्रोऽपि सायुज्यकरो व्रतस्य-
स्तस्यां सदाचारवतां सदैव॥

यस्याः सिंहो रथे युक्तो व्याघ्रश्चापि महाबलः।
त्वे छामहमिमान्देवीं प्रपद्ये शरणं शुभां॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टां दुर्गां देवीं शरणमहं प्रपद्ये। सुतरसितरासमाय नमः। इत्यावाहयत्

आपोहिष्ठेति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति तिसृभिरभिषेकं कुर्य्यात् ।

नाम्नाथ विष्टरन्दत्त्वा पाद्यमर्घ्यमथासनं ।
वस्त्रमाचमनं(१) चैव मधुपर्कादि सर्व्वतः ॥
गन्धं पुष्पन्तथा धूपं दीपं नैवेद्यमेव च ।
पुनराचमनञ्चैव कारयित्वा विसर्जयेत् ॥

ओं ज्येष्ठायै नमः । ओं सत्यायै नमः । ओं काल्यै नमः । ओं कपालाय नमः । ओं कलिप्रियायै नमः । ओं विघ्नायै नमः । ओं विनायकाय नमः । ओं भार्य्यै नमः । ओं तार्य्यै नमः ओं श्रियै नमः । ओं कृष्णायै नमः । ओं कृष्णपिङ्गलायै नमः । एभिर्नामभिस्तर्पणं ।

होमं दधिमधुभ्यां घृतैः कुर्य्यात् सुसंयतः ।
हविष्यं स्वयमश्नीयाद्ब्राह्मणांस्तेन भोजयेत् ॥
अनेन विधिना यस्तु वत्सराणाञ्चतुष्टयं ।
व्रतान्ते प्रतिमां कुर्य्यात् सौवर्णीं फलसम्मितां ।
कृष्णवस्त्रेण संयुक्तामाचार्य्याय निवेदयेत् ॥
वस्त्राभरणमाल्यैस्तु लेपनैः पूजितं द्विजं ।
प्रणिपत्य ततः पश्चात्तस्मै सर्व्वं निवेदयेत् ॥
ब्राह्मणा भुक्तवन्तस्ते प्रकुर्य्युः स्वस्तिवाचनं ।
एवं कृते व्रते सम्यक् सर्व्वशान्तिः प्रजायते ।
धनधान्यसमृद्धिश्च आरोग्यञ्चैव जायते ॥

इति ज्येष्ठाव्रतं ।

(१) स्नानमाचमनमिति पाठान्तरं ।

पुष्कर उवाच।

शक्ते तूपोषितो विद्वान् यजमानमुपोषितं।
मूलेन स्नापयेन्नित्यन्तत्स्वाम्याशामुखस्थितं॥

तत्स्वाम्याशामुखं नैर्ऋत्यभिमुखं।

पूर्व्वोत्ताशासम्मुखं वा पूर्णेन सुदृढ़ेन च।
कुम्भद्वयेन स्नातस्तु पूजयेन्मधुसूदनं॥
विरूपाक्षं सवरुणं चन्द्रं मूलन्तथैव च।
गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा॥
एतेषामेव जुहुयात्तथा नाम्ना घृतं द्विजः।
पीतवासास्ततो भूत्वा मत्स्यं कूर्म्मञ्च शूकरं॥
सुरासुरसंग्रामैः स्नानोत्ताशामुखस्थितः।
बलं नृपतये दद्याज्जानु कृत्वा ततः क्षितौ॥
ततोऽष्टादशभिः पुष्पैर्मूलैः पञ्चभिरेव च।
सुवर्णगर्भन्तु मणिं विद्वान् शिरसि धारयेत्॥
कृत्वैतत् सकलं कर्म्म क्षिप्रं बहुफलां लभेत्॥
दक्षिणाश्चात्र ये दद्युर्मूलानि च फलानि च।
सितानि चैव वस्त्राणि कनकं रजतं तथा।
भोजनञ्चात्र दातव्यं ब्राह्मणानामभीप्सितं।

वलत्रयम्मूलमिदञ्च कुर्व्वन्
स्नानं सदा भार्गववंशमुख्यः।
क्षिप्रं समाप्नोति सदैव बुद्धिं
यथेप्सितं नात्र विचारमस्ति॥

इति विष्णुधर्म्मोत्तरोक्तं मूलस्नानं।

गर्गं मुनिवरश्रेष्ठं भार्गवः परिपृच्छति।
नैर्ऋतेन तु ऋक्षेण शिशोर्ज्जातस्य किं फलं॥
पादे पादे तु यत् प्रोक्तं तत्समाचक्ष्व सुव्रत।
स्नानदानादिहोमांश्च दर्शनीयं कथं भवेत्॥

गर्ग उवाच।

प्रथमे पितरं हन्ति द्वितीये हन्ति मातरं।
तृतीये च धनं हन्ति चतुर्थे शोभनं भवेत्॥
प्रथमे छेदनं कृत्वा रक्तस्रावो विधीयते।
द्वितीये दीयते बालः परस्त्रीपुरुषस्य वा॥
चरणस्य तृतीये तु पश्चाच्छान्तिन्तु कारयेत्।
चतुर्थे शस्यते स्नानं कृत्वा चैव शिशोः पिता॥
स्वयमुत्पाटयेत् प्राज्ञो मूलानाञ्च शतं पिता।
मङ्गल्याश्च पवित्राश्च ओषध्यः कथयाम्यहं॥
लक्ष्मणा शतमूला च शिरीषो वेतसस्तथा।
सिंहका श्वेतमूला च विष्णुक्रान्ता च शङ्खिनी।
सर्पाक्षी सौननेत्रा च पुत्रापरि कृताञ्जली॥
पलाशो विल्वकश्चैव रोचना चन्दनद्वयं।
कृष्णमांसी सुरोशीरं धवकञ्च तथामलं(१)॥
गोजिह्वा तुलसी दूर्व्वा शतपुष्पा शताङ्गली।
मत्स्यदण्डी द्रोणपुष्पी प्रियङ्गुःश्वेतसर्षपाः॥

---

(१) चाम्राकंच तथामलमिति पाठान्तरं।

पिप्पलः काकजङ्घा च त्रायमाणा जतुस्तथा ।
ज्योतिष्मती च गान्धारी निर्गन्धा पूर्णकोशिका ॥
भगचुमा सुभद्रा च गुडूची सेन्द्रवारुणी ।
अलम्बुषा च दन्ती च कदली केतकस्तथा ॥
गोक्षुरः शतपर्वी च अरिष्टकापराजिता ।
चित्रपर्णी शतपत्रा च निकुम्भोऽथ सुवर्चला ॥
अश्वगन्धा हस्तिकर्णी हरिद्राद्वितयं तथा ।
उद्भवी मधुकारश्च अश्वत्थो बकुलस्तथा ॥
सर्जराजो अपामार्गो मन्दारश्चातिमुक्तकः ।
मालती स्वर्णपुष्पी तु श्रीकर्णी श्रीफलस्तथा ॥
दर्भमूलं करवीरं मदयन्ती विकङ्कतः ।
पाटला सुरदारुश्च अर्कसूदनिका तथा ॥
फलं मन्मथवृक्षस्य पलाशस्य च पल्लवं ।
रास्ना नन्दीवृक्षमूलं सुरदारुर्विदारिका ॥
श्वेतवीथी श्वेतपाका नीलोत्पलं तथैव च ।
नागकेशरसिन्दूरी कुमारी चैव निक्षिपेत् ॥
तीर्थाम्बु पञ्चगव्यञ्च सर्व्वौषध्यश्च काञ्चनं ।
यथासम्भवतो वापि प्राप्य मूलीगतं शुभं ।
वीरत्वचा समेतञ्च शतच्छिद्रे घटे न्यसेत् ॥
नद्या उभयकूलस्था गोमूत्रखनिता च या ।
वर्हिर्मूलगता या च तथा मातङ्गदोद्भवा ।
वल्मीकपल्वलस्था च रजसा रञ्जकाश्च ये ॥
रजसा रञ्जकाः, गोरजोरञ्जिता रथ्यामृत्तिका इत्यर्थः ।

स्नानकाले तु सा प्रोक्ता मृत्तिका पापनाशनी ।
तत्काले करकैः शान्तिस्ते चाष्टौ तोयपूरिताः ॥
चत्वारो वाथ तां दत्त्वा गिरस्नाने विवेष्टिताः ।
सवालायास्ततः कुर्य्यादिलिप्ते मण्डले शुभे ॥
वेदमङ्गलघोषैश्च मन्त्रैः पुण्याभिषेचनैः ।
आचार्य्यः कलशान्दिव्यं अभिमन्त्र्य ततः क्रमेत् ॥
स्नानं कार्य्यमिदं दिव्यं सूतकान्ते ततः शिशोः ।
मातरं स्नापयेत्पश्चाद्रुद्रपूजान्तु कारयेत् ॥
आचार्य्यं पूजयित्वा तु ब्राह्मणानाञ्च पूजनं ।
सौवर्णं पुरुषं दद्यादाचार्य्याय गुणान्वितः ॥
धेनुं दद्यात्तथा धान्यं शतमानञ्च दक्षिणां ।
प्रदक्षिणं ततः कृत्वा प्रणिपत्य क्षमापयेत् ॥
तैर्व्रतैर्नानुजातस्य प्रहरिष्टोद्भवस्य च ।
गण्डान्ते चैव भावस्य बालस्येति विधीयते ।
कृष्णतिलानामष्ट्या हैरण्यं मानमुच्यते ॥

षष्टिकृष्णतिलमितं सुवर्णमानं । निकुम्भा दन्तीभेदः श्वसा सूर्पसता । हस्तिकर्णी एरण्डः । उद्भवः पीलुः । मधुकारो मधुकः । सर्जराजो वीजकः । अपामार्गः घाटकः । अतिमुक्त माधवी । मालतिः जातिः । स्वर्णपुष्पी सुवला । श्रीफलं विल्वं । मदयन्ती पूतिका ।

अर्कसूदनिका पालङ्की । मधवल्लशस्यामः । सुरदारुः देवदारुभेदः । विदारिका कुष्माण्डी । श्वेतवीर्या गिरिकर्णिका । श्वेतपाका गुञ्जा । शेषाणि स्वनामप्रसिद्धानि ।

इन्द्राय स्वाहा। अग्नये स्वाहा। सोमाय स्वाहा। पवमानाय स्वाहा। मरुते स्वाहा। यमाय स्वाहा। मृत्यवे स्वाहा। अन्तकाय स्वाहा। अग्नये स्विष्टकृते स्वाहा॥ त्रातारमिन्द्र। त्वन्नो अग्ने। सुगन्नुपन्थां। असुन्वन्त। तत्त्वायामि आनोनियुद्भिः। वयं सोम। तमीशानं। असौ हृदा। स्योना पृथिवी। इत्यादि मन्त्राः।

इति मूलशान्तिः।

राम उवाच।

काम्यं कर्म समाचक्ष्व वाणिज्यं येन सिध्यति।
कृषिश्च बहुलाचैव कर्म्मणा केन चाप्नुते॥

पुष्कर उवाच।

मूलेषूपोषितः कुर्य्यादिदं कर्म पुरोहितः।
उपोषितस्य धर्म्मज्ञ यजमानस्य नित्यशः॥
प्राप्तासु पूर्व्वाषाढ़ासु प्राक्षु खं स्थपयेद्वरं।
युक्तं वेतसमूलैश्च शङ्खमुक्ताफलैस्तथा॥
मणिभिश्च यथालाभं कनकेन तथैव च।
अकालमूलैः कलशैश्चतुर्भिर्भृगुनन्दन॥

अकालमूलैः, नवैः।

ततस्तु पूजयेद्देवं शङ्खचक्रगदाधरं।
प्राङ्मुखे तु तथैवाच वरदञ्च निशाकरं॥
गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा।

एतेषामेव जुहुयात्तथा नाम्ना घृतं द्विजः।
नीलवासास्तथा भूत्वा क्षिपेदप्सु समाहितः॥
नीलानि चैव वासांसि देयानि विविधानि च।
चन्दनञ्च(१) सुरा चैव गैरेयं विविधन्तथा॥
शुक्लानि चैव माल्यानि धूपं दद्याद्घृतौ तथा।
निष्पत्तिमकरस्थाश्वि शङ्खमुक्ताफले तथा।
सुवर्णान्तरितं कृत्वा धारयेच्च तथा मणिं॥
कृत्वैतत् सिद्धिमाप्नोति वाणिज्यं नात्र संशयः॥
समुद्रयाने च तथा कर्षणे च न सीदति।
नीलानि सप्त वासांसि दक्षिणा चात्र शस्यते॥
शङ्खं सुवर्णं रूप्यञ्च(२) तथा मुक्ताफलानि च।
व्रते कृते द्विजेभ्यस्तु सर्व्वमेतद्विधीयते।
ब्राह्मणान् भोजयेच्चात्र परमान्नं सुसंस्कृतं॥

अभ्यर्च्य प्रत्येकमथाष्टमूर्त्तीः
करोति कर्म्मैतदनिन्दितात्मा॥
न जातु लाभादिनिवर्त्ततेऽसौ
समुद्रयानादिव निम्नगा वै॥

इति विष्णुधर्म्मोत्तरोक्तं वाणिज्यलाभव्रतम्।

———ooo———

सूत उवाच।

ब्रह्मणो मानसः पुत्त्रो वशिष्ठ इति विश्रुतः।

---

(१) चन्दनञ्च सुरार्श्चैवेति पुस्तकान्तरे पाठः।

(२) शङ्खं सुवर्णं कप्यञ्चेति पाठान्तरं।

तस्य शक्तिरभूत्पुत्रस्तस्य पुत्रः पराशरः॥
तपश्चकार सुमहद्दुष्करं देवदानवैः।
पुत्रार्थी ब्रह्मचारी च ततो लब्धवरो भवेत्॥
सुपुत्रं लप्स्यसीत्येवं भवेत्सोमहात्मभिः।
कुरु संवत्सरं स्नानं श्रवणे श्रवणे मुने॥
सोऽपि पुत्रानवापाष्टौ चकार श्रद्धयान्वितः।
पाराशर्य्यः सुतं लेभे व्रतस्यास्य प्रभावतः॥
एवमन्योऽपि राजेन्द्रस्तावत् सिद्धिमवाप्नुयात्।
पुत्रान् पौत्रांश्च लभते सुखचात्यन्तमश्नुते॥

इत्यादित्यपुराणोक्तं पुत्रोत्पत्तिव्रतं।

श्रीराम उवाच।

स्नानानामिह सर्व्वेषां यः स्नानमतिरिच्यते।
तन्ममाचक्ष्व सकलं सर्व्वकल्मषनाशनं॥

पुष्कर उवाच।

शृणु पादोदकस्नानं सर्व्वकल्मषनाशनं।
चतुरात्मा हरिर्य्यत्र भवत्यन्वागतो द्विज॥
तत्र कार्य्यमिदं स्नानं सर्व्वकल्मषनाशनं।
ततः कार्य्यं प्रयत्नेन श्रवणर्क्षे विशेषतः॥
चर्य्येत्तराषाढ़ासु निराहारो जितेन्द्रियः॥
सर्वौषधैः सर्व्वगन्धैर्देवदेवस्य शक्तितः।
पादं प्रक्षालयेद्विद्वान् क्रमेण चतुरात्मनः॥
ततः सुकलशान् कुर्य्याच्चतुरः सुदृढ़ानवान्।

सौवर्णं राजतं ताम्रमथवापि महीमयान् ॥
ततो निरुद्धचरणः कूपाद्भिः क्षालयेत्ततः ॥
ताभिस्तु कलशं पूर्णं स्थापनीयं तदग्रतः ॥
ततः प्रद्युम्नचरणौ क्षाल्यौ प्रस्रवणोदकैः ।
तैस्तु संपूर्णकलशं भवेत् स्थाप्यस्तदग्रतः ॥
संकर्षणस्य चरणौ क्षाल्यौ तोयैश्च सारसैः ।
कलशं पूरितन्तैश्च स्थाप्यं तस्याग्रतो भवेत् ॥
वासुदेवस्य चरणौ नादेयैः क्षालयेद्बुधः ।
कलशं पूरितं तैश्च स्थापनीयं तदग्रतः ॥
ततस्तु पूजा कर्त्तव्या तथा वै चतुरात्मनः ।
कलशान् पूरयेत्तांश्च गन्धमाल्यफलाक्षतैः ॥
ततः प्राप्ते द्वितीयेऽह्नि स्नातः पूर्व्वमुपोषितः ।
सम्मुखश्चानिरुद्धस्य स्थाप्यश्चोत्कटुको भवेत् ॥
प्रद्युम्नस्य च देवस्य ततः सङ्कर्षणस्य च ।
ततश्च वासुदेवस्य सर्व्वावासस्य चक्रिणः ॥
पवित्रमन्त्रैः सर्व्वेषां घटानामभिमन्त्रणं ।
कर्त्तव्यं सान्वयेनाथ शुचिना भार्गवोत्तम ॥
अथ मन्त्रान् प्रवक्ष्यामि चतुर्षु कलशेषु ते ।
मङ्गल्यांश्च यशस्यांश्च सर्व्वोऽघविनिषूदनान् ॥
अरुद्धमार्गः सर्व्वत्र सर्व्वगश्चापराजितः ।
वायुमूर्त्तिरचिन्त्यात्मा सोऽनिरुद्धः स्वयं प्रभुः ॥
पादोदकेन दिव्येन शिवेनाघविनाशिना ।
तथाश्वमुपहन्त्वाशु स्वयं वर्द्धयति प्रभुः ॥

लोकान् प्रद्योतयति यः प्रद्युम्नो भास्करः प्रभुः ।
हुताशनः स तेजस्वी मङ्गलं विदधातु मे ॥
कामदेवो जगद्योनिः सर्व्वगः प्रभुरीश्वरः ।
रोगहर्त्ता जगन्नाथो मङ्गलानि ददातु मे ॥
जगतां कर्षणाद्देवो यः स संकर्षणः प्रभुः ।
रुद्रमूर्त्तिरचिन्त्यात्मा सर्व्वगः सर्व्वदारकः ॥
कामपालोऽरिदमनः सर्व्वभूतवशङ्करः ।
विश्वयोनिर्महातेजा मङ्गलानि ददातु मे ॥
सर्व्वावासो वासुदेवो भूतात्मा भूतभावनः ।
सर्व्वगश्चाप्रमेयश्च पुरुषः परमेश्वरः ॥
अनन्तः सर्व्वदेवेशो जगत्कारणकारणः ।
अघापहारी वरदो विदधातु श्रियं मम ॥
एवं स्नातस्तुतिं कृत्वा परिधाप्य सुवाससी ।
शुक्लवासा उपस्पृश्य पूजां कुर्य्यात् क्रमेण तु ॥
गन्धैः पुष्पैः फलैः पुष्पैर्दीपधूपैः सुगन्धिभिः ।
नैवेद्यैर्विविधैश्चैव पायसान्नैस्तु पूजनैः ॥
एवं देवार्च्चनं कृत्वा समन्ताद्योगतत्परः ।
भोजनं गोरसप्रायं कृत्वा तिष्ठेत्तन्मितः ॥
प्रादुर्भावानि मुख्यानि शृणुयात् केशवस्य च ।
पाषण्डपतितानाञ्च वर्ज्जयेद्दर्शनं तथा ॥
इतिपादोदकस्नानं प्रोक्तं रथोत्तम तव ।
मङ्गल्यमायुष्यमनमलक्ष्मीनाशनं परं ॥
सर्व्वविघ्नप्रशमनं सर्व्वबाधाविनाशनं ।

सर्व्वदुष्टोपशमनं सर्व्वव्याधिहरं परं ॥
यात्रासिद्धिकरं पुण्यं कर्म्मणां सिद्धिकारकं ।
शत्रुघ्नं बुद्धिदं मध्ये बलायुःस्मृतिवर्द्धनं ।
सौभाग्यदं कामपरं यशःपुत्रविवर्द्धनं ॥
अमोघवीर्य्यं पुरुषोत्तमस्य
पादोदकस्नानमिदं प्रतिष्ठं ।
स्नानोत्तमस्ते रणचक्रवेग-
भुवस्तु ते किं करवाणि राम ॥

इति विष्णुधर्म्मोत्तरोक्तं पादोदकस्नानं ।

——000——

श्रीराम उवाच ।

आरोग्यकारकं स्नानं द्वितीया प्रतिपत्तथा ।
आरोग्यदं व्रतं चैव वैष्णवं कथयस्व मे ॥

पुष्कर उवाच ।

धनिष्ठासु महाभाग यजमानपुरोहितौ ।
उपोष्य वारुणं स्नानं यजमानस्य कारयेत् ॥
कृत्वा कुम्भशतं पूर्णं शङ्खमुक्ताफलोदकैः ।
भद्रासनोपविष्टः सन् स्नातश्च वाससाम्बरः ॥
केशवं वरुणं चन्द्रं नक्षत्रं वारुणं तथा ।
पूजयेत् प्रयतो राम गन्धमाल्यानुलेपनैः ॥
दीपधूपनमस्कारैस्तथा चैवान्नसम्पदा ।
देवतानां यथोक्तानां कुर्व्वीतावाहनन्ततः ॥
सर्व्वौषधैस्तथाऽन्येन यथाशक्ति विचक्षणः ।

गुरवे वाससी देये रत्नगोकुम्भकाञ्चनं।
ब्राह्मणानान्तु दातव्याऽवित्तशाठेन दक्षिणा॥
शमीशाकमलिङ्गैः पत्रैर्व्वं शाकेण तथैव च।
विहितस्तु मणिश्चार्थ्यः सर्व्वरोगविनाशनः॥
शाकानि हरितं माल्यं सर्व्वशस्यानि वाससी।
वरुणाय विनिक्षिप्य गन्धधूपं निवेदयेत्॥

अलङ्घयानस्य हि वारुणं तत्
स्नानेन दानेन व्रतेन सम्यक्।
रोगाः समग्राः प्रशमं प्रयान्ति
वरुस्तथा मोक्षमवाप्नुयाच्च॥

इति विष्णुधर्म्मोत्तरोक्तं शतभिषास्नानं।

———000———

अतःपरं प्रवक्ष्यामि काम्यं कर्म्म तवानघ।
कर्त्ता तूपवसेत्तत्र कारकश्च तथैव च॥
पूर्व्वभाद्रपदायोगे अहिर्ब्रध्नगते तथा।
स्नानं निशान्ते कुर्व्वीत द्वितीये इति शास्त्रवित्॥
उडुम्बरस्य पत्राणि पञ्चगव्यं कुशोदकं।
रोचना चन्दनं वासः क्षिपेत् कुम्भद्वये बुधः॥
कुम्भद्वयं ततः कुर्य्याद्गन्धमाल्यानुलेपनैर्दृढं।
अकालमूलं संस्नाप्यः कर्त्ता तेन तदा भवेत्॥
स्नात्वा गौवालवीराणि परिधानि समाहितः।
पूजयेच्चाप्यहिर्ब्रध्नमादित्यं च तथैव च॥

वस्त्रैश्च शस्त्राङ्कश्च गन्धमाल्यानसम्पदा ।
दीपधूपनमस्कारैस्तथैव बलिकर्मणा ॥
अक्षतानान्तु पात्राणि ततो राम चतुर्दश ।
अहिर्बुध्न्याय रुद्राय सफरीश्च निवेदयेत् ॥
षडङ्गेन तु दद्याद्वै तथा धूपं द्विजोत्तमः ।
ततस्तु पूजा कर्त्तव्या देवदेवस्य चक्रिणः ॥
ओंकारपूर्व्वमाज्यन्तु सर्व्वासां जुहुयात्ततः ।
देवतानां यथोक्तानामेकैकस्य शतं शतं ॥
गोपालशफशृङ्गैस्तु रत्नतं कारयेन्मणिं ।
धारणं तस्य कर्त्तव्यं करे मूर्द्ध्नाथ वा भुजे ॥
कर्म्मे चैवोपदेष्टे तु शक्त्या देया च दक्षिणा ।
ब्राह्मणानाञ्च सर्व्वेषां यथावदनुपूर्व्वशः ॥

अलङ्कृयन्भाद्रपदामथाख्यां
करोति यः स्नानमिदं सदैव ।
भवन्ति तस्यायुतशस्तु गावः
परामवाप्नोति तथैव तुष्टिं ॥

इति विष्णुधर्म्मोत्तरोक्तं अहिर्बुध्न्यस्नानं ।

———ooo———

वलगुरुवाच ।

व्रतान्यथानि मे ब्रूहि काम्यानि द्विजपुङ्गव ।
नारीणां पुरुषाणाञ्च सर्व्वज्ञस्त्वं यतो मम ॥

मार्कण्डेय उवाच ।

कृत्तिकास्वर्च्चयेद्देवं कार्त्तिकीप्रभृतिक्रमात् ।

यावत्स्यात्कार्त्तिको भूयो नरसिंहमुपोषितः ॥
अनुलेपनपुष्पाद्यैः सर्व्वरत्नैः सदैव तु ।
व्रतावसाने दद्याद्गां तथा श्वेतां द्विजातये ॥
श्वेतवस्त्रयुताञ्चैव (१) रजतञ्च तथा नृप ।
उपोषितः सदा कुर्य्याद्व्रतं स्याच्छ्रमवर्ज्जितः ।
मार्गशीर्षमथारभ्य मृगर्क्षे पूजयेन्नरः ।
अनन्तशयनासीनमनन्तं सर्व्वकामदं ॥
अनन्तपुण्योपचयमनन्तसुखसम्पदं ।
यथाभिलषितावाप्तिः कुरु मे पुरुषोत्तम ॥
इत्युदीर्य्याभिपूज्यैनमुपोषणपरो नरः ।
विप्राय दक्षिणां दद्यादनन्तः प्रीयतामिति ॥
पौषमासादथारभ्य पुष्ये नित्यमुपोषितः ।
यावत्पौषो भवेद्भूयो बलदेवमथार्च्चयेत् ॥
अनुलेपनपुष्पाद्यैः सर्व्वरत्नैस्तथैव च ।
व्रतावसाने दातव्यं (२) कांस्यं कनकमेव च ।
भक्त्या विप्राय भवति नित्यं पुष्टियुतो नरः ॥
माघमासादथारभ्य मघासु सततं नरः ।
वराहमर्च्चयेद्देवं तथा नित्यमुपोषितः ॥
घृताभ्यङ्गेन विधिवच्चन्दनेन सुगन्धिना ।
तथा च परमान्नेन घृतहोमेन चाप्यथ ॥
दद्याद्व्रतावसाने तु घृतधेनुं नराधिपः ।

---

(१) श्वेतवस्त्रयुताञ्चैवेति पाठान्तरं ।
(२) सघृतं कांस्यमिति पुस्तकान्तरे पाठः ।

पितृप्रसादमाप्नोति कृत्वैतद्व्रतमुत्तमं ॥
फल्गुनीतस्तथारभ्य फाल्गुनीषु समर्चयेत् ।
नरनारायणौ देवौ यावत्स्यात् फाल्गुनी पुनः ।
व्रतावसाने शयनं स्वास्तीर्णं प्रतिपादयेत् ॥
व्रतेनानेन नारी स्यात् सभर्त्री समलङ्कृता ।
भार्य्यां नरस्तथाप्नोति रूपद्रविणसंयुतां ॥
अनुकूलां प्रियां नित्यं तद्वा पञ्चवर्तीं नृप ।
अवियोगमवैधव्यं करोत्येतन्महाव्रतं ॥
चैत्रमासादथारभ्य नित्यं चित्रास्वथार्चयेत् ।
यावच्चैत्री भवेद्भूयो नित्यं विष्णुमुपोषितः ॥
व्रतावसाने दद्याच्च चित्रं वस्त्रं द्विजन्मने ।
व्रतेनानेन पुरुषः पुत्रानाप्नोत्यभीप्सितान् ॥
नारी वा पुरुषश्चात्र नात्र कार्य्या विचारणा ।
वैशाखे च तथा विष्णुं विशाखासु समर्चयेत् ॥
यावद्भूयात्तु वैशाखी सोपवासः पृथुं विभुं ।
दत्त्वा व्रतान्ते कनकं प्रातिथेयं नरोत्तमः ॥
ज्यैष्ठमासे तथा ज्येष्ठामुपोषितो नरः सदा ।
कृष्णञ्च पूजयेद्देवं वस्त्रालङ्कारभूषणैः ॥
व्रतावसाने दातव्यं गवां शतमनुत्तमं ।
वस्त्राणि कनकं भूरि कृष्णमायुज्यमाप्नुयात् ॥
आषाढ़ीतस्तथारभ्य दिनद्वयमुपोषितः ।
आषाढ़ास्वर्च्चयेद्देवं प्रद्युम्नमपराजितं ॥
भूयः स्यात्तु यदाषाढ़ी दद्याच्च शयनं ततः ।

विस्तीर्णं तेन चाप्नोति नित्यं रूपयुता स्त्रियः॥
श्रावणीतस्तथारभ्य पद्मेण संयुतं हरिं।
पूर्व्वव्रतोपवासस्तु यावत्स्यात् श्रावणी पुनः॥
व्रतावसाने दद्याच्च ब्राह्मणाय घृतं बहु।
व्रतेनानेन चीर्णेन दीर्घजीवितमाप्नुयात्॥
आरभ्य प्रौष्ठपादीतो नित्यश्चाद्रपदाह्वये।
सङ्कर्षणं पूजयेत्तु यावद्भाद्रपदी पुनः॥
व्रतावसाने दद्याच्च गवां मिथुनमुत्तमं।
व्रतेनानेन भवति नित्यमायुर्युतो नरः॥
आश्वयुज्यामथारभ्य नित्यमेवाश्विनीषु च।
अर्च्चयेत्पद्मनाभन्तु वासुदेवमुपोषितः।
व्रतावसाने दद्याच्च कांस्यं रौप्यं घृतं तथा॥

> व्रतान्यथैतानि मया नरेन्द्र
> प्रोक्तानि ते पापहराणि नित्यं।
> नाकप्रदान्युत्तमपूरुषाणां
> कामानिदान्येव यथेष्टदानि॥

यत्तद्रूपाख्याह विश्वकर्म्मा।
बलभद्रो नीलवासा लाङ्गली मुषली सितः।
नरनारायणौ नीलौ साक्षात् शुक्लजटाजिनौ॥
रथस्थैकैकचरणौ मध्यस्थौ सदृशीतनू।
चापबाणासनयुतौ द्विचतुर्बाहुधारिणौ॥
पृथुः सचापो द्विभुजो राजलक्षणलक्षितः।
मङ्कोमोदकोपद्मचक्री प्रद्युम्न उच्यते।

सङ्कर्षणः शङ्खपद्मचक्रकौमोदकीधरः॥
स्थानानि धरणीव्रते विलोकनीयानि।

इति विष्णुधर्म्मोत्तरोक्तं सर्व्वकामाप्तिव्रतं।

———०००———

युधिष्ठिर उवाच।

अप्राप्तेन यथा दुःखमैश्वर्य्यादेर्नरोत्तम।
तथा मनोरथैर्भ्रष्टमानाद्दुःखं भवेन्नृणां॥
ऐश्वर्य्यादिच्युते वापि सन्तते वापि लोपतः।
अभीष्टादन्यतो वापि स्वपदाद्येन विच्युतिं।
नरो नाप्नोति नारी वा व्रतं तद्ब्रूहि मे मुने॥

कृष्ण उवाच।

सत्यमेतन्महाभाग दुःखप्राप्तिश्च संचयः।
ऐश्वर्य्यस्यैव वित्तस्य बन्धुवर्गसुतस्य च॥
तदेव श्रूयतां पार्थ यथा नेष्टात्पदाच्युतिः।
स्वर्गादिर्जायते सम्यगुपवासव्रते नृणां।
द्वादशर्क्षाणि राजेन्द्र प्रतिमासमनु यानि वै।
पुष्पैर्धूपैस्तथान्नैभिरभीष्टैरपरैरपि॥
आश्रितः कृत्तिकां कृत्वा कार्त्तिके नृपसत्तम।
कृशरामायनैवेद्यं पूर्व्वमासचतुष्टयं॥
निवेदयेत् फाल्गुनादौ संयावन्तु ततः परं॥
आषाढादिषु (१) देवाय पायसं विनिवेदयेत्॥

(१) आषाढादिचतुर्ष्वपिति पुस्तकान्तरे पाठः।

तेन कृशरामान्ननैवेद्यं पूर्व्वमासचतुष्टये निवेदयेत्। फाल्गुनादिषु संयावं ततः परं आषाढ़ादिषु चतुर्षु मासेषु पायसं विनिवेदयेत्।

तेनैवान्नेन राजेन्द्र ब्राह्मणान् भोजयेद्बुधः।
पञ्चगव्यजले स्नानं तस्यैव प्राशनाच्छुचिः॥
सम्यक् संपूज्य राजेन्द्र तमेव पुरुषोत्तमं।
प्रणम्य प्रार्थयेद्विद्वान् भक्तिनम्रो यथाविधि॥

नमो नमस्ते मम संक्षयोऽस्तु
पापस्य वृद्धिं समुपैतु पुण्यं।
ऐश्वर्य्यवित्तादि सदाक्षयं मेऽ
क्षया च मे सन्ततिरच्युतास्तु॥
तथाच्युत त्वं परतः परात्मा
ब्रह्मात्मभूतः परतः परात्मा।
तथाच्युतं मे कुरु वाञ्छितं तत्
पापं हरे मे तु हराप्रमेयं॥

अच्युतानन्द गोविन्द प्रसीद यदभीप्सितं।
तदक्षयममेयात्मन् कुरुष्व पुरुषोत्तम॥
एवं देवं समभ्यर्च्य प्रार्थयित्वा यथाविधि।
नैवेद्यं स्वयमश्नीयान्नित्यं श्रद्धासमन्वितः॥
ततः संवत्सरस्यान्ते सुखं सुप्तोत्थितेऽच्युते।
सघृतं ताम्रपात्रन्तु ब्राह्मणाय निवेदयेत्॥
शक्तितो दक्षिणां दद्यादच्युतः प्रीयतामिति।
एवं त्रिसप्तमे वर्षे कुर्य्यादुद्यापनन्ततः॥

तद्यपि ब्राह्मणी ख्याप्या स्थविरा शाण्डरायणी।
महासती रौप्यमयी तत्सनार्हा सदैव सा॥
ततस्ते पूजयित्वा तु माल्यवस्त्रानुलेपनैः।
मन्त्रेणानेन राजेन्द्र प्रणिपत्य विधानतः॥
प्रतिसंवत्सरं दद्याद्व्रपानं द्विजातये।
ब्राह्मणाय तिलान् दद्यात् सहिरण्याज्यसंयुतान्।
गावश्च दद्याद्विप्राय सवत्साः कांस्यदोहनाः।
शय्याश्च शक्तितो दद्यात्तया तिष्ठतु केशवः।
घटसप्ताश्च निर्दिष्टाः ख्याप्याः पूर्णजलोज्ज्वलाः॥
छत्रोपानद्युगैः सार्द्धं दत्त्वा न च्यवते नरः।
तस्मात् सर्व्वप्रयत्नेन दत्त्वा विप्रान् विसर्जयेत्॥
नृत्यगीतेन राजेन्द्र नरः प्राप्नोति वाञ्छितं।
सन्ततिं स्वर्गसौभाग्यमैश्वर्य्यञ्च तथैव च॥
तद्दत्तिमितमत्यन्तं ततो न च्यवते नरः।
तस्मात् सर्व्वप्रयत्नेन चात्मना चैव पूजयेत्।
यतेताक्षयकामस्तु सदैव पुरुषोत्तम॥

कृष्ण उवाच।

अत्रापि श्रूयते काचित् सिद्धा स्वर्गे महाव्रता।
नारी तपस्विनी भूत्वा प्रख्याता शाण्डरायणी॥
समस्तसन्देहहरा सदा स्वर्गौकसां हिता।
कस्मिंश्चिदेव काले तु देवराजः शतक्रतुः।
पूर्वेन्द्रचरितं राजन् पप्रच्छेदं बृहस्पतिं॥
पूर्व्वेन्द्रात्परतः पूर्व्वं ये बभूवुः सुरेश्वराः।

तेषां चरितमिच्छामि श्रोतुमङ्गिरसां वर ॥
एवमुक्तस्तदा तेन देवेन्द्रेणामलद्युतिः।
प्राह धर्म्मभृतां श्रेष्ठः परमर्षिर्बृहस्पतिः ॥
आत्मनः समकालीनं मामवेहि सुरेश्वर।
ततः परमयं देवो बृहस्पतिसमन्वितः ॥
ययौ यत्र महाभागा सम्यगास्ते तपस्विनी।
सा तौ दृष्ट्वा समायातौ देवराजबृहस्पती ॥
सम्यगर्घ्येण संपूज्य प्रणिपत्याह सुव्रता।
नमोऽस्तु देवराजाय तथैवाङ्गिरसे नमः ॥
यद्वा कार्य्यं महाभागैः सकलन्तदिहोच्यताम्।
यदि कर्त्तुं मया शक्यं तत्करिष्येऽविमृश्य च ॥

बृहस्पतिरुवाच।

आवाभ्यामागतौ भद्रे प्रष्टुमत्राभिकाङ्क्षिनौ।
यच्च कार्य्यं महाभागे तत्पृष्टं कथयस्व मां ॥
यदि स्मरसि कल्याणि पूर्वेन्द्रचरितानि वै।
तदाख्याहि महाभागे देवेन्द्रस्य कुतूहलं ॥

शाण्डिल्युवाच।

वर्त्तते पूर्व्वं सुरेन्द्रस्य ततश्च प्रथमे हि यः।
तस्मात् पूर्व्वतरा ये च तस्यापि प्रथमश्च यः ॥
तेषां पूर्व्वतरा ये वै वेद्मि तानखिलानहं।
तेषाञ्च चरितं कृत्स्नं जानाम्यङ्गिरसां वर ॥
मन्वन्तराण्यनेकानि सृष्टयश्चदिवौकसः।
सप्तर्षींश्च पश्चन्के वेद्मि मनूनाञ्च सुतांश्च यान् ॥

एवमुक्ता सुरेन्द्राणां सा शक्रं शाम्भरायणी।
कथयामास आश्चर्यं तदापि कथयामि ते ॥
शृणु वत्स नकुकर्णो देवदैवतदुर्ज्जयः ।
स लोकपालान् समरे विजित्य सहदैवतैः ।
इन्द्रस्यायतनं पश्चात् प्रविवेश सुनिर्भयः ॥
तं दृष्ट्वा सहसा प्राप्तं शक्रः शय्यातले लुठन् ।
जगोप सहसा श्रान्तं नकुकर्णभयाद्दिवं ।
दानवं शक्रशयने प्रणिपातपुरःसरः ॥
वासुदेवस्तु दुष्टं तं दृष्ट्वा दैवतकण्टकं ।
चकार कण्ठग्रहणं वामहस्तेन हर्षितः ॥
ततः स्कन्धाश्च तरसा गृह्य दोर्भ्यां शनैः शनैः ।
पीडयामास विहसन् नदन्तं भैरवान् रवान् ॥
ममार दानवेन्द्रोऽसौ बलाद्भग्नास्थिपञ्जरः ।
निर्जगाम ततः सोऽपि शय्यामूलमवाक् शिरः ॥
तुष्टाव हरिमासीनः शङ्खचक्रगदाधरं ।
एतद्दृष्टं मया शक्र उवाच सुरराट् प्रति ॥
ततः क्रुद्ध तदा रौद्रं देवराजस्तपस्विनीं ।
उवाच जानासि कथं त्वमेतत् शाम्भरायणि ॥

शाम्भरायण्युवाच ।

सर्व्व एव हि देवेन्द्र स्वर्गस्था ये सुरेश्वराः ।
बभूवुश्चरितं तेषां श्रुतं दृष्टमेव च ।

इन्द्र उवाच ।

किन्त्विदं वद धर्म्मज्ञे त्वयानघे यदृच्छया।
स्वर्लोके वसतिं प्राप्ता यथान्यायेन केनचित्॥
अहो सर्व्वव्रतानाञ्च ह्युपोषितमयोदितं।
प्रधानतरमत्यन्तं स्वर्गवासप्रदं मतं॥
एवमुक्ता ततस्तेन देवेन्द्रेण तपस्विनी।
प्रत्युवाच महाभागा यथा तच्छाश्वरायणी॥
सप्तवर्षैरर्च्चितो देवः प्रतिमासं सुरेश्वर।
यथोक्तव्रतमासाद्य सप्तवर्षाणि पूजितः॥
तस्येयं कर्म्मणोव्याप्तिरच्युताराधनस्य मे।
देवलोकादभिमताद्देवराज यदच्युतिः॥
स्वर्गं द्रव्यमथैश्वर्य्यं सततं यानि वाञ्छति।
नरः प्राप्नोति तत्सर्व्वं तोषणीयस्ततः प्रभुः॥
एतत्ते पूर्व्वं देवेन्द्र चरितं सकलं मया।
स्वर्गवासाच्चयत्वञ्च मासादच्युतपूजनात्॥
यथा च कथितं देव पृच्छतस्त्रिदशेश्वर।
धर्म्मार्थकाममोक्षञ्च वाञ्छितं विबुधाधिपैः।
विष्णोराराधनायान्यत्परमं सिद्धिकारणं॥
तस्यास्तद्वचनं श्रुत्वा देवराजबृहस्पती।
तां तथेत्यूचतुः साध्वीं चेरतुश्चापितद्व्रतं॥
तस्मात्पार्थ प्रयत्नेन प्रतिमासं समाहितः।
मासि मास्यच्युतं पूज्य भवेथास्त्वमनास्तदा।
ये शाश्वरायणि कथां चरितव्रतेन
वर्षाणि सप्त विधिना सुधियो नयन्ति।

ते स्वर्गलोकमभिलभ्य कृताधिवासाः
कल्पायुतं सुतशतैरपि न च्यवन्ति॥

इति श्रीभविष्योत्तरे श्रावणरायणीव्रतं।

वशिष्ठ उवाच।

शृणुष्व च महीपाल व्रतं विष्णुपदत्रयं।
सर्व्वपापप्रशमनं यज्जगाद पुरा हरिः॥
दक्षः प्रजापतिः पूर्व्वं विष्णुमाराध्य पृष्टवान्।
बहुशश्च विपन्नायां स स्रष्टावरिसूदनः॥

दक्ष उवाच।

भगवन् सर्व्वकर्त्तृत्वमादिष्टं मे स्वयम्भुवा।
ब्रह्मणा देवदेवेन तवादेशेन केशव॥
विपत्तेन जगन्नाथ समसृष्टिः कृता तव।
विघ्नाशक्तविशमात्वमाचक्ष्व चाच्युत॥

वशिष्ठ उवाच।

इत्येवमुक्तो दक्षेण देवदेवो जनार्द्दनः।
आचष्ट दुःखक्षयदं व्रतं विष्णुपदत्रयं॥
सर्व्वारम्भविनिष्पत्तिकारकं पापनाशनं।
संसारोच्छेदकं धीरैर्यच्चेष्टं चिरवह्निभिः॥
तदहं तव राजेन्द्र व्रतानामुत्तमोत्तमं।
कथयामि समाचष्ट यथापूर्व्वं समासतः॥
आषाढे मासि राजेन्द्र पूर्व्वाषाढासु पार्थिव।

समभ्यर्च्य जगन्नाथमच्युतं नियतः शुचिः।
पुष्पैर्धूपैस्तथा हृद्यैर्गन्धैः सागुरुचन्दनैः॥
यथाविभवतश्चान्यैरन्नैर्वासोभिरेव तु।
गोरक्षेहस्थितं तद्द्रव्यैर्विष्णुपदत्रयं॥
समभ्यर्च्य यथाशक्त्या केशवस्याग्रतो न्यसेत्।
यवांश्च दद्याद्विप्राय श्रीपतिः प्रीयतामिति॥
नक्तं भुञ्जीत राजेन्द्र हविष्यान्नं सुशोभनं।
तथैवोत्तराषाढ़ासु श्रावणे मासि मानवः॥
तथैवाभ्यर्च्य गोविन्दं तथा विष्णुपदत्रयं।
विप्राय च घृतं दत्त्वा प्रीणयित्वा भुवःपतिं॥
भुञ्जीत गोरसप्रायं मानवो मौनमास्थितः।
स्त्री वा राजेन्द्र पूर्व्वासु तथा भाद्रपदासु वै॥
फाल्गुने फाल्गुनी पूर्व्वा भवेदिति यदा नृप॥
त्रिविक्रमं तदा देवं पूर्व्वोक्तविधिनार्च्चयेत्।
पदत्रयन्तु देवस्य समभ्यर्च्य तु पार्थिव॥
हिरण्यं दक्षिणां दद्यात् सर्व्वतिः प्रीयतामिति।
नक्तं भुञ्जीत राजेन्द्र आज्यपाकविवर्जितं॥
एष एवोत्तरायोगे चैत्रे मासि विधिः स्मृतः।
अपुत्रो लभते पुत्रमपतिर्लभते पतिं॥
समागमं प्रवासश्च तथा प्राप्नोति बान्धवैः।
भद्रमैश्वर्य्यमारोग्यं सौभाग्यं चानुरूपतां॥
प्राप्नुयादखिलानेतान् पूजयित्वा पदत्रयं।
यान् यान् कामान्नरः स्त्री वा हृदयेनाभिवाञ्छति॥

तांस्तानाप्नोति निष्कामो विष्णुलोकं प्रपद्यते ॥
पूर्व्वं कृत्वापि पापानि नरः स्त्री वा नराधिप ।
पदत्रयं व्रतस्यास्य मुच्यते सर्वकिल्बिषैः ॥

इति विष्णुधर्मोत्तरोक्तं विष्णुपदव्रतं ।

———ooo———

दत्त उवाच ।

अपुत्रता महादुःखमतिदुःखं कुपुत्रता ।
कुपुत्रः सर्व्वदुःखानां हेतुभूतो यतो मम ॥
धन्यास्ते तु सुतं प्राप्य सर्व्वदुःखविवर्ज्जिताः ।
युतं प्रज्ञान्तबलिनं भक्तं गुणविचक्षणं ॥
स्वकर्म्मनिरतं नित्यं देवद्विजपरायणं ।
अस्खलं वेदधर्म्मज्ञं दीनानाथसमाश्रयं ॥
दैवानुकूलतायुक्तं युक्तं सम्यग्गुणेन तु ।
प्राप्नोति पुत्रं वै योऽस्मात्मान्यो धन्यतरो भुवि ॥
सोऽहमिच्छामि तत् श्रोतुं त्वत्तः कर्म्म महामुने ।
येन तथाविधः पुत्रो लभ्यते मानवैरिह ॥

पुलस्त्य उवाच ।

एवमेतन्महाभाग पित्रोः पुत्रसमुद्भवं ।
सर्व्वदुःखोपशमनं येनैतत् कथयामि ते ॥
कृतवीर्य्यो महीपालो हैहयानामभूत्पुरा ।
तस्य शीलवतीनाम्नी बभूव वरवर्णिनी ॥
सा त्वपुत्रा महाभागा मैत्रेयीं पर्य्यपृच्छत ।

गुणांश्च पुत्रलाभस्य ज्ञातासन्नपरिग्रहा।
कथयामास मैत्रेयी नाम्नानन्तव्रतं शुभं॥

मैत्रेय्युवाच।

योऽयमिच्छेन्नरः कामं नारी वा वरवर्णिनी।
स तं समाराध्य विभुं सम्यगाप्नोति केशवात्॥
मार्गशीर्षे मृगशिरऋक्षं यस्मिन्दिने भवेत्।
तस्मिन् सम्प्राश्य गोमूत्रं स्नात्वा नियतमानसः॥
पुष्पैर्धूपैस्तथा गन्धैरुपहारैश्च शक्तितः।
वामपादमनन्तस्य पूजयेद्वरवर्णिनि॥
अनन्तः सर्वकामाय अनन्तं भगवान् फलं।
ददात्वनन्तञ्च पुनस्तदिहैवान्यजन्मनि॥
अनन्तपुण्योपचयकरोऽस्मिन्महाव्रतं।
तथाभिलषितावाप्तिं कुरु मे पुरुषोत्तम॥
इत्युच्चार्य्यार्च्चनं तस्य यथाविधिविधानतः।
समाहितमना भूत्वा प्रणिपातपुरःसरं॥
विप्राय दक्षिणान्दद्यादनन्तः प्रीयतामिति।
इत्युच्चार्य तथा नक्तं भुञ्जीयात्तैलवर्जितं॥
तथैव पुरुषं पौषे पुष्यर्क्षे भगवत्कटिं।
वामामभ्यर्च्य कर्त्तव्यं गोमूत्रप्राशनन्ततः।
अनन्तः सर्वकामानामिति चोच्चारयेत् पुनः॥
भुञ्जीत च तथान्यायं वाचयित्वा द्विजोत्तमान्।
माघे मघासु तद्वै बाहू देवस्य पूजयेत्॥
स्कन्धञ्च फाल्गुनीयोगे फाल्गुने मासि भामिनि।

चतुर्ष्वेतेषु मासेषु गोमूत्रप्राशनं मतं ॥
ब्राह्मणाय तथाद्द्यात्तिलान् धान्यकमेव च ।
देवस्य दक्षिणं स्कन्धमेते चित्रासु पूजयेत् ॥
तथैव प्राशयेच्चात्र पञ्चगव्यं महीपते ।
किञ्चित्तु कनकं दद्याद्यावन्मासचतुष्टयं ॥
वैशाखे तु विशाखायां बाहुं संपूज्य दक्षिणं ।
तथैव दद्यात् कनकं नक्तं भुञ्जीत वाग्यतः ॥
ज्येष्ठासु च कटिं पूज्य ज्यैष्ठे मासि शुभव्रत ।
आषाढ़ासु तथाषाढ़े कुर्य्यात् पादार्च्चनं विभोः ॥
पादद्वयन्तु श्रवणे श्रावणे मासि पूजयेत् ।
घृतं विप्राय दातव्यं प्राशयीत यथाविधि ॥
कार्त्तिकान्तेषु मासेषु प्राशनं दानमेव तु ।
मुखं प्रौष्ठपदायोगे मासि भाद्रपदेऽर्चयेत् ॥
तद्वदेवाश्विने पूज्य हृदयञ्चाश्विनीषु च ।
कुर्य्यात्समाहितमना सामं प्राशनमर्च्चनं ॥
अनन्तशिरसः पूजां कार्त्तिके कृत्तिकासु च ।
यस्मिन् यस्मिन् दिने पूजा तत्र तत्र दिने दिने ॥
नाम तस्य तु जप्तव्यं स्तुतःप्रसन्नलिताद्विषु ।
इत्येनानन्तमुद्दिश्य पूर्व्वं मासचतुष्टयं ।
ततश्चतुर्षु मासेषु मधुना कुलनन्दन ।
क्षीरेण श्रावणादौ च होमो मासचतुष्टयं ॥
प्रशस्तं सर्व्वमासेषु हविष्यान्नेन भोजनं ।
एवं द्वादशभिर्म्मासैः पारणत्रितयं भवेत् ॥

व्रतावसाने चानन्तं सौवर्णं कारयेत्कुभं।
राजतं मुषलञ्चैव तस्याग्रे विनिवेदयेत्।
पुष्पधूपादिनैवेद्यं पूजा कार्य्या यथाविधि॥
नाम्ना पीठोपरि हरिं मन्त्रैरेभिर्यथाक्रमं।
नमोऽस्त्वनन्ताय शिरः पादौ सर्व्वात्मने नमः॥
शेषाय जानुयुगलं कामायेति कटिं नमः।
नमोऽस्तु वासुदेवाय पार्श्वे संपूजयेद्धरेः॥
सङ्कर्षणायेत्युदरं भुजौ सर्व्वास्त्रधारिणे।
कण्ठं श्रीकण्ठनाम्ना वै मुखमिन्दुमुखाय च॥
हलञ्च मुषलञ्चैव स्वनाम्ना पूजयेद्बुधः।
एवं संपूज्य गोविन्दं सितवस्त्रविभूषित।
छत्रोपानत्समायुक्तं स्रग्दामालङ्कृतं तथा॥
नक्षत्रदेवताः पूज्या नक्षत्राणि च सर्व्वशः(१)।
सोमं नक्षत्रराजानं मासान् संवत्सरं तथा॥

नक्षत्रदेवतास्तु भविष्यत्पुराणात्।

अश्विनौ यमराडग्निर्धाता चन्द्र उमापतिः।
अदितिर्व्वाक्पतिः सर्पाः पितरश्च भगोऽर्य्यमा॥
रविस्त्वष्टा मरुच्चैव शक्राग्नी मित्र एव च।
मघवा निर्ऋतिस्तोयं विश्वेदेवाः श्रियःपतिः॥
वसवो वरुणस्तस्मादजोऽहिर्बुध्नपूषणौ।
नक्षत्रदेवता ह्येता कथितास्तत्र देवताः॥
द्वादशाश्च घटाः कार्य्याः सतोयाश्चान्नसंयुताः॥

(१) नक्षत्राणि चतुर्द्दश इति पुस्तकान्तर पाठः।

एवं संपूज्य विधिवद्देवदेवं जनार्द्दनं ।
ब्राह्मणान् पूजयित्वा तु वस्त्राभरणैः शुभैः ॥
एकं वा वेदवेदाङ्गपारगं संयतेन्द्रियं
पुराणज्ञं धर्म्मविदं अव्यङ्गन्तु प्रियम्वदं ॥
तस्य देयं समस्तं तदनन्तः प्रीयतामिति ।
अन्येषां ब्राह्मणानान्तु देयं वित्तानुसारतः ॥
अनेन विधिना भद्रे व्रतञ्चैतत् समाप्यते ।
पारिते च समाप्नोति सर्व्वानेव मनोरथान् ॥
पुत्रार्थिभिर्व्वित्तकामैर्भृत्यदारानभीप्सुभिः ।
प्रार्थयद्भिश्च सर्व्वैश्चारोग्यबलसम्पदः ।
एतद्व्रतं महाभागे पुण्यं स्वस्त्ययनं परं ॥
अनन्तव्रतसंयुक्तं सर्व्वपापप्रणाशनं ।
तत कुरुष्वैतदेव त्वं व्रतं शीलधनप्रदं ।
वरिष्ठं सर्व्वलोकस्य यदि पुत्रमभीप्ससि ॥

इति विष्णुधर्म्मोत्तरोक्तमनन्तव्रतं ।

———000———

पुरूरवा उवाच ।

श्रोतुमिच्छामि भगवन् रूपसत्रं महाफलं ।
यत्कृत्वाहं भविष्यामि दिव्यरूपधरो मुने ॥

ऋषिरुवाच ।

तदेतद्व्रतकामेन अन्विष्यो ब्राह्मणो गुरुः ।
ज्योतिषं योऽभिजानाति इतिहासांश्च तत्त्वतः ॥
तत् प्रदिष्टेन विधिना पादाद्यप्रभृतिक्रमात् ।

फाल्गुन्यां समतीतायां कृष्णपक्षाष्टमी तु या।
समूलां तां तु संप्राप्य व्रतं गृह्णीत मानवः॥
उपोषितव्यं नक्षत्रं नक्षत्रस्य च दैवतं।
वरुणस्य तथा चन्द्रं पूजयेद्विधिना नरः॥
पूजयेद्देवदेवस्य भगवन्तं जनार्द्दनं।
उपोष्याङ्गानि देवस्य प्रयत्नेन च पूजयेत्॥
ततोऽग्निहवनं कृत्वा पूजयित्वा तथा गुरुं।
उपवासस्तु कर्त्तव्यो द्वितीयेऽहनि पार्थिव॥
उपोष्य ऋक्षे विगते स्नात्वा संपूज्य केशवं।
कृत्वाग्निहवनं शक्त्या पूजयित्वा द्विजोत्तमान्॥
हविष्यान्नस्य भोक्तव्यं शृणु चाङ्गक्रमं मम(१)।
पादयोः कथितं मूलं प्राजापत्यन्तु जङ्घयोः॥
अश्विनी जानुयुगलं जरुयुग्मे च पार्थिव।
सहिते द्वे तथाषाढ़े गुह्यस्य सहिते स्मृते॥
पूर्व्वोत्तरे च फाल्गुन्यो कृत्तिका च कटिर्भवेत्।
पार्श्वयोः कुक्षियुतयोर्नक्षत्रमितरां समं।
उभे प्रोष्ठपदे राजन् रेवती च तथा भवेत्॥
उरोऽनुराधास्तु पृष्ठं धनिष्ठास्तु प्रकीर्त्तितं।
भुजौ ज्ञेयौ विशाखास्तु हस्तौ प्रोक्तौ तथा करौ॥
अङ्गुल्यश्च तथा प्रोक्ता राजसिंह पुनर्व्वसो।
अश्लेषायां नखाः प्रोक्ता ज्येष्ठायां नृप कन्धरः॥
श्रवणे श्रवणौ ज्ञेयौ मुखं पुष्ये प्रकीर्त्तितं।

(१) शृणु चाङ्गन्यासं मम इति प. ड़ाक्षरं।

दन्ताः स्वाती शतभिषा हनुः प्रोक्ता तथा नृप ॥
मघायां नासिके प्रोक्ते मृगशीर्षे च लोचने ।
चित्रा ललाटे विज्ञेया भरण्याञ्च तथा शिरः ॥
शिरोरुहास्तथार्द्रासु व्रतस्यान्ते नराधिप ।
चैत्रशुक्लावसाने तु सत्रं परिसमाप्यते ॥
यद्यन्तरायं न भवेत् किञ्चिच्छौचं निशिराज ।
अङ्गक्रमेण सकलमृक्षवर्गमुपोषितः ॥
ततान्ते प्रयतः स्नात्वा पूजयेन्मधुसूदनं ।
चन्दनागुरुकर्पूरमृगदर्भैः सकुङ्कुमैः ॥
जातीफलैः सकक्कोलैर्लवङ्गकुसुमैस्तथा ॥
बालगुग्गुलुनिर्य्यासैः पुष्पैः कालोद्भवैः शुभैः ॥
धूपो नरेन्द्रागुरुणा चन्दनेन सुगन्धिना ।
दीपाश्च देया राजेन्द्र तिलतैलेन पूरिताः ॥
अशेषा वर्त्तयः कार्य्या महारजतरञ्जिताः ।
नैवेद्यञ्च तथा कार्य्यं परमान्नेन पूरिणा ॥
दध्ना क्षीरघृताभ्याञ्च मधुना च गुडेन च ।
सितया च तथा भक्ष्यैः फलैर्मूलैर्यथाविधि ॥
अपूपैः पानकैर्हृद्यैः शीतलैश्च सुगन्धिभिः ॥
लवणस्य च पात्राणि क्षणरस्य निवेदयेत् ।
सर्व्वबीजानि राजेन्द्र भूषणानि च शक्तितः ।
महार्हाणि च वस्त्राणि भक्त्या प्रयतमानसः ।
तद्विष्णोः परमित्येवं होमः कार्य्यो ह्यनन्तरं ॥
द्वादशाक्षरको मन्त्रस्त्रीशूद्रेषु विधीयते ।

घृतमाक्षिकसंयुक्तान् जुहुयात्तिलतण्डुलान् ॥
ततस्तु दक्षिणा देया गुरवे नृपसत्तम ॥
नागानि च प्रदेयानि ग्रामाणि विविधानि च।
तुरगाणि च मुख्यानि रत्नानि विविधानि च ॥
ब्राह्मणस्तु पिता ज्ञेयो रूपसत्रप्रदर्शकः।
रूपसौभाग्यलावण्यजन्मारोग्यप्रदायकः ॥
राज्यस्य वा द्विजत्वस्य बहुवित्तस्य दायकः।
न तस्य निष्कृतिः शक्या गन्तुं दानेन भूरिणा ॥
गुरुप्रसाद एवात्र दक्षिणा न तु कारणं।
तस्मात् प्रसादमाकाङ्क्षेद्रूपसत्रप्रदर्शकः ॥
अवश्यं तस्य दातव्यं घृतपूर्णन्तु भाजनं।
चतुःपलन्तु कांस्यस्य सुवर्णं काञ्चनस्य च ॥
ततः परं भोजनीयाः स्वशक्त्या द्विजपुङ्गवाः।
लवणक्षीरदध्याज्यगुड़भक्षसितोत्कटं ॥
भोजनं पानकोपेतं पश्चाद्देया च दक्षिणा।
वस्त्रयुग्मं प्रदातव्यं ब्राह्मणाय नवं शुभं।
बहुमूल्यं शुभञ्चैव मत्तारजतरञ्जितं ॥
सप्त बीजानि देयानि लवणं कुप्यमेव च।
यच्चान्यदप्यभीष्टं स्याच्छयोपानहमेव च ॥
वित्तशाठ्यं न कर्त्तव्यं रूपदाने महीपते।
अवश्यदेयं सर्वेऽस्मिन् घृतपूर्णन्तु भाजनं ॥
चतुःपलन्तु कांस्यस्य सुवर्णं काञ्चनस्य च।
व्रतेनानेन चीर्णेन देहत्यागे दिवं व्रजेत् ॥

तत्रास्ते सुचिरं कालं मानुष्ये यदि जायते ।
राजा भवति धर्म्मिष्ठो ब्राह्मणो वा धनान्वितः ॥
कुले महति सम्भूतो रूपेणाप्रतिमो भुवि ।
आरोग्यं महदाप्नोति सौभाग्यमपि चोत्तमं ॥
लावण्यं बुद्धिमेधाञ्च मतिं धर्मेऽतिशाश्वतीं ।
संपूर्णचन्द्रप्रतिमः सर्व्वसत्त्ववशंकरः ॥
नरो भवति राजेन्द्र नारी चाप्सरसां समा ।
सुभगा दर्शनीया च लावण्यगुणसंयुता ॥
बहुधान्या बहुधना बहुभूषणसंयुता ।
भर्त्तुश्चात्यन्तदयिता लोके ख्याता च सद्गुणैः ।
नित्यारोग्यवती कान्ता सर्व्वदोषविवर्जिता ॥

चन्द्रानना नीलसरोजनेत्रा
त्रैलोक्यकान्ता पतिवल्लभा च ।
भवत्यवश्यं सुभगा सुशीला
लावण्ययुक्ता यशसा श्रिया च ।

इति विष्णुधर्म्मोत्तरोक्तं रूपसत्रव्रतं ।

———ooo———

अथ नीराजनविधिः ।

राम उवाच ।

नीराजनं विधिस्तस्य श्रोतुमिच्छामि सत्तम ।
कथं कार्य्यो नरेन्द्रस्य शान्तिर्नीराजनो प्रभो ॥

पुष्कर उवाच ।

पूर्व्वोत्तरे तु दिग्भागे नगरे च मनोहरे (१)।
विस्तीर्णं कारयेद्राजन् सुमनोहरमाश्रमं ॥
कटैर्गुप्तं कुशास्तीर्णं पताकाध्वज शोभितं।
तोरणत्रितयं तच प्राङ्मुखं कारयेच्छुभं ॥
कार्य्यं षोड़शहस्तन्तु तोरणन्तु समुच्छ्रयेत्।
वैपुल्यं दशहस्तन्तु तथा कार्य्यं भृगूत्तम ॥
तोरणाद्दक्षिणे भागे तत्र कार्य्यमथाश्रमं।
देवतार्च्चा भवेत्तत्र तथाग्निहवनक्रिया ॥
अष्टहस्तायतोत्सेधमुत्तमं कान्तान्तु वामतः।
कार्य्यं भवति शुक्लाणां कूटं भृगुकुलोद्वह ॥
पञ्चरङ्गकसूत्रेण शतग्रन्थि मनोरमा।
मध्यमे तोरणे कुर्य्यात्ततपाशान्तु मध्यगां।
छादयित्वा कुशैस्तान्तु मृदा संछादयेत्पुनः॥
तस्याश्च लङ्घनं वर्ज्यं प्रयत्नात् सर्व्वजन्तुभिः।
न लङ्घिता च यावत्स्यात् प्रथमं राजहस्तिना॥
चित्रामध्यगतो यदा स्वातिं सविता प्रतिपद्यते।
ततः प्रभृतिकर्त्तव्या यावत् स्वातौ रविः स्थितः॥
आश्रमे प्रत्यहं देवाः पूजनीया द्विजोत्तम।
ब्रह्मा विष्णुश्च शम्भुश्च शक्रश्चैवानिलानलौ ॥
विनायकः कुमारश्च वरुणो धनदो यमः॥
विश्वे देवा महाभागा उच्चैःश्रवस एव च ॥

---

(१) पूर्व्वोत्तरे तु नगरे देशे तु सुमनोहरे इति पुस्तकान्तरे पाठः।

अष्टौ महागजाः पूज्यास्तेषां नामानि मे शृणु ।
कुमुदैरावणः पद्मः पुष्पदन्तोऽथ वामनः ॥
सुप्रतीकोऽञ्जनो नील एतेऽष्टौ देवयोनयः ॥
पूजा कार्य्या अश्वानां तथैव च पुरोधसा ।
ततस्तु जुहुयादग्नौ पुरोधाः सुसमाहितः ।
यथाभिहितदेवानां मन्त्रैस्तल्लिङ्गसंज्ञकैः ॥
तथा च मन्त्रहीनानां प्रणवेन महाभुज ॥
समिधः क्षीरवृक्षाणां तथासिद्धार्थकानि च ।
हुत्वा च कलशान् कुर्य्यात् मोदकान् घनसंयुतान् ॥
पूजितान्माल्यगन्धैश्च वनस्पतिविभूषितान् ।
पञ्चरङ्गकसूत्रेण कुर्य्याद्धस्त्युगन्तथा ।
भल्लातशालिसिद्धार्थवचाकुष्ठप्रियङ्गवः ॥
तोरणात् पश्चिमे भागे कलशैः पूर्व्वकल्पितैः ।
स्नातः संस्नापनीयाः स्युर्मन्त्रपूतैर्गजोत्तमाः ॥
तुरगाश्च महाभाग अलङ्कृत्य ततस्तु तान् ।
ततोऽभिषेकं नागस्य तथा तं तुरगस्य च ॥
अन्नपिण्डं ततो देयमभिमन्त्र्य पुरोधसा ।
तस्याभिनन्दने राज्ञो विजयः परिकीर्त्तितः ॥
त्यागे च तस्य विज्ञेयं महद्भयमुपस्थितं ।
निष्क्रामयेत्तोरणैस्तु ततोहि प्रथमं गजं ॥
तत्रापि प्रथमं राम अभिषिक्तं गजोत्तमं ।
तस्यादौ तुरगश्चैव राज्ञो मरणमादिशेत् ॥
दुर्भिक्षं तत्र विज्ञेयं गोचरोद्वृत्त लङ्घने ॥

लङ्घयेद्दामपादेन यदि तं नृप कुञ्जरं।
राज्ञीपुरोहितामात्यराजपुत्राहितं भवेत्॥
राज्ञस्तु मरणं ब्रूयादाक्रामेत्तं पदा यदा।
राज्ञो विजयमाचष्टे लङ्घयेद्दक्षिणेन तं॥
राजहस्तिनि निष्क्रान्ते सान्वयस्य जयो भवेत्।
निष्क्रामेयुस्ततः सर्व्वे प्राग्व्रुत्यास्तोरणैर्गजाः॥
ततोऽश्वाः सुमहाभाग ततस्तु नरसत्तम।
ततश्छत्रं ध्वजश्चैव राजलिङ्गानि यानि च॥
ततस्तु तानि संस्थाप्य पूजयेदायुधानि च।
पञ्चरङ्गकसूत्रेण यास्ताः प्रतिसराः कृताः॥
दूर्व्वादूर्व्वेति मन्त्रेण निबध्नीयात् पुरोहितः।
सर्व्वेषां नृप नागानां तुरङ्गाणाञ्च भार्गव॥
स्वगृहेष्वथ ते नेयाः कुञ्जरास्तुरगैः सह।
स्वातिस्थः सविता यावत् तावच्छालासु संस्थितान्॥
पूजयेत् सततं राम माक्रोशेन्न च ताडयेत्।
राजचिह्नानि सर्व्वाणि पूजयेदाश्रमे सदा॥
पूजयेद्वरुणं नित्यं तथा सुविधिवद्द्विजान्।
भूतेज्या च तदा कार्य्या रात्रौ बलिभिरुत्तमैः॥
आश्रमो रक्षणीयः स्यात् पुरुषैः शस्त्रपाणिभिः।
वसेतामाश्रमे नित्यं संवत्सरपुरोहितौ॥
गजवैद्यप्रधानश्च तथा नागभिषग्वरः।
दीक्षितैश्च तथा भाव्यं ब्रह्मचारिभिरेव च॥
स्वातिं त्यक्त्वा यदा सूर्य्यो विशाखां प्रतिपद्यते॥

अलङ्कुर्य्याद्दिने तस्मिन् वाहनन्तु विशेषतः।
पूजिता राजलिङ्गाश्च कर्त्तव्या नरपुङ्गवाः॥
हस्तिनस्तुरगं छत्रं खड्गञ्चापञ्च दुन्दुभिं।
ध्वजं पताकां धर्म्मज्ञ चापत्समभिमन्त्रयेत्॥
अभिमन्त्र्य ततः सर्व्वान् कुर्य्यात्कुञ्जरधूर्गतान्।
कुञ्जरोपरिगौ स्यातां संवत्सरपुरोहितौ॥
अस्त्रवैद्यप्रधानश्च तथा नागभिषग्वरः।
ततोऽभिमन्त्रितं राजा समारुह्य तुरङ्गमं॥
निष्क्रम्य तोरणैर्नागमभिमन्त्रितमारुहेत्।
तोरणेन विनिष्क्रम्य कुर्य्यात् सुरविवर्ज्जितं॥
बलिं विभज्य विधिवद्राजा कुञ्जरधूर्गतः।
रत्नैरलङ्कृतः सर्व्वैर्वीज्यमानश्च चामरैः॥
उल्मुकानान्तु निचयमद्दीपितमनन्तरं।
राजा प्रदक्षिणीकुर्य्यात् त्रीन्वारान् सुसमाहितः॥
चतुरङ्गबलोपेतः सर्व्वसैन्यसमन्वितः।
पौरैः किलिकिलाशब्दैः सर्व्ववादित्रनिस्वनैः।
वलितैश्च पदातीनां दृष्ट्वा तान् मनुजोत्तम॥
एवं कृत्वा गृहं गच्छेद्राजसैन्यपुरःसरः।
जनं संपूज्य च महत्सर्व्वमेव विसर्जयेत्॥
शान्तिर्नीराजनाख्येयं कर्त्तव्या वसुधाधिपैः।
क्षेमवृद्धिकरी राम नरकुञ्जरवाजिनां॥
धन्या यशस्या रिपुनाशनी च
सुखावहा शान्तिरनुत्तमा च।

कार्य्या नृपैराष्ट्रविवृद्धिहेतोः
सर्व्वप्रयत्नेन भृगुप्रवीर ॥

इति विष्णुधर्म्मोत्तरोक्तो नीराजनविधिः।

भीष्म उवाच।

उपवासेष्वशक्तस्य तदेव फलमिच्छतः।
अनभ्यासेन रोगाद्वा किमिष्टं व्रतमुच्यतां ॥

पुलस्त्य उवाच।

उपवासेष्वशक्तानां नक्तं भोजनमिष्यते।
यस्मिन् व्रते तदप्यत्र श्रूयतां वै व्रतं महत् ॥
आदित्यशयनं नाम यथावच्छङ्कराचनं।
येषु नक्षत्रयोगेषु पुराणज्ञा प्रचक्षते ॥
यदा हस्तेन सप्तम्यामादित्यस्य दिनं भवेत्।
सूर्य्यस्य वाथ संक्रान्तौ सा तिथिः सर्व्वकामिकी ॥
उमामहेश्वरस्यार्च्चामर्च्चयेत् सूर्य्यनामभिः।
सूर्य्यार्च्चां शिवलिङ्गञ्च उभयं पूजयेद्यतः ॥
उमापते रवेर्व्वापि न भेदः क्वचिदिष्यते।
यस्मात्तस्मान्नृपश्रेष्ठ गृहे शम्भुं समर्च्चयेत् ॥

अर्च्चा प्रतिमा। उमामहेश्वररूपन्तु प्रथमकृष्णाष्टमीव्रतोक्तं वेदितव्यं।

हस्तेन सूर्य्याय नमोऽस्तु पादा-
वर्काय चित्रासु च गुल्फदेशं।

स्वातीषु जङ्घे च सुरोत्तमाय
धात्रे विशाखासु च जानुद्वयं ॥
तथानुराधासु नमोऽस्तु पूज्य
जरुद्वयं देवसहस्रभानोः ।
ज्येष्ठाख्यनक्षत्राय नमोऽस्तु गुह्य-
मिन्द्राय सोमाय कटिश्च मूले ॥
पूर्व्वोत्तराषाढ़युगे च नाभिं
त्वष्ट्रे नमः सप्ततुरङ्गमाय ।
तीक्ष्णांशवे तु श्रवणे च वक्षः
कक्षे धनिष्ठासु विकर्त्तनाय ॥
वक्षस्थलं ध्वान्तविनाशनाय
जलाधिपर्क्षे प्रतिपूजनीयं ।

जलाधिपर्क्षं, शततारा ।

पूर्वोत्तराभाद्रपदद्वये च
बाहू नमश्चन्द्रकराय पूज्यौ ॥
साम्नामधीशाय करद्वये च
संपूजनीयं नृप रेवतीषु ।
नखानि पूज्यानि तथाऽश्विनीषु
नमोऽस्तु सप्ताश्वधुरन्धराय ॥
कठोरधाम्ने भरणीषु पृष्ठं
दिवाकरायेत्यभिपूजनीया ।
ग्रीवाग्निऋक्षेऽधरमम्बुजेषं
संपूजयेद्वारतरोहिणीषु ॥

अग्निरुद्यन्तु कृत्तिका।

मृगोत्तमाङ्के दशनाः पुरारे
संपूजनीया हरये नमस्ते।
नमः सवित्रे इति भास्करे तु
नासाक्षिपूज्याथ पुनर्व्वसौ च॥
भास्करमार्द्रो।
ललाटमम्भोरुहवल्लभाय
पुष्ये ऽलकास्वेदसमीरणाय।
सार्प्पे ऽथ मौलिं विबुधप्रियाय
मघासु कर्णाविति गोगणेशः॥

सार्प्पं अश्लेषा।

पूर्व्वासु गौराश्रमणनन्दनाय
नेत्राणि संपूज्यतमानि शम्भोः।
अथोत्तराफाल्गुनिषु भ्रुवौ च
विश्वेश्वरायेति च पूजनीयौ॥
नमोऽस्तु पाशाङ्कुशपद्मशूल
कपालसर्पेन्दुधनुर्धराय।
गजासुरानङ्गपुरान्धकारे
विनाशमूलाय नमः शिवाय॥
इत्यादि चास्त्राणि च पूज्य नित्यं
विश्वेश्वरायेति शिरोऽभिपूज्यं।
भोज्यमन्नमथैव मत्तैश्चमत्स-
ममांसमक्षारमभक्ष्यमेवं॥

इत्येवंविधनक्तानि कृत्वा दद्यात् पुनर्द्वयं ।
शालेयतण्डुलप्रस्थमुडुम्बरमये घृतं ।
उडुम्बरमये, ताम्रमये ।
संस्थाप्य पात्रे विप्राय सहिरण्यं निवेदयेत् ।
सप्तमे वस्त्रयुग्मञ्च पारणे त्वधिकं भवेत् ॥
चतुर्दशे तु संप्राप्ते पारणे भारताब्दिके ।
आब्दिके, सांवत्सरिके । सप्तविंशत्या दिवसैरेकैकम्पारणमिति-संवत्सरे अष्टादशदिनाधिके चतुर्दशपारणानि भवन्ति ।
ब्राह्मणान् भोजयेच्चक्त्या गुडक्षीरघृतादिभिः ॥
कृत्वाथ काञ्चनं पद्ममष्टपत्रं सकर्णिकं ।
शुक्लमष्टाङ्गुलं तच्च पद्मरागदलान्वितं ॥
शय्यां विलक्षणां कृत्वा विरुद्धग्रन्थिवर्जितां ।
सोपधानकविश्रामां स्वास्तीर्णां चरणाश्रयां ॥
पादुकोपानहच्छत्रचामरासनदर्पणैः ।
भूषणैरपि संयुक्तां फलवस्त्रानुलेपनैः ॥
तस्यां निधाय तत्पद्ममलंकृत्य गुणान्वितं ।
कपिलां वस्त्रसंयुक्तामतिशीलां पयस्विनीं ॥
रौप्यखुरां हेमशृङ्गीं सवत्सां कांस्यदोहनीं ।
दद्यान्मन्त्रेण पूर्व्वाह्णे वह्निनाभिविलङ्घयेत् ॥
यथैवादित्यशयनमशून्यं तव सर्व्वदा ।
कान्त्या धृत्या श्रिया रत्या तथा मे सन्तु सिद्धयः ॥
यथा न देवाः श्रेयांसि त्वदन्यमनघं विदुः ।
तथा मामुद्धराशेषदुःखसंसारसागरात् ।

ततः प्रदक्षिणीकृत्य प्रणम्य च विसर्जयेत् ॥
शय्यासनादि तत्सर्व्वं द्विजस्य भवनं नयेत् ।

इदं महापातकभिन्नराणा
मघक्षयं वेदविदो वदन्ति ।
न बन्धुपुत्रेण धनैर्वियुक्तः
पत्नीभिरानन्दकरः सुराणां ।
नाभ्येति रोगं न च दुःखशोकं
याचाप्य नारी कुरुतेऽथ भक्त्या ॥
इति पठति शृणोति वा य इत्थं
हरिशयनं पुरहूतवल्लभः स्यात् ।
अपि नरकगतान् पितृनशेषा-
नपि दिवमानयतीह यः करोति ॥

इति पद्मपुराणोक्तमादित्यशयनव्रतं ।

——oo@oo——

अश्विन्यामहोरात्रं वा दिनानि तिः त्रिंश रोगो जायते । अश्विनौ देव ते । क्षीरलड्डुकनैवेद्यं । नीलोत्पलपुष्पं । घृत-गुग्गुलुधूपः । देवस्येति पूजामन्त्रः । क्षीरवृक्षस्य समिधो होमद्रव्यं ॥ १ ॥

भरण्यां मृत्युः सन्देहो वा । दिनानि एकविंशतिः । यमो देवता । गुड़पूपाकैनैवेद्यं । कृष्णसुरभिपुष्पं । सुरभी तुलसी । गुग्गुलगुड़धूपः । त्र्यम्बकं यजामह इति पूजामन्त्रः । घृतमधु-तिलान् जुहुयात् ॥ २ ॥

कृत्तिकायां दिनानि सप्त । अग्निर्देवता । घृतौदनं नैवेद्यं । यूथिकापुष्पं । सर्पिर्धूपः । पुनन्तु मां देवजना इति पूजामन्त्रः । घृतं प्रधानद्रव्यं ॥ ३ ॥

रोहिण्यां दिनान्यष्टौ । प्रजापतिर्देवता । क्षीरौदनं नैवेद्यं । कमलपुष्पं । सरलो धूपः । नमो ब्रह्मणे नमोऽगस्त्वय इतिमन्त्रेण पूजा । सर्व्वधान्यानि जुहुयात् ॥ ४ ॥

मृगशिरसि पञ्चदिनानि । सोमो देवता । पायसनैवेद्यं । कुङ्कुमपुष्पं । दशाङ्गोधूपः । नवोनवो भवति इति पूजामन्त्रः । गव्यं पयः प्रधानद्रव्यं ॥ ५ ॥

आर्द्रायां त्रयः । रुद्रोदेवता । मौद्गालिका नैवेद्यं । वीरिकापुष्पं जीवकः धूपः । नमः शम्भवायेति पूजामन्त्रः । मध्वाज्यं प्रधानद्रव्यं ॥ ६ ॥

पुनर्वसौ दिनानि सप्त । अदितिर्देवता । गुडौदनं नैवेद्यं । मल्लिकापुष्पं । मलयजधूपं । अदितिर्द्यौरदितिरिति पूजामन्त्रः । घृततण्डुलं प्रधानद्रव्यं ॥ ७ ॥

पुष्ये दिनानि सप्त । गुरुर्देवता । खण्डमण्डका नैवेद्यं । मरीचकपुष्पं । षठिकाधूपः । बृहस्पते अतीयेति मन्त्रेण पूजा । घृतपायसम्प्रधानद्रव्यमिति ॥ ८ ॥

अश्लेषायां दिनानि दश नागादेवताः । घृतनैवेद्यं । अगस्तिपुष्पं । घृतगुडधूपः । नमोस्तु सर्प्पेभ्य इति पूजामन्त्रः । दधिघृतशालियवं प्रधानद्रव्यं ॥ ९ ॥

मघायां त्रयः सप्तैवा । दिनान्येकविंशतिः । पितरोदेवताः । घृतपुराणे नैवेद्यं । चम्पकपुष्पं । गुग्गुलधूपः । पितु-

सुस्तोममिति पूजामन्त्रः । तिलतण्डुलमधु घृतपात्राणि प्रधानद्रव्यं ॥ १० ॥

पूर्व्वफाल्गुन्यान्दिनानि पञ्चदश । भगोदेवता । कृशरानैवेद्यं । श्वेतकरवीरपुष्पं । विल्वफलधूपः । यश्चे गर्भवसतइति पूजामन्त्रः । समव्रीहयः प्रधानद्रव्यं ॥ ११ ॥

उत्तरफल्गुन्यान्दिनान्येकविंशतिः । अर्यमा देवता । रक्तशाल्योदनं नैवेद्यं । रक्तोत्पलपुष्पं । घृतगुग्गुलुधूपः । अहं रुद्रेभिर्वसुभिरिति पूजामन्त्रः । प्रियङ्गवः प्रधानद्रव्यं ॥ १२ ॥

हस्ते मृतुसन्दिष्टो । दिनानि पञ्चदश । सविता देवता अपूपनैवेद्यं । रक्तकरवीरपुष्पं । शल्लकीधूपः । उदुत्यञ्जातवेदसमिति पूजामन्त्रः । दधि प्रधानद्रव्यं ॥ १३ ॥

चित्रायां दिनानि दश । त्वष्टा देवता । मोदकानैवेद्यं जयापुष्पं । यूथिकापर्णकधूपः । चित्रं देवानामिति पूजामन्त्रः । चित्रोदनं प्रधानद्रव्यं ॥ १४ ॥

स्वात्यां मासा नयधा । वायुर्देवता । दध्योदनं नैवेद्यं । दमनकपुष्पं । कृष्णागुरुधूपः । सनः पितेव सूनव इति पूजामन्त्रः । घृतयवाश्चद्रव्यं ॥ १५ ॥

विशाखायां दिनानि पञ्चविंशतिः । इन्द्राग्नी देवते । घृणकोनैवेद्यं । तुम्बरिका पुष्पं। देवदारुधूपः । इन्द्राग्नी आगतमिति पूजामन्त्रः । दध्योदनं प्रधानद्रव्यं ॥ १६ ॥

अनुराधायां दिनानि दश । मित्रोदेवता । कृशरानैवेद्यं । पौण्डरीकपुष्पं । चन्दनसिल्हरसधूपः । देव सवितः प्रसुव यज्ञमितिमन्त्रः । सूरणकन्दं प्रधानद्रव्यं ॥ १७ ॥

ज्येष्ठायां दिनानि पञ्चदश । इन्द्रो देवता । चित्रौदननैवेद्यं । कर्पूरागुरुधूपः । पाटलिकापुष्पं । इन्द्रोमायाभिरिति पूजामन्त्रः । सूरणकन्दमूलं प्रधानद्रव्यं ॥ १८ ॥

मूले मृत्युः । राक्षसो देवता । सक्तुमांससुरापोलिकानैवेद्यं । कृष्णासोम्बरिका पुष्पं । मेषशृङ्गधूपः । ब्राह्मणाग्निसंविधान इति पूजामन्त्रः । मूलकन्दः प्रधानद्रव्यं ॥ १९ ॥

पूर्व्वाषाढ़ायां दिनानि सप्तविंशतिः । आपो देवता । मण्डको नैवेद्यं । कह्लारपुष्पं शैलजधूपः । किञ्चेदम्वरुणेति पूजामन्त्रः । रत्नशाखयः प्रधानद्रव्यं ॥ २० ॥

उत्तराषाढ़ायां दिनानि विंशतिः । विश्वे देवा देवता । विल्वपञ्चकनैवेद्यं । पञ्चवर्णपुष्पं । बालकधूपः । विश्वे देवास आगत इति पूजामन्त्रः । शङ्खकोशखण्डानि प्रधानद्रव्यं ॥ २१ ॥

श्रवणे दिनानि नव । विष्णुर्देवता । क्षीरशर्कराघृतमण्डका-नैवेद्यं । जातीपुष्पं । दशाङ्गधूपः । अतोदेवा अवन्तु न इति पूजामन्त्रः । रक्ततण्डुलाः प्रधानद्रव्यं ॥ २२ ॥

धनिष्ठायां दिनानि पञ्चदश वसवो देवता । वटवटका-नैवेद्यं । शतपत्रिका पुष्पं । घृतगुग्गुलधूपः । वायन्तामिह देवा इति पूजामन्त्रः । उडुम्बरउदकोद्भवानि प्रधानद्रव्यं (२३) ।

शतभिषायां दिनानि दश । वरुणोदेवता । घृतवटका-नैवेद्यं । उदकोद्भवानि पुष्पं । कर्पूरागुरुधूपः । इमं मेइति पूजामन्त्रः । उदकोद्भवानि पुष्पाणि प्रधानद्रव्याणि च (२४) ।

पूर्व्वभाद्रपदायां मृत्युः । अजैकपाद्देवता । दधिसर्पिषो नैवेद्यं । शतपत्रपुष्पं । सर्वौषधिधूपः । शमग्निरग्निभिः

करदिति पूजामन्त्रः। ग्राम्यं पूतिकरञ्जं कुष्माण्डखण्डानि च प्रधानद्रव्यं (२५)।

उत्तरभाद्रपदायां दिनानि पञ्चदश। अहिर्बुध्नो देवता। गुड़-पललशीतौदनं नैवेद्यं। कर्पूरपत्रिका पुष्पं। घृतनिम्बपत्र धूपः। विष्णुर्योनिं कल्पयतु इति पूजामन्त्रः। आर्द्रमेषरुधिर-दुग्धानि प्रधानद्रव्यं(२६)।

रेवत्यां दिनान्यष्टौ। पूषा देवता। तिललड्डुकपिन्याकं नैवेद्यं। मन्दारपुष्पं। गुग्गुलधूपः। हंसः शुचिषदिति पूजामन्त्रः। घृतदुग्धानि फलानि जुहुयात्॥ २७॥

यथोक्तप्रमाणेन यस्य नक्षत्रस्य यदुक्तं द्रव्यं तदष्टोत्तरशतं जुहुयात् गायत्र्या।

यथोक्तविधिरेवैषः सद्यः प्रत्ययकारकः।
नक्षत्रतर्पणं यागस्तथारोग्यं प्रयच्छति॥

पूर्व्वसमिद्भिः (१) स्तिलैः क्षीराज्येनाष्टशतं जुहुयात्। द्वादशनामानि मण्डले लिख्य पूजयेत्। मध्ये नक्षत्रदेवतां प्रतिष्ठाप्य वस्त्रयुग्मेन वेष्टितां ब्राह्मणाय दद्यात्। रोगशान्तिर्भवति।

इति गर्गोक्तो नक्षत्रहोमविधिः।

—o—

मार्कण्डेय उवाच।

यस्मिन् हि जननं यस्य जनन्मस्य तत् स्मृतं।
चतुर्थं मानसं तस्माद्दशमं कर्म्मसंज्ञितं॥

(१) सर्व्वसमिद्भिरिति पुस्तकान्तरे पाठः।

साङ्घातिकं षोडशं स्याद्विंशं समुदयं स्मृतं ।
वैनाशिकन्तु नक्षत्रं कर्मर्क्षाख्यं त्रयोदशं ॥
षड्नक्षत्रस्तु पुरुषः सर्व्वः प्रोक्तो महीपते ।
राजा च नवनक्षत्रो नक्षत्रत्रितयं शृणु ॥
नित्यमभ्यधिकं षड्भ्यः पार्थिवस्य नृपोत्तम ।
देशोऽभिषेकनक्षत्रं जातिनक्षत्रमेव च ।
जात्याश्रितानि वक्ष्यामि नक्षत्राणि तवानघ ॥
पूर्व्वात्रयमथाग्नेयं ब्राह्मणानां प्रकीर्त्तितं ।
पौष्णं मैत्रं तथा पित्रं प्राजापत्यं तथा स्मृतं ॥
आदित्यमाश्विनं हस्तं शूद्राणामभिजित्तथा ।
सार्पं विशाखा याम्यञ्च वैष्णवञ्च नराधिप ॥
प्रतिलोमोद्भवानाञ्च सर्वेषां परिकीर्त्तितं ।
इह देहार्थहानिःस्यात् जन्मर्क्षे तूपतापिते ॥
कर्मर्क्षे कर्म्मणां हानिः पीड़ा मनसि मानसे ।
मूर्त्तिद्रविणबन्धूनां हानिः साङ्घातिके हते ॥
सप्तमे सामुदयिके मित्रभृत्यार्थसंक्षयः ।
वैनाशिके विनाशः स्याद्देहद्रविणसम्पदां ।
पीड़िते चाभिषेकर्क्षे राज्यभ्रंशं विनिर्दिशेत् ॥
देशर्क्षे पीड़िते पीड़ा देशस्य च पुरस्य च ।
पीड़िते जातिनक्षत्रे राज्ञो व्याधिं विनिर्दिशेत् ॥

ग्रहर्क्षजातां समवाप्य पीड़ां
पूजा तु कार्य्या विधिना स्वकेन ।
ततः शुभं विन्दति राजसिंह

विधूतपापः पुरुषः सदैव ॥
गवाम्मूत्रे तु संगृह्य श्वेतस्य वृषभस्य तु।
श्वेतगोः पयसा सार्द्धं स्नातव्यं कुशवारिणा ॥
जन्मनक्षत्रपीड़ायां तस्मात् क्लेशादिमुच्यते।
शिरीषचन्दनाश्वत्थनागदानाम्बुभिर्नरः॥
स्नातस्तु मानसे तस्मिं तस्माद्दोषादिमुच्यते।
सिद्धार्थश्च प्रियङ्गुश्च शतपुष्पा शतावरी॥
स्नातव्यमम्भसि भिषग् कर्मर्क्षे नृप पीड़िते।
प्रियङ्गुविल्वसिद्धार्थयवाश्वत्थसुराह्वया॥
सुराह्वा, देवदारुः।
चन्दनोदकसंयुक्तं स्नानं साङ्घातिके हितं।
सर्व्वगन्धोदकैः स्नानं तथासिद्धार्थकैः शुभैः॥
पीड़िते समुदायर्क्षे पुंसां कल्मषनाशनं।
वृषशृङ्गाहृतमृदा तथा विल्वोदकैः शुभैः॥
शतपुष्पासमीपेतैः स्नानं वैनाशिके भवेत्।
पीड़िते चाभिषेकर्क्षे सर्व्वरत्नोदकैस्तथा।
पीड़िते देशनक्षत्रे मृद्भिः स्नानं विधीयते॥
मृत्तिकाश्च प्रवक्ष्यामि शृणुष्व गदतो मम।
नद्याः कूलद्वयान्मध्यात् सङ्गमात्सरसस्तटात्।
चत्वरस्थानाद्गजस्थानाद्गोस्थानाद्गिरिमस्तकात्।
शक्रस्थानात् सवल्मीकाद्राजस्थानात्सुरालयात्॥
गजशृङ्गोद्धृताच्चैव वृषशृङ्गोद्धृता तथा।
सर्व्वबीजोदकैः स्नातो जातिनक्षत्रपीड़ने।

मुच्यते किल्बिषाद्राजन् नात्र कार्य्या विचारणा॥
इदमापः प्रवहत: स्नानमन्त्रः प्रकीर्त्तितः॥

स्नातस्तथैवं नृपचन्द्रपश्चात्
स्नानम्प्रकुर्वीत यथोपदिष्टः।
पीड़ाकरस्याथ ततस्तु कार्य्यो
नक्षत्रयागो विहितो यथावत्॥
पीड़ाकरस्याथ ततस्तु कार्य्या
पूजा ग्रहेन्द्रस्य नरेन्द्रचन्द्र।
तं पूजयेद्वाप्यथ चन्द्रयुक्तं
ततः स दोषान् सकलान् जहाति।

इति विष्णुधर्म्मोत्तरोक्ता नवनक्षत्रशान्तिः।

मनुरुवाच।

यदीच्छसि शुभर्त्तारमिह जन्मन्यथापरे।
कन्या कुर्य्यान्नृपश्रेष्ठ विष्णुना कथितं व्रतं॥
सर्व्वपापहरं पुण्यं सर्व्वकामफलप्रदं।
उमामहेश्वरं नाम कर्त्तव्यं विधिना यथा॥
प्रोष्ठाश्विने तथा मासि मृगे भाग्येऽथ वा मुने।
मैत्रे शाक्रेऽथवा कार्य्यं अष्टम्याञ्चाथ शाङ्करे॥

प्रोष्ठी भाद्रपदो मासः। मृगो मृगशिरोनक्षत्रं। भाग्य पूर्व्व फाल्गुनी। मैत्रं अनुराधा। शाक्रं ज्येष्ठा। शाङ्करं आर्द्रा।

पूर्व्वेऽह्नि सपत्नीकं ब्राह्मणं शुभसङ्गतं।
एकभार्य्यं नरं यत्र सर्व्वधर्म्मव्रतान्वितं॥

आमन्त्र्य मम चोद्दिश्य प्रातः कार्य्यस्त्वनुग्रहः।
मुदान्वितस्तदा कुर्य्यात्कलिद्वन्द्वविवर्जितः॥
मधुरान्नेन भोज्यन्तु क्षीरेक्षुयवशालिभिः।
सितसूक्ष्मे तथा रक्ते शुभे देये च वाससी॥
निर्म्मले सदृशे वस्त्र देवदेवीप्रसाधके।
स्नात्वा उमेश्वरं पूज्य स्थण्डिले प्रतिमासु च॥
उमामहेश्वरप्रतिमालक्षणप्रमाणन्तु अवियोगद्ध
वेदितव्यं।
हुत्वा दिशां बलिं दत्त्वा वितानमवधारयेत्।
चतुरस्रं चतुर्द्वारं गोमयेनोपलिप्य च॥
चतुष्कं शालिगोधूमकर्णकैरुपशोभितं।
दीपमालान्वितं कृत्वा दाम्पत्यं भोजयेत्ततः॥
शङ्करोमं समाध्याय शक्राद्यं शुभचर्च्चितं।
मदचन्दनकाश्मीरकर्पूरागरुधूपितं।
जातीपुन्नागमन्दारसितपत्रैस्तु कल्पितं॥
स्थाप्य युग्मं सुसंवीतं त्रिधा कृत्वा प्रदक्षिणं।
सुखलेपेन सम्भोज्य ध्यायेत्तु तमुमेश्वरं॥
आचम्य चार्घपाद्यञ्च दद्याद्गन्धोदकं तथा।
सहिरण्यं सरत्नन्तु पुनर्दत्त्वा क्षमापयेत्॥
प्रीयतां मे उमाभर्त्ता सर्व्वदेवपतिः पतिः।
उमामन्त्रेण चैवोमामीशमन्त्रेण शङ्करं॥
पूजितः सर्व्वकामांश्च प्रयच्छत्यविचारतः।
अनेन प्राप्नुयान्नारी अवियोगं सुरेश्वर॥

इह जन्मनि सौभाग्यं धनपुत्रसुखानि च ।
मृता याति परं स्थानं शङ्करोमासमन्वितं ॥
तत्र भुक्त्वा महाभोगानिहावाप्तिर्महाकुले ।
समृद्धिरूद्धिसम्पन्नं पतिं विन्दति शोभनं ॥
लावण्यरूपसम्पन्ना भर्त्तुरिष्टा सदा भवेत् ॥
श्लाघनीया समस्तस्य विभवास्तः पुरस्य च ।
सुपुत्रा जीववत्सा च आधिव्याधिविवर्ज्जिता ॥
भुक्त्वा यथेप्सितान् कामान् द्वहत्वे पतिपूर्व्विका ।
दिवं याति नृपश्रेष्ठ शङ्करोमार्च्चिका च या ॥
नरो वानेन विधिना नारीणां जायते पतिः ।
समृद्धः सर्व्वभूतानां पतित्वमुपगच्छति ॥
शङ्करोमाव्रतं शक्रलक्ष्म्या पूर्व्वमनुष्ठितं ।
रत्या देव्या अरुन्धत्या रोहिण्या सुरसत्तम ॥
कृतमासीत् सुखार्थन्तु ताश्च भुञ्जन्ति तत्फलं ॥

इति देवीपुराणोक्तं उमामहेश्वरव्रतं ।

———ooo(a)ooo———

इन्द्र उवाच ।

कथितं शङ्करोमाख्यं व्रतं मनसि तुष्टिदं ।
श्रोतुमिच्छाम्यहन्तात विष्णुशङ्करसंज्ञितं ॥

मनुरुवाच ।

यथा उमेश्वरन्तात तथा कार्य्यमिदं व्रतं ।
किन्तु पीतानि वासांसि केशवाय प्रकल्पयेत् ॥

गन्धपुष्पं तथा धूपं सुगन्धञ्च जनार्द्दने।
कार्य्यं पूजनसम्भारे लड्डुकादिरसं दधि॥
एवन्तौ पूजयित्वा तु प्रतिमास्थण्डिलेऽपि वा।
आहूय ब्राह्मणौ वत्स वेदवेदाङ्गपारगौ॥
यती वा व्रतसम्पन्नौ जटाकाषायधारिणौ।
तौ भोजयेद्विधानेन शूलपाणिजनार्द्दनौ॥
समाप्य विधिना वत्स सर्व्वकामप्रसाधकौ।
हेमाश्च दक्षिणां विष्णोर्मौक्तिकं शङ्कराय च॥
दत्त्वानुव्रजतो लोकौ क्रमादेहक्षये ततः।
भुक्त्वा भोगांस्तथा शक्र इहायातो सुरेश्वरः॥
कुले भवति भूपानां सुखी पुत्रादिसंयुतः।
पूर्व्वभावाङ्गवेङ्गक्तिः शिवे विष्णौ च शाश्वतौ।
योगं प्राप्य परं याति यत्र तत् स्थानमव्ययं॥

इति देवीपुरानोक्तं शङ्करनारायणव्रतं।

———000(o)000———

अनेनैव विधानेन लक्ष्मीनारायणव्रतं।
ब्रह्मगायत्रिजन्तात चन्द्ररोहिणिजन्तथा।
भाववित्तानुसारेण सत्यमेव फलं लभेत्॥

इति पद्मपुराणोक्तं(१) ब्रह्मगायत्रिचन्द्ररोहिणीव्रतं।

———000———

वृषङ्गाश्च समादाय युवानौ लक्षणान्वितौ।

---

(१) देवीपुराणोक्तमिति पुस्तकान्तरे पाठः।

हेमशृङ्गैः खुरै रौप्यैः सवस्त्रैः पूजयेन्मुने ॥
शिवोमे पूजयित्वा तु तद्दिने सम्प्रयच्छति ।

शिवश्च उमा च शिवोमे ।

शिवभक्ताय विप्राय रोहिण्या वा मृगेण वा ॥
न वियोगो भवेत्तस्य सुतपत्नीपतेः क्वचित्(१) ।
विमानैर्वा समारुह्य गच्छेच्छिवपुरं द्विजः ॥
तत्र भोगांश्चिरं भुक्त्वा इह चागत्य जायते ।
समृद्धैर्धनधान्याद्यैः पुत्रमित्रसमाकुलैः ।
विगतारिर्भवेद्ब्रह्मा व्रतस्यास्य प्रभावतः ॥

इति देवीपुराणोक्तं गोयुग्मव्रतं ।

——००——

यो गां रत्नसमायुक्तां गोयुगं पूजयेन्मुने ।
प्रयच्छति शिवोमा च प्रीयतां भाविताम्मनः ॥

यो वा रत्नसमायुक्तमिति पूर्व्वव्रतेन सह विकल्पाद्वापि पूर्व्वव्रतोक्त एव कालो विज्ञायते ।

स सर्व्वपापदुःखाभ्यां विमुक्तः क्रीडते सदा ।
इह लोके भवेद्धन्यो देहान्ते परमं पदं ।'

इति देवीपुराणोक्तं गोरत्नव्रतं ।

——०——

(१) सुतपत्नपंचात् क्वचिदिति पुस्तकान्तरेपाठ. ।

मनुरुवाच।

अतः परं प्रवक्ष्यामि रूपसौभाग्यकारकं।
नक्षत्रविधिना वत्स यथा तुष्यति शङ्करी॥
मृगादारभ्य मूलेन पादौ जातिस्रजा सुरा।
पूजयेत्सोपवासस्तु नक्षत्रान्ते तु पारणं॥
यवान्नं हविषा सिक्तं ब्राह्मेर जङ्घे प्रपूजयेत्।

ब्राह्मंश रोहिणी।

कल्हारैर्भृङ्गराजैश्च तिलमाषान्नभोजनः॥
तेनैव प्रथमं विप्रानश्विन्यां जानुनी यजेत्॥
कुन्दैश्च सितपुष्पैश्च भोजनं दधि शर्करा।
आषाढ़द्वितये चारु बिल्वपत्रैश्च पूजयेत्॥
क्षीरान्नैर्भोजयेत्तत्र ब्राह्मणांस्तत्र पारणं।
गुह्यन्तु फाल्गुनीयुग्मे पारयन्त्या प्रपूजयेत्॥
पारयन्ती पुष्पविशेषः।
दधिभक्तन्तु नैवेद्यं कृत्तिकासु कटिं जयेत्।
दमनैः सितपुष्पैश्च लड्डुकैर्दधिभोजनैः।
पार्श्वे भाद्रपदायुग्मे पूजयेत् कुसुमैः सितैः॥
क्षीरान्नदधि विप्राणां नक्षत्रान्ते तु भोजनं।
पौष्णे कुक्षिद्वयं देव्याः सहकारस्रजा यजेत्॥
घृतमाषान्नभोज्यन्तु अनुराधायुगे यजेत्।
कर्णिकारैः शुभैः पीतैर्भोजनं घृतपाचितं॥
पृष्ठदेशं धनिष्ठासु हेमपुष्पैः प्रपूजयेत्।

हेमपुष्पैर्नागकेशरैः।

कर्णपत्रा च नैवेद्यं दोर्विशाखासु पूज्यते।

मधुपत्रैः सुगन्धैश्च देयं भोज्यञ्च पायसं॥

करौ करे पूजयीत उशीरतगरादिभिः।

गुड़क्षीरञ्च नैवेद्यमङ्गुलीश्च पुनर्व्वसौ॥

कुङ्कुमेनार्च्चयेद्देव्या देयं भोज्यञ्च षष्टिकं।

नखान् भुजङ्गदैवत्ये पुन्नागादिभिरर्च्चयेत्॥

भोजान्तु मौक्तिकं देयं (१) ग्रीवां ज्येष्ठासु पूजयेत्।

सितमालादिभिर्द्देव्या देयं भोज्यं घृतादिक।

रम्भापुष्पदलैः कर्णौ पूजयेद्भोजयेद्दधि॥

रम्भा कदली।

पुष्ये मुखन्तु पद्माद्यैः शर्करान्नन्तु भोजयेत्।

स्वात्यान्तु रदना देव्याः सुरक्तैः कमलैर्यजेत्॥

हंसं शतभिषर्क्षे च नागकेशरचन्दनैः।

खर्जूरशर्करा भोज्यं यजेन्नासां मघासु च॥

जयापुष्पैस्तथा भोज्यं गोधूमं घृतसंस्कृतं।

मृगे नेत्रद्वयं देव्याः सुगन्धैः कुसुमैर्यजेत्।

घृतमाषान्नभोज्यन्तु विचित्रं परिकल्पयेत्॥

चित्रां चित्रस्रजा पूज्यं ललाटं चित्रभोजनं।

भरणीषु शिरो देव्याः पञ्चकादिस्रजा यजेत्॥

चोरान्नं भोजनं देयं केशानार्द्रासु पूजयेत्।

जात्यादि कुसुमैर्द्देव्याः सर्व्वाणि च भोजयेत्॥

---

(१) भोज्यन्तु मल्लिका देया। सर्व्वौ शिवशिवो इति पुस्तकान्तर पाठः।

नक्षत्रेष्विति पूज्यार्या रूपपुत्रार्थिभिः सदा।
शम्भुर्व्वाप्यथवा विष्णुर्हैतद्धेमाश्च दक्षिणा॥
देयं वस्त्रयुगं विप्रे सपत्नीके जितेन्द्रिये।
देवीशास्त्रार्थकुशले शिवज्ञानविशारदे॥
संपूर्णचन्द्रवदना पद्मपत्रायतेक्षणा।
शोभना दशना शुभ्राः कर्णौ चापि सुमांसलौ॥
षट्पदौघनिभैः केशैर्युता कोकिलवादिनी।
ताम्रौष्ठी पद्मपत्राभा सुहस्ता स्तननामिता॥
नाभिः प्रदक्षिणावर्त्ता रम्भादण्डनिभोरुका।
सुश्रोणी तनुमध्या च सुश्लिष्टाङ्गुलिशोभना।
प्रमदा सुभगा भर्त्तुर्मनुष्योऽपि महाभुजः।
पीनस्कन्धः पृथुस्कन्धः पूर्णचन्द्रनिभाननः॥
सितदन्तो गजगामी महाबलपराक्रमः।
प्रियः सर्व्वस्य लोकस्य पद्मपत्रायतेक्षणः।
सर्व्वशास्त्रार्थवेत्ता च स्त्रीणां चेतोपहारकः।
कामतुल्यो महावीर्य्या व्रतेनानेन जायते।
अवियोगश्च इष्टानामर्थानाञ्च समागमः।
नक्षत्राख्यं महापुण्यं व्रतानामुत्तमं व्रतं।
आपत्स्वपि न भेदस्तु स्त्रिया कार्य्यं न दुष्यते।
अपि दोषात्मकैर्भावैश्च त्याज्यं मुनिसत्तम॥

इति देवीपुराणोक्तं नक्षत्रार्य्यव्रतं।

नारद उवाच ।

श्रीमदारोग्यरूपायुःसौभाग्यसर्व्वसम्पदा ।
संयुक्तस्तव विष्णोर्वा पुमान् रुद्र कथं भवेत् ॥
नारी वाविधवा सर्व्वगुणसौभाग्यसंयुता ।
क्रमान्मुक्तिपदं देव किञ्चिद्व्रतमिहोच्यतां ॥

रुद्र उवाच ।

सम्यक् पृष्टस्त्वया ब्रह्मन् सर्व्वलोकहितावहं ।
श्रुतमप्यत्र यच्छान्त्यै तद्व्रतं शृणु नारद ॥
नक्षत्रपुरुषं नाम परं नारायणार्चनं ।
पादौ हि (१) कुर्य्यादिह विष्णुनामानि कीर्त्तयेत् ॥
प्रतिमां वासुदेवस्य मूलर्चाद्यभिपूजयेत् ।
चैत्रमासं समासाद्य कृत्वा ब्राह्मणवाचनं ॥

मूले नमो विश्वधराय पादा-
वनन्तदेवाय च रोहिणीषु ।
जङ्घेऽभि पूज्ये वरदाय चैव
द्वे जानुनी वाश्विकुमारकर्क्षे ॥
पूर्व्वोत्तराषाढ़युगे च पादौ
नमः शिवायेत्यभिपूजनीयौ ।
पूर्व्वोत्तराफाल्गुनियुग्मके च
मेढ्रं नमः पञ्चशराय पूज्यं ॥
कटिं नमः शार्ङ्गधराय विष्णोः
संपूजयेन्नारद कृत्तिकासु ।

(१) पदादि कुर्य्यादिति पुस्तकान्तरे पाठः ।

तथार्चयेन्नाद्रपदाद्दये च
पार्श्वे नमः केशिनिसूदनाय।
कुक्षिद्दयं नारद रेवतीषु
दामोदरायेत्यभिपूजनीयं॥
अश्वेऽनुराधासु च माधवाय
नमस्तथोरस्थलमेव पूजां।
पृष्ठं धनिष्ठासु च पूजनीयं
मघासुविघ्नं सकराय तद्वत्॥
श्रीशङ्खचक्रासिगदाधराय
नमो विशाखासु भुजाय पूज्याः।
हस्ते तु हस्ता मधुसूदनाय
नमोऽभिपूज्या इति कैटभारेः।
पुनर्व्वसावङ्गुलिपर्व्वभागाः
साम्नामधीशाय नमोऽभिपूज्याः।
भुजङ्गनक्षत्रदिने नखानि
संपूजयेन्मत्स्यशरीरिणश्च।
कूर्म्मस्य पादौ शरणं व्रजामि
जेष्ठासु कण्ठे हरिरर्चनीयः॥
श्रोत्रे वराहाय नमोऽभिपूज्ये
जनार्द्दनस्य श्रवणे च सम्यक्॥
पुष्ये मुखन्दानवसूदनाय
नमो नृसिंहाय च पूजनीयं॥
नमो नमः कारणवामनाय
स्वातीषु दन्ताग्रमथार्चनीयं।

आस्यं हरेः कौतुकभार्गवाय
संपूजनीयं द्विज वारुणे तु ।
नामोऽस्तु रामाय मघासु नासा
संपूजनीया रघुनन्दनस्य ॥
मृगोत्तमांगे नयने च पूज्ये
नमोऽस्तु ते राम विघूर्णिताक्ष ।

मृगोत्तमाङ्गं मृगशीर्षं

बुधाय शान्ताय नमो ललाटं
चित्रासु संपूज्यतमं मुरारेः ।
शिरोऽभिपूज्यं भरणीषु विष्णो
नमोऽस्तु विश्वेश्वर कल्किरूप ॥
आर्द्रासु केशाः पुरुषोत्तमस्य
संपूजनीया हरये नमस्ते ।
उपोषिते ऋक्षदिनेषु शक्त्या
संपूजनीया द्विजपुङ्गवाः स्युः ॥
पूर्णे व्रते सर्व्वगुणान्विताय(१)
वाग्रूपशीलाय च शामगाय ।
हैमीं विशालायतबाहुदण्डां
मुक्ताफलेन्द्रोपलवज्रयुक्तां ।
गूढस्य पूर्णे कलशे निविष्टां

---

(१) शास्त्रपुरुषाय इति पुस्तकान्तरे पाठः ।

मर्चां हरेर्व्वस्त्रयुतां सहैमीं ।
शय्यां तथोपस्करभाजनादि-
युक्तां प्रदद्याद्द्विजपुङ्गवाय ॥
यद्यत् प्रियं किञ्चिदिहास्ति देयं
तत्तद्द्विजायात्महिताय सर्व्वं ।
मनोरथान्‌ः सफलीकुरुष्व
हिरण्यगर्भाच्युतरुद्ररूप ॥
स लक्ष्मीकं सभार्य्याय काञ्चनं पुरुषोत्तमं ।
शय्यां दद्याच्च मन्त्रेण शय्य भेदविवर्ज्जितां ॥
यथा न विष्णुभक्तानां वृजिनं जायते क्वचित् ।
तथा सुरूपतारम्ये केशवे भक्तिरुत्तमा ॥
यथा लक्ष्म्या न शयनं तव शून्यं जनार्द्दन ।
शय्या ममाप्यशून्यास्तु कृष्ण जन्मनि जन्मनि ॥
एवं निवेद्य तत् सर्व्वं वस्त्रमाल्यानुलेपनैः ।
नक्षत्रपुरुषज्ञाय विप्रायाथ विसर्जयेत् ॥
भुञ्जीतातैललवणं सर्व्वर्क्षेष्वप्युपोषितः ।
भोजयेच्च यथाशक्त्या वित्तशाठ्यविवर्जितः ॥
इति नक्षत्रपुरुषमुपोष्य विधिवत् स्वयं ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते ॥
ब्रह्महत्यादिकं किञ्चिदयदत्रामुत्र वा कृतं ।
आत्मना चाथ पितृभिस्तत् सर्व्वं नाशमाप्नुयात् ॥
इति पठति शृणोति वातिभक्त्या
पुरुषवरो व्रतमङ्गनाथ कुर्य्यात् ।

कलिकलुषविदारणं मुरारेः
सकलविभूतिफलदश्च पुंसः ॥

इति मत्स्यपुराणोक्तं नक्षत्रपुरुषव्रतं।

———000———

युधिष्ठिर उवाच।

उपवासेष्वशक्तस्य तदेव फलमिच्छतः ॥
अनभ्यासेन रोगाद्वा किमिष्टं व्रतमुच्यतां।
शिवस्योपरि यस्य स्याद्भक्तिः सूर्य्यस्य वा विभो।
नक्षत्राख्यं व्रतं तेन कथं कार्य्यमिहोच्यतां ॥

श्रीकृष्ण उवाच।

उपवासेष्वशक्तानां नक्तं भोजनमिष्यते।
यस्मिन् व्रते तदप्यत्र श्रूयतामक्षयं महत् ॥
शिवनक्षत्रपुरुषं शिवभक्तिमतां नृणां।
तस्मिन्नक्षत्रयोगे च पुराणज्ञाः प्रचक्षते ॥
फाल्गुनस्यामले पक्षे यदा हस्तः प्रजायते।
तदा ग्राह्यं व्रतं चैतद्भक्तेनाभ्यर्च्य शूलिनं ॥
शिवायेति च हस्तेन पादौ संपूजयेद्विभोः।
शङ्कराय नमो गुल्फौ पूज्यौ चित्रासु पाण्डव ॥
भीमाय जङ्घे स्वातीषु देवदेवस्य पूजयेत्।
ऊरुद्वयं विशाखासु त्रिनेत्राय तु पूजयेत्।
मेढ्रञ्चैवानुराधासु अनङ्गाय हरेति च ॥
सदा ज्येष्ठासु च तथा सुरज्येष्ठेति चार्च्चयेत्।

नादाख्याय नमो नाभिः पूज्या मूलेन शूलिनः ॥
आषाढ़युगले पार्श्वे पार्व्वतीपतयेति च ॥
श्रवणेन ततः कुक्षी पूज्यौ कापालिने नमः।
वक्षस्थलं धनिष्ठासु सद्योजाताय वै नमः ॥
वामेति पूजयेत्पार्श्वं हृदयं शतभिषासु च।
पूर्व्वोत्तरायुगे बाहू नमः खट्टाङ्गधारिणे ॥
पूज्यं रुद्राय च तथा रेवतीषु करद्वयं।
नखाः पूज्याश्विनीयोगे नमस्कृत्य पिनाकिने ॥
भरणीषु ततः पृष्ठं वृषाङ्काय नमोऽस्त्विति।
कृत्तिवस्त्राय वदनं कृत्तिकासु ककाटिकां ॥
वाक् पूज्या रोहिणीयोगे नमो वाचस्पतेरपि।
मृगोत्तमाङ्गे दशनान् भैरवायेति पूजयेत् ॥
आर्द्रास्वोष्ठाधरौ पूज्यौ स्थाणवेति युधिष्ठिर।
नासा पुनर्व्वसौ पूज्या पूष्णो दन्तविघातिने ॥
पुष्ये नेत्रद्वयं पूज्यं नमस्ते सर्व्वदर्शने।
अश्लेषायां ललाटन्तु त्र्यम्बकाय नमो नमः ॥
मघासु च जटाजूटं पूजयेदन्धकारये(१)।
पूर्व्वफाल्गुनीयोगे च श्रवणौ सोमधारिणे ॥

नमोऽस्तु पाशाङ्कुशशूलपद्म
कपालसर्पेन्दुधनुर्द्धराय(२)।
गजासुरानङ्गपुरान्धकादि-

(१) पूजयेदन्धकायेति पुस्तकान्तरे पाठः।
(२) सर्पेन्द्रधनुर्द्धराय इति पुस्तकान्तरे पाठः।

विश्रामसूलाय नमः शिवाय ॥
शिरः संपूजयेद्दद्यात्ततो धूपविलेपने ।
ततस्तु रात्रौ भोक्तव्यमक्षारलवणवर्जितं ॥
शालेयतण्डुलप्रस्थं घृतपात्रेण संयुतं ।
दद्यात्सर्व्वेषु नक्षेषु ब्राह्मणानां नृपोत्तम ॥
शक्त्यभावेन दोषः स्यादधिके त्वधिकं फलं ।
नक्षत्रयुगले प्राप्ते नक्षयुग्मं समाचरेत् ॥
सूतकाशौचदोषेण परैरन्यः समाचरेत् ।
एवं क्रमेण संप्राप्ते व्रतस्यैवास्य पारणे ॥
ब्राह्मणान् भोजयेद्भक्त्या गुडक्षीरघृतादिभिः ।
काञ्चनं कारयेद्देवमुमया सह शङ्करं ॥
शय्यां सुलक्षणां कृत्वा विरूढग्रन्थिवर्जितां ।
सोपधानकविश्रामां स्वास्तराभरणां शुभां ॥
भाजनोपानहच्छत्रचामरासनदर्पणैः ।
भूषणैरपि संयुक्तां फलवस्त्रानुलेपनैः ॥
सपत्नीकाय विप्राय दोहनीं हेमशृङ्गविभूषितां ।
दद्यात्पूर्व्वाह्णसमये न किञ्चिदपि लङ्घयेत ॥
मन्त्रेणानेन राजेन्द्र हृदि शम्भुं निधाय वै ।
यथा न देव शयने तव पार्व्वतिजानघ ।
शून्यं वर्त्तेत सततं तथा मे सन्तु सिद्धयः ॥
यथा न देव श्रेयांस्तु त्वद्दते विद्यते क्वचित् ।
तथा मामुद्धराशेषदुःखसंसारसागरात् ॥
ततः प्रदक्षिणीकृत्य प्रणिपत्य विसर्जयेत् ।

शयनादिकञ्च तत् सर्व्वं द्विजस्य भवनं नयेत् ॥

नैतद्विशीलाय न नास्तिकाय
कुतर्कदुष्टाय विनिन्दकाय ।
प्रकाशनीयं व्रतमिन्दुमौलेः
पश्चात्तिलेभ्योपहतान्तरात्मा ॥
भक्ताय दान्ताय गुणान्विताय
प्रदेयमेतच्छिवभक्तियुक्ते ।
इदं महापातकिनां नराणां
मघक्षयं वेदविदो वदन्ति ।
या काचिदेतत् कुरुतेऽथ भक्त्या
भर्त्तारमाश्रित्य सुभद्र कं वा ।
न बन्धुपुत्रादिधनैर्वियोग-
माप्नोति दुःखं न सपत्न्युत्थं ॥
इदं वसिष्ठेन पुरार्ज्जुनेन
कृतं कुबेरेण पुरन्दरेण ।
यत्कीर्त्तनादप्यखिलान्यघानि
विध्वंसमायान्ति न संशयोऽत्र ॥

इति विष्णुधर्म्मोत्तरोक्तं शैवनक्षत्रपुरुषव्रतं ।

———oo———

इति श्रीमहाराजाधिराजश्रीमहादेवस्य समस्तकरणाधीश्वर-
सकलविद्याविशारदश्रीहेमाद्रिविरचिते-
चतुर्व्वर्गचिन्तामणौ व्रतखण्डे
नक्षत्रव्रतानि ।

अथ चतुर्व्विंशोऽध्यायः ॥

त्यक्त्वा वैरं चिरपरिचितं मित्रभावं प्रपन्ने
वाणी लक्ष्मीः किल विलसतो यस्य गेहेऽनुरागात् ॥
येनापूर्व्वं प्रकटितमिदं वैभवं पुण्यभाजाम् ।
सोऽयं योगव्रतसमुदयं वक्ति हेमाद्रिरस्मिन् ॥

अथ योगव्रतानि ।

कृष्ण उवाच ।

विष्कुम्भादिषु योगेषु भवेदेकाशनी नरः ।
यो ददाति क्रमात्पार्थ घृततैलपलैश्चयं ॥
यवगोधूमचणकं निष्पावाञ्छालितण्डुलान् ।
लवणं दधिदुग्धञ्च वस्त्रं कनकमेव च ॥
कम्बलं गोरूपं छत्रमुपानद्युगलन्तथा ।
कर्पूरं कुङ्कुमञ्चैव चन्दनं कुसुमानि च ॥
लोहं ताम्रञ्च कांस्यञ्च रौप्यञ्चेति युधिष्ठिर ।
स्नातः स्वशक्त्या विधिवत् सर्व्वपापैः प्रमुच्यते ।
न वियोगमवाप्नोति योगव्रतमिदं स्मृतं ॥

इति भविष्योत्तरोक्तं योगव्रतं ।

भरद्वाज उवाच।

यस्त्वयोक्तो व्यतीपातः कीदृशः स स्वरूपतः।
कस्य पुत्रः कथं पूज्यः पूजिते तत्र किं फलं॥

वराह उवाच।

यदा बृहस्पतेर्भार्य्यां ताराञ्चयाज यौतगुः।
मित्रत्वात् प्राह तं सूर्य्यस्त्यज भार्य्यां बृहस्पतेः॥
चक्रे चन्द्रो न तद्वाक्यं हितं शिष्योऽपि तं यदा।
रुष्टस्तदा किलादित्यो दीप्तदृष्ट्या तदैक्षत॥
तावत् सोमोऽपि रुष्टोऽस्य ततोऽन्योऽन्यमवेक्षतां।
उभयोर्दृष्टिसम्पाते क्रुद्धयोः सोमसूर्य्ययोः।
उत्पतास्यो भवेद्घोरः पुरुषः पिङ्गलेक्षणः॥
दृष्टोष्ठदीर्घदशनो भ्रुकुटीकुटिलाननः।
कपिलश्मश्रुकेशान्तो लम्बभ्रूः कृशोदरः॥
करालो दीर्घजिह्वश्च सूर्य्याग्नियमसन्निभः।
सक्षोत्तुकामस्त्रैलोक्यं रवीन्दुभ्यां निवारितः।
क्रोधचक्षुषी मां बाधेते पाल्ये वै कुत्र ते मया॥

सूर्य्यसोमावूचतुः।

कोपदृष्ट्या नौ विविधादृतिपातात्त्वमभूत्।
व्यतीपातस्ततो नाम भवान्भुवि भविष्यति॥
यस्मिन्काले त्वदुत्पत्तिस्तदा कल्याणकारिणः।
व्यतीपाताय भद्रन्ते त्वयि यः पापकारकः॥
तदन्नं क्षुधितो भुङ्क्ष्व तव कोपो निपात्यतां।
व्यतीपातस्ततो नाम भवान् भुवि भविष्यति॥

व्यतीपात उवाच ।

नमो वां पितरौ मेऽस्तु कीटपातः सभोजनः ।
दत्तो भवद्भ्यामधुना प्रसादः क्रियते क्षमा ॥

रवीन्दू ऊचतुः ।

स्नानदानजपहोमपूर्वकं
यस्त्वदीयसमये समाचरेत् ।
तस्य पुण्यमिह ते प्रसादतो-
ऽनन्तमस्तु सुतगोरनुग्रहात् ॥
तत्काले तव विदधाति पूजनं
यस्तस्येष्टं भवतु भवेत्प्रभद्रभूयः ।
पुत्रायुर्धनसुखकीर्त्तिपुष्टि-
रूपारोग्याद्यतुलितजनवल्लभत्वपूर्वं ॥

वराह उवाच ।

एतस्मात्कारणाद्भूमे व्यतीपातोऽर्चितो नरैः ।
अर्चिते च फलं तस्य तदुक्तं समाहितैः ॥
विस्तरेणार्चितफलं गदितुं केन शक्यते ।
येनार्च्यते व्यतीपातः स विधिः श्रूयतामिति ॥
शुभे व्यतीपातदिने विगाहयेत्
स पञ्चगव्येन महानदीजलं ।
उपावसेद्वै पवमानजापको
जपेत्तु शक्तो व्यतिपात ते नमः ॥
छादिते ताम्रपात्रे च शर्करापूरिते घटे ।

काञ्चनाञ्चे प्रतिष्ठाप्य हैममष्टभुजम्बरं ॥

अष्टभुजं अष्टादशभुजं। उत्पत्तिवाक्ये व्यतीपातमूर्त्तेरष्टादशभुजत्वात्। उत्पत्तिवाक्यानुसारत्वाच्च विनियोगवाक्यस्य य भगवद्गीतासु चत्वारो मनवस्तथेति चत्वारश्चतुर्द्दश।

गन्धपुष्पाक्षतैर्धूपदीपवस्त्रनिवेदनैः।
भक्ष्यैर्भोज्यैः फलैश्चित्रैर्मासि मार्गशिरेऽर्च्चयेत्॥
नमस्तेऽस्तु व्यतीपात सूर्य्यसोमसुत प्रभो।
यद्दानादिकृतं किञ्चित्तदनन्तमिहास्तु मे॥
इत्युक्त्वा पञ्च रत्नाढ्यं सपुष्पाक्षतमञ्जलिं।
प्रक्षिप्य तत्क्षणादेव सर्व्वपापक्षयो भवेत्॥
यदि द्वितीयेऽपि दिने व्यतीपातो भवेत्क्वचित्।
तदा पूर्व्वोपवासस्तु दद्यात्तत् सकलं गुरोः॥
पारणं व्यतिपातान्ते कुर्य्यात् संप्राश्य गोमयं।
अन्ये कस्मिंश्चिद् दिने व्यतीपातो भवेद्यदि।
तच्चैवाह्नि तदा दत्त्वा उपवासं समाचरेत्॥
कुर्य्यादेवं मासि मासि व्यतीपातस्य पूजनम्।
व्यतीपाते तु संप्राप्ते कुर्य्यादुद्यापनं बुधः॥
व्यतीपाताय स्वाहेति चीरद्रव्यसमन्वितं।
आज्यक्षीरतिलानाञ्च होतव्यं वै शतं शतं॥

शर्कराघटपूर्णेन सवस्त्रोपस्करैर्युतां।
प्रतिमां काञ्चनीं कृत्वा प्रदद्याद्व्रतदेशिने।
वन्देव्यतीपातमहं महान्तं
रवीन्दुसूनुं सकलेष्टकर्म्म।

समस्तपापस्य मम क्षयोऽस्तु
पुण्यस्य चानन्तफलं ममास्तु॥
इति समीक्ष्य गुरुः परिपूज्यते
कटक-कुण्डल काञ्चन-भूषणैः।
सकलमेव समाप्य यथोदित-
मुपलभ्यमिष्टान्नुते महीं।
गां वै पयस्विनीं दद्यात्सुवर्णोत्तमदक्षिणां।
तस्मै शय्यां समासाद्य सारदारुमयीं दृढां॥
हंसपत्रवितानाभ्यां हेमपट्टैरलङ्कृतां।
हंसतूलीप्रतिच्छन्नां शुभगण्डोपधानकां॥
प्रच्छादनपटीयुक्तां धूपगन्धादिवासितां।
ताम्बूलकुङ्कुमक्षोदकर्पूरागुरुसुन्दरां।
दीपिकोपानहच्छत्रां प्रदद्याच्चामरासनां।
देहान्ते सूर्य्यलोकाय विमाने रत्नसप्रभैः॥
अप्सरोगणसङ्घाग्रैर्गीतनृत्यविलासिभिः।
गत्वा कल्पार्बुदशतं मोदते चिदशार्चितः॥
तदन्ते राजराजः स्याद्रूपसौभाग्यभाग्भवेत्।
कीर्त्याढ्यो गुणपुत्रायुरारोग्यधनधान्यवान्।
प्रतापश्री महैश्वर्य्ययुक्तभावी बहुश्रुतः॥
जनसौभाग्यसम्पन्नो यावज्जन्मायुतायुतं।
दर्शे शतगुणं दानं तच्छतघ्नं दिनक्षये।
शतघ्नं तच्च संक्रान्तौ शतघ्नं विषुवे ततः।
युगादौ तच्छतगुणं अयने तच्छताहतं॥

सोमग्रहे तच्छतघ्नं तच्छतघ्नं रविग्रहे॥
असंख्येयं व्यतीपाते दानं वेदविदो विदुः।
उत्पत्तौ तल्लक्षगुणं कोटिगुणं भ्रमणनाडिकायां।
अर्बुदगुणितं पतने अपदानाद्यक्षयं पतिते॥
अष्टाविंशतिनाड्यो भ्रमणाख्ये कविंशतिः।
व्यतीपातस्य पतनं दशसप्तमितं विदुः॥

समर्पितं यद्व्यतिपातकाले
पुनः पुनस्तद्विगीतरश्मौ।
प्रयच्छतः कल्पशतार्बुदानि
विवर्द्धमानं नहि क्षीयते तत्॥

तस्मान्नहि त्वं व्यतिपातपूजां
कुरुष्व चेत् पुण्यमनन्तमिष्टं।
यदि स्थिरत्वं सततन्नवेष्ट
समस्तधारित्वमभीप्सितञ्च॥

गणयित्वा व्यतीपातकालं वा वेत्ति यो नरः।
सर्व्वपापहरौ तस्य भवतो भानुभेश्वरौ
पठति लिखति यः शृणोति वै
तत्कथयति पश्यति कारयत्यवश्यं।
रविशशिदिवमाप सोपि
दिवैश्वरसमयं परिपूज्यमान आस्ते॥

इति वराह पुराणोक्तं व्यतीपातव्रतं।

———ooo———

युधिष्ठिर उवाच।

येन व्रतेन चीर्णेन नपश्येयमशासनं।
परिपृच्छाम्यहं ब्रह्मन् पापघ्नं व्रतमुत्तमं॥
तद्व्रतं ब्रूहि विप्रर्षे कृत्वा जगति वै कृपां।

मार्कण्डेय उवाच।

शृणु राजन् व्रतमिदं हर्य्यश्वेन पुरातनं।
तेनैव राज्ञा तद्दत्तं शूकराय च दुःखिने॥
एकदा तु मृगयित्वा स हर्य्यश्वो राजसत्तमः।
अत्यचरन् भवे राजन् दृष्ट्वा तत्रैव शूकरं॥
दग्धपादकटिश्चैव दग्धग्रीवमुखोदरं॥
दृष्ट्वा तथा विधन्तन्तु कृपाश्रुको दयापरः।
केन कर्म्मविपाकेन अवस्थां प्राप्तवानयं।
अहोकष्टमहोकष्टं सूकरोपापभुज्यते।
अवश्यमनुसत्तव्यं कृतं कर्म्म शुभाशुभं॥
इत्युक्त्वा तत् स्वरूपेण राजा तं प्राह शूकरं।
इयती किमवस्था वै तन्मम ब्रूहि शूकर॥
तच्छ्रुत्वा नृपतेर्वाक्यं निःश्वसन् शूकरो मुहुः।
स्मृत्वा पराकृतं कर्म्म प्रत्युवाचाथ तं नृपं॥

शूकर उवाच।

शृणु राजन्नहं पूर्व्वं वैश्यो विश्वमनाभवः।
आशाकारी न दाताहमाश्रितेभ्यश्च किञ्चन॥
श्रुताश्च बहवो धर्म्माः पुराणश्रुतिमोदिताः।

तथापि पापबुद्ध्याहं न करोम्यात्मनो हितं ॥
आशापाशमनुप्राप्ता अन्याशास्ते विनिर्गताः।
कृतवान् पापमेवाहं न किञ्चित्सुकृतं कृतं ॥
एकदा तु द्विजः कश्चिद्व्यतीपाते गृहं मम।
आगतो याचते माञ्च न किञ्चिद्दत्तवानहं ॥
ततश्च कुपितो विप्रो मम शापमथाददत्।
आशाग्निर्दहते यद्वत्ममाङ्गानि पृथक् पृथक् ॥
तथैव तु तवाङ्गानि दावाग्निः पुरुषाधम।
अरण्ये निर्जने देशे निर्जले द्रुमवर्जिते ॥
तत्र शूकरयोनौ त्वं प्रसूतिं समवाप्नुहि।
प्रसादितो मया विप्रः पुनरप्युक्तवांस्तदा।
आनिलं शूकरत्वेऽपि इत्युक्त्वाथ जगाम सः ॥
तेन शापेन राजेन्द्र शूकरत्वमवाप्नुयात्।
अहं दुःखी च सञ्जातो निर्जने निर्जले वने ॥

राजोवाच।

केन त्वं मुच्यते पापात् ममाचक्ष्व शूकर।
येन शक्यो मया कर्तुं तव शापस्य संक्षयः ॥

वराह उवाच।

श्रूयतां मम राजेन्द्र मुक्तिः स्याद्येन कर्मणा।
व्यतीपातव्रतं नाम कृतं राजंस्त्वया पुरा ॥
यथा माता सुतस्येह सर्व्वस्य हितकारिणी।
तथा व्रतमिदं राजन्निह लोके परत्र च।

यथैवाभ्युदितः सूर्य्यो ध्वमेव च तमो दहेत्॥
इदं व्रतं तथैवेह सर्व्वपापं व्यपोहति॥
सकृत् स्मृतो यथा विष्णुर्द्दद्यात् परमनिर्वृतिं।
ददात्येव न सन्देहस्तथा व्रतमिदं शुभं॥
शतमिन्दुक्षये दानं सहस्रन्तु दिनक्षये।
विषुवे शतसाहस्रं व्यतीपाते त्वनन्तकं॥
व्यतीपातव्रतस्यास्य विधानं शृणु तत्त्वतः।
माघे वा फाल्गुने वापि अन्यस्मिन्मासि वा भवेत्॥
व्यतीपाते दिने यस्मिन् प्रारभेद्व्रतमुत्तमं।
तिलैः पूर्णं शरावञ्च सगुडं गुरवेऽर्पयेत्॥
एवं द्वितीये दातव्यं तृतीये तु समापयेत्।
सघृतं पायसञ्चैव दातव्यं वोत्तरोत्तरं॥
एवं संवत्सरस्यान्ते देवस्यार्चान्तु कारयेत्।
शङ्खचक्रगदापाणिं पद्महस्तं हिरण्मयं॥
वस्त्रयुग्मेन संवेष्ट्य पूजयेद्गरुड़ध्वजं।
गोक्षीरेण च संपूर्णं कांस्यभाजनमुत्तमं॥
स्थापयेद्देवदेवस्य स्थानन्तत्रैव कल्पयेत्।
शय्या च सन्निधौ तस्य स्थाप्या देवमनुस्मरन्॥
अनन्तशायिनं देवमनन्तफलदं शुभं।
लक्ष्म्या सहान्वितं विष्णुं भक्त्या संपूजयेद्व्रती॥
वैदिकेनैव मन्त्रेण जातीपुष्पैः समर्चयेत्।
पायसेनैव नैवेद्यं शर्करासंयुतेन च॥
दत्त्वा निवेद्य देवस्य प्रार्थनं प्रार्थयेद्व्रती।

व्यतीपातव्रतं देव त्वयानन्त समर्पितं ॥
भवत्वनन्तफलदं मम जन्मनि जन्मनि।
देवदेवं हृषीकेशं प्रार्थयित्वा ततो व्रती ॥
तत्सर्व्वं गुरवे दद्याच्छ्रोत्रियाय कुटुम्बिने।
व्रतोपदेष्ट्रे विप्राय ब्राह्मणाय विशेषतः ॥
भूमिर्वाथ सुवर्णं वा दक्षिणा तु विधीयते।
ब्राह्मणान् भोजयित्वा तु व्रतमेतत् समापयेत् ॥
इदं व्रतं त्वया देव गृहीतं पूर्व्वजन्मनि।
स्वर्गापवर्गदं नृणामनन्तफलदं शुभं ॥
सुचेष्टं किल्विषाद्दस्मात्शूकरत्वान्न संशयः।
तेनैव मुक्तो हर्य्यश्वः शूकर वाक्यमब्रवीत् ॥
मया कृतमिदं सर्व्वं तत्फलन्ते ददाम्यहं।
एवमुक्त्वा नृपश्रेष्ठः शूकराय फलं ददौ ॥
तत्क्षणात्तेन पुण्येन शूकरो मुक्तकिल्विषः।
मुक्तः शूकरदेहाच्च सर्व्वाभरणभूषितः ॥
दिव्यं विमानमारुह्य वाक्यमेतदुवाच ह ॥
हे जनाः किन्नजानीध्वं व्यतीपातव्रतोत्तमं ॥
इहैव सुखदं नृणां परत्र च पराङ्गतिं।
दृष्ट्वा मां पापनिर्मुक्तं व्रतस्यास्य प्रभावतः।
विश्वासः क्रियतामस्मिन् व्यतीपातव्रतोत्तमे ॥
इत्युक्त्वा स्वर्गतः सोऽथ राज्ञो वै पश्यतस्तदा।
तं दृष्ट्वा विस्मितो भूत्वा राजापि गृह्ये व्रतं।
ततो राजा पुरस्कृत्वा व्रतं चाकारयज्जनान्।

सर्व्वं च कृतवांस्तत्र व्यतीपातव्रतं शुभं ॥
ततो राज्यं चिरं कृत्वा देवदेवस्य चक्रिणः ॥
दृर्य्यश्वः प्राप्तवांस्तेन विष्णोस्तत्परमं पदं ।
अतस्त्वं कुरु राजेन्द्र व्यतीपातव्रतोत्तमं ॥
सर्व्वपापक्षयकरं नृणामिह सुखप्रदं ॥
इदं यः कुरुते मर्त्त्यः श्रद्धाभावसमन्वितः ।
सर्व्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥
यया तु पुत्रकामिन्या कृतं सा लभते सुतान् ।
स्त्रीकामिनेह तद्वच्च लभेन्नारीमनुत्तमां ॥
व्यतीपातव्रतमिदं व्यतीपातदिने यजेत् ।
ज्ञानवान् धनवान् श्रीमान् इहैव स सुखी भवेत् ।
य इदं शृणुयाद्भक्त्या विष्णुलोके महीयते ॥

इति नारदीयपुराणोक्तं व्यतीपातव्रतं ।

इति श्रीमहाराजाधिराजश्रीमहादेवस्य समस्तकरणा
धीश्वरसकलविद्याविशारदश्रीहेमाद्रिविर-
चिते चतुर्व्वर्गचिन्तामणौ व्रत-
खण्डे योगव्रतानि ।

अथ पञ्चविंशोऽध्यायः।

———000———

अथ करणव्रतानि।

येनेदं निजगौरवेण दूरा-
दुत्कर्षं जगदपि नीयते स एषः।
आचष्टे निखिलमनीषितार्थसिद्ध्यै
हेमाद्रिः करणगणव्रतानि॥

सनत्कुमार उवाच।

शृणु राजन् प्रवक्ष्यामि करणव्रतमुत्तमं।
ववाख्यं बालवञ्चैव कौलवन्तैतिलङ्करं।
वणिजं विष्टिरित्याहुः करणानि पुराविदः॥
माघमासे तु सम्प्राप्ते शुक्लपक्षे यदा भवेत्।
ववाभिधानकरणमुपवासस्तदा भवेत्॥
पूजयेच्चाच्युतं देवं गन्धमाल्यविलेपनैः।
सौवर्णी प्रतिमा कार्य्या विष्णोः कर्षमिता शुभा॥
जपेदहर्निशं तत्र मन्त्रमष्टाक्षरं बुधः।
कलशञ्च समानीय ताम्रपात्रं तथोपरि॥
विन्यस्य पूजयेद्देवं सुवर्णकमलेन च।
वितानं चामरं घण्टां देवाय प्रतिपादयेत्॥

एवं सप्त विधेयानि बवाख्यान्यथ सप्तमि।
बवे तु करणे प्राप्ते पूर्व्वं पूर्व्वं समाचरेत्॥
ब्राह्मणान् भोजयेत्तत्र सप्तसंख्यान् सदक्षिणं।
अथैवं बालवादीनि विष्टान्तानि यथा क्रमं॥
उषित्वा सप्त सप्तैव पूर्व्वोक्तविधिना नृप।
समापयेद्व्रतं भूरिगोभूहेमादिदानतः॥
एवं कृते व्रते राजन् राजसूयाश्वमेधयोः।
समस्तं फलमाप्नोति सुखं कीर्त्तिं महच्छ्रियं।

इति ब्रह्माण्डपुराणोक्तं करणव्रतं।

युधिष्ठिर उवाच।

कृष्ण केयं जनैः सर्व्वैर्विष्टिभद्रेति चोच्यते।
कस्मात्तज्जेयं का ज्येष्ठा कथं वा पूज्यते नरैः॥

श्रीकृष्ण उवाच।

सुता मार्त्तण्डदेवस्य छायया जनिता पुरा।
शनैश्चरस्य भगिनी सौदर्य्यातिभयङ्करा॥
सा जातमात्रा भुवनं ग्रस्तुं समुपचक्रमे॥
निर्य्याति यदि कार्य्येण कश्चित्तस्य पुरःस्थिता।
विघ्नं करोति स्वपतो भुञ्जानस्य स्थितस्य च।
यज्ञविघ्नकरी रौद्री समाजोत्सवनाशिनी॥
नित्योद्वेगकरी पार्थ विनाशयति सा जगत्।
तान्तु दुर्व्विनयां कस्मै यच्छाम्येनां सुमध्यमां

कन्यादुर्व्विनयाद्विष्टे पिता दोषेण गृह्यते।
तस्मात्सर्व्वप्रयत्नेन कन्या देया विजानता॥
चिन्त्यैवमग्रभां भद्रां यस्य यस्य प्रयच्छति।
तं तमेव क्षयेनैव सुरराक्षसकिन्नराः।
मण्डपं मण्डपारम्भे विनाशयन्ति तत्क्षणात्।
विवस्वान् चिन्तयामास कस्येयं प्रतिपाद्यते॥
विरूपा दुष्टहृदया गर्द्दभास्या त्रिपादिका॥
ऊर्द्ध्वरोममहादंष्ट्री स्वेच्छाचारविहारिणी।
दत्ता येषामसौख्याय भवतीह कथञ्चन॥
एवं वितर्कयन् देव आस्ते यावद्दिवस्पतिः।
तावत्तया जगत्सर्व्वं दुष्टया समभिद्रुतं॥
अथाजगाम सवितुः पार्श्वं ब्रह्माण्डसम्भवः।
उपालभ्य ददौ चास्य विष्टेर्द्दौष्ट्यमशेषतः।
भास्करस्तमुवाचेदं स्वयम्भुम्भुवनेश्वरं॥
भवान् कर्त्ता च हर्त्ता च कस्मादेवं प्रभाषसे।
एवमुक्तस्तदा ब्रह्मा भास्करेणामितद्युतिः॥
तदोवाच विष्टिमार्य्ये शृणु भद्रे मयोदितं।
करणैः सह वर्त्तस्व ववबालवकौलवैः॥
सप्तमेऽर्द्धदिने प्राप्ते यदभीष्टं कुरुष्व तत्।
यात्राप्रवेशमाङ्गल्यकृषिवाणिज्यकारकान्॥
भक्षयस्वाभिमुखगान् नरानुन्मार्गगामिनः।
नोद्विजन्तीयो हि जनो सजल्या दिवसत्रयं॥
पूज्या सुरासुराणां त्वं दिवसार्द्धं भविष्यसि।

उल्लङ्घ्य ये प्रवर्त्तन्ते भद्रे त्वां निर्भया नराः ।
तेषां विनाशय शुभं कार्य्यमार्य्ये सुनिश्चितं ॥
एवमेषा समुत्पन्ना विष्टिर्विष्टिविनाशनी ।
निवेदितेति कौन्तेय तस्मात्तां परिवर्ज्जय ॥
सिंहग्रीव सप्तभुजा त्रिपादा पुच्छसंयुता ।
खरोत्तमाङ्गवदना प्रेतरूढ़ा कृशोदरी ॥
ज्वलच्चक्षुश्च दधती हस्ते पाशासिशक्तयः ।
नरमुण्डाश्च मालाश्च मुद्रा सप्तविधा स्मृता ॥
सजलजलदवर्णा दीर्घनासोग्रदंष्ट्रा
विपुलहनुकपोला पिङ्गकोदग्रजङ्घा ।
धनलयतसहस्रं चोद्गिरन्ती समन्तात्
पतति भुवनमध्ये कार्य्यनाशाय विष्टिः ॥

भानोः सुता किन्तु शनाग्रजाता
कृष्णा कुमूर्त्तिः सततं कुचेला ।
देवैर्नियुक्ता करणान्तसंस्था
विष्टिस्तु सर्व्वत्र विवर्जनीया ॥

मुखे तु घटिकाः पञ्च द्वे तु कण्ठे सदा स्थिते ।
हृदि चैकादश प्रोक्ताश्चतस्रो नाभिमण्डले ।
पञ्च कट्यान्तु विज्ञेयास्तिस्रः पुच्छे जयावहाः ॥
मुखे कार्य्यविनाशाय ग्रीवायां धननाशनी ।
हृदि प्राणहरा ज्ञेया नाभ्यान्तु कलहावहा ।
कट्यामर्थपरिभ्रंशो विष्टिपुच्छे ध्रुवञ्जयः ॥
पृथिव्यां यानि कार्य्याणि मङ्गलानि शुभानि च ॥

तानि सर्व्वाणि सिध्यन्ति विष्टिपुच्छे नृपोत्तम।
जलानलेन्दुक्रूरेश याम्यवातेन्द्रदिक्‌क्रमात्॥
संख्यासमानैः प्रहरैर्विष्टि दुष्टामुखे यतः।
कराली नन्दिनी रौद्री सुमुखी दुर्मुखी तथा॥
त्रिशिरा वैष्णवी हंसी ह्यष्ट चैतास्तु विष्टयः।
धन्या दधिमुखी भद्रा महामारी खराननाः॥
कालरात्रिर्महारौद्री विष्टिश्च कुलपुत्रिका।
भैरवी च महाकाली असुराणां क्षयङ्करी॥
द्वादशैतानि नामानि प्रातरुत्थाय यः पठेत्।
न च व्याधिभयन्तस्य रोगी रोगात् प्रमुच्यते॥
ग्रहाः सर्व्वेऽनुकूलाः स्युर्न च विघ्नादि जायते।
रणे राजकुले द्यूते सर्व्वत्र विजयी भवेत्॥
यश्च पूजयते नित्यं शास्त्रोक्तविधिना नरः।
तस्य सर्व्वार्थसिद्धिस्तु जायते नात्र संशयः॥
एतद्भद्राव्रतं पूर्व्वमेतत्ते कथितं मया।
एवमेषा समुत्पन्ना विष्टिरिष्टविनाशनी।
तस्मात्तरेण कौन्तेय वर्ज्जनीया फलार्थिना॥
येनोपवासविधिना व्रतेन च युधिष्ठिर।
पूजिता तोषमायाति तदेव कथयामि ते॥
यस्मिन् दिने भवेद्भद्रा तस्मिन्नहनि भारत।
उपवासस्य नियमं कुर्य्यान्नारी नरोऽथ वा॥
यदि रात्रौ भवेद्विष्टिरेकभक्तं दिनद्वयं।
कार्य्यस्त्वेकोपवासः स्यादिति पौराणिको विधिः॥

प्रहरस्योपरि यदा स्याद्विष्टिः प्रहरत्रयं।
उपवासस्तथा कार्य्य एकभक्तमतोऽन्यथा॥
सर्व्वौषधिजलस्नानं सुगन्धामलकैरथ।
नद्यान्तडागेऽथ गृहे स्नानं सर्व्वत्र शस्यते॥
देवान् पितॄन् समभ्यर्च्य ततो दर्भमयीं शुभां।
विष्टिं कृत्वा पुष्पधूपैर्नैवेद्यादिभिरर्चयेत्॥
होमन्तु नामभिर्विष्टेः शतमष्टोत्तरं नृप।
भुञ्जीत दत्त्वा विप्राय तिलान् पायसमेव च।
सतैलं कृशरं भुक्त्वा पश्चाद्भुञ्जीत कामतः॥
छायासूर्य्यसुते देवि विष्टिरिष्टार्थनाशनि।
पूजितासि यथाशक्त्या भद्रे भद्रप्रदा भव॥
उपोष्य विधिनानेन दश सप्त यथाक्रमात्।
उद्यापनं ततः कुर्य्यात् पूर्व्ववत् पूज्य भामिनीं॥
स्नापयित्वायसे पीठे कृशरान्नं निवेद्य च।
परिधाय कृष्णवस्त्रयुगं मन्त्रेण तं पुनः॥
ब्राह्मणाय पुनर्द्द्याल्लौहतैलांस्तिलांस्तथा।
कृष्णां सवत्सां गामेकान्तथैव कृष्णकम्बलं।
दक्षिणाञ्च यथा शक्त्या दत्त्वा भद्रां विसर्जयेत्।
य एवं कुरुते पार्थ सम्यग्भद्राव्रतं नरः।
विघ्नं न जायते तस्य कार्य्यारम्भे कथञ्चन॥
राक्षसा वा पिशाचा वा पूतना शाकिनी ग्रहाः।
न पीडयन्ति तं मर्त्त्यं यो भद्राव्रतमाचरेत्॥
न चैवेष्टवियोगः स्याद्धनहानिस्तस्य जायते।

देहान्ते याति सदनं भास्करस्य न संशयः।
सूर्य्यात्मजातिभयदाभगिनी शनेर्या
मर्त्त्यं भ्रमत्यविरतं करणक्रमेण।
तां कृष्णभासुरमुखीं समुपोष्य विष्टि-
मिष्टार्थसिद्धिमनिशञ्च पुमानुपैति॥

इति भविष्योत्तरोक्तं विष्टिव्रतं।

———ooo———

कृष्ण उवाच।

तथान्यदपि ते वच्मि विष्टिव्रतमनुत्तमं।
यत्कृत्वा विष्टितो न स्याद्भयं क्वापि युधिष्ठिर॥
सुकरं सुगुणं श्रेष्ठं सर्व्वकामार्थदं नृणां।
परं प्रीतिकरं भानोः सर्व्वविघ्नोपशान्तिदं॥
मार्गशीर्षामले पक्षे चतुर्थ्यामारभेद्बुधः।
संपूज्य ब्राह्मणश्रेष्ठं विद्यादौ भरतर्षभ॥
प्रागुक्तां पूज्य तां देवीं मन्त्रमेतमुदीरयेत्।
भद्रे भद्राय भद्रं हि चरिष्ये व्रतमेव ते॥
निर्विघ्नां कुरु मे देवि कार्य्यसिद्धिञ्च भावय।
सुस्नातः पूज्यतामेवं ब्राह्मणं च स्वशक्तितः।
ततो भुञ्जीत राजेन्द्र यावद्भद्रा न जायते॥
अथ वान्तेऽपि भद्रायाः कामतो वाग्यतः शुचिः।
न किञ्चिद्भक्षयेत्प्राज्ञो यावद्भद्रा प्रवर्त्तते।
अनेन विधिना पार्थ प्रतिभद्रां समाचरेत्

नरो वा यदि वा नारी सर्व्वकामार्थसिद्धये ॥
ततः संवत्सरे पूर्णे प्रतिमाङ्कारयेद्बुधः ।
लौहीं शैलमयीं वापि दारुजां वा स्वशक्तितः ॥
शक्त्या चोद्यापनं कृत्वा स्थापयित्वा यथाविधि ।
पूजयेच्छक्तिमान्विप्रो मन्त्रैरेभिरुदारधीः ॥
पूजितासि यथा पूर्व्वमिन्द्रेण धनदेन च ।
विष्णुना शङ्करेणाथ तथाऽस्माः पूजयाम्यहं ॥
निर्व्विघ्नेनार्थसंसिद्धिर्यथा तेषां कृता त्वया ।
तथा ममापि भक्ताय भद्रे भद्रप्रदा भव ॥
अज्ञानादथवा दर्पात्त्वामुल्लङ्घ्य कृतं हि यत् ।
तत्क्षमस्वाशुभे मातर्दीनस्य शरणार्थिनः ॥
इति कुर्य्याद्यथाशक्त्या वित्तशाठ्यविवर्ज्जितः ।
अशक्तः परकीयां वा पूजयित्वा नराधमः ।
अभावे लेख्यजां कृत्वा विधिं निष्पादयेद्बुधः ॥
एवं हि कुरुते यस्तु भक्त्या भद्राव्रतं नरः ।
भद्रायामपि कार्य्याणि तस्य सिध्यन्त्यसंशयः ॥
इह लोके सुखं भुक्त्वा पुत्रैश्वर्य्यसमन्वितः ।
अविघ्नेन नरव्याघ्र दीर्घायुर्व्याधिवर्ज्जितः ।
ततोऽन्ते स्वर्गतिं प्राप्य मोदते सुरराडिव ॥
एतत्पुरा महेन्द्रेण चीर्णं वृत्रजिघांसया ।
विमानार्थं कुबेरेण चीर्णं यक्षेश्वरेण ॥
शम्भुना त्रिपुरान्ताय पापनाशाय विष्णुना ।
भद्रं हि भद्रं भवतीह सदैव पुंसां

ये भक्तिपूर्व्वकमिदं व्रतमादरेण।
भद्राभिधानमभिधाय मनोनुगं ये
कुर्व्वन्तु तेष्वखिलमेव नृपाप्नुवन्ति।

इति भविष्योत्तरोक्तं द्वितीयभद्राव्रतं।

इति श्रीमहाराजाधिराजश्रीमहादेवस्य समस्तकरणा-
धीश्वरसकलविद्याविशारदश्रीहेमाद्रि
विरचिते चतुर्व्वर्गचिन्तामणौ
व्रतखण्डे करणव्रतानि।

अथ षड्विंशोऽध्यायः ।

अथ सङ्क्रान्तिव्रतानि ।

यशो रजोभिस्तरितैर्यदीयै-
र्नानन्दितो विस्मयमेति लोकः ।
स एष हेमाद्रिसुधीरिदानीं
प्रक्रान्ति सङ्क्रान्तिगतव्रतौघं ॥

वज्र उवाच ।

भगवन् कर्म्मणा केन तिर्य्यग्योनौ न जायते ।
स्त्रं चरुदंशी च पुरुषस्तन्ममाचक्ष्व पृच्छतः ॥

मार्कण्डेय उवाच ।

मेषसंक्रमणे भानोः सोपवासो नरोत्तम(१) ।
पूजयेद्भार्गवं देवं रामं भक्त्या यथाविधि ॥
वृषसंक्रमणे प्राप्ते तथा कृष्णञ्च पूजयेत् ।
तथा मिथुनसंक्रान्तौ पूजयेद्भोगशायिनं ॥
तथा कुलीरसंक्रान्तौ वराहमपराजितं ।
नरसिंहं तथा देवं सिंहसंक्रमणे विभुं ॥
कन्यासंक्रमणे देवं तथाङ्गिरसं यजेत् ।

---

(१) सोम्मारे नरोत्तम इति पुस्तकान्तरे पाठः ।

तथा मकरसंक्रान्तौ रामं दशरथात्मजं ॥
कुम्भसंक्रमणे राजन् रामं यादवनन्दनं।
मीनसंक्रमणे मत्स्यं वासुदेवन्तु पूजयेत् ॥
पटे वा यदि वार्च्चायां गन्धमाल्यादसम्पदा।
प्रादुर्भावस्य नाम्ना च होमं कुर्वीत पार्थिव।
व्रतान्ते जलधेनुन्तु छत्रोपानत्समन्वितां ॥
वस्त्रयुग्मयुतां दद्यात् प्रतिमासं सकाञ्चनां।
रात्रौ तु दीपमालाभिर्देवदेवं प्रपूजयेत् ॥

कृत्वा व्रतं वत्सरमेतदिष्टं
म्लेच्छेषु तिर्य्यच्चु न चापि जन्म।
प्राप्नोत्यवाप्नोति चिरञ्च नाकं
कामांस्तथाप्नोति मनोऽभिरामं ॥

इति विष्णुधर्म्मोत्तरोक्तं सुजन्मावाप्तिव्रतं।

ब्रह्मोवाच।

कुङ्कुमं रोचना मांसी मुराचन्दनबालकं।
हरिद्रासह संयुक्तं मेषे स्नानं ग्रहापहं ॥
रोचना गोरोचना। ग्रहापहं ग्रहदोषापहं।
प्रियङ्गुः पद्मकं कुष्ठं त्वचं मांसी निशाकरं ॥
रोचनागरुसंयुक्तं वृषस्नानं महाफलं ॥
प्रियङ्गु फलिनी। निशाकरं कर्पूरं ॥
उशीरं पद्मकं कुष्ठं रोचना ग्रन्थिपर्णकं।

कुङ्कुमागुरुसंयुक्तं मिथुने राज्यदं मतं ॥
उशीरं बालकं ।
रोचना बालकं मुस्तमुराशैलेयवल्कलं ।
सिंहस्नानं सुराध्यक्ष राज्यायुःपुत्रवर्द्धनं ।
हरिद्रा बालकं कुष्ठं मांसी चन्दनरोचना ।
कन्यास्नानं प्रकर्त्तव्यं सन्तानरतिवर्द्धन ॥
रोचनारक्तकुष्ठञ्च चन्दनोशीरपद्मकं ।
हरिद्रा बालसंयुक्तं तुले दुष्कृतनाशनं ॥
प्रियङ्गुस्फटिकं मांसी पद्मकं रोचनागुरुः ।
मुस्ताकुष्ठसमोपेतं वृश्चिके राज्यदं मतं ॥
प्रवालं मौक्तिकं कुष्ठं रोचनाघनपद्मकं ।
मुरामांसी समोपेतं धनुःसंक्रमणे शुभं ॥
घनो मुस्ता ।
रोचनातालकं कुष्ठं चन्दनागुरुकुङ्कुमं ।
उशीरं पद्मकैर्युक्तं मकरे सर्व्वसौख्यदं ॥
ग्रन्थिपर्णं त्वचा बाला केसरं जातिपत्रकाः ॥
रोचनासह संयुक्तं कुम्भे पुत्रासुराज्यदं ।
केसरो नागकेसरः ।
कर्पूरफलमूलैर्वा मांसीचन्दनपद्मकं ।
बालकं सघनोशीरं त्वचा मीने शुभावहं ॥
द्वादशैते समाख्याताः स्नाताः सुरवरार्च्चिताः ।
चक्रश्रीनाशना धन्या महापातकनाशनाः ॥
देवदारुमहाकुष्ठं चन्द्रशैलेयकुन्दरः ॥

पद्मकं पत्रकक्कोलं सुरसा गुग्गुलुस्तथा।
मञ्जिष्ठाख्यमथान्यत्तु द्रव्याण्येकादशेति वै॥
चन्द्रं कर्पूरं। सुरसा तुलसी।
नक्षत्रे सोमदैवत्ये योजनीया नियम्मितः॥
सोमदैवत्ये मृगशिरसि।
विजयाविद्यया जप्तं कृतमङ्गेनयोजितं।
विजयं नाम विख्यातं सर्व्वोपद्रवनाशनं॥
अलक्ष्मीशमनं धन्यं ग्रहकृत्यदुरापहं।
बालानां रक्षणार्थाय राजकार्य्येण (१) सिद्धिदं॥
एतत्तु कथितं शक्र समासेन मया तव।
स्नानं संक्रान्तिभूपस्तु यथावत्परिपृच्छतः॥

इति देवीपुराणोक्तानि संक्रान्तिव्रतानि।

———ooo———

नन्दिकेश्वर उवाच।

अथातः संप्रवक्ष्यामि धान्यव्रतमनुत्तमं।
यत् कृत्वा हि नरो राजन् सर्व्वकामानवाप्नुयात्॥
अयने विषुवे चैव स्नानं कृत्वा विचक्षणः।
व्रतस्य नियमं कुर्य्याद्यात्वा देवं दिवाकरं॥
करिष्यामि व्रतं देव त्वद्भक्तस्त्वत्परायणः।
तदविघ्नेन मे यातु तव देव प्रसादतः॥

(१) परकार्य्येण इति वा पाठः।

इत्युक्त्वार्घ्यं लिखेत्पद्मं कुङ्कुमेनाष्टपत्रकं।
भास्करं पूर्व्वपत्रेषु आग्नेये च तथा रविं॥
विवस्वन्तं तथा याम्ये नैर्ऋत्ये पूषणं तथा।
आदित्यं वारुणे पत्रे वायव्ये तपनस्तथा॥
मार्त्तण्डमिति कौवेरे ऐशाने भानुमेव च।
एवञ्च क्रमशोऽभ्यर्च्य विश्वात्मा मध्यदेशतः॥
कृताञ्जलिपुटो भूत्वा सर्व्वन्दद्यात्समन्त्रक।
कालात्मा सर्व्वभूतात्मा वेदात्मा विश्वतोमुखः।
व्याधिमृत्युजराशोकसंसारभयनाशनः॥

इत्यर्घमन्त्रः।

पुष्पधूपैः समभ्यर्च्य शिरसा प्रणिपत्य च।
रविन्ध्यात्वा ततो दद्याद्धान्यप्रस्थं द्विजातये॥
प्रतिमासं पुनस्तद्वत् पूजयेद्देवः सहस्रपात्।
एवं सदा प्रदातव्यं धान्यप्रस्थं द्विजन्मने॥
एवं संवत्सरे पूर्णे कुर्य्यादुद्यापनक्रियां।
अर्घपात्रं हि सौवर्णं कारयेत्सुमण्डल शुभं॥
द्विभुजं पूजयेद्भानुं रक्तवस्त्रयुगान्वितं
धान्यद्रोणेन सहित तद्देहं स्वशक्तितः॥
स्वर्णशृङ्गीं रौप्यखुरां कांस्यदोहां पयस्विनीं।
रविरूपं द्विजं ध्यात्वा तस्मै वेदविदे तथा॥
विद्यापात्राय विप्राय तत्सर्व्वं विनिवेदयेत्।
अग्निष्टोमसहस्राणां फलमाप्नोति मानवः॥

सप्तजन्मसहस्राणि धनधान्यसमन्वितः।
निर्व्याधिर्नीरुजो धीमान् रूपवानपि जायते॥

इति स्कन्दपुराणोक्तं धान्यसंक्रान्तिव्रतं।

नन्दिकेश्वर उवाच।

अतःपरं प्रवक्ष्यामि लवणसंक्रान्तिमुत्तमं।
संक्रान्तिवासरं प्राप्य स्नानं कृत्वा शुभैर्जलैः॥
वस्त्रालङ्कारसम्वीते भक्तिभावसमन्विते।
कुङ्कुमेन लिखेत्पद्ममष्टपत्रं सकर्णिकं॥
भास्करं पूजयेद्भक्त्या यथोक्तक्रमयोगतः।
तदग्रे लवणं पात्रं सगुडं स्थापयेद्बुधः॥
पुष्पैर्धूपैः समभ्यर्च्य नैवेद्यैर्विविधैस्तथा।
प्रदक्षिणं ततः कृत्वा उपविश्य यथाविधि॥
ध्यायेद्द्विजन्मने रूपं भास्करेण समन्वितं।
पूजितस्तु यथा शक्त्या प्रसीद मम भास्कर॥
लवणं सगुडं पात्रं ब्राह्मणाय निवेदयेत्।
एवं संवत्सरे पूर्णे भानुं कृत्वा हिरण्मयं॥
रक्तवस्त्रयुगच्छन्नं रक्तचन्दनचर्चितं।
कमलं लवणं पात्रं धेन्वा सार्द्धं द्विजातये॥
प्रदद्याद्भानुमुद्दिश्य विश्वात्मा प्रीयतामिति।
एवं कृते तु यत्पुण्यं प्राप्यते भुवि मानवैः॥
न केन गदितुं शक्यं वर्षकोटिशतैरपि।

लवणाचलदानस्य फलं प्राप्नोति मानवः॥
सर्व्वकामसमृद्धात्मा विमानवरमध्यगः।
सूर्य्यलोके वसेत् कल्पं पूज्यमानः सुरासुरैः।

इति स्कन्दपुराणोक्तं लवणसंक्रान्तिव्रतं।

नन्दिकेश्वर उवाच।

वक्ष्येऽहं भोगसंक्रान्तिं सर्व्वलोकविवर्द्धनीं।
संक्रान्तिवासरं प्राप्य योषितस्तु समाह्वयेत्॥
कुङ्कुमं कज्जलञ्चैव सिन्दूरं कुसुमानि च।
सुगन्धीनि च सर्व्वाणि ताम्बूलं ग्रन्थिसंयुतं॥
ग्रन्थिसंयुतं कर्पूरसंयुतं।
तण्डुलान् फलसंयुक्तान् प्रदद्याच्च विचक्षणः।
अन्यान्यपि हि वस्तूनि भोगसाधनकानि च॥
दद्यात् प्रहृष्टमनसा मिथुनेभ्यः प्रयत्नतः।
भोजयित्वा यथा शक्त्या वस्त्रयुग्मं प्रदापयेत्॥
एवं संवत्सरस्यान्ते रविं सम्पूज्य पूर्व्ववत्।
सुवर्णशृङ्गीं रौप्यखुरां सर्व्वोपस्करसंयुतां।
धेनुं सदक्षिणां दद्यात्सपत्नीकद्विजातये॥
एवं यः कुरुते भक्त्या भोगसंक्रान्तिमादरात्।
स्यात् सुखी सर्व्वमर्त्त्येषु भोगी जन्मनि जन्मनि॥

इति स्कन्दपुराणोक्तं भोगसङ्क्रान्तिव्रतं।

नन्दिकेश्वर उवाच ।

अथान्यदपि ते वक्ष्मि रूपसंक्रान्तिमुत्तमां ।
संक्रान्तिवासरं स्नानं तैलं कृत्वा विचक्षणः ॥
हैमपात्रे घृतं कृत्वा हिरण्येन समन्वितं ।
सुरूपं वीक्ष्य तत्पात्रं ब्राह्मणाय निवेदयेत् ॥
एकभक्तं ततः कृत्वा भक्त्या चैव समन्वितं ।
व्रतान्ते काञ्चनं दद्यादघृतधेनुसमन्वितं ॥
अश्वमेधसहस्राणां फलमाप्नोति मानवः ।
रूपयौवनसम्पत्त्या आयुरारोग्यसम्पदा ॥
लक्ष्मीश्च विपुलान् भोगान् लभन्तीह न संशयः ।
सर्व्वपापविनिर्मुक्तः स्वर्गलोकञ्च गच्छति ॥

इति स्कन्दपुराणोक्तं रूपसंक्रान्तिव्रतं ।

———0:0———

नन्दिकेश्वर उवाच ।

अथान्यां संप्रवक्ष्यामि तेजःसंक्रान्तिमुत्तमां ।
संक्रान्ति वासरं प्राप्य स्नानं कृत्वा विचक्षणः ॥
शालितण्डुलसंयुक्तं कारणं कारयेच्छुभं ।
तन्मध्ये दीपकं स्थाप्य प्रज्वलन्तं स्वतेजसा ।
तन्मुखे मोदकं स्थाप्य ब्राह्मणाय निवेदयेत् ॥
अर्घ्यञ्च पूर्व्ववत्कार्य्यमेकभक्तन्तु पूर्व्ववत् ।
संवत्सरे तु संपूर्णे कुर्य्यादुद्यापनं बुधः ॥
शोभनं दीपकं कार्य्यं सुवर्णेन तु नारद ।

ताम्रेण करकं कार्य्यं तन्मध्ये दीपकं न्यसेत् ॥
कपिला सह दातव्या करकेण द्विजातये ।
सुवर्णकोटिदानस्य तत्फलं प्राप्यतेऽनघ ॥
तेजसादित्यसङ्काशो वायोर्बलमवाप्नुयात् ॥
संक्रान्तिव्रतमाहात्म्याल्लभते नात्र संशयः ॥

इति स्कन्दपुराणोक्तं तेजःसंक्रान्तिव्रतं ।

———000———

नन्दिकेश्वर उवाच ।

अथान्यां संप्रवक्ष्यामि सौभाग्यसंक्रान्तिमुत्तमां ।
शृणु नारद यत्नेन धर्मैश्वर्य्यप्रदायिनीं ॥
अयने विषुवे युक्ते व्यतीपातेन भानुना ।
संक्रान्तिदिवसे कुर्य्यादेकभक्तं विमत्सरः ॥
पूर्व्वाह्णमभ्यर्च्य तथा चैव सुवासिने ।
सौभाग्याष्टकसंयुक्तं वस्त्रयुग्मं सयोषिते ॥
विप्राय वेदविदुषे भक्त्या तत् प्रतिपादयेत् ।
एवं संवत्सरे पूर्णे कृत्वा ब्राह्मणभोजनं ।
पर्व्वतं लवणं कृत्वा यथा विभवसारतः ॥
काञ्चनं कमलं कृत्वा भास्करञ्चैव कारयेत् ।
गन्धपुष्पादिना पूज्य विप्राय प्रतिपादयेत् ॥
पुष्करे च कुरुक्षेत्रे गोसहस्रफलं लभेत् ।
सा प्रिया मर्त्त्यलोकेषु या करोति व्रतं त्विदं ॥

शङ्करस्य यथा गौरी विष्णोर्लक्ष्मीर्यथा दिवि।
मर्त्यलोके तथा सापि प्रियेण सह मोदते॥

इति स्कन्दपुराणोक्तं सौभाग्यसंक्रान्तिव्रतं।

———000———

स्कन्द उवाच।

अथान्यामपि ते वच्मि फलसंक्रान्तिमुत्तमां।
संक्रान्तिवासरं प्राप्य स्नानं कृत्वा तु पूर्व्ववत्॥
सम्पूज्य पूर्व्ववद्भानुं पुष्पधूपादिना तथा।
शर्करासहितं पात्रं फलाष्टकसमन्वितं॥
संक्रान्तिवासरं प्राप्य ब्राह्मणाय निवेदयेत्।
तदन्ते तु रविं कुर्य्यात्सुवर्णेन च नारद॥
कुम्भस्योपरि संस्थाप्य गन्धपुष्पैः प्रपूजयेत्।
फलाष्टकं ततो दद्याद्रसभाज्यसमन्वितं॥

इति स्कन्दपुराणोक्तफलसंक्रान्तिव्रतं।

———000———

नन्दिकेश्वर उवाच।

धनसंक्रान्तिमाहात्म्यं शृणु स्कन्द विधानतः।
यत्कृत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः॥
संक्रान्तिवासरं प्राप्य शुचिर्भूत्वा समाहितः।
कलशं निर्व्रणं गृह्य वारिपूर्णं निधापयेत्॥
सुवर्णयुक्तं कृत्वा प्रतिमासन्तु दापयेत्।
विधिनानेन वर्षान्ते प्रीयतां मे दिवाकरः॥

पूजाविधानं सर्व्वञ्च धान्यसंक्रान्तिवद्भवेत् ॥
उद्यापनञ्च वक्ष्यामि संपूर्णव्रतमुत्तमं।
सौवर्णं कमलं कृत्वा सूर्य्यञ्चोपरि विन्यसेत् ॥
षष्ठे सुवर्णघटितं पद्मजं वै निवेदयेत्।
गोदानं तत्र दातव्यं एवं संपूर्णभावने ॥
एवं कृते तु यत्पुण्यं फलं स्यात्तु न चोच्यते।
जन्मनां शतसाहस्रं धनयुक्तो भवेन्नरः ॥
आयुरारोग्यसम्पन्नः सूर्य्यलोके महीयते ॥

इति स्कन्दपुराणोक्तं धनसंक्रान्तिव्रतं।

———ooo———

नन्दिकेश्वर उवाच।

अथान्यां संप्रवक्ष्यामि आयुःसंक्रान्तिमुत्तमां।
शृणु वत्स विधानेन यथा पुण्यं प्रवर्त्तते ॥
संक्रान्तिदिवसे पूज्य पूर्व्ववच्च दिवाकरं।
कांस्यं क्षीरयुतं दद्यात्सहिरण्यं समन्वितः ॥
मन्त्र एव पुरस्दाने पूजा सैव प्रकीर्त्तिता।
सक्षीरं सुरभीजातं पीयूषसमकपदश्च ॥
आयुरारोग्यमैश्वर्य्यं मनो देहि विज्ञापितं।
अनेन विधिना सम्यक् सर्व्वं दद्यादतन्द्रितः ॥
उद्यापनादिकं सर्व्वं धान्यसङ्क्रान्तिवद्भवेत्।
एवं कृते तु यत्पुण्यं ग्रन्थं नेदं मयोदितं ॥
निर्व्याधिरपि दीर्घायुर्भोगवान् सर्व्वजन्मसु।

अपमृत्योर्भयं नास्ति जीवेच्च शरदः शतं॥

इति स्कन्दपुराणोक्तमायुःसंक्रान्तिव्रतं।

———ooo@ooo———

ब्रह्मोवाच।

आशासङ्क्रान्तिमाहात्म्यं शृणु स्कन्द विधानतः।
यां कृत्वा सर्व्वलोकेषु आशावान् जायते नरः।
सङ्क्रान्तिदिवसे पुण्ये प्रारभेन्नियमं व्रते।
पद्ममष्टदलं कृत्वा कुङ्कुमेन तु भास्करं॥
पूजयेन्मन्त्रमुच्चार्य्य विधिवद्व्रतविधौ।
आशा तेजस्करी दृष्टे प्रभादोमित्रयशस्करी॥
आशां सर्व्वत्र गां देव मम देहि नमोऽस्तु ते।
पूज्यैवं कुङ्कुमेनाथ दद्याद्विप्राय भोजनं।
उद्यापने तु चक्राङ्गं सौवर्णं सरथं तथा॥
एकचक्रञ्च सप्ताश्वमरुणेन समन्वितं।
यः कुर्य्याद्विधानेन आशासङ्क्रान्तिमुत्तमां॥
यथाशाऽस्वचिन्ता लोके सूर्य्यतस्तस्य जायते।
गोमन्त्रमित्रसुतेष्टे आशा सर्व्वं च जायते।
रिपवः सङ्क्षयं यान्ति सुखं प्राप्नोत्यनुत्तमं॥

इति स्कन्दपुराणोक्तमाशासंक्रान्ति व्रतं।

———ooo———

नन्दिकेश्वर उवाच।

कीर्त्तिसङ्क्रान्तिमाहात्म्यं शृणु स्कन्द विधानतः।

सङ्क्रान्तिवासरं प्राप्य रविबिम्बं लिखेद्भुवि ॥
तस्य मध्ये स्थितं देवं पूजयेत्सर्व्वमन्त्रतः ।
यथाविभवसारेण ततो विप्राय दक्षिणां ॥
प्रतिमासं तु वै श्वेतं वस्त्रयुग्मं प्रदापयेत् ॥
उद्यापने तु रौप्यस्य सूर्य्यमन्यं प्रदापयेत् ।
श्वेतवस्त्रयुगच्छन्नं ब्राह्मणाय निवेदयेत् ॥
एवं कृते परा कीर्त्तिर्जायते वापि वक्त्रिज ।
फलं न शक्यते वक्तुं जिह्वातेरपि जिह्वया ॥
विमला कीर्त्ती राज्यञ्च जायते नात्र संशयः ।
आयुरारोग्यसम्पन्नो जीवेद्वर्षशतं नरः ॥

इति स्कन्दपुराणोक्तं कीर्त्तिसंक्रान्तिव्रतं ।

———000@000———

नन्दिकेश्वर उवाच ।

वक्ष्याम्यपापसङ्क्रान्तिं शृणु स्कन्द विधानतः ।
संक्रान्त्यां नियतो भूत्वा तिलैः श्वेतैः समन्वितैः ॥
करकं वर्द्धमानञ्च प्रतिमासं निवेदयेत् ।

वर्द्धमान इति शरावः

मन्त्रेणानेन तु स्नायाद्भक्तिभावसमन्वितः ॥
तिलो मां पातु पापेभ्यस्तव देव प्रसादतः ।
त्वञ्च मां रक्ष देवेश वाङ्मनःकायकल्मषात् ।
उद्यापने च देवस्य सौवर्णमाषकेण तु ।
द्विभुजा प्रतिमा कार्य्या रजतेनाथ कारयेत् ॥

तिलधेनुः प्रदातव्या व्रतेऽस्मिन्नात्र संशयः।
पूर्व्वपापप्रणाशाय आयुरारोग्यहेतवे॥
एतत्सर्व्वं पुरा प्रोक्तं ब्रह्मणा विष्णवे तथा।
विष्णुरिन्द्राय जगदे तथा प्रोवाच शम्भवे॥
शम्भुश्चैव ममाचष्टे मया प्रोक्तं प्रभो तव।
सर्व्वसङ्क्रान्तिदिवसे प्रारभेद्व्रतमुत्तमं।
दक्षिणोत्तरसङ्क्रान्तौ सर्व्वास्विति च केन च।
अशुचित्वाच्छरीरस्य यौगपद्यात् प्रशस्यते।
न चात्र विधिलोपः स्यात्सर्व्वत्रैकन्तु दैवतं॥
नानादेवव्रतानान्तु नैककालः प्रशस्यते॥

इति स्कन्दपुराणोक्तमपापसंक्रान्तिव्रतं।

——oo@oo——

नन्दिकेश्वर उवाच।

अथान्यां संप्रवक्ष्यामि ताम्बूलाख्यामनुत्तमां।
विधानं पूर्व्ववत्कुर्य्याद्याम्यसङ्क्रान्तियच्च तत्॥
ताम्बूलचन्दनाद्यञ्च प्रदद्याद्यां द्विजोत्तमात्।
यावत्संवत्सरं पूर्णं रात्रौ रात्रौ ततः परं॥
याम्बूलं भक्षयेद्विप्रान् कारयञ्चैव नान्तरं।
वत्सरान्ते तु कमलं कृत्वा चैव तु काञ्चनं॥
पत्रकोशञ्च कुर्व्वीत तथा पूगीफलालयं।
चूर्णभाण्डं प्रकुर्व्वीत पूगप्रस्फोटनं तथा।
वस्त्रवासादिचूर्णानां भाण्डानि च द्विजर्षभ॥

द्विजदाम्पत्यमावाह्य सर्व्वोपस्करसंयुतैः।
द्रव्येण पूजयेद्भक्त्या भोजयेत् षड्रसैर्द्विजान्॥
उपकल्पितञ्च यत्किञ्चिद्ब्राह्मणाय निवेदयेत्।
एवं करोति या नारी ताम्बूलाख्यं व्रतोत्तमं॥
सर्व्वकामानवाप्नोति मर्त्त्ये जातिकुलोद्भवे।
सौभाग्यमत्तेन अतुलं प्राप्नोति द्विजसत्तम॥
भर्त्रा पुत्रैश्च पौत्रैश्च मोदते च गृहे गृहे।
मृता कालान्तरे पश्चात् सूर्य्यलोके महीयते॥
पतिना देववद्विप्र यावदाभूतसंप्लवं।
शृणोति युवती काचित् सापि तत्फलमश्नुते।
मुच्यते सर्व्वपापेभ्यः स्वर्गलोके महीयते॥

इति स्कन्दपुराणोक्तं ताम्बूलसङ्क्रान्तिव्रतं।

——o——

नन्दिकेश्वर उवाच।

अतः परं प्रवक्ष्यामि सङ्क्रान्तिञ्च मनोरथां।
गुडेन पूर्णकुम्भञ्च सवस्त्रञ्च समन्वितः।
सङ्क्रान्तिवासरे दद्याद्ब्राह्मणाय कुटुम्बिने॥
एवं संवत्सरे पूर्णे समग्रोद्यापनं शुभं।
गुडेन पर्व्वतं कार्य्यं वस्त्रैश्च भूषितं॥
अयने चोत्तरे दद्याद्वित्तशाठ्यं न कारयेत्।
यं यं प्रार्थयते कामं तं तं प्राप्नोति पुष्कलं॥
सर्व्वपापविनिर्मुक्तः सूर्य्यलोके महीयते।

इति स्कन्दपुराणोक्तं मनोरथसंक्रान्तिव्रतं।

नन्दिकेश्वर उवाच।

अतः परं प्रवक्ष्यामि विशोकसङ्क्रान्तिमुत्तमां।
अयने विषुवे पुण्ये व्यतीपातो भवेद्यदि॥
एकभक्तं नरः कुर्यात्तिलैः स्नानन्तु कारयेत्।
काञ्चनं भास्करं कृत्वा यथा विभवशक्तितः॥
स्नापयेत्पञ्चगव्येन गन्धपुष्पैः सुपूजयेत्।
वेष्टयेद्रक्तवस्त्राभ्यां ताम्रपात्रे निधापयेत्॥
भास्कराय नमः पादौ रवे जङ्घे ति वै नमः।
आदित्याय नमो जानु ऊरू चैव दिवाकरः॥
अर्य्यम्णे तु कटिं पूज्य भानवे चोदरे तथा
नमः पूष्णे तु बाहुभ्यां अर्य्यम्णे तु पुनस्तनौ॥
विवस्वते नमः कण्ठे सहस्रांशो मुखे स्मृतं।
प्रभाकर नमो नेत्रे तेजोराशे नमः शिरः॥
वरुणाय नमः केशान् पादादौ पूजयेद्रविं।
अर्घ्यादि पूर्व्वं तत्कार्य्यं ब्राह्मणाय निवेदयेत्॥
एवं संवत्सरे पूर्णे काञ्चनेन दिवाकरं।
सपद्महस्तं सम्पूज्य यथाविभवशक्तितः॥
कारयेत्पूजयेत्तद्वा रक्तवस्त्रैश्च वेष्टयेत्।
ततो होमं प्रकुर्व्वीत सूर्य्यमन्त्रेण नारद (१)॥
द्वादश कपिला दद्यात्स्वालङ्कारसंयुताः।
अशक्तः कपिलामेकां वित्तशाठ्यविवर्ज्जितः।

---

(१) सूर्य्यमन्त्रैश्च नारद इति पुस्तकान्तरे पाठः।

ग्रहणे च कुरुक्षेत्रे सत्पात्रे च प्रदीयते ॥
कोटि कोटिसुवर्णस्य दत्तस्य लभते फलं ।
आयुरारोग्यमैश्वर्य्यं भार्य्यापुत्रसमन्वितं ॥

इति स्कन्दपुराणोक्तं विशोकसङ्क्रान्तिव्रतं ।

——००——

इति श्रीमहाराजाधिराजश्रीमहादेवस्य समस्तकरणाधीश्व-
रसकलविद्याविशारदश्रीहेमाद्रिविरचिते
चतुर्व्वर्गचिन्तामणौ व्रतखण्डे
सङ्क्रान्तिव्रतानि ।

अथ सप्तविंशोऽध्यायः।

अथ मासव्रतानि।

येन त्रिलोकी धरणी कृतेयं
कर्पूरतुल्यप्रतिमैर्यशोभिः।
हेमाद्रिसूरिः समस्तप्रभावं
मासव्रतं व्रातमिदं ब्रवीति॥

वज्र उवाच।

भगवन् कर्म्मणा केन रूपवान् जायते नरः।
एतन्मे संशयं छिन्धि त्वं हि सर्व्वं विदुच्यते॥

मार्कण्डेय उवाच।

फाल्गुन्यां समतीतायां प्रतिपत्प्रभृति क्रमात्।
यावच्चैत्री महाराज तावत्स्नातो दिने दिने॥
बहिः संपूजयेद्देवं केशवं भोगशायिनं।
एकभक्ताशनो नित्यमधःशायी तथा भवेत्॥
त्रिरात्रोपोषितः पूजां चैत्र्यां कुर्य्यात्तथैव च।
क्षयात्मा रजतन्दद्याद्वस्त्रयुग्मं तथैव च॥

रूपार्थिनो मासमिदं मयोक्त
व्रतोत्तमं नित्यमदीनसत्त्वं
कृत्वा तु नाकं मनुजस्त्ववाप
मानुष्यमासाद्य च रूपवान् स्यात्॥

इति विष्णुधर्म्मोत्तरोक्तं रूपावाप्तिव्रतं।

ब्रह्मोवाच ।

धर्म्मराज निबोधेदं दमनादिमहोत्सवं ।
प्रहृष्टनरनारीकं पञ्चमीचारसुन्दरं ॥
संयुतौ नन्दनवने भार्य्यया सह भार्य्यया ।
विस्मयोत्फुल्लनयनौ बभ्रामोन्मत्तवच्छिवः ॥
स ददर्श वने फुल्ले विद्याधरगणान् बहून् ।
वसन्तर्त्तौ नृत्यमानान् सुरासुरगणार्च्चितान् ॥
सन्तानपारिजाताभ्यां बद्धा वै माधवीलता ।
कदाचिद्दोलनस्यन्नः समालिङ्ग्य घनस्तनौ ॥
गीतमान्दोलकारूढा अभासन् परमस्त्रियः ।
येनैवोत्पाटयन्ति स्म स्तनाग्रमपि मन्मथं ॥
तद्दृष्ट्वा विस्मयाविष्टा भवानी प्राह शङ्करं ।
कौतुकं मे समुत्पन्नं पन्नगाभरण प्रभो ॥
आन्दोलकं मम कृते कारयस्व स्वलङ्कृतं ।
यथा समन्दोलयेऽहं यथा चैते त्रिलोचन ॥
तद्गौरीवचनं चारु श्रुत्वाऽसौ वृषभध्वजः ।
आन्दोलं कारयामास समाहूय महासुरं ॥
स्तम्भद्वयं कारयित्वा इष्टकाष्टमयं दृढं ।
तत्पश्चैवोपरितनं श्रेष्ठं काष्ठमकल्पयत् ॥
वासुकिं दक्षिणस्थाने बद्धानेन सुसंवृतं ॥
तत्पुरः सञ्चयं पीठं कृतवान्मणिमण्डितं ॥
घुरिकापीसकौशेयैः सदृक्षैर्वेष्टितेन वै ।
स्वन्दामालम्बितकरं मणिमौक्तिकशेखरं ॥

चारयित्वा विचित्राभ्यां दोलां वैजालिनोत्वरां।
संसिद्धां सिद्धगुरवे गौरवेण न्यवेदयत्॥
तथारूढस्तु भगवान् सोमः सोमविभूषणः।
मण्डनान्दोलयामास पार्श्वस्थैः पार्षदैः सह॥
वामपार्श्वे तु विजया दक्षिणे तु जया भवेत्॥
चामराक्रान्तवाह्वंशसमाश्लिष्टकुचद्वयं।
आन्दोलयन्त्या पार्व्वत्या तद्गीतं गद्गदाक्षरं॥
येन देवासुरस्त्रीणामासीदानन्दनिर्भरः।
जगुर्गन्धर्व्वपतयो ननृतुश्चाप्सरोगणाः॥
उत्तालवाद्यानि तथा वादयन्ति स्म चारणाः।
चेलुः कुलाचलाः सर्व्वे चुक्षुभुः सप्त सागराः॥
ववुर्व्वाताः सनिर्घाता देवे दोलासमन्विते।
आलोक्य व्याकुलं लोकं देवाः शक्रपुरोगमाः।
उपेत्य प्रणिपत्योचुः सर्व्वपापहरं परं॥
उपारमस्व भगवन् भवतः क्रीड़यानया।
जगद्धराघूर्णितं देव विचलज्जलसागरं॥
गीर्व्वाणगीर्भिः संहृष्टः शङ्करो लोकशङ्करः।
समुत्ततार दोलातः प्रहर्षोत्फुल्ललोचनः॥
उवाच वचनं शक्रः सुरसार्घस्य पश्यतः।
सानुकम्पं सुललितं विस्फुटार्थपदाक्षरं॥
श्रीमहेन्द्र उवाच।
अद्य प्रभृति ये दोलाक्रीड़ां पुष्करिणीतटे।
वसन्ते कारयिष्यन्ति मण्डिते निर्झराङ्गणे॥

नेत्रपट्टपटीच्छन्नं पद्मरागविभूषितं ॥
छायकैरुपसम्पन्नां विन्यस्तकनकाटुकां ॥
अटुका शृङ्खला ।
विचित्राभरणां भूरिभाभासितदिगम्बरां ।
मालाविद्याधराक्रान्तां प्रान्तारोपितदर्पणां ॥
छत्रचामरसंछन्नां यथाशक्त्यथवा कृतां ।
अग्निकार्यं ततः कृत्वा दिक्षु दिक्षु दिशां बलिं ॥
तस्यामारोपयेद्देवमिष्टशिष्टजनावृतं ।
मूलमन्त्रेण देवानां प्राप्तं दोलाधिरोहणं ॥
पार्श्वस्थो ब्राह्मणो विद्वान् पठेद्वा मन्त्रमुत्तमं ।
विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् ।
संबाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एकः ।
गम्भीरतूर्य्यनिर्घोषैः कलहागाध्वनिःस्वनैः ॥
स्तुतिमङ्गलशब्दैश्च पुष्पधूपादिवासितं ।
कुङ्कुमक्षोदताम्बूलपुष्पमालाकुलो जनः ॥
तां विहाय जलक्रीडामन्यासां विदधीत च ।
पीतगीतजलाघाततांडितो यज्जनः सुखं ॥
मन्यते नियतं कोऽपि प्रभावोऽयमनङ्गजः ।
एवं येऽनुगमिष्यन्ति नरो दोलामुपागतां ॥
निरुजस्ते भविष्यन्ति सुखिनः शरदः शतं ।
पुत्रपौत्रसमायुक्ता धनधान्यसमायुताः ॥
विहृत्येह सुखं मर्त्त्यास्ततो यान्ति तत्परं ।
प्राप्ते वसन्तसमये सुरसत्तमाना-

मान्दोलनं सुरवरानमु कुर्व्वते ये।
ते प्राप्नुवन्ति भुवि जन्मतरोः फलानि
दुःखार्ज्जितः कुलशतान्यपि तारयन्ति॥

इति भविष्योत्तरोक्त आन्दोलनविधिः।

महाभारते।

चैत्रन्तु नियतोमासमेकभक्तेन यः क्षिपेत्।
सुवर्णमणिमुक्ताढ्ये कुले महति जायते॥

विष्णुधर्म्मे।

चैत्रं विष्णुपरो मासमेकभक्तेन यः क्षिपेत्।
सुवर्णमणिमुक्ताढ्यं गार्हस्थ्यं समवाप्नुयात्॥
अहिंस्रः सर्व्वभूतेषु वासुदेवपरायणः।
नमोऽस्तु वासुदेवायेत्यष्टसाष्टशतं जपेत्॥
अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात्॥

इति एकभक्तव्रतं।

अथ वैशाखव्रतानि।

श्रीकृष्ण उवाच।

वैशाखे पुष्पलवणं वर्ज्जयित्वा तु गोप्रदः।
विष्णुलोकमवाप्नोति ततो राजा भवेदिह॥

एतत्कान्तिव्रतं नाम कान्तिसौभाग्यदायिनी॥
विष्णुरत्र देवता।

इति पद्मपुराणोक्तं कान्तिव्रतं।

महाभारते।

निरन्तरैकभक्तेन वैशाखं यो जितेन्द्रियः।
नरो वा यदि वा नारी ज्ञातीनां श्रेष्ठतां व्रजेत्॥

विष्णुधर्म्मे।

यः क्षिपेदेकभक्तेन वैशाखं पूजयेद्धरिं।
नरो वा यदि वा नारी ज्ञातीनां श्रेष्ठतां व्रजेत्॥
अहिंस्रः सर्व्वभूतेषु वासुदेवपरायणः।
नमोऽस्तु वासुदेवायेत्यष्टयाष्टशतं जपेत्।
अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात्॥

इति एकभक्तव्रतं।

वज्र उवाच।

भगवन् कर्म्मणा केन बुद्धियुक्ता भवेन्नरः।
एतदेव मनुष्याणां मनुष्यत्वमुपाहृतं॥

मार्कण्डेय उवाच।

चैत्रात्तु समतीतायां यावन्मासं दिने दिने।
पूर्व्ववत् पूजयेद्देवं नृसिंहमपराजितं॥

पूर्व्ववदिति चत्रमासोक्तकर्म्यावासिव्रतवदेकभक्तवह्निःस्नान-भूशय्यादिकं कर्त्तव्यमित्यर्थः।

होमञ्च प्रत्यहं कुर्य्यात्तथा सिद्धार्थकेर्नृप।
ब्राह्मणान् भोजयेच्चाच तथा त्रिमधुरं नृप॥

त्रिमधुरं मधुघृतशर्करा:(१)।

वैशाख्यां कनकन्दद्यात्त्रिरात्रोपोषितो नरः।
ज्ञानावाप्तिप्रदन्त्वेतद्व्रतं बुद्धिविवर्द्धनं॥

कृत्वा व्रतं मासमिदं यथोक्त-
मासाद्य नाकं सुचिरं मनुष्यः।
मानुष्यमासाद्य तु बुद्धियुक्तो
ज्ञानेन युक्तश्च तथा भवेच्च॥

इति विष्णुधर्म्मोत्तरोक्तं ज्ञानावाप्तिव्रतं।

अथ ज्यैष्ठव्रतानि।

महाभारते।

ज्येष्ठामूलन्तु वै मासमेकभक्तन्तु यः क्षिपेत्।
ऐश्वर्य्यमतुलं श्रेष्ठं पुमान् स्त्री वाभिजायते॥

विष्णुधर्म्मे।

कृष्णार्पितमना ज्यैष्ठमेकभक्तेन यः क्षिपेत्।
अहिंस्रः सर्व्वभूतेषु वासुदेवपरायणः॥

---

(१) दुग्ध घृतशर्करा इति पाठान्तरं।

नमोऽस्तु वासुदेवायेत्यष्टाष्टशतं जपेत् ।
अतिरात्रस्य यज्ञस्य समग्रं फलमाप्नुयात् ॥

इति एकभक्तव्रतं ।

———000———

वज्र उवाच ।

श्रीविहीनस्य लोकेऽस्मिन् जीवितस्यापि किं फलं ।
तस्माद्व्रतं समाचक्ष्व येन स्याच्छ्रीयुतो नरः ॥

मार्कण्डेय उवाच ।

वैशाख्यां समतीतायां प्रतिपत्प्रभृति क्रमात् ।
पूर्ववत् पूजयेद्देवं श्रीमत्याद्यं दिने दिने ॥
पूर्ववदिति चैत्रादिरूपावाप्तिव्रतवत् ।
पुष्पमूलैः फलैश्चैव जुहुयाद्घृतानि च ।
विल्वाञ्च वह्नौ सततं गोरसैर्भोजयेद्द्विजान् ।
चिराच्चोपोषितो ज्येष्ठां कनकं प्रतिपादयेत् ।
वस्त्रयुग्मञ्च राजेन्द्र तेन साफल्यमश्नुते ॥

कृत्वा व्रतं मासमिदं यथोक्त-
मासाद्य मासं रुचिरं मनुष्यः ।
मानुष्यमासाद्य विवृद्धतेजाः
श्रिया युतः स्यादगति प्रधानं ॥

इति विष्णुधर्म्मोत्तरोक्तं श्रीप्राप्तिव्रतं ।

अथाषाढव्रतानि ।

महाभारते।

आषाढमेकभक्तेन स्थित्वा मासमतन्द्रितः।

बहुधान्यो बहुधनो बहुपुत्रश्च जायते

विष्णुधर्म्मे।

आषाढमेकभक्तेन पूजयेद्विष्णुतत्परः॥

इति एकभक्तव्रतं।

———००———

वज्र उवाच।

भगवन् कर्म्मणा केन भोगमाप्नोति मानवः।

किन्तु भोगविहीनस्य कार्य्यमस्ति धनैर्द्विज॥

मार्कण्डेय उवाच।

ज्यैष्ठ्यान्तु समतीतायां प्रतिपत्प्रभृतिक्रमात्।

पूर्व्ववत् पूजयेद्देवं विश्वरूपधरं हरिं॥

अत्रापि पूर्व्ववदिति रूपावाप्तिव्रतवदित्यर्थः।

कृत्वा व्रतान्ते च तथा विराजं

दत्त्वा सुयुक्तं शयनं द्विजाय।

स्वर्लोकमासाद्य चिरं नरेन्द्र

मानुष्यमासाद्य च भोगवान् स्यात्।

इति विष्णुधर्म्मोक्तं भोगावाप्तिव्रतं।

———०००———

अथ श्रावणव्रतानि।

सञ्जय उवाच ।

कदा च श्रावणी पूजा क्रियते तु कदा व्रतं ।
कथमेषा कृतेन्द्राख्या किं फलन्तद्ब्रवीहि मे ॥

विजय उवाच ।

प्राप्ते तु श्रावणे मासि शुक्लपक्षे मनोहरे ।
संस्थाप्य पार्व्वतीं देवीं पूजयेद्भक्तिभावितः ॥
मासं यावन्नियमतः संस्मरन् पार्व्वतीं हृदि ।
श्वेतार्घ्यैः श्वेतकुसुमैः श्वेतचन्दनकेन च ॥
गन्धैर्धूपैश्च नैवेद्यैर्यथाकालोद्भवैः फलैः ।
अर्घ्यं दद्यात् फलेनैव कुसुमाक्षतचन्दनैः ॥
नमोऽस्तु श्रावणी देवी सर्व्वपापक्षयङ्करी ॥
गृहाणार्घ्यं हि देवेशि शङ्करेण समं मम ॥

अर्घ्यमन्त्रः ।

नमो नमस्ते देवेशि अर्हश्रावणि पार्व्वति ।
नमस्तेऽस्तु जगन्मातर्नमस्ते हरवल्लभे ॥
नमो देवि नमस्तुभ्यं कात्यायनि नमोऽस्तु ते ॥
नमः कालि महाकालि शिवे दुर्गे नमोऽस्तु ते ।
नमो रुद्राणि सर्वाणि अपर्णे शङ्करप्रिये(१) ।
सर्व्वभूतहिते देवि त्राहि संसारसागरात् ।

पूजामन्त्रः ।

धूपोऽयं सर्व्वदेवानां आहारो ह्यमृतोपमः ।

---

(१) नमस्ते शङ्करप्रिये इति पुस्तकान्तरे पाठः ।

धूपं गृहाण देवेशि अर्द्धश्रावणि नमोऽस्तु ते ॥
कृतवस्त्रं प्रदातव्यं धौतं वा निर्म्मले शुभे।
श्रावणान्ते ततः पश्चात्समाप्य नियमं शुचिः॥
गौरिणीर्भोजयेच्चैव तथा मिष्टान्नेन जये शुभे।
द्विजांश्च भोजयेत्तत्र वस्त्राणि परिधापयेत् ॥
एवंविधविधानेन कृत्वार्द्धश्रावणीव्रतं।
न तस्य स्याच्च दारिद्र्यं न चैवेष्टवियोजनं ॥
अष्ट पुत्रानवाप्नोति भर्त्तारञ्च गुणाधिकं।
सुरूपं गुणिनं कान्तं पण्डितं प्रियवादिनं ॥
एकभक्तेन नक्तेन कुर्य्यादेतद्व्रतं शुभं।
इदं कृत्वा पुरेन्द्राणीन्द्रं लेभे पतिमुत्तमं ॥
रोहिणी पतिमालेभे चन्द्रं व्रतनिषेवणात्।
रण्णा देवी सुभर्त्तारं आदित्यं प्राप सत्पतिं ॥
इदन्ते कथितं भद्रे अर्द्धश्रावणिकाव्रतं।
कुरुते या च पूर्णानि व्रतान्यस्या भवन्ति हि ॥
यदा ग्रहकृतैर्दोषैर्यदि देवो न वर्षति।
कथाश्रवणमात्रेण देवो वर्षति वासवः॥
दुर्भिक्षे डामरे घोरे सङ्ग्रामे राजविग्रहे।
कथामेतां निशम्याशु दोषैः सर्वैः प्रमुच्यते ॥

इति ब्रह्माण्डपुराणोक्तमर्द्धश्रावणिकाव्रतं।

———ooo———

युधिष्ठिर उवाच।

स्वभर्त्तरि सम्बन्धे महास्नेहो यथा भवेत्।
कुलस्त्रीणां तथाचक्ष्व व्रतं मम जगद्गुरो॥

कृष्ण उवाच।

यमुनायास्तटे पूर्व्वं मथुरास्ति पुरी शुभा।
तस्यां शत्रुघ्ननामाभूद्राजा राघवनन्दनः॥
तस्य भार्य्या कीर्त्तिमाला नाम्नासीत् प्रथिता भुवि।
कदा प्रणम्य भगवान् वशिष्ठमुनिसत्तमः॥
पृष्टः कथं मुनिश्रेष्ठ सौभाग्यमतुलं लभेत्।
ब्रूहि मे तिलसम्बन्धं कारणं व्रतमुत्तमं॥
एवमुक्तस्तथा ज्ञानी वशिष्ठः कीर्त्तिमालया।
ध्यात्वा मुहूर्त्तमाचख्यौ कोकिलाव्रतमुत्तमं॥

वसिष्ठ उवाच।

आषाढ़पौर्णमास्यान्तु सन्ध्याकाले ह्युपस्थिते।
सङ्कल्पयेन्मासमेकं श्रावणीप्रभृति ह्यहं।
स्नानं करिष्ये नियता ब्रह्मचर्य्ये स्थिता सती।
भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयां॥
इति सङ्कल्प्य पुरुषो नारी वा ब्राह्मणान्तिके।
प्राप्यानुज्ञान्ततः प्राज्ञे सर्व्वसामग्रिसंयुतः।
पुरुषः प्रतिपत्काले दन्तधावनपूर्व्वकं॥
नद्याङ्गत्वाथवा वाप्यां ब्रह्मचर्य्ये स्थिता सती।
तुलसीमृत्तिकां गृह्णन् तड़ागे गिरिनिर्झरे॥
स्नानं कुर्य्याद्व्रती पार्थ सुगन्धामलकैस्तिलैः।

दिनाष्टकं ततः पश्चात् सर्व्वौषध्या पुनः पुनः॥
यतया पिष्टया चाष्टौ दिनानि पृथगाचरेत्।
स्नात्वा ध्यात्वा रविं सम्यक्तर्पयित्वा पितॄंस्तथा।
तर्पयित्वा लिखेत् पिष्टैः कोकिलां पक्षिरूपिणीं॥
कलकण्ठां शुभैः पुष्पैः पूजयेच्चम्पकोद्भवैः।
पात्रैर्वा धूपनैवेद्यैर्दीपालक्तकचन्दनैः॥
तिलतण्डुलैर्दूर्व्वाग्रैः पूजयेत्तां क्षमापयेत्।
नित्यं नित्यञ्चरेद्भक्त्या मन्त्रेणानेन पाण्डव॥
तिलात्सहे तिलसौख्ये तिलवर्णे तिलप्रिये।
सौभाग्यधनपुत्रांश्च देहि मे कोकिले नमः।
इत्युच्चार्य्य ततः पश्चाद्गृहमभ्येत्य संयतः॥
कृत्वाहारं स्वपेत्पार्थ यावन्मासं समाप्यते।
मासान्ते ताम्रपात्रे तु कोकिलां तिलपिष्टजां॥
रत्ननेत्रां स्वर्णपक्षां ब्राह्मणाय निवेदयेत्।
वस्त्रैरलं गुडैर्युक्तां श्रावण्यां कुण्डलेऽथवा॥
श्वश्रूश्वशुरवर्गे वा दैवज्ञे वा पुरोहिते।
व्यासे वा संप्रदातव्या व्रतिभिः शुभकाङ्क्षया।
एवं या कुरुते नारी कोकिलाव्रतमादरात्।
सप्तजन्मनि सौभाग्यं सा प्राप्नोति सुविस्तरं॥
निःसपत्नं पतिं भव्यं सस्नेहं प्राप्य भूतले।
मृता गौरीपुरं याति विमानेनार्कवर्च्चसा॥
एतद्व्रतं वशिष्ठेन मुनिना गदितं पुरा।
तथा चानुष्ठितं पार्थ सम्यक् कीर्त्तिमालया॥

तयाप्तं सर्व्वसम्पन्नं वशिष्ठ वचनादि ह।
पुत्रसौभाग्यसत्कारं भर्त्तुश्चस्य प्रसादत: ॥
एतमन्यापि कौन्तेय कोकिलाव्रतमादरात्।
चरिष्यति ध्रुवं तस्याः सौभाग्यञ्च भविष्यति ॥

ये कोकिलां कलरवाकुलकण्ठपीठां
यच्छन्ति साज्यतिलपिष्टमयीं द्विजेभ्य:।
ते नन्दनादिषु वनेषु विहृत्य कामं
मर्त्त्यं समेत्य मधुरध्वनयो भवन्ति।

इति भविष्योत्तरोक्तं कोकिलाव्रत।

———000———

महाभारते।

श्रावणं नियतो मासमेकभक्तेन य: क्षिपेत्।
यत्र तत्राभिषेकेण युज्यते ज्ञातिवर्द्धन: ॥

विष्णुधर्म्मे।

अपरेश्चैकभक्तेन श्रावणं विष्णुतत्पर:।
अहिंस्र: सर्व्वभूतेषु वासुदेवपरायण: ।
नमोऽस्तु वासुदेवायेत्यष्टाष्टशतं जपेत्।
वाजपेयस्य यज्ञस्य समग्रं फलमश्नुते।

———000———

इति एकभक्तव्रतं।

वत्स उवाच।

भगवन् कर्म्मणा केन नित्यं धर्म्मपरो भवेत्।
धर्म्मवश्यं महाभाग जन्मसाफल्यकारणं॥

मार्कण्डेय उवाच।

आषाढ्यां समतीतायां प्रतिपत्प्रभृति क्रमात्।
पूर्व्ववत् पूजयेद्देवं धर्म्मविग्रहधारिणं॥

पूर्व्ववदित्यनेन रूपावाप्तिव्रतानुक्तविशेषेण ग्रहणं।

मासस्य चान्ते नृप पौर्णमास्यां
कुर्य्याच्चिराच्चं कनकञ्च दद्यात्।
व्रतोत्तमं धर्म्मकरन्तवोक्तं
सर्व्वार्थदं नात्र विचारमस्ति।

इति विष्णुधर्म्मोत्तरोक्तं धर्म्मावाप्तिव्रतं।

अथ भाद्रपदव्रतानि।

महाभारते।

प्रौष्ठपादन्तु यो मासमेकाहारो भवेन्नरः।
धनाढ्यस्फीतमतुलमैश्वर्य्यं प्रतिपद्यते॥

विष्णुधर्म्मे।

एकाहारो भाद्रपदे यस्तु कृष्णव्रतं नयेत्।
अहिंस्रः सर्व्वभूतेषु वासुदेवपरायणः॥
नमोऽस्तु वासुदेवायेत्यहन्यहन्यष्टशतं जपेत्।

राजसूयस्य यज्ञस्य फलन्दशगुणं लभेत् ॥

इति एकभक्तव्रतं।

———000———

वज्र उवाच।

भगवन् कर्म्मणा केन धनवान् पुरुषो भवेत्।
पुत्रवान् देवलोकेषु पूज्यो भवति मानवः ॥

मार्कण्डेय उवाच।

श्रावण्यां समतीतायां प्रतिपत्प्रभृति क्रमात्।
पूर्व्ववत् पूजयेद्विष्णुं देवं सङ्कर्षणं विभुं।
अनुक्तन्तु रूपावाप्तिव्रतादिनियं।
नीलोत्पलदलैः पत्रैर्भृङ्गराजस्य पार्थिव।
घृतेन परमान्नेन तथा विष्वैव पार्थिव ॥
त्रिरात्रोपोषितः सम्यक् प्रोष्ठपद्यां ततो नरः।
गाश्च दद्याद्द्विजेन्द्राय व्रतान्ते मनुजोत्तम ॥

कृत्वा व्रतं मासमिदं त्वयोक्त-
मासाद्य नाकं सुचिरं मनुष्यः।
मानुष्यमासाद्य धनान्वितः स्यात्
व्रतेन चीर्णेन नरेन्द्रसिंह ॥

इति विष्णुधर्मोत्तरोक्तं धनावाप्तिव्रतं।

———

अथाश्विनव्रतानि।

ब्रह्मोवाच।

मासि चाश्वयुजे शुक्ल एकादश्यामुपोषितः।
व्रतमीयात्तु व्रतं श्रेष्ठं कौमुदाख्यं महाफलं॥
अहिंसकः शुचिर्भूत्वा धौतवासा जितेन्द्रियः।
द्वादश्यामर्च्चयेत्स्नात्वा वासुदेवं जगद्गुरुं॥
विलिप्य तु सुगन्धैश्च चन्दनागुरुकुङ्कुमैः।
कमलोत्पलकह्लारैरक्तोत्पलसुगन्धिभिः॥
अर्च्चयेदच्युतं नित्यं मालत्या च सुगन्धया।
घृतेन पूरयेत्पात्रं न तु तैलेन पूरयेत्॥
दीपं दद्याद्दिवा नक्तं वर्त्या तु चिरया शुभं।
नैवेद्यं पायसापूपमोदकैर्विनिवेदयेत्॥
निवेद्य वासुदेवाय भक्त्या चैव जितेन्द्रियः।
व्रतमेतन्नरः कृत्वा धर्म्मं ध्यात्वा क्षमापयेत्॥
ओं नमो वासुदेवाय सततञ्च जपेद्बुधः॥
विप्रांश्च भोजयेच्छक्त्या दद्याच्चैव तु दक्षिणां।
अनेनैव विधानेन मासमेकं व्रतञ्चरेत्॥
यावद्विबुध्यते देवः कार्त्तिके गरुड़ध्वजः।
व्रतमेतन्महापुण्यं महापातकनाशनं॥
समं मासोपवासेन फलमस्याधिकं हि वा।
सर्व्वकामप्रदं पुण्यं पुत्रारोग्यधनावहं॥
व्रतमेतन्नरः कृत्वा विष्णुलोकमवाप्नुयात्।

इति विष्णुरहस्योक्तं कौमुदीव्रतं।

वज्र उवाच ।

भगवन् कर्म्मणा केन नरश्चारोग्यमाप्नुयात् ।
रूपसौभाग्यलावण्यं शरीमस्य निरर्थकं ॥

मार्कण्डेय उवाच ।

प्रौष्ठपद्यामतीतायां प्रतिपत्प्रभृतिक्रमात् ।
यावद्वाय दिवायामनिरुद्ध प्रपूजयेत् ।
पूर्व्वोक्तेन विधानेन यावदारोग्ययुगो भवेत् ॥

पूर्व्वोक्तेन रूपावाप्तिव्रतोक्तेन ।

मारसैरर्च्चयेद्देवं जातीपुष्पैर्द्दिने दिने ।

मारसैः कमलैः ।

घृतेन जुहुयाद्वह्निं घृतं दद्याद्द्विजातये ।
भोजनं गोरसप्रायं तथा विप्राय भोजयेत् ॥
त्रिरात्रोपोषितः सम्यगारोग्यज्यास्ततो नरः ।
सघृतं ससुवर्णञ्च कांस्यपात्रं द्विजातये ॥
दद्यान्नृपतिशार्दूल नरस्त्वारोग्यवृद्धये ।
व्रतमेतद्विनिर्द्दिष्टं स्वर्गलोकप्रदं शुभं ॥

न केवलं रोगहरं प्रदिष्टं
मात्राकरं रूपविवृद्धिदञ्च ।
व्रतोत्तमं ते कथितं नृवीर
यथेष्टकामाप्तिकरं नृलोके ॥

इति विष्णुधर्म्मोत्तरोक्तमारोग्यव्रतं ।

महाभारते।

तथैवाश्वयुजं मासमेकभक्तेन यः क्षिपेत्।
भृत्यवान् वाहनाढ्यश्च बहुपुत्रश्च जायते॥

विष्णुधर्मोत्तरे।

नयंश्चाश्वयुजं विष्णुं पूजयन्नक्तभोजनः।
अहिंस्रः सर्व्वभूतेषु वासुदेवपरायणः॥
नमोऽस्तु वासुदेवायेत्यहन्यष्टशतं जपेत्।
अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात्॥

इति एकभक्तव्रतं।

अथ कार्त्तिकव्रतानि।

कार्त्तिकीमासः सर्व्वदैवत्योऽस्मिंश्च सर्व्वदेवानां मुखं तस्मात्
कार्त्तिके मासि बहिः स्नायीत गायत्रीजपनिरतः।
सर्व्वदैवहविष्याशी संवत्सरकृतात्पापात् पूतो भवति॥

इति विष्णुस्मृत्युक्तः कार्त्तिकस्नानविधिः।

मैत्रेय उवाच।

कार्त्तिकः खलु मासो वै सर्व्वदेवमतो महान्।
यानि कृच्छ्राणि (१) चीर्णानि सर्व्वपापहराणि हि॥
कृतानि मुनिभिस्तानि भवन्ति मनुजाधिप।

---

(१) यानि व्रतानि इति पाठान्तरं।

देवर्षिदेवमनुष्येभ्यो दत्तं घृतमधु प्लुतं ॥
तथाश्रमचयं प्रोक्तं ब्रह्मणा लोककर्तृणा ।
समभ्यर्च्य हरिं भक्त्या दीपं दत्त्वा दिवानिशं ।
सर्व्वपापविशुद्धात्मा नरो याति दिवं नृप ॥

इति वह्निपुराणोक्तं कार्त्तिकव्रतं ।

सनत्कुमार उवाच ।

दामोदरस्य वाक्यन्तु श्रुत्वा प्रश्नञ्चकार सः ।
केनोपायेन भगवन्नश्यति तन्महत्तमः ॥
नाकलोकसमं सौख्यं प्रेतलोके भवेत्कथं ।
भगवन् देवकीपुत्रस्तद्वाक्यस्योत्तरं ददौ ॥
उवाच परमं गुह्यं मनोरथफलप्रदं ।
भो शृणुष्व महाबुद्धे यत् प्रवक्ष्यामि ते वचः ॥
पूर्ब्बे चाश्वयुजे मासि पौर्णमास्यां समाहितः ॥
प्रथमे च निशारम्भे मनोवाक्कायसंयतः ।
नमः पितृभ्यः प्रेतेभ्यो नमोधर्म्माय विष्णवे ।
नमो यमाय रुद्राय कान्तारपतये नमः ॥
दद्यादनेन मन्त्रेण दीपं श्रद्धासमन्वितः ।
यः कार्त्तिकं समग्रन्तु वर्त्तन्ते तस्य सम्पदः ॥
दिवाकरेऽस्ताचलमौलिभूते
गृहाददूरे पुरुषः पुराणं ।
यूपाकृतिं यज्ञियवृक्षदारु

मारोप्य भूमावथ तस्य मूर्द्ध्नि ॥
यवाङ्कुलच्छिद्रयुतास्तु मध्ये
द्विहस्तदीर्घास्य सुपट्टिकासु।
कृत्वा चतस्रोऽष्टदला कृतिस्तु
याभिर्भवेदष्टदिगानुसारी ॥

यवैर्मितमङ्गुलं यवाङ्कुलं।

तत्कर्णिकायास्तु महाप्रकाशो
दीपः प्रदेयो दलगास्तथाष्टौ।
खदिक्षु खा दीपवरास्तु तैल-
घृतादियुक्तास्तु यथोपलब्धं ॥
घनङ्कुलमन्त्वथ वस्त्रखण्डं
नवं सुरक्तमथवा सुशुक्लं ॥

घनङ्कुलन्तं अपरिछिन्नं ॥

धन्यं प्रयोज्यं वसुकस्य छयं
स्निग्धं सुखत्वं सुसमं समस्तं।
तच्छालिपिष्टोपरिसन्निधेयं
यथा न नश्येत्र च कम्पते वा ॥
सर्व्वं प्रकुर्य्यात्त्रिगुणप्रमाणं
मध्ये स्थितस्याप्यथ दीपराजः।
दलेषु शोभाढ्यमतीव कुर्य्यात्
मनोरथानामुपलब्धये च ॥
घण्टाष्टकं लम्बितपुष्पदाम
सुवस्त्रशोभान्वितमत्र पश्चात्।

संयोज्य भूमिं त्वथ गोमयेन
सचन्दनाक्तेन जलेन लिप्तां।
अनेकवर्णैरथ मण्डले तु
कृत्वाष्टपत्रं कमलप्रमाणं।
फलानि मूलानि तथाक्षतानि
लाजा दधिक्षीरमथान्नपानं॥
नानाविधं भक्ष्यविशेषणञ्च
सुनृत्यगीतं मधुरञ्च वाद्यं।
निवेद्य धर्माय हराय भूमौ
दामोदरायाप्यथ धर्मराज्ञे॥
प्रजापतिभ्यस्त्वथ मातृपितृभ्यः
प्रेतेभ्य एवाथ तमस्थितेभ्यः।
नैर्ऋत्यकोणादथ दक्षिणान्तं
धर्मादिभ्यः प्रेतपर्य्यन्तिकेभ्यः॥
ततोजलं शीतलमानयित्वा
सर्पिःसमध्वक्तमतीव हृद्यं।
आपूर्य्य चाष्टौ कलशान् जलेन
नैर्ऋत्यकोणादथ सन्निधाय॥
हेमादिपात्रन्तिलमेव पूर्णं
दद्यात्पिधानञ्च सदक्षिणञ्च।
गोभूहिरण्यं रजतञ्च वस्त्रं
फलानि भुक्तानि यवञ्च धान्यं॥
गृहं रथं शयनं वाहनञ्च

यद्वाथ किञ्चिद्धृदये मनोज्ञं ।
निवेदयेद्ब्राह्मणसत्तमेभ्यो
नैर्ऋत्यकोणादथ संस्थितेभ्यः ॥
एकैकशः प्रीणनकाय कुर्यात्
धर्म्मादिभ्यः प्रेतपुर्य्यान्तिकेभ्यः ॥
एतत्समग्रं विधिवच्च कुर्यात्
स्वशक्तिमादौ स्वधनं विचार्य्य ॥
दीपान् समग्रानथ वर्जयित्वा
सर्व्वं नयेयुस्त्वपि विप्रमुख्यान् ।
प्रदक्षिणीकृत्य वनाङ्गनास्तु
ततोभवेत्संयतनक्तभोजी ॥
वनाङ्गनां वनदेवतां दीपस्तम्भमूर्त्तिं ।
इतीदमीदृग्व्यवहारयुक्तं
निशागमे प्रत्यहमेव कुर्य्यात् ।
मासं समग्रं परया च भक्त्या
समाप्यते कार्त्तिकपौर्णमास्यां ॥
दिनत्रयं दीपमहोत्सवं वा
एकोऽथ वा दीपवरश्च देयः ।
तथाश्व युज्यादिसमग्रमासं
निशागमे प्रत्यहमेव भक्त्या ॥
नमोऽस्तु कान्तारकदेवताभ्यः
इतीव मुक्त्वा स्वगृहस्य शान्त्यै ।
नार्य्या नरेणाथ सुसंयतेन

भक्त्या युतेनाथ निशासु भोज्यं ॥
सन्ध्यात्रये दीपवराश्च देयाः
रात्र्यां समे कार्त्तिकपौर्णमास्यां ।
दरिद्रवेश्मस्वथ गोकुलेषु
श्मशानदेवायतनेषु चैत्ये
नदीतटेषु स्वगृहान्तरे वा
अथैकलिङ्गे पथि चैकवृक्षे ॥
सहस्रमष्टाधिकमत्र तैल-
पलस्य पात्रे सुशुभे शतं वा ॥
ये नो तदर्द्धैरथवा तदर्द्धैः
प्रमाण्य रिक्तास्त्वथ पूरणीयाः ।
हस्तान् स्वकीयांश्च चतुर्दशैव
प्रमाण्य वस्त्रं त्वथ सूत्रवर्त्तिं ॥
प्रज्वालयेत्तांश्च निरुध्य धीमान्
स्त्रीणामलङ्कारशतैः प्रपूज्य ।
देवी महावर्त्तिरतीव वन्द्या
पुण्या च साध्या भुवनप्रकाशी ॥
एतच्च कुर्य्यादथ यस्तु मन्द-
स्तस्यान्धकारस्य कुतोऽपि शान्तिः ।
अयं हि दीपः किलकल्पवृक्ष-
श्चिन्तामणिर्भद्रघटोऽथ वेणुः ॥
अनेन दीपेन मनोरथानां
सम्प्राप्तिरस्तीति न संशयोऽत्र ।

एतानि उक्ता कतिचिद्वचांसि
दामोदरश्चान्तरितो बभूव ॥

इत्यादिपुराणोक्तः प्रदीपविधिः।

वज्र उवाच।

भगवन् कर्म्मणा केन सर्व्वत्र जयमाप्नुयात्।
व्यवहारे रते द्यूते विवादे च द्विजोत्तम ॥
जयावाप्तेः परन्नास्ति सौख्यं लोकेषु सत्तम।
जयावाप्तिः परं सौख्यं तदपि व्रतमुच्यताम्।

मार्कण्डेय उवाच।

आश्वयुज्यामतीतायां प्रतिपत्प्रभृतिक्रमात्।
पूर्व्ववत् पूजयेद्देवं लोकनाथं त्रिविक्रमं ॥
पूर्व्ववदिति रूपावाप्तिव्रतवत्।
त्रिरात्रान्ते तु कार्त्तिक्यां दद्याद्व्रणमुत्तमं।
सर्व्वगन्धधरः कृत्वा गन्धमाल्यैरलङ्कृतः ॥

कृत्वा व्रतं मासमिदं यथोक्तं
प्राप्नोति लोकं सुचिरं नृवीर।
तत्रोष्य कालं सुचिरं मनुष्यः
प्राप्नोति सर्व्वत्र जयन्त्रिलोके ॥

इति विष्णुधर्मोत्तरोक्तं जयावाप्तिव्रतं।

ब्रह्मोवाच।

सुपुण्ये कार्त्तिके मासि देवर्षिपितृसेविते।
क्रियमाणे व्रते नृणां स्वल्पेऽपि स्यान्महाफलं॥
कृत्स्नः संवत्सरः पुण्यस्तस्मादब्देषु पूजितः।
तत्रापि कार्त्तिकः पुण्यः कार्त्तिकान्नौ प्रपञ्चकं॥
नैवेद्यं पुष्पधूपञ्च अर्चनं सुविलेपनं।
दत्त्वैकं कार्त्तिकं विष्णोः फलं सांवत्सरं लभेत्॥
अतः कार्त्तिकमासाद्य सदैव शुभकाङ्क्षिभिः।
हरिमुद्दिश्य कर्त्तव्यं सुशक्त्या सुकरं व्रतं॥
कार्त्तिकस्यासिते पक्षे वायुभक्षस्तु र्दशीं।
समुपोष्य नरो भक्त्या पूजयेद्गरुडध्वजं॥
उपवासस्तु कर्त्तव्यो वारिमध्ये स्थितेन च।
जलकृच्छ्रमिदं कृत्वा विष्णुलोकं व्रजेन्नरः॥
दशम्यां पञ्चगव्याशी एकादश्यामुपोषितः।
अर्चयेच्चाच्युतं देवं नियतश्च व्रतञ्चरेत्॥
कार्त्तिकस्यासिते कृत्वा नरो देवव्रतञ्चरेत्।
दामोदरं समभ्यर्च्य देवो वैमानिको भवेत्॥
अपः क्षीरं दधि घृतं सप्तम्यादिचतुर्दिनं।
कार्त्तिकस्यासिते पीत्वा एकादश्यामुपोषितः॥
कृच्छ्रमेतामहं नाम कुर्वन् संपूजयेद्धरिं।
प्राप्नोति परमं विष्णोः स्थानं त्रैलोक्यपूजितं।
त्रिरात्रं पयसः पानमुपवासपरस्य च॥
षष्ठ्यादौ कार्त्तिके शुक्ले कृच्छ्रो माहेन्द्र उच्यते।

दामोदरं समभ्यर्च्य क्लच्छं माचेन्द्रमाचरेत् ॥
प्रयात्यसुलभन्देव विष्णुलोकमनुत्तमं।
व्रीहं मुन्यन्नमश्नीयाद्यावकञ्च व्रीहं ततः ॥

मुन्यन्नं नीवारान्नं।

त्र्यहञ्चोपवसेदन्त्यं क्लच्छोऽयं वैष्णवः स्मृतः।
कार्त्तिकस्य तृतीयादावर्चयेद्विष्णुमव्ययं।
शुक्लपक्षे नरो याति तद्विष्णोः परमं पदं ॥
पञ्चरात्रं पयः पीत्वा प्रतिपत्प्रभृतिक्रमात्।
दध्याहारो भवेत्पञ्च एकादश्यामुपावसेत् ॥
कार्त्तिकस्य सिते कुर्वन् पूजयेद्गरुड़ध्वजं।
भास्कराख्यमिदङ्कृत्वा श्वेतद्वीपं व्रजेन्नरः ॥
यवागूं यावकं शाकं दधिक्षीरघृतञ्जलं।
पञ्चम्यादि सिते पक्षे कार्त्तिकस्य समाचरेत् ॥
क्लच्छं सप्तर्षिदश्चेदं कुर्व्वन्विष्णुर्व्रते रतः।
वैष्णवं लोकमाप्नोति पुनरावृत्तिवर्ज्जितं ॥
पलाशविल्वपत्रैश्च कुशपद्मैरुडुम्बरैः।
सुश्रृतञ्च पिबेत् क्षीरं पञ्चरामुपवसेद्दिनं ॥
कुर्व्वन् हि कार्त्तिके शुक्ले क्लच्छमाग्नेयमुत्तमं।
विष्णुलोकमवाप्नोति भक्त्याभ्यर्च्य जनार्द्दनं ॥
पयो विल्वानि पद्मानि मृणालकवलानि तु।
सप्तम्यादौ नरः क्लत्वा एकादश्यामुपावसेत् ॥
कार्त्तिकस्यामले पक्षे लक्ष्मीप्रदमिदं व्रतं।
केशवञ्च समभ्यर्च्य वैष्णवीं गतिमाप्नुयात् ॥

कृच्छ्राण्येतानि सर्व्वाणि सर्व्वपापहराणि च ।
कर्त्तव्यानि नरैर्भक्त्या कार्त्तिके तु विशेषतः ॥
गृहस्थो वा वनस्थो वा मुमुक्षुर्वाथ भिक्षुकः ।
कृत्वा व्रतमवाप्नोति वैष्णवं पदमव्ययं ॥
कृच्छ्राणि कुर्व्वन् सर्व्वाणि वाग्मनोनियतेन्द्रियः ।
धौतवासाः शुचिस्नातः पूजयेद्देवमच्युतं ॥
अहिंसको दानरतो जपहोमपरायणः ।
अर्चयेद्वरदं विष्णुं कृच्छ्राणि तु समाचरेत् ॥
व्रतद्रव्याणि सर्व्वाणि क्षीरादीनि सदा व्रती ।
विप्रदत्तानि चाश्नीयाद्भिक्षया न प्रकामतः ॥
यानि वै परकीयानि द्रव्याणि कथितानि तु ।
तेषां पुण्यतमन्दानं यद्ददाति द्विजोत्तमे ।
कुर्व्वन् कृच्छ्राणि पोड़ार्त्तः क्षुधया मुह्यतेऽथ वा ॥
अमृतन्तु गवां क्षीरं पाययेत् पोड़ितन्नरं ॥
अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं ॥
यथोक्तेन विधानेन कृच्छ्राणि समुपाचरेत् ।
कार्त्तिके कृष्णमभ्यर्च्य याति यत्र जनार्द्दनः ॥
एवं नानाव्रतैर्नित्यं पूजितो गरुड़ध्वजः ।
व्रतोपवासनियमैस्ते मुक्तिफलभागिनः ॥

इति विष्णुरहस्योक्तानि कृच्छ्रव्रतानि ।

मान्धाता उवाच।

संप्राप्य कार्त्तिकं मासं राजा रुक्माङ्गदो मुने।
मोहिनीं मोहसंयुक्तां कथं सम्बुभुजे वद॥
विष्णुभक्तस्तुतिपरः प्रवरः स महीचितां।
तस्मिन् पुण्योत्तमे मासि तस्यां किमकरोन्नृपः॥

वसिष्ठ उवाच।

संप्राप्य कार्त्तिकं मासं प्रबोधकरणं हरेः।
अतिमुग्धोऽप्यसौ राजा मोहिनीं वाक्यमब्रवीत्॥
यत देवि त्वया सार्द्धं बहून् संवत्सरान् मया।
तवापमानस्य भयान्न त्वं मुक्ता मया क्वचित्॥
साम्प्रतं व्रतकामोऽहं तन्निबोध वरानने।
त्वय्यासक्तस्य मे देवि बहवः कार्त्तिका गताः॥
न व्रतौ कार्त्तिके जातौ मुक्त्वैकं हरिवासरं।
सोऽहं कार्त्तिकमिच्छामि व्रतेन परिसर्प्पितुं॥
अव्रतेन गतो येषां कार्त्तिको मर्त्यधर्म्मिणां।
इष्टापूर्त्तं वृथा तेषां धर्म्मं पद्मोद्भवात्मजे॥
मांसाशिनो हि भूपाला अत्यर्थं मृगयागताः।
ते मांसं कार्त्तिके त्यक्त्वा गता विष्णालयं शुभं॥
प्रवृत्तानां हि भक्ष्याणां कार्त्तिके नियमे कृते।
अवश्यं विष्णुरूपत्वं प्राप्यते मुक्तिसाधनं॥
उदयात्प्रातरुत्कृष्टि दीपदानादिवं व्रजेत्।
तस्याप्यभावे सुभगे परदीपप्रबोधनं॥
कर्त्तव्यं भूतिकामेन सर्व्वदानाधिकं यतः।

एकतः सर्व्वदानानि दीपदानं हि चैकतः॥
कार्त्तिके न समं प्रोक्तं दीपको ह्यधिकः स्मृतः।
कार्त्तिके कार्त्तिकीं कृत्वा विष्णोर्नाभिभवोद्भवे।
आजन्मनः कृतात् पापान्मुच्यते नात्र संशयः।
व्रतोपवासनियमैः कार्त्तिको यस्य गच्छति॥
देवो वैमानिको भूत्वा स याति परमं पदं।
तस्मान्मोहिनि मोहन्तु परित्यज्य ममोपरि॥
भव भूधरपूजायां निरता नीरजेक्षणे।
अहं व्रतधरश्चैव भविष्ये हरिपूजने॥

मोहिन्युवाच।

विस्तरेण ममाख्याहि माहात्म्यं कार्त्तिकस्य च।
सर्व्वपुण्याधिकः प्रोक्तो मासोऽयं राजसत्तम॥
विशेषात् पुष्करे प्रक्तो द्वारावत्यान्तु सौकरे।
श्रुत्वा कार्त्तिकमाहात्म्यं करिष्येऽहं यथेप्सितं॥

रुक्माङ्गद उवाच।

माहात्म्यमभिधास्यामि मासस्यास्य वरानने।
येन ते जायते भक्तिर्भक्त्या येनार्च्यते हरिः॥
कार्त्तिके कृच्छ्रसेवी यः प्राजापत्यरतोऽपि वा।
षड्द्वादशाहं पक्षं वा मासं वा वरवर्णिनि॥
क्षपयित्वा नरो याति तद्विष्णोः परमं पदं।
एकभक्तोऽथवा नक्तं तथा शुभ्रु अयाचितं॥
कृते नरैर्वराप्राप्तिर्भवेद्वै दीपमालया।
तस्मिन् हरिदिने पुण्यं तथा वै भीष्मपञ्चकं॥

प्रबोधनीं नरः कृत्वा जागरेण समन्विताम्।
न मातुर्जठरे याति अपि पापान्वितो नरः॥
तस्मिन्दिने वरारोहे मण्डलं यस्तु पश्यति।
विना सांख्येन योगेन स याति परमं पदम्॥
कार्त्तिके मण्डलं दृष्ट्वा सौकरे शूकरं शुभे।
दृष्ट्वा कोकवराहन्तु न भूयस्तनपो भवेत्॥
त्रिविधस्य तु पापस्य दृष्ट्वा मुक्तिर्भवेन्नृणाम्।
मन्दारे चपलापाङ्गि कुब्जके श्रीधरं तथा॥
कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु।
कार्त्तिके वर्जयेत्कांस्यं कार्त्तिके मासि सन्धितम्॥

तैलं राजिकादिसन्धानं।

निष्पावान् कार्त्तिके देवि यो भुङ्क्ते विष्णुतत्परः।
संवत्सरकृतात्पुण्याद्धानिर्भवति तत्क्षणात्॥
प्राप्नोति रजकीं योनिं सकृद्भक्षणसम्भवात्।
कार्त्तिके सौकरं मांसं यस्तु भुङ्क्ते सुदुर्मतिः॥
षष्टिर्वर्षसहस्राणि रौरवे परिपच्यते।
तस्मुक्तो जायते पापी विष्ठाशी ग्रामशूकरः॥
न मात्स्यं भक्षयेन्मांसं न कौर्म्मं नान्यदेव हि।
चण्डालो जायते राजन् कार्त्तिके मांसभक्षणात्॥
कार्त्तिकः सर्व्वपापघ्नः किञ्चिद्व्रतधरस्य तु।
गच्छेद्यस्य तु धर्म्मात्मा न स शोच्यः कृताकृते॥
कार्त्तिके तु कृता दीक्षा नृणां जन्मनिकृन्तनी।
तस्मात्सर्व्वप्रयत्नेन दीक्षां कुर्वीत कार्त्तिके॥

अदीक्षितस्य वामोरु कृतं सर्व्वं निरर्थकं ।
पशुयोनिं समाप्नोति दीक्षया कुलजन्म च ॥
न गृहे कार्त्तिकीं कुर्य्याद्विशेषेण तु कार्त्तिकीं ।
तीर्थेषु कार्त्तिकीं कुर्य्यात् सर्व्वयत्नेन भामिनि ॥
कार्त्तिके शुक्लपक्षस्य कृत्वा चैकादशीं नरः ।
प्रातर्दत्त्वा शुभान् कुम्भान् स याति हरिमन्दिरं ॥
संवत्सरव्रतानां हि समाप्तिः कार्त्तिके स्मृता ।
पञ्चाहा यत्र दृश्यन्ते विष्णोर्नाभिजसम्भवे ॥
दिनानि यत्र चत्वारि तथैव वरवर्णिनि ।
उत्तरायणहीनेऽपि शुक्लिलग्नं विना शुभे ॥
दृश्यन्ते यत्र सम्बन्धाः पुत्रपौत्रविवर्द्धनाः ।
तस्मात्तोषिणि कर्त्तास्मि कार्त्तिकव्रतसेवया ।
अशेषपापनाशाय तव प्रीतिविवृद्धये ॥

इति नारदीयोक्तं कार्त्तिकमासव्रतं ।

———ooo———

ब्रह्मोवाच ।

क्षीराशी कार्त्तिके यस्तु देव्या भक्तिरतो नरः ।
शाकपाचकनक्ताशी प्रातस्नायी शिवारतः ॥
पूजयेत्तिलहोमस्तु मधुक्षीरघृतादिभिः ।
कार्य्यस्तु देवीमन्त्रेण शृणु पुण्यफलं हरेः ॥
महापातकसंयुक्तो युक्तो वा तूपपातकैः ।
मुच्यते नात्र सन्देहो यस्मात्सर्व्वगता शिवा ॥

अन्यो वा भावनायुक्तो अनेन विधिना शिवां।
स्वयं वा अन्यतो वापि पूजयेत् पूजयेत वा॥
न तस्य भवति व्याधिर्न च शत्रुकृतं भयं।
नोत्पातं ग्रहदुःस्थं वा न च राष्ट्रं विनश्यति॥
महास्वभावसम्पन्ना ऋतवः शुभदायकाः।
निष्पत्तिः सर्व्वशस्यानां तस्करा न भवन्ति च॥
प्रभूतपयसो गावो ब्राह्मणाः सत्क्रियापराः।
स्त्रियः पतिव्रताः सर्व्वा नृपा निर्हतवैरिणः॥
फलपुष्पवती देवी वनस्पतिमती मही।
भवने नात्र सन्देहश्चण्डिकाविधिपूजनात्॥
जयन्ती मङ्गला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा नमोऽस्तु ते॥
अनेनैव तु मन्त्रेण जपहोमन्तु कारयेत्।
प्रातः सम्यक् स्मृता वत्स महिषघ्नी प्रपूजिता॥
अघं नाशयति क्षिप्रं यथा सूर्य्योदयस्तमः।

इति देवीपुराणोक्तं देवीव्रतं।

———ooo———

नारद उवाच।

भगवन् श्रोतुमिच्छामि व्रतानामुत्तमस्य च।
विधिं मासोपवासस्य फलञ्चास्य यथोदितं।
यथाविधा नरैः कार्य्या व्रतचर्य्या यथा भवेत्।
आरभ्यते यथापूर्व्वं समाप्यं हि यथाविधि॥

यावत्संख्यस्तु कर्त्तव्यं तावद्ब्रूहि पितामह।
व्रतमेतत् सुरश्रेष्ठ विस्तरेण ममानघ॥

ब्रह्मोवाच।

साधु नारद यच्चैतत् पृष्टस्त्वं तपोधन।
याद्दक्श्रुतिमतां श्रेष्ठ तच्छृणुष्व ब्रवीमि ते॥
सुराणाञ्च यथा विष्णुस्तपताञ्च यथा रविः।
मेरुः शिखरिणां यद्वद्वैनतेयस्तु पक्षिणां॥
तीर्थानान्तु यथा गङ्गा प्रजानान्तु यथा वणिक्।
श्रेष्ठं सर्व्वव्रतानान्तु तद्वन्मासोपवासनं॥
सर्व्वव्रतेषु यत्पुण्यं सर्व्वतीर्थेषु यत्फलं।
सर्व्वदानोद्भवं वापि लभेन्मासोपवासकृत्॥
अग्निष्टोमादिभिर्य्यज्ञैर्विधिवद्भूरिदक्षिणैः।
न तत्पुण्यमवाप्नोति यन्मासपरिलङ्घनात्॥
तेन दत्तं हुतं जप्तं स्नानञ्चैव स्वधा कृता।
यः करोति विधानेन नरो मासमुपोषणं॥
प्रविश्य वैष्णवं यज्ञं तेनाभ्यर्च्य जनार्द्दनं।
गुरोराज्ञां ततो लब्ध्वा कुर्य्यान्मासोपवासनं॥
वैष्णवानि यथोक्तानि कृत्वा सर्व्वव्रतानि तु।
द्वादश्यादीनि पुण्यानि ततो मासमुपाचरेत्॥
अतिकृच्छ्रं पराकञ्च कृत्वा चान्द्रायणं ततः।
मासोपवासङ्कुर्व्वीत ज्ञात्वा देहबलाबलं॥
वानप्रस्थो यतिर्व्वापि नारी वा विधवा मुने।
मासोपवासं कुर्व्वीत गुरुविप्राज्ञया ततः॥

आश्विनस्यामले पक्षे एकादश्यामुपोषितः।
व्रतमेतत्तु गृह्णीयाद्यावत् त्रिंशद्दिनानि तु॥
वासुदेवं समुद्दिश्य कार्त्तिकं सकलं नरः।
मासस्योपवसेद्यस्तु स मुक्तिफलभाग्भवेत्॥
अच्युतस्यालये भक्त्या त्रिकालं कुसुमैः शुभैः।
मालतीन्दीवरैः पद्मैः कमलैः सुसुगन्धिभिः॥
कुङ्कुमोशीरकर्पूरैर्विलिप्य वरचन्दनैः।
नैवेद्यधूपदीपाद्यैरर्चयेत जनार्द्दनं॥
मनसा कर्मणा वाचा पूजयेद्गरुड़ध्वजं।
कुर्य्यान्नरस्त्रिसवनं ब्रह्मचारी जितेन्द्रियः॥
नाम्नामेव तथालापं विष्णोः कुर्य्यादहर्निशं।
भक्त्या विष्णोस्तुतिर्वाच्या मृषावादं विवर्ज्जयेत्॥
सर्व्वसत्त्वदयायुक्तः शान्तवृत्तिरहिंसकः।
सुप्तो वासनसंस्थो वा वासुदेवं प्रकीर्त्तयेत्॥
स्मृत्यालोकनगन्धादिस्वादनं परिकीर्त्तनं।
अन्नस्य वर्ज्जयेत् सर्व्वं ग्रासानाञ्चाभिकाङ्क्षनं॥
गात्राभ्यङ्गं शिरोऽभ्यङ्गं ताम्बूलं सुविलेपनं।
व्रतस्थो वर्ज्जयेत् सर्व्वं यच्चान्यत्र निराकृतं॥
व्रतस्थो न स्पृशेत्किञ्चिद्विकर्मस्थान्न चालयेत्।
देवतायतने तिष्ठेन्न गृहस्थश्चरेद्व्रतं॥
कृत्वा मासोपवासन्तु सम्भृतात्मा जितेन्द्रियः।
ततोऽर्च्चयेत्ततः पुष्पं द्वादश्याङ्गरुड़ध्वजं॥
पूजयेत्पुष्पमालाभिर्गन्धधूपविलेपनैः।

वस्त्रालङ्कारवाद्यैश्च तोषयेदच्युतं नरः ॥
स्नापयेत हरिं भक्त्या तीर्थचन्दनवारिणा।
चन्दनेनानुलिप्ताङ्गं पुष्पधूपैरलङ्कृतं ॥
वस्त्रदानादिभिश्चैव भोजयेच्च द्विजोत्तमान्।
दद्याच्च दक्षिणां तेभ्यः प्रणिपत्य क्षमापयेत् ॥
विप्रान् क्षमापयित्वा तु विसृज्याभ्यर्च्य पूज्य च।
एवं वित्तानुसारेण भक्तियुक्तेन शक्तितः ॥
एवं मासोपवासन्तु कृत्वाभ्यर्च्य जनार्द्दनं।
भोजयित्वा द्विजांश्चैव विष्णुलोके महीयते ॥
एवं मासोपवासं हि सम्यक् कृत्वा त्रयोदश।
निर्व्वापयेत्ततस्तान् वै विधिनानेन तच्छृणु ॥
कारयेद्वैष्णवं यज्ञमेकादश्यामुपोषितः।
पूजयित्वा च देवेशमाचार्य्यानुज्ञया हरिं ॥
अर्चयित्वा हरिं भक्त्या अभिवाद्य गुरुंस्तथा।
ततोऽनुभोजयेद्विप्रान् भोजयीत यथाविधि ॥
विशुद्धकुलचारित्रान् विष्णुपूजनतत्परान्।
पूजयित्वा द्विजान् सम्यग्भोजयित्वा त्रयोदश ॥
तावन्ति वस्त्रयुग्मानि भाजनान्यासनानि च।
योगपट्टानि शुभ्राणि ब्रह्मसूत्राणि चैव हि।
दद्याच्चैव द्विजाग्रेभ्यः पूजयित्वा प्रणम्य च।
ततोऽनुकल्पयेच्छय्यां शस्तास्तरणसंस्कृतां ॥
साच्छादनशुभां श्रेष्ठां सोपधानामलङ्कृतां।
कारयित्वात्मनो मूर्त्तिं काञ्चनीन्तु स्वशक्तितः ॥

न्यसेत्तस्यान्तु शय्यायामर्चयित्वा स्रगादिभिः।
आसनं पादुके छत्रं वस्त्रयुग्ममुपानहौ॥
पवित्राणि च पुष्पाणि शय्यायामुपकल्पयेत्।
एवं शय्यान्तु सङ्कल्पा प्रणिपत्य च तान् द्विजान्॥
प्रार्थयेचानुमोदार्थं विष्णुलोकं व्रजाम्यहं।
एवमभ्यर्चिता विप्रा वदेयुर्व्रतिनं सदा॥
व्रज व्रज नरश्रेष्ठ विष्णोःस्थानमनामयं।
विमानं वैष्णवं दिव्यं सशय्यापरिकल्पितं॥
तेन विष्णुपदं याहि सदानन्दमनामयं।
ततो विसर्जयेद्विप्रान् प्रणिपत्यानुगम्य च॥
ततस्तु पूजयेद्भक्त्या गुरुं ज्ञानप्रदायकं।
तां शय्यां कल्पितां सम्यग्गुरुं व्रतसमापकं॥
प्रणम्य शिरसा शान्तो गुरवे प्रतिपादयेत्।
एवं पूज्य हरिं विप्रान् गुरुं ज्ञानप्रकाशकं॥
कृत्वा मासोपवासांश्च नरो विष्णुतनुं विशेत्।
कृतमासोपवासश्च विष्णुपूजनतत्परः॥
नयेच्छान्तमनाः कालं धर्मस्थः सुजितेन्द्रियः।
कृत्वा मासोपवासांश्च निर्व्वाह्य विधिवन्मुने॥
कुलानां शतमुद्धृत्य विष्णुलोकं व्रजेन्नरः।
तस्मिन् जातो महापुण्ये कुले मासोपवासकृत्॥
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते।
नरो मासोपवासानां कर्त्ता पुण्यवतां नरः॥
पितृमातृकुलाभ्याच्च समं विष्णुपुरीं व्रजेत्।

नारी वा सुमहाभागा यथोक्तं व्रतमास्थिता ।
कृत्वा मासोपवासांश्च व्रजेद्विष्णुं सनातनं ॥

नारद उवाच ।

सुदुष्करमिदं देव मूर्च्छाग्लानिकरं नृणां ।
व्रतं मासोपवासाख्यं भक्तिं जनयतेऽच्युते ॥
पीड़ितस्य भगन्देव मुमूर्षोर्व्रतिनस्तदा ।
त्यागो वानुग्रहो वाथ किन्नु कार्य्यः पितामह ॥

ब्रह्मोवाच ।

व्रतस्थं कथितं दृष्ट्वा मुमूर्षुं वा तपोधन ।
दृष्ट्वा तु ब्राह्मणस्तस्य कुर्य्यात्सम्यगनुग्रहं ॥
अमृतं पाययेत् क्षीरमिच्छमानं सकृन्निशि ।
यथेह न वियुज्येत प्राणैः क्षुत्पीड़ितो व्रती ॥
अतिमूर्च्छान्वितं क्षीणं मुमूर्षुं क्षुत्प्रपीड़ितं ।
पाययित्वा सितं क्षीरं रक्षेद्दत्त्वा फलानि च ॥
अहोरात्रञ्च यो नित्यं व्रतस्थं परिपालयेत् ।
पयो मूलं फलं दत्त्वा विष्णुलोकं व्रजेत सः ॥
एवं मासोपवासस्थमारूढं प्राणसंशये ।
अव्रतघ्नगुणैर्द्दिव्यैः परोपदिष्टब्राह्मणाज्ञया ॥
नैते व्रतं विनिघ्नन्ति हविर्विप्रानुमोदितं ।
क्षीरौषधं गुरोराज्ञयापो मूलफलानि च ॥
एवं कृत्वाभिभक्षेत(१) सगुड़ं पायसं तदा ।

(१) एवं कृत्वाभिवाञ्छेति क्वचित् पाठः ।

पाययेद्दक्षितो यस्मात्समाप्नोति पुनर्व्रतं ॥
अथ विष्णुर्व्रतं विष्णुर्दाता विष्णुर्व्रती तथा।
सर्व्वं विष्णुमयं ज्ञात्वा व्रतस्थं क्षीणमुद्धरेत् ॥
यथा मुमूर्षुर्निश्चेष्टः परिम्लानोऽतिमूर्च्छितः।
तदा समुद्धरेत् क्षीणमिच्छन्तं विमुखस्थितं ॥
परिपाल्य व्रती देहं व्रतशेषं समापयेत्।
यथोक्तं द्विगुणं तस्य फलं विप्रमुखोदितं ॥
इन्द्रियार्थेष्वसंसक्ता सदैव विमला मतिः।
परितोषयते विष्णुं नोपवासोऽजितात्मनां ॥
किं तस्य बहुभिस्तीर्थैः स्नानहोमजपव्रतैः।
येनेन्द्रियगणो घोरो निर्जितो हृष्टचेतसा ॥
जितेन्द्रियः सदा शान्तः सर्व्वभूतहिते रतः।
वासुदेवपरो नित्यं न क्लेशं कर्त्तुमर्हति ॥
कृत्वा व्रतं(१) यथोक्तन्तु वैष्णवं पुरुषोत्तमं।
विष्णुलोकमवाप्नोति पुनरावृत्तिदुर्लभं ॥
ये स्मरन्ति सदा विष्णुं विशुद्धेनान्तरात्मना।
ते प्रयान्ति भयं त्यक्त्वा विष्णुलोकमनामयं ॥
प्रभाते चार्द्धरात्रे च मध्याह्ने दिवसक्षये।
अच्युतं येऽनुकीर्त्तन्ति ते तरन्ति भवार्णवं ॥
आनन्दितोऽथ दुःखार्त्तः क्रुद्धः शान्तोऽथवा हरिं।
यो हि कीर्त्तयते भक्त्या स गच्छेद्वैष्णवीं पुरीं ॥

---

(१) कृत्वा नूनमिति क्वचित् पाठः।

गर्भजन्म-जरारोग-दुःखसंसारबन्धनैः।
न बाध्यते नरो नित्यं वासुदेवमनुस्मरन्॥
स्थावरे जङ्गमे सत्त्वे स्थूले सूक्ष्मे शुभाशुभे।
विष्णुं पश्यति सर्व्वत्र यः स विष्णुः स्वयं नरः॥
सर्व्वं विष्णुमयं ज्ञात्वा त्रैलोक्यं सचराचरं।
यस्य ज्ञात्वा मतिस्तेन पूजितो गरुड़ध्वजः॥
अतिकल्यानुकल्यानां व्रतानामुत्तमस्य च।
विष्णुलोकमवाप्नोति प्रसादाच्चक्रपाणिनः॥
विधिर्मासोपवासस्य यथावत् परिकीर्त्तितः।
सुतस्नेहाद्द्विजश्रेष्ठ सर्व्वलोकहिताय च॥
कृत्वा श्रुत्वा च यं भक्त्या ततो विष्णुपुरीं व्रजेत्।
नाभक्ताय प्रदातव्यं न देयं दुष्टचेतसे॥

इति विष्णुरहस्योक्तं मासोपवासव्रतं।

———००———

महाभारते।

कार्त्तिकन्तु नरो मासं यः कुर्य्यादेकभोजनं।
शूरश्च बहुभार्य्यश्च कीर्त्तिमांश्चैव जायते॥

विष्णुधर्म्मे।

कार्त्तिके एकदा भुङ्क्ते यश्च विष्णुपरो नरः।
शूरश्च कृतविद्यश्च बहुपुत्रश्च जायते॥
अहिंस्रः सर्व्वभूतेषु वासुदेवपरायणः।

नमोऽस्तु वासुदेवायेत्यष्टषाष्टगतं(१) जपेत्।
अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात्॥

इत्येकभक्तव्रतं।

अथ मार्गशीर्षव्रतानि।

महाभारते।

मार्गशीर्षन्तु यो मासमेकभक्तेन संक्षिपेत्।
भोजयेत्तु द्विजान् भक्त्या मुच्यते व्याधिकिल्बिषैः॥
सर्व्वकल्याणसम्पूर्णः सर्व्वदुःखविवर्ज्जितः।
उपोष्य व्याधिरहितो वीर्य्यवानभिजायते।
कृषिभागी बहुधनो बहुधान्यश्च जायते॥

विष्णुधर्म्मे।

मार्गशीर्षन्तु यो मासमेकभक्तेन संक्षिपेत्।
कुर्व्वन् वै विष्णुशुश्रूषां स देवि जायते शुभे॥
अहिंस्रः सर्व्वभूतेषु वासुदेवपरायणः।
नमोऽस्तु वासुदेवायेत्यष्टषाष्टगतं जपेत्(२)।
वाजपेयस्य यज्ञस्य ततः फलमवाप्नुयात्॥

इति एकभक्तव्रतं।

---

(१) वासुदेवाय चाष्टचाष्टगतमिति पुस्तकान्तरे पाठः।

(२) वासुदेवाय चाष्टचाष्टगतं जपेति क्वचित् पाठः।

वज्र उवाच ।

भगवन् कर्म्मणा केन नरो लावण्यमाप्नुयात् ।
लावण्यरहितं रूपं निष्फलं प्रतिभाति मे ॥

मार्कण्डेय उवाच ।

कार्त्तिक्यां समतीतायां प्रतिपत्प्रभृतिक्रमात् ।
पटे वा यदि वार्च्चायां प्रद्युम्नं पूजयेद्विभुं ॥
बहिः स्नानं ततः कुर्य्यान्नक्तमश्नीत वाग्यतः ।
एकभक्तं महाराज हविष्यं प्रयतः सदा ॥
मार्गशीर्षं ततः प्राप्य त्रिरात्रोपोषितः शुचिः ।
सम्पूज्य देवप्रद्युम्नं हुत्वाग्नौ घृतमेव च ॥
भोजयेद्ब्राह्मणांस्तत्र भोजनं लवणोत्कटं ।
चूर्णितस्य ततः प्रस्थं लवणस्य द्विजातये ॥
महारजतरक्तञ्च वस्त्रयुग्मं तथा गुरोः ।
दद्याच्च कनकं राजन् कांस्यपात्रं तथैव च ॥

मासेन लावण्यकरं प्रदिष्टं
व्रतोत्तमं नाकगतिप्रदञ्च ।
न केवलं यादव सर्व्वकामान्
नरस्य दद्यात्पुरुषप्रधानं ॥

इति विष्णुधर्म्मोत्तरोक्तं लावण्यावाप्तिव्रतं ।

—o—

अथ पौषव्रतानि ।

———ooo———

महाभारते ।

पौषमासन्तु कौन्तेय भक्तेनैकेन यः क्षिपेत् ।
सुभगो दर्शनीयश्च यशोभागी च जायते ॥

विष्णुधर्म्मे ।

पौषमासं तथा दाल्भ्य एकभक्तेन यः क्षिपेत् ।
शुश्रूषणपरः शौरेररोगी जायते नरः ॥
अहिंस्रः सर्व्वभूतेषु वासुदेवपरायणः ।
नमोऽस्तु वासुदेवायेत्यहन्यष्टशतं जपेत् ।
अश्वमेधस्य यज्ञस्य ततः फलमवाप्नुयात् ॥

इति एकभक्तव्रतं ।

———ooo———

वज्र उवाच ।

भगवन् कर्म्मणा केन शीलवान् पुरुषो भवेत् ।
कुलजातिश्रुतेभ्यस्तु शीलमेव विशिष्यते ॥

मार्कण्डेय उवाच ।

आषाढ्यामतीतायां मासमेकं दिने दिने ।
पूर्व्ववत्पूजयेद्देवं वराहमपराजितं ॥
घृतेन स्नापयेद्देवं घृतेन जुहुयाद्धरिं ।
घृतं द्विजेभ्यो दद्याच्च घृतमेव निवेदयेत् ॥
त्रिरात्रोपोषितः पौष्यां घृतपात्रेण च द्विजं ।

पूजयेच्च सुवर्णेन यथाशक्ति नराधिप ॥

कृत्वा व्रतं मासमिदं यथोक्त-
मासाद्य नाकं सुचिरं मनुष्यः ।
मानुष्यमासाद्य च शीलवान् स्यात्
प्राप्नोति पुष्टिं चिरजीवितञ्च ॥

इति विष्णुधर्म्मोक्तं शीलावाप्तिव्रतं ।

——oo@oo——

अथ शुक्लचतुर्द्दश्यां पौषमासे समाहितः ।
चान्द्रायणव्रतं मासं चारयेत्सर्व्वपापजित् ।
पूर्णेन्दुपौर्णमास्यान्तु पूजयेत्प्रत्यहं जलैः ॥

पौषइति सामीप्ये सप्तमी । चतुर्द्दशीपूर्णमास्योः पूर्व्वमासावयवत्वात् ।

मनोरथाय स्वाहेति तथा सन्ते पयांसि च ।
तर्पयेदग्निरेताभिस्तिसृभिश्च सदैव हि ॥
अथाहुतिभिरष्टाभिर्हुताभिश्च निशाकरं ।
यद्देवादेव इत्येतैश्चतुर्भिर्मन्त्रसत्तमैः ।
आज्येन तर्पयेद्दाहुं सर्व्वपापोपशान्तये ।
तथा देवकृतस्येति समिद्भिर्नित्यमेव हि ॥
चरुर्भैक्षं तथा सक्तुकणं यावकमेव च ।
शाकं क्षीरं दधि घृतं फलमूलोदकानि च ॥

पौर्णमास्यामारभ्य प्रत्यहं तर्पणं होमञ्च कारयेदित्यर्थः ।

हुतशिष्टञ्च वै पश्चात् प्राशयेत्समादरात् ॥

कुक्कुटाण्डोपमान् ग्रासान् पौर्णमास्याञ्च भक्षयेत्।
कृत्वा पञ्चदशैवाथ ह्रासयेत्तु दिने दिने॥
विंशत्या सहितं येन कृष्णपक्षे भवेच्छतं।
अमावस्यादिने चैव विप्रश्चोपवसेत्ततः॥
शुक्लप्रतिपदारभ्य चन्द्रवृद्धिक्रमेण तु।
विंशत्या सहितं भूयो ग्रासानां स्याच्छतं यथा॥
मासेन द्वे शते येन भवेतां द्वे च विंशती।
एकस्य प्रणवो मन्त्रो भूर्द्वयोश्च भवेदपि॥
भुवस्त्रयाणां स्वश्चापि चतुर्णां मह एव च।
भवेदथ च पञ्चानां षण्णाञ्जन उदाहृतः॥
सप्तानान्तु तपः सत्यमष्टानां परिकीर्त्त्यते।
ॐ नवानामिडावाथ दशानां मन्त्र एव च॥
एकादशानां योजस्व विजयस्व परम्भवेत्।
त्रयोदशानां पुरुषस्ततो धर्मः प्रकीर्त्तितः॥
शिवः पञ्चदशानान्तु ग्रासानां मन्त्र उच्यते।
स्वाहाकारनमस्कारयुक्तैर्मन्त्रैः पृथक् पृथक्।
अभिमन्त्र्य ग्रसेद्ग्रासान् दिनसंख्याक्रमेण च॥
ओं नमः स्वाहा भूर्नमः स्वाहेत्यादिमन्त्राः।
समाप्ते च व्रते दद्याद्गां वृषञ्च द्विजातये।
चान्द्रायणेन चैकेन सर्व्वपापक्षयो भवेत्॥
एवं संवत्सरं कृत्वा चन्द्रलोकमवाप्नुयात्।
इह लोके धनारोग्यं सुखं सौभाग्यसम्पदं॥

भवेदमरलोके च शक्रस्य सदने गतिः ।
भवेच्छिवन्तदभ्यासाज्जन्म ब्राह्मणजन्मनि ॥

इति ब्रह्मपुराणोक्तं चान्द्रायणव्रतं ।

—oo—

अथ माघमासव्रतानि ।

नारदीयपुराणे ।

काष्ठकील उवाच ।

सम्प्राप्तो माघमासोऽयं तपस्विजनवल्लभः ।
यस्मिन् क्षीयन्ति पापानि यत्नस्नानवतां सदा(१) ॥
कृतानि सर्व्वदेहेषु ब्रह्महत्यासमान्यपि ।
दुर्लभो माघमासस्तु बहुदानप्रदायकः ॥
देवैस्तेजः परिक्षिप्तं माघमासे जले सदा ।
न वह्निं सेवयेत् स्नातो ह्यस्नातोऽपि वरानने ॥
होमार्थं सेवयेद्वह्निं शीतार्थं न कदाचन ।
यावत्प्रभा वरारोहे तावत् सूर्य्योदये स्नाता ॥
सरित्तोयाद्यभावे तु नवकुम्भस्थितं जलं ।
वायुना ताडितं रात्रौ गङ्गातोयसमं विदुः ॥
तन्नास्ति पातकं लोके यन्न स्नानाद्विनश्यति ।
अग्निप्रवेशादधिक माघस्नानं वरानने ॥

---

(१) यतिस्नानवतां सदेति पाठान्तरं ।

जीवता भुज्यते दुःखं मृतो दुःखं न पश्यति।
एतस्मात्कारणात् सुभ्रु माघस्नानं विशिष्यते॥
अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः।
त्रिभागस्तु तिलानां हि चतुर्थः शर्करान्वितः॥
अनभ्यङ्गी वरारोहे सर्व्वं मासं नयेद्व्रती।
सूर्य्यो मे प्रीयतां देवो विष्णुमूर्त्तिर्निरञ्जनः॥
माघावसाने सुभगे षड्रसं संप्रदापयेत्।
दम्पत्योर्वाससी शुक्ले सप्तधान्यसमन्विते॥
त्रिंशत्तु मोदका देयाः कृतास्तिलमयाः शुभाः।
मरिचैर्निर्म्मिताः श्लक्ष्णाः नारङ्गाणि च दापयेत्॥
सरितः प्रभवस्त्वं हि परं धाम जले मम।
त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा॥
दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते।
परिपूर्णं कुरुष्वेह माघस्नानमुषःपते॥
एवं माघप्लवो याति भित्त्वा बिम्बं दिवाकरं।
परिव्राड्योगयुक्तश्च रणे वाभिमुखो हतः।
तृतीयोऽत्र वरारोहे माघस्नायी प्रकीर्त्तितः॥

भविष्योत्तरात्।

युधिष्ठिर उवाच।

माघमासे मम ब्रूहि स्नानं यदुकुलोद्वह।
येन दुःखाम्बुपङ्कौघात्तरन्ति भवार्णवात्॥

श्रीकृष्ण उवाच।

आद्यं कृतयुगं प्रोक्तं त्रेता तु चविदं स्मृतं।

वैश्यं द्वापरमित्याहुः शूद्रं कलियुगं तथा ॥
कलौ राजन् मनुष्याणां श्रेयस्त्वं स्नानकर्म्मणि ।
तथापि भावव्याजेन कथयिष्यामि तच्छृणु ॥
यस्य हस्तौ च पादौ च वाङ्मनश्च सुसंयतं(१) ।
विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥
अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः ।
हेतुनिन्दारतश्चैते न तीर्थफलभागिनः ॥
प्रयागं पुष्करं प्राप्य कुरुक्षेत्रमथापि वा ।
यत्र वा तत्र वा स्नायाम्माघे नित्यमिति स्थितिः ॥
त्रिरात्रफलदा नद्यो याः काश्चिदसमुद्रगाः ।
समुद्रगास्तु पक्षस्य मासस्य सरितां पतिः ॥
अपां समीपे यत्स्नानं सन्ध्यायामुदिते रवौ ।
प्राजापत्येन तत्तुल्यं महापातकनाशनं ॥
प्रातरुत्थाय यो विप्रः प्रातःस्नायी भवेत्सदा ।
सर्व्वपापविनिर्मुक्तः परं ब्रह्माधिगच्छति ॥
वृथा चोष्णोदकस्नानं वृथा जाप्यमवैदिकं ।
अश्रोत्रिये वृथा श्राद्धं वृथा भुक्तमसाक्षिकं ॥
स्नानं चतुर्विधं प्रोक्तं स्नानविद्भिर्युधिष्ठिर ।
वायव्यं वारुणं ब्राह्मं दिव्यञ्चेति पृथक् शृणु ॥
वायव्यं गोरजःस्नानं वारुणं सागरादिभिः ।
ब्राह्मं ब्राह्मणमन्त्रोक्तं दिव्यं मेघाम्बु भास्करात् ॥
स्नानानामपि सर्व्वेषां वारुणं श्रेष्ठमुच्यते ।

(१) मनश्चैव सुसंयत इति पाठान्तरं ।

ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः॥
एते सर्व्वे प्रशंसन्ति सर्व्वदा माघमज्जनं।
बालवृद्धयुवानश्च नरनारीनपुंसकाः॥
स्नात्वा माघे शुभे तीर्थे प्राप्नुवन्तीप्सितं फलं।
ब्रह्मक्षत्रविशां चैव मन्त्रवत्स्नानमिष्यते॥
तूष्णीमेव हि शूद्राणां तथैव कुरुनन्दन।
नमस्कारेण वा कार्य्यं सर्व्वपापौघहानिदं॥
माघमासे रटन्त्यापः किञ्चिदभ्युदिते रवौ।
ब्रह्मघ्नं वा सुरापं वा(१) कं पतन्तं पुनीमहे॥
प्रासादा यत्र सौवर्णाः स्त्रियश्चाप्सरसां समाः।
दधिदुग्धहृदा यत्र नद्यः पायसकर्द्दमाः॥
तत्र ते यान्ति मज्जन्ति ये माघे भास्करोदये।
यतिवत्पथि गच्छेत मौनी पैशून्यवर्ज्जितः॥
य इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान्।
पुष्यफाल्गुनयोर्म्मध्ये प्रातः स्नायी भवेत्तु सः॥
पौर्णमासीममावास्यां प्रारभ्य स्न[?]माचरेत्।
त्रिंशद्दिनानि पुण्यानि मकरस्थे दिवाकरे॥
तत उत्थाय नियमं गृह्णीयाद्विधिपूर्व्वकं।
माघमासमिमं पुण्यं स्नास्येऽहं देव माधव॥
तीर्थे शीतजले नित्यमिति सङ्कल्प्य चेतसि।
अप्रावृतशरीरस्तु यः साक्षात् स्नानमाचरेत्॥
पदे पदेऽश्वमेधस्य फलं प्राप्नोति मानवः।

(१) ब्रह्मघ्नमपि चाण्डालमिति पाठान्तरं।

ततः स्नात्वा शुभे तीर्थे दत्त्वा शिरसि वै मृदं।
वेदोक्तविधिना राजन् सूर्य्यायार्घ्यं निवेदयेत्॥
पितॄन् सन्तर्प्य तत्रस्थः अवतीर्य्य ततोजलात्।
इष्टदेवं नमस्कृत्य पूजयेत्पुरुषोत्तमं॥
शङ्खचक्रधरं देवं माधवं नाम पूजयेत्।
वह्निं हुत्वा विधानेन ततस्त्वेकाशनो भवेत्॥
भूशय्याब्रह्मचर्य्येण शक्तः स्नानं समाचरेत्।
अशक्तो ब्रह्मचर्य्यादौ स्वेच्छा तस्यैव कल्पते॥
अवश्यमिति कर्त्तव्यं माघस्नानमिति श्रुतिः।
ईश्वरेण यथाकामं बलं धर्म्मोऽनुवर्त्तते॥
तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी।
तिलभुक्तिलदाता च षट्तिलाः पापनाशनाः॥
तैलमामलकाश्चैव तीर्थे देयास्तु नित्यशः।
तथा प्रज्वालयेद्वह्निं निवातं कारयेत्कुटिं॥
एवं माघस्नाने तु शक्तो भोज्यमवारितं।
कारयेद्द्य शक्त्या वा वित्तशाठ्यविवर्ज्जितं॥
दम्पत्यानि द्विजाग्र्याणां पूज्यवस्त्रविभूषणैः।
भूषयित्वा प्रदेयानि दानानि विविधानि च॥
कम्बलाजिनवस्त्राणि नानारत्नानि शक्तितः।
चोलकानि च देयानि प्रच्छादनपटानि च॥
उपानहौ पादगुप्तौ मोचकौ पापमोचकौ।
तथान्यद्दयितं किञ्चिन्माघस्नाने प्रदीयते।

तथा माघस्नायिनान्देयं विप्राणां भूतिमिच्छता ॥
स्वल्पेऽपि दाने वक्तव्यं माधव प्रीयतामिति ॥
अगम्यागमनात्स्तेयात्पापेभ्यश्च प्रतिग्रहात्।
रहस्याचरितात्पापाम्मुच्यते स्नानमाचरन्॥
माघमासे विधानेन चेतस्याधाय माधवं।
पितुः पूर्व्वान् समुद्धृत्य मातुः पूर्व्वान्पितृनथ।
एकविंशकुलैः सार्द्धं भोगान् भुक्त्वा यथेप्सितान्॥
माघस्योषसि स्नात्वा वै विष्णुलोके महीयते ॥
यो माघमास्युषसि सूर्य्यकराभितास्रे
स्नानं समाचरति चारुनदीप्रवाहे।
उद्धृत्य पूर्व्वपुरुषान् पितृमातृतश्च
स्वर्गं प्रयात्यमरदेहधरो नरोऽसौ ॥

इति माघस्नानविधिः।

——oo@oo——

माघमास्युषसि स्नानं कृत्वा दम्पत्यमर्च्चयेत्।
भोजयित्वा यथाशक्त्या माल्यवस्त्रविभूषणैः ॥
सौभाग्यपदमाप्नोति शरीरारोग्यमुत्तमं।
सूर्य्यलोकप्रदं नूनं सूर्य्यव्रतमिदं स्मृत ॥

इति पद्मपुराणोक्तं सूर्य्यव्रतं।

——ooo——

ब्रह्मोवाच।

कृच्छ्रैकभक्तं हेमन्ते माघमासमतन्द्रितः।
मासान्ते च रथं कुर्य्याच्चित्रवस्त्रोपशोभितं ॥

श्वेतैश्चतुर्भिर्युक्तन्तु तुरगैः समलङ्कृतं ।
श्वेतध्वजपताकाभिः छत्रचामरदर्पणं ॥
तण्डुलाढकपिष्टेन कृत्वा भानुं नराधिप ।
विन्यस्य तं रथमध्ये संज्ञया सह भूपते ॥
तं रात्रौ राजमार्गेण शङ्खभेर्य्यादिभिः स्वनैः ।
भ्रामयित्वा शनैः पश्चात् सूर्य्यायतनमानयेत् ॥
तत्र चागुरुपिष्टेन प्रदीपाद्युपशोभितं ।
प्रेक्षणीयप्रदानैश्च क्षपयित्वा शनैः शनैः ॥
प्रभाते स्नपनं कृत्वा पयसा वा घृतेन वा ।
दीनान्धकृपणानाञ्च यथाशक्त्या च दक्षिणां ।
रथं सवाहनोपेतं भास्कराय निवेदयेत् ॥
भुक्त्वा च ब्राह्मणैः सार्द्धं प्रणम्यार्कं गृहं व्रजेत् ॥
सर्व्वव्रतानां परमं ब्रह्मधर्म्माश्रितः सदा ।
तच्च सूर्य्यव्रतं नाम सर्व्वकामार्थसाधकं ॥
सर्व्वव्रतेषु यत्पुण्यं सर्व्वतीर्थेषु यत् फलं ।
सर्व्वं सूर्य्यरथेनैव तत्पुण्यं लभते नृप ॥
सूर्य्यायुतप्रतीकाशैर्विमानैः सार्व्वकामिकैः ।
त्रिसप्तकुलजैः सार्द्धं सूर्य्यलोके महीयते ॥
भुक्त्वा तु विपुलान् भोगान् सर्व्वलोकेष्वनुत्तमान् ।
कल्पायुतशतं साग्रं ततो राजा भवेत् क्षितौ ॥

इति भविष्यत्पुराणोक्तं सूर्य्यव्रतं ।

माघमासि समुद्युक्तस्त्रिसन्ध्यं योऽर्च्चयेद्रविं।
भवेत् षाण्मासिकं पुण्यं मासेनैव न संशयः।

इति भविष्यत्पुराणोक्तं रविव्रतं।

———ooo———

महाभारते।

माघमासन्तु यो मासमेकभक्तेन यः क्षिपेत्।
श्रीमान् कुलज्ञातिमांस्तु स महत्त्वं प्रपद्यते॥

विष्णुधर्म्मे।

माघमासं द्विजश्रेष्ठ एकभक्तेन यः क्षिपेत्।
विष्णुशुश्रूषणपरः सत्कुले जायते सतां॥
अहिंस्रः सर्व्वभूतेषु वासुदेवपरायणः।
नमोऽस्तु वासुदेवायेत्यष्टाष्टशतं जपेत्।
अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात्॥

इति एकभक्तव्रतं।

———ooo———

वज्र उवाच।

भगवन् कर्म्मणा केन विद्यावान् पुरुषो भवेत्।
अविद्य एव विज्ञेयः पुरुषः पशुरन्यथा॥

मार्कण्डेय उवाच।

पौष्यान्तु समतीतायां प्रतिपत्प्रभृतिक्रमात्।
प्राग्वत्तु पूजयेद्देवमश्वराजशिरस हरिं॥

प्राग्वदिति रूपावाप्तिव्रतोक्तविधिना तुरङ्गशिरसं हयग्रीवं ॥

तिलांश्च जुहुयादग्नौ तिलैर्देवं समर्चयेत् ।
त्रिरात्रोपोषितो माघं तिलान् कनकमेव च ॥
दद्याद्ब्राह्मणमुख्याय सम्यक् प्रयतमानसः ।
मुख्यान् यज्ञोपवीतांश्च प्रभूतमपि चन्दनं ॥
कृत्वा व्रतं मासमिदं यथोक्तं
विद्यान्वितः स्यात् बुधः सदैव ।
स्वर्लोकमासाद्य सुखानि भुक्त्वा
कामानभीष्टान् पुरुषोऽश्नुते च ॥

इति विष्णुधर्म्मोत्तरोक्तं विद्यावाप्तिव्रतं ।

———ooo(o)ooo———

अथ फाल्गुनव्रतानि ।

महाभारते ।

भगदैवन्तु यो मासमेकभक्तेन विक्षिपेत् ।
ऐश्वर्य्यमतुलं ध्रुवं पुमान् स्त्री वा प्रपद्यते ।
स्त्रीषु वल्लभतां याति वश्याश्चैव भवन्ति ते ॥

विष्णुधर्म्मे ।

सपर्येदेकभक्तेन शुश्रुषुर्यस्य फाल्गुने ।
शुश्रूषुः विष्णुशुश्रूषापरः ।
सौभाग्यं स्वजनानाञ्च सर्व्वेषामेव सोऽश्नुते ।

अहिंस्रः सर्व्वभूतेषु वासुदेवपरायणः॥
नमोऽस्तु वासुदेवायेत्यष्टाष्टशतं जपेत्।
अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात्॥

इति एकभक्तव्रतं।

वराह उवाच।

फाल्गुनस्य तु मासस्य पुष्पाणि सुरभीणि च।
कर्म्मण्यानि शुभानीह गृहीत्वा भक्तिमान्नरः॥
ततः वक्ष्यमाणश्लोकोक्तादाचार्य्यात्।
यस्तु जानाति कर्म्माणि सर्व्वकर्म्मविनिश्चितः।
उदाहरति मन्त्रांश्च नक्तादिनियमस्थितः॥
जानुभ्यां धरणींकृत्वा कराभ्यामञ्जलेः पुटं।
गृहीत्वेतिशेषः, पुटं पुष्पपूर्णपात्रपुटं।
नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत्॥
नमोऽस्तु देवदेवेश चक्रनिर्म्मथनाय ते।
नमोऽस्तु लोकनाथाय सुप्रवीर नमोऽस्तु ते॥
आदिमध्यावसानन्ते न जानातीह कश्चन॥
वसन्तागमपुष्पाणि गृहाण पुरुषोत्तम।
य एतेन विधानेन कुर्य्यान्मासे तु फाल्गुने।
न च गच्छति संसारं परं लोकं च गच्छति॥

इति वराहपुराणोक्तः फाल्गुनविधिः।

वत्स उवाच।

भगवन् कर्म्मणा केन सौभाग्यं महदाप्नुयात्।
लावण्यरूपसौभाग्यं विना श्रेयं निरर्थकं॥

मार्कण्डेय उवाच।

माघ्यान्तु समतीतायां प्रतिपत्प्रभृतिक्रमात्।
पटे वा यदि वार्च्चायां कृष्णं संपूजयेत्सदा।
पूर्व्वोक्तं सकलं कुर्य्याद्विधिं चात्र नराधिप॥

पूर्व्वोक्तमिति चैत्रमाससम्बन्धिरूपावाप्तिव्रतोक्तमित्यर्थः।

नित्यं समाचरेत् स्नानं तथा गन्धप्रियङ्गुना।
चरुं प्रियङ्गुना कुर्य्याद्धोमं कुर्य्यात् प्रियङ्गुना॥

गन्धः प्रियङ्गुसदृशगन्धद्रव्यं, प्रियङ्गुः कङ्गुसदृशगन्धद्रव्यं प्रियङ्गुः कङ्गुः।

फाल्गुन्यान्तु ततोदद्यात् चिराचोपोषितो नरः।
वस्त्रे च देये नृप कुङ्कुमाक्ते
क्षौद्रस्य पात्रञ्च तथैव कांस्यं।
सौभाग्यदं ह्येतदनुत्तमन्ते
व्रतं मयैतत्कथितं नृवीर॥

इति विष्णुधर्म्मोत्तरोक्तं सौभाग्यावाप्तिव्रतं।

इति श्रीमहाराजाधिराज-श्रीमहादेवस्य समस्तकरणा-
धीश्वरसकलविद्याविशारद-श्रीहेमाद्रिविरचिते
चतुर्व्वर्गचिन्तामणौ व्रतखण्डे
मासव्रतानि।

अथ अष्टादशोऽध्यायः ।

———000(ए)000———

अथ नानामासव्रतानि ।

अश्रान्तस्वाकचामीकर ००० (१)परिप्रीणितप्राणिवर्गः
स्वर्गङ्गासङ्गभूमीरुहतलविलसत्किन्नरीगीतकीर्त्तिः ।
हेमाद्रिः संप्रतीक्ष स्फुरदुरुदुरितव्रातघातैकहेतुं
नानामासव्रतानां क्रमनमथ कलाकोविदः संविधत्ते ॥

तत्र चातुर्मास्यव्रतानि ।

विष्णुधर्म्मोत्तरात् ।

मार्कण्डेय उवाच ।

अथ स्वपिति धर्म्मात्मन् देवदेवो जनार्द्दनः ।
लक्ष्मीसहायः सततं शेषपर्य्यङ्कमाश्रितः ॥
एकादश्यामाषाढ़स्य शुक्लपक्षे जनार्द्दनं ।
देवाश्च ऋषयश्चैव स्तुवन्ति दिनपञ्चकं ॥
ततश्च चतुरोमासान् योगनिद्रामुपस्थितं ।
सप्त च तमुपासन्ति ऋषयो ब्रह्मसंमिताः ॥
कार्त्तिकस्य सिते पक्षे तद्देव दिनपञ्चकं ।
विबोधयन्ति देवेशं गत्वा सेन्द्रा दिवौकसः ॥
तस्माद्देवाश्चतुर्मासोन्नरः कुर्य्यात् महोत्सवं ।

भविष्योत्तरात् ।

---

१ अत्र अक्षरत्रय पतितम् ।

युधिष्ठिर उवाच ।

गोविन्दशयनं किन्तु किमर्थं स्वपितीत्यसौ ।
कथन्तच्छयनं तस्य देवदेवस्य चक्रिणः ॥
के चात्र मन्त्राः पूजा च दानार्थं नियमाश्च के ।
किं ग्राह्यं किञ्च मोक्तव्यं सुप्ते देवजगत्पतौ ॥

श्रीकृष्ण उवाच ।

शृणु पार्थ प्रवक्ष्यामि गोविन्दशयनव्रतं ।
कटिदानं समुत्थानं चातुर्मास्यव्रतक्रमं ॥
मिथुनस्थे सहस्रांशौ स्थापयेन्मधुसूदनं ।
तुलां प्राप्ते (१) महाराज पुनरुत्थापयेच्च तं ॥
अधिमासे प्रपतिते देव एष एव विधिक्रमः ।
नान्यथा स्थापयेत् कृष्णं नान्यथोत्थापयेत्तथा ॥
आषाढस्य सिते पक्षे एकादश्यामुपोषितः ।
स्थापयेत् प्रतिमां विष्णोः शङ्खचक्रगदाधरां ॥
काञ्चनीं राजतीं ताम्रमयीं पित्तलजां तथा ।
पीताम्बरधरां सौम्यां पर्य्यङ्के चास्तृते शुभे ।
शुक्लवस्त्रपटच्छन्ने सोपधाने सपूजिते ॥

ब्रह्मपुराणात् ।

एकादश्यान्तु शुक्लायां आषाढे भगवान् हरिः ।
भुजङ्गशयने शेते यदा क्षीरार्णवे सदा ॥
तदा तत्प्रतिमा कार्य्या सर्व्वलक्षणसंयुता ।
सुप्ता तु शेषपर्य्यङ्के शोभमाना च दारुभिः ॥

---

(१) तुलाराशस्थ इति पुस्तकान्तरे पाठः ।

ताम्रारकूटरजतैः कृता चित्रपटेषु वा।
लक्ष्म्या स्वहस्तविन्यस्तमनोज्ञचरणाम्बुजा ॥
नानाविधोपकरणैः पूज्या तु विधिपूर्व्वकं।
उपवासश्च कर्त्तव्यो रात्रौ जागरणं तथा ॥
तस्यां रात्र्यां व्यतीतायां द्वादश्यां पूजयेच्च तां।
त्रयोदश्यां ततो गीतनृत्यवाद्यं निवेदयेत् ॥

भविष्योत्तरे (१)।

इतिहासपुराणज्ञो वेदवेत्ताथ वा पुमान्।
स्नापयित्वा दधिक्षीरघृतक्षौद्रसितादिभिः ॥
समालभ्य शुभैर्गन्धैर्धूपैर्वस्त्रैरलङ्कृतां।
जातीकुसुममालाभिर्मन्त्रेणानेन पूजयेत् ॥
सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदं।
विबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युत ॥
एवं तां प्रतिमां विष्णोः स्थापयित्वा स्वयं नरः।
प्रभाषेच्चाग्रतो विष्णोः कृताञ्जलिपुटस्तथा ॥
चतुरो वार्षिकान् मासान् देवस्योत्थापनावधिः।
इमं करिष्ये नियमं निर्व्विघ्नं कुरु मेऽच्युत ॥
स्त्री वा नरो वा मद्भक्तो धर्म्मार्थं सुदृढव्रतः।
गृह्णीयान्नियमानेतान् दन्तधावनपूर्व्वकान् ॥
तेषां फलानि वक्ष्यामि तत्कर्त्तॄणां पृथक् पृथक्।
मधुस्वरो भवेद्राजा पुरुषो गुडवर्जनात् ॥
तैलस्य वर्जनाद्दैव सुन्दराङ्गः प्रजायते।

---

(१) कथाकारते इति पुस्तकान्तरे पाठः।

कटुतैलपरित्यागाच्छत्रुनाशमवाप्नुयात्॥
मधूकतैलत्यागेन सौभाग्यमतुलं लभेत्।
योगाभ्यासी वेदतस्तु स ब्रह्मपदमाप्नुयात्।
कटुकास्तु तिक्तमधुक्षारकषायसञ्चयः॥
यो वर्ज्जयेत् स वैरूप्यं दौर्गन्ध्यं नाप्नुयात् क्वचित्।
ताम्बूलं वर्जयेत् भोगी रक्तकण्ठश्च जायते॥
घृतत्यागाच्च लावण्यं सर्व्वस्निग्धतनुर्भवेत्।
फलत्यागाच्च मतिमान् बहुपुत्रश्च जायते॥
शाकपत्राशनाद्भोगी अपक्वादमलो भवेत्।
पादाभ्यङ्गपरित्यागाच्छिरोऽभ्यङ्गं विवर्जयेत्॥
दीप्तिमान् दीपत्यागेन सोऽपि चोडुपतिर्भवेत्।
दधिदुग्धैकनियमी गोभक्तो गोपतिर्भवेत्।
इन्द्रातिथित्वमाप्नोति स्थालीपाकस्य वर्जनात्॥
लभते सन्ततिन्दीर्घां तैलपक्वस्य वर्जनात्।
भूमौ प्रस्तरशायी च विप्रो मुनिवरो भवेत्॥
सदा मुनिः सदा योगी मधुमांसञ्च वर्जयेत्।
निर्व्व्याधिर्नीरुगोजस्वी सुरामद्यं विवर्जयेत्॥
एवमादिपरित्यागात् धर्म्मः स्यात् धर्म्मनन्दन।
एकान्तरोपवासेन ब्रह्मलोके महीयते।
धारणान्नखरोम्णाञ्च गङ्गास्नानफलं लभेत्॥
धारणाद्यष्टयोगाङ्गं।
मौनव्रती भवेद्यस्तु तस्याज्ञा फलिता भवेत्।
नमोनारायणायेति जपन्यज्ञफलं लभेत्॥

अयं चातुर्मास्यव्रतारम्भो गुर्व्वस्तमयादावपि कार्य्यः।

यदाह वृद्धगर्गः। न शेषवच मौढ्याद्य शुक्रगुर्व्वोर्नवा तिथेः।

अखण्डत्वं चिन्तयेच्चादौ चातुर्मास्यविधौ नरः।
पादाभिवन्दनाद्विष्णोर्लभेद्गोदानजं फलं॥
भूमौ भुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत्।
नमो नारायणायेति जपन्यज्ञफलं लभेत्॥
विष्णुपादाब्जसंस्पर्शाद्दिनपापात् प्रमुच्यते।
पादोदकाभिषेकाद्वै गङ्गास्नानं दिने दिने॥
पर्णेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत्।
नित्यं शास्त्रसमाख्यानाल्लोकान् यस्तु प्रबोधयेत्॥
व्यासस्तुष्यति तस्याशु विष्णुलोकं स गच्छति।
कृत्वा प्रेक्षणकं विष्णोर्लोकमप्सरसां लभेत्॥
तीर्थाम्बुस्नापनाद्विष्णोर्निर्म्मलं देहमाप्नुयात्।
पञ्चगव्याशनात्पार्थ चान्द्रायणफलं लभेत्॥
अयाचितेन प्राप्नोति पुत्रान्धर्म्मानशेषतः।
षष्ठान्नकालभोक्ता यः कल्पस्थायी भवेद्दिवि॥

उपवासद्वयान्तरितैकभक्तः।

शिलोञ्छवृत्तेन भुञ्जानः प्रयागस्नानमाप्नुयात्।
विष्णुदेवकुले कुर्य्यादुपलेपनमार्ज्जने॥
कल्पस्थायी भवेद्राजा स नरो नात्र संशयः।
प्रदक्षिणशतं यस्तु करोति स्तुतिपाठकः।
हंसयुक्तविमानेन स तु विष्णुपुरं व्रजेत्।
गीतवाद्यकरो विष्णोर्गान्धर्व्वं लोकमाप्नुयात्॥

यामद्वयं जलत्यागान्नरो रोगैरभिभूयते ।
गुड़वर्ज्जी नरो दद्याद्गुतैस्ताम्रभाजनं ।
सहिरण्यं नृपश्रेष्ठ लवणस्याप्ययं विधिः ॥

ब्रह्मवैवर्त्ते ।

नारद उवाच ।

कथं मुने तु गोविन्दे व्रतचर्य्या सुरोत्तम ।
कर्त्तव्या मानवैर्भक्त्या विष्णुपूजनतत्परैः ॥
तिथयः काश्च पुण्या वै निःशेषफलदायिकाः ।
सन्तुष्यते हरिर्य्यासु स्वल्पेन तपसा नृणां ॥
दानहोमजपध्यानं व्रतचर्य्यार्च्चनं हरेः ।
समाचक्ष्व सुरश्रेष्ठ उपवासविधिक्रियां ॥

ब्रह्मोवाच ।

शृणु वत्स प्रवक्ष्यामि चातुर्म्मास्यविधिक्रियां ।
यां निर्वर्त्त्य नरो भक्त्या प्रयाति परमाङ्गतिं ॥
अवगम्य विधानेन समर्च्चनविधिं हरेः ।
व्रतपूजादिकं कुर्य्यात्ततो भक्तिसमन्वितः ॥
अविज्ञाय विधानोक्तां हरेःपूजाविधिक्रियां ।
कुर्व्वन् भक्त्या समाप्नोति तद्विष्णोः परमं पदं ॥
यस्तु विष्णुपरो नित्यं दृढ़भक्तिर्जितेन्द्रियः ।
स गृहेऽपि वसन् याति तद्विष्णोः परमं पदं ॥
शिवे वा भक्तिसंयुक्तो भानौ वा गणनायके ।
कृत्वा व्रतस्य नियमं यथोक्तफलभाग्भवेत् ।
नरश्च क्षयमाप्नोति पापं जन्मशतोद्भवं ॥

आषाढस्य सिते पक्षे एकादश्यामुपोषितः।
नक्तं कुर्य्याद्द्विजश्रेष्ठ गृह्णीयान्नियमं व्रती ॥

कुर्य्यादिति, नियमं नक्तं गृह्णीयादित्यन्वयः।

एकादश्यां तु गृह्णीयात् संक्रान्तौ कर्कटस्य च ॥
आषाढादौ नरो भक्त्या चातुर्मास्यव्रतक्रियां।
चातुर्मास्यव्रतानां तु कुर्व्वीत परिकल्पनां ॥
इदं व्रतं मया देव गृहीतं पुरतस्तव।
निर्विघ्नां सिद्धिमायातु प्रसादात्तव केशव ॥
गृहीतेऽस्मिन् व्रते देव पञ्चत्वं यदि मे भवेत्।
तदा भवतु संपूर्णं त्वत्प्रसादाज्जनार्द्दन ॥
गृहीतेऽस्मिन् व्रते देव यद्यपूर्णे म्रिये त्वहं।
तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्द्दन ॥
एवमभ्यर्च्य गोविन्दं व्रतार्च्चनजपादिकं।
सर्व्वं परिगृह्णीयात्परिपूर्णं यथा भवेत् ॥
व्रतानि वैष्णवानीह शैवानीह द्विजोत्तम।
एकभक्तं नरः कृत्वा नित्यस्नायी दृढव्रतः ॥
योऽर्च्चयेच्चतुरो मासान्वासुदेवं स नाकभाक्।
समाप्तौ भोजयेद्विप्रान् भक्त्या दद्याच्च दक्षिणां ॥
यस्तु सुप्ते हृषीकेशे नक्तमाचरते व्रती।
वस्त्रयुग्मं नरो दत्वा शिवलोके महीयते ॥
अपूपवर्ज्जनं कृत्वा भोजने व्रतमाचरेत्।
कार्त्तिके स्वर्णगोधूमान् वस्त्रं दत्वाश्वमेधकृत् ॥
चर्म्मं दत्वा च विप्राय ब्रह्मलोकमवाप्नुयात्।

रौप्यं दत्त्वा ब्राह्मणाय व्रती तद्गतमानसः ॥
अन्नदानं व्रतं कुर्य्याद्रौप्यदानञ्च पारणं ।
एकान्तरोपवासेन विष्णुपूजनतत्परः ।
गान्दत्त्वा वासुदेवस्य लोके संपूज्यते नरः ।
यस्तु सुप्ते हृषीकेशे क्षितिशायी भवेन्नरः ॥
शय्यां सोपस्करान्दत्त्वा इन्द्रलोके महीयते ।
वार्षिकांश्चतुरोमासान् मद्यं मांसञ्च यस्त्यजेत् ॥
स्वर्णादौ हरिमुद्दिश्य स भवेद्वेदविद्द्विजः ।
यः क्षिपेत् कृच्छ्रपादेन आषाढ़ादिकमासद्वयं ।
विष्णुपूजनकृत्यार्थः स लभेत्तत्रिकेतनं ।
गोप्रदानान्नवेद्योऽपि समाप्ते द्विजसत्तम ॥
यस्त्रिरात्रकृताहारो नित्यस्नायी जितेन्द्रियः ।
वासुदेवार्चने युक्तः स लोकं वैष्णवं व्रजेत् ॥

पूर्व्वोक्तगोदानपारणं ।

व्रीहीन् यो वर्ज्जयित्वा तु कार्त्तिके मासि मानवः ।
हिरण्यं शालिना दत्त्वा पदं प्राप्नोति वैष्णवं ॥
यस्तु केशवभक्तो हि विष्णोः पादोदकं पिबेत् ।
वर्षारात्रं नरो भक्त्या स विष्णोः सद्म संविशेत् ॥
रौप्यं चन्दनसंयुक्तं धेनुं दद्यात्पयस्विनीं ।
वार्षिकांश्चतुरो मासान् प्राजापत्यञ्चरेन्नरः ॥
समाप्ते गोयुगं दद्याद्दत्त्वा ब्राह्मणभोजनं ।
पराकेण नरो नित्यं यः क्षिपेत् वार्षिकीं समाम् ॥
अर्च्चयित्वाऽच्युतं भक्त्या स गच्छेद्विष्णुलोकतां ।

पूर्व्वोक्तं पारणं ।

गोमूत्रयावकाहारी योऽर्च्चयेच्च ऋतुद्वयं ॥
विष्णुमभ्यर्च्य सद्भक्त्या नरोविष्णुपुरं व्रजेत् ।
समाप्तौ गोद्वयं दद्याद्वस्त्रं काञ्चनसंयुतं ॥
शाकमूलफलैर्व्वापि वर्षारात्रं नयेन्नरः ।
समाप्तौ गोप्रदो भूत्वा स याति विष्णुमन्दिरं ॥
पयोव्रती तथाप्नोति ब्रह्मलोकं सनातनं ।
व्रतान्ते च तथा दद्याद्गामेकाञ्च पयस्विनीं ॥
वर्ज्जयित्वा मधुं यस्तु दधिक्षीरघृतान्वितम् ।
दद्याद्वस्त्राणि सूक्ष्माणि कार्त्तिक्यां गोप्रदो भवेत् ॥
संपूज्य विप्रमिथुनं गौरी मे प्रीयतामिति ।
दद्याच्च काञ्चनं शक्त्या गौरीलोके महीयते ॥
ब्रह्मचर्य्येण यो मासांश्चतुरः क्षपयेन्नरः ।
प्रतिमां काञ्चनीं दद्याद्दम्पत्योर्ब्रह्मलोकभाक् ॥
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ।
समाप्तौ वस्त्रयुग्मन्तु वस्त्रं दद्याद्द्विजातये ॥
सन्ध्यामौनव्रतः कृत्वा समाप्तौ घृतकुम्भदः ।
वस्त्रयुग्मं तिलान् घण्टां ब्राह्मणाय निवेदयेत् ॥
सारस्वतं पदं याति विद्यावान् धनवान् भवेत् ।
कृत्वा प्रलेपनं शम्भोरग्रतः केशवस्य च ॥
आर्त्तिक्यांश्चतुरो मासान् धेनुं दद्यात्पयस्विनीं ।
अब्दत्रयं भास्करं गङ्गां प्रणम्येशञ्च वाग्यतः ॥
एकभक्तं नरः कुर्य्याच्चातुर्मास्यमतन्द्रितः ।

व्रतान्ते विप्रमिथुनं पूज्यं धेनुसमन्वितं ।
हयान् हिरण्मयान् दद्यात् सोऽश्वमेधफलं लभेत् ॥

हयानस्थाने ।

घृतेन स्नापनं कृत्वा मध्वोर्वै केशवस्य च ।
अक्षतैश्च समं कुर्यात् पद्मं गोमयमण्डले ॥
समाप्तौ हेमकमलन्तिलधेनुसमन्वितं ।
ब्राह्मणाय व्रती दद्याच्छिवलोके महीयते ॥
सन्ध्यादीपप्रदो यस्तु प्राङ्गणे द्विजसत्तम ।
समाप्तौ दीपिकां दद्याच्चक्रयतुरस्रे गृहाङ्गने ॥
वस्त्रयुग्मान्विते वत्स स तेजस्वी भवेद्दिव ।
वैमानिको भवेद्देवो गन्धर्व्वाप्सरसेवितः ॥
भूमिन्तु भाजनं कृत्वा यो भुङ्क्ते तु चतुष्टयं ।
कांस्यपात्रञ्च गां दत्त्वा पृथ्वीशो भवते नरः ॥
पर्णसंस्तरसम्भोजी समाप्तौ कांस्यभाजनं ।
दत्त्वा स्वर्गगतो ब्रह्मन् पूज्यते त्रिदिवौकसा ॥
एकोदनफलं भुङ्क्ते रत्नापलाशवर्जितः ।
अन्यानि यान्यभीष्टानि वर्जयेद्विष्णुतत्परः ।
विष्णुमानसो ब्रह्मन् सर्वमेवाक्षयं भवेत् ॥
पादाभिवन्दनं कृत्वा केशवस्य नरोत्तम ।
प्राप्नोत्यतुलमानन्दं प्रसन्ने गरुड़ध्वजे ।
तद्भक्तमनसः पुंसस्तोषं यान्ति दिवौकसः ॥
एवं व्रतानि पुण्यानि जन्मदुःखहराणि च ।
हरिमुद्दिश्य चीर्णानि भुक्तिमुक्तिप्रदानि तु ॥

अष्टम्याञ्च चतुर्द्दश्यां पञ्चयोरुभयोरपि।
नक्तं समाचरेद्यस्तु दीपं दद्याच्चतुष्पथे॥
ब्राह्मणे तु तथा दीपं दत्त्वा चैव गवाह्निकं।
चातुर्मास्यव्रतं कृत्वा व्रतान्ते गोवृषप्रदः।
स याति भवनं शम्भोः पूजितो देवसत्तमैः।
विष्णोः प्रदक्षिणां कृत्वा शम्भोर्वाथ द्विजोत्तम॥
व्रतान्ते वस्त्रदो भूत्वा दत्त्वा स्वर्गमवाप्नुयात्।
यस्तु वै चतुरो मासान् करोति च जगत्पतेः॥
केशवस्य महाभाग पादपूजां द्विजोत्तम।
स याति वैष्णवं लोकं शाश्वतं नात्र संशयः॥
यस्तु केशवमुद्दिश्य नित्यमेव तिलप्रदः।
तिलत्यागी भवेन्नित्यं चातुर्मास्यमतन्द्रितः॥
समाप्ते तु व्रते विप्र तिलधेनुप्रदो भवेत्।
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते।
तदन्ते च भवेद्राजा भारते भूभृताम्वरः॥
गीतन्तु देवदेवस्य केशवस्य शिवस्य च।
करोति नित्यमाप्नोति नरो योगस्य वै फलं॥
व्रतान्ते स व्रती दद्यात् घण्टां देवाय सुस्वरां।
कटुतिक्तकषायांश्च वर्ज्जयेद्यस्तु मानवः॥
स भवेद्रूपसम्पन्नो व्याधिभिर्नाभिभूयते।
व्रतान्ते च द्विजं पूज्य शक्त्या दद्याच्च दक्षिणां॥
पतितालापमनृतं वर्ज्जयेच्च चतुष्टयं।
पादाभ्यङ्गनरो दद्याद्ब्राह्मणानाञ्च भोजनं।

दक्षिणाञ्च यथाशक्त्या स गच्छेद्विष्णुमन्दिरं ॥
यस्तु वै चतुरो मासान् वर्ज्जयेद्घृतमुत्तमं ।
महालावण्यमाप्नोति गात्रसौरभ्यमेव च ॥
व्रतान्ते हरिमुद्दिश्य दत्त्वा ब्राह्मणभोजनं ।
गन्धेन पूज्य गोविन्दं ब्राह्मणाय द्विजोत्तम ।
वस्त्रयुग्मन्ततो दत्त्वा विष्णुलोके महीयते ॥
तेजस्वी जायते विप्र तैलपक्वस्य वर्ज्जनात् ।
विप्रान् सम्भोज्य विप्रर्षे याति लोकञ्च वैष्णवं ॥
यस्त्यजेद्धरिमुद्दिश्य स्नानमुष्णेन वारिणा ।
गङ्गास्नानं कृतन्तेन नित्यमेव न संशयः ॥
यस्तु संस्मरते नित्यं गङ्गां भागीरथीं शुभां ।
स नित्यं स्नानमाप्नोति गङ्गायां नात्र संशयः ॥
यस्तु सुप्ते हृषीकेशे पुष्पाणि च विवर्ज्जयेत् ।
व्रतान्ते तु भवेज्ज्ञातः स व्रती स्वर्णपुष्पदः ॥
स याति भुवनं शुभ्रं विष्णोरमिततेजसः ।
प्रसुप्ते तु जगन्नाथे शिवस्याङ्गणमर्च्चयेत् ।
पञ्चवर्णैस्तु यो नित्यं स्वस्तिकैः पद्मकैस्तथा ।
स याति रुद्रलोकं हि गाणपत्यमवाप्नुयात् ॥
यस्तु सुप्ते हृषीकेशे पूजयेन्मधुसूदनं ।
सायं प्रातस्तु भुक्त्वा वै प्राजापत्यपुरं व्रजेत् ॥
यस्तु सुप्ते हृषीकेशे तृतीयायां नरोत्तमं ।
प्रतिपक्षं गुडं दद्याद्गौरी मे प्रीयतामिति ॥
समाप्ते विप्रमिथुने पूजयित्वा द्विजोत्तमं ।

वस्त्रैराभरणैश्चैव भोजयित्वा भवेत् सुखी ॥
पञ्चम्यां प्रतिपच्चस्तु तण्डुलैः पूरितं घटं।
यः प्रदद्याद्व्रतस्यान्ते पूजयित्वा द्विजोत्तमान्॥
वस्त्रैराभरणैश्चैव तण्डुलप्रस्थमेव च।
दत्त्वा सारस्वतं याति पदं गन्धर्व्वपूजितं।
विद्वान् स पूर्णविभवो धनधान्यसमन्वितः॥
रूपवान् गुणवांश्चैव रत्नकण्ठश्च जायते।
चतुर्द्दश्यान्तु संपूज्य उमामाहेश्वरं विभुं॥
प्रतिपच्चन्तु संपूज्य पुष्पैर्गन्धैर्निवेदनैः।
चातुर्मास्ये ततो शुक्ले रौप्यं कृत्वा वृषोत्तमं।
तदोपरि च सौवर्णमुमामाहेश्वरं विभुं॥
पूजयित्वा द्विजश्रेष्ठ ब्राह्मणाय निवेदयेत्।
ततो स याति भुवनं विमानेन हि शाङ्करं।
कल्पान्ते तत्र वै स्थित्वा पृथ्वीपालो भवेदिति॥

भविष्योत्तरात्।

एवमादिव्रतैः पार्थ तोषमायाति तोषितः।
केशवः क्लेशहा कृष्णः कंसकेशिनिसूदनः॥
सुप्ते यस्मिन्निवर्त्तन्ते क्रियाःसर्व्वाः शुभोदयाः।
विवाहव्रतबन्धादिचूडासंस्कारचौलकं।
यज्ञगृहप्रवेशश्च प्रतिष्ठादिवभूभृतां॥
पुण्यानि यानि कर्म्माणि न स्युः सुप्ते जगत्पतौ।
असंक्रान्तस्तथा मासं देवे पैत्रे च कर्म्मणि॥
मलमासमृग्योवस्य वर्जयेत्पतिमाबरः।

प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि ॥
कटिदानं भवेद्विष्णोर्महापातकनाशनं।
कटिदानमिति शयितस्य विष्णोरङ्गपरिवृत्तिकरणं।
यदेतद्देवशयनं तवेदङ्कारणं शृणु ॥
पुरा तपःप्रभावेण तोषितोऽहं महाभुज।
प्रार्थितः स्थानमङ्गेषु प्रीत्यर्थं योगनिद्रया ॥
ततो मयात्मनो देहं तत् स्थानार्थं निरीक्षितं।
उरो लक्ष्म्या नम व्याप्तं हृदयं कौस्तुभेन तु ॥
शङ्खचक्रगदाशार्ङ्गैर्बाहवोथाहवक्षमाः।
अधो नाभिर्निबद्धं मे वैनतेयेन पक्षिणा।
मुकुटेन शिरो रुद्धं कुण्डलाभ्यां श्रुतिद्वयं ॥
ततो दत्तं मया पार्थ नेत्रयोः स्थानमादरात्।
चतुरो वार्षिकान्मासान् वत्सः प्रीतो भविष्यति ॥
योगनिद्रापि तद्वाक्यं श्रुत्वा प्रीताभवत्तु सा।
चकार लोचनावासमतोऽयं मे युधिष्ठिर ॥
अहञ्च ताम्भावयित्वा मानयाम्यात्मसंस्थितां।
योगनिद्रां महानिद्रां शेषाहिशयने स्वपन्।
क्षीरोदवीचयवीच्योर्वेष्टितपादः समाहितः ॥
लक्ष्म्याः कराम्बुजैः सम्यङ्मृद्यमानपदद्वयः।
तस्मिन् काले च महतो यो मामाश्रयुरः क्षिपेत् ॥
व्रतैरनेकैर्नियमैः पाण्डव श्रेयसेऽनघ।
कल्पमेकं विष्णुलोके पूज्यमानो नरो वसेत् ॥
ततो विबुध्यते देव शङ्खचक्रगदाधरः।

ब्रह्मपुराणात्। एकादश्याञ्च शुक्लायां कार्त्तिके मासि केशवं।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः॥
नृत्यैर्गीतैस्तथा वाद्यैः ऋग्यजुःसाममङ्गलैः।
वीणापटहशब्दैश्च पुराणश्रवणेन च॥
वासुदेवकथाभिश्च स्तोत्रैरन्यैश्च वैष्णवैः।
शुभासितैरिन्द्रजालैर्भूरिशोभाभिरेव च॥
पुष्पैर्धूपैश्च नैवेद्यैर्दीपैश्चैः सुशोभनैः।
क्षीमैर्भक्ष्यैरपूपैश्च फलैः शर्करपायसैः॥
इक्षोर्विकारैर्मधुरैर्द्राक्षाचूतैः सदाडिमैः।
कुठेरकस्य मञ्जर्या मालत्या कमलेन च॥
कुठेरकः कृष्णतुलसी।
कुशाभ्यां श्वेतरक्ताभ्याञ्चन्दनाभ्याञ्च सर्व्वदा।
कुङ्कुमालक्तकाभ्याञ्च रक्तसूत्रैः सकङ्कणैः॥
तथा नानाविधैः पुष्पैर्द्रव्यैर्वा कनात्मकैः।
रक्तयुक्तेन प्रथमं माल्येन ग्रहणं तथा॥
तस्यां रात्र्यां व्यतीतायां द्वादश्याः सहणोदये।
आदौ घृतेनैवर्वेण मधुना स्नापयेत्ततः॥
दध्ना क्षीरेण च ततः पञ्चगव्येन शास्त्रवत्।
उद्वर्त्तनं माषचूर्णं मसूरामलकानि च॥
सर्षपाश्च प्रियङ्गुश्च सर्व्ववीजानि काञ्चनं।
मङ्गलानि यथाकामं रत्नानि च कुशोदकं॥
एवं संशोध्य देवेशं दद्याद्गोरोचनां शुभां।
ततस्तु कलशा देया यथा प्राप्ताः स्वलङ्कृताः॥

जातीपल्लवसंयुक्ताः सफलाश्च सकाञ्चनाः ।
पुण्याहवेदशब्देन वीणावेणुरवेण च ॥
एवं संस्थाप्य गोविन्दं स्वनुलिप्तं स्वलङ्कृतं ।
सुवाससन्तु सम्पूज्य सुमनोभिः सुकुङ्कुमैः ।
दीपैर्धूपैर्मनोज्ञैश्च पायसेन च भूरिणा ॥
पाद्यार्घ्याचमनैश्च होमैः पुष्पैः सदक्षिणैः ।
वासोभिर्भूषणैरन्यैर्गोभिश्चैव मनोज्ञैः ॥
ब्राह्मणाः पूजनीयाश्च विष्णोर्ह्येताश्च मूर्त्तयः ।
यत्तु शिष्टामृतं पश्चाद्भोक्तव्यं ब्राह्मणैः सह ॥

भविष्योत्तरात् ।

कार्त्तिके शुक्लपक्षस्य एकादश्यां समाहितः ॥
मन्त्रेण चैव राजेन्द्र देवमुत्थापयेद्द्विजः ।

मन्त्रास्तु वराहपुराणोक्ताः ।

ओं ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्य-
सोमादिभिर्वन्दितवन्दनीय ।
बुध्यस्व देवेश जगन्निवास
मन्त्रप्रभावेण सुखेन देव ॥

इयं तु द्वादशी देव प्रबोधार्थन्तु निर्म्मिता ।
त्वयैव सर्व्वलोकानां हितार्थं शेषशायिना ॥
त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदं ।
उत्थिते चेष्टते सर्व्वमुत्तिष्ठोत्तिष्ठ माधव ॥
गता मेघा वियच्चैव निर्म्मलं निर्म्मला दिशः ।
शारदानि च पुष्पाणि गृहाण मम केशव ॥

इदं विष्णुरिति प्रोक्ते मन्त्रमुत्थापने हरेः।
समुत्थिते ततो विष्णौ प्रवर्त्तन्ते शुभाः क्रियाः॥
तथैव देवदेवस्य स्नानन्तु पूर्ववद्भवेत्।
महातूर्य्यरवै रात्रौ भ्रामयेद्देवमुत्थितं॥
विमानाकारयानेन नगरे पार्थिवः स्वयं।
दीपोद्योतकरे मार्गे नृत्यगीतजनाकुले॥
यो यो दामोदरं पश्येदुत्थितं धरणीधरं।
स स प्राणी महाराज सर्व्वः स्वर्गाय कल्पेत्॥
रात्रौ प्रजागरे देव एकादश्यां सुरालये।
प्रभाते विमले स्नात्वा द्वादश्यां विष्णुमर्च्चयेत्॥
होमयेद्धव्यवाहस्य होमद्रव्यैर्घृतादिभिः।
ततोविप्रान् नृपश्रेष्ठ भोजयेदन्नविस्तरैः॥
घृतक्षीरदधिक्षौद्रकासारगुडमोदकैः।
यजमानयुतस्तूच्चस्वरां हास्य विवर्जयेत्॥
एकादशदशाष्टौ वा पञ्च द्वौ वा कुरूत्तम।
अर्च्चयेच्चन्दनैर्गन्धैर्वस्त्रमाल्यादिभिर्द्विजान्॥
शास्त्रोक्तविधिना पार्थ श्रद्धया विधितत्परः।
पितरस्तापितास्तेन तोषितस्तेन केशवः॥
न हि कश्चित्समः माघधर्मः श्राद्धेन पाण्डव।
पितॄनुद्दिश्य यत्किञ्चिद्दीयते श्रद्धयान्वितैः।
तत्प्रीत्या भुज्यते देवैर्ब्रह्मादिभिरसंशयं॥
अतः श्राद्धोक्तविधिना व्रतान्ते पूजयेद्द्विजान्।
पारणान्ते तु ततोदद्यात्स्वयं यत्किञ्चिदेव हि॥

स्ववाचा स्वमनोभीष्टं देयधान्यफलादिकं ।
चतुरो वार्षिकान् मासान् नियमो येन यः कृतः ॥
कथयित्वा द्विजेभ्यस्तद्दद्याद्भक्त्या सदक्षिणं ।
दत्त्वा विसर्जयेद्विप्रान् ततो भुञ्जीत वाग्यतः ॥
यस्त्वेतांश्चतुरो मासान् प्रवृत्तिं तस्य वाचयेत् ।
स एवं कुरुते पार्थ सोऽनन्तफलभाग्भवेत् ॥
प्रतिवर्षञ्च यः कुर्य्यादेवं संस्मरते हरिं ॥
देहान्तेऽतिप्रदीप्तेन विमानेनार्कवर्च्चसा ।
मोदते विष्णुलोकेऽसौ यावदाभूतसंप्लवं ॥
यस्त्वविघ्नैः समाप्येत चातुर्मासीव्रतं नृप ।
स भवेत् कृतकृत्यस्तु तुष्टो यस्य जनार्द्दनः ॥
यो देवशयने भक्त्या अनुष्ठानं समाचरेत् ।
गङ्गादितीर्थयात्रायास्तुल्यं फलमवाप्नुयात् ॥
उत्थानं चापि कृष्णस्य स हरेर्लोकमाप्नुयात् ।
शृणोति ध्यायति स्तौति समाख्यात्यनुमोदते ।
व्रतमेतन्नरो भक्त्या स गच्छेद्वैष्णवं पुरं ॥
दुग्धाब्धिभोगिशयने भगवाननन्तो ,
यस्मिन् दिने स्वपिति चाथ निबुध्यते वा ।
तस्मिन्ननन्यमनसामुपवासभाजां
पुंसां ददाति सुगतिङ्गरुडाङ्गमङ्गः ।

इति देवशयनोत्थानविधिः ।

आषाढ़ादिचतुर्म्मासानभ्यङ्गं वर्ज्जयेन्नरः ।
पारिते च पुनर्द्दद्यात्तिलतैलयुतं घटं ॥
भोजनं पायसाद्यञ्च स याति भवनं विभोः ।
लोकप्रीतिकरं चैतत् केशव्रतमिहोच्यते ॥

इति पद्मपुराणोक्तं केशव्रतं ।

———ooo———

आषाढ़ादिचतुर्म्मासान् वर्ज्जयेन्नखकृन्तनं ।
वृन्ताकभक्षणञ्चैव मधुसर्पिर्घटान्वितं ॥
कार्त्तिक्यां तत्पुनर्हैमं ब्राह्मणाय निवेदयेत् ।
रुद्रलोकमवाप्नोति शिवव्रतमनुत्तमं ॥

इति पद्मपुराणोक्तं शिवव्रतं ।

———ooo———

महाफलानि यस्त्यक्त्वा चातुर्मास्ये द्विजातये ।
हैमानि कार्त्तिके दद्याद्गोयुगेन समं नरः ॥
सितवस्त्रयुगेनाथ सम्पूर्णान्यहतेन च ।
एतत् फलव्रतं नाम सर्व्वकामफलप्रदं ॥

इति पद्मपुराणोक्तं फलव्रतं ।

———oo———

आषाढ़ादिचतुर्म्मासान् प्रातः स्नायी भवेन्नरः ।
विप्राय भोजनं दत्त्वा कार्त्तिक्यां गोप्रदो भवेत् ॥
घृतकुम्भन्तथा दद्यात् सर्व्वकामानवाप्नुयात् ।
वैष्णवव्रतमित्युक्तं विष्णुलोकप्रदायकं ॥

इति पद्मपुराणोक्तं वैष्णवव्रतं ।

अग्रं वै मार्गशीर्षे तु यस्तु पिष्टमयन्ददेत्।
शिवं सम्पूज्य विधिवत् सूर्यलोके महीयते॥
दिव्यं वर्षसहस्रन्तु तदन्ते स्यान्महीपतिः।
पौषे पिष्टमयो दत्त्वो शिवस्याग्रे निवेदयेत्॥
त्रिःसप्तकुलसंयुक्तः शिवलोके महीयते।
दिव्यं वर्षसहस्रन्तु तदन्ते स्यान्महीपतिः॥
चक्रवर्त्ती महावीरः सर्वैश्वर्य्यसमन्वितः।
माघे चामरं यस्तु शिवाय विनिवेदयेत्॥
उद्धरेत्सोऽपि नरकात् स्वपितृन् रौरवादितः।
शिवलोके तु वसति दिव्यवर्षायुतत्रयं॥
तदन्ते तु महीं कृत्स्नां स च सुक्त्वां भुनक्ति सः।
फाल्गुने हययूथन्तु पिष्टोत्थं रुद्रसंख्यया॥
निवेद्य तु शिवस्याग्रे त्रैलोक्याधिपतिर्भवेत्।
दिव्यं वर्षसहस्रन्तु तदन्ते स्यान्महीपतिः॥
चक्रवर्त्ती महावीरः सर्वैश्वर्य्यसमन्वितः।
चैत्रे गृहमिन्दमयं दासदासीसमन्वितं॥
गृहोपकरणैर्युक्तं विचित्राभरणवर्जितं।
पूजान्ते परया भक्त्या शिवाय विनिवेदयेत्॥
दिव्यवर्षशतान्यष्टौ रुद्रलोके महीयते।
जातिस्मरस्तदन्ते तु चक्रवर्त्तित्वमाप्नुयात्।
मासि वैशाखसंज्ञे तु सप्तत्रीहिसमावकान्॥
शिवाय पुरतो दद्यात् पूजान्ते प्रीतिचेतसा।
स याति शिवसायुज्यं बन्धुभिः सहितो नरः॥

फलानां द्वे शते यस्तु गुग्गुलन्तु दहेत्सुधीः।
ज्येष्ठे मासि शिवस्याग्रे पूजान्ते भक्तिसंयुतः॥
त्रिःसप्तकुलसंयुक्तः शिवलोके महीयते।
तदन्ते पृथिवीं भुङ्क्ते स च सर्व्वां ससागरां॥
बलिमण्डलकं कार्य्यं आषाढ़े शूलपाणिनः।
नानाभक्षैर्विरचितं नानाभक्ष्यसमन्वितं॥
नानाचित्रसमाकीर्णं कर्त्तव्यं बलिमण्डलं।
संपूज्य परमेशानं ततस्तस्य निवेदयेत्॥
पितॄन् पितामहांश्चैव उद्धृत्य प्रपितामहान्।
पुत्रपौत्रसमायुक्तः शिवलोके महीयते॥
दिव्यवर्षसहस्राणि तदन्ते पृथिवीपतिः।
श्रावणे मासि देवस्य विमानं पुष्पसम्भवं॥
पूजावसाने दातव्यं विचित्ररचनाकुलं।
वर्षायुतप्रमाणन्तु रुद्रलोके महीयते॥
योगीशो जायते शान्तो येन मोक्षं व्रजेन्नरः।
मासि भाद्रपदे यस्तु रुद्रपूजां चरेत्सदा॥
गुग्गुलं प्रथमं धूपं सुरदारु ततो दहेत्।
बिल्वबीजं घृतं तद्वत् तथा नानाघृतान्वितं॥
पञ्चमं त्वगुरुन्देयं धूपं सर्व्वात्मना विभोः॥
मासमेकन्दहेद्यस्तु नैरन्तर्य्येण भक्तितः।
याति सायुज्यतां शम्भोः सपुत्रः सहबान्धवः॥
यश्चार्कपत्रपुटकं पूरयेत्क्षीरसर्पिषा।

(१) पञ्चमं इति क्वचित् पाठः।

मासमध्यगुणं शम्भोर्नैरन्तर्येण भक्तितः ॥
तस्य पुण्यफलं वक्तुं न शक्तोऽस्मि षडानन ।
तत्कुले पतिता ये तु स्त्रियाश्चिश्च्युता पुनः ॥
ते प्रयान्ति महाभागा रुद्रलोके यथासुखं ॥
वर्षायुतायुतं साग्रं तदन्ते तु नरेश्वराः ।
जायन्ते शिवभक्ताश्च ज्ञानिनो वीतकल्मषाः ॥
शिवदीक्षां समासाद्य ते यान्ति परमाङ्गतिं ।
वस्त्राहतमिक्षुरसं पुटकन्तु शिवाग्रतः ।
पूजान्ते दापयेद्यस्तु मासि प्राप्ते च कार्त्तिके ॥
देहान्ते रुद्रलोके तु मोदते सह बान्धवैः ।
व्रतान्ते चैव संपूज्य शिवभक्तान् यथाविधि ॥
हेमवस्त्रान्नपानैश्च वित्तशाठ्य विना सुत ।

इति कालोत्तरोक्तं शिवव्रतं ।

———०४०———

एकभक्तेन या नारी कार्त्तिकन्तु क्षपेन्नृप ।
क्षमाहिंसादिनियमैः सञ्जाता ब्रह्मचारिणी ॥
गुडान्नमिश्रं शाल्यन्नं भास्कराय निवेदयेत् ।
पुष्पाणि करवीराणि गुग्गुलं साज्यमादरात् ॥
सप्तम्यामथ षष्ठ्यां वा उपवासरतिर्भवेत् ।
पक्षयोरुभयोरेव श्रद्धया परयान्वितः ॥
इन्द्रनीलप्रतीकाशं विमानैः सार्व्वकामिकैः ।
नारीयुगशतं साग्रं सूर्य्यलोके महीयते ॥
तथा च सर्व्वलोकेषु भोगानावाप्य यत्नतः ।

तस्मादागत्य लोकेऽस्मिन् यथेष्टं विन्दते पतिं॥
क्षमा सत्यन्दया दानं शौचमिन्द्रियनिग्रहः।
सूर्य्यपूजाग्निहवनं सन्तोषस्तेयवर्ज्जनं॥
सर्व्वव्रतेष्वयं धर्म्मः सामान्येन सदा स्थितः।
मार्गशीर्षे शुभे मासि व्योमपिष्टेन निर्म्मितं॥
गन्धमाल्यैरलङ्कृत्य भास्कराय निवेदयेत्।
गैरिकेयैर्महास्थानैरप्सरोगणसेवितैः॥
मासैकादशसाहस्रं सूर्य्यलोके महीयते।

गैरिकेयः महास्वर्गः।

क्रमादागत्य लोकेऽस्मिन् राजानं पतिमाप्नुयात्।
पौषे तु गरुडं कृत्वा भानवे विनिवेदयेत्॥
गन्धमाल्यैरलङ्कृत्य भास्करं विबुधोत्तमं।
ताम्रपात्रेऽथ कांस्ये वा तत्सर्व्वं विनिवेदयेत्।
महापद्मकदानेन दिव्यगन्धप्रवाहिना।
वर्षैकादशसाहस्रं सूर्य्यलोके महीयते।
सम्प्राप्यैवं क्रमाल्लोकं यथेष्टं विन्दते पतिं॥
माघे रथञ्चाश्वयुतं दीपमाल्यविभूषितं।
पैष्टश्वानुसमायुक्तं कृत्वायतनमानयेत्॥
विमानैः सूर्य्यसङ्काशैर्गीतवाद्यसमाकुलैः।
समैकादशसाहस्रं सूर्य्यलोके महीयते।
पुनरेत्य इमां लोकं यथेष्टं विन्दते पतिं॥
देवार्च्चां फाल्गुने मासि कृत्वा पिष्टमयीं रवेः।
गन्धमाल्यैरलङ्कृत्य स्थापयेत् भास्करालये॥

विमानैः सूर्य्यसङ्काशैर्गीतवाद्यसमाकुलैः।
वर्षायुतशतं साग्रं सूर्य्यलोके महीयते॥
तस्मादागत्य लोकेऽस्मिन् यथेष्टं विन्दते पतिं।
कृत्वा वत्सं तथा वस्त्रे गन्धमाल्योपशोभितं॥
स्थाप्य पात्रे यथोक्तन्तु भास्कराय निवेदयेत्।
शरदिन्दुप्रतीकाशैर्विमानैः सार्व्वकामिकैः॥
वर्षायुतशतं साग्रं सूर्य्यलोके महीयते।
कर्म्मक्षयादिहागत्य पुत्रपौत्रसमन्विता॥
अभीष्टं पतिमासाद्य तत्र भोगान् सुदुर्लभान्।
तण्डुलाढकपिष्टेन कृत्वा वै मेरुपर्व्वतान्॥
निम्नभागं समायुक्तं सर्व्वधातुविभूषितं॥
नानालङ्कारसम्पन्नं नानामाल्यविभूषितं।
सर्व्वरत्नसमायुक्तं स्थापयेद्भास्करालये॥
महाव्योमव्रतं ह्येतत् वैशाखे यः समाचरेत्।
नानाविधैर्विमानैश्च सूर्य्यलोके महीयते॥
तस्मादागत्य लोकेऽस्मिन् क्रीडते मानसेऽचले।
पिष्टेन पङ्कजं कृत्वा ज्यैष्ठे मासि सवेदिकं॥

पङ्कजं पद्मं।

पात्रैः संपूज्य गन्धाद्यैर्नानामाल्यविभूषणैः।
शुद्धस्फटिकसङ्काशैर्विमानैः सार्व्वकामिकैः।
वर्षकोटिशतं साग्रं सूर्य्यलोके महीयते॥
तस्मादागत्य लोकेऽस्मिन् राजानं पतिमाप्नुयात्।
विवाह च तथा पद्ममापाद्वै पदमुत्तमं॥

सर्व्वबीजरसैः पूर्णं कृत्वा तु शुभलक्षणं।
नानाकौसरगन्धाढ्यं सर्व्वरत्नसमन्वितं॥
भास्कराय निवेदयेदिति शेषः।
हंसवाहैर्महायानैः सर्व्वभोगान्विते नृप।
वर्षकोटिशतं साग्रं ब्रह्मलोके महीयते।
ब्रह्मलोके सूर्य्यलोके।
क्रमाल्लोकमिमं प्राप्य राजानं विन्दते पतिं।
निवेदयेत्तु सूर्य्याय श्रावणे तिलपर्व्वतं॥
स्वच्छन्दगामिभिर्य्यानैर्नानारत्नविभूषितैः।
वर्षकोटिशतं साग्रं सूर्य्यलोके महीयते॥
सम्प्राप्य विविधान् भोगान् बह्वाश्चर्य्यसमन्वितान्।
क्रमाल्लोकमिमं प्राप्य राजानं विन्दते पतिं॥
कृत्वा भाद्रपदे मासि व्योमशालिमयं नृप।
वितानध्वजवस्त्राढ्यं नानामाल्यविभूषितं॥
निशाकरकरप्रख्यैर्महायानैः शुभैः भनैः।
वर्षकोटिसहस्राणि सूर्य्यलोके महीयते॥
क्रमादागत्य लोकेऽस्मिन् राजानं विन्दते पतिं।
कृत्वा चाश्वयुजे मासि विपुलं धान्यपर्व्वतं।
सुवर्णवस्त्रगन्धाढ्यं सूर्य्यस्याग्रे निवेदयेत्॥
सा विचित्रैर्महायानैर्वरभोगसमन्वितैः।
वर्षकोटिसहस्राणि सूर्य्यलोके महीयते॥
पश्चिम् लोकमनुप्राप्ता राजानं विन्दते पतिं।

इति भविष्यत्पुराणोक्तं स्त्रीपुत्रकामावाप्तिव्रतं।

पुलस्त्य उवाच ।

आषाढशुक्लपक्षान्ते भगवान् मधुसूदनः ।
भोगिभोगे निजां मायां योगनिद्रान्तु मानयेत् ॥
ग्रैतेऽस्रो चतुरो मासान् यावद्भवति कार्त्तिकी ।
विशिष्टास्तु प्रवर्त्तन्ते तदा यज्ञादिकाः क्रियाः ॥
तथाषाढसितान्ते तु यो नरो दिनपञ्चकं ।
अधःशायी बहिःस्नायी मासमभ्यङ्गवर्जितः ॥
समस्तमन्दिरावर्जी सकलक्षमागनो भवेत् ।
ब्रह्मचारी जितक्रोधो जपहोमपरायणः ।
हरिं संपूजयेन्नित्यं गन्धमाल्यानुसम्पदा ॥
गीतवाद्यैस्तथा नृत्यैर्दीपमालाभिरेव च ।
सार्द्धेनां जलधेनूनां प्रदानेन तथैव च ।
तथा कार्त्तिकशुक्लान्ते तृतीये पारणं भवेत् ॥
प्रस्वापे च प्रबोधे च दिनानि दश वै द्विज ।
हिंसात्मकैस्तु निन्तस्य यत्नैः कार्य्यं महात्मनः ॥
प्रस्वापे च प्रबोधे च पूजितो येन केशवः ।
दशाहमेतत् कृत्वा तु व्रतं विष्णुपरो नरः ॥
अग्निष्टोममवाप्नोति कुलञ्चैव समुद्धरेत् ।
अग्निर्मुखं देवतानामग्निर्देवश्च कृत्तिका ॥
कार्त्तिकश्चाग्निदैवत्यो मासो देवमुखः स्मृतः ।
आश्वयुज्यामतीतायां यावत्स्यादिह कार्त्तिकी ॥
व्रतं दशाहाभिहितं कृत्वा स्वर्गे महीयते ।
पौण्डरीकमवाप्नोति कुलमुद्धरति स्वकं ॥

प्रत्यहं दीपदानेन कार्त्तिकेऽभिमुखीभवेत् ।
चक्षुष्मान् ब्राह्मणश्रेष्ठस्तथा सर्व्वत्र पूजितः ॥
एतावन्तं तथाकालं सर्व्वमांसविवर्जकः ।
स्वर्गलोकात्परिभ्रष्टो मानुषे सुखमाप्नुयात् ॥
आरोग्यरूपसम्पन्नो युक्तश्च सुभगो भवेत् ।
प्रसुप्ते देवदेवेशे दशरात्रोदितं व्रतं ॥
कृत्वा तु चतुरो मासान् प्रसुप्ते मधुसूदने ।
अश्वमेधफलं प्राप्य नाकपृष्ठे महीयते ॥
असिधाराव्रतं कृत्वा तथा संवत्सरं नरः ।
सर्व्वयज्ञानवाप्नोति विष्णुलोकञ्च गच्छति ॥
येन येन तु कामेन खड्गधाराव्रतञ्चरेत् ।
तं तत्काममवाप्याथ विष्णुलोके महीयते ॥
तथा समर्थो भवति दाने च वरशापयोः ।
आदित्यतेजा भवति नात्र कार्य्या विचारणा ॥

दाल्भ्य उवाच ।

असिधाराव्रतविधिं समाचक्ष्व महाद्युते ।
एतन्मे संशयं छिन्धि त्वं हि सर्व्वविदुच्यते ॥

पुलस्त्य उवाच ।

आतयालकृतत्यागी भुक्तवाप्यासवर्जितं ।
कृतदैवत्यपूजश्च स्त्रीसहायः स्वपेन्निशि ॥
ब्रह्मचारी द्विजश्रेष्ठ खड्गधाराव्रतं चरेत् ।
अपूर्व्वं चात्र पूर्व्वं च समालिङ्ग्य स्वपेन्निशि ॥
ब्रह्मचारी यतस्तच्च फलमाप्नोत्यसंशयं ।

अतीवदुष्करमिदं खड्गधाराव्रतं स्मृतं॥
कृत्वा व्रतं द्वादशवत्सराणि
त्रैलोक्यराज्यं भुवमाप्नुयाच्च।
भुक्ताचिरन्ते द्विजमुख्यमन्ते
सायुज्यमायाति जनार्दनस्य॥

इति विष्णुधर्म्मोत्तरोक्तमसिधाराव्रतं।

मार्कण्डेय उवाच।
इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतन्तव।
विद्याकामेन यत्कार्य्यं नरेण सुविपश्चिता॥
बहिः स्नानं नरः कृत्वा कृतक्षग्वेदपूजनः।
ऋग्वेदं शृणुयान्नित्यं मासत्रयमतन्द्रितः॥
चैत्रादारभ्य धर्म्मज्ञ नित्यं नक्ताशनो भवेत्।
ततो नृपवर प्राप्ते ज्यैष्ठस्य चरमेऽहनि॥
चामीकरं हिरण्यञ्च तथा धेनुं पयस्विनीं।
घृतपूर्णं कांस्यपात्रं सहिरण्यन्तु दक्षिणां॥
आषाढ़ादिषु मासेषु यजुर्वेदव्रतं चरेत्।
आश्विनादिषु मासेषु सामवेदव्रतं चरेत्॥
तथाप्यथर्वव्रतं नाम पौषादिषु विधीयते।
सर्वेषु मण्डकार्य्यं ऋग्वेदव्रतकीर्त्तितं॥
वेदात्मको वासुदेवस्य पूजां
कृत्वा नरो द्वादशवत्सराणि।

विष्णोर्लोकं याति लोकैर्विशिष्टं
यस्मिन् प्राप्ते सर्व्वदुःखं जहाति ॥

इति विष्णुधर्म्मोत्तरोक्तं वेदव्रतं।

———000———

मार्कण्डेय उवाच।

इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव।
चैत्रस्यामलपक्षे तु सोपवासो जितेन्द्रियः॥
वासुदेवन्तु संपूज्य ब्राह्मणाय विचक्षणः।
दक्षिणार्थन्तु वै दद्याद्द्रव्यं यज्ञोपयोगिवित्॥
सङ्कर्षणन्तु संपूज्य वैशाखे धर्म्मवत्सल।
क्षत्रियाय तथा दद्याद्द्रव्यं सांग्रामिकं शुभं॥
प्रद्युम्नं पूजयित्वा तु ज्यैष्ठे मासि द्विजोत्तम।
वैश्याय दद्याद्वाणिज्ये द्रव्यं यदुपयुज्यते॥
कृत्वानिरुद्धपूजान्तु मास्याषाढ़े यथाविधि।
कर्म्मोपकरणं(१) द्रव्यं दद्याच्छूद्राय गार्गव॥
मासैश्चतुर्भिर्भवति पारणं प्रथमं द्विज।
कृत्वा नरस्त्रिचय पारणानि
लोकं समाप्नोति पुरन्दरस्य।
तत्रोष्य राजन् सुचिरञ्च कालं
मानुष्यमासाद्य भवेत् समृद्धः॥

इति विष्णुधर्म्मोत्तरोक्तं वर्णव्रतं।

---

(१) कामाय कारणमिति पुस्तकान्तरे पाठः।

मार्कण्डेय उवाच।

इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतन्तव।
नित्यश्चतुर्षु मासेषु श्रावणाद्येषु यादव।
चतुःसागरचिह्नानि पूर्णकुम्भांस्तु पूजयेत्।
चतुरात्मा हरिर्ज्ञेयः सागरात्मा विचक्षणैः॥
स्नानं समाचरेन्नित्यं नदीतोयेन यादव।
होमश्च प्रत्यहं कुर्य्यात् शततं तैलवर्जितं॥
कार्त्तिकस्याथमानाह्नि पूजयित्वा द्विजोत्तमान्।
तैलं दत्त्वा तु विप्राय नाकपृष्ठे महीयते।
सर्व्व काम समृद्धस्य यज्ञस्य लभते फलं॥

मानुष्यमासाद्य महीपतिश्च
भुक्त्वा महीं सागरमेखलान्तां।
तत्रापि धर्मस्य मनोनिविष्टो
भवत्यरोगश्च बलेन युक्तः॥

इति विष्णुधर्म्मोत्तरोक्तं सागरव्रतं।

मार्कण्डेय उवाच।

इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतन्तव।
वासुदेवस्य गरुड़स्तालः सङ्कर्षणस्य च॥
प्रद्युम्नस्य तथा चिह्नं मकरो व्यादितानन:।
देवानिरुद्धो धर्म्मज्ञ ऋष्यकेतुः प्रकीर्त्तितः॥
पीतं नीलं तथा श्वेतं रक्तञ्च यदुनन्दन।

तेषान्तु कथितं वासः पताका तादृगिष्यते ॥
यस्य देवस्य यच्चिह्नं स चात्मना प्रकीर्त्तितः ।
पताका तादृशी तस्य वसनन्तस्य तादृशं ।
चैत्रेषु प्रत्यहं मासि गरुड़ं पूजयेन्नरः ॥
पीतेन गन्धनैवेद्यमाल्यवस्त्रादिना द्विज ।
वैशाखे च तथा मासि तालं संपूजयेत्सदा ॥
नीलेन गन्धनैवेद्यमाल्यवस्त्रादिना द्विज ।
ज्येष्ठे च प्रत्यहं मासि मकरं पूजयेत्सदा ॥
श्वेतेन गन्धनैवेद्यमाल्यवस्त्रादिभिर्द्विज ।
ऋश्यं संपूजयेद्देवं मास्याषाढ़े यथाविधि ।
रक्तेन गन्धनैवेद्यमाल्यवस्त्रादिना द्विज ॥
बहिः स्नानं तथा कुर्य्याद्वह्निसंपूजनं तथा ।
नित्यञ्च कुर्य्याद्धर्मज्ञ तथा ब्राह्मणभोजनं(१) ।
पारणार्थं तथा कुर्य्याद्व्रतं तैलविवर्जितं ॥
अधःशयी तथा च स्याद् ब्रह्मचारी सदा भवेत् ।
व्रतमेतन्नरः कुर्य्यात् सम्यङ्मासचतुष्टयं ॥
ब्राह्मणान् पूजयेच्चैव तथा आषाढ़े चरमेऽहनि ।
वस्त्राण्युक्तानि धर्मज्ञ दद्याद्विप्रेषु दक्षिणां ॥
कृत्वैकं पारणं राजन् स्वर्गलोके महीयते ।
द्वितीयं पारणं कृत्वा शक्रलोके महीयते ॥
तृतीयं पारणं कृत्वा ब्रह्मलोके महीयते ।
कृत्वा पारणषट्कन्तु रुद्रलोके महीयते ॥

---

(१) ब्राह्मणतर्पणमिति पुस्तकान्तर पाठः ।

विष्णुलोकमवाप्नोति कृत्वा द्वादश पारणं।

ध्वजव्रतं द्वादशवत्सराणि
कृत्वा नरो भार्गववंशमुख्य।
सायुज्यमायाति जनार्द्दनस्य
देवस्य विष्णोः परमेश्वरस्य॥

इति विष्णुधर्म्मोत्तरोक्तं ध्वजव्रतं।

———oo@oo———

मार्कण्डेय उवाच।

इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतन्तव।
शङ्खचक्रं गदापद्मं चतुरात्मा प्रकीर्त्तितः॥
वासुदेवः स्मृतः शङ्खः चक्रः सङ्कर्षणस्तथा।
प्रद्युम्नश्च गदापद्ममनिरुद्धोजगद्गुरुः॥
श्रावणादिषु मासेषु वहिःस्नातस्तु मत्सभाक्।
तेषान्तु पूजनं कुर्य्यात् प्रतिमासमनुक्रमात्॥
गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा।
ततस्तु कार्त्तिकस्यान्ते समाप्ते तु तथा व्रते॥
ब्राह्मणान् भोजयेद्भक्त्या दद्याच्छक्त्या च दक्षिणां।
कांस्यपात्रञ्च सघृतं ससुवर्णं तथैव च।

कृत्वा व्रतं मासचतुष्टयञ्च
प्राप्नोति लोकं त्रिदशेश्वरस्य।
मानुष्यमासाद्य तथैव चयात्
वसुन्धरेशो भवतीह वीरः॥

इति विष्णुधर्म्मोत्तरोक्तं आयुधव्रतं।

ब्रह्मोवाच।

अतः परं प्रवक्ष्यामि सर्वाभ्युदयवर्द्धनं।
यत्कृत्वा जायते राजा सार्व्वभौम इहानघ॥
मासे नभसि संप्राप्ते नक्ताहारी जितेन्द्रियः।
प्रातःस्नायी सदाध्यायी अग्निकार्य्यपरायणः।
देवीं संपूजयेद्वत्स बिल्वपुष्पैर्नागचम्पकैः॥
धूपन्तु गुग्गुलं दद्यान्नैवेद्यं घृतपाचितं।
क्षीरान्नं दधिभक्तञ्च अथवा शाकयावकं॥
जपञ्च कुर्य्यान्मन्त्रस्य सहस्रमथवा शतं।
देव्यास्तत्र समर्प्येत यावत् पूर्णं व्रतम्भवेत्॥
पूर्णे व्रते ततो वत्स कन्याचार्य्यद्विजस्त्रियः।
भोजयेत् पूजयेच्छक्त्या हेमगोचरभूषणैः॥
अभावान्मन्त्रजप्यञ्च नित्यं कार्य्यं नृपोत्तम।
यः कुर्य्यात् सततं भक्त्या सापि तत्तुल्यतामियात्।
नचव्याधिजरामृत्युर्न भयञ्चारिसम्भवं।
जायते देवि भक्तस्य अन्ते च फलमव्ययं॥

अत्र मन्त्रपदानि भवन्ति। ओँ नन्दने नन्दनि सर्व्वार्थसाधनी नमः। मूलमन्त्रः। ओँ नन्दने हृदयाय नमः, हृदयं। नन्दिनी शिरसे नमः, शिरः। सर्व्वार्थे नमः। शिखा। ओँ अर्थसाधिनी नमः, कवचं। ओँ नमः, हुँ फट्, अस्त्रं। ओँ नेत्राय नमः। ओँ नन्दिनी उपचारहृदयं।

तृतीयायाञ्च पञ्चम्यां चतुर्थ्यामष्टमीषु च।

नवम्यां पौर्णमास्यामेकादश्यां द्वादशीषु च।
षष्ठ्यां सा चैव विज्ञेया पूजनीया विशेषतः॥
नन्दामुद्दिश्य यो दद्याच्छ्रावणे गोद्वयं सितं।
स लभेदिष्टकामार्थं देवीलोकञ्च शाश्वतं॥
नभस्येतां समुद्दिश्य दद्याद्गां काञ्चनं पिवा।
स व्रजेद्धूतपापस्तु नन्दालोकञ्च निर्भयं॥
आश्विने नवरात्रञ्च उपवासमयाचितं।
कृत्वा देवीं प्रपूज्याथ अष्टम्यामपरेऽहनि॥
हेमपुष्पमणिर्वस्त्रं नानाचित्रविभूषितं।
दातव्यं काञ्चनं देयं नन्दायै स्वार्थसिद्धये॥
विधूतपापसङ्घातः सर्व्वकामसमन्वितः।
गच्छन्ते तन्तु लोकं वै यत्र देवी सुरार्चिता।
वसते कल्पकोटिस्तु अप्सरोगणसेवितः॥
नन्दलोक्यागतश्चात्र पृथिव्यामेकराड् भवेत्।
कार्त्तिके पूजयित्वा तु देवीं जातीगजाश्रयैः॥
अन्नदानं ददद्विप्रे कन्यासु स्त्रीष्वथापि वा।
सितानि चैव वस्त्राणि तथा देयानि दक्षिणा॥
मुच्यते सर्व्वपापैस्तु जन्मान्तरकृतैरपि।
इहैव जायते योगी परञ्च पदमव्ययं॥
मार्गे तु विधिवत्स्नात्वा देवीं पूज्य च कुङ्कुमैः।
नैवेद्यं घृतपूपाश्च देयाः कन्यासु च द्विजे॥
भोजयेच्चार्चयेद्वस्त्रं वस्त्रैः कीटकुलोद्भवैः।
प्राप्नुयात्सर्व्वकामांश्च सर्व्वपापैः प्रमुच्यते॥

पौषे देवीं समाधाय जलजैरभिपूजयेत्॥
नैवेद्यं शालिभक्तञ्च कन्यां सम्भोज्य दक्षयेत्।
पीतवस्त्रैस्तथा शय्या देव्या देयातिशोभना॥
अनेन विधिना वत्स साक्षाद्देवी प्रसीदति।
ददाति कामिकान् भोगान् अन्ते च स्वपुरं नयेत्॥
माघे तु पूजयेद्देवीं कुन्दजस्रग्भिरादरात्।
कुङ्कुमेन सदर्पेण तथा समुपलेपितं॥
सदर्प्पेण कस्तूरिकासहितेन।
स्नापितां विधिवत्पूर्व्वं ततः कन्यास्तु पूजयेत्।
द्विजांश्च षण्डिकां भक्त्या विधिवत्तत्परायणैः।
दक्षिणां तिलहोमञ्च यथाशक्त्या प्रदापयेत्॥
विधूतपापकलिलः सर्व्वभोगसमन्वितः।
विप्रश्च बहुपुत्रश्च जायते नरसत्तमः॥
देहान्ते नन्दिनीलोकं सर्व्वदेवनमस्कृतं।
प्रयाति नात्र सन्देहो अनेन विधिना नृप॥
फाल्गुने पूजयेद्देवीं कुसुमैः सहकारकैः।
तथा निवेद्य भक्ष्याणि शर्करामधुना सह॥
भोजयेत्कन्यकान् विप्रान् दक्षिणासितवाससौ।
अनेन जायते भोगी देवीलोकञ्च गच्छति।
सम्प्राप्ते चैत्रमासे तु देवी पूज्या दमनकैः॥
नैवेद्यं सहडुका देया तथा कन्याश्च भोजयेत्।
स्त्रियश्च रक्तवस्त्रैश्च पूजितव्याः(१) यथाविधि॥

(१) दक्षितव्या इति पुस्तकान्तरे पाठः।

अनेन सर्व्वकामान् वै प्राप्नुयादविचारणात्।
देवीलोकं व्रजेदन्ते यत्र भोगा निरन्तराः॥
वैशाखे पूजयेद्देवीं पुष्पैर्वकर्णिकारजैः।
नैवेद्यं सक्तवः खण्डं कन्यां भोज्याश्च दत्तयेत्।
शुभानि हेमवस्त्राणि देयानि द्विजसत्तमे॥
देवीन्तु प्रणमेदन्ते सर्व्वदेवेष्वनुत्तमां।
ज्यैष्ठे तु शङ्करी पूज्या रक्ताशोककरणटकैः॥
तथा देयश्च नैवेद्यं घृतपूरैश्च कन्यकाः।
भोजनीयास्तथा दत्त्वा गोभूदानादिभिः शुभैः॥
जलकुम्भास्तथा देयाः सम्पूर्णा वा सिताम्बरा।
अनेन वारुणान् भोगान् तेषां क्षिप्रं प्रयच्छति॥
आषाढे पूजयेद्देवीं पद्मैर्नीलोत्पलैर्दलैः।
नैवेद्यं शर्करायुक्तं दधि भक्तश्च पायसं।
कन्या द्विजा स्त्रियो भोज्या दत्तयेच्च तथाशनात्।
नामाहेमाङ्गरागाद्यैस्तिलभूम्यैः समौक्तिकैः।
पूज्या भगवती शक्त्या सर्व्वकामप्रसिद्धये॥
नन्दा सुनन्दा कनका उमा दुर्गा समाहृती।
गौरी योगेश्वरी शिवा नारायणी सुनाशिका॥
अम्बिकेति च नामानि श्रावणाद्द्वादशक्रमात्।
सङ्कीर्त्तयन्ति उत्थाय ये नरा धौतकल्मषाः॥
भवन्ति नरशार्दूल पृथिव्यां धनसङ्कुलाः।
एतानि पथि संग्रामे रिपुपीडासु नित्यशः॥
समुत्तरति दुर्गाणि चण्डिकेति सुरोत्तम।

व्रतानां प्रवरं कार्य्यं अर्द्धं वा पादमेव वा ॥
मासं वापि प्रदातव्यं श्रावणादिक्रमेण तु ।

इति देवीपुराणोक्तं नन्दाव्रतं।

गौरमुख उवाच ।

देवकी नाम राजेन्द्र देवकस्याभवत् सुता ।
अनपत्या तपस्तेपे पुत्रार्थं किल भामिनी ॥
भार्य्या सा वसुदेवस्य सत्यधर्म्मपरायणा ।
न च तुष्यति गोविन्द तपस्तामाह भार्गवः ॥

भार्गव उवाच ।

किमर्थन्तप्यते भद्रे तपः परमदुःष्करं ।
कोऽर्थस्तवाभिलषितो वद कुत्र तवेप्सितं ॥

देव्युवाच ।

अपुत्राहं द्विजश्रेष्ठ पत्युर्मेनास्ति सन्ततिः ।
साहमाराध्य गोविन्दं पुत्रमिच्छामि शोभनं ॥
तपस्तावत्करिष्यामि परमेण समाधिना ।
यावदाराधितो विष्णुर्दास्यत्यरिमतस्वरं ॥

भार्गव उवाच ।

गोविन्दाराधने यत्नो यदि ते कुलनन्दिनि ।
तदिदं व्रतमास्थाय तोषयस्व जनार्द्दनं ॥

प्रथमे कार्त्तिकस्याद्धि सम्प्रासे देवकि स्वयं।
पञ्चगव्यकृतस्नानः पञ्चगव्यकृताशनः॥
बाणपुष्पैः समभ्यर्च्य वासुदेवमजं विभुं।
दत्त्वा च चन्दनं धूपं परमान्नं निवेदयेत्॥
घृतं निवेदयेद्विप्रे गृह्णीयाच्च ततो व्रतं।
अद्यप्रभृत्यहं मासं विरतः प्राणिनां वधात्॥
असत्यवचनात्स्तेयान्मधुमांसादिभक्षणात्।
स्वपन् विबुध्यन् गच्छंश्च स्मरिष्याम्यहमच्युतं॥
परापवादं पैशुन्यं परपीड़ाकरं तथा।
सच्छास्त्रदेवतायज्ञनिन्दामन्यस्य वा भुवि॥
न वक्ष्यामि जगत्यस्मिन् पश्यन् सर्व्वगतं हरिं।
अत्यन्तो वाभिशक्तोऽपि यस्मिन् वोढुं यशस्विनि॥
कुर्वीत नियमन्तस्य त्यागो धर्म्मोपपत्तये।
कृत्वैवं पुरतो विष्णो निर्वृतिं पापतः शुभे।
नैवेद्यं स्वयमश्नीयान्मौनी नित्यमुदङ्मुखः॥
मार्गशीर्षे तथा मासि जातीपुष्पैर्जनार्द्दनं।
समभ्यर्च्य पुनर्धूपं चन्दनञ्च निवेदयेत्॥
परमान्नञ्च देवाय विप्राय च पुनर्घृतं।
दत्त्वा तथैव गृह्णीयान्नियमः योऽस्य रोचते॥
तथैव नक्तं भुञ्जीत नैवेद्यं कुलनन्दिनि।
सर्वेष्वेव चतुर्मासं पञ्चगव्यादिकं समं।
पुष्पधूपोपचारेषु विशेषो दक्षिणासु च॥
स्नानप्राशनयोः साम्यन्तथैव नक्तभोजनं।

अर्चयेत् प्रतिमासञ्च यैः पुष्पैस्तानि मे शृणु॥
ये च धूपाः प्रदातव्या नैवेद्यान्नञ्च यत्तथा।
बाणस्य जातिकुसुमैः तथैव च मुकुन्दजैः॥
कुन्दातिमुक्तकैः रक्तैः रक्तवीरैश्च रक्तकैः।
श्वेतैः शुभ्रैर्मल्लिकायास्तथा मल्लिकया ततः॥
दधिपद्माभकेतक्याः पद्मरक्तोत्पलेन च।
क्रमेणाभ्यर्चितो विष्णुर्ददाति मनसि स्थितं॥
कार्त्तिके मार्गशीर्षे च धूपं पौषे च चन्दनं।
माघफाल्गुनचैत्रेषु दद्याद्धिरण्यमथवा गुरुं॥
वैशाखादिषु मासेषु त्रिषु देवकि भक्तितः।
कर्पूरं देवदेवाय गुग्गुलं श्रावणादिषु॥
कार्त्तिकादिषु मासेषु परमान्नं शुभं त्रिषु।
कासारं माघपूर्व्वेषु यवान्नञ्च ततस्त्रिषु॥
घृतन्तिलान् जलघटं हिरण्यमथवा व्रती।
प्रतिमासं तथा दद्याद्ब्राह्मणाय शुभव्रते॥
यथोक्तनियमानाञ्च ग्रहणं प्रतिमासिकं।
कुर्व्वन् जगत्पतिर्विष्णुः प्रीयतामिति मानवः॥
योषिद्यमलप्रज्ञा व्रतमेतद्यथाविधि।
करोति मासान् सकलान् अवाप्नोति मनोरथान्॥
व्रतेनाराधितो विष्णुरनेन जगतःपतिः।
ददात्यभिमतान् कामान् क्षिप्रकालेन भामिनि॥
धान्यं यशस्यमायुष्यं सौभाग्यारोग्यदन्तथा।
व्रतमेतत् प्रियतरं व्रतेभ्योऽव्यक्तजन्मनः॥

व्रतेनानेन शुद्धात्मा पदेनैकेन माधवः ।
सुखदृश्यो न सन्देहो दीपेन वाग्यतस्थितः ।
कायवाङ्मनसा बुद्ध्या करोत्येतच्च यो व्रतं ।
शुद्धानामन्तरो देवो दृश्य एव जनार्द्दनः ॥
तस्मिन्नेकाग्रचित्तानां प्राणिनां वरवर्णिनि ।
प्राप्नुवन्ति प्रयत्नेन मुक्तिभाजो विभूतयः ॥
यथा कल्पतरुं प्राप्य यद्यदिच्छति चेतसा ।
तत्तत्फलमवाप्नोति यथा सम्प्राप्य तं विभुं ॥
शुभव्रतमिदं तस्मात् महापातकनाशनं ।
आराधनाय कृष्णस्य कुरु देवकि पावनं ॥
तस्मिंश्चीर्णे हृषीकेशो नूनं यास्यति दर्शनं ।
दृष्टे चाभिमतं यत्ते तदशेषं भविष्यति ॥

इति विष्णुधर्म्मोत्तरोक्तं विष्णुदेवकीव्रतं ।

———ooo———

नारद उवाच ।

भगवन् श्रोतुमिच्छामि स्नानदानव्रतक्रियाः ।
हेमन्ते शिशिरे चैव यथा पूज्यो जनार्द्दनः ॥
मार्गशीर्षे तथा पौषे माघे चैवाथ फाल्गुने ।
यत्फलं प्राप्यते पुंभिः प्रयत्नं मधुघातिनं ॥

ब्रह्मोवाच ।

शृणु वत्स महापुण्यं हेमन्तशिशिरावुभौ ।
यत्र संपूजितः कृष्णः स्वल्पेनापि प्रतुष्यति ॥

मार्गशीर्षे सिते पक्षे प्रतिपत्प्रभृतिक्रमात्।
व्रतचर्यां विरंचीयाद्धेमन्ते शिशिरात्मिकां॥
स्नात्वाभ्यर्च्य हृषीकेशं प्रणिपत्य नरो व्रती।
वरञ्च याचयेद्भक्त्या चराचरगुरुन्ततः॥
भगवन् चपला ह्येषा प्राणिनां प्राणसंस्थितिः।
ध्रुवं मृत्युर्मनुष्याणां दुर्विज्ञेयं कदा भवेत्॥
अतस्त्वां प्रार्थयाम्येव वरमेतदधोक्षज।
यथा खण्डं व्रतं न स्यात् प्रसन्ने त्वयि मे विभो॥
व्रतमेतन्मया देव गृहीतन्तव शासनात्।
जीवतोपि मृतस्यापि परिपूर्णम्भवत्विति॥
एवमभ्यर्च्य लोकेशं चराचरगुरुं हरिं।
ततो नु बुद्धिमान् कुर्य्यात् व्रतचर्य्यास्य शैशिरीं॥
मार्गशीर्षस्य कृष्णादौ प्रतिपत्प्रभृतिं नरः।
अहिंसकः क्रियायुक्तः प्रातःस्नायी सदा भवेत्॥
अर्चयेद्देवदेवेशं मध्याह्ने केशवं सदा।
विलिप्य कुङ्कुमोशीरं चन्दनेनाथ शक्तितः॥
पूजयेन्मालतीपुष्पैर्भृङ्गबिल्वादिकेन च।
दीपं सदोज्ज्वलं दद्यात्सघृतं गुग्गुलन्दहेत्॥
शाल्योदनं दधियुतं नैवेद्यं सन्निवेदयेत्।
प्रणमेच्च तथा भक्त्या शिरसा केशवं मुहुः॥
अनेन विधिना चैव संपूज्य गरुड़ध्वजं।
ॐ नमः केशवायेति जपेदष्टोत्तरं शतं॥
एवं पञ्च सुराध्यक्षं मार्गशीर्षे ततोनरः।

अकांस्यपात्रे भुञ्जीत दत्त्वा भिक्षां द्विजाय च ॥
वर्जयेन्मधुमांसानि सदाध्वानं कुभोजनं ।
अनृतस्तेयपारुष्यं सम्पर्कं पतितैः सह ॥
गवाह्निकं सदा दद्यात् क्षितिशायी भवेन्निशि ।
सदाभिवन्देदश्वत्थशङ्करं स्नानप्रदन्तथा ॥
एव पुष्ये तथा माघे फाल्गुने च नरो व्रती ।
व्रतं समापयेच्छक्त्या नच कर्षेत् कथञ्चन ॥
हेमन्तांश्चतुरोमासान व्रतेनानेन नर्त्तयेत् ।
विशेषोऽत्र विधिस्तत्र द्वादशी च पृथक् शृणु ॥
मार्गशीर्षे शुभे पक्षे एकादश्यामुपोषितः ।
पूजयेज्जगतामीशं केशवं कल्मषापहं ॥
द्वादश्यां स्नापयेद्देवं क्षीरेण पुरुषोत्तमं ।
रसेन सर्पिषा चैव दध्नागव्येन च क्रमात् ॥
द्वादश्यां स्नापयेद्देवं पुष्ये माघे च फाल्गुने ।
नैवेद्यं पुष्पधूपाद्यैः पूजयेच्च ततो हरिं ॥
प्रणम्य शिरसा देवं केशवं केशिघातन ।
भक्त्या कृताञ्जलिर्भूत्वा याचयेत् प्रवरं वरं ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनञ्च केशव ।
यत्पूजितं मया देव परिपूर्णन्तदस्तु मे ॥
एवमभ्यर्च्य देवेशं प्रणिपत्य पुनः पुनः ।
ततोऽनुभोजयेद्विप्रान भक्त्या दद्याच्च दक्षिणां ॥
अनेनैव विधानेन पुष्ये माघे च फाल्गुने ।
समाप्य प्रणमेदीशं प्रार्थयेत् पूज्य वै हरिं ॥

भोजयेच्च द्विजान् भूयस्तेभ्यो दद्याच्च दक्षिणां ।
व्रीहिवस्त्रतिलान् माष्यं दद्यान्मासक्रमेण तु ॥
द्वादश्यां देवमुद्दिश्य द्विजाग्रेभ्यश्च भक्तितः ।
समाप्यैवं व्रतं भक्त्या नाम्ना त्वनरकन्नरः ॥
न गच्छेन्नरकं याति यत्रास्ते गरुड़ध्वजः ।
व्रतमेतन्महापुण्यं व्रतेभ्योऽभ्यधिकं मुने ॥
दुःष्करञ्चलविघ्नानां महापातकनाशनं ।
सुरापो ब्रह्महा स्तेयी गुरुगामी सदानृती ॥
कृत्वा नरो व्रतं भक्त्या सद्यः पापात् प्रमुच्यते ।
महर्षिभिः सदाचीर्णं भृगत्रिभुजगोत्तमैः ॥
ज्ञानार्थिभिर्महाभागैर्व्रतमेतत् प्रपूजितं ।
स्वर्गन्ते ह्यक्षयं प्राप्ताः सम्पूज्य गरुड़ध्वजं ॥
व्रतेनानेन देवेशो दत्ताद्यैर्ऋषिभिस्तुतः ।
भार्गवेणावनिं प्राप्य अक्रूरेण ययातिना ॥
परितोष्य सुरश्रेष्ठं व्रतेनानेन केशवं ।
सदा नमं परं स्थानं वैष्णवं मुक्तिलक्षणं ॥
अनेनार्च्चिविधिं भक्त्या सम्प्राप्ते सनकादिभिः ।
सर्व्वकामप्रदं पुण्यं नाम्नात्वनरकं व्रतं ॥
कृत्वा श्रुत्वा तथा ध्यात्वा न गच्छेन्नरकं नरः ।

इति विष्णुरहस्योक्तमनरकव्रतं ।

———000———

चैत्रादिचतुरो मासान् उके कुर्म्मादियाचितं ।

व्रतान्ते मणिकन्दद्याद्वस्त्रसमन्वितं ॥
तिलपात्रं हिरण्यञ्च ब्रह्मलोके महीयते ।
कल्पान्ते भूपतिर्नीलमानन्दव्रतमुच्यते ॥

इति मत्स्यपुराणोक्तमानन्दव्रतं ।

पौर्णमास्यां तथाषाढ़्यां शिवं संपूज्य यत्नतः ।
उपवीतं शिवे दद्याच्छिवभक्तांश्च भोजयेत् ॥
पुनरेव च कार्त्तिक्यां पूज्य शम्भुं समापयेत् ।
यतीनां दक्षिणां दत्त्वा सूत्रवस्त्रादिपूर्व्विकां ॥
यः कुर्य्यात्सकृदप्येवं चातुर्मास्यां पवित्रकं ।
कल्पकोटिसहस्राणि रुद्रलोके महीयते ॥
पुण्यक्षयात्परिभ्रष्टः चतुर्वेदः प्रजायते ।
इच्छया तु भवेद्राजा गुरुरूपसमन्वितः ॥

इति शिवधर्म्मोक्तं शिवोपवीतव्रतं ।

प्रतिमासं प्रवक्ष्यामि शिवव्रतमनुत्तमं ।
धर्म्मकामार्थमोक्षार्थं नरनार्य्याश्रितं हितं ॥
पुष्ये मासे तु सम्प्राप्ते यः कुर्य्यान्नक्तभोजनं ।
सत्यवादी जितक्रोधः शाल्यन्नगोधूमगोरसैः ॥
पक्षयोरष्टमीं यत्नादुपवासेन वर्त्तयेत् ।
त्रिसन्ध्यामर्च्चयेद्देवमग्निकार्य्यञ्च भक्तितः ।

भूमिशय्याश्च मासान्ते पौर्णमास्यां घृतादिभिः ।
कृत्वा स्नानं महापूजां शिवे यत्नात् प्रकल्पयेत् ॥
नैवेद्यं यावकप्रस्थं क्षीरसिद्धं निवेदयेत् ।
भोजयित्वा द्विजानष्टौ शिवभक्तान् सदक्षिणान् ।
शिवे गोमिथुनञ्चैव कपिलञ्च निवेदयेत् ॥
अलङ्कृत्य सुरूपञ्च तस्य पुण्यफलं शृणु ।
सूर्य्यकोटिप्रतीकाशैर्व्विमानैः सार्व्वकामिकैः ॥
रुद्रकन्यासमाकीर्णैर्महावृषभसंयुतैः ।
सङ्गीतनृत्यवाद्यैश्च अप्सरोगणसेवितैः ।
चामरैर्धूपमाल्यैश्च स्तूयमानः सुरासुरैः ॥
त्रिनेत्रः शूलपाणिश्च शिवैश्वर्य्यसमन्वितं ।
गच्छेच्छिवपुरं रम्यं यत्रास्ते शङ्करः स्वयं ॥
यावत्तद्रोमसङ्ख्यानं तत्प्रशस्तिः कुलेषु च ।
तावद्युगसहस्राणि सुखी शिवपुरं व्रजेत ॥
त्रिःसप्तकुलजैः सार्द्धं भोगान् भुक्त्वा यथेप्सितान् ।
ज्ञानयोगं समासाद्य स तत्रैव विमुच्यते ॥
इत्येष वः समाख्यातः संसारार्णववर्त्तिनां ।
शिवमोक्षक्रमोपायः शिवाश्रमनिषेविणां ॥
माघमासे तु संप्राप्ते यः कुर्य्यान्नक्तभोजनं ।
कृशरां घृतसंयुक्तां भुञ्जानः संयतेन्द्रियः ॥
सोपवासश्चतुर्द्दश्यां भवेदुभयपक्षयोः ।
शिवाय पौर्णमास्यान्तु प्रदद्याद्घृतकम्बलं ॥
कृष्णां गोमिथुनञ्चाथ सुरूपं विनिवेदयेत् ॥

शेषं कृत्वा यथोद्दिष्टं पूर्व्वोक्तन्तु फलं लभेत् ।
इन्द्रनीलप्रतीकाशैर्विमानैः शिखिसंयुतैः ॥
गत्वा शिवपुरं रम्यं भुक्त्वा भोगान् यथेप्सितान् ।
सम्प्राप्ते फाल्गुने मासे यः कुर्य्यान्नक्तभोजनं ॥
श्यामाकचीरनीवारैर्ज्जितक्रोधोजितेन्द्रियः ।
चतुर्द्दश्यामथाष्टम्यामुपवासरतो भवेत् ॥
पौर्णमास्यां महास्नानं पञ्चगव्यघृतादिभिः ।
वल्मीकाद्यादिमृद्भिश्च गोमूत्रगोमयादिभिः ॥
त्वग्भिश्च चीरवृक्षाणां धात्रीगन्धादिभिस्तथा ।
दद्याद्गोमिथुनं भक्त्या ताम्राभं परमेष्ठिने ।
शेषमन्यद्यथोद्दिष्टं प्राप्नोति सुमहत् फलं ।
पद्मरागप्रतीकाशैर्विमानैर्गजसंयुतैः ॥
गत्वा शिवपुरं रम्यं पूर्व्वोक्तं लभते फलं ।
चैत्रमासे तु सम्प्राप्ते यः कुर्य्यान्नक्तभोजनं ।
पिष्टकं पयसा युक्तं भुञ्जानः संयतेन्द्रियः ॥
दद्याद्गोमिथुनञ्चात्र पाटलं समलङ्कृतं ।
शिवायातिसुरूपञ्च शेषं पूर्व्ववदाचरेत् ॥
पुष्परागप्रभैर्य्यानैर्द्दिव्यैश्च रथसंयुतैः ।
गत्वा शिवपुरं रम्यं दुःप्राप्यं त्रिदशैरपि ॥
वैशाखे मासि सम्प्राप्ते यः कुर्य्यान्नक्तभोजनं ।
पिष्टकं पयसा युक्तं भुञ्जानः सञ्जितेन्द्रियः ।
गोष्ठशायी शिवध्यायी निशायां वस्त्रमेकभृक् ॥
नियमञ्च यथोद्दिष्टं सामान्यं सर्व्वमाचरेत् ।

वैशाखपौर्णमास्याञ्च कुर्य्यात् स्नानं घृतादिभिः॥
शिवायालङ्कृतं श्वेतं दद्याद्गोमिथुनं शुभं।
हंसकुन्देन्दुवर्णाभैर्महायानैरलङ्कृतैः॥
श्वेतवृषभसंयुक्तैः प्रयातीश्वरमन्दिरं।
सर्व्वाभिः सर्व्वरूपाभिः स स्त्रीभिः परिवारितः॥
नीलोत्पलसुगन्धाभिः क्रीड़ते कालमक्षयं।
ज्यैष्ठे मासि तु सम्प्राप्ते यः कुर्य्यान्नक्तभोजनं॥
शाल्यन्नं पयसा युक्तमाज्यक्षीरेण संयुतं।
वीरासनो निशार्द्धं स्याद्दिवा गामनुगच्छति॥

अनुपविष्टावस्थानं वीरासनं।

हितकारी गवां नित्यमहङ्कारविवर्ज्जितः।
पौर्णमास्याञ्च पूर्व्वोक्तं कुर्य्यात् स्नानादिकं विधिं॥
देयं गोमिथुनञ्चात्र धूम्रवर्णमलङ्कृतं।
नीलोत्पलसमप्रख्यैर्महायानैर्मनोरमैः॥
मयूरसिंहनिबद्धैश्च क्रीड़ते कालमक्षयं।
आषाढ़मासि सम्प्राप्ते यः कुर्य्यान्नक्तभोजनं॥
भूरिखण्डाज्यसंमिश्रं सक्तुं दद्यात्सगोरसं।
दद्याद्गोमिथुनं गौरं शिवायालङ्कृतं शुभं॥
सामान्यञ्च विधिं कुर्य्यात् सर्व्वं वै प्रत्य चोदितं।

इति पुष्पमासोदितं।

शुद्धस्फटिकसङ्काशैर्यानैः सारसवाहनैः।
अणिमादिगुणैर्युक्तः शिववद्विचरेत् स्वयं॥
सम्प्राप्ते श्रावणे मासि यः कुर्य्यान्नक्तभोजनं।

सोपवासैकभक्तेन सर्व्वभूतहिते रतः ॥
सिताम्बरपटोपेतं दद्याद्गोमिथुनं शिवे ।
सामान्यमखिलं कृत्वा विधिना यत्र पूजितं ॥
सचित्रैश्च महायानैर्विचित्राश्वनियोजितैः ।
गत्वा शिवपुरं दिव्यं पूर्व्वोक्तं लभते फलं ॥
प्राप्ते भाद्रपदे मासि यः कुर्य्यादेकभोजनं ।
कृतशौचस्तु भुञ्जानो ब्रह्मचारी जितो दिवा ॥
रात्रौ चायतने वासः सर्व्वभूतानुकम्पकः ।
नीलस्कन्धं वृषं गां च शिवाय विनिवेदयेत् ॥
निशाकरकराभैश्च चन्द्रोद्योतशोभनैः ।
चक्रवाकसमायुक्तैर्विमानैः सार्व्वकामिकैः ॥
गत्वा शिवपुरं रम्यममरासुरवन्दितं ।
क्रीडते स महाभोगैर्य्यावदाहूतसंप्लवं ॥
आश्वयुजे मासि यः कुर्य्यादेकभोजनं ।
घृताशनः प्रभुञ्जानः प्रसन्नात्मा जितेन्द्रियः ॥
वृषभं नीलवर्णाभमुच्चोदेशं समुन्नतं ।
विमुच्य भगवल्लिङ्गे गां सितां समलङ्कृतां ।
विधिशेषं हि पूर्व्वोक्तं सर्व्वं समुपाचरेत् ।
प्राप्नोति च परं स्थानं प्रयाति शिवसंश्रयं ।
स्वच्छमौक्तिकसङ्काशैर्बिन्दुजालोपशोभितैः ॥
जीवंजीवकसंयुक्तैर्विमानैः सार्व्वकामिकैः ।
प्रक्रीडते महाभोगैर्य्यावदाहूतसंप्लवं ॥
शुभे च कार्त्तिके मासि यः कुर्य्यादेकभोजनं ।

क्षीरोदनञ्च भुञ्जीत सत्यवादी जितेन्द्रियः॥
दद्याद्गोमिथुनञ्चान्ते कपिलं कज्जलप्रभं।
पूर्व्वोक्तविधिवत् कृत्वा शिवतुल्यः प्रजायते॥
कल्प.नलशिखाप्रख्यै र्महायानैर्मनोरमैः।
महासिंहकृताटोपैः शिववल्लोके सुखी॥
मार्गशीर्षे शुभे मासे यः कुर्य्यान्नक्तभोजनं।
यवान्नं पयसा युक्तं भुञ्जानः सञ्जितेन्द्रियः॥
दद्याद्गोमिथुनं दिव्य पाण्डुरं समलङ्कृतं।
शिवाय शेषं पूर्व्वोक्तविधिना समुपक्रमेत्॥
सितपद्मनिभैर्य्यानैः श्वेताम्बरथसंयुतैः।
गत्वा शिवपुरं दिव्यं शिवतुल्यबलो भवेत्॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं क्षमा दया।
त्रिस्नानञ्चाग्निहवनं भूशय्या नक्तभोजनं॥
पक्षयोरुपवासेन चतुर्द्दश्यष्टमीं क्षिपेत्।
इत्येवमादिनियमैराचरेत शिवव्रतं॥
शिवभक्ता तु या नारी ध्रुवं सा पुरुषः भवेत्।
स्त्रीत्वमत्युत्तमं सा चेत् काङ्क्षते शृणुयाद्व्रतं॥

इति विष्णुधर्मोक्तं शैवमहाव्रतं।

———000———

कार्त्तिके तु शुभे मासे एकभक्तेन वर्त्तयेत्।
क्षमाऽहिंसादिनियमैः संयता व्रतचारिणी॥
गुडाज्यमिश्रपिष्टान्नं मासान्ते विनिवेदयेत्।

अष्टम्याञ्च चतुर्द्दश्यां उपवासरतो भवेत् ॥
इन्द्रनीलप्रतीकाशैर्विमानैः सार्व्वकामिकैः ।
वर्षाणामयुतं साग्रं रुद्रलोके महीयते ॥
यथावत्सर्वलोकेषु भोगानासाद्य यत्नतः ।
क्रमादागत्य लोकेऽस्मिन यथेष्टं पतिमाप्नुयात् ॥
इत्येवं सर्व्वमासेषु विधिस्तुल्यः प्रकीर्त्तितः ।
एकभक्तोपवासस्य फलन्तु सदृशं विदुः ॥
क्षमा सत्यन्दया दानं शौचमिन्द्रियनिग्रहः ।
शिवपूजाग्निहोमश्च सन्तोषस्तेयभावन ॥
सर्व्वव्रतेष्वयं धर्म्मः सामान्यो दशधास्मृतः ।
मार्गशीर्षे शुभे मासे वृषपृष्ठं सुनिर्म्मलं ।
गन्धमाल्यैरलङ्कृत्य शिवाय विनिवेदयेत् ॥
वृषयुक्तैर्महाया नैरप्सरोगणसेवितैः ।
वर्षायुतशतं साग्रं शिवलोके महीयते ॥
पुष्ये मासि पिनाकञ्च शूले कृत्वा पिनाकिने ।
गन्धपुष्पैरलङ्कृत्य शिवाय विनिवेदयेत् ॥
ताम्रकांस्यादिपात्रे वा दत्त्वा दद्यात्पिनाकिने ।
महापुष्पकयानेन दिव्यगन्धप्रभावतः ।
वर्षाणामयुतं साग्रं रुद्रलोके महीयते ॥
रथस्याग्रयुतं माघे दीपमालाप्रशोभितं ।
पिष्टं लिङ्गसमायुक्तं कृत्वायतनमानयेत् ॥
महारथोपमैर्यानैः श्वेताश्वरथसंयुतैः ।
वर्षायुतं शतं साग्रं शिवलोके महीयते ॥

फाल्गुने प्रतिमां पैष्टीं कृत्वा चन्द्रसमन्वितां।
गन्धमाल्यैरलङ्कृत्य स्थापयेदीश्वरालयं।
यानैरप्रतिमैर्दिव्यैर्गीयमानाप्सरसमाकुलैः॥
वर्षायुतशतं साग्रं शिवलोके महीयते।
चैत्रे भवकुमारञ्च कृत्वा पुष्पैरलङ्कृतं।
स्थाप्य पात्रे यथोक्ते च आनयेच्छिवमन्दिरं॥
शरदिन्दुप्रतीकाशैर्विमानैः सार्व्वकामिकैः।
वर्षायुतशतं साग्रं रुद्रलोके महीयते।
तन्दुलाढकपिष्टेन कृत्वा कैलासपर्व्वतं।
ईश्वरोमासमायुक्तं सर्व्वधातुविभूषितं॥
कन्दरैर्विविधं चित्रं लवणप्रस्थसंयुतं।
सर्व्वरत्नसमायुक्तं स्थापयेदीश्वरालये॥
कैलासव्रतमित्येवं वैशाख्यां यः समाचरेत्।
कैलासकल्पयानैः स शिवलोके महीयते॥
लिङ्गपिष्टमयङ्कृत्वा ज्यैष्ठमासे सवेदिकं।
भक्त्या संपूज्य गन्धाद्यैर्वस्त्रयुग्मेन वेष्टयेत्।
उपशोभाविशेषैश्च तत्र जागरमाचरेत्॥
प्रभाते ध्वजशङ्खाद्यैः शिवाय विनिवेदयेत्।
शुद्धस्फटिकसङ्काशैर्विमानैः सार्व्वकामिकैः।
वर्षकोटिशतं साग्रं शिवलोके महीयते।
गृहं पिष्टमयङ्कृत्वा आषाढे पिष्टभूमिकं॥
सर्व्वबीजरसैश्चापि संपूर्णं शुभलक्षणं।
गृहोपकरणैर्युक्तं शुभशोभूखलादिभिः।

सर्व्वरत्नसमायुक्तं दासीशय्याद्यलङ्कृतं ।
एतैः पिष्टमयैः साद्यैः प्रदीपाद्युपशोभितं ॥
सर्व्वभक्तसमाकीर्णं गन्धमाल्यैरलङ्कृतं ।
श्वेतरक्तासितैः पीतैर्ध्वजवस्त्रैः सुशोभितं ॥
चतुर्विधेनसंयुक्तश्चरुणा सर्षपेण तु ।
आषाढे पौर्णमास्यान्तु गृहं स्थाप्य शिवायतः ॥
सर्व्वोपकरणोपेतं प्रणिपत्य निवेदयेत् ।
शतभूमैर्महायानैर्विमानैः सार्व्वकामिकैः ॥
वर्षकोटिशतं साग्रं रुद्रलोके महीयते ॥
सुधाधातुसमाकीर्णं विचित्रध्वजशोभितं ।
निवेदयीत सर्व्वाय श्रावणे तिलपर्व्वतं ॥
स्वच्छेन्द्रनीलसङ्काशैर्यानैरप्रतिमैः शुभैः ।
वर्षकोटिशतं साग्रं रुद्रलोके महीयते ॥
कृत्वा भाद्रपदे मासे शोभितं धान्यपर्व्वतं ।
वितानध्वजच्छत्राद्यैः शिवाय विनिवेदयेत् ॥
दिवाकरकरप्रख्यैर्महायानैः सुशोभनैः ।
वर्षकोटिसहस्राणि रुद्रलोके महीयते ॥
कृत्वा चाश्वयुजे मासि विपुलं शिखिपर्व्वतं ।
सुवर्णवस्त्रसंयुक्तं शिवाय विनिवेदयेत् ।
सुविचित्रैर्महायानैर्वरभोगसमन्वितैः ॥
वर्षकोटिशतं साग्रं रुद्रलोके महीयते ।
सर्व्वधान्यसमायुक्तं सर्व्ववीजरमादिभिः ॥
सर्व्वधातुसमायुक्तं सर्व्वरत्नोपशोभितं ।

शृङ्गैश्चतुर्भिः संयुक्तं वितानच्छत्रशोभितं ॥
गन्धमाल्यैस्तथा धूपैः प्रदीपैश्चातिशोभितं।
विचित्रैर्नृत्यगीतैश्च शङ्खवीणादिभिस्तथा ॥
ब्रह्मघोषैस्तथा पुण्यैर्माङ्गल्यैश्च विशेषतः।
महाध्वजाष्टकयुतं विचित्रकुसुमोज्ज्वलं ॥
नगेन्द्रमेरुनामानं त्रैलोक्याधारमुत्तमं।
तस्य मूर्द्ध्नि शिवं कुर्य्यात्सर्व्वदेवसमायुतं ॥
दैत्यगन्धर्व्वभूताश्च सिद्धयक्षगणास्तथा।
विद्याधराप्सरोनागा ऋषयश्च विशेषतः ॥
शालिपिष्टमयं लिङ्गं रूपं कृत्वा विचक्षणः।
देयञ्च दक्षिणे हस्ते शूलं त्रिदशपूजितं ॥
एवं सर्व्वेषु देवेषु कुर्य्याद्रूपं यथाक्रमं।
शिवस्य महतीं पूजां कृत्वा चरुसमन्वितां ॥
पूजयेत्सर्व्वदेवांश्च दशदिक्षु बलिं हरेत्।
व्रतान्ते भोजयेत्पश्चात् शिवभक्तान् सदक्षिणान् ॥
सर्व्वारम्भसमायुक्तं यथाविभवकल्पितं।
निवेदयीत रुद्राय कार्त्तिके नगमुत्तमं ॥
यः कुर्य्यात्सकृदप्येवं तस्य पुण्यफलं शृणु।
देवतुल्यगणो भूत्वा गुणरूपसमन्वितः॥
शिववद्विचरेन्नित्यं निखिलं भुवनं सदा।
सदागमेषु यत्पुण्यं कथित मुनिभिः पुरा।
तत्पुण्यं कोटिगुणितं प्राप्नुयान्नात्र संशयः
महारत्नप्रभैर्य्यानैः सर्व्वरत्नसमन्वितैः ॥

गीतनृत्यादिवाद्यैश्च अप्सरोभिः समन्वितैः
सूर्य्यकोटिसमप्रख्यैर्विमानैर्मरुतसम्भवैः ॥
नरनारीसमाकीर्णैर्गन्धर्वाद्यैः शुभैस्तथा ।
देवदानवगन्धर्वैस्तूयमाना गणादिभिः ॥
स्वच्छन्दा सर्व्वगा भूत्वा प्रयातीश्वरमन्दिरं ।
कल्पकोटिशतं दिव्यं मोदते सा महातपाः ॥
एवं सर्व्वेषु देवेषु भोगान् भुक्त्वा यथेप्सितान् ।
पुण्यक्षयादिहागत्य राजानं पतिमाप्नुयात् ॥
सुरूपा सुभगा नित्यं भवतीश्वरभाविता ।

इति शिवधर्म्मोक्तमपरशैवमहाव्रतं ।

—— ००० ——

श्रीकृष्ण उवाच ।

चैत्रारभ्य पिबेत्तोयमञ्जलधारां प्रपातयेत् ।
वर्षान्ते घृतसंपूर्णान्दद्याद्दर्शनिकां नवां ॥
एतद्धाराव्रतं नाम सर्व्वोद्वेगहरं परं ।
कान्तिसौभाग्यजननं सपत्नीदर्पनाशनं ॥

इति भविष्योत्तरोक्तं धाराव्रतं ।

———

देवीपुराणे ।

मार्गे रसोत्तमं दद्याद्घृतं पौषे महाफलं ।

रसोत्तमं लवणं ।

तिलाम्माघे मुनिश्रेष्ठ सप्तधान्यानि फाल्गुने ।
विचित्राणि च वस्त्राणि चैत्रे दद्याद्द्विजातये ॥
वैशाखे द्विज गोधूमान् ज्येष्ठे तोयभृतं घटं ।
आषाढ़े चन्दनं देयं सकर्पूरं महाफलं ॥
नवनीतं नभोमासि छत्रं प्रौष्ठपदे मतं ।
गुड़शर्करवर्णाढ्यान् लड्डुकानाश्विने मुने ।
दीपदानं महापुण्यं कार्त्तिके यः प्रयच्छति ॥
सर्व्वकामानवाप्नोति क्रमेण तु उदाहृतं ।
व्रतान्ते गां शुभां दद्यात् सवत्सां कांस्यदोहनीं ॥
सयुगां सस्रजं वस्त्र दापयेद्विधिना मुने ।
देवीं विरञ्चिमादित्यं विष्णुं वाथ यथाविधि ॥
स्वभावशुद्धो विधिवत् पूजयित्वा द्विजोत्तम ।
दातव्या वीतरागे तु कामक्रोधविवर्ज्जिते ॥
अयाचके सदाचारे विनीते विनयान्विते ।
गोदानाल्लभते कामान् गोलोकेषु मनोरमान् ॥

इति देवीपुराणोक्तं मासव्रतं ।

वसिष्ठ उवाच ।

शृणु भूपाल यैर्विष्णुर्व्रतैराराध्यते नरैः ।
नारीभिश्चापि घोरेऽस्मिन् पतिताभिर्भवार्णवे ।
समभ्यर्च्य जगन्नाथं वासुदेवं समाधिना ॥
एकमश्नाति यो भक्तं द्वितीयं ब्राह्मणार्प्यणं ।

करोति केशवप्रीत्यै कार्त्तिकं मासमप्यवान् ॥
पूर्व्वे वयसि यत्तेन जानताजानतापि वा ।
पापमाचरितं तस्मान्मुच्यते नात्र संशयः ॥
अनेनैव विधानेन मार्गशीर्षेऽपि माधवं ।
समभ्यर्च्यैकभक्तं वै वर्णिभ्यो यः प्रयच्छति ।
भगवत् प्रीणनार्थाय फलन्तस्य शृणुष्व मे ॥
मध्ये वयसि यत्पापं योषिता पुरुषेण वा ।
कृतं तस्माच्च तेनोक्तो विमोक्षः परमात्मना ॥
तथा चैवैकभक्तं वै यस्तु गोभ्यः प्रयच्छति ।
पुण्डरीकाक्षमभ्यर्च्य पौषमासे महीयते ॥
तत् प्रीणनाय यत्पापं वार्द्धके तेन वै कृतं ।
स तस्मान् मुच्यते राजन् पुमान् योषिदथापि वा ।
त्रैमासिकं व्रतमिदं यः करोति नरेश्वर ॥
सविष्णुप्रीणनात् पापैर्लघुभिः परिमुच्यते ।
द्वितीये वत्सरे राजन् मुच्यते चोपपातकैः ॥
तद्वत्तृतीयेपि कृतं महापातकनाशनं ।
व्रतमेतन्नरैः स्त्रीभिस्त्रिभिर्मासैरनुष्ठितं ॥
त्रिभिः संवत्सरैश्चैव प्रददाति फलं नृणां ।
त्रिभिर्मासैस्त्रयोवस्थास्त्रिविधात्पातकान्नृप ॥
त्रीणि नामानि देवस्य मोचयन्ति त्रिवार्षिकैः ॥
यतस्ततो व्रतमिदं त्रिविक्रममुदाहृतं ।
सर्व्वपापप्रशमनं केशवाराधनं परं ॥

इति विष्णुधर्मोक्तं त्रिविक्रमव्रतं ।

सुमन्तुरुवाच ।

समभ्यर्च्य जगन्नाथं देवमर्कमथापि वा ।
एकमश्नाति यो भक्तं द्वितीयं ब्राह्मणार्पणं ॥
करोति भास्करप्रीत्यै कार्त्तिक मासमात्मवान् ।
पूर्व्ववयसि यत्नेन जानताजानतापि वा ॥
पापमाचरितं तस्मात् मुच्यते नात्र संशयः ।
अनेनैव विधानेन मार्गशीर्षे विभाकर ॥
समभ्यर्च्य एकभक्तं विप्रेभ्यो यः प्रयच्छति ।
भगवत्प्रीणनार्थाय फलन्तस्य शृणुष्व मे ॥
मध्ये वयसि यत्पापं योषिता पुरुषेण च ।
कृतं तस्माच्च तेनोक्तो विमोक्षः परमात्मना ॥
तथा चैवैकभक्तञ्च यश्च विप्राय यच्छति ।
दिवाकरं समभ्यर्च्य पौषे मासि महीपते ॥
तद्वत् तृतीयेपि कृतं महापातकनाशन ।
व्रतमेतन्नरैस्त्रीभिस्त्रिभिर्मासैरनुष्ठित ॥
त्रिभिः संवत्सरैश्चैव प्रददाति फलं नृणां ।
त्रिभिर्मासैस्त्ववस्थास्तु त्रिविधात्पातकान्नृप ॥
त्रीणि नामानि देवस्य मोचयन्ति त्रिवार्षिकान् ।
यतस्ततो व्रतमिदं त्रिविक्रममुदाहृतं ।
सर्व्वभूतप्रशमनं भास्करारावनं परं ॥

इति भविष्योत्तरोक्तं सौरत्रिविक्रमव्रतं ।

चैत्रादिचतुरो मासान् जले कुर्य्यादयाचितं ।
ज्यैष्ठाषाढे तथा माघे पौषे वा राजसत्तम ॥
व्रतान्ते मणिकं दद्यादन्नवस्त्रसमन्वितं ।
तिलपात्रं हिरण्यञ्च ब्रह्मलोके महीयते ।
तदन्ते राजराजः स्याद्वारिव्रतमिहोच्यते ॥

इति पद्मपुराणे वारिव्रतं ।

———ooo———

इति श्रीमहाराजाधिराजश्रीमहादेवस्य समस्तकरणा-
धीश्वरसकलविद्याविशारदश्रीहेमाद्रिवि-
रचिते चतुर्व्वर्गचिन्तामणौ
व्रतखण्डे मासव्रतानि ।

अथोनचिंशोऽध्यायः।

———ooo———

अथ ऋतुव्रतानि।

——o——

उपक्रियायै सुहृदामिदानीं
हेमाद्रिसूरिः प्रकटीकरोति।
ऋतुव्रतश्रेणिमकम्पसम्पत्-
संपादयित्रीं दुरितापहन्त्रीं॥

मार्कण्डेय उवाच।

अथातः संप्रवक्ष्यामि ऋतुमूर्त्तेरर्च्चनं परं।
वसन्तं पूजयेन्नित्यं द्वौ मासौ मुनिपुंगव॥
फलैः पुष्पैः कषायैस्तु ग्रीष्मे ग्रीष्मञ्च पूजयेत्।
मधुरेण महाराज प्रावृट्काले ऋतुञ्चरेत्॥
अनेन पूजयेन्नित्यं शरदं लवणेन च।
कटुकेन च हेमन्तं तिक्तेन शिशिरं तथा॥
नक्ताशनस्तथा तिष्ठेत्पञ्चकं वर्जयेद्रसं।
ब्राह्मणान् भोजयेच्चापि प्रभूतवसनादिभिः॥
संवत्सरमिदं कृत्वा व्रतं परमपावनं।
अश्वमेधमवाप्नोति राजसूयञ्च विन्दति॥
सर्व्वान् कामानवाप्नोति नात्र कार्य्या विचारणा।
फलमक्षयमाप्नोति व्रतस्यास्य करोत्तम।

चैत्रे समारभ्य सिते तु षष्ठीं
संपूजयेद्यस्त्वृतुषटकमेकं ।
कृतोपवासः स नरो यथोक्तं
लभेत् फलं शाश्वतमेव शीघ्रं ॥

इति विष्णुधर्मोत्तरोक्तं षण्मूर्त्तिव्रतं।

कृत्वैकभक्तं हेमन्ते माघमासे तु यत्नतः ।
माघान्ते च रथं कुर्य्याच्चित्रवस्त्रोपशोभितं ॥
श्वेतैश्चतुर्भिः संयुक्तं वृषभैः समलङ्कृतं ।
शोभितं ध्वजमालाभिश्छत्रचामरदर्पणैः ॥
तण्डुलाटकपिष्टेन लिङ्गं कृत्वा सवेदिकं ।
विन्यस्य रथमध्ये तु पूजयेत् कृतलक्षणं ॥
तद्राक्षौ राजमार्गे च शङ्खभेर्य्यादिभिः स्वनैः ।
भ्रामयित्वा ततः पश्चाच्छिवायतनमानयेत् ॥
तत्र जागरपूजाभिःप्रदीपाद्युपशोभितैः ।
प्रेक्षणीयप्रदानैश्च क्षपयेत शनैर्निशां ।
प्रभाते स्नापनं कृत्वा तद्ब्राह्मणांश्च भोजनं ॥
दीनान्धकृपणानाञ्च यथाशक्त्या च दक्षिणां ।
रथं शोभासमायुक्तं शिवाय विनिवेदयेत् ॥
भुक्त्वा च बान्धवैः सार्द्धं प्रणम्येशं गृहं व्रजेत् ।
प्रवरः सर्व्वदानानामस्मिन् धर्म्मः समाप्यते ॥
व्रतं शिवरथं नाम सर्व्वकामार्थसाधकं ।

सर्व्वव्रतेषु यत्पुण्यं (१) सर्व्वयज्ञेषु यत्फलं॥
सर्व्वं शिवरथेनैव तत्पुण्यं सकलं भवेत्।
सूर्य्यायुतप्रतीकाशैर्विमानैः सार्व्वकामिकैः।
त्रिःसप्तकुलजैः सार्द्धं शिवलोके महीयते॥

इति विष्णुधर्म्मोत्तरोक्तं शिवरथव्रतं।

———000———

पुलस्त्य उवाच।

वर्जयेद्यस्तु पुष्पाणि हेमन्तशिशिरे व्रती।
पञ्चत्रयञ्च फाल्गुन्यां कृत्वा शक्त्या च काञ्चनं॥
दद्याद्वै कालवेलायां (२) प्रीयेतां शिवकेशवौ।
शिरःसौगन्ध्यजननं सदानन्दप्रदं नृणां॥
कृत्वा परं पदं याति सौगन्ध्यव्रतमुत्तमं।

इति पद्मपुराणोक्तं सौगन्ध्यव्रतं।

——00——

पुलस्त्य उवाच।

यश्चेन्धनन्ददेद्विप्रे वर्षादिचतुर ऋतून्।
घृतधेनुप्रदोऽन्ते च स परं ब्रह्म गच्छति॥
वैश्वानरव्रतं नाम सर्व्वपापप्रणाशनं।

इति पद्मपुराणोक्तं वैश्वानरव्रतं।

---

(१) सर्व्वप्राणेषु यत् पुण्यमिति पुस्तकान्तरे पाठः।

(२) दद्याद्वि कालवेलायामिति पुस्तकान्तरे पाठः।

पवित्रतोयसंयुक्तैर्यः कुम्भैः ग्रीष्मे शिवोपरि ।
गालयेद्यः पयोधारां स शाश्वपदमश्नुते ॥

इति शिवरहस्योक्तगलन्तिकाव्रतं ।

इति श्रीमहाराजाधिराज-श्रीमहादेवस्य समस्तकरणा-
धीश्वरसकलविद्याविशारद-श्रीहेमाद्रिविरचिते
चतुर्व्वर्गचिन्तामणौ व्रतखण्डे
ऋतुव्रतानि ।

अथ त्रिंशोऽध्यायः।

———000@000———

अथ संवत्सरव्रतानि।

———000———

विद्वन्मनःकैरव कोरकाणां

प्रबोधसन्दीधितिरद्भुतो यः।

हेमाद्रिणा प्राणभृतां हिताय

वितन्यते तेन समाव्रतौघं॥

पुलस्त्य उवाच।

मलमष्टपरित्यज्य तु गवा सार्द्धं कुटुम्बिने।

हैमचक्रं त्रिशूलञ्च दद्याद्विप्राय वाससी॥

प्रणम्य भक्त्या शक्तश्च प्रीयतां शिवकेशवौ।

एतद्देवव्रतं नाम महापातकनाशनं॥

इति पद्मपुराणोक्तं देवव्रतं।

——0——

पुलस्त्य उवाच।

सन्ध्यामौनं नरः कृत्वा समान्ते घृतकुम्भकं।

वस्त्रयुग्मं तिलान् घण्टां ब्राह्मणाय निवेदयेत्॥

लोकं सारस्वतं याति पुनरत्रैव जायते।

एतत्सारस्वतं नाम रूपविद्याप्रदायकं॥

इति पद्मपुराणोक्तं सारस्वतव्रतं।

यस्तु संवत्सरं पूर्णमेकभक्तो भवेन्नरः ।
अहिंसः सर्व्वभूतेषु वासुदेवपरायणः ॥
नमोऽस्तु वासुदेवायेत्यष्टाष्टशतं जपेत् ।
पौण्डरीकस्य यज्ञस्य ततः फलमवाप्नुयात् ॥
दशवर्षसहस्राणि स्वर्गलोके महीयते ।
तत् क्रियादिह वागत्य माहात्म्यं प्रतिपद्यते ॥

इति विष्णुधर्म्मोत्तरोक्तमेकभक्तव्रतं ।

———oo@oo———

पुलस्त्य उवाच ।

जलोपलेपनं शम्भोरग्रतः केशवस्य च ।
यावद्दृष्टं पुनर्दद्यादिनं जलघृतस्य च ॥
स सर्व्वपापनिर्मुक्तः शिवलोके महीयते ।
राजा भवति सम्भूतः सर्व्वभौमो महेश्वरः ।
एतत् महाव्रतं नाम बहुकल्याणकारकं ॥

इति पद्मपुराणोक्तं महाव्रतं ।

———ooo@ooo———

पुलस्त्य उवाच ।

चाम्रार्घ्यं भास्करं गङ्गां प्रणम्यैकत्र वाग्यतः ।
एकभक्तं नरः कुर्य्यादष्टमेकं विमत्सरः ॥
व्रतान्ते विप्रमिथुनं पूज्य धेनुत्रयान्वितं ।
छत्रं हिरण्मयं दद्यात्सोऽश्वमेधफलं लभेत् ॥

दिवि देवविमानस्थो गीयतेऽप्सरसाङ्गणैः।
एतत्कीर्त्तिव्रतं नाम भूमिकीर्त्तिप्रदायकं॥

इति पद्मपुराणोक्तं कीर्त्तिव्रतं।

घृतेन स्नापनं कृत्वा केशवस्य शिवस्य च।
ब्राह्मणो भास्करस्यापि गौर्य्या लम्बोदरस्य च॥
समातेव शुभं कुर्य्यात्पद्मं गोमयमण्डले।
समान्ते हेमकमलं तिलधेनुसमन्वितं॥
समा वर्षं।
शुभमष्टाङ्गुलं दद्याच्छिवलोके महीयते।
सामगाययतश्चैतत् सामव्रतमिहोच्यते॥

इति पद्मपुराणोक्तं सामव्रतं।

ताम्बूलभक्षणादौ या गौरीपत्रं ददाति च।
गौरीपत्रं ताम्बूलपत्रं।
पूगचूर्णसमायुक्तं स्त्रियो वा पुरुषस्य वा॥
वर्षस्यान्ते तु सौवर्णं फलपत्रन्तु राजतं।
मुक्ताफलमयं चूर्णं सम्पूर्णं वा प्रयच्छति॥
न सा प्राप्नोति दौर्भाग्यं न दौर्गन्ध्यं मुखस्य वा।
एतत्पत्रव्रतं नाम गौरीलोकप्रदायकं॥

इति भविष्योत्तरोक्तं पत्रव्रतं।

पञ्चामृतेन स्नापनं कृत्वा विष्णोः शिवस्य वा।
वत्सरान्ते पुनर्दद्याद्धेनुं पञ्चामृतैर्युतं॥
विप्राय कनकं शङ्खं वस्त्रयुग्मञ्च पाण्डरं।
स्वर्गलोकप्रदं दिव्यं धृतिव्रतमिदं स्मृतं॥

इति विष्णुपुराणोक्तं धृतिव्रतं।

———000———

पुलस्त्य उवाच।
वर्ज्जयित्वा पुमान्मांसमब्दान्ते गोप्रदो भवेत्।
तद्वद्धेममृगं दत्त्वा सोऽश्वमेधफलं लभेत्।
अहिंसाव्रतमित्युक्तं कल्पान्ते भूपतिर्भवेत्॥

इति पद्मपुराणोक्तमहिंसाव्रतं।

———

सुखवासं परित्यज्य समान्ते गोप्रदो भवेत्।
यक्षाधिपत्यमाप्नोति सुखव्रतमिहोच्यते॥

इति पद्मपुराणोक्तं सुखव्रतं।

———

यश्च नीलोत्पलं हैमं शर्करापात्रसंयुतं।
एकान्तरितनक्ताशी समान्ते वृषसंयुतं।
दद्यादिति शेषः।
स वैष्णवं पदं याति नीलव्रतमिदं स्मृतं॥

इति पद्मपुराणोक्तं नीलव्रतं।

वत्सरं त्वेकभक्ताशी सभक्ष्यफलकुम्भदः।
शिवलोके वसेत्कल्पं प्राप्तिव्रतमिदं स्मृतं॥

इति पद्मपुराणोक्तं प्राप्तिव्रतं।

———000———

सन्ध्यादीपप्रदो यस्तु समां तैलञ्च वर्जयेत्।
समान्ते दीपकान् दद्याच्चक्रं शूलञ्च काञ्चनं॥
वस्त्रयुग्मञ्च विप्राय स तेजस्वी भवेदिह।
रुद्रलोकमवाप्नोति दीप्तिव्रतमिदं स्मृतं॥

इति पद्मपुराणोक्तं दीप्तिव्रतं।

———000———

शाकाशाशी समां दद्याद्धेनुमन्ते पयस्विनीं।
शक्रलोकमवाप्नोति शक्रव्रतमिदं स्मृतं॥

इति पद्मपुराणोक्तं शक्रव्रतं।

———000———

यस्त्वेकभक्तेन समां क्षिपेद्धेनुं वृषान्वितां।
धेनुं तिलमयीं दद्यात्स पदं याति शाङ्करं।
एतद्रुद्रव्रतं नाम पापशोकविनाशनं॥

इति पद्मपुराणोक्तं रुद्रव्रतं।

——00@00——

द्वे सहस्रे पलानान्तु माहिषाख्यन्तु यो दहेत्।
देवि संवत्सरं पूर्णं स मे नन्दिसमो भवेत्।

पलं नव समारभ्य पयः प्रतिदिनं दहेत् ॥

इति पद्मपुराणोक्तं शम्भुव्रतं।

———०००———

दक्षिणायाश्च यो मूर्त्तौ पायसं सघृतञ्च वै।
निवेदयेद्वर्षमेकं सोऽपि नन्दिसमो भवेत् ॥
ततः संवत्सरे पूर्णे सोपवासोऽथ जागरं।
कृत्वाभ्यर्च्च महेशानं महास्नानादिभिर्वृतं ॥
दद्यादिप्राय पृथिवीं शय्यां गाश्च पयस्विनीं।
नन्दिना चरितं पुण्यं व्रतं पातकनाशनं।
कृतं संवत्सरं भक्त्या तावदेव निवेदितं ॥

इति स्कन्दपुराणोक्तं महेश्वरव्रतं।

———०००(u)०००———

संवत्सरन्तु यो भुङ्क्ते नित्यमेव ह्यतन्द्रितः।
निवेद्य पितृदेवेभ्यः पृथिव्यामेकराड्भवेत् ॥
यो भुङ्क्ते पृथिव्यामित्यन्वयः।

इति पद्मपुराणोक्तं भुभाजनव्रतं।

इति श्रीमहाराजाधिराज-श्रीमहादेवस्य समस्तकरणा-
धीश्वरसकलविद्याविशारद-श्रीहेमाद्रिविरचिते
चतुर्व्वर्गचिन्तामणौ व्रतखण्डे
संवत्सरव्रतानि।

अथ एकत्रिंशोऽध्यायः।

———oo0oo———

अथ प्रकीर्णकव्रतानि।

———ooo———

हेमाद्रिरुचिद्रमुरारिभक्ति-
रधीतवेदाखिलधर्मवेदः।
अशेषलोकोद्धरणावतीर्णः
प्रकीर्णकं वर्णयति क्रमेण॥

श्वेतद्वीपे सुखासीनं देवदेवं जगद्गुरुं।
वासुदेवं जगन्नाथं स्थितिसंहारकारकं॥
प्रणिपत्य महादेवं चराचरगुरुं हरिं।
शरीरारोग्यमैश्वर्य्यं कामदेवसमः पतिः॥
सुखावबोधने नित्यमवियोगश्च तेन वै।
तद्दानं वा व्रतं वापि पूजामाराधनादिकं॥
लक्ष्मीः प्रोवाच शनकैर्भर्त्तारमसितेक्षणा।
भगवन् देवदेवेश लोकानामनुकम्पया।
प्रष्टुं त्वां किञ्चिदिच्छामि दयां कुरु ममोपरि॥
व्रतं कथय मे किञ्चिद्रूपसौभाग्यदायकं।
कृतेन येन देवेश सर्व्वतीर्थफलं लभेत्॥
येन पुत्राश्च पौत्राश्च गृहं सर्व्वसमृद्धिदं।
शरीरारोग्यमैश्वर्य्यं कामदेवसमःपतिः॥
सुखावलोकने नित्यमवियोगश्च तेन वै।

तद्दानं वा व्रतं वापि तीर्थमाहात्म्यमेव च ॥
येनानुष्ठितमात्रेण सर्व्वसिद्धिर्भवेत् ध्रुवं ।
कथयस्व सुरश्रेष्ठ गुह्याद्गुह्यतरं मम ॥

विष्णुरुवाच ।

कथयामि न सन्देहो व्रतानामुत्तमं व्रतं ।
प्रद्युम्नायापि नाख्यातं पुत्रप्रीत्या व्रतं त्विदं ॥
तेजस्विनां यथादित्यः पक्षिणाङ्गरुडो यथा ।
यथा नदीनां गङ्गा च वर्णानां ब्राह्मणो यथा ।
तथा व्रतमिदं श्रेष्ठं कथ्यते तव भामिनि ॥
न गङ्गा न कुरुक्षेत्रं न काशी न च पुष्करं ।
पावनानि महाभागे यथेदं व्रतमुत्तमं ॥
गौर्य्या देव्या कृतं पूर्व्वं शङ्करेण महात्मना ।
रामेण सीतया सार्द्धं दमयन्त्या नलेन च ।
कृष्णेन पाण्डवैः सर्व्वैः कृतं व्रतमनुत्तमं ॥
रम्भया मेनया चापि पौलोम्या सत्यभामया ।
शाण्डिल्ययाप्यरुन्धत्या उर्व्वश्या देवदत्तया ॥
गायत्र्या चैव सावित्र्या व्रतं श्रेष्ठमनुत्तमं ।
अन्याभिश्चैव नारीभिर्द्दिवि व्रतमिदं कृतं ॥
तस्मात्तेऽहं करिष्यामि सर्व्वपापप्रणाशनं ।
विष्णुप्रीतिकरं रम्यं व्रतानां प्रवरं शृणु ॥
ब्रह्महा मुच्यते पापात्सुरापो रुक्महारकः ।
गुरुभार्य्याभिगामी च एतेषां सङ्गमी च यः ॥
मानकूटस्तुलाकूटः कन्यानृगवविक्रयी ।

अगम्यागमनो यस्तु मांसाशी वृषलीपतिः ॥
भूमिहर्त्ता कूटसाक्षी कन्यादूषयिता च यः।
एभिः सर्व्वैर्महापापैर्मुच्यते नात्र संशयः।
तस्मात्सर्व्वप्रयत्नेन कर्त्तव्यं व्रतमुत्तमं ॥
काञ्चनाख्या पुरी नाम व्रतं त्रैलक्यपावनं।
शुक्लतृतीया कृष्णा च एकादश्यऽथ पूर्णिमा ॥
संक्रान्तिर्वा महाभागे कुहुर्वा चाष्टमी तिथिः।
पर्व्वस्वेतेषु दातव्या काञ्चनाख्या पुरी शुभा ॥
व्रती स्नात्वा तु पूर्व्वाह्णे नद्यादौ विमले जले।
मृत्तिकालम्भनं कार्य्यं विधिनानेन तत् प्रिये ॥
उद्धृतासि धरे पूर्व्वं विष्णुना क्रोड़रूपिणा।
लोकानामुपकाराय वन्दिता सिद्धिकामदा।
तस्मात्त्वं वन्दिता पापं हर मेऽनेकजन्मजं।

मृत्तिकालम्भनमन्त्रः।

आपोऽयं सर्व्वयोनिर्विष्णुना निर्म्मिताः स्वयं।
सान्निध्यं तीर्थसहिताः कुरुध्वं साम्प्रतं मम ॥

उदकाभिमन्त्रणं।

अनेन विधिना स्नात्वा गृहमागत्य सद्व्रती।
नालपेत् पिशुनान् चण्डान् पापिनः पापसङ्गिनः ॥
पाषण्डिनो विकर्म्मस्थान्देवब्राह्मणनिन्दकान्।
प्रक्षाल्य पाणिपादञ्च कुर्य्याद् वै दन्तधावनं।
उपवासस्य नियमं कुर्य्यान्नक्तस्य वा पुनः।
शङ्खप्रवरमादाय हेमयुक्तं ततो जलं ॥

नमो भगवते वासुदेवायेत्यभिमन्त्र्य च ।
वन्दे तोयं शुचिर्भूत्वा हरिरित्यक्षरं जपन् ॥
शमीवृक्षमयी वेदी चतुःस्तम्भैः समन्विता ।
चतुर्हस्तप्रमाणा तु कार्य्या चैव सुशोभना ॥
वस्त्रेणावेष्टितास्तम्भा वितानवरमण्डिताः ।
पुष्पमालान्विताः कार्य्या दिव्यरूपाधिवासिताः ॥
मध्ये तु मण्डलं कार्य्यं पद्माख्यं वर्णकैः शुभैः ।
मण्डलस्य तु मध्ये तु भद्रपीठं सुशोभनं ॥
आसनं तत्र विन्यस्य कमलं तत्र विन्यसेत् ।
तस्योपरि न्यसेद्देवं लक्ष्म्या युक्तं जनार्द्दनं ॥
अग्रे तु स्थापयेत् कुम्भं जलपूर्णं सुशोभनं ।
क्षीरसागरनामास्य कल्पितव्यं प्रयत्नतः ।
सामान्यैकपक्षाः कार्य्या आत्मवित्तानुसारतः ॥

चत्वारिपलान्यस्यामिति वीप्सायां बहुव्रीहिः सप्तपर्णवत् । वीप्सायाश्च शतानां शतानि च पततः षोड़शमध्य एकमिति सप्तदशतावद्ब्राह्मणविधानात् । मध्यशतस्याष्टमाचार्य्यशतत्वात् । तत्प्रकारस्तद्वत् । बहिःप्रकारो बहिःशतवत् । एवं चतुश्चत्वारिंशदधिकशतपलं हेम । तावच्च रूप्यं(१) ।

रौप्या तस्या अधोभूमिः शिखरं काञ्चनं तथा ।

---

(१) आदर्शपुस्तकेषु एतद्ग्रन्थमनुसृत्य पूर्व्वं कतिचित्पाठाः पतिताः प्रतिभान्ति, अन्यथा एतद्ग्रन्थमनवधानात् पूर्व्वं यावत पलपमूलं आदर्शपुस्तकेषु दृष्टं तस्याधो चतुष्पला इति शब्दाभावात् चत्वारि पलान्यस्यामिति अनुपतितस्य न समीचीनं भवितुमर्हति ।

स्तम्भा रत्नमयाः कार्य्या दशौरससमन्विताः(१)।
प्राकारं कारयेद्धैमं रौप्यं पैष्टमथापि वा॥

पैष्टं सीसं।

मोदकान् स्थापयेद्दिव्यान् प्रासादशिखरेषु च।
समन्ताद्वेष्टयेत्तान्तु पुरीं वस्त्रैः सुशोभनैः॥
तदग्रे कदलीस्तम्भैस्तोरणं परिकल्पयेत्।
पुष्पशोभानुकर्त्तव्या विभवाद्विस्तरेण च॥
चतुश्चरणिकैर्विप्रैः प्रतिष्ठाप्या पुरी शुभा।
तस्या मध्ये न्यसेद्विष्णुं हैमलक्ष्म्या समन्वितं॥
नेत्रे रत्नमये कार्य्ये दशनाश्च सुभूषिताः।
मुक्ताफलमयं तत्र भूषणं परिकल्पयेत्॥
चक्रं स्वर्णमयं कार्य्यं शङ्खचक्रगदायुतं।
पञ्चामृतेन संस्नाप्य गन्धपुष्पैः प्रपूजयेत्॥
ब्राह्मणो वैदिकैर्मन्त्रैः पुराणोक्तैस्तथोत्तरैः।
वासुदेवाय पादौ तु गुल्फौ संकर्षणाय च॥
त्रैलोक्यजननायेति जानुनी पूजयेद्धरेः।
जानु त्रैलोक्यनाथाय गुह्यं ज्ञानमयाय च॥
कटिं दामोदरायेति उदरं विश्वरूपिणे।
पद्मनाभाय नाभिन्तु उरः श्रीवत्सधारिणे।
कण्ठं कौस्तुभनाभाय चास्यं यज्ञमुखाय च।
दैत्यान्तकारिणे बाहू स्वनाम्ना चायुधानि च॥
शिखाशैशाणमन्त्रेण देवदेवस्य पूजयेत्।

(१) पाठोऽयमादर्शे दोषेण न समीचीनः।

श्रियं स्वमन्त्रैः संपूज्य लोकपालांस्ततोऽर्चयेत् ॥
नवग्रहाश्च पूज्या वै होमं तेषान्तु कारयेत्।
दुर्गागणपती पूज्यौ तयोर्होमं प्रकल्पयेत् ॥
अग्रे नैवेद्यमतुलं दापयेद्धृतपाचितं।
पायसं घृतपूरांश्च मोदकान् पूपकांस्तथा ॥
देशकालोद्भवान्यत्र फलादीनि प्रकल्पयेत्।
दीपान् दशदिशं दद्यात् पार्श्वतः पुष्पचर्च्चितान् ॥
घृतेन तु विशालाचि मूलमन्त्रेण दापयेत्।
कुम्भाः षोड़श कर्त्तव्याः श्वेतवस्त्रैर्विभूषिताः ॥
मिष्टान्नेन समायुक्ताः सहिरण्याः पृथक् पृथक्।
पक्वान्नानि तु द्रव्यानि षोड़शैव प्रदापयेत् ॥
फलानि तत्र देयानि नानारूपाणि सुन्दरि।
दीपांस्ताम्रमयांश्चैव तेषु कुम्भेषु विन्यसेत् ॥
ब्राह्मणान् भूषयेत्तैस्तैरलङ्कारैर्यथाविधि।
सपत्नीकान् प्रयत्नेन जपं कुर्य्यात्तु षोड़श ॥
सहस्रशीर्षा इत्यादि ऋचिकाभिस्तु मन्त्रयेत्।
विष्णुं मत्वा ब्राह्मणन्तु लक्ष्मीरूपा स्त्रियोऽर्चयेत् ॥
छत्रञ्चोपानहौ चैव वस्त्राण्याभरणानि च।
फलानि सप्तधान्यञ्च भोजनञ्च यथेप्सितं।
दातव्यन्तु सभार्य्याणां विष्णुमें प्रीयतामिति ॥
तत्र चाचार्य्य उत्थाय प्रहृष्टे गीतमङ्गले।
धृत्वा बाहू यजमानं देवसमीपमानयेत् ॥
श्वेतवस्त्रेण नेत्रे तु यजमानस्य ग्रथ्नेत्।

आचार्यः सर्व्वविद्यानो बन्धयेत्तद्दलेन च ॥
आबद्धनेत्रे सुप्राज्ञ आचार्य्यस्तु इदं वदेत्।
सर्व्वकामप्रदां पश्य काञ्चनाख्यां पुरीमिमां ॥
वरवस्त्रयुतां रम्यां दुःखदौर्भाग्यनाशनीं।
एवमुक्ता महाभागे वस्त्रमुत्सर्जयेत्ततः ॥
पुष्पाञ्जलिं ततः क्षिप्ता स पश्येन्नगरीं शुभां।
दृष्ट्वा तां नगरीं देवि यजमानः पुरोहितः॥
सौवर्णपात्रमादाय रौप्यन्ताम्रमथापि वा।
अथवा शङ्खमादाय पात्रालाभे तु सुन्दरि ॥
पञ्चरत्नं क्षिपेत्तत्र जलगन्धांस्तथा फलं।
सिद्धार्थञ्चाक्षतं दूर्व्वां रोचनाञ्च दधि प्रिये॥
ततस्त्वर्घः प्रदातव्यो मन्त्रेणानेन सुव्रते।
लक्ष्मीनारायणौ देवौ भक्तिपूतेन चेतसा ॥
जानुभ्यां धरणीं गत्वा मन्त्रमेनमुदीरयेत्।
स्वर्णस्य निर्म्मिता देवौ विष्णुना शङ्करेण च॥
पार्व्वत्या चैव गायत्रा स्कन्दवैश्रवणेन च।
यमेन पूजिता देवी धर्म्मस्य विजिगीषया ॥
सौभाग्यं देहि पुत्रांश्च धनं रूपञ्च पूजिता।
गृहाणार्घ्यं मया दत्तं देवि सौख्यं प्रयच्छ मे।
एवमर्घ्यं तदा दत्वा दीपान् प्रज्वलयेत्ततः॥
जागरं तत्र कुर्व्वीत गीतनृत्यादिना तथा।
विष्णोर्जागरणे पुण्ये शतयज्ञफलं लभेत्॥
प्रभाते विमले जाते कृत्वा नित्यादिपूजनं।

आचार्य्यं पूजयेत्तद्वदलङ्कारैराभरणैस्तथा ॥
सपत्नीकं सपुत्रञ्च यत्नात् सम्भोज्य पूजयेत् ।
शय्या सोपस्करा तस्मै वस्त्रचन्दनसंयुता ॥
प्रदेया गुरवे तत्र सर्व्वोपस्करसंयुता ।
तां पुरीं काञ्चनीं दद्यान्मन्त्रेणानेन सुव्रती ॥
लक्ष्मीनारायणौ देवौ सर्व्वकामफलप्रदौ ।
रुक्मपुर्य्याः प्रदानेन यच्छतां मम वाञ्छितं ॥
नारायण हृषीकेश ज्ञानज्ञेय निरञ्जन ।
रुक्मपुर्य्याः प्रदानेन यच्छ मे मुक्तिदं परं ।
दत्त्वा त्वनेन मन्त्रेण गौर्देया गुरवे ततः ।
तेभ्यस्तु दक्षिणां दद्यात्तन्तुष्ट्या यद्भवन्ति ते ॥
एवं क्षमापयित्वा तान् प्रणम्य च पुनः पुनः ।
अनाथान् बधिरान् पङ्गूनन्धांश्च विशेषतः ॥
गवाह्निकञ्च दातव्यं गोभ्यः सकृत् प्रयत्नतः ।
एवमुच्चारयेत्तत्र विष्णुर्मे प्रीयतामिति ॥
एवं कृत्वा तु तत्सर्व्वं पारणं तत्र कारयेत् ।
इष्टैर्मित्रैः कुटुम्बैश्च पुत्रपौत्रैः समन्वितः ॥
एवं कृते तु यत्पुण्यं अशक्यं कथितुं मया ।
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥
ब्रह्मलोकं समासाद्य व्रती मोदति ब्रह्मवत् ।
ब्रह्मलोकाद्रुद्रलोकमिन्द्रलोकमतः परं ॥
श्रीपलोकस्ततो देवि मदीयं लोकमाप्नुयात् ।
तत्र भुक्त्वा तु विस्तीर्णान् भोगांस्त्रैलोक्यसुन्दरि ॥

महेन्द्रे लीयते चैव पुमाननन्ततां व्रजेत्।
सार्व्वभौमस्तु राजा वै जायते विपुले कुले॥
य इदं शृणुयान्नित्यं वाच्यमानं व्रतन्त्विदं।
सहस्रकुलमुद्धृत्य विष्णुलोके महीयते॥
त्वया काञ्चनपुर्य्याख्यं व्रतमेतत् कृतं पुरा।
व्रतप्रसादाद्राजेन्द्र लब्धस्त्वं लोकपूजितः॥

इति गारुडपुराणोक्तं काञ्चनपुरीव्रतं।

——000——

युधिष्ठिर उवाच।

संपूर्णतां मनुष्याणां व्रतानाञ्च जनार्द्दन।
कुरु प्रसादं कृष्णार्थमेतन्मे वक्तुमर्हसि॥

श्रीकृष्ण उवाच।

साधु साधु महाबाहो कुरुराज युधिष्ठिर।
रहस्यानां रहस्यन्ते कथयामि व्रतोत्तमं॥
संपूर्णं नाम तत्रापि व्रतं सम्यक् फलप्रदं।
यच्चीर्णं नरनारीभिर्य्यावत् संपूर्णकालकं॥
अवश्यन्तच्च कर्त्तव्यं संपूर्णफलकाङ्क्षिभिः।
किञ्चिद्भग्नं प्रमादेन यद्व्रतं व्रतिनां भवेत्॥
तत् संपूर्णं भवेत् सर्व्वं व्रतेनानेन पाण्डव।
उपद्रवैर्बहुविधैर्महामोहाच्च पार्थिव॥
यद्भग्नं किञ्चिदेव स्यात् व्रतं विघ्नविनायकैः।
तत् संपूर्णं भवेत् सर्व्वं सत्यं सत्यं न संशयः॥
काञ्चनं रौप्यकं रूपं शिल्पिना तु घटापयेत्।

भग्नव्रतस्य योदेवस्तत् स्वरूपं सुनिर्म्मितं ॥

रूपं स्त्रीपुंसयोर्वापि प्रारब्धं तद्व्रतं किल ।

तच निष्पादितं किञ्चिद्दैवात् सर्व्वं तथा क्षितं ॥

द्विभुजं पङ्कजारूढं सौम्यं प्रहसिताननं ।

द्विभुजादीनि स्त्रीपुंसयोरूपस्य विशेषणं ॥

तच रूपमज्ञातेषु व्रतेषु, अन्यान्तरकृतानां विस्मृतानाञ्च ज्ञातत्वं तेष्वपीदं प्रायश्चित्तमिति ।

निष्पादितं शिल्पिना च तस्मिन्नेव दिने पुनः ।

तस्मान्मासे पुनः प्राप्ते ब्राह्मणो विधिना गृहे ।

स्नापयेत्पयसा दध्ना घृतक्षीररसाम्बुभिः ।

गन्धचन्दनपुष्पैस्तु पूजयेत् कुसुमादिना ॥

तोयपूर्णस्य कुम्भस्य मुखे विन्यस्य चन्दनैः ।

धूपदीपाक्षतैर्वस्त्रैरन्यैरप्युपहारकैः ॥

अर्घ्यं दद्याच्च तन्नाम्ना मन्त्रेणानेन पाण्डव ।

उपवासेन क्षीणस्य प्रायश्चित्तं कृताञ्जलिः ॥

शरणञ्च प्रपन्नस्य कुरुष्वाद्य दयां पुनः ।

परञ्च भयभीतस्य भग्नवर्ज्यव्रतस्य च ॥

कुरु प्रसादं संपूर्णं व्रतं संपूर्णमस्तु मे ।

तपश्छिद्रं व्रतच्छिद्रं यच्छिद्रं भग्नके व्रते ।

तव प्रसादात्तत्सर्व्वं सर्व्वमच्छिद्रमस्तु मे ॥

स्वाहा अमुकदेवाय नमः ।

पूर्व्वतो दक्षिणत उत्तरतो विधिं कुर्य्यात् ।

उपर्य्यधस्ताद्दिक्पालेभ्यो नमः ।

इदमर्घ्यमिदं पाद्यं नैवेद्यं ते नमोनमः।
एवं प्रोक्ष्य ततः पादौ जानुनी कटिशीर्षके॥
वक्षःकुक्षी च हृदयं पृष्ठं वास्यशिरोरुहान्।
ततो द्विजाय कौन्तेय विधिवत् प्रतिपादयेत्॥
पूजयेत्तस्य देवस्य ततः पश्चात् चमापयेत्।
पूजितस्त्वं यथाशक्त्या नमस्तेऽस्तु सुरोत्तम॥
ऐहिकामुष्मिकीं नाथ कार्य्यसिद्धिं दिशस्व मे।
एवं चमापयित्वा तां देवमूर्त्तिं विधानतः॥
स्थित्वा पूर्व्वमुखो विप्रो गृह्णीयाद्दर्भपाणिना।
विप्रस्य हस्ते यच्छेत्तु दाता चैवोत्तरामुखः॥
ब्राह्मणोऽपि प्रयच्छेत मन्त्रेणानेन तद्व्रतं।
वाक्यं पूर्णं मनः पूर्णं काया पूर्णा व्रतेन ते।
संपूर्णस्य प्रसादेन तव पूर्णो मनोरथः॥
ब्राह्मणा यानि भाषन्ते अनुमोदन्ति देवताः।
सर्व्वदेवमया विप्रा न तद्वचनमन्यथा॥
जलस्य चीरतां नीतः पावकः सर्व्वभक्षतां।
सहस्रनेत्रः शक्रोऽपि कृतोविप्रैर्महात्मभिः॥
ब्राह्मणानान्तु वचनात् ब्रह्महत्या प्रणश्यति।
अश्वमेधफलं साग्रं प्राप्यते नात्र संशयः॥
व्यासवाल्मीकिवचनात्पराशरवसिष्ठयोः।
गर्गगौतमधौम्यात्रिवसिष्ठाङ्गिरसां तथा।
वचनान्नारदादीनां पूर्णं भवतु मे व्रतं॥
एवंविधविधानेन गृहीत्वा ब्राह्मणो व्रजेत्।

दाता तत् प्रेरयेत् सर्व्वं ब्राह्मणस्य गृहे स्वयं ॥
ततः पञ्चमहायज्ञान्निर्वपेद्भोजनादिभिः ।
एवं यः कुरुते भक्त्या व्रतमेतन्नराद्बुध: ॥
तस्य संपूर्णतां याति तद्व्रतं यत्पुरास्थितं ।
खण्डं संपूर्णतां याति प्रसन्ने व्रतदैवते ॥
संपूर्णे च ततः कर्त्ता सम्पूर्णाङ्गोभवेद्व्रती ।
भोगी भव्योऽथसत्कीर्त्तिः स संपूर्णमनोरथः ॥
स्थित्वा वर्षशतं मर्त्ये ततः स्वर्गेऽमरो भवेत् ।
यथेष्टचेष्टाचारी च ब्रह्मविष्णुशिवपूजितः ॥
स्वर्गलोके चिरं स्थित्वा पुनर्मोक्षमवाप्नुयात् ।
प्रायश्चित्तमिदं प्रोक्तं पुरा गर्गेण मे प्रभो ॥
गोकुले गोकुलाकीर्णे मया बाल्ये ह्युपोषितं ।
एवं त्वमपि कौन्तेय चर संपूर्णकं व्रतं ॥
भग्नानि यानि मदमोहवशाद्गृहीत्वा ।
जन्मान्तरेष्वपि नरेण समन्तरेण ॥
संपूर्णपूजनपरस्य पुरो भवन्ति ।
सर्व्वंव्रतानि परिपूर्णफलप्रदानि ॥

इति भविष्योत्तरोक्तं संपूर्णव्रतं

———ooo———

नन्दिकेश्वर उवाच ।

साधु साधु महाविप्र शिवभक्तोऽसि सुव्रत ।
मौनं वक्ष्यामि तत्त्वज्ञ देवैरपि निषेवितं ॥

शृणु वत्स प्रवक्ष्यामि मौनं सर्व्वार्थसाधकं।
मौनव्रतं महापुण्यं हुं हुं तत्र विवर्जयेत्॥
पुंसां भोजनकाले तु हुङ्कारो यदि निर्गतः।
सर्व्वमेव सुरामांसं तस्मान्मौने विवर्जयेत्॥
कर्म्मणा मनसा वाचा तत्र हिंसां विवर्जयेत्।
मौनस्यास्य प्रभावेन देवाश्च त्रिदिवं गताः॥
अहिंसकः क्षमी भुङ्क्ते शान्तो मौनव्रते स्थितः।
अष्टमासं चरेन्मौनं यः षण्मासमथापि वा॥
मासत्रयसमायुक्तो मासमेकन्तथैव च।
मासार्द्धन्तु पुनः कुर्य्याद्दिवसान् द्वादशाथ वा॥
षट्पञ्च त्रीणि एकं वा मौनी भुञ्जीत यत्नतः।
समाप्ते तु व्रते तस्मिन् मौनव्रतसमाहितः॥
लिङ्गं चन्दनजं कृत्वा पङ्केन तु प्रोक्षयेत्।
गोरोचनां समारभ्य गन्धैः पुष्पैस्तु पूजयेत्॥
धूपञ्चागुरुकं दद्यान्नमस्कारं ततः पुनः।
करपादशिरोभिस्तत् प्रणिपत्य निवेदयेत्॥
आत्मवित्तानुसारेण हेमघण्टां प्रदापयेत्।
शिवाग्रतो निबध्नीयाच्छिवस्यातीव वल्लभं॥
शोभितां ध्वजमालाभिः पञ्चरत्नैः सुशोभनैः।
पुष्पदामविलम्बैश्च बहुवर्णैरनेकधा॥
विदिशासु विमानस्य कांस्यघण्टां निबन्धयेत्।
बध्नीयाच्चतुरस्त्रीणि देवैकां शक्तितस्तथा॥
कांस्यलोहमयीं वापि सुशोभां च निवेदयेत्।

शिवस्य पुरतो विप्रांश्छिवभक्तांश्च भोजयेत् ॥
पायसं घृतसंमिश्रं मधुमासंपरिप्लुतं ।
अनेकभक्ष्यभोज्याद्यैर्लेह्यपेयसपिच्छलैः ॥
मधुलक्षीरसंमिश्रैर्मण्डकैः सुसमाहितैः ।
भुक्त्वा प्रव्रजितानांश्च निरुच्छेषं समापयेत् ।
शक्त्या च दक्षिणां दद्याद्वित्तशाठ्यं विवर्जयेत् ।
क्रमेण जायते विप्र यस्य यस्य तु तद्भवेत् ॥
शिवभक्तायतो नित्यं शान्तिवाक्यं पुनः पुनः ।
ताम्रपात्रे तु तल्लिङ्गं स्थाप्य पुष्पैरलङ्कृतं ॥
शिरसाधार्य्य तत्पात्रं स्वयं मौनी समाहितः ।
स गच्छेत् नृपमार्गेण यावत्तु शिवगोचरं ॥
प्रदक्षिणीकृत्य शिवे त्रीन् वारांश्च समन्ततः ।
प्रविश्य गर्भगेहकं स्थापयेद्देवदक्षिणे ॥
पुनः पुनः समभ्यर्च्य गन्धपुष्पैश्च सर्व्वतः ।
नमस्कारैस्ततः पश्चात् प्रणम्य शिरसा भुवि ॥
मौनस्यैव विधिः प्रोक्तोमया तव महामुने ।
अस्य मौनस्य माहात्म्याद्देवताः शिवतां गताः ॥
दिव्यवर्षसहस्राणि दिव्यवर्षशतानि च ।
दिव्यवर्षशतं कोटि रुद्रकन्यासमावृतः ॥
कोटिकोटिविमानानामसंख्याकोटिसंवृतैः ।
वज्रस्फटिकसोपानैस्तम्भैर्मरकतप्रभैः ॥
सर्वैर्हेममयैर्दिव्यैर्वरमालाविभूषितैः ।
चामराभरणच्छत्राद्यैः कोटिकोटिनरैर्वृतः ॥

दिव्यगन्धसुसंपूर्णैर्युक्तमालाफलान्वितैः।
एवं विधैर्विमानैस्तु आस्ते शिवपुरे सुखी ॥
कालक्षयादिहागत्य राजा अमितविक्रमः।
वक्ता च सुभगः श्रीमान् सुरूपः प्रियदर्शनः ॥
धर्म्मबुद्धियुतश्चैव सर्व्वशास्त्रविशारदः।
एवं मौनव्रतं प्रोक्तं सर्व्वकामार्थसाधकं।
भुवि सर्व्वासमर्थानां सुकरं प्रकटीकृतं ॥

ज्ञानमधर्म्मविनाशनमाद्यं
मोक्षमनादिमनन्तरमेकं।
शिवं सर्व्वजगत्प्रभुं शान्तिकरं
प्रभुमव्ययसूक्ष्ममसूक्ष्मतनुं ॥
तनुलम्बितनरमुखमालधरं
परिपिङ्गजटार्द्धशशाङ्कधरं।
दृशवान्दुनिलोचनपापहरं
श्रवणोज्ज्वलकुण्डलनागधरं।
वरनूपुरसुष्टुसुपादधरं
कमलोपरि संस्थितपादतलं ॥

सुरासुरशिरश्रेणीमणिनीराजितं हृदये।
नमः शिवाय शान्ताय कारणत्रयहेतवे ॥
पठ्यते सर्व्वशास्त्रेषु वेदेष्वेव विशेषतः।
ध्यानधारणयोगात्मा परापरविभूतये ॥
य इदं पठते स्तोत्रं भक्त्या चैव तु पूजयेत्।

---

(१) कर्मेति पुस्तकान्तरे पाठः।

न तस्य पीडां कुर्व्वन्ति ग्रहाश्चापि ग्रहोत्तमाः॥
वाचिकं मानसं पापं (१) नश्यते नात्र संशयः।
इति मौनव्रतं पुण्यं यस्तनोति महेश्वरं।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकं स गच्छति॥

इति शिवधर्म्मोक्तं मौनव्रतं।

———ooo@ooo———

श्रुतिस्मृतिपुराणेभ्यो यन्मया ह्यवधारितं।
तत्ते वच्मि सुरश्रेष्ठ कस्याप्यन्योपदिश्यते॥
स्नात्वा प्रभातसन्ध्यायामुपस्पृश्य च पिप्पलं।
तिलपात्रन्तु यो दद्यात् स न शोच्यः कृताकृते॥
व्रतानामुत्तमं ह्येतत् सर्व्वपापप्रणाशनं।
पुत्रव्रतमितिख्यातं नाख्यातं कस्यचिन्मया॥

इति भविष्योत्तरोक्तं पुत्रव्रतं।

———oo@oo———

वत्सरान्ते गोयुगं दद्यात् भोजनं शक्तितः परं।
विप्राणां शाङ्करं याति प्राजापत्यमिदं स्मृतं॥
शाङ्करं पदं यातीत्यन्वयः।

इति पद्मपुराणोक्तं प्राजापत्यव्रतं।

——o——

त्रिसन्ध्यं पूज्य दम्पत्यमुपवासी त्रिभूषणैः।
दद्याच्चां धनमाप्नोति मोक्षमिन्द्रव्रतादिह॥

इति पद्मपुराणोक्तमिन्द्रव्रतं।

गौरीसमन्वितं शम्भुं लक्ष्म्या सह जनार्द्दनं।
राज्ञीसमन्वितं सूर्य्यं प्रतिष्ठाप्य यथाविधि।
धूपोत्क्षेपेण सहितं(१) चषकां पात्रेण संयुतां॥
पात्रं, दीपपात्रं।
यो ददाति द्विजेन्द्राणां पुष्पैरभ्यर्च्च पाण्डरैः।
दक्षिणासहितं दत्वा प्रणम्य च पुनः पुनः॥
द्विजेन्द्राणामिति बहुवचनादेव युग्मानां पृथग्दानं धूपादित्रयञ्च प्रतियुग्मं।
एतद्देवीव्रतं नाम दिव्यदेहप्रदायकं॥

इति भविष्योत्तरोक्तं देवीव्रतं।

———oo———

मासोपवासी यो दद्याद्धेनुं विप्राय शोभनां।
सर्व्वेश्वरपदं याति भीमव्रतमिदं स्मृतं॥

इति पद्मपुराणोक्तं भीमव्रतं।

——o——

चान्द्रायणञ्च यः कृत्वा हैमचन्द्रं निवेदयेत्।
चन्द्रव्रतमिदं प्रोक्तं चन्द्रलोकप्रदायकं॥

इति पद्मपुराणोक्तं चन्द्रव्रतं।

———ooo———

पक्षोपवासी यो दद्याद्विप्राय कपिलाद्वयं।
ब्रह्मलोकमवाप्नोति देवासुरसुपूजितः।

(१) धूपोत्क्षेपचषकसहितमिति पुस्तकान्तरे पाठः।

तदन्ते राजराजः स्यात् प्रभाव्रतमिदं स्मृतं ॥

इति पद्मपुराणोक्तं प्रभाव्रतं ।

ब्रह्माण्डं काञ्चनं कृत्वा तिलराशिसमन्वितं ।
त्र्यहं तिलप्रदो भूत्वा वह्निं सन्तर्प्य च द्विजान् ॥
संपूज्य विप्रदम्पत्यं माल्यवस्त्रविभूषितं (१) ।
शक्तितस्त्रिपलादूर्द्ध्वं विश्वात्मा प्रीयतामिति ॥
पुण्येऽह्नि दद्यात्स परं ब्रह्म यात्यपुनर्भवं ।
एतद्ब्रह्मव्रतं नाम निर्वाणफलदं नृणां ॥

इति पद्मपुराणोक्तं ब्रह्मव्रतं ।

———000@000———

यश्चोभयमुखीं दद्यात् प्रभूतकनकान्वितां ।
दिनं पयोव्रती तिष्ठेत् सयाति परमं पदं ।
एतद्वसुव्रतं नाम पुनरावृत्तिदुर्लभं ॥

इति पद्मपुराणोक्तं वसुव्रतं ।

———•———

अतः परं प्रवक्ष्यामि नन्दादेव्याः पदद्वयं ।
येन सा प्रीयते वत्स अचिरेण महाव्रतात् ॥
हैमीरत्ने पादुके कार्य्ये यथाशक्त्यनुसारतः ।

---

(१) चाहरेच दत्त्वोचितमिति पुस्तकान्तरे पाठः ।

चाम्रदुर्व्वाघतैर्बिल्वपत्रैः पूज्ये तु मन्त्रतः ॥
देवीं संपूज्य भक्त्या तु स्थण्डिले प्रतिमासु च।
तद्भक्ताय च विप्राय कन्यकासु निवेदयेत्।
मुच्यते सर्व्वपापेभ्यो दुर्गालोकस्य गच्छति ॥
ततः क्षये महाप्राज्ञो विद्याधरपतिर्भवेत्।
कालेनैवमिहायातः पृथिव्यां नृपसत्तमः ॥

इति पद्मपुराणोक्तं नन्दापदद्वयव्रतं।

———ooo———

सप्तरात्रोषितो दद्यात् घृतकुम्भं द्विजातये।
वरव्रतमिदं प्रोक्तं ब्रह्मलोकप्रदायकं ॥

इति पद्मपुराणोक्तं वरव्रतं।

———

एकभक्ता च सप्ताहं गौरिणीरन्न भोजयेत्।
संपूज्य पार्व्वतीं भक्त्या गन्धपुष्पविलेपनैः ॥
ताम्बूलसिन्दूरवरैर्नारिकेलफलेन च।
प्रीयतां कुमुदा देवी प्रणिपत्य विसर्जयेत् ॥
एकैकां पूजयेद्देवीं सप्ताहं यावदेव तु।
पुनश्च सप्तमे प्राप्ते ताः सर्व्वा निमन्त्रयेत्।
ताभ्यः सम्भोजयित्वान्नं यथाशक्त्या विभूषणैः।
भूषयित्वा माल्यवस्त्रैः कर्णवेष्टाङ्गुलीयकैः ॥
कुमुदा माधवी गौरी भवानी पार्व्वती उमा।
अम्बिका चेति संपूज्या दर्पणं दापयेत् पृथक् ॥

ब्राह्मणं पूजयित्वैकं वाच्यं सम्पन्नमस्तु मे ।
सप्तसुन्दरकं नाम व्रतं पापहरं शुभं ।
कृत्वा प्राप्नोति सौन्दर्य्यं सौभाग्यमतुलं तथा ॥

इति भविष्योत्तरोक्तं सप्तसुन्दरकव्रतं ।

नन्दिकेश्वर उवाच ।

अतः परमिदं गुह्यं वक्ष्यामि मुनिसत्तम ।
पुण्यातिशयसंयुक्तं सर्व्वदेवैरनुष्ठितं ॥
ब्रह्मणा विष्णुना देव्या स्कन्देन्द्रेण यमेन च ।
वरुणादित्यसोमाग्निमरुत्तमदनादिदैः ॥
धर्म्मलक्ष्मीशुक्रगणचन्द्रैर्विलोहितवनेश्वरैः ।
विश्वामित्रवसिष्ठात्रिबृहस्पतिबुधादिभिः ॥
श्वेतागस्त्यदधीचाद्यैः सर्व्वैश्च मुनिसत्तमैः ।
भार्गवाश्विमहाकालैश्चक्रेश्वरगणाधिपैः ॥
तक्षवासुकिकर्कोटकुलिकानन्ततक्षकैः ।
शङ्खपद्ममहापद्मैरन्यैश्चापि महोरगैः ॥
सिद्धैर्यक्षैः किंपुरुषैर्वसुभिश्च महात्मभिः ।
अप्सरोदैत्यगन्धर्व्वैरक्षोभूतगणैरपि ॥
शिवा गतिर्यथा प्राप्ता सर्व्वगत्यतिशायिनी ।
यथा शिवप्रसादेन तथा विधिपरं शृणु ॥
सितचन्दनतोयेन स्नाप्य लिङ्गं विलेप्य च ।
सितैर्विकसितैः पद्मैः संपूज्य प्रणिपत्य च ।

पङ्कजे विमले सौम्ये निश्छिद्रे पुष्पिते घने॥

सौम्ये रम्ये।

मध्ये केसरजालस्य स्थाप्य लिङ्गं कनीयसं।
अङ्गुष्ठमात्रं विधिवत्सर्व्वगन्धमयं शुभं।
स्थाप्य दक्षिणामूर्त्तौ तु विल्वपत्रैः समर्चयेत्॥

दक्षिणामूर्त्तिसमीपे।

अगुरुं दक्षिणे पार्श्वे पश्चिमेन मनःशिलं।
उत्तरे चन्दनं दद्याद्धरितालञ्च पूर्व्वतः॥
शुभगन्धैश्च कुसुमैर्विचित्रैश्चैव पूजयेत्।
धूपं कृष्णागुरुं दद्यात्सघृतञ्चापि गुग्गुलं॥
वासांसि चापि सूक्ष्माणि विकाशानि नवानि च।
पायसं घृतसंयुक्तं घृतदीपांश्च कारयेत्(१)॥
सर्व्वं निवेद्य मन्त्रेण ततो गच्छेत् प्रदक्षिणं।
प्रणम्य भक्त्या देवेशं स्तुत्वा चान्ते क्षमापयेत्॥
सर्व्वोपहारसंयुक्तं तच्च लिङ्गं निवेदयेत्।
शिवाय शिवमन्त्रेण दक्षिणामूर्त्तिमाश्रितः॥

दक्षिणामूर्त्तिमाश्रितो यस्तस्मै शिवाय।

अनेन विधिना देवाः सर्व्वं देवत्वमागताः।
देवी देवीत्वमापन्ना स्कन्दः स्वामित्वमागतः॥
इन्द्रश्च देवराजत्वं गणाश्च गणताङ्गताः।
एवं योऽर्चयते लिङ्गं पद्मे गन्धमयं शुभं॥
सर्व्वपापविनिर्मुक्तः शिवमेवाभिगच्छति।

---

(१) दापयेदिति क्वचित् पाठः।

एतद्व्रतोत्तमं गुह्यं शिवलिङ्गं महाव्रतं।
भक्तस्य ते मयाख्यातं न देयं यस्य कस्यचित्॥

इति शिवधर्म्मोत्तरोक्तं शिवलिङ्गव्रतं।

———ooo———

युधिष्ठिर उवाच।

देवदेव महाभाग बालानां हितकाम्यया।
वर्द्धापनविधिं ब्रूहि राज्ञामपि विशेषतः॥

श्रीकृष्ण उवाच।

पितृकर्म्मसमुद्भूतः पाराशर्य्यो महामुनिः।
गत्वा प्रयागं सत्तीर्थं गङ्गायमुनयोस्तटे॥
कृत्वा स्नानञ्च विधिवत् कृत्वापि पितृतर्पणं।
नत्वा तु माधवं देवं दृष्ट्वा तत्र महामुनिं॥
सनत्कुमारं योगीन्द्रं सत्यलोकनिवासिनं।
तं प्रणम्य यथान्यायं मुनिः कालीसमुद्भवं॥
पूजितस्तेन विधिवत् कथाश्चक्रे मनोहराः।
कथान्ते तु महाभाग मुनिः पप्रच्छ सादरं।
व्यासः सत्यवतीसूनुः सर्व्वलोकहिताय वै॥

सनत्कुमार उवाच।

मासि मासि प्रकुर्व्वन्तु बालवर्द्धापनं बुधैः।
आसमाप्तात्समस्ताय समाप्तात् सविधीयते॥
कुमुदा माधवी गौरी रुद्राणी पार्व्वती उमा।
काली सरस्वती चैव सावित्री ब्रह्मणः प्रिया॥

सती संज्ञा तथा मेधा पुष्टितुष्टिसमन्विता।
नृपडिम्भपरित्रासा जयन्ती नाम षोडशी॥
पूजनीयाः प्रयत्नेन सूर्य्यमध्ये विलिख्य ताः।
रजनीपिष्टतो वापि लिखेद्वा कुङ्कुमेन वा॥
गन्धपुष्पैः सुगन्धैश्च दीपवस्त्रनिवेदनैः।
फलैर्मनोहरैर्भक्ष्यैः पक्वान्नैर्विविधैरपि॥
तूर्य्यघोषै र्ब्रह्मघोषैः कुर्य्यात्तत्र महोत्सवं।
सोपलिप्ते शुचौ देशे स्थाप्य सूर्य्यं विधानतः॥
अक्षतैश्चन्दनैः स्थाप्य कुमुदाद्याः पृथक् पृथक्।
नामभिः पूजनीयास्ताः स्नापयित्वा च बालकं॥
भूपतिं वा मुनिश्रेष्ठ सर्व्वालङ्कारभूषितं।
पूजेतां मातृपितरौ बालवर्द्धापने सति॥
पुरोधाः पूजयेद्ब्रह्मन् राजवर्द्धापने विधौ।
कुमुदाद्याः समुद्दिश्य वंशपात्राणि कल्पयेत्॥
एकैकस्यै धनाढ्यस्तु दद्यात् षोडश षोडश।
तदर्द्धानि तदर्द्धानि द्वे चैकैकमथापि वा॥
बहुपक्वान्नयुक्तानि फलपुष्पयुतानि च।
सुवासिनीभ्यो विप्राणां दद्यादृक्तिपुरःसरं॥
प्रीयतां कुमुदाद्या मे बालप्राणविवर्द्धनी।
बालेन यशसा पुष्ट्या बालं मे वर्द्धयन्तु वै॥
प्रयच्छन्तु सदारोग्यं सौख्यं सौभाग्यमेव च।
स्त्रीभ्य ते इतिमन्त्रेण पर्व्वन्ताभ्यः प्रकल्पयेत्॥
एवं कृत्वा नमस्कृत्य विप्राशीर्वादपर्व्वकं।

भुञ्जीत गोत्रजैः सार्द्धं हृष्टतुष्टमना नृप ॥
वस्त्रताम्बूलपुष्पादि दिने तस्मिन् प्रकल्पयेत्।
सुवासिनीनां विप्राणां कुमुदा प्रीयतामिति ॥

अथाथर्वणगोपथब्राह्मणे।

अथ वर्षशतं प्रवर्द्धमाने(१)संवत्सरे राजानमभिवर्द्धयिष्यन्नायुषा-वर्चसा तेजसा यशसा प्रजया श्रिया विजयेन कौर्त्योपचितैर्मङ्गलै-रभ्युक्ष्य गन्धैरर्चयित्वा माहेन्द्रं हविर्निरूप्य लोकपालेभ्यश्च आप-येत्। माहेन्द्रो यत्तु जसेति लोकपालांश्चेष्ट्वा राजानमन्वालभ्य जुहुयात्। पर्व्वाचमिन्द्र त्रातारमिन्द्र वर्द्धय त्वमियं मदतिमितं जीव शरदोवर्द्धमानोऽभिवर्द्धस्व प्रजया वाहधानेतिद्वाभ्यां, रथन्तु-त्वागिरयः(२) इति चतसृभोरचौ कृत्वा मणुण आसत इति रोचनेनालङ्कुर्य्यात्। ना वै स तत्तुमिति सूक्तं सम्पातवतं कृत्वा धाता ते यश्चिमित्युक्तमभि वर्द्धस्वेत्यसपत्नो भवेदित्येतत् कर्म गौर लपुत्रः पैठीनसिः।

स्कन्द पुराणे।

एवं वर्द्धापनश्चैव जन्म वा प्रागवासरे।
मासे मासे व्यतीते तु बालानां हर्षहेतवे ॥
न बालरोगाः प्रभवन्ति तस्य
न स्कन्द रोगा न तु शाकिनीभ्यः।
भयं भवेन्नैव जलाग्निदिग्भ्यो
बालस्य राज्ञोऽपि विशेषतश्च ॥

---

(१) प्रवर्द्धमने इति पुस्तकान्तरे पाठः।
(२) आगमन इति पुस्तकान्तरे पाठः।

सम्प्राप्य राज्यं नृपतिः समस्तं
कुर्य्यादिमं शान्तिमहोत्सवञ्च।
ग्रहान् सुसंपूज्य विनायकञ्च
दुर्गां च भक्त्या कुमुदादिदेवीः।
यः पूजयेद्भक्तिपुरःसरं वै
जेता रिपूणां बलबुद्धियुक्तः॥

इति षड्दीपनविधिः।

अथर्वणगोपथब्राह्मणे।

अथ घृतावेक्षणं।

प्रातः प्रातः शङ्खदुन्दुभिनादेन ब्रह्मघोषेण वा प्रबोधितो राजा शयनगृहादुत्थायापराजितान्दिशमभिक्रम्योपाध्यायं प्रतीक्षेत। अथ पुरोधाः स्नातानुलिप्तः शुचिः शुक्लवासाः कृतमङ्गलरचितोष्णीषः शान्तिगृहं प्रविश्य देवानां नमस्कारं कृत्वा स्वस्तिवाचनमनुप्राप्य विनीतोपविशेद्यमस्य लोकाद्यथाकालं यो न जीवोसीति स्वस्त्ययनं कृत्वोग्निंध्याभ्युक्ष्य परिस्तीर्य्य शान्तातीयेन तिलान् घृताक्तान् जुहुयात् शान्तः सौवर्णराजतमौदुम्बरं वा पात्रं घृतपूर्णं सहिरण्यं घृतस्य जुतिमहस्त्रं शृङ्गोरुविष्णो विक्रमस्विन्नभिमन्त्र्य आज्यन्तेज इति तदा लभते।

आज्यन्तेजः समुद्दिष्टमाज्यं पापहरं परं।
आज्येन देवास्तृप्यन्ति आज्ये लोकाः प्रतिष्ठिताः॥
भौमान्तरीक्षदिव्यं वा यत्त कल्मषमागतं।
सर्व्वं तदाज्यसंस्पर्शात प्रणाशमुपगच्छतु॥

तस्मिन् सर्व्वमात्मानं पश्येद्दृष्ट्वा। शिरोऽहृदयमन्वालभे-दुत्थापतस्त्व मिति द्वाभ्यां। सूर्य्यस्यावृतमिति प्रदक्षिणमावृत्य शेषं. साधयेदिति।

तत्र श्लोकाः।

अयं घृतावेक्षणस्य प्रोक्तो विधिरथर्वणः।
एवं समाचरेत्सम्यक् प्रयतः सुसमाहितः॥
उपास्योदयकाले तु स राजा जयमिच्छया।
स राजा जयते राष्ट्रं न पश्यन्ति तु शत्रवः॥
पश्चादानीय कपिलां राजा दद्याद्द्विजातये।
आशीर्व्वादं ततश्चैव श्रुत्वा तन्मुखनिःसृतं॥
गुरुणावेदिते तस्माद्दीर्घमायुरवाप्नुयात्।
पुत्रान् पौत्रांश्च मित्राणि लभते नात्र संशयः॥
आयुष्यमथ वर्च्चस्यं सौभाग्यं शत्रुतापनं।
दुःस्वप्ननाशनं धन्यं घृतावेक्षणमुच्यते॥

इति घृतावेक्षणविधिः।

अथ अगस्त्यार्घ्यविधिः।

पद्मपुराणात्।

भीष्म उवाच।

भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः।
तपः सत्यञ्च सप्तैते देवलोकाः प्रकीर्त्तिताः॥
पर्य्यायेण तु सर्व्वेषां आधिपत्यं कथं भवेत्।

इह लोके शुभं रूपं आयुरारोग्यमेव च ।
लक्ष्मीश्च विपुला ब्रह्मन् कथं स्यात्सुरपूजित ॥

पुलस्त्य उवाच ।

वसिष्ठो यो भवेत्तस्मिन् जलकुम्भे च पूर्ववत् ।
ततश्चेतश्चतुर्बाहुः साक्षसूत्रकमण्डलुः ॥
अगस्त्य इति शान्तात्मा बभूव ऋषिसत्तमः ।
मलयस्यैव देशे च वैखानसविधानतः ॥
सभार्य्यःससुतोविप्रैस्तपश्चक्रे सुदुष्करं ।
ततः कालेन महता तारकादिनिपीड़ितं ॥
जगद्वीक्ष्य स कोपेन पीतवान्वरुणालयं ।
ततोऽस्य वरदाः सर्व्वे बभूवुः शङ्कराद्यः ॥
ब्रह्मा विष्णुश्च भगवान् वरदानाय जग्मतुः ।
वरं वृणीष्व भद्रं ते यथाभीष्टोऽस्व वै मुने ॥

अगस्त्य उवाच ।

यावद्ब्रह्मसहस्राणां पञ्चविंशतिकोटयः ।
वैमानिको भविष्यामि दक्षिणाम्बरवर्त्मनि ॥
मद्विमानोदयात् कुर्य्यात् यः कश्चित् पूजनं मम ।
स चैव पुण्यतां यातु वर एष वृतो मया ॥
श्राद्धं ये तु करिष्यन्ति पिण्डपूर्व्वन्तु भक्तितः ।
तेषां पितृगणः सर्व्वो मया सार्द्धं दिवि स्थितः ॥
एतत् कालञ्च तिष्ठेत एष एव वरो मम ।
एवमस्त्विति तेप्युक्त्वा जग्मुर्देवा यथागतं ।
तदर्घ्यः संप्रदातव्यो अगस्त्यस्य सदा बुधैः ॥

विष्णुधर्म्मोत्तरे ।

अगस्त्यस्य महामुनिं प्रति

पितामहवाक्यं ।

देवकार्य्यमहं ब्रह्मन् त्वया कृतमिदं शुभं ।
तस्मात्त्वाहन्तु ते वच्मि वैश्वानरपथाद्बहिः ॥
दिव्यदेहो भवांस्तत्र विमानवरमास्थितः ।
दक्षिणां दिशमाश्रित्य अस्तोदयसमन्वितः ॥
प्रसादमम्भसां श्रैत्यं निर्विषत्वं तवोदये ।
भविष्यत्यमलप्रज्ञ मत्प्रसादात्सदैव तु ॥
शरत्प्रमुदितो भूत्वा वसन्तेऽस्तमयं द्विज ।
प्राकाम्ययुक्तश्च तथा समग्रां वसुधाञ्चर ॥
शरत्समयमासाद्य तस्माद्विप्र तवोदये ।
पूजां त्वमाप्स्यसे लोके मत्प्रसादाद्द्विजोत्तम ॥
ये च त्वां पूजयिष्यन्ति गन्धमाल्यफलाक्षतैः ।
दधिकाञ्चनरत्नैश्च परमान्नेन भूरिणा ॥
पूर्णकुम्भैः सकुसुमैर्गन्धैर्भोपानद्यष्टिभिः ।
धेन्वा वृषेण भक्ष्यैश्च वासोभिः कनकेन च ॥
संवत्सरञ्च त्यागेन फलस्यैकस्य वाप्यथ ।
पूजनैर्ब्राह्मणानाञ्च त्वमस्य परिकीर्त्तनैः ।
विधानं यदगस्त्यस्य पूजने तद्वदस्व मे ॥

पुलस्त्य उवाच ।

प्रत्यूषसमये विद्वान् कुर्य्यादस्योदये निशि ।
स्नानं शुक्लतिलैस्तद्वच्छुक्लमाल्याम्बरो गृही ॥

निश्युदये निशि दिनमुखे स्नानं समाचरेत् ।
स्थापयेदव्रणं कुम्भं माल्यवस्त्रविभूषितं ॥
पञ्चरत्नसमायुक्तं घृतपात्राक्षसंयुतं ।
नानाभक्ष्यफलैर्युक्तं ताम्रपात्रसमन्वितं ॥

अङ्गुष्ठमात्रं पुरुषं तथैव
सौवर्णमत्यायतबाहुदण्डं ।
चतुर्भुजं कुम्भमुखे निधाय
धान्यानि सप्ताम्बरसंयुतानि ॥
सकाशपुष्पाक्षतशुक्तियुक्तं
मन्त्रेण दद्याद्द्विजपुङ्गवाय ।
उत्क्षिप्य लम्बोदरदीर्घबाहु-
मनन्यचेता यमदिङ्मुखस्थः ॥

सकाशपुष्पाक्षतया शुक्त्या युक्तं प्रयुक्तमर्घ्यमुत्क्षिप्य दद्यादित्यन्वयः । अत्यायतबाहुदण्डमित्युत्क्षेपणक्रियाविशेषणं । लम्बोदर दीर्घबाहुमिति प्रतिमाविशेषणं । द्विजपुङ्गवोऽगस्त्यः ।

श्वेतां च दद्याच्छुचिमुक्तिरौप्य-
खुरां हेममुखीं सवत्सां ।
धेनुं नरः क्षीरवतीं प्रणम्य
सवस्त्रघण्टाभरणां द्विजाय ।

भविष्योत्तरात् ।

स्नानं कारयित्वा च यथाशक्त्या सुशोभनं ।
कुम्भाकृतिं प्रशान्तञ्च जटामण्डलधारिणं ॥
कमण्डलुकरं शिष्यैः स्वर्गैश्च परिवारितं ।

मृत्यूपविषहन्तारं दर्भाक्षसूत्रधरं मुनिं।
तस्मिन् कुम्भे समालम्बं चन्दनेन ततो न्यसेत्॥
स्थापितस्यानुलिप्तस्य चन्दनेन सुगन्धिना।
पूजितं जातिकुसुमैः सुगन्धैर्धूपैश्च धूपितं॥

अथ विष्णुरहस्ये।

काशपुष्पमयीं रम्यां कृत्वा मूर्त्तिं तु वारुणेः।
प्रदोषे विन्यसेत्तान्तु पूर्णकुम्भे स्वलङ्कृते॥

इह पूर्व्वोक्तसुवर्णरूप्येण सह शक्त्यनुसारादिकल्पः। पूर्णकुम्भो जलपूर्णकुम्भः।

कुम्भस्थं पूजयेत्तन्तु पुष्पधूपविलेपनैः।
दध्यक्षतबलिं दद्याद्रात्रौ कुर्य्यात् प्रजागरं॥

पूजा च वक्ष्यमाणैरर्घ्यमन्त्रैर्विधेया।

प्रभाते तं समादाय यावत् पुण्यजलाशयं।
निशावसाने तान् पश्यन् जलान्ते प्रतिमां मुने॥
अर्घ्यं दद्यादगस्त्याय भक्त्या सम्यगुपोषितः।
पुष्पैर्मूलैः फलैर्गन्धैर्धूपैरथ सुगन्धिभिः॥
द्राक्षाखर्ज्जूरकर्कन्धूनारिकेलादिभिः शुभैः।
पञ्चरत्नसमायुक्तं हेमरूप्यसमन्वितं॥
सप्तधान्यभृतं पात्रचन्दनेन समायुतं।
तत्तु ताम्रमयं कृत्वा दद्यादर्घ्यं द्विजातये॥
अगस्त्यः खनमानेति पठन्मन्त्रमिमं मुने।
यथा लाभकृतार्घेन सर्व्वदोष विवर्जितः।
अर्घ्यं दद्यादगस्त्याय शूद्रैर्मन्त्रविधिस्त्वयं।

काशपुष्पप्रतीकाश वह्निमारुतसम्भव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥

भविष्योत्तरात् ।

ततश्चार्घ्यः प्रदातव्योयैर्द्रव्यैस्तान् शृणुष्व मे ।
खर्जूरैर्नालिकेलैश्च कुष्माण्डैस्त्रपुसैरपि ॥
कर्कोटैः कारवेल्लैश्च कर्म्मरैर्बीजपूरकैः ।
द्राक्षाकैर्दाडिमैश्चैव नारङ्गैः कदलीफलैः ॥
दूर्व्वाङ्कुरैः कुशैः काशैः पद्मैर्नीलोत्पलैस्तथा ।
नानाप्रकारैर्भक्ष्यैश्च गोभिर्वस्त्रैः रसैः शुभैः ॥
विरूढैः सप्तधान्यैश्च वंशपात्रे निधापितैः ।
सौवर्णरूप्यपात्रेण ताम्रवंशमयेन च ॥
मूर्द्ध्नि स्थितेन तन्त्रेण जानुभ्यामवनीं गतः ।
दक्षिणाभिमुखो भूत्वा ध्यात्वागस्त्यं च तं नृप ॥
दद्यादर्घ्यं प्रयत्नेन चेतसागुरुचन्दनैः ।

शुक्त्याकारं चार्घ्यपात्रं सकाशपुष्पावतस्त्वीति वचनात् ।

काशपुष्पप्रतीकाश वह्निमारुतसम्भव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥
वातापिर्भक्षितो येन समुद्रः शोषितः पुरा ।
लोपामुद्रापतिः श्रीमान् योऽसौ तस्मै नमो नमः ॥
येनोदितेन पापानि विलयं यान्ति व्याधयः ।
तस्मै नमोऽस्त्वगस्त्याय सशिष्याय च पुत्रिणे ॥
ब्राह्मणो वेदमन्त्रेण दद्यादर्घ्यं नृपोत्तम ।

अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः ।

उभौ वर्षाह्नविवृतः पुपोष सत्या देवेष्वाशिषो जगाम ॥
दत्त्वैवमर्घ्यं कौरव्य प्रणिपत्य विसर्ज्जयेत् ।
अर्चितस्त्वं यथाशक्त्या नमोऽगस्त्यमहर्षये ।
ऐहिकामुष्मिकीं दत्त्वा कार्य्यसिद्धिं व्रजस्व मे ॥

विसर्ज्जनमन्त्रः ।

विसर्ज्जयित्वाऽगस्त्यं तं विप्राय प्रतिपादयेत् ।
दैवज्ञे व्यासरूपाय वेदवेदाङ्गवादिने ॥
अगस्त्यो मे मनस्थोऽस्तु अगस्त्यो स्मिन् घटे स्थितः ।
अगस्त्यो द्विजरूपेण प्रतिगृह्णातु सत्कृतः ॥
अगस्त्यः समजश्चोरश्चाग्रयत्नावयोरघं ।
अतुलं विमलं सौख्यं प्रयच्छ त्वं महामुने ॥

प्रतिग्रहमन्त्रः ।

एवं यः कुरुते भक्त्या ह्यगस्त्यव्रतमादरात् ।
फलमेकं तथा धान्यं रसञ्चैकं परित्यजेत् ।
सम्पूर्णे च तथा वर्षे पुनरप्यनुपक्रमेत् ॥

विष्णुरहस्ये ।

दत्त्वार्घ्यन्तु विधानेन नरः कुम्भोद्भवाय च ।
त्यजेदगस्त्यमुद्दिश्य धान्यमेकं फलं रसं ॥

अथ माघेऽप्यगस्त्यार्घ्यमभिधाय ।

प्रत्यब्दञ्च फलत्यागमेवं कुर्व्वन् न सीदति ।
होमं कृत्वा ततः पश्चाद्वर्जयेन्मानवः फलं ॥

होमश्च स्वाहान्तेन प्रणवादिना अर्घमन्त्रेण सर्पिषा विधेयः ।

ततोऽनु पूजयेद्विप्रान् घृतपायसमोदकैः।
गाः सुवर्णञ्च वासांसि तेभ्यो दद्याच्च दक्षिणां॥
घृतपायससंयुक्तेन पात्रेण स्थगिताननं।
सच्छिरस्कञ्च तं कुम्भं ब्राह्मणाय निवेदयेत्॥
अप्राप्ते भास्करे कन्यामर्वाग्वै सप्तभिर्दिनैः।
अर्घ्यं दद्युरगस्त्याय ये वसन्ति महोदये॥

पूर्व्वोक्तवचनान्तर्गतेऽर्कं इत्यर्थः। उज्जयन्यां तथ्वीक्।

यदाह वराहमिहिरः।

संख्याविधानात् प्रतिदेशमस्य
विज्ञाय संदर्शनमादिशेज्ज्ञः।
तत्रोज्जयन्यामगतस्य कन्यां
भागैः स्वराख्यैः स्फुटभास्करस्य॥

स्वराख्यैर्भागैः सप्तभिरंशैः कन्यामगतस्य स्फुटस्यादित्यस्य मघाद्वितीयचरणान्तर्गतस्येत्यर्थः।

तथा।

ईषत्प्रकाशेऽरुणरश्मिजाले।
नैशेऽन्धकारे दिशि दक्षिणस्यां॥
संवत्सरावेदितदिग्विभागो।
भूगोऽर्घ्यमूर्व्वां प्रयतः प्रयच्छेत्॥

भविष्योत्तरे कृष्णवाक्यं।

तस्यैवं चेष्टितस्यार्षैः प्रयच्छार्घ्यं युधिष्ठिर।
कन्यायामागते सूर्य्ये अर्वाग्वै सप्तमे दिने।
कन्यायां समनुप्राप्ते अर्घ्यकालो निवर्त्तते॥

युधिष्ठिरे पुरे पूर्व्वां तृतीयचरणस्थिता सत्यर्कउदये इत्यर्थः । यस्मिन् देशे यस्मिन् दिने अगस्त्यसन्दर्शनं भवति । तस्मिन् देशे तस्मिन्नर्घ्यदानमिति संक्षेपः । कन्यायां समनुप्राप्ते इत्यादिना सप्तमाहिनादारभ्य संक्रान्तिमनधीकुर्व्वता उदयादारभ्य सप्तदिनाभ्यन्तरेऽपि युक्तमर्घदानमित्येतद्दर्शितं ।

तथाच पद्मपुराणे ।

आसप्तरात्रादुदयाद्यमस्य
दातव्यमेतत्सकलं नरेण ॥

यमस्य अगस्त्यस्य । उदयादूर्द्धं आसप्तरात्रात् । सप्तरात्रमनधीकृत्य एकस्मिन् दिने अर्घ्योदातव्य इत्यर्थः ।

सप्तरात्रादूर्द्धन्तु अर्घ्यदानमनर्थकमिति ।

मत्स्यपुराणे ।

अगस्त्योदक्षिणामाशामाश्रित्य नभसि स्थितः ।
वरुणस्यात्मजो योगी विन्ध्यपादविमर्द्दनः ॥
कन्यांशेभ्यः पश्चिमेभ्यः षड्भ्यः प्रारभ्य संख्यया ।
अंशात् द्विसप्ततिं यावत् भुङ्क्ते सूर्य्यस्तु राशिषु ।
उदेति तावद्भगवान् अगस्त्यो व्योम्नि धामभृत् ॥
वृषांशेभ्यः पश्चिमेभ्यः प्रारभ्य पूर्व्ववत् क्रमात् ।
षट्त्रिंशतञ्च यावच्च भुङ्क्ते भानुर्यथाक्रमं ॥
तावच्छान्तस्य पातालं प्रयात्यस्तमुपैति च ।

वृषा वृषभः । अंशचरणः । नवचरणोराशिः । सपादनक्षत्रद्वयभोगात् । उत्तरात्तृतीयचरणादयः । तद्द्विसप्ततिरश्मिनो तृतीयचरणान्ताः एतावत् सूर्य्यभागेनोदयकालः । शेषोऽपि कालः

कृतोपवासः सम्यग्वेदगस्त्यमुदितं मुनिं।
सर्व्वकामप्रदं पुण्यं सर्व्वभाग्यप्रवर्द्धनं॥
अर्चनीयश्च भगवान् श्रद्धाभक्तिसमन्वितैः।
पूर्णकुम्भैः सकूष्माण्डैर्धूपैर्धान्यैर्घृतेन च॥
जातिपद्मोत्पलैः पुष्पैश्चन्दनेन सितेन च।
गोभिर्घृतैस्तथा वस्त्रै रत्नैः सागरसम्भवैः॥
उपानच्छत्रदण्डैश्च पादुकाजिनवल्कलैः।
हविषा परमान्नेन फलैः पुष्पैश्च शोभनैः॥
अन्यप्रकारैर्भक्ष्यैश्च होमैर्ब्राह्मणतर्प्पणैः।
आशास्य च शुभं काममुद्दिश्यैकं मनोगतं॥
यथाहं प्राप्नुयाम् कामं भगवन्मनसि स्थितं।
त्वत्प्रसादादविघ्नेन भूयस्त्वां पूजयाम्यहं॥
इत्युक्ता पूजयेत्पश्चाद्दैवज्ञांश्च तथा गुरुम्।
ब्राह्मणान् भोजयित्वा तु ततो भुञ्जीत वाग्यतः॥

अथ पद्मपुराणे।

आसप्तरात्रादुदयादगस्त्य
दातव्यमेतत्सकलं नरेण।
यावत्समाः सप्तदशाथ वा स्यु-
रन्योर्व्वमप्यन वदन्ति केचित्॥

अनेन विधिना यस्तु पुमानर्घं निवेदयेत्।
इमं लोकमवाप्नोति रूपारोग्यसमन्वितः॥
द्वितीयेन भुवर्लोकं स्वर्लोकञ्च ततः परं।
सप्तैवलोकानाप्नोति सप्तार्घान् यः प्रयच्छति॥

यावदायुश्च यः कुर्यात् स परं ब्रह्म गच्छति ।

वराहसंहितायां ।

नरपतिरिममर्घ्यं श्रद्दधानो ददानः
प्रविगतमददोषैर्निर्ज्जितारातिपक्षः ।
भवति यदि हि दद्यात्सप्तवर्षाणि सम्यक् ।
जलनिधिरसनायाः स्वामितामेति भूमेः ॥

भविष्योत्तरात् ।

दत्त्वार्घ्यं सप्तवर्षाणि क्रमेणानेन पाण्डव ।
पुमान्यत्फलमाप्नोति तदेकाग्रमनाः शृणु ॥
ब्राह्मणः स्यात् चतुर्वेदः सर्व्वशास्त्रविशारदः ।
क्षत्रियः पृथिवीं सर्व्वां प्राप्नोत्यर्णवमेखलां ॥
वैश्यानां धान्यनिष्पत्तिर्गोधनञ्चापि निन्दति ।
शूद्राणां धनमारोग्यं सस्यानञ्चाधिकं भवेत् ॥
स्त्रीणां पुत्राः प्रजायन्ते सौभाग्यं गृहसम्पिमत् ।
विधवानां महत्पुण्यं वर्द्धते पाण्डुनन्दन ॥
कन्या भर्त्तारमाप्नोति व्याधेर्मुच्येत दुःखितः ।
येषु देशेष्वगस्त्यार्घः पूजेयं क्रियते जनैः ॥
तेषु देशेषु पर्ज्जन्यः कामवर्षी प्रजायते ।
ईतयः प्रशमं यान्ति नश्यन्ति व्याधयस्तथा ॥
पठन्ति ये त्वगस्त्यस्य व्रतं शृण्वन्ति चापरे ॥
ते सर्व्वे पापनिर्मुक्ताः चिरं स्थित्वा महीतले ।
हंसयुक्तविमानेन स्वर्गं यान्ति नरोत्तमाः ॥

मर्त्त्येषु दीक्षसि गृहं परमर्षिवृन्दं

पूजयेद्विविधैः पुष्पैस्तथा सागुरुचन्दनैः ।
धूपं कृष्णागुरुं दद्यात्सघृतं वापि गुग्गुलं ॥
वासांसि च सुसूक्ष्माणि विकेशानि निवेदयेत् ।
पायसं घृतसंयुक्तं घृतदीपांश्च दापयेत् ॥
सर्व्वं निवेद्य मन्त्रेण ततो गच्छेत् प्रदक्षिणं ।
प्रणम्य शिरसा भानुमृतणायेनं क्षमापयेत् ॥
सर्व्वोपहारसंयुक्तं बलिन्देवाय दापयेत् ।
खखोल्कायेति मन्त्रेण सर्व्वायामिततेजसे ॥
अनेन विधिवद्देवमभ्यर्चयित्वा पुरा रविं ।
अहं ब्रह्मत्वमापन्नः प्रसादाद्भास्करस्य तु ॥

इति भविष्यत्पुराणोक्तं व्योमव्रतं ।

निशि कृत्वा जले वासं प्रभाते गोप्रदो भवेत् ।
वारुणं लोकमाप्नोति वरुणव्रतमिहोच्यते ॥

इति पद्मपुराणोक्तं वरुणव्रतं ।

योऽब्दमेकं प्रकुर्व्वीत नक्तं पर्व्वणि पर्व्वणि ।
पर्व्व पञ्चदशी ।
ब्रह्मचारी जितक्रोधः शिवार्च्चनरतः सदा ।
वत्सरान्ते च विप्रेन्द्र शिवभक्तान् समाहितान् ॥

भोजयित्वा ततो ब्रूयात् प्रीयतां भगवान् प्रभुः।
एवं विधिसमायुक्तः शिवलोकञ्च गच्छति।
न च मानुषतां लोके अध्रुवां प्राप्नुते नरः॥

इति भविष्यत्पुराणोक्तं पर्वनक्तव्रतं।

———000———

पृथिवीभाजने भुङ्क्ते नित्यं पर्व्वसु यो नरः।
अतिरात्रफलं देवि अहोरात्रेण विन्दति॥
पृथिवीभाजने भूनावम्रं निधायेत्यर्थः शिवोऽत्र देवता।

इति पद्मपुराणोक्तं पर्वभूभाजनव्रतं।

———00(1)00———

यो विंशतिपलादूर्ध्वं महीं कृत्वा तु काञ्चनीं।
दिनं पयोव्रतं दद्याद्रुद्रलोके महीयते।
धराव्रतमिदं प्रोक्तं सप्तकल्पशतानुगं।
दिनं देवामामुत्तरायणं। पयोव्रतमित्यनन्तरं कृत्वेत्यनुषङ्गः।
रुद्रो देवता धरादानं पारणं।

इति पद्मपुराणोक्तं धराव्रतं।

———000———

नन्दिकेश्वर उवाच।

तथा सर्व्वफलत्यागमाहात्म्यं शृणु नारद।

यदक्षयं परे लोके सर्व्वकामफलव्रतं ॥
मार्गशीर्षे शुभे मासि तृतीयायां मुनिव्रतं ।
द्वादश्यामथ वाष्टम्याञ्चतुर्द्दश्यामथापि वा ॥
आरभेच्छुक्लपक्षस्य कृत्वा ब्राह्मणवाचनं ।
अन्येष्वपि च मासेषु पुण्येऽह्नि मुनिसत्तम ॥
सदक्षिणां पायसेन शक्तितः पूजयेद्द्विजान् ।
अष्टादशानां धान्यानां अन्यच्च फलमात्रकं ॥
वर्जयेदष्टमेकन्तु विनैवौषधकारणात् ।
सरूपं काञ्चनं रुद्रन्धर्म्मराजञ्च कारयेत् ॥
कूष्माण्डं मातुलिङ्गञ्च वृन्ताकम्पनसन्तथा ।
आम्राम्रातकपित्थानि कालिङ्गमथ वारुकं ॥
श्रीफलाश्वत्थबदरञ्जम्बीरं कदलीफलं ।
कर्म्मरन्दाडिमं शक्त्या कलधौतानि षोडश ॥

कलधौतं हेम ।

मूलकामलकञ्जम्बूतिन्तिडीकरमन्दकं ।
कङ्कोलकञ्च तुण्डीरं करीरकुटजं शमी ॥

एलकमेलाफलं ।

उदुम्बरं नारिकेलन्द्राक्षाथ बृहतीद्वयं ।
रौप्याणि कारयेच्छक्त्या फलानीमानि षोडश ॥
ताम्रन्तालफलं कुर्य्यादगस्तिफलमेव च ।
पिण्डीरकाश्मर्य्यफलं तथा [illegible]णकन्दकं ॥

काश्मर्य्यः श्रीपर्णी ।

रक्तालुकाकण्टकञ्च केतकाशोकचिर्भटं ।

केतकः अम्बुप्रसादनफलं। अङ्कोलकश्चिश्चा।

चित्रवल्लीफलं तद्वत् कूटशाल्मलिजं फलं।

कूटशाल्मलिः रोहीतकः।

ग्रामनिष्पावमधुकवटेङ्गुदपटोलकं।

मधुकोमघकः। इङ्गुदो हिंगुणः।

ताम्राणि षोड़शैतानि कारयेच्छक्तितो नरः।

उदकुम्भद्वयं कुर्य्याद्धान्योपरि सवस्त्रकं॥

ततश्च कारयेच्छय्यां शय्योपरि सवाससं।

भक्ष्यपात्रद्वयोपेतं यमं रुद्रवृषान्वितं॥

धेन्वा सहैव शान्ताय विप्रायाथ कुटुम्बिने।

सपत्नीकाय संपूज्य पुण्येऽह्नि विनिवेदयेत्॥

यथा फलेषु निवसन्त्यमरा रसरूपिणः।

तथा सर्व्वफलत्यागव्रताद्भक्तिः शिवेऽस्तु मे॥

यथा शिवश्च धर्म्मश्च सदानन्दफलप्रदः।

तद्युक्तफलदानेन तौ स्यातां मे फलप्रदौ॥

यथा फलानि कामाः स्युः शिवभक्तेषु सर्व्वदा।

तथानन्तफलप्राप्तिर्मेऽस्तु जन्मनि जन्मनि॥

यथा भेदेन पश्यामि शिवविष्ण्वर्कपद्मजां।

तथा ममास्तु विश्वात्मा शङ्करः शङ्करः सदा।

इति वत्सरतः सर्व्वमलङ्कृत्य च भूषणैः॥

वत्सरतः वर्षान्तरं।

शक्तश्चेच्छयनं दद्यात्सर्व्वोपस्करसंयुतं।

अशक्तस्तु फलान्येव यथोक्तानि विधानतः॥

तथोदकुम्भयुग्मञ्च शिवधर्म्मौ च काञ्चनैः।
विप्राय दत्त्वा भुञ्जीत वाग्यतस्तैलवर्जितं॥
अन्यानपि यथाशक्त्या भोजयेद्द्विजपुङ्गव।
एतस्मात्र परं किञ्चिदिह लोके परत्र च॥
व्रतमस्य मुनिश्रेष्ठ यदनन्तफलप्रदं।
सौवर्णताम्ररौप्येषु यावन्तः परमाणवः॥
भवन्ति चूर्णमानेषु फलेषु मुनिसत्तम।
तावद्युगसहस्राणि रुद्रलोके महीयते॥

एतत्समस्तकलुषापहरं जनाना-
माजीवनाय मनुजेषु च सर्व्वदा स्यात्।
जन्मान्तरेषु न च पुत्रवियोगदुःख-
माप्नोति धाम च पुरन्दरदेवजुष्टं॥

इति मत्स्यपुराणोक्तं फलत्यागव्रतं।

———000———

श्रीकृष्ण उवाच।

हलाकस्य विधिं वक्ष्ये शृणु पार्थ समाहितः।
संवत्सरं वा षण्मासान् त्रीन्मासान् वा न भक्षयेत्॥

अथ भरण्यां मघायां वा एकरात्रोपवासं कृत्वा स्थण्डिले देवतामाहूय गन्धपुष्पनैवेद्यादिना च संपूज्य दर्भपाणिर्गन्धोदकेनावाहयेत्। यमराजमावाहयामि। कालमावाहयामि। चित्रगुप्तमावाहयामि। मृत्युमावाहयामि। परमेष्ठिनमावाहयामि इति। ततोऽग्निं समाधाय तिलाज्यं जुहुयात्। यमाय स्वाहा। नीलाय स्वाहा नीलकण्ठाय स्वाहा। यमराजाय स्वाहा। चित्र-

गुप्ताय स्वाहा। वैवस्वताय स्वाहा।

अग्निमूर्ध्न्याहुतीरष्टशतञ्जुहुयात्।

प्रायश्चित्तं दत्त्वा ब्राह्मणः स्वयमेव इतरेषामाचार्य्यः। अथ स्वशक्त्या सौवर्णं वृन्ताकं ब्राह्मणाय निवेदयेत्।

कृष्णां गान्तथा वृषञ्च तथैव कर्णवेष्टाङ्गुलीयकैः छत्रोपानहौ कृष्णवस्त्रयुगं कृष्णकम्बलं दद्यात्।

ब्राह्मणान् भोज्याशिषो वाचयेत्।

अनेन विधिना यस्तु वृन्ताकञ्च प्रयच्छति।
चीन्मासान्षण्मासं वा वर्षमेकं न भक्षयेत्॥

अथ वैनं विधिं कृत्वा जन्मावधि त्यागं करोति स तु विष्णु लोकं प्रयाति पौण्डरीकोऽश्वमेधफलमाप्नोति।

सप्तजन्मसहस्राणि नाकपृष्ठे महीयते।
सप्तलोकोत्तरं यावद्यमलोकं न पश्यति॥

वृन्ताकमप्रतिहतं वरहेमसिद्धं
दद्याद्द्विजाय घृतवस्त्रसमन्वितं यः।
कृत्वा तु वर्षमपि मासमथैकमेव
याम्यं न पश्यति पुरं पुरुषः कदाचित्॥

इति भविष्योत्तरोक्तो वृन्ताकत्यागविधिः।

———ooo———

चाऋं पयोव्रते स्थित्वा काञ्चनं कल्पपादपं।
पलादूर्द्धं यथाशक्त्या तन्दुलं सूप्यसंयुतं॥

सूर्पस्त्रीणद्वयं।

दत्त्वा ब्रह्मपदं याति कल्पवृक्षव्रतं स्मृतं॥

ब्रह्माऽत्र देवता ।

इति पद्मपुराणोक्तं कल्पवृक्षव्रतं ।

हैमं पलद्वयादूर्द्ध रथमश्वयुगादिकं ।
ददन् कृतोपवासः स्याद्दिवि कल्पगतं वसेत् ।
तदन्ते राजराजः स्यादश्वव्रतमिदं स्मृतं ॥

इन्द्रोऽत्र देवता ।

इति पद्मपुराणोक्तं अश्वव्रतं ।

तद्वद्धेमरथं दद्यात्करिभ्यां संयुतं पुनः ।
सत्यलोके वसेत्कल्पसहस्रमथ भूमिपः ।
भवेदुपोषितो भूत्वा करिव्रतमिदं स्मृतं ॥

उपोषितो भूत्वा दद्यादित्यन्वयः । तद्वत्कल्पद्वयादूर्द्ध्वं : ब्रह्मा-
ऽत्रय देवता ।

इति पद्मपुराणोक्तं करिव्रतं ।

घृताभिषेकं यः कुर्य्यादष्टाराात्रं शिवस्य तु ।
नियतं स्नानधाराभिः पृष्ठमासे समभ्यतः ॥
गीतनृत्योपहारेश्च शङ्खवादित्रनिःस्वनैः ।
कुर्य्याज्जागरणं तत्र प्रदीपाद्युपशोभया ॥
समस्तपापनिर्मुक्तः समस्तकुलसंयुतः ।

ज्वलद्भिः स महायानैरसंख्येयैर्नगोत्तमैः ॥
युक्तः शिवपुरे नित्यं मोदते शिववत्सुखी ।
ग्रहणे विषुवे चैव पुण्येषु दिवसेषु च ॥
घृताभिषेकं यः पश्येद्दासमासमुपोषितः ।
विधूय सर्व्वपापानि शिवलोकं स गच्छति ॥
एकः पूजयते भक्त्या अन्यो भक्त्या प्रशंसति ।
तुल्यमेव फलन्ताभ्यां भक्तिरेवाऽत्र कारणं ॥

इति शिवधर्म्मोक्तो घृतस्नपनविधिः ।

——ooo——

सूत उवाच ।

दुर्लभा खलु या मुक्तिरनायासेन देहिनां ।
जायते कर्म्मणा येन शृणुध्वं तद्द्विजोत्तमाः ॥
गोचर्म्ममात्रमालिख्य मण्डलं गोमयेन च ।
चतुरस्रं विधानेन चरणाभ्युक्ष्य मन्त्रवित् ॥
अलङ्कृत्य वितानाद्यैश्छत्रैश्चापि मनोरमैः ।
बहुद्देरर्द्धचन्द्रैश्च स्वर्णैरश्वत्थपत्रकैः ॥
सितैर्विकासितैः पद्मैः रक्तैर्नीलोत्पलैस्तथा ।
विमानेन विचित्रेण मुक्ता दाम्ना द्विजोत्तमाः ।
सितनृत्यात्मकैश्चैव सुशृङ्गैः पूर्णकुम्भकैः ॥
फलपल्लवमालाभिर्वैजयन्तीभिरंशुकैः ।
पश्चाशद्दीपमालाभिर्धूपैश्च विविधैस्तथा ॥
पञ्चाशद्दलसंयुक्तं लिखित्वा पद्ममुत्तमं ।
तत्तद्वर्णैस्तथा चूर्णैश्वेतचूर्णैरथापि वा ॥

एकहस्तप्रमाणेन कृत्वा पद्मं विधानतः ।
कर्णिकायां न्यसेद्देवन्द्याद्देवेश्वरम्भवं ॥
तत्र वर्णानकारादीन्न्यसेत् प्रागाद्यनुक्रमात् ।
प्रणवादिनमोन्तांश्च सर्व्ववर्णान् हि सुव्रत ॥
संपूज्यैव मुनिश्रेष्ठ गन्धपुष्पादिभिः क्रमात् ।
ब्राह्मणान् भोजयेत्तत्र पश्चाद्दक्षिणपूर्व्वकं ।
अक्षमालोपवीतञ्च कुण्डलानि कमण्डलुं ।
आसनञ्च तथा दण्डं उष्णीषं वस्त्रमेव च ॥
दत्त्वा तेषां द्विजेन्द्राणां देवदेवाय शम्भवे ।
महाचरुञ्च नैवेद्यं कृष्णं गोमिथुनं तथा ॥
अन्नैश्च देवदेवाय दत्त्वा तद्वर्णमण्डलं ।
योगोपयोगिद्रव्याणि शिवानि विनिवेदयेत् ॥
ओंकाराद्यं जपेद्धोमान् प्रतिवर्णमनुक्रमात् ॥
एवमालिख्य यो भक्त्या वर्णमण्डलमुत्तमं ।
यत् फलं लभते मर्त्त्यस्तद्वदामि समासतः ॥
साङ्गान् वेदान् यथान्यायमधीत्य विधिपूर्व्वकान् ।
इष्ट्वा यज्ञैर्यथान्याय ज्योतिष्टोमादिभिः क्रमात् ॥
ततो विश्वजितञ्चेष्ट्वा पुत्रानुत्पाद्य तादृशान् ।
वानप्रस्थाश्रमं गत्वा सदारः साग्निरेव च ॥
चान्द्रायणादिकान् कृत्वा संन्यस्य वै द्विजः क्रमात् ।
ब्रह्मविद्यामधीत्यैव ज्ञानमासाद्य यत्नतः ॥
ज्ञानेन ज्ञेयमालोक्य योगी यत्फलमाप्नुयात् ।
तत् फलं लभते सर्व्वं वर्णमण्डलदर्शनात् ॥

येन केनापि वा लिख्य प्रलिप्यायतनाश्रयं।
उत्तरे दक्षिणे वापि पृष्ठतो वा द्विजोत्तमाः॥
चतुःष्कोणेऽपि वा वर्णैरलङ्कृत्य समन्ततः।
विकीर्य्य गन्धकुसुमैर्धूपदीपैश्चतुर्विधैः।
प्रार्थयेद्देवमीशानं शिवलोकञ्च गच्छति॥
तत्र भुक्त्वा महाभोगान् कल्पकोटिशतं नरः।
स्वदेहगन्धैः स शुभैः पूरयेच्छिवमन्दिरं॥
क्रमाद्ब्रह्मत्वमासाद्य गन्धर्वैस्तत्र पूजितः।
क्रमादागत्य लोकेऽस्मिन् राजा भवति वीर्य्यवान्॥

इति सौरपुराणोक्तं वर्णमण्डलं।

शुक्लपक्षे नवं धान्यं पक्वं ज्ञात्वा सुशोभनं।
सुतिथौ च सुनक्षत्रे मुहूर्त्ते च शुभे सति॥
गच्छेत् क्षेत्रं विधाने च गीतवाद्यपुरःसरः॥
तत्र वह्निन्तु प्रज्वाल्य धान्यैः संस्तीर्य्य शास्त्रवत्।
कृत्वा होमं ततः पश्चाच्चयेद्धान्यं विभूषितं॥
पुष्पैर्वस्त्रैः फलैर्मूलैर्हस्त्यश्वरथसंयुतं।
तेन देवान् पितॄन् बन्धून् तर्प्पयित्वा यथाक्रमं॥
विभज्य च यथाशक्त्या दैवज्ञाः सत्यरचितः।
नववस्त्रावृतः स्रग्वी स्वनुलिप्तः स्वलङ्कृतः॥
स्थितः पूर्व्वमखस्सुष्टा ब्रह्मघोषपुरःसरः।
अश्वयन्वा परमं हृष्टो मङ्गलालम्भनादयुक्॥
प्राश्नीयाद्दधिसंयुक्तं नवमन्त्राभिमन्त्रितं।
कृताहारश्च कुरुते गीतवाद्यैर्महोत्सवं॥

इति ब्रह्मपुराणोक्तं सस्योत्सवः।

क्षीरोदसागरात् पूर्व्वं मथ्यमानात् पुरातनात्।
श्यामा देवी समुत्पन्ना सर्व्वलक्षणसंयुता॥
नारायणी याऽसावुक्ता सुकुमारा यशस्विनी।
सतीदेहसमुद्भूता सती परमशोभना॥
तां दृष्ट्वा चकितास्तत्र तत्र सर्वे सुरासुराः।
मनोज्ञा सुमुखी चैषा हन्त दद्यामहे वयं॥
एवमुक्ता वचस्ताश्च ददृशुः सर्व्व एव तत्।
चतुर्नामथ तस्यास्ते द्वाचेति भुवि विस्तरं॥
अतोऽर्थं सा सुपक्वा च पूजितव्या प्रयत्नतः।
पुष्पधूपानुलेपाद्यैस्तथा ब्राह्मणतर्प्पणैः॥
द्वौ बालकौ तथा वृद्धौ संपूज्य तदनन्तरं।
धर्म्मार्थकाममोक्षञ्च समुद्दिश्य कुटीरके।
स्त्रीसहायेन हृष्टेन भृत्यमित्रसुतैः सह॥
समुत्क्षिप्तेन विधिवत् स्रग्विणा च सुवाससा।
निवेदिता गुरुभ्यश्च स्वयं भोज्या न चान्यथा।
उत्सवश्चापि कर्त्तव्यो नृत्यगीतसमाकुलः॥

इति आदित्यपुराणोक्तः श्यामामहोत्सवः।

ब्रह्मोवाच।

ऋग्वेदमात्रेयगोत्रं सोमदैवं विदुर्बुधाः।
काश्यपं च यजुर्वेदं रुद्रदैवं विदुर्बुधाः॥
सामवेदोऽपि गोत्रेण भारद्वाजः पुरन्दरः।

अधिदैवं विजानीयाद्रूपाण्यस्याच्छृणुष्व तु ॥
ऋग्वेदः पद्मपत्रायताक्षः प्रलम्बिताम्बरः।
सुविभक्तग्रीवः कुञ्चितकेशश्मश्रुः प्रमाणेनापि वितस्तयःपञ्च।
स राजतो मौक्तिकजोऽथ पूज्यो
वरप्रदो भक्तियुतद्विजाय ॥
यजुर्व्वेदः पिङ्गलाक्षः कृशमध्यस्थूलगलकपोलः ताम्रवर्णः प्रादेशात् षड्दैर्घ्येण।
चित्रे लिङ्गेऽथवा पूज्य सर्व्वकामानवाप्नुयात्। सामवेदो नित्यस्रग्वी सुव्रतः शुचिः शुचिवासाः चर्म्मी दान्तश्च दण्डी काचनयनः आदित्यवर्णो वर्णेन षड्रत्निमात्रः। ताम्रेयमणाविन्द्राग्न्याख्येड्ना पूजितः शुभदो भवेत्। अथर्ववेदस्तीक्ष्णश्चण्डः कामरूपी विश्वात्मा विश्वकृत् क्रूर जह्नुज्वालावान् क्षुद्रकर्म्मा वंशस्तुतोत्थापी नीलोत्पलवर्णो वर्णेन स्वदारतुष्टः सौवर्णः पद्मरागे वा रुद्राक्षे वा पूजनीयः प्रपूज्य सर्व्वान् कामानवाप्नुयात्।
अथर्व्ववेदविहितानि।
यावन्ति वेदगीतानि पुण्ययज्ञव्रतानि च।
तावन्ति श्रवणादस्य प्राप्नुयाद्भक्तिभावितः ॥
अपुत्रो लभते पुत्रानधनो धनमाप्नुयात्।
विद्यामविद्वानाप्नोति दुःखी दुःखात् प्रमुच्यते ॥
पठित्वा सर्व्वदेवानां सम्मतो द्विजवल्लभः।
जायते नात्र सन्देहो देवी च वरदा सदा ॥
इति देवीपुराणोक्तं देवव्रतं।

सौरपुराणात्।

अथावत्सरणौ स्थित्वा शिवक्षेत्रे वसेन्नरः।
देहान्ते शिवसायुज्यं लभते नात्र संशयः॥

लिङ्गपुराणात्।

भित्त्वा पदद्वयं वापि शिवक्षेत्रे वसेत्तु यः।
स याति शिवताक्षेत्रे नात्र कार्य्या विचारणा॥

इति तीव्रव्रतं।

शङ्कर उवाच।

आदित्यग्रहणे राम ग्रहणे च निशाभृतां।
उपवासादवाप्नोति सर्व्वकल्मषनाशनं॥
स्नानं दानं तथा जाप्यमक्षय्यं तत्सदा स्मृतं।
श्राद्धञ्च भार्गवश्रेष्ठ वह्निसंपूजनं तथा॥

इति विष्णुधर्म्मोत्तरोक्तो ग्रहणोपवासः।

अथ महातपोव्रतानि।

मासे मासे च यः कुर्य्यात्त्रिरात्रक्षपणं बुधः।
कौवेरं लोकमासाद्य स विन्देत् परमं पदं॥
चतुर्थेऽहनि यो भुङ्क्ते व्रतवांश्च शुचिर्नरः।
गान्धर्व्वं स पदं प्राप्य मोदते शक्रवद्दिवि॥
पञ्चमेऽहनि यो भुङ्क्ते प्रतिमासमतन्द्रितः।

विमुक्तः सर्वपापैश्च स गच्छेद्दिवमूर्जितः॥
यो भुङ्क्ते दिवसे षष्ठे नित्यं नियमवान् शुचिः।
वारुणं लोकमासाद्य स विन्देत्परमं पदं॥
सप्तमेऽहनि यो भुङ्क्ते जितद्वन्द्वो दृढव्रतः।
आदित्यलोकमासाद्य सोऽपि विन्देन्महाश्रियं॥

जितद्वन्द्वः सहिष्णुः।

अष्टमेऽहनि यो भुङ्क्ते जितद्वन्द्वो दृढव्रतः।
वैष्णव लोकमासाद्य स भवेत्परमद्युतिः॥
नवमेऽहनि यो भुङ्क्ते नरो नियममाश्रितः।
स वसूनां प्रियो भूत्वा चरते वसुभिः सह॥
दशमेऽहनि यो भुङ्क्ते द्वादशाहफलं लभेत्।
अश्विभ्यां च समो भूत्वा अव्ययं खेलते तथा॥

द्वादशाहः क्रतुविशेषः।

एकादशे तु यो भुङ्क्ते दिवसे मानवः शुचिः।
एकादशाहं संप्राप्य स रुद्रगणतां व्रजेत्॥
यो द्वादशे तु दिवसे भुङ्क्ते देवि सदा नरः।
द्वादशाहन्तु सम्प्राप्य शक्रलोके महीयते॥
त्रयोदशे तु यो नित्यमश्नाति दिवसे नरः।
वसेत् स भार्गवस्थानं प्राप्य दिव्यसुखान्वितं॥
चतुर्दशेऽतु दिवसे नित्यमश्नाति यो नरः।
स वसेद्रुद्रलोके तु शिवसायुज्यतां व्रजेत्॥
अर्द्धमास त्रिषेद्यस्तु नित्यमेव जितेन्द्रियः।
देवराजेन तुल्योऽसौभूत्वा स्वर्गं च तिष्ठति॥

यस्तु मासं क्षिपेद्वीरो जितक्रोधो जितेन्द्रियः ।
विमानेन स दिव्येन अप्सरोभिः समन्वितः ॥
सर्व्वलोकेषु वसते जन्मान्यष्टायुतानि च ।
ततो ब्रह्मासनं प्राप्य ब्रह्मणा च सुपूजितः ।
ब्रह्मलोके निवसते यथा ब्रह्मनरोत्तमः ॥

महाभारते ।

मासि मासि त्रिरात्राणि कृत्वा वर्षाणि द्वादश
गणाधिपत्यं प्राप्नोति निःसपत्नमनाविलं ॥
यस्तु संवत्सरं पूर्णं एकाहारो भवेन्नरः ।
अतिरात्रस्य यज्ञस्य सम फलमुपाश्नुते ॥
दशवर्षसहस्राणि सगलोके महीयते ।
तत्क्षयादिह चागत्य माहात्म्यं प्रतिपद्यते ॥
यस्तु संवत्सरं पूर्णं चतुर्थं भक्तमश्नुते ।
अहिंसानिरतो नित्यं सत्यवाग्विजितेन्द्रियः ॥
वाजपेयस्य यज्ञस्य स फलं समुपाश्नुते ।
त्रिंशद्वर्षसहस्राणि वर्षाणां दिवि मोदते ।
अष्टमेन तु भक्तेन जीवेत्संवत्सरं नरः ।
गवां मेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥
हंससारसयुक्तेन विमानेन स गच्छति ।
पञ्चाशत्तु सहस्राणि वर्षाणि दिवि मोदते ॥
पक्षे पक्षे गते राजन् योऽश्नीयाद्वर्षमेव तु ।
षण्मासानशनं तस्य भगवानङ्गिराऽब्रवीत् ॥
षष्टिर्वर्षसहस्राणि दिवमावसते स च ॥

अश्नीयादुत्तरे पक्षे सर्व्वदिनेष्विति विशेषः।
वीणानां वल्लकीनाञ्च वेणूनाञ्च विशाम्पते।
सुघोषैर्म्मधुरैः शब्दैः सुप्तः प्रतिबुध्यते॥
संवत्सरमिहैकन्तु मासि मासि पिबेत् पयः।
फलं विश्वजितस्तात प्राप्नोति स नरोत्तमः॥
सिंहव्याघ्रप्रयुक्तेन विमानेन स गच्छति।
गतस्तांश्च सुरकन्या रमयन्ति च तत्परं।
सप्ततिञ्च सहस्राणि वर्षाणां दिवि मोदते।
मासादूर्द्धं नरव्याघ्र नोपवासो विधीयते॥
युधिष्ठिर उवाच।
यो दरिद्रैरपि विधिः शक्यः प्राप्तुं भवेत् प्रभो।
तुल्यो यज्ञफलैरेव तन्मे ब्रूहि पितामह॥
भीष्म उवाच।
यस्तु कल्यं तथा सायम्भुञ्जानो नान्तरा पिबेत्।
अहिंसानिरतो नित्यं जुह्वानो जातवेदसं॥
यज्ञं बहुसुवर्णं यो वासवप्रियमाहरेत्।
सत्यवाक् दानशीलश्च ब्रह्मशासनसूचकः॥
शान्तो दान्तो जितक्रोधो यत्फलं समवाप्नुयात्।
पाण्डुराभ्रप्रतीकाशे विमाने हंसलक्षणे॥
कल्यामिति प्रातः। पिबेदुदकमपीति शेषः।
षड्भिरेव च स वर्षैः सिध्यते नात्र संशयः।
देवस्त्रीणामपि वसेत् नृत्यगीतनिनादिते।
प्राजापत्यं वसेत् पद्मं वर्षाणामग्निसम्भवं॥

पद्मं कोटिशतं ।

त्रीणि वर्षाणि यः प्राश्नेत् सततन्त्वेकभोजनं ।
धर्म्मपत्नीरतोनित्यमग्निष्टोमफलं लभेत् ॥
द्वितीये दिवसे यस्तु प्राश्नीयादेकभोजनं ।
सदा द्वादशमासान्वै जुह्वानो जातवेदसं ॥
यज्ञं बहुसुवर्णं यो वासवप्रियमाचरेत् ।
सत्यवाग्दानशीलश्च ब्रह्मण्यश्चानसूयकः ॥
शान्तो दान्तो जितक्रोधः यत् फलं समराप्नुयात् ।
पाण्डुराभ्रप्रतीकाशे विमाने हंसलक्षणे ॥
द्वे समाप्ते ततः पद्मे सोऽप्सरोभिर्वसेत्सह ।

समाप्ते परिपूर्णे ।

तृतीये दिवसे यस्तु प्राश्नीयादेकभोजनं ।
सदा द्वादशमासान्वै जुह्वानो जातवेदसं ॥
अग्निकार्य्यपरो नित्यं नित्यकाल्यप्रबोधनं ।
अतिरात्रस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमं ॥
सप्तर्षीणां सदा लोके सोऽप्सरोभिर्व्वसेत्सह ।
निवर्त्तनञ्च तत्रास्य त्रीणि पद्मानि वै विदुः ॥

आस्येति स्थित्वा ।

दिवसेयश्चतुर्थे तु प्राश्नीयादेकभोजनं ।
स च द्वादशमासान्वै जुह्वानोजातवेदसं ॥
वाजपेयस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमं ।
सागरस्य च पर्य्यन्ते सर्व्वलोके च वेशयेत् ॥
देवराजस्य च क्रीड़ांनित्यकालमवेक्षते ।

सागरस्य च पर्य्यन्तं समुद्रसंख्याविशेषान्तं॥

दिवसे पञ्चमे यस्तु प्राश्नीयादेकभोजनं।

स च द्वादशमासान्वै जुह्वानो जातवेदसं॥

अलुब्धः सत्यवादी च ब्रह्मण्यश्चाविहिंसकः।

अनसूयुरपापस्थो द्वादशाहफलं लभेत्॥

जाम्बूनदमयं दिव्यं विमानं हंसलक्षणं।

सूर्य्यमालासमाभासमारोहेत्पाण्डुरं गृहं॥

आवर्त्तनानि चत्वारि। तुलापद्मानि द्वादश।

शराग्नि परिमाणञ्च तत्रासौ वसते चिरं॥

आवर्त्तनानि मन्वन्तराणि तुलापद्मानि शतप्रमानि।

शराग्निपरिमाणं। शराःपञ्च। अग्नयस्त्रयः॥ इदमपि परिमाणं मन्वन्तराणामेव।

दिवसे यस्तु षष्ठे तु मुनिः प्राश्नीत भोजनं।

सदा द्वादशमासान् वै जुह्वानो जातवेदसं॥

सदा त्रिषवणस्नायी ब्रह्मचार्य्यनसूयकः।

मुनिः संयतवाक्।

गवामेधस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमं।

तथैवाप्सरसामङ्के प्रसुप्तः प्रतिबुध्यते।

नूपुराणां निनादेन मेखलानाञ्च निस्वनैः।

कोटीसहस्रवर्षाणि युगकोटिशतानि च॥

पद्मान्यष्टादश तथा पताके द्वे तथैव च।

अयुतानि च पञ्चाशदृक्षचर्म्मशतस्य च।

लोम्ना प्रमाणेन समं ब्रह्मलोके महीयते॥

पताकाः संख्याविशेषः ।

दिवसे सप्तमे यस्तु प्राश्नीयादेकभोजनं ।
सदा द्वादशमासान्वै जुह्वानो जातवेदसं ॥
सरस्वतीं गोपयानो ब्रह्मचर्य्यं समाचरेत् ।
सुमनोवर्णकञ्चैव मधुमांसञ्च वर्जयेत् ॥
पुरुषो मरुतां लोकमिन्द्रलोकञ्च गच्छति ।
तत्र तत्र च सिद्धार्थो देवकन्याभिरर्च्यते ।
फलं बहुसुवर्णस्य यज्ञस्य लभते नरः ॥
संख्यामतिगुणा वापि तेषु लोकेषु मोदते ।

कुङ्कुमादि अतिगुणं । अतिक्रान्तगुणानामपरिमितामिति यावत् ।

यस्तु संवत्सरं पूर्णं भुङ्क्तेऽहन्यष्टमे नरः ।
देवकार्य्यपरो नित्यं जुह्वानो जातवेदसं ॥
पौण्डरीकस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमं ।
पद्मवर्णनिभञ्चैव विमानमधिरोहति ॥
कन्याः कनकगौराश्च नार्य्यः श्यामास्तथा पराः ।
वयोरूपसमायुक्ता लभते नात्र संशयः ॥
यस्तु संवत्सरं भुङ्क्ते नवमे नवमेऽहनि ।
सदा द्वादशमासान्वै जुह्वानो जातवेदसं ॥
अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ।
पुण्डरीकप्रकाशं वै विमानं लभते नरः ।
दीप्तसूर्य्याग्नितेजोभिर्दिव्यमालाभिरेव च ।

नीयते रुद्रकन्याभिः सोऽन्तरिक्षं सनातनं ॥
अष्टादशसहस्राणि वर्षाणां कल्पमेव च।
कोटीशतसहस्रञ्च तेषु लोकेषु मोदते ॥
यस्तु संवत्सरं भुङ्क्ते दशाहे वै गते गते।
सदा द्वादशमासान्वै जुह्वानो जातवेदसं ॥
गते प्राप्ते तथा ब्रह्मकन्या चामरविजिता।
कुरुते तत्र सा क्रीड़ा सर्व्वभूतमनोहरे ॥
अश्वमेधसहस्रस्य फलं प्राप्नोत्यनुत्तमं।
रूपवत्यश्च तं कन्या रमयन्ति सदा नरं ॥
एकादशे तु दिवसे यः प्राप्ते प्राशते हविः।
सदा द्वादशमासांश्च जुह्वानो जातवेदसं ॥
परस्त्रियं नाभिलषेद्वाचाथ मनसापि वा ॥
अनृतञ्च न भाषेत मातापित्रोः कृतेऽपि च।
अभिगच्छेन्महादेवं विमानस्थं महाबलं।
रुद्राणां तमधीवासं दिवि दिव्यं मनोरमं।
वर्षाणां परिमेयानि युगान्ताग्निसमप्रभः ॥
कोटीशतसहस्रञ्च कोटिदशशतानि च।
रुद्रं नित्यं प्रणमते देवदानवसंमतः ॥
स तस्मै दर्शनं प्राप्तो दिवसे दिवसे भवेत्।
दिवसे द्वादशे यस्तु प्राप्ते वै प्राशते हविः।
सदा द्वादशमासान्वै जुह्वानो जातवेदसं।
आदित्यद्वादशाभासं विमानं सोऽधिरोहति ॥
अष्टमहर्षिसंयुक्तं ब्रह्मलोके प्रतिष्ठितं।

नित्यमावसथं राजन् नरनारीसमाकुलं ।
त्रयोदशे तु दिवसे यः प्राप्ते भुङ्क्ते हविः ॥
सदा द्वादशमासान् वै देवसत्रफलं लभेत् ।
रत्नपद्मोदयं नाम विमानं साधयेन्नरः ।
तत्र शङ्कुपताके द्वे युगान्तं कल्पमेव च ॥
अयुतायुतं तथापद्मं समुद्रश्च तथा वसेत् ॥

शङ्कुपताकाप्रभृतयः पताकाविशेषः ।

गीतगन्धर्व्वघोषैश्च भेरीपणवनिःस्वनैः ।
सदाप्रमुदितस्ताभि र्देवकन्याभिरीड्यते ॥
चतुर्द्दशे तु दिवसे यः सदाप्राशयेद्धविः ।
सदा द्वादशमासान्वै मखाश्मेधफलं लभेत् ॥
अनिर्द्देश्यवयोरूपा देवकन्याः स्वलङ्कृताः ।
मृष्टतप्ताङ्गदधरा विमानैरुपयान्ति तं ॥
कलहंसविनिर्घोषैर्नूपुराणाञ्च निस्वनैः ।
काञ्चीनाञ्च समुत्कर्षैस्तत्र तत्र विबोध्यते ॥
देवकन्यानिवासे च तस्मिन् वसति मानवः ।
जाह्नवीवालुकाकीर्णं पूर्णसंवत्सरं नरः ॥
यस्तु पक्षे गते भुङ्क्ते एकभक्तं जितेन्द्रियः ।
सदा द्वादशमासांस्तु जुह्वानो जातवेदसं ॥
राजसूयसहस्रस्य फलं प्राप्नोत्यनुत्तमं ।
यानमारोहति दिव्यं हंसबर्हिणसेवितं ॥
मणिमण्डलकैश्चित्रं जातरूपसमावृतं ।
दिव्याभरणशोभाभिर्व्वरस्त्रीभिरलङ्कृतं ॥

एकस्तम्भञ्चतुर्द्वारं सप्तभौमं सुमङ्गलं।
वैजयन्तीसहस्रैश्च शोभितं गीतनिस्वनैः॥
दिव्यं दिव्यगुणोपेतं विमानमधिरोहति।
मणिमुक्ताप्रवालैश्च भूषितं वैद्युतप्रभं॥
वसेत् युगसहस्रञ्च खड्गकुञ्जरवाहनः।
षोड़शे दिवसे प्राप्ते यः कुर्य्यादेकभोजनं।
सदा द्वादशमासान् वै सोमयज्ञफलं लभेत्॥
सोमकन्यानिवासेषु सोऽप्यावसति नित्यशः।
सौम्यगन्धानुलिप्तश्च कामचारगतिर्भवेत्॥
सुदर्शनाभिर्नारीभि र्मधुराभिस्तथैव च।
असेव्यते वै विमानस्थः कामभोगैश्च सेव्यते॥
फलं पद्मशतप्रख्यं महाकल्पं दशाधिकं।
आवर्त्तनानि चत्वारि साधयेच्चाप्यसौ नरः॥
दिवसे सप्तदशमे यः प्राप्ते प्राशते हविः।
सदा द्वादशमासान् वै जुह्वानो जातवेदसं।
स्थानं वारुणमैन्द्रञ्च रुद्रञ्चाप्यधिगच्छति।
मारुतोशनसञ्चैव ब्रह्मलोकं स गच्छति॥
तत्र दैवतकन्याभिरासने नोपचर्य्यते।
भूर्भुवश्चापि देवर्षिं विश्वरूपमवेक्षते॥
तत्र देवाधिदेवस्य कुमार्य्यो रमयन्ति तं।
द्वात्रिंशद्रूपधारिण्यो मधुराः समलङ्कृताः॥
चन्द्रादित्यावुभौ यावत् गगणे चरतः प्रभो।
तावच्चरत्यसौ वीरः सुधामृतरसाशनः॥

अष्टादशे यो दिवसे प्राश्नीयादेकभोजन।
सदा द्वादशमासान् वै सप्तलोकान् स पश्यति॥
रथैः सनन्दिघोषैश्च पृष्ठतः सोऽनुगम्यते।
देवकन्याभिरूढैस्तु भ्राजमानैः स्वलङ्कृतैः॥
व्याघ्रसिंहप्रयुक्तञ्च मेघस्वननिनादितं।
विमानमुत्तमं दिव्यं सुमुखो ह्यधिरोहति॥
तत्र कल्पसहस्रं स कन्याभिः सह मोदते।
सुधारसञ्च भुञ्जीत अमृतोपममुत्तमं॥
एकोनविंशतिदिने यो भुङ्क्ते एकभोजनं।
सदा द्वादशमासान् वै सप्तलोकान् स पश्यति॥
उत्तमं लभते स्थानमप्सरोगणसेवितं।
गन्धर्वैरुपगीतञ्च विमानं सूर्यवर्चसं॥
तत्रामरवरस्त्रीभिर्मोदते विगतज्वरः।
दिव्याम्बरधरः श्रीमानयुतानां शतं शतं॥
पूर्णेऽथ विंशे दिवसे यो भुङ्क्ते त्वेकभोजनं।
सदा द्वादशमासांस्तु सत्यवादी धृतव्रतः॥
अमांसाशी ब्रह्मचारी सर्व्वभूतहिते रतः।
स लोकान् विपुलान् रम्यानादित्यानामुपाश्नुते॥
गन्धर्व्वैरप्सरोभिश्च दिव्यमाल्यानुलेपनैः।
विमानैः काञ्चनैर्दिव्यैः पृष्ठतश्चानुगम्यते॥
एकविंशे तु दिवसे यो भुङ्क्ते ह्येकभोजनं।
सदा द्वादशमासान् वै जुह्वानो जातवेदसं॥
लोकमौशनसं दिव्यं शक्रलोकञ्च गच्छति

अश्विनोर्मरुतांश्चैव सुखेष्वभिरतः सदा।
अनभिज्ञश्च दुःखानां विमानवरमास्थितः ॥
सेव्यमानो वरस्त्रीभिः क्रीडत्यमरवत् प्रभुः।
द्वाविंशे दिवसे प्राप्ते यो भुङ्क्ते ह्येकभोजनं।
सदा द्वादशमासान् वै जुह्वानो जातवेदसं॥
अहिंसानिरतो धीमान् सत्यवागनसूयकः।
लोकान् वसूनामाप्नोति दिवाकरसमप्रभः॥
कामचारी सुधाहारी विमानवरमास्थितः।
रमते देवकन्याभिर्दिव्याभरणभूषितः॥
त्रयोविंशे तु दिवसे यः प्राशेदेकभोजनं।
सदा द्वादशमासांस्तु मिताहारो जितेन्द्रियः॥
वायोरुशनसश्चैव रुद्रलोकञ्च गच्छति।
कामचारी कामगमः पूज्यमानोऽप्सरोगणैः॥
अनेकगुणपर्य्यन्तं विमानवरमास्थितः।
रमते देवकन्याभिर्दिव्याभरण भूषितः॥
चतुर्विंशे तु दिवसे यः प्राशेदेकभोजनं।
सदा द्वादशमासान् वै जुह्वानो जातवेदसं॥
आदित्यानामधीवासे मोदमानो वसेच्चिरं।
रमते देवकन्यानां सहस्रैरयुतैस्तथा।
पञ्चविंशे तु दिवसे यः प्राशेदेकभोजनं॥
सदा द्वादशमासांन्वै पुष्कलं यानमारुहन्।
रथैः सनन्दघोषैस्तु पृष्ठतोऽप्यनुगम्यते॥
देवकन्यासमारूढै राजतैर्विमलैः शुभैः।

तत्र कल्पसहस्रं वै रमते स्त्रीगतागतः ॥
भोज्यं रसञ्च लभते सदा ते अमृतोपमं ।
षड्विंशे दिवसे यस्तु प्राश्नीयादेकभोजनं ॥
सदा द्वादशमासान्वै नियतो नियताशनः ।
जितेन्द्रियो वीतरागो जुह्वानो जातवेदसं ॥
सम्प्राप्नोति महाभाग पूज्यमानोऽप्सरोगणैः ।
सप्तानां मरुतां लोकान्वसूनाञ्च समश्नुते ॥
गन्धर्व्वैरप्सरोभिश्च पूज्यमानः समश्नुते ।
द्वे युगानां सहस्रे तु दिवि दिव्येन तेजसा ॥
सप्तविंशे तु दिवसे यः प्राशेदेकभोजनं ।
सदा द्वादशमासान्वै जुह्वानो जातवेदसं ॥
फलमाप्नोति विपुलं देवलोके च मोदते ।
अमृताशी वसंस्तत्र स वै तृप्तः प्रपूज्यते ॥
स्त्रीभिर्म्मनोभिरामाभीरममाणो मदोत्कटः ।
युगकल्पसहस्राणि त्रीण्यावसति वै सुखं ॥
योऽष्टाविंशे तु दिवसे प्राश्नीयादेकभोजनं ।
सदा द्वादशमासान्वै जितात्मा च जितेन्द्रियः ॥
फलं देवर्षिचरितं विपुलं समुपाश्नुते ।
भोगवांस्तेजसायुक्तः स्वर्गे रविरिवामलः ॥
सुकुमार्य्यश्च तं नार्य्यो रममाणाः सुवर्च्चसः ।
रमयन्ति मनःकान्ते विमाने सूर्य्यवर्च्चसे ॥
सर्व्वकामयुते दिव्ये कल्पायुतशतं समाः ।
एकोनत्रिंशे दिवसे यः प्राशेदेकभोजनं ॥

सदा द्वादशमासान्वै सत्यव्रतपरायणः।
तस्य लोकाः शुभा दिव्या दिव्यगन्धगुणान्विताः॥
तत्र चैनं शुभानार्य्यो दिव्याभरणभूषिताः।
मनोभिरामा मधुरा रमयन्ति मदोत्कटाः॥
भोगवांस्तेजसा युक्तो वैश्वानरसमप्रभः।
दिव्यो दिव्येन वपुषा भ्राजमान इवामरः॥
वसूनां मरुताञ्चैव साध्यानामश्विनोस्तथा।
रुद्राणाञ्च तथा लोकान् ब्रह्मलोकञ्च गच्छति॥
यस्तु मासे गते भुङ्क्ते एकभक्तं समाहितः।
सदा द्वादश वै मासान् ब्रह्मलोके गतिर्भवेत्॥
सुधारसकृताहारः श्रीमान् सर्व्वमनोहरः।
तेजसा वपुषा युक्तोभ्राजते रश्मिमानिव॥
स्वयं प्रभाभिर्नारीभिर्विमानस्थो महीयते॥
रुद्रदेवर्षिकन्याभिः सततञ्चाभिपूज्यते।
यावद्वर्षसहस्रन्तु जम्बूद्वीपेऽभिवर्षति॥
तावत्संवत्सराः प्रोक्ता ब्रह्मलोकस्य धीमतः।
विप्रुषश्चैव यावन्त्यो निपतन्ति नभस्तलात्॥
वर्षा सु वर्षतस्तावन्निवसत्यमरप्रभः।

यावदित्यादि। जम्बूद्वीपेषु च वर्षासु वर्षसहस्रं धीमतो देवस्य वृष्टिकुर्व्वतो यावन्तो विप्रुषोजलकणा नभस्तलान्निपतन्ति तावन्तः संवत्सरान् ब्रह्मलोके वसतीत्यर्थः।

मासोपवासी वर्षन्तु दशभिः स्वर्ग्यमुत्तमं।
मन्वन्तरमथासाद्य सशरीरगतिर्भवेत्॥

मुनिर्दान्तो जितक्रोधोजितशिश्नोदरस्तथा।
जुह्वदग्नौ नियमतः सन्ध्योपासनसेविता।
बहुभिर्नियमैरेवं मासमश्नाति योनरः।
अभ्रावकाशशीलस्य तस्य वासोनिरुप्यते॥
दिवङ्गत्वा शरीरेण स्वेन राजन् यथाऽमरः
स्वर्गे पुण्यं यथाकामं नृप भुङ्क्ते यथाविधि॥
उपवासानिमान् कृत्वा गच्छेच्च परमां गतिं।
तथा वैश्याश्च शूद्राश्च उपवासं प्रकुर्व्वते॥
त्रिरात्रं द्विस्त्रिरात्रञ्च तयोः पुष्टिर्न विद्यते।
चतुर्थभक्तक्षपणं वैश्यशूद्रेऽभिधीयते॥
त्रिरात्रन्तु न धर्म्मज्ञैर्विहितं ब्रह्मवादिभिः।

इति महातपोव्रतानि।

राम उवाच।

कृच्छ्राणां श्रोतुमिच्छामि नामानि च विधिं तथा।
एतन्मे ब्रूहि धर्म्मज्ञत्वं हि वेत्सि यथा तथं॥

पुष्कर उवाच।

कृच्छ्राण्येतानि कार्य्याणि राम वर्णत्रयेण च।
कृच्छ्रेष्वेतेषु शूद्रस्य नाधिकारो विधीयते॥
आदौ तु मण्डलं कार्य्यं सर्व्वकृच्छ्रेषु भार्गव।
नित्यं त्रिषवणस्नान केशवस्य च पूजनं॥
होमः पवित्रमन्त्रैश्च तथातप्यत एव च।

स्त्रीशूद्रपतितानाञ्च तथालापं विवर्जयेत्।
एतत् कृच्छ्रेषु सर्व्वेषु कर्त्तव्यमविशेषतः।
वीरासनञ्च कर्त्तव्यं कामतोऽथ यथाविधि॥
वीरासनेन हीनञ्च विधिहीनं प्रकीर्त्तितं।

राम उवाच।

वीरासनमहं तत्त्वं श्रोतुमिच्छामि सुव्रत।
वीरासनेन सहितं कृच्छ्रं बहुगुणं यथा।

पुष्कर उवाच।

उत्थितस्तु दिवा तिष्ठेदुपतिष्ठेत्तथा निशि।
एतद्वीरासनं प्रोक्तं महापातकनाशनं॥
आमिक्षया तु द्वौ मासौ पक्षेण पयसा तथा।
अष्टरात्रं तथा दध्ना त्रिरात्रमपि सर्पिषा॥
निराहारस्त्रिरात्रन्तु कुर्य्यादुद्दालकव्रतं।
सर्व्वपापप्रशमनं सर्व्वकामप्रदन्तथा॥
स्नापयेदात्मनोर्थाय पावकं भृगुनन्दन।
वह्नौ ततोनुजुहुयाद्यातेन च कस्यचित्॥
अग्नदेवेति मन्त्रेण स्नाप्यमानो विचक्षणः।
दर्भांस्तु खलु गृह्णीयाद्धार्य्यमिति च स्मृतिः॥
शिरश्च स्नाप्यमानश्च भाण्डे न्यस्तं तथा पुनः।
अनेन राम मन्त्रेण नरस्त्विरभिमन्त्रयेत्॥
यवोसि धान्यराजोसि वारुणं मधुसंयुतं।
विच्छेदे सर्व्वपापानां पवित्रमृषिभिस्तु तं।
घृतं यवा मधु यवा आपोहि अमृतं यवाः।

सर्व्वं पुनीत मे पापं यन्मया दुःष्कृतं कृतं ।
वाचाकृतं कर्म्मकृतं दुःस्वप्नं दुर्विचिन्तितं ॥
अलक्ष्मीं नाशयत्येव सर्व्वं पुनीत मे यवाः ।
श्वशूकरावलीढञ्च उच्छिष्टोपहतञ्च यत् ।
मातुर्गुरोश्च शुश्रूषा सर्व्वं पुनीत मे यवाः ।
गणान्नं गणिकान्नञ्च शूद्रान्नं श्राद्धसूतकं ॥
चौरस्यान्नं नवश्राद्धं सर्व्वं पुनीत मे यवाः ।
बालहत्त्वमधर्म्मं च राजद्वारगतञ्च यत् ॥
सुवर्णस्तैन्यजं व्रात्यमयाज्यस्य च याजनं ।
ब्राह्मणानां परीवादं सर्व्वं पुनीत मे यवाः ॥
भाण्डे न्यस्तस्य मन्त्रोयन्ततस्तु परिकीर्त्तयेत् ।

ये देवा मदग्नौ जाताः मनोयुताः तेस्तुदक्षा दक्षपितारस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तुभ्यः ।

अनेनात्मनि धर्म्मज्ञ जुहुयादात्मनः सदा ।
न कुर्य्यादतिसौहित्यं ब्रह्म एतद्धि यावकं ॥
ये चार्थिनस्त्रिरात्रन्तु षड्रात्रमपि यापितः ।
उपपातकिना प्रोक्तं सप्तरात्रमरिन्दम ।
महापातकयुक्तस्तु षड्रात्रं द्विगुणं स्मृतं ॥
एकविंशतिरात्रेण कामानाप्नोति वाञ्छितं ॥
मासेन सर्व्वपापेभ्यो मोक्षमाप्नोत्यसंशयं ।
गवां निहारनिर्मुक्तैर्यवैः कृत्वात दैव तु ॥
फलं प्राप्नोति धर्म्मज्ञ तथा दशगुणं ध्रुवं ।
मासेन मोक्षान् त्रिदशान् वेदान् विद्यांश्च पश्यति ॥

वरशापसमर्थश्च तथा भवति भार्गव।
एकैकवृद्ध्या ग्रासयान् पिण्डांस्त्रिंशत्संमितान्॥
एकैकं ह्रासयेत् कृष्णे प्रतिपत्प्रभृतिक्रमात्।
हविष्यस्य महाभाग नाश्नीयाच्चन्द्रसंक्षये॥
एतच्चान्द्रायणं प्रोक्तं यवमध्यं महामुनिः।
एतदेव विपर्य्यस्तं वाजिमध्यं प्रकीर्त्तितं॥
अष्टभिः प्रत्यहं ग्रासैर्य्यं यैश्चान्द्रायणश्चरेत्।
तथा कथञ्चित्पिण्डानाश्चत्वारिंशच्छतद्वयं॥
मासेन भक्षयेदेतत्सुरचान्द्रायणं भवेत्।
गोक्षीरं सप्तरात्रस्तु द्वे सुरे च चष्टयं॥
सुराश्चयात् सप्तरात्रं सप्तरात्रात्सुराद्वयं।
सुरा एषेण पञ्चात्रं त्रिरात्रं वायु ना भवेत्॥
एतत् सोमायनं नाम व्रतं कल्मषनाशनं।
त्र्यहं पिबेदपस्तूष्णाः त्र्यहमुष्णं पयः पिबेत्॥
त्र्यह मुष्णं घृतं पीत्वा वायुभक्षो भवेत् त्र्यहं।
तप्तकृच्छ्रमिदं प्रोक्तं शीतैः शीतं प्रकीर्त्तितं॥
कृच्छ्रातिकृच्छ्रं पयसा दिवसानेकविंशतिः।
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं॥
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतं।
एतच्च प्रत्यहाभ्यस्तं महासान्तपनं स्मृतं॥
त्र्यहाभ्यस्तमथैकैकं महासान्तपनं स्मृतं।
कृत्स्नं पराकसंज्ञं स्यात् द्वादशाहमभोजनं॥
एकभक्तेन नक्तेन तथैवायाचितेन च।

उपवासेन चैकेन कृच्छ्रपादः प्रकीर्त्तितः ॥
एतदेव त्रिरभ्यस्तं शिशुकृच्छ्रं प्रकीर्त्तितं ।
त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं ॥
त्र्यहं परञ्च नाश्नीयात् प्राजापत्यञ्चरेद्द्विजः ।
पिण्याकचनतक्राम्बुसक्तूनां प्रतिवासरं ॥
एकैकमुपवासश्च सौम्यं कृच्छ्रं प्रकीर्त्तितं ।
अम्बुसिद्धैस्तथा मासं केवलं वारुणं समैः ॥
फलैर्मासेन कथितं फलकृच्छ्रं मनीषिभिः ।
श्रीकृच्छ्रं श्रीफलैः प्रोक्तं पद्माक्षैरपरं तथा ।
मासमामलकैरेव श्रीकृच्छ्रमपरं स्मृतं ॥
पत्रैर्युतं पत्रकृच्छ्रं पुष्पैस्तत्कृच्छ्रमुच्यते ।
मूलकृच्छ्रं तथा मूलैस्तोयकृच्छ्रं जलेन तु ॥
दध्ना क्षीरेण तक्रेण पिण्याकचनकैस्तथा ।
शाकं मासन्तु कार्य्याणि स्वनामानि विचक्षणैः ॥
सायं प्रातश्च भुञ्जानो नरो येनान्तरा पिबेत् ।
षड्भिर्वर्षैरिदं प्रोक्तं कृच्छ्रं नित्योपवासिना ॥
एकभक्तेन मासेन कथितश्चैकभक्तकं ।
नक्तेन भोजयेद्यस्तु नक्तकृच्छ्रश्च वत्सरात् ॥
नक्तोषितस्तु धर्म्मज्ञ एकभक्तश्च वा पुनः ।
त्र्यहं सोपवसेद्यस्तु स्नायीत सवनत्रयं ॥
निमज्ज्य च तथैवाप्सु त्रिःपठेदघमर्षणं ।
देवताभावहृत्तन्तु छन्दश्चैवाप्यनुष्टुभं ॥
संस्मरेत्तत्र च तथा ऋषिञ्चैवाघमर्षणं

चतुर्थेऽहनि दातव्या ब्राह्मणाय पयस्विनी ॥
ताहं जपेद्यथाशक्ति शुचिश्चैवाघमर्षणं।
भावहत्तः स्मृतो देवस्तथा च पुरुषः परः ॥
तद्दैवत्यं विजानीयात् सूक्तन्तदघमर्षणं।
यथाश्वमेधे क्रतुराट् सर्व्वपापापनोदनः ॥
तथाघमर्षणं प्रोक्तं सर्व्वकल्मषनाशनं।
कृष्णाजिनं वा कुतपं परीधायाथ वल्कलं ॥
संवत्सरं व्रतं कुर्य्यात् सचित्रं रामभार्गव।
गृहं न प्रविशेत्तत्र भवेदाकाशशायकः ॥
अशक्तो वा भवेद्राम महाशैलगुहाशयः।
नित्यन्त्रिषवणस्नायी तथास्य द्विजसम्भव ॥
भैक्षशाकफलाहारः कामं स्याद् द्विजसत्तम।
वीरासनं तथा कुर्य्यात् काष्ठमौनं तथैव च ॥
सर्व्वकामप्रदं ह्येतत् सर्व्वकल्मषनाशनं।
वायव्यं कृच्छ्रमुक्तन्तु पाणिपूरान्नभोजनं ॥
मासेनैकेन धर्म्मज्ञ सर्व्वकल्मषनाशनं।
तिलैर्द्वादशरात्रेण कृच्छ्रमाग्नेयमुच्यते ॥
राजप्रसृतिमण्येकं कनकेन समन्वितं।
भुञ्जानस्य तथा मासं कृच्छ्रं धनददैवतं ॥
सर्व्वान् हरीतकीयुक्तैर्य्यवैः सक्तून् समश्नतः।
याम्यकृच्छ्रं विनिर्द्दिष्टं मासेन भृगुनन्दन ॥
गोमूत्रेण चरेत् स्नानं वृत्तिं गोमयमाचरेत्।
गवां मध्ये सदा तिष्ठेद्गोपुरीषे च संविशेत् ॥

गोष्वपीतासु न पिबेदुदकं भृगुनन्दन।
अभुक्तवत्सु नाश्नीयादुत्थितासूत्थितो भवेत्॥
तथा चैवोपविष्टासु सर्व्वासूपविशेन्नरः।
मासेनैकेन कथितं गोव्रतं कल्मषापहं॥
अनाशकच्छ्रं तदेवैतदजामध्ये तु वर्त्तिनः।
त्रिरात्रिनस्तुषादात्मा(१) सन्तुष्टे न फलैरभे॥
द्वादशाहेन कथिते सर्व्वपातकनाशने।
उपोषितश्चतुर्द्दश्यां पञ्चदश्यामनन्तरं॥
पञ्चगव्यं समश्नीयाद्धविष्याशी त्वनन्तरं।
ब्रह्मकूर्च्चमिदं कुर्य्यादुक्तप्रशमनाय वै॥
पक्षान्ते त्वथवा कार्य्यं मासमध्येऽथवा पुनः।
ब्रह्मकूर्च्चं नरः कुर्य्यात् पौर्णमासीषु यः सदा।
तस्य पापं क्षयं याति दुर्भुक्तादि न संशयः॥
मासेन द्विजवरः कृत्वा ब्रह्मकूर्च्चं समाहितः।
सर्व्वपापविनिर्म्मुक्तो यथेष्टाङ्गतिमाप्नुयात्॥
ब्रह्मभूतममावास्यां पौर्णमास्यां तथैव च।
योगभूतं परिचरन् केशवं महमाप्नुयात्॥
एवमेतानि कृच्छ्राणि कथितानि मया तव।
शमितानीह पापानि दुरितानि च भार्गव॥
संवत्सरस्यैकमपि चरेत् कृच्छ्रं द्विजोत्तमः।
अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः॥
अज्ञातं यदि वा ज्ञातं कृच्छ्रपापं विशोधयेत्।

---

(१) पाठोऽयमादर्शदोषेण सम्यग्बोधो भवितुं नार्हति।

कृच्छ्रसंशुद्धपापानां नरकं न विधीयते ॥
श्रीकामः पुष्टिकामश्च स्वर्गकामस्तथैव च।
देवताराधनपरस्तथा कृच्छ्रं समाचरेत् ॥
रसायनानि मन्त्राश्च तथा चैवौषधाश्च ये।
तस्य सर्व्वेऽपि सिध्यन्ति यो नरः कृच्छ्रकृद्भवेत् ॥
वैदिकानि च कर्म्माणि यानि काम्यानि कानिचित्।
सिध्यन्ति सर्व्वाणि तदा कृच्छ्रकर्त्तुर्भृगूत्तम ॥
तेजसस्तस्य संयोगो महतश्चैव जायते।
वाञ्छितान्मानसान् कामान् स प्राप्नोति न संशयः॥
ख्यातो भवति देवेषु तथा ऋषिगणेष्वपि।
विपाप्मा वितमस्कश्च संशुद्धश्च विशेषतः॥

आराधनार्थं पुरुषोत्तमस्य
कृच्छ्राणि कृत्वा मधुसूदनस्य।
पापैर्विमुक्तः परिशुद्धचित्तः
कामानवाप्नोति यथेप्सितांश्च ॥

आयातु भगवान् ब्रह्मा समुनिर्हंसवाहनः।
तपोयज्ञव्रतानान्तु भर्त्ता देवश्चतुर्मुखः ॥
आह्वय पद्मयोनिन्तु मन्त्रेणानेन मन्त्रवित्।
देवस्य चेतिमन्त्रेण भक्तितस्तं समर्चयेत् ॥
अर्घैर्धूपैः पवित्रैश्च माल्यया कुसुमैः फलैः।
मूलैर्वल्युपहारैश्च नैवेद्यैर्विविधैरपि।
दीपदानैर्यथाशक्त्या जपेन स्तुतिमङ्गलैः।
तदग्रे पञ्चगव्यन्तु कुर्व्वीत सुसमाहितः ॥
गोमूत्रन्ताम्रवर्णायास्त्वष्टमाषकसंख्यया।

पुण्यं वरुणदैवत्यं गायत्र्या चाभिमन्त्रणं॥
गोमूत्रं श्वेतवर्णाया श्चतुर्माषकमात्रकं।
गृह्णीयादग्निदैवस्य गन्धद्वारेति वै मनैः॥
पयः काञ्चनवर्णाया सोमदैवत्यमेव च।
आप्यायस्वेति मन्त्रेण माषकद्वादशात्मकं॥
गृह्णन्ति वायुदैवत्यं कृष्णवर्णोद्भवं दधि।
दशमाषकमात्रन्तु दधिक्राव्ण इति स्मरन्॥
घृतन्तु नीलवर्णायाः पञ्चमाषकसंख्यया।
गृह्णन्ति सूर्यदैवत्यं तेजोसीति जपन् क्रमात्॥
शतत्रयं माषकानां चत्वारिंशच्च पञ्च च।
कुशोदकस्य गृह्णीत देवस्यत्वेति कीर्त्तयेत्॥
ताम्रपात्रे पलाशे वा पात्रे मिश्रीकृतञ्च यत्।
आपोहिष्ठेति चालोड्य प्रणवेन पिबन्ति च॥
उदङ्मुखस्त्विराचम्य ततो गच्छेत् स तद्गृहं।
तत्राग्निहोमं प्रागूढं कृत्वा दद्याच्च दक्षिणां॥
ब्राह्मणेभ्यो यथाशक्त्या भोजनञ्च मनोहरं।
गवां वर्णास्तु शुक्लाद्याः सन्ति शेषेषु यत्र च।
तत्र वर्णविभागेन पञ्चगव्यानि चाहरेत्॥
वर्णालाभाच्च दोषोऽस्ति मात्राहीनं विवर्जयेत्।
त्याज्यानि दूषितानाञ्च न विम्रत्रपशांसि च॥
प्रसूतानाञ्च शुक्लेन प्रसूतानाञ्च शोणितं।
चैलकेशाश्च भक्ष्याणामभक्तैः संपृतास्तथा॥
रोगार्त्तानाञ्च पूर्णायैर्मृतापत्यानाममङ्गलैः।

निष्फलत्वेन वृक्षाणां कृशानां क्रिमिभिस्तथा ॥
अनतिप्रीतिदत्तानि साधनाप्रभवाणि च।
शुभभाण्डे मनोज्ञे तु भूमावपतितानि तु ॥
गृहीतव्यानि विधिना खेदत्तासां न कारयेत्।
ब्रह्मकूर्चव्रतमिदं सर्व्वपापप्रणाशनं ॥
सर्व्वकामप्रदं पुंसां रूपारोग्ययशस्करं।
महतामपि पापानां नाशनं श्रीविवर्द्धनं ॥

इति ब्रह्मपुराणोक्तं ब्रह्मकूर्च्चव्रतं।

———000———

विष्णुधर्म्मोत्तरात्।

ऋषय ऊचुः॥

कर्म्मणा केन पुरुषः किमाप्नोति महामते।
एतन्मे संशयं छिन्धि द्विजानां द्विजसत्तम ॥

हंस उवाच।

दानेन भोगी भवति तपसा विन्दते महत्।
वृद्धोपसेवया विप्र प्राज्ञो भवति मानवः ॥
यज्ञेन लोकानाप्नोति सत्येन च पराङ्गतिं।
स्नानेन शुद्धिमाप्नोति प्राणायामाद्विशेषतः ॥
ध्यानेन धारणाभिस्तु पदमाप्नोत्यनुत्तमं।
दमने सर्व्वमाप्नोति यत्किञ्चिन्मनसि स्थितं ॥
शौचेन देवाः प्रीयन्ते प्रीयन्ते चोपवासतः।
उपवासव्रतस्थानां कामावाप्तिर्ध्रुवं भवेत् ॥
भवन्ति विपुला भोगाः संग्रामेष्वपलायिनां।

मधुमांसनिवृत्तस्य सर्व्व एव मनोरथाः॥
मांसाशननिवृत्तोऽपि परं सौख्यमुपाश्नुते।
अहिंसया त्वरोगी स्याद्दीर्घायुश्चाप्यहिंसया॥
रूपलावण्यसौभाग्यधनधान्ययुतः सदा।
तीर्थानुसरणाद्विप्राः पापनाशमवाप्नुयात्॥
सर्व्वकल्मषहीनस्तु यान् लोकान् मनसीच्छति।
प्रतिश्रयप्रदानेन स्थानमाप्नोत्यनुत्तमं॥
पूज्य पूजयिता विप्रा यशसा युज्यते नरः।
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः॥
समब्रूत्वा विवर्द्धन्ते कीर्त्तिमायुर्यशोबलं।
ऋतुकालादृते भार्य्यां तथैव परिवर्जयेत्॥
पानीयमपि विप्रेन्द्रा विष्णुलोकं स गच्छति।
अनेनैव विधानेन देशकालगतैर्नरः॥
सर्व्वकामानवाप्नोति गतिं प्राप्नोत्यभीप्सितां।
तथा भोजनकाले तु यस्तु मौनं समाचरेत्॥
उपवासफलस्तस्य प्रत्यहं भोजनस्य तु।
सर्व्वान् कामानवाप्नोति मौनी नक्ताशनः सकृत्।
नाप्नोति नरकं दुःखं नित्यस्नायी नरो यदि।
यो दद्यादपरिक्लिष्टमन्नमध्वनिवर्तिने॥
श्रान्तायादृष्टपूर्व्वाय तस्य पुण्यफलं महत्।
पाद्यमासनमेवाथ दीपमन्नं प्रतिश्रयं॥
दद्यादतिथिपूजार्थं स यज्ञः पञ्चदक्षिणः।
चक्षुर्दद्यात्मनो दद्याद्वाचं दद्याच्च सूनृतां॥

अनुव्रजेदुपाध्यायैः सर्व्वकामफलप्रदः ।
पुष्पाग्निनाम्रपत्रैरर्थ्यं धनं शाकाग्निनां महत् ॥
पयोभक्षा दिवं यान्ति अभक्षायामितां गतिं ।
दन्तोलूखलको विप्रो यथाप्युञ्छेन जीवति ॥
कापोतीं मास्थितो वृत्तिं यथेष्टाङ्गतिमाप्नुयात् ।
प्रायोपवेशनाद्राज्यं सर्व्वत्र फलमुच्यते ।
येन प्रीणाति पितरस्तेन प्रीतः प्रजापतिः ॥
प्रीणाति मातरं येन पृथिवी तेन पूजिता ।
येन प्रीणात्युपाध्यायस्तेन स्याद्ब्रह्म पूजितं ॥
सर्वे तस्यादृता धर्म्मा यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्व्वा तस्याफला क्रिया ॥
गुरुशुश्रूषया विद्या नित्यश्राद्धेन सन्ततिः ।
नित्यस्नायी भवेद्दक्षः संध्ये तु द्वे जपेत्सदा ।
द्विजशुश्रूषया राज्यं द्विजत्वं वापि पुष्कलं ।
देवशुश्रूषया कामं यथेष्टं प्राप्नुयात् ततः ।
सान्त्वदः सर्व्वभूतानां सर्व्वलोकैः प्रपूज्यते ॥
परिचर्य्यातुरं सम्यक् न रोगैः परिभूयते ।
गोलोकमाप्नोति तथा गवाञ्च परिचर्य्यया ॥
देवमाल्यापनयनात्पादशौचात् द्विजस्य तु ।
आत्मसंवाहनाद्विप्राः सुखमत्यन्तमश्नुते ॥
जले सप्तसहस्राणि एकादश हुताशने ।
भृगुप्रपाते च दश संग्रामे विंशतिस्तथा ॥
नरो वर्षसहस्राणि तनुं त्यक्त्वा तु मोदते ।

अनाशके तु धर्म्मज्ञाः परिसंख्या न विद्यते ॥
मेरोः साधयते राज्यं यथेष्टं भुवि जायते ।
पुण्यप्रस्थानमाविश्य यथेष्टाङ्गतिमाप्नुयात् ॥
वह्निप्रवेशे नियतमभीष्टं लोकमश्नुते ।
वारुणं लोकमाप्नोति त्यक्त्वाम्भसि तनुं नरः ॥
शष्पं मृगमुखोत्सृष्टं यो मृगैः सह सेवते ।
दीक्षितो वै मुदा युक्तः स गच्छत्यमरावतीं ॥
शैवलं शीर्णपर्णं वा तद्व्रतं यो निषेवते ।
शीतयोगवहो नित्यं स गच्छेत्परमाङ्गतिं ॥
वायुभक्षोऽम्बुभक्षो वा फलमूलाशनोऽपि वा ।
याक्षमैश्वर्यमाप्नोति मोदतेऽप्सरसाङ्गणैः ॥
अग्नियोगवहो ग्रीष्मे विधिदृष्टेन कर्म्मणा ।
दीर्घं द्वादशवर्षाणि राजा भवति पार्थिवः ॥
आहारनियमं कृत्वा मुनिर्द्वादशवार्षिकं ।
व्रतं समाप्य कालेन राजा भवति पार्थिवः ॥
स्थण्डिले शुद्धमाकाशं परिगृह्य समन्ततः ।
प्रविश्य च मुदायुक्तो दीक्षां द्वादशवार्षिकीं ।
स्थण्डिलस्य फलान्याहु र्यानानि शयनानि च ।
गृहाणि शयनार्हाणि चन्द्रशुभ्राणि ब्राह्मण ॥
आत्मानमुपजीवन् यो नियतो नियताशनः ।
देहं वानशने त्यक्त्वा स स्वर्गं समुपाश्नुते ॥
आत्मानमुपजीवन् यो दीर्घं द्वादशवार्षिकीं ।
आत्मना चरणौ दत्त्वा गुणकेषु च मोदते ॥

साधयित्वात्मनात्मानं निर्द्वन्द्वो निष्परिग्रहः।
तीर्त्वा द्वादशवर्षाणि दीक्षामेकां मनोगतां।
स्वर्गलोकमवाप्नोति पितृभिः सह मोदते॥
स्वात्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीं।
त्यक्त्वा महाहवे देहं वारुणं लोकमाप्नुयात्॥
आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीं।
हुतात्मा देहमुत्सृज्य वह्निलोके महीयते॥
यस्तु विप्रो यथान्यायं दीक्षितो नियतेन्द्रियः।
आत्मन्यात्मानमाधाय निर्द्वन्द्वो धर्म्मलालसः।
तीर्त्वा द्वादशवर्षाणि दीक्षामेतामरोगतां।
अरणीसहितः स्कन्धे तीर्थाटनविधिश्चरेत्॥
वीराध्वानमवानीत्य वीरासनगतः सदा।
वीरस्थायी च सततं स वीरगतिमाप्नुयात्॥
वीरलोके गते वीरो वीरयोगावहः सदा।
मखस्य सर्व्वमुत्सृज्य दीक्षितो नियतः शुचिः।
शक्रलोकगतः श्रीमान् मोदते दिवि देववत्॥
उपव्रताः शुचिर्दान्ता अहिंसाः सत्यवादिनः।
संसिद्धाः प्रेत्यगन्धर्वैः सह मोदन्त्यनामयं॥
मण्डूकयोगशयनो यथास्थानं यथाविधि।
दीक्षां चरति धर्म्मात्मा स नागैः सह मोदते॥
आर्द्रवासास्तु शिशिरे व्रतं वहति यो नरः।
द्वादशाब्दानि नियतं राजा भवति पार्थिव॥
हृत्पवनगतान् प्राणान् सप्तपूर्व्वापरांस्तथा।

नरांस्तारयते दुःखादात्मानञ्च विशेषतः ॥
येन येन शरीरेण यद्यत्कर्म्म करोति यः ।
तेन तेन शरीरेण तत्फलं हि समश्नुते ॥
यस्यां यस्यामवस्थायां यत् करोति शुभाशुभं ।
तस्यां तस्यामवस्थायां तत्फलं समुपाश्नुते ॥

महाभारतात् ।

फलमूलाशिनां राज्यं स्वर्गः पर्णाशिनाम्भवेत् ।
पयोभक्षो दिवं याति स्वर्गेन द्रविणोदकः ॥
गवाद्यः शाकदीक्षाभिः स्वर्गमाहुस्तृणाशिनां ।
स्त्रियस्त्रिसवणस्नानाद्वायुं पीत्वा क्रतुं लभेत् ॥
नित्यस्नायी लभेद्राज्य सन्ध्ये तु द्वे जपं द्विजः ।
सेन्द्रं साधयते राज्यं नाकपृष्ठमनाशकः ॥
स्थण्डिले तु शयानानां गृहाणि शयनानि च ।
रसानां प्रतिसंहारे सौभाग्यमभिविद्यते ॥
आमिषप्रतिसंहारे प्रजा आयुष्मती भवेत् ।
उदवासंवसेद्यस्तु स नराधिपतिर्भवेत् ॥
प्रतिसंहारः परित्यागः, उदवास उदके वासः ।
सत्यवादी नरश्रेष्ठ दैवतैः सह मोदते ॥
गन्धमाल्यानुवृत्त्या तु कान्तिर्भवति पुष्कला ।
केशश्मश्रु धारयति तामग्र्यां वसतिं लभेत् ॥
उपवासश्च दीक्षाञ्चाप्यभिषेकञ्च पार्थिव ।
कृत्वा द्वादश वर्षाणि वासवत्वादिशिष्यते ॥
अवाक्शिरास्तु यो लम्बेदुदवासं वसेच्च यः ।

सततश्चैकसाक्षी यः स लभेदीप्सिताङ्गतिं ॥
परं विन्दति दानेन मौनेनाज्ञा प्रतीच्छति।
उपभोगांश्च तपसा ब्रह्मचर्य्येण जीवितं ॥
रूपमैश्वर्य्यमारोग्यं अहिंसाफलमुच्यते।
प्रायोपवेशनाद्राज्यं सर्व्वत्र फलमश्नुते ॥
स्वर्गं सत्येन लभते दीक्षया कुलमुत्तमं।
अधीत्य सर्व्ववेदांश्च सद्यो दुःखात् प्रमुच्यते ॥
मानसन्तु वरं धर्म्मं स्वर्गलोकमवाप्यते।

विष्णुधर्म्मोत्तरात् ऋषय ऊचुः।

कं लोकं कर्म्मणा केन संप्राप्नोति नरोत्तमः।
तत्त्वमस्माकमाचक्ष्व त्वं हि सर्व्वविदुच्यते ॥

हंस उवाच।

ज्येष्ठं स्वसारं पितरं गुरुं मातरमेव च।
नित्यं संपूजयेद्भक्त्या याम्यलोके महीयते ॥
भोजनावसथाद्येन त्वतिथिश्चैव पूजयेत्।
राजराजस्य लोकेषु मोदते नात्र संशयः ॥
मेरोः समीपं गच्छन्ति यथा चैवोत्तरान् कुरून्।
नित्यं दानपराः शान्ता लोकं गच्छन्ति शीतगोः ॥
आदित्यलोकं गच्छन्ति यथा येन परिस्थिताः।
तीर्थयात्रां परां यान्ति तथा लोकं प्रचेतसः ॥
संग्रामे निहता यान्ति शक्रलोकमसंशयं।
प्राजापत्यं तथा यान्ति सम्यग् दत्त्वा महीक्षितः ॥
गवां भक्त्या तथा यान्ति गोलोकं मानवोत्तमाः।

यान्ति लोकन्तु साध्यानां नित्यं ये सत्यभाषिणः ॥
प्रतिग्रहान्निवृत्ताश्च वसूनामपि मानवाः ।
वायुलोके महीयन्ते रोगिणां परिचारकाः ॥
लोकं गच्छन्त्यथाग्नेयं वह्निशुश्रूषणे रताः ।
यान्ति ते नैर्ऋतं लोकं पररक्षणतत्पराः ।
भृगूणामथ लोकेषु मोदन्त्याकाशशायिनः ॥
यान्ति चाङ्गिरसे लोके व्रतिनो नात्र संशयः ।
मरुतां च तथा लोकं यान्ति यानप्रदा नराः ॥
नासत्यलोके मोदन्ते तथैवौषधिदायिनः ।
रुद्रलोकं प्रपद्यन्ते गोविप्रातुरवत्सलाः ॥
स्ववाचि निरता यान्ति वैश्वदेवमसंशयं ।
आदित्यैः सह मोदन्ते दयावन्तस्तु ये नराः ॥
ब्रह्मलोकं विष्णुलोकं रुद्रलोकं तथैव च ।
तद्गौरवेण लभ्यन्ते नान्यथा द्विजसत्तमाः ॥
यस्य देवस्य यां भक्तिं सदा वहति मानवः ।
सम्यक् स तस्य सालोक्यं याति नास्त्यत्र संशयः ॥

लोकेषु दिव्येषु गतिर्मयोक्ता
कर्मानुरूपा पुरुषस्य विप्राः ।
अतः परं किं कथयाम्यहं वो
तन्मे वदध्वं तपसि प्रधानाः ॥

इति नानाशुभफलानि ।

अथ शरीरोत्सर्गविधिरभिधीयते। ते चानशनाग्निप्रवेश भृगुपतनादयः।

तत्र विष्णुधर्म्मोत्तरात्।

नरो नव्याधिरहितः सन्त्यजेदात्मनस्तनुं।
अधमा नाम ये लोका अन्धेन तमसावृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥
अनिष्टैरात्मनो ज्ञात्वा मृत्युकालमुपस्थितं।
व्याधितो भिषजा त्यक्तः पूर्णे वायुषि चात्मनः॥
यथा युगानुसारेण सन्त्यजेदात्मनस्तनुं।
तस्मिन् काले तनुत्यागाद्यथोक्तं फलमाप्नुयात्॥
आयुषस्तु पुरा दृष्टं मरणं ब्राह्मणस्य च।
क्षत्रियस्य तु संग्रामे मृतभर्त्तरि योषितः॥
ब्राह्मणार्थे गवार्थे वा सन्त्यजेदात्मनस्तनुं।
सर्व्वो ह्यपापकार्य्योऽपि गतिमग्र्यामवाप्नुयात्॥

आदित्यपुराणात्।

समायुक्तो भवेद्यस्तु पातकैर्महदादिभिः।
दुश्चिकित्स्यैर्महारोगैः पीड़ितो वा भवेत्तु यः॥
स्वयं देहे विनाशस्य काले प्राप्ते महामतिः।
आब्राह्मणोऽपि स्वर्गादिमहाफलजिगीषया॥
प्रातरुज्वलनन्दीप्तं करोत्यनशनं तथा।
अगाधतोयराशिं वा भृगोः पतनमेव वा॥
गच्छेन्महापथं वापि तुषारगिरिमादरात्।
प्रयागवटशाखाग्रे देहत्यागं करोति वा॥

उत्तमान् प्राप्नुयात् लोकान् नात्मघाती भवेत् क्वचित् ।
महापापक्षयात् सर्व्वो दिव्यान् भोगान् समश्नुते ॥
एतेषामधिकारस्तु तपसा सर्व्वजन्तुषु ।
नराणामथ नारीणां सर्व्ववर्णेष्वयं विधिः ॥
श्वश्रूञ्च मातरञ्चैव भगिनीं ब्राह्मणीं सतीं ।
मासोपवासिनीं गत्वा गुरुपत्नीं तथैव च ।
करीषाग्निं विशेद्विप्रो गच्छेच्चैव महातपं ॥

तथा रेवाखण्डे ।

ये मृता नर्म्मदातीरे सङ्गमे लिङ्गदर्शने ।
तेषां गृहाश्च रम्याश्च पूर्व्वभागव्यवस्थिताः ॥
नर्म्मदासेदसङ्गे तु सावित्रीसङ्गमे तथा ।
त्रिपुरासन्निधाने च विष्णौ सन्निहिते तथा ॥
ओंकारदक्षिणे भागे पूर्व्वतो मरकण्टके ।
जलाधारे कोटितीर्थे ये मृताः स्कन्दमानवाः ॥
हर्म्यैरिमैर्मनोरम्यैर्वसन्ति च नरोत्तमाः ।
भृगावस्मो जले वापि नद्याः सकलसङ्गमे ।
गोदावर्य्यां पयोष्ण्यां च तथागस्त्यैव सङ्गमे ॥
आत्रेय्याञ्चैव भारत्यां वाराणस्यान्तथैव च ।
द्रुमालये गोग्रहे च गोकर्णे च महालये ॥
हरिश्चन्द्रे पुरीश्चन्द्रे सौमित्रे त्रिपुरान्तके ।
कृष्णायान्तुङ्गभद्रायां महारथ्यां सर नदीं ।
कार्त्तिके स्वामिकुण्डे च ये म्रियन्ते च पुत्रक
सरस्वत्यान्त्यजेत् प्राणान् प्रभासे शशिभूषणे ॥

पारियात्रे महाकाले जायन्ते तत्त्वदर्शिनः।

अनशनं तावदुच्यते।

विष्णुधर्म्मात्।

तदेतदुक्तं तपसामग्र्यानां महामते।
गुणैरनशने ब्रह्मा प्रधानतममब्रवीत्॥
त्यजेदनशनस्थो हि प्राणान् यः संस्मरन् हरिं।
स याति विष्णुसालोक्यं यावदिन्द्राश्चतुर्दश॥
अतीतानागतानीह कुलानि पुरुषर्षभ।
पुनात्यनशनं कुर्व्वन् सप्त सप्त च सप्त च॥
नान्यत्सुकृतमुद्दिष्टं तपैरनशनात् परं।
तस्याहं लक्षणं वक्ष्ये यत्र जप्यं सुमूर्षता॥
यादृक् रूपश्च भगवान् चिन्तनीयो जनार्द्दनः।
आसन्नमात्मनः कालं ज्ञात्वा प्राज्ञो महासुर॥
निर्धूतमलदोषश्च स्नातो नियतमानसः।
समभ्यर्च्च्य हृषीकेशं पुष्पधूपादिभिस्तथा॥
प्रणिपातैः स्तवैः पुण्यैर्ध्यानयोगैश्च पूजयेत्।
दत्त्वा दानञ्च विप्रेभ्यो विकलादिभ्य एव च॥
सभायोगि ब्राह्मणौको देवौकस्तपयोगि च।
वस्त्रौ पुत्रे कलत्रे च क्षेत्रधान्यधनादिषु॥
मित्रवर्गे च दैत्येन्द्र ममत्त्वं विनिवर्त्तयेत्।
मित्रारिमिश्रमध्यस्थान् परांश्चाश्च पुनः पुनः॥
अभ्यर्थनोपचारेण क्षमयेत् सुकृतं स्वकं।
ततश्च प्रयतः कुर्य्यादुत्सर्गं सर्व्वकर्म्मणां॥

शुभाशुभानां दैत्येन्द्र वाक्यं वेदमुदाहरेत्।
परित्यजाम्यहं दानं यजामि सुहृदोऽखिलान्॥
भोजनादि मयोत्सृष्टं स्नानं माल्यमनुलेपनं।
सुभ्रूषणादिकं त्यक्तं दानमादानमेव च॥
होमादयः पदार्था ये ये च नित्यक्रमा मम।
निमित्ताश्च तथा काम्याः श्राद्धकर्म्मक्रियोदिता॥
त्यक्तावाश्रमिणां धर्म्मा वर्णधर्म्मास्तथा स्थिताः।
पद्भ्यां कराभ्यां विहरन् कुर्व्वन् वा काममत्यहं॥
न पापं कस्यचिद्दास्ये प्राणिनः सन्तु निर्भयाः।
नभसि प्राणिनो ये च ये जलेष्वपि भूतले॥
क्षितौ विवरगा ये च ये च पाषाणसङ्कटे।
ये धान्यादिषु वस्त्रे च शयने चासनेषु च॥
न स्वयं किञ्च बुध्यात् दत्तस्तेभ्यो भयावहं।
नमेऽस्ति बान्धवः कश्चिद्विष्णुं त्यक्त्वा जगद्गुरुं॥
मित्रपक्षे च मे विष्णुरधयोश्च तथापरः।
पार्श्वयोर्मूर्द्ध्नि हृदये बाहुभ्यां वापि चक्षुषोः॥
श्रोत्रादिषु तथाङ्गेषु मम विष्णुः प्रतिष्ठितः।
इति सर्व्वं समुत्सृज्य ध्यात्वा सर्व्वगमच्युतं॥
वासुदेवस्य नियतं नाम देवेश कीर्त्तयेत्।
दक्षिणाग्रेषु दर्भेषु शयीत प्राक्शिरास्ततः॥
उदक्शिरा वा दैत्येन्द्र चिन्तयन् जगतः पतिं।
विष्णुं जिष्णुं हृषीकेशं केशवं मधुसूदनं।
नारायणं नरं शौरिं वासुदेवं जनार्द्दनं।

वाराहं यज्ञपुरुषं पौण्डरीकमथाच्युतं॥
वामनं श्रीधरं कृष्णं नृसिंहमपराजितं।
पद्मनाभमजं श्रीशं दामोदरमधोक्षजं॥
सर्व्वेश्वरेश्वरं शुद्धमनन्तं राममीश्वरं।
चक्रिणं शार्ङ्गिणं शान्तं शङ्खिनं गरुडध्वजं॥
किरीटकौस्तुभधरं प्रणमाम्यहमव्ययं।
अहमस्मिन् जगन्नाथे मयि चास्तु जनार्द्दनः।
आवयोरन्तरं मास्तु धर्मोऽकाशयोरिव।
अयं विष्णुरयं शौरिरयं कृष्णः पुरी मम।
नीलोत्पलदलश्यामः पद्मपत्रायतेक्षणः॥
एष दृश्यतमो ह्रीशः पश्याम्यहमधोक्षजं।
यतो न व्यतिरिक्तोऽहं यस्मतोऽहं यदाश्रयः॥
इत्थं जपेदेकमनाः स्मरन् सर्व्वेश्वरं हरिं।
अतीतः सर्व्वदुःखेषु ममो मित्राहितेषु च॥
नमोऽस्तु वासुदेवाय व्रतोक्तं सततं जपेत्।
यद्योदीरयितुं नाम समर्थस्तदुदीरयेत्।
तथा ध्यायेच्च देवस्य विष्णोरूपं मनोरमं॥
प्रसन्नमेचभूवक्त्रं शङ्खचक्रगदाधरं।
श्रीवत्सं सुमनसञ्चतुर्बाहुं किरीटिनं॥
पीताम्बरधरं कृष्णं चारुकेयूरधारिणं।
चिन्तयेच्च सदा रूपं मनः कृत्स्नैकनिश्चये॥
यादृशे वामनः स्थैर्य्यं रूपे बध्नाति चक्रिणः।
तदेव चिन्तयेद्रूपं वासुदेवेति कीर्त्तयेत्।

इत्थं जपन् स्मरन्नित्यं स्वरूपं परमात्मनः ।
आप्राणोपरमाद्वीरस्तच्चित्तस्तत्परायणः ।
सर्व्वपातकयुक्तोऽपि पुरुषः पुरुषर्षभ ।
प्रयाति देवदेवेशे लयमीप्सितमेऽश्नुते ॥
यथाग्निस्तृणजातानि दहत्यनिलसङ्गतः ।
तथा नगनसङ्कल्पः पुंसां पापान्यलङ्कृताः ॥
पृष्ठतश्चामरधरा विमानैरनुयान्ति तं ।
देवकन्या निवासे च तस्मिन् वसति मानवः ।
आजन्मवीचालकापूर्णे पूर्णसंवत्सरं नरः ॥

बलिरुवाच ।

उत्क्रान्तिकाले भूतानां मुह्यन्ते चित्तवृत्तयः ।
जराव्याधिविहीनानां किम् व्याध्यादिदोषिणां ॥
अत्यन्तं वयसा वृद्धो व्याधिना रोगपीडितः ।
यदि स्मर्तुं न शक्नोति स्थितिस्थो दर्भसंस्तरे ।
तत् किमन्योप्युपायोऽस्ति नराननग्नंकर्म्मणि ।
वैफल्यं येन नाप्नोति तन्मे ब्रूहि पितामह ॥

प्रह्लाद उवाच ।

नात्र भूमिर्न च कुशास्वास्तरय न कारणं ।
चित्तस्यालम्बनीभूतो विष्णुरेवात्र कारणं ॥
तिष्ठन् व्रजन् स्वपन् बुध्यन् तथा धावन्नितस्ततः
उत्क्रान्तिकाले गोविन्दं संस्मरन् तन्मयो भवेत् ॥
किं जपैः किं नु वा तत्त्वैः किन्तुभैर्दैत्यसत्तम ।
तथापि कुर्व्वतो यस्य हृदये न जनार्दनः ॥

तस्मात् पुत्र सदा कार्य्यं वासुदेवस्य चिन्तनं।
तन्मयत्वेन दैत्येन्द्र तस्योपायश्च विस्तरात्॥
इत्येतत् कथितं सर्व्वं यत् पृष्टोऽहं त्वयानघ।
उत्क्रान्तिकाले स्मरणं किम्भूयः कथयामि ते॥

भविष्योत्तरात्।

षष्टिवर्षसहस्राणि तु सप्त वै जले
दशैकमग्नौ पतने च षोडश।
गवां ग्रहे षष्टिरशीतिराहवे
अनाशने भारत चाक्षया गतिः॥
तथा च शतपथी श्रुतिः।

तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्य्येण तपसा श्रद्धया यज्ञेनानाशनेन।

सौरपुराणात्।

शिवक्षेत्रे निराहारो भूत्वा प्राणान् परित्यजेत्।
शिवसायुज्यमाप्नोति प्रभावात् परमेष्ठिनः॥

लिङ्गपुराणात्।

यावत्तावन्निराहारो भूत्वा प्राणान् परित्यजेत्।
शिवक्षेत्रे मुनिश्रेष्ठाः शिवसायुज्यमाप्नुयात्॥

इति अनशनविधिः।

———oo0oo———

अथ महायात्राप्रकरणं।

क्रौञ्चस्याकाशगङ्गायामष्टमे वातवर्त्मनि।

गजेन्द्राः कुमुदाद्याश्च येन प्राप्ता जनार्द्दनं ॥
तस्मात् प्रधानमत्रोक्तं वासुदेवस्य चिन्तनं।
निर्म्मलं ब्रह्मसम्भूतं करैस्तत्त्वाक्षवीजलं ॥
गृहीत्वा प्रतिमुञ्चन्ति फुत्कारैर्दक्षिणामुखाः ॥
मृष्टाः पृष्ठेऽथ पातैश्च सामीप्यात् सूर्य्यरश्मिभिः ॥
बुबुधुस्तम्भसामर्थ्यं दारुस्य गमनाय च।
महाप्रपातं नीलाभं पतमानस्तु तत्स्थलं ॥
वायुना स्थाप्यमानस्तु स्थानत्वमुपगच्छति।
तत्पुण्यं हिमवत्सानो पतते च यदा हिमं ॥
प्रथमं तत्र संपूज्यो हिमवांश्च गिरिस्तथा।
हेमन्तश्च तथा नागो नीलनीलाञ्जनप्रभः।
श्यामनागाश्च संपूज्याः कालपाशैर्नमेरुजैः।
रक्तपुष्पाणि देयानि धूपो गुग्गुलसम्भवः ॥
मध्वाज्यतिलसम्मिश्रं पिष्टमिश्र हिमं वहु।
यस्मिन् देशे हिमं न स्यात् तत्र भूयाद्धिमं हिमं ॥
महाप्रस्थानयात्रा च कर्त्तव्या तु हिमोपरि।
आश्रित्य सत्त्वं धैर्य्यं च सदाः स्वर्गारुहा च सा ॥
यावत् पुरन्दरं लोके न यातः कार्य्यगौरवात्।
तावत्तुषारमध्ये तु स्वस्थानस्थाक्षयमर्हेत ॥
यतस्तुषारदग्धस्तु मुञ्चन प्राणान विचिन्तम।
प्रदक्षिणावर्त्तगङ्गं पश्येद्धोमहुताशनं।
साकर्षणं वपुर्विष्णोर्यन्त्राग्निभवनादृकं ॥

इति ब्रह्माण्डपुराणोक्तं महाप्रस्थानं।

अथाग्निप्रवेशः

वायुपुराणे।

यो वाहिताग्निप्रवरो वीराध्वानं गतोऽपि वा।
समाधाय मनः पूर्व्वं मन्त्रमुच्चारयेच्छनैः॥
त्वमग्ने रुद्रस्त्वंमुरोमहोदिवस्त्वं शर्द्धोमारुतं पृक्षईशिषे।
त्वं वातैररुणैर्यासि शङ्गयस्त्वं पूषा विधतः पासि आत्मना॥
इत्येवं मनसा मन्त्रं सम्यगुच्चारयन् द्विजः।
अग्निं प्रविशते यस्तु रुद्रलोकं स गच्छति॥
अग्निस्तु भगवान् कालः कालोरुद्र इति स्मृतः।
तस्माद्यः प्रविशेदग्निं स रुद्रमतिवर्त्तते॥

लिङ्गपुराणात्।

आधायाग्निं शिवस्याग्रे संपूज्य परमेश्वरं।
स्वदेहपिण्डं जुहुयात् स याति परमं पदं॥

सौरपुराणात्।

शिवस्य पुरतो वह्निं संस्थाप्याभ्यर्च्च्य केशवं।
जुहुयादात्मनो देहं स याति शिवसन्निधिं॥

अथ स्त्रीणामग्निप्रवेशोविधीयते।

तत्र बृहस्पतिः।

आर्त्तार्त्ते मुदिते हृष्टा प्रोषिते मलिना कृशा।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता॥

अथ अङ्गिराः।

साध्वीनामिह नारीणामग्निप्रपतनादृते।

नान्यो धर्म्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित्।
तावन्न मुच्यते नारी स्त्रीशरीरात् कथञ्चन॥

सद्वृत्तभावार्पितभर्तृकाणां
स्त्रीणां वियोगः चितिकातराणां।
तासाम्मतावस्तमिते यतः स्या-
दग्निप्रवेशादपरो हि मार्गः॥

हारीतः।

मृते भर्त्तरि या नारी धर्म्मशीला दृढव्रता।
अनुगच्छति भर्त्तारं शृणु तस्यास्तु यत्फलं॥
तिस्रः कोटोर्द्धकोटी वा यावद्रोमाणि मानुषे।
तावदब्दसहस्राणि स्वर्गलोके महीयते॥
मातृकं पैतृकञ्चैव यत्र कन्या प्रदीयते।
कुलत्रयं पुनात्येषा भर्त्तारं यानुगच्छति॥

व्यासः।

ब्रह्मघ्ने वा कृतघ्ने वा मित्रघ्ने यच्च दुष्कृतं।
भर्त्त पुनाति सा नारी तमादाय मृता तु या॥

आदायालिङ्गेत्यर्थः। एवं कल्पसूत्रकाराः। भर्तृशरीरेण सह संवेशनमाहुः पत्नीं संवेशयन्तीति।

आदित्यपुराणात्॥

शुहोत्यग्नौ शरीरं वा मृतेन पतिना सह।
सत्त्वोद्रेकान्महाधीरा या काचित्सा पतिव्रता॥
पितृमेधमहायज्ञः स्त्रीणामेषः प्रकीर्त्तितः।
देहः सजीवो यत्र स्यादविः प्राणास्तु दक्षिणा॥

अविरुद्धमृगार्थन्तु देवर: सार्व्वकालिकं।
आराधयेन्नाह्वजायां सह भर्त्रा समन्वितां॥
चितामारोपयन् प्राज्ञः प्रस्तुतं धर्म्ममुत्तमं।
इमाः पतिव्रताः पुण्याः स्त्रियोजाताः पतिव्रताः॥
अवैधव्यमनुप्राप्ताः रत्नाभरणभूषिताः।
कुङ्कुमाज्याञ्जनाः स्रग्भिरर्चिताः कृतमण्डनाः॥
सुचिरं भर्तृसंयोगं प्राप्नुवन्तु स्वयं बलात्।
दुष्टप्रवादरहिता सुख्यास्त्वव्याधिदूषिताः।
सह भर्तृशरीरेण संविशन्तु विभावसुं॥
एवं श्रुत्वा ततो नारी श्रद्धाभक्तिसमन्विता।
पितृमेधेन यत्नेन यद्दा स्वर्गमवाप्नुयात्॥
मृते भर्त्तरि सुस्त्रीणां न चान्या विद्यते गतिः॥
नान्यद्भर्तृवियोगाग्निदाहस्य शमनं भवेत्।
ऋग्वेदवचनात् साध्वी न भवेदात्मघातिनी॥
तदेवेदं ऋग्वेदवचनं।

इमा नारीरविधवाः सुपत्नी
रञ्जनेन सर्पिषा सविशन्तु।
अनस्रवो अनमीराः सुरत्ना
आरोहन्तु जनयो योनिमग्ने॥

देशान्तरमृते तस्मिन् साध्वी तत्पादुकाद्वयं।
निधायोरसि संशुद्धा प्रविशेज्जातवेदसं॥
व्यासः।
इथिमं यान्यदेशस्थं हत्तं श्रुत्वा पतिव्रता।

समारोहति दीप्तेऽग्नौ तस्याः शक्तिं निबोधत ॥

हुतं मृतमित्यर्थः।

यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः।
संप्राप्य यातनास्थानं गृहीतो यमकिङ्करैः ॥
तिष्ठते विवशो दीनो वेष्ट्यमानः स्वकर्मभिः।
व्यालग्राही यथा व्यालं बलादुद्धरते बलात्।
तद्वद्भर्त्तारमादाय दिवं याति तपोबलात् ॥
तत्र सा भर्तृपरमा स्तूयमानाऽप्सरोगणैः।
क्रीडते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश ॥

वाराहपुराणे।

ततो दिव्याम्बरधरन्दिव्याभरणभूषितं।
दिवि दिव्यविमानस्थं भर्त्तारं सन्ददर्श सा ॥

कूर्म्मपुराणात्।

ब्रह्मघ्नं वा सुरापञ्च महापातकदूषितं।
भर्त्तारमुद्धरेन्नारी प्रविष्टा सह पावकं ॥
एतदेव परं स्त्रीणां प्रायश्चित्तं विदुर्बुधाः।
सर्व्वपापं समुद्भूतं नात्र कार्य्या विचारणा ॥

आदित्यपुराणात्।

मृते भर्त्तरि या वह्निं समारोहति कर्हिचित्।
साऽरुन्धतीसमाचारा स्वर्गलोके महीयते ॥
मातृकं पैतृकं वापि यत्र कन्या प्रदीयते।
पुनाति त्रिकुलं नारी भर्त्तारं यानुगच्छति ॥
क्रीडते पतिना यत्र यावदिन्द्राश्चतुर्दश।

स्वेच्छया तदवाप्नोति यत्र गत्वा न शोचति ॥

इत्यग्निप्रवेशविधिः।

———ooo———

अथ कारीषाग्निसाधनं।

कारीषं साधयेद्यस्तु पुष्करे तु वने नरः।
सर्व्वलोकान् परित्यज्य ब्रह्मलोकं स गच्छति ॥
ब्रह्मलोके वसेत्तावत् यावत् कल्पक्षयो भवेत्।
नैव भ्रश्यति मर्त्त्येषु क्लिश्यमानः स्वकर्म्मभिः ॥
गतिश्चास्याप्रतिहता तिर्य्यगूर्द्ध्वमधस्तथा।
सप्तर्षिसर्व्वलोकेषु स्ववशो विचरन् वशी ॥
उपचारविधिज्ञश्च सर्व्वेन्द्रियमनोहरः।
नृत्यवादित्रगीतज्ञः सुभगः प्रियदर्शनः ॥
संसेव्यमानः कुसुमैः दिव्याभरणभूषितः।
नीलोत्पलदलश्यामो नीलकुञ्चितमूर्द्धजः ॥
अजेयतनुमध्याश्च सर्व्वसौभाग्यपूजिताः।
सर्व्वैश्वर्य्यगुणोपेताः यौवनेनातिगर्व्विताः ॥
स्त्रियः सेवन्ति तं नित्यं शयने रमयन्ति च।
वीणावेणुनिनादैश्च सुप्तः स प्रतिबुध्यते ॥
महोत्सवसुखं भुङ्क्ते दुष्प्रापमकृतात्मभिः।
प्रसादाद्देवदेवस्य ब्रह्मणः शुभकारिणः ॥

इति पद्मपुराणोक्तं कारीषाग्निसाधनं।

———ooo———

अथ भृगुपतनविधिः ।

रेवाखण्डात् ।

युधिष्ठिर उवाच ।

भृगोः पतन्ति ये शूराः कां गतिं वै प्रयान्ति ते ।
श्रोतुमिच्छाम्यहं ह्येतत् कथय त्वं महामुने ॥

मार्कण्डेय उवाच ।

एकान्तरोपवासैश्च भृगुगोयहसंयहैः ।
प्राणांस्त्यजन्ति ये शूरा गतिं तेषां निबोधय ॥
पृथक् पृथक् निवासश्च तेषां कर्मानुसारतः ।
चतुर्व्विंशतिकोटास्तु सप्तदश तथापराः ॥
उमायां तु पुरा प्रश्ना मध्यमोत्तमकल्पकाः ।
अनेन विधिना यस्तु प्राणांस्त्यजति मानवः ॥
स तु भर्त्ता मया दत्तो युष्माकन्तु प्रसादतः ।
अमरेश्वरं प्रणीताश्च भर्त्तारं वो व्रजन्ति वै ॥
भृगुं दृष्ट्वाव्ययश्चेह मुच्यते ब्रह्महत्यया ।
चतुरशीतिभृगवो जम्बूद्वीपे प्रकीर्त्तिताः ॥
तथान्ये सप्त निर्दिष्टाः स्वर्गसोपानमुत्तमाः ।
भैरवश्च भृगुश्रेष्ठो ज्ञेयश्चामरकण्टके ॥
शूद्राश्च क्षत्रिया वैश्या अन्त्यजाश्चाधमास्तथा ।
एते त्यजेयुः प्राणान्वै वर्ज्जयित्वा द्विजं नृप ॥
पतित्वा ब्राह्मणस्तत्र ब्रह्महा चात्महा भवेत् ॥

द्वात्रिंशच्च सहस्राणि राहुसोमसमागमे।
वर्षाणां जायते राजन् राजा विद्याधरे पुरे॥
ग्रस्ते तु राहुणा सूर्य्ये द्विगुणं फलमश्नुते।
अवशः स्ववशो वापि जलपूरानलैर्हतः।
नृपते गोभृगुं प्राप्य स विद्याधरराड् भवेत्॥
भृगुं भैरवरूपेण विद्धि कैलाससम्भवं।
गर्हयन्ति भृगुं ये तु ते लिङ्गब्रह्मवादिनः।
भैरवः क्षमते तेषामिति स्कन्देन कीर्त्तितं॥
सन्न्यासाच्च च्युतो विप्रो मातृहा पितृहा तथा।
ब्रह्मघ्नो मातृगश्चैव स्नुषागः स्वसृगस्तथा॥
एतेषां पतनं शस्तं कायाग्निश्च प्रसाधनं।
मुच्यते तेन पापेन शिवलोकं स गच्छति॥
वत्सरं वत्सरार्द्धन्तु त्रिमासं मासमेव च।
सप्तत्रीणि दिनानीह वसेद्यो वै युधिष्ठिर॥
एकान्तरोपवासाद्दै स गच्छेच्छिवमन्दिरं।
हरिश्चन्द्रे पुरीश्चन्द्रे श्रीशैले त्रिपुरान्तरे॥
धौतपापे महापुण्ये वाराहे विन्ध्यपर्व्वते।
कावेर्य्यास्तु तथा कुण्डे पतनात् स्वर्गमाप्नुयात्॥
भृगोस्तु दक्षिणे भागे लिङ्गं वै चापलेश्वरं।
क्षेत्रसंरक्षणायेह विख्यातं पापनाशनं॥
भृगुः पश्चा भृगोस्तद्वि विज्ञेयं चापलेश्वरं।
आरोहति गिरिं यस्तु तमदृष्ट्वा तु मानवः।
तस्य पुण्यफलं सर्व्वं स एह्णाति न संशयः॥

आलिख्य च पटे सूर्य्यं पताकादण्डमण्डितं ।
वलयञ्च करे कृत्वा वीज्यमानस्तु चामरैः ।
वीरैरुद्रपतितञ्चैव आरोहेद्भृगुपर्व्वतं ।
पदे पदे यज्ञफलं तस्य स्याच्छङ्करोऽब्रवीत् ॥
पर्व्वकालं प्रतीक्षन्तेऽप्सरसः काममोहिताः ।
दिव्ययानसमारूढा दिव्याभरणभूषिताः ॥
वीरस्तु पतितस्तत्र स्वयं त्यक्ता कलेवरं ।
तत्क्षणाद्दिव्यलोकेषु शक्रतुल्यो भवेन्नृप ॥
कामदं यानमारुह्य विवादेन परस्परं ।
गच्छेच्छिवपुरं सार्द्धं अप्सरोभिर्मुदा युतः ॥
क्लीवस्य सत्त्वहीनस्य भ्रष्टचीर्णस्य भृगोः पुनः ।
पदे पदे ब्रह्महत्या भवेत्तस्य न संशयः ॥
न चिरायुर्यतो मर्त्त्यो मृत्योः कस्मात्विभेत्यसौ ।
केऽपि धारयितुं शक्ताः कालमृत्युवशं नरं ॥
स पापिष्ठो दुराचारश्चाण्डालो लोकगर्हितः ।
सन्न्यासादिकमारुह्य च्यवते यस्तु मानवः ॥
सन्न्यासप्रच्युतं विप्रं दृष्ट्वा नरोऽर्कवीक्षणं ।
कुर्य्यात्सर्व्वप्रयत्नेन अयं चान्द्रायणञ्चरेत् ॥
सत्यानृतं न वक्तव्यमनेन सार्द्धं कदाचन ।
प्रस्थातव्यं हि मौनेन न चेत्पापमवाप्नुयात् ॥
निश्चिते मरणे प्राप्ते कथं भृगुरपेक्ष्यते ।
जरामृत्युश्च रोगश्च संसारोदधिसङ्कटे ।
एवं कृत्वा नृपश्रेष्ठ आरोहेत् भृगुमुत्तमं ॥

भविष्योत्तरात् ।

कृष्ण उवाच ।

अहन्ते कथयिष्यामि तं विधिं पाण्डुनन्दन ।
यत् कृत्वा प्रथमं कर्म्म निपतेत्तदनन्तरं ॥
कृत्वा कृच्छ्रत्रयं पूर्व्वं जपन् ध्यान् दशैव तु ।
शाकयावकाहारश्च: शुचिस्त्रिषवणो नरः ॥
त्रिकालमर्चयेदीशं देवदेवं त्रिलोचनं ।
दशांशेन तु राजेन्द्र होमञ्चैव कारयेत् ॥
सप्तवारञ्जपेद्देवं गन्धमाल्यैश्च पूजयेत् ।
रात्रौ स्वप्ने तदा पश्येद्विमानस्थन्ततः क्षिपेत् ।
आत्मानं मन्यते तात प्रकृतार्थं कथञ्चन ॥
अनेनैव विधानेन आत्मानं यस्तु निक्षिपेत् ।
स्वर्गलोकमनुप्राप्य मोदते त्रिदशैः सह ॥
त्रिंशद्वर्षसहस्राणि त्रिंशत्कोटास्तथैव च ।
क्रीडित्वा विविधान् भोगान् तदा गच्छेन्महीतलं ॥
पृथिवीमेकछत्रेण भुङ्क्ते स द्विजपूजितः ।
व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतं ॥

देवीपुराणात् ।

परमेश्वर उवाच ।

यद्दि वै भैरवं रूपं कृतं भूतचयं प्रति ।
अनुग्रहाय भूतानां भूधरेन्द्रे भविष्यति ॥
तस्मिन् ये भावमापन्ना मत्पुत्रा मयि भाविताः ।

यतन्ति ते च भर्त्तारो मम तुल्या भवन्ति वै ।
भुक्ता भोगांस्तथा तेन राज्ञा राजपुरोचितान् ।
क्रमादनुत्तमं यान्ति तच मोक्षपदं ध्रुवं ॥

ब्रह्मोवाच ।

एवं तासां वचो दत्तं देवदेवेन शूलिना ।
नारीणां भर्तृकामानां नित्यमानन्दकारकं ॥

सनत्कुमार उवाच ।

किं रूपं भैरवं ह्येतत् कथं कायं गतो विभो ।
पातयात्राफलं देव कथयस्व प्रसादतः ॥

ब्रह्मोवाच ।

ये ते संभावसम्पन्नाः कृत्वा मनसि वै शिवं ।
भैरवं यान्ति ते रुद्रं ते यान्ति परमं पदं ॥
ये वा क्लेशाद्भयाल्लोभात् कौतुकात् यान्ति भैरवं ।
तेऽपि वै तत्प्रसादेन भुवनानां महामते ।
शिवत्वं क्रमयोगेन रुद्रत्वं यान्ति ते द्विजाः ॥
अथवा भैरवं रूपं पावनं सुरपूजितं ।
कृत्वा स्वात्मां महावाह्वे भैरवं सर्वकामदं ।
पञ्चविंशभुजं देवं रुद्रत्वं यान्ति ते द्विजाः ॥
अथवा भैरवं रूपं पटगं सुरपूजितं ।
कृत्वा स्वात्मां महावाह्वे भैरवं सर्वकामदं ॥
पञ्चविंशभुजं देवं पीताङ्गं सुरपूजितं ।
खड्गखेटधरं कार्यं शूलोद्यतकरं परं ॥

गजचर्म्मधरश्चैव चक्रोद्यतभुजं तथा।
खट्टाङ्गञ्च कपालञ्च वज्रं डमरुकं तथा॥
एवंविधेन रूपेण भीमदंष्ट्रं धरानन्नं।
अन्धकं भिन्दमानन्तु शङ्करन्तु त्रिलोचनं॥
कुर्व्वन्तु भैरवं देवं ससुरासुरपूजितं।
नानाशिवशिवैर्युक्तं ननाभरणभूषितं॥
नवयौवनशोभाढ्यं सर्व्वशोभाप्रकाशकं।
छुरिकानागराजेन वासुकिश्चोपवीतकं॥
कुलिकस्तु जटाबन्धे शङ्खपालेन कङ्कणं।
तक्षकः पद्मनागश्च कार्य्यौ केयूरमण्डने॥
पद्मकर्क्कोटकौ नागौ नूपुरौ पादगौ शुभौ।
एवं देवं प्रकुर्व्वीत भैरवं सर्व्वकामदं॥
तस्य द्वास्थौ प्रकर्त्तव्यौ पीताङ्गौ सर्व्वलक्षणौ।
शूलहस्तौ शुभौ देवौ गजवाजिरथौ परौ॥
द्वारपौ तत्र गङ्गाद्या द्वारे कार्य्यास्तु भैरवे।
उद्वेजितास्तु पीड़ाद्यैः प्रकुर्युरिह पातकं॥
एवञ्चान्य प्रसङ्गेन कथितं तव सुव्रत।
कपालशूलहस्तौ तु उत्पलाङ्कुरधारिणौ।
द्वास्थौ देवस्य कर्त्तव्यौ सर्व्वाभरणभूषितौ॥
भैरवश्चोर्द्ध्ववदनं ब्रह्मविष्ण्वादिभिर्युतं।
शूलभिन्नान्धकं रूपं धार्य्यमानं तु कल्पयेत्॥
एवं पटगतङ्कृत्वा पूजयित्वा परं विभुं।
सानुगं सह मन्त्रेण रक्तमाल्याम्बरादिभिः॥

आत्मानं भूषयित्वा तु मुद्रालङ्कृतपाणिना ।
प्राप्य तद्दै गृहं रम्यं भोगमोक्षप्रदायकं ॥
पूजाङ्कृत्वा तु देवेशि गयान्धकमदापहे ।
आरोहेदमरं स्थानं भुक्तिमुक्तिफलप्रदं ॥
आकार चिन्तयित्वा तु रूपं स्वच्छन्ददायकं ।
तस्य वक्त्रानले होममात्माहुत्या तु कारयेत् ॥
देववक्त्रं हुताशस्तु स्वयङ्कृततिलादिकं ।
होतव्यं तेन भावेन परां सिद्धिमभीप्सुकैः ॥
पातङ्केन वीरो वै यथावत्तं निबोधत ।
पतङ्ग इव चात्मानं दीपाग्नौ निक्षिपेत्तु यः ।
पातङ्गो नाम पातोऽयं हंससंज्ञमतः शृणु ॥
संयम्य पक्षसङ्घातं कृत्वा वेगवतीं तनुं ।
तं पातं हंसनामानं साधकेच्छाफलप्रदं ॥
मृगोऽपि यूथे गर्त्तादिलङ्घनैस्तु यथा व्रजेत् ।
समपादमतिर्यस्तु मृगपातः स उच्यते ॥
मौषलं मुषलीभूत्वा पतेद्यद्ददुदूखले ।
विमानं ध्वजमालादिशाखादोलादिकं लभेत् ॥
वृषभस्येव कृत्वा तु धूननं सुचिरं द्विज ।
वृषपातं विजानीहि रुद्रलोकफलप्रदं ॥
सिंहो गजेन्द्रनिधने यथा विक्रमते तनुं ।
एवं तत्कृतभावस्तु पातः सिंहक्रमो मतः ॥
कृत्वा तु भैरवं रूपं सायुधं विगतज्वरः ।
शिवानने क्षिपेत्कायं तं पातभैरवप्रदं ॥

पातङ्गाद्या यथा पाताः स्वात्मभावगता द्विजाः ।
तथा ते फलदाः सर्व्वे क्रमन्ते भैरवं पदं ॥
भुवनानि विचित्राणि असंख्येयानि संख्यया ।
अन्नपानानि यानीह क्रमशः सीम्नि तानि तु ॥
दीक्षादिना विरहिता येऽपि भङ्गवशङ्गताः ।
तेऽपि भुक्त्वा वरान् भोगान् प्रयान्ति परमं पदं ॥
पापोपि हि पुमांस्तत्र वर्णाश्रमविवर्ज्जितः ।
प्रभावाच्चैव देवस्य भुङ्क्ते चैव वरं सुखं ॥
नन्दकेदारदेवस्य तथा रुद्रमहालयं ।
भैरवेण तु तुल्यानि भोगान्ते मोक्षदानि तु ॥
चत्वारि देवशार्दूल सर्व्वानिष्टहराणि तु ।
प्रसङ्गेनापि मुच्यन्ते तत्र ये कुपितैर्नराः ।
तेऽपि यानं समारुह्य त्वायान्ति च शिवं पदं ॥
स्वर्गताः क्रमयोगेन भुक्त्वातु बहुधा परान् ।
विचित्ररूपसम्पन्नाः सर्व्वकामसुखप्रदाः ॥
कन्या हिरण्यवर्णाश्च पीनोन्नतपयोधराः ।
भुञ्जन्ति सुविचित्रास्ताः पातं युञ्जन्ति मानवाः ॥
नार्य्यो वा पतनं कुर्युस्तदा भुञ्जन्ति भैरवान् ।
प्रभुत्वं दिव्यभोगाद्याः अप्सरोगणसंयुताः ॥
गान्धर्व्वञ्च यथा यक्षं किन्नरं वारुणं तथा ।
तथा विद्याधरं सौरं रौद्रं च क्रमशःस्थितं ॥
स्वकामभोगसम्पन्नं पतनाद्भुवनं लभेत् ।
अकामतोपि तद्भुक्त्वा चान्ते याति परं पदं ॥

वैष्णवास्थिमयीं मालां कम्बुकं शाम्भवं सदा।
धारयेद्देवदेवेशं लोकानुग्रहकारणात् ॥
ये चित्रधातुकाष्ठोत्थं रत्नशैलमयञ्च वै।
पूजयन्ति कृतपुण्यास्तेऽपि यान्ति शिवं पदं ॥
एवं गृहेऽथ शैले वा नदीविन्ध्याटवीषु च।
भैरवं पूजयेद्यस्तु स लभेदीप्सितं फलं ॥
पत्रं पुष्पं मठं कूपमारामाणि च भैरवे।
कृत्वा च तानि चत्वारि देयानि सुखमिच्छये ॥
यद् दत्त्वा सर्व्वदेवानां फलं प्राप्नोति मानवः।
विप्रे वा वेदविदुषे तत् फलं भैरवाल्लभेत् ॥

इति भृगुपतनविधिः।

अथ संग्रामविधिः।

वह्निपुराणात्।

धर्म्मध्वज उवाच।

शूराणां मे समाख्याता स्वर्गतिर्य्युधिसंस्तरात्।
कृते त्वया मुनिश्रेष्ठ तस्मात् त्वं वक्तुमर्हसि ॥

मैत्रेय उवाच।

अग्निष्टोमादिभिर्य्यज्ञैरिष्ट्वा विपुलदक्षिणैः।
न तत् फलमवाप्नोति संग्रामे यदवाप्नुयात् ।

इति यज्ञविदः प्राहुर्यज्ञकर्म्मविशारदाः।
तस्मात्तत्ते प्रवक्ष्यामि यत् फलं शस्त्रजीविनां॥
धर्म्मलाभोऽर्थलाभश्च यशोलाभस्तथैव च।
यः शूरो विद्यते पुंसां विमृद्य परवाहिनीं॥
तस्य धर्म्मार्थकामश्च यज्ञाश्चैवाप्तदक्षिणाः।
परं ह्यभिमुखं हत्वा तद्यानं योऽधिरोहति॥
विष्णुक्रान्तं स यतते एवं युध्यन् रणाजिरे।
अश्वमेधानवाप्नोति चतुरस्तेन कर्म्मणा॥
यस्तु शस्त्रमनुत्सृज्य वीर्य्यवान् वाहिनीमुखे।
सम्मुखो वर्त्तते शूरः स स्वर्गान्न निवर्त्तते॥
राजा वा राजपुत्रो वा सेनापतिरथापिवा।
हतः क्षत्रेण येनाशु तस्य लोकोऽक्षयो ध्रुवं॥
यावन्ति तस्य शस्त्राणि भिन्दन्ति त्वचमाहवे।
तावतो लभते लोकान् सर्व्वकामदुहोऽक्षयान्॥
वीरासनं वीरशय्या वीरस्थानस्थितिस्थिरा।
गवार्थे ब्राह्मणस्यार्थे गोस्वाम्यर्थे तु ये हताः।
ते गच्छन्त्यमलं स्थानं यथा सुकृतिनस्तथा॥
अभग्नं यः परं हन्याद्भग्नञ्च परिरक्षति।
पृष्ठस्थितः पालयति सोऽपि गच्छति तद्गतिं॥
अनुत्तीर्णस्तथा सद्यः प्राणान् सन्त्यजते युधि।
हताश्वः पतते युद्धे सः स्वर्गान्न निवर्त्तते॥
दंष्ट्रिभिः शृङ्गिभिर्वापि हता म्लेच्छैश्च तस्करैः।
स्वाम्यर्थे ये हता राजन् तेषां स्वर्गो न संशयः॥

भयेन लज्जया वापि खेदेन च रणाजिरे।
सम्मुखो म्रियते राजन् तदा स्वर्गो न संशयः॥
यस्य चिह्नीकृतं गात्रं शरशक्त्यृष्टितोमरैः।
देवकन्यास्तु तं वीरं रमयन्त्यनुयान्ति च॥
पराशरः सहस्राणि शूरमायोधने हतं।
त्वरितास्तं विधावन्ति मम भर्त्ता ममेति च॥
यत्र तत्र हतः शूरः शत्रुभिः परिवेष्टितः।
अक्षयाँल्लभते लोकान् यदि क्लीवं न भाषते॥
जिते च लभते लक्ष्मीं मृते नापि सुराङ्गनां।
क्षणविध्वंसिकायाय का चिन्ता मरणे रणे॥
हतस्याभिमुखस्यस्य पतितस्यानिवर्त्तिनः।
क्रियते यत्परैर्द्रव्यं स्वमेव सफलं हि तत्॥

विष्णुधर्मात्।

शक्यन्त्विह सधर्म्मास्तु यदुक्तास्तु मनीषिभिः।
आत्मदेहस्तु विप्रार्थे त्यक्तुं युद्धे सुदुष्करं॥

यां यज्ञसङ्घैस्तपसा च विप्राः
स्वर्गैषिणः सञ्चयैश्च यान्ति।
क्षणेन तामेव गतिं प्रयान्ति
महाहवे स्वांतनुमुत्त्यजन्ति॥
सर्व्वे च वेदाः सह षड्भिरङ्गैः
साङ्ख्यञ्च योगं तपसा च पुंसां।
एतान् गुणानेकपदेऽतियेत
संग्रामधर्म्मात्मतनुं त्यजेद् यः॥

इमां गिरं चित्रपदां शुभाक्षरां
सुभाषितां वृत्रभिदां दिवौकसां।
रणोन्मुखे यः स्मरते दृढ़व्रतः
न हन्यते हन्ति च सङ्गरे रिपून्॥
एषः पुण्यतमः स्वर्गः सुयशः सर्व्वतोमुखः।
सर्व्वेषामेव वर्णानां क्षत्रियस्य विशेषतः॥
भूयश्चैव प्रवक्ष्यामि भीष्मवाक्यमनुत्तमं।
यादृशो यः प्रहर्त्ता तं तादृशं परिवर्जयेत्॥
आततायिनमायान्तमपि वेदान्तकद्रणे।
जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्॥
हताश्च न हन्तव्यः पानीयं यश्च भाषते।
व्यसनार्त्तो भवेद्यश्च भुञ्जानश्च महामते॥
पलायनपरश्चैव प्राणेषु कृपणं त्यजेत्।
विमुक्तकेशो धावंश्च यश्चोन्मत्ताकृतिर्भवेत्॥
पर्णशाखातृणग्राही तवाश्मीति च यो वदेत्।
ब्राह्मणोऽस्मीति यश्चाहं बालो वृद्धो नपुंसकः।
तस्मादेतान् परिहरेद् यथोद्दिष्टान् रणाजिरे॥

कालिकापुराणात्।

ऋषयस्तु पुरा ख्यातं नराणां नास्ति निष्कृतिः।
आतुरञ्चौतमुद्विग्नं कातरं शरणागतं॥
स्त्रियमप्यथ बालं वा गावं पङ्गुं तपस्विनं।
विलपन्तं तथोन्मत्तं विस्रस्तं ब्राह्मणं तथा॥
पतन्तं प्रपलायन्तं एकाकिनं निरस्त्रकं।

नग्नं दीनं तथा वृद्धं हतायाभ्यासमादन ॥
मुक्तकेशं तथा मत्तं सुप्तं भूरिवनौकसं ।
सूदयिष्यन्ति ये मूढ़ा नूनन्ते नरकार्णवात् ॥
अनुत्थाना विविध्यन्ते पतितः कुञ्जरो यथा ॥

विष्णुधर्म्मोत्तरात् ।

राम उवाच ।

सांग्रामिकं महत्तत्त्वं श्रोतुमिच्छामि भूभुजां ।
सर्व्वं वेत्सि महाभाग त्वं देव परमेष्ठिवत् ॥

पुष्कर उवाच ।

द्वितीयेऽहनि संग्रामो भविष्यति यदा तदा ।
गजांश्च स्नपयेद्राजा सर्व्वौषधिजलैः शुभैः ॥
गन्धमाल्यैरलङ्कुर्य्यात् पूजयेच्च यथाविधि ।
नृसिंहं पूजयेद्विष्णुं राजलिङ्गान्यशेषतः ॥
छत्रं ध्वजं पताकाञ्च धर्म्मं चैव महाभुज ।
आयुधानि च सर्व्वाणि तथा पूज्यानि भूभुजा ॥
तेषां संपूजनं कृत्वा रात्रौ प्रथमपूजनं ।
कृत्वा तु प्रार्थयेत् स्वप्नं विजयायेतराय वा ॥
प्रथमञ्च महापार्थ धरण्याञ्च महीपतिः ।
भिषक्पुरोहितामात्यमन्त्रिमध्ये तदा स्वपेत् ॥
संयतो ब्रह्मचारी च नृसिंहं संस्मरन् हरिं ।
रात्रौ दृष्टे शुभे स्वप्ने समरारम्भमाचरेत् ॥
रात्रिशेषे समुत्थाय स्नातः सर्व्वौषधोजलैः ।
पूजयित्वा नृसिंहन्तु वाहनाद्यमशेषतः ॥

पुरोधसा हुतं पश्यन् ज्वालितं जातवेदसं।
पुरोधाः पूर्व्ववत्तत्र मन्त्रांस्तु जुहुयाच्छुचिः॥
दक्षिणाभिस्ततो विप्रान् पूजयेत् पृथिवीपतिः।
ततोऽनुलिम्पेद्गात्राणि गन्धद्वारेति पार्थिव॥
चन्दनागुरुकर्पूरं कालकालीयकैः शुभैः।
मूर्द्ध्नि कण्ठे समालभ्य रोचनाञ्च तथा शुभां॥
आयुष्यं वर्च्चस्यश्चेति मन्त्रेणानेन मन्त्रितं।
अलङ्करणमावध्याच्छ्रियन्धोतुरितिस्रजं॥
ध्यात्वौषधय इत्येवं धारयेदौषधीः शुभाः।
नवोनवेति वस्त्रञ्च कार्पासं बिभृयाच्छुभं॥
ऐन्द्राग्नेति ततो धर्म्मं धन्वनागेति वै बुधः।
ततो राजा समादद्यात् सशरन्त्वभिमन्त्रितं॥
कुञ्जरं वा रथं वाश्वन्दुहेदित्यभिमन्त्रितं।
आरुह्य सिबिमद्राजा निष्क्रम्य तु समप्रभे॥
देशे च दृश्यः शत्रूणां कुर्य्यात् प्रकृतिकल्पनां।
संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून्॥
सूचीमुखमनीकं स्यादल्पाणां बहुभिः सह।
व्यूहाः प्राण्यङ्गरूपाश्च द्रव्यरूपाश्च कीर्त्तिताः॥
गरुड़ाकारव्यूहश्च चक्रश्येनस्तथैव च।
अर्द्धचन्द्रश्च वज्रश्च शकटव्यूहएव च॥
व्यूहश्च सर्व्वतोभद्रः सूचीव्यूहस्तथैव च।
पञ्चैव मण्डलव्यूहः प्राधान्येन प्रकीर्त्तिताः॥
व्यूहानामथ सर्व्वेषां पञ्चधा सैन्यकल्पना।

द्वौ पक्षौ वक्षपक्षौ तु द्वारस्य पञ्चमे भवेत्॥
एकेन यदि वा द्वाभ्यां तत्समं युद्धमाचरेत्।
भागत्रयं स्थापयेत तेषां रक्षार्थमेव च॥
न व्यूहे कल्पना कार्य्या राज्ञो भवति कर्हिचित्।
पत्रच्छेदे फलच्छेदे वृक्षच्छेदाधकल्पने॥
पुनः प्ररोहमायाति मूलच्छेदे विनश्यति।
स्वयं राज्ञा न योद्धव्यमपि सर्व्वास्त्रशालिना॥
नित्यं लोके हि दृश्यन्ते शक्तेभ्यः शक्तिमत्तराः।
सैन्यस्य पश्चात्तिष्ठेत्तु क्रोशमात्रे महीपतिः॥
भग्नसन्धारणं तत्र योधानां परिकीर्त्तितं।
प्रधानत्वेन सैन्यस्य नावस्थानं विधीयते॥
न भग्नान् पीड़येच्छत्रून् नैकायनगता हि ते।
मरणे निश्चिताः सर्व्वे हन्युः शत्रुचमूमिति॥
भटभङ्गच्छलेनापि नयन्ति स्वभुवं परान्।
तेषां स्वभूमिसंस्थानां बधः स्यात्सुकरस्तदा॥
न संहतान्न विरलान् योधान् व्यूहे प्रकल्पयेत्।
आयुधानान्तु संमर्द्दो यथा न स्यात् परस्परं॥
तथा च कल्पना कार्य्या योधानां भृगुनन्दन।
भेदकामः परानीकं संहतैरेव भेदयेत्॥
देवरक्षापरेणापि कर्त्तव्या संहता तथा।
स्वेच्छया कल्पयेत् व्यूहं ज्ञात्वा चारप्रकल्पनं॥
व्यूहास्तदा बहून् कुर्य्यात् रिपुव्यूहस्य पार्थिवः।
गजस्य देया रक्षार्थं चत्वारः सुरथा द्विज॥

रथस्याश्वाश्च चत्वारस्तावन्तस्तस्य चर्म्मिणः।
चर्म्मिभिश्च समास्तत्र धन्विनः परिकीर्त्तिताः॥
पुरस्ताच्चर्म्मिणो देया देयास्तदनु धन्विनः।
धन्विनामनु चाश्वीयं रथांस्तदनु योजयेत्॥
रथानां कुञ्जराश्चानु दातव्याः पृथिवीक्षिता।
पदातिकुञ्जराश्वानां वर्म्म कार्य्यं प्रयत्नतः॥
आवर्जयित्वा यो वाऽऽत्मानं वर्म्मयेन्नरः।
शूरा मरणकं यान्ति सुकृतेनापि कर्म्मणा॥
शूराः प्रमुखतो देया न देया भीरवः क्वचित्।
शूरा वा मुखतो दत्वा तनुमात्रप्रदर्शनं॥
कर्त्तव्यं भीरुसङ्घे न शत्रुविद्रावकारकं।
दानयन्ते(१) पुरस्तात्तु विद्रुता भीरवः पुरः॥
य उत्साहयन्ते रणे भीरुं शूराः पुरा स्थिताः।
प्रांशवः शुकनासाश्च योजिब्रक्षेक्षणा नराः॥
संहतभ्रू युगाश्चैव क्रोधनाः कलहप्रियाः।
नित्यहृष्टा न हृष्टाश्च शूरा ज्ञेयाश्च कामिनः॥
पञ्चालाः शूरसेनाश्च रणेषु कुशला नराः।
दाक्षिणात्याश्च विज्ञेयाः कुशलाः खड्गचर्म्मिणः॥
कङ्कला धन्विनो ज्ञेया पर्व्वतीयास्तथैव च।
पाषाणयुद्धकुशलाः तथा पर्व्वतवासिनः॥
काम्बोजा ये च गान्धाराः कुशलास्ते हयेषु च।
प्रायशश्च तथा म्लेच्छा विज्ञेयाः प्रासयोजिनः॥

१ पाठोऽयमादर्शदोषेण न समीचीनो भवितुमर्हति।

अङ्गा वङ्गाः कलिङ्गाश्च ज्ञेया मातङ्गयोधिनः।
आहतानाञ्च पतने रणादानयनक्रिया॥
प्रतियुद्धमजानाञ्च तोयदानादिकञ्च यत्।
आयुधानयनञ्चैव पत्तिकर्म्म विधीयते॥
रिपूणां भेत्तुकामानां स्वसैन्यस्य तु रक्षणं।
भेदनं संहतानाञ्च चर्म्मिणाञ्चर्म्मकीर्त्तनं॥
विमुखीकरणं युद्धे धन्विनाञ्च तथोच्यते।
दूरापसरणं यत्तदश्विनश्च तथोच्यते॥
प्रासनं रिपुसैन्यानां रथकर्म्म तथोच्यते।
भेदनं संहतानाञ्च भिन्नानामपि संहतिः॥
प्रासादात् गोमुखाद्दालद्रुमभङ्गाय भार्गव।
गजानां कर्म्म निर्द्दिष्टं यदसह्य तथा परैः॥
पङ्को च विषमा ज्ञेया रथाश्वस्य तथा समा।
शङ्खद्रुमा च नागानां युद्धभूमिरुदाहृता॥
एवं विरचितव्यूहः कृतपृष्ठदिवाकरः।
तथानुलोमशुक्राग्निर्दिक्पालकधमारुतः॥
योधानभ्यजयेत्सर्व्वान्नमनामावदानतः।
भोगप्राप्तता च विजयाः स्वर्गप्राप्तता मृतस्य च।
धन्यानि तु निमित्तानि वदन्ति विजयं द्विज॥
हृदनं शुभगात्राणि शुभस्वप्ननिदर्शनं।
निमित्तञ्च गजाश्वाश्च सर्व्वतो दृश्यते शुभं॥
शत्रूणां मङ्गलाश्चैव दृश्यन्ते हि मनोनुगैः।
विपरीतमरिः सर्व्वमत्र पश्यति नान्यथा॥

भवन्तोऽपि कुले जाताः सर्व्वशास्त्रार्थपारगाः ।
ननु धर्म्मपरा नित्यं नित्यं सन्मार्गमाश्रिताः ॥
धर्म्माद्यर्थाः परैर्नित्यं कथं न स्याज्जयो मम ।
राज्यश्रीर्भवतामेव भवद्भिः केवलं मम ॥
हि चामरेऽधिके शूराः छत्रं चन्द्राभमेव च ।
जित्वारिभागसम्प्राप्तिस्तस्य च परा गतिः ।
निष्कृतिः स्वामिपिण्डस्य नास्ति युद्धपरा गतिः ॥
शूराणां यद्विनिर्य्याति रक्तं साम्बाधतः क्वचित् ।
तेनैव सह पाप्मानं सर्व्वं त्यजति धार्म्मिकः ॥
तथा चिकित्सां कुर्य्याद्वा वेदनां हरते तु यः ।
ततो नास्त्यधिका लोके बाधा परमदारुणा ॥
मृतस्य नाग्निसत्कारो नाशौचं नोदकक्रिया ।
कर्त्तुमिच्छति यस्येह संग्रामादधिकस्तु किं ॥
तपस्विनो दानपरा यज्वानो बहुदक्षिणाः ।
शूरानां गतिमिच्छन्ति दृष्ट्वा भोगाननुत्तमान् ॥
वराप्सरः सहस्राणि शूरमायोधने हतं ।
अभिद्रवन्ति कामार्त्ता मम भर्त्ता भविष्यति ॥
स्वामी सुकृतमादत्तेऽभग्नानां विनिवर्त्तनात् ।
कथं तेषां तथा प्रोक्तमाश्वमेधं पदे पदे ॥
जित्वारिभोगसंप्राप्तिस्तस्य च परा गतिः ॥
सपर्य्यां तस्य कुर्व्वन्ति देवाः शक्रपुरोगमाः ।
अश्वमेधफलं प्रोक्तं भग्नानां विनिवर्त्तनात् ॥
पदे पदे महाभाग सम्मुखानां महात्मनां ।

देवस्त्रियस्तथालक्ष्मीरप्सरसामगणास्तथा ।
प्रतीक्षन्ते महाभाग संग्रामे समुपस्थिते ॥
परामर्षो मया ग्राह्यो जीवत्यथाथ वा मृते ।
इत्येवमाशयस्तस्य पापना सह तिष्ठति ॥
लक्ष्मीः सन्तिष्ठते तस्य जीवतः क्षतकर्मणः ।
मृतस्य चोपतिष्ठन्ति विमानस्थाः सुरस्त्रियः ॥
एवमुत्कर्षणं ज्ञात्वा धर्म्मेणेच्छेज्जयं रणे ।
अधर्म्मविजये राज्ञो यमलोको भयावहः ॥
अधर्म्मविजयादर्थं यच्छिद्रमभिधीयते ।
छिद्रादेवापरं छिद्रन्तस्य स्यान्नात्र संशयः ॥
न कर्णी न तथादिग्धः शरस्यार्थमयोधिनां ।
नास्तशल्यः शरःकार्य्यो दत्तशल्यश्च भार्गव ।
समः समेन योद्धव्यो नानोपचारनैर्द्विज ॥
सन्नद्धेन च सन्नद्धः साम्यसाम्यागतेन च ।
रथी च रथिना नाम पदातिश्च पदातिना ॥
कुञ्जरस्थो गजस्थेन योद्धव्यो भृगुनन्दन ।
विमुखो भग्नशस्त्रो च स्त्रीबालपरिरक्षिता ॥
व्यायुधो भग्नगात्रश्च तथैव शरणागतः ।
परेण युद्धमानश्च युद्धप्रेक्षक एव च ।
आर्त्ततोयप्रदाता च दण्डपाणिस्तथैव च ।
एते रणे न हन्तव्या सत्धर्म्ममभीप्सता ।
पापिष्ठे कूटयुद्धे तु कर्त्तव्यो मुख्यवाहनः ॥
आत्मेन प्रातिभूतेन सर्व्वोत्तीर्णबलेन च ।

दुर्दिने न च युद्धानि कर्त्तव्यानि महाबल ॥
प्रवृत्ते समरे राम परेषां नाम कारणात्।
बाहुः प्रस्फुष्य विक्रोशेद्भग्नाभग्नान् परेक्षितान् ॥
प्राप्तश्चित्रबलो भूरिनायकोऽत्र निपातितः।
सेनानीर्निहतः सोऽयं सेनानीश्चापि वेष्टितः ॥
एवं चित्रासनं कुर्य्यात्परेषां भृगुनन्दन।
विद्रुतानान्तु योधानां सुविघातो विधीयते।
धनुर्वेदविधानेन कल्पना च तथा भवेत् ॥
वपाश्च देया धर्म्मज्ञास्तथा च परमोहनी।
एतयाभ्युच्छ्रयः कार्य्यः स्वस्थले च तथा शुभः ॥
सम्भारश्चैव कर्त्तव्यो वादित्राणां जयावहः।
एतत्सर्व्वं प्रवक्ष्यामि भवोपनिषदि द्विज ॥
संप्राप्य विजयं युद्धे कार्य्यश्चैव तु पूजनं।
पूजयेत् ब्राह्मणांश्चात्र गुरूनपि तु पूजयेत् ॥
रत्नानि राजगामीनि वर्म्म वाहनमेव च।
सर्व्वमन्यद्यवेक्षस्य यद्येनैव रणे हृतं ॥
कुलस्त्रियस्तु विज्ञेयास्तथा राम न कस्यचित्।
स्वदेशे परदेशे वा साध्वी यत्र च दूषयेत् ॥
अन्यथा संगरो घोरो भवतीह जयावहः।
गर्भं प्राप्त रणे मुक्तः पुत्रस्तस्य प्रकीर्त्तितः ॥
पुनस्तेन न योद्धव्यन्तस्य धर्म्मविदां मतं।
देशे देशे य आचारः पारम्पर्य्यक्रमागतः ॥
स एव परिपाल्यः स्यात् प्राप्य देशं समीचितः।

वृषां प्रदर्शयेद्राजा समरेऽपि हते रिपौ ॥
न मे प्रियं कृतमनेन येनायं समरे हतः।
किन्तु पूजां करोत्यस्य मच्छन्दमविजानतः ॥
हतोऽयं महितार्थाय प्रियमद्यापि नो मम।
अपुत्राणां स्त्रियश्चैव नृपतिः परिपालयेत् ॥
ततस्तु स्वपुरं प्राप्य मुहूर्त्ते प्रविशेद्गृहं।
यात्राविधानविहितं भूयो दैवतपूजनं ॥
द्विजानां पूजनञ्चैव तथा कुर्य्याद्विशेषतः।
संविभागं परावाप्तैः कुर्य्याद्भृत्यजनस्य तु ॥

विजित्य धर्म्मेण नृपस्तु पृथ्वीं
यज्ञीययूपादिसुरालयाङ्कां।
कृत्वा तथान्यान् विजयांश्च यत्नात्
लोकं जयत्यप्यमराधिपस्य ॥

आह पराशरः।

ललाटे रुधिरस्रावः पतितो भुवि सङ्गरे।
सोमपानन्तदेवास्य सर्व्वदेवगणो भवेत् ॥

ललाट देशे रुधिरं स्रवच्च
यच्छस्त्रघातात्तु मुखे प्रविष्टं।
तत्सोमपानेन तु तस्य तुल्यं
संग्रामयज्ञे विधिरेव दृष्टः ॥

याज्ञवल्क्यः।

आत्मीय विप्र सर्व्वस्वं हृतं घातित एव वा।

तन्निमित्तं क्षतः शस्त्रैः कुर्व्वन्नपि विशुध्यति ॥
संग्रामे वाहनो यस्तु मृतः शुद्धिमवाप्नुयात् ।
मृतकल्पप्रहारैर्वा जीवन्नपि विशुध्यति ॥
यत्र यत्र हतः शूरः शत्रुभिः परिवेष्टितः ।
अक्षयान् लभते लोकान् यदि क्लीवं न भाषते ॥

मनुः ।

द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदिनौ ।
परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ॥

भविष्यपुराणात् ।

यो ब्राह्मणार्थमुद्युक्तः प्राणैर्यदि विमुच्यते ।
प्राप्नोति परमं स्थानं यत्र देवो दिवाकरः ॥

ब्रह्मवैवर्त्तात् ।

गोब्राह्मणस्वामिधने महार्णवे
त्यक्ता शरीराण्यभयास्तु ये नराः ।
न योगिनस्तत्परमात्मचिन्तकाः
फलं लभन्ते शमतां जनादिभिः ॥

यदाह शालिहोत्रः ।

या संख्या रोमकूपाणां वाहकस्य हयस्य च ।
तावत्समा वसेत् स्वर्गे हयपृष्ठहतो नरः ॥
यं लोकं वाजिपृष्ठेषु हता गच्छन्ति मानवाः ।
तं लोकमधिगच्छन्ति वड़वासु हताश्च ये ॥

पालकाप्यः ।

गजस्कन्धहता यान्ति स्वर्गं स्वर्गेऽपि मानतः ।

तुल्यानीगमयं (१) वीचिभ्यांरिभिरिव मन्दिरः ॥
शरतोमरचक्रैश्च नागस्कन्धहता नराः।
अथाऽस्वर्गं प्रयान्त्येव यावदाहूतसंप्लवं ॥

इति संग्रामविधिः।

———ooo@ooo———

अथ वृषोत्सर्गः।

कार्त्तिक्यामश्वयुज्यां वा। तत्रादौ वृषभं परीक्षेत। जीव-वत्सायाः पुत्रं सर्व्वलक्षणोपेतं नीललोहितं वा पुच्छपादेषु सर्व्वशुक्लं यूथस्याच्छादकं।

ततो गवां मध्ये सुसमिद्धमग्निं परिस्तीर्य्य पौष्णचरुं श्रप-यित्वा पूषा गा अन्वेतु न इहरादिति च हुत्वा वृषभमयस्कार-मानयेत्। एकस्मिन् पार्श्वे चक्रेण अपरस्मिन् शूलेनाङ्कितञ्च हिरण्यवर्णेति चतसृभिः शन्नोदेवीति च स्नापयेत्। स्नातालङ्कृतं स्नातालङ्कृताभिश्चतसृभिर्वत्सतरीभिः सार्द्धमानीय रुद्रान् पुरुष-सूक्तं कूष्माण्डीश्च जपेत्।
पिता वत्सेति मन्त्रे वृषभस्य दक्षिणे कर्णे।

वृषो हि भगवान् धर्म्मश्चतुष्पादः प्रकीर्त्तितः।
वृणोमि तमहं भक्त्या स मां रक्षतु सर्व्वतः ॥
एतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण।
मा नः साप्तजनुषेति।

---

१ पाठोऽयं चादर्शदोषेण पतीचोऽतो नापितं भवति।

माहात्म्ये हि प्रजयामातनूभिर्मारधामहिषते सोमराजन्!
वृषं वत्सतरीयुक्तं ऐशान्यां कारयेत् दिशि।
होतुर्वस्त्रयुगं दद्यात्सुवर्णं कांस्यमेव च॥
अयस्कारस्य दातव्यं वेतनं मनसेप्सितं।
भोजनं बहुसार्प्पिष्कं ब्राह्मणांश्चात्र भोजयेत्॥
उत्सृष्टो वृषभो यस्मिन् पिबत्यथ जलाशये।
शृङ्गेणोल्लिखते भूमिं यत्र क्वचन दर्पितः।
पितॄणामन्नपानादि प्रभूतमुपतिष्ठते॥

ब्रह्मपुराणे।

अश्वयुज्यां वृषोत्सर्गं कार्त्तिक्यां वा प्रयत्नतः।
कर्त्तव्यः स्वगृह्योक्तैस्त्रिभिर्वर्णैर्द्विजातिभिः॥
वृषभः कृष्णसारस्तु प्रत्यग्रस्तु त्रिहायनः।
मनोज्ञो दर्शनीयश्च सर्व्वलक्षणसंयुतः॥
अष्टाभिर्धेनुभिर्युक्तश्चतुर्भिरथवा क्रमात्।
त्रिहायनीभिर्धन्याभिः सुरूपाभिश्च शोभितः॥
सर्व्वोपकरणोपेतः सर्व्वसस्यचरी महान्।
उत्सृष्टो विधिनानेन अपि स्मृतिविधानतः॥
प्रागुदक्प्रवणे देशे मनोज्ञे निर्ज्जने वने।
न च वाह्यो न तत्क्षीरं पातव्यं केनचित् क्वचित्।
स्वधा पितृभ्यो मातृभ्यो बन्धुभ्यश्चापि तृप्तये॥
मातृपक्षाश्च ये केचित् ये चान्ये पितृपक्षजाः।
गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः।
ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्ज्जिताः।

वृषोत्सर्गेण ते सर्व्वे लभन्ते तृप्तिमुत्तमां॥
दद्यादनेन मन्त्रेण तिलाघृतयुतं जलं।
पितृभ्यश्च समासेन ब्राह्मणेभ्यश्च दक्षिणां॥
ततः प्रमुदितास्तेन वृषभेण समन्विताः।
वनेषु गावः क्रीड़न्ति वृषोत्सर्गप्रसिद्धये॥
अप्रवृत्ते वृषोत्सर्गे दाता वक्तोक्तिभिः पदैः।
ब्राह्मणानाह यत्किञ्चिन्मयोत्सृष्टन्तु निर्जने॥
तत्कश्चिदन्यो न नयेद्विभाज्यन्तु यथाक्रमं।
वृषोत्सर्गादृते नान्यत् पुण्यमस्ति महीतले॥

मत्स्यपुराणे।

मनुरुवाच।

भगवन् श्रोतुमिच्छामि वृषभस्य तु लक्षणं।
वृषोत्सर्गविधिञ्चैव तथा पुण्यफलं महत्॥
धेनुमादौ परीक्षेत सुशीलां लक्षणान्वितां।
अव्यङ्गामपरिक्लिष्टां जीववत्सामरोगिणीं॥
स्निग्धवर्णां स्निग्धखुरां स्निग्धशृङ्गांस्तथैव च।
मनोहरातिसौम्याश्च सुप्रमाणामनुद्धतां॥
आवर्त्तैर्दक्षिणावर्त्तैर्युक्ता दक्षिणतश्च या।
वामावर्त्तैर्वामतश्च विस्तीर्णजघनस्तना॥
मृदुसंहतताम्रौष्ठी रक्तजिह्वा सुपूजिता।
आस्यावदीर्घा स्फुटितरक्तजिह्वा तथा च या॥
ताम्राभवलिनेत्रा च शफैरविरलैर्दृढैः।

वैदूर्य्यमधुवर्णैश्च जलवुद्बुदसन्निभैः ॥
रक्तस्निग्धैश्च नयनैस्तथा रक्तकनीलकैः।
सप्तचतुर्दशदन्ता भवेद्श्यामतालुका ॥
षडुन्नता सुपार्श्वौ तु पृथुपञ्चसमायुता।
अष्टायतशिरोग्रीवायुता सा शुभलक्षणा॥
षडुन्नता भवेत् केषु केषु पञ्चसु चायता।
आयताश्च तथैवाष्टौ धेनूनाञ्च शुभावहाः॥

मत्स्य उवाच।

उरः पृष्ठं शिरः कुक्षिः श्रोणी च वसुधाधिप।
षडुन्नतानि धेनूनां कथयन्ति विचक्षणाः॥
कर्णौ नेत्रे ललाटञ्च पञ्चैव रविनन्दन।
समायतानि शस्यन्ते पुच्छं शस्तश्च चामरं॥
चत्वारश्च स्तना राजन् एवमष्टौ मनीषिभिः।
शिरोग्रीवायुताश्चैव भूमिपालायता भृशं॥
तस्याः सुतं परीक्षेत वृषभं लक्षणान्वितं।
उन्नतस्कन्धककुदं ऋजुलाङ्गूलकम्बलं॥
महाकटिं तटस्कन्धं वैदूर्य्यमणिलोचनं।
प्रवालवर्णशृङ्गाग्रं सुदीर्घमणिबालधिं॥
नवाष्टदशसंख्यैर्वा तीक्ष्णाग्रैर्दशनैः शुभैः।
मल्लिकाक्षश्च मोक्तव्यो गृहेऽपि धनधान्यदः॥
वर्णतस्ताम्रकपिलो ब्राह्मणस्य प्रशस्यते।
श्वेतो रक्तश्च गौरश्च कृष्णः पाटल एव च॥
इन्द्रनीलाभपृष्ठश्च शबलः पञ्चकालकः।

पृथुकर्णो महास्कन्धश्चतनुरोमा च यो भवेत्॥
रक्ताक्षः कपिलो यश्च रक्तशृङ्गश्च यो भवेत्।
श्वेतोदरः कृष्णपृष्ठो ब्राह्मणस्य च शस्यते॥
स्निग्धरक्तेन वर्णेन क्षत्रियस्य प्रशस्यते।
काञ्चनाभेन वैश्यस्य कृष्णो नाप्यन्त्यजन्मनः॥
यस्य प्रागायते शृङ्गे स्वमुखाभिमुखे सदा।
सर्व्वेषामेव वर्णानां स च सर्व्वार्थसाधकः॥
मार्जारपादकपिलो धन्यः कपिलपिङ्गलः।
श्वेतो मार्जारपादस्तु धन्यो मणिनिभेक्षणः॥
करटः पिङ्गलश्चैव श्वेतपादस्तथैव च।
स्वच्छपादशिरा यस्तु द्विपादः श्वेत एव च॥
कपिञ्जलनिभोधन्यस्तथा तित्तिरसन्निभः।
आकर्णमूलाच्छन्नं तु मुखं यस्य प्रकाशते।
नान्दीमुखः स विज्ञेयो रक्तवर्णो विशेषतः॥
श्वेतञ्च जठरं यस्य भवेत् पृष्ठञ्च गोपते।
वृषभः स समुद्राख्यः सततं कुलवर्द्धनः॥
मल्लिकापुष्पचित्रश्च धन्यो भवति पुङ्गवः।
कमलैर्मण्डलैश्चापि चित्रो भवति गोप्रदः॥
अतसीपुष्पवर्णश्च तथा धन्यतरः स्मृतः।
एते धन्यास्तथाधन्यान् कीर्त्तयिष्यामि ते नृप॥
कृष्णतालूष्ठदशना रूक्षशृङ्गशफाश्च ये।
अव्यक्तवर्णा ह्रस्वाश्च व्याघ्रभस्मनिभाश्च ये॥
ध्वाङ्क्षगृध्रसवर्णाश्च तथा मूषकसन्निभाः।

कुण्ठाः काणास्तथा खञ्जा केकराक्ष्यास्तथैव च।
विषमश्वेतपादाश्च उद्भ्रान्तनयनास्तथा॥
न ते वृषाः प्रमोक्तव्या न ते धार्य्यास्तथा गृहे।
मोक्तव्यानाञ्च धार्य्याणां भूयो वक्ष्यामि लक्षणं॥
स्वस्तिकाकारशृङ्गाश्च मेघौघसदृशस्वनाः।
महाप्रमाणाश्चैव तथा मत्तमातङ्गगामिनः॥
महोरस्का महोच्छ्रासा महाबलपराक्रमाः।
शिरः कर्णौ ललाटञ्च बालधिश्चरणास्तथा॥
नेत्रे पार्श्वे च कर्षानि शस्यन्ते चन्द्रसन्निभाः।
श्वेतान्येतानि शस्यन्ते कृष्णस्य तु विशेषतः॥
भूमौ कर्षति लाङ्गूलं सुस्थूलश्चैव बालधि।
पुरस्तादुच्चतो नातो वृषभस्तु प्रशस्यते॥
शक्तिध्वजपताकाभा येषां राजी विराजते।
अनड्वाहस्तु ते धन्या विच्चसिद्धिजयावहाः॥
प्रदक्षिणा निवर्त्तन्ते स्वयं ये विनिवर्त्तिताः।
समुन्नतशिरोग्रीवा धन्यास्ते यूथवर्द्धनाः॥
रक्तशृङ्गोग्रनयनाः श्वेतवर्णो भवेद्यदि।
शफैः प्रवालसदृशैर्नास्ति धन्यतमस्ततः॥
एते धार्य्याः प्रयत्नेन मोक्तव्या यदि वा वृषाः।
धारिताश्च तथा मुक्ता धनधान्यविवर्द्धनाः॥
चरणाश्च मुखं पुच्छं यस्य श्वेतानि गोपते।
लाक्षारससवर्णश्च तं नीलमिति निर्दिशेत्॥
वृष एव स मोक्तव्यो न स धार्य्यो गृहे भवेत्।

तदर्थमेषाविरला लोके गाथा पुरातनी।
एष्टव्या बहवः पुत्रा यद्यप्येको गयां व्रजेत्॥

एवं वृषं लक्षणसम्प्रयुक्तं
गृहोद्भवं क्रीतमथापि राजन्।
मुक्ता न शोचेन्मरणं महात्मा
गौ वा विधिं वै महते विधास्येत्॥

आदित्यपुराणात्।

भानुरुवाच।

मुञ्चन्ति वृषभं ये तु नीलस्यैव सुशोभनं।
लाङ्गूलाकर्णसर्व्वाङ्गं शृङ्गयुक्तं मनोहरं॥
कार्त्तिक्यां ददते यस्तु दत्त्वा पूजां न संशयः।
चित्रयास्त्वथ गुर्विन्यो दद्याद्गावो वृषस्य च॥
सावित्रीञ्च जपेत्तत्र तथा चैवाघमर्षण।
कर्णजाप्यं प्रदद्यात् तु वृषभस्य न संशयः॥
घण्टां लोहकृतां दद्यात् शृङ्गैश्च पटलैः शुभैः।
रुद्रस्यापि भोजयेच्च ब्राह्मणान्वै यथाविधि॥
यावन्ति रोमकूपाणि वृषभस्य भवन्ति वै।
गवाञ्चैव तथा लोम यावच्छ्रयति वै मुने।
तावत्कोटिसहस्राणि रुद्रलोके महीयते॥
यत्किञ्चित् कुरुते पापं पुरुषो वृत्तिकर्षितः।
ते सर्व्वे विलयं यान्ति गोपते परिमोचनात्॥
वृषभस्यैव शब्देन पितरः सपितामहाः।
पाशच्छलेन दृश्यन्ते स्वर्गलोके न संशयः॥

जले प्रक्षिप्य लाङ्गूलन्तोयश्चोद्दरते वृषः।
दशवर्षसहस्राणि पितरस्तेन तर्पिताः॥
कूले समुल्लिखता यावच्छृङ्गे लिखति मृत्तिकां।
भक्ष्यभोज्यमयैः शैलैः पितरस्तेन तर्पिताः॥
गवां मध्ये यदा चैव वृषभः क्रीड़ते तु यः।
अप्सरसां सहस्रेण क्रीड़न्ते पितरः सदा॥
लाङ्गूलमुत्सृजन् यावत्तोये संक्रीड़ते तु सः।
अप्सरोगणसङ्घैश्च सेव्यन्ते पितरस्तदा॥
सहस्रदत्तमात्रेण तड़ागेन यथाविधि।
तृप्तिस्तु या पितृणां वै सा वृषेण समीर्य्यते॥

देवीपुराणात्।

मनुरुवाच।

अश्वमेधसमं पुण्यं वृषोत्सर्गादवाप्यते।
रेवत्यां वाश्विने मासि कृत्तिकां कार्त्तिकस्य वा॥
गोविवाहोऽथ वा कार्य्यो माघ्यां वै फाल्गुनेऽपिवा।
शिवोमामङ्गलं चैव तृतीयायां महाफलं॥
अश्वत्थोदुम्बरीयोगं विवाहविधिना भवेत्।
सतोरणं भवेत्तीर्थे उत्सङ्गे गोकुलेऽपिवा॥
चतस्रो वत्सिका भद्रा द्वौ वा सम्भवतोऽपिवा।
वत्सं सर्व्वाङ्गसम्पूर्णं कन्या सा वत्सिका भवेत्॥
अलङ्कृत्वा यथाशोभं उत्सर्गं कारयेन्मने।
विवाहमेकवात्सर्य्यं नीलेन च लभते सदा॥

वृषेण चाश्वमेधस्य यागस्य लभते फलं ।
जायेरन् बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ॥
यजेत चाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥
रोहितो यस्तु वर्णेन शङ्खवर्णखुरो वृषः ।
सलाङ्गूलं शिरः श्वेतं स वै नीलवृषः स्मृतः ।
अङ्कं वोत्सृज्य वै पूर्व्वं गां वालकृत्य सर्व्वतः ।
तद्दक्षिणे वामतश्चक्रं याम्ये शूलं समालिखेत् ॥
धातुना हेमतारेण आयसेनाथवाङ्कयेत् ।
एवं कृत्वा अवाप्नोति फलं वाजिमखोदितं ॥
यमुद्दिश्योत्सृजेद्वत्सं स लभेताविचारणात् ।
यथा शिवोमयोरर्च्चा पूजिता सर्व्वकामदा ॥
एवं देवत्रयं यष्टा अनन्तं लभते फलं ।
मङ्गलं विहितं यच्च कृत्वा गोदानजं फलं ।
क्रतोः सहस्रं कृत्वा यत् वृषोत्सर्गादवाप्नुयात् ॥

वाराहपुराणात् ।

मुक्ता तु नीलकण्ठन्तु कौमुद्याः समुपागमे ।
श्राद्धं कृत्वा तु सुश्रोणि तर्पयित्वा द्विजातयः ॥
दत्त्वा तिलोदकं पिण्डं पितृपितामहेषु च ।
नरा ये चात्र तिष्ठन्ति पतिताः पितृबान्धवाः ॥
तेषान्त्राता भविष्यन्ति नील सृष्टो यथाविधि ।
गृहीत्वोडुम्बरं पात्रं कृत्वा कृष्णतिलोदकं ॥
विप्राणां वचनं कृत्वा यथाशक्त्या च दक्षिणां ।
नीलकण्ठस्य लाङ्गूले तोयमभ्युत्सृजेद्यदि ॥

षष्टिवर्षसहस्राणि पितरस्तेन तर्पिताः ॥
मुक्तमालेण शृङ्गेण नीलकण्ठेन भेदितं।
उद्धृतं यदि सुश्रोणि पङ्कं शृङ्गगतं भवेत् ॥
बान्धवाः पितरस्तस्य नरके ये वसन्ति च।
उद्धृता नरकात् सर्व्वे सोमलोकं व्रजन्ति ते।
नीलकण्ठस्य मुक्तस्य बहुपुण्येन सुन्दरि ॥
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च।
सोमलोके तु भुञ्जन्ति सर्व्वेऽमृतरसं सदा ॥

कालिकापुराणात्।

अनिलाद उवाच।

नीलोत्पलसमप्रख्यः श्वेताङ्गश्चन्द्रमस्तकः।
सुभ्रूर्युवा लोहिताक्षो वृषभो नील उच्यते ॥
अथवा लोहितं पिङ्गं सुश्वेतं वा विमोचयेत्।
चतुष्पात् सकलो धर्म्मो वृषोऽयं हरवाहनः ॥
तमुद्दिश्य समो कृष्यो विधिना येन मे शृणु।
सोपवासः शुचिः स्नात्वा गवाश्चैव हरालयं ॥
वितानदीपमुच्छाद्य विन्यसेच्छिवमूर्द्धनि।
गन्धेन शुभगन्धेन स्नानं संकारयेच्छिवे ॥
पलैस्तु पञ्चत्रिंशद्भिः सर्पिषा यत्नतो बुधः।
समुद्धृत्य कषायैस्तु चाल्य कोष्णेन वारिणा ॥
भूयोऽप्यभ्यङ्गा यत्नेन पञ्चगव्येन शङ्करं।
ततः स्नाप्य शिवं भक्त्या कर्पूरागुरुचन्दनैः ॥

पूजयेत् कुसुमैः श्रेष्ठैः समालिप्य च चन्दनैः ।
सौवर्णपङ्कजं कार्य्यं पञ्चविंशद्दलाकुलं ॥
सरत्नञ्च न्यसेन्मूर्द्ध्नि केसराढ्यं सकर्णिकं ।
वस्त्रयुग्मं तथा श्वेतं सूक्ष्मं दद्यात्सुशोभनं ॥
दत्त्वार्घ्यं शोधयेद्दीपं ततः षड्विंशसंख्यया ।
रौप्यताम्रादिपात्रस्थं नीराजनन्तु कारयेत् ॥
ततो भूतबलिं दद्यात्सर्व्वदिक्षु प्रयत्नतः ।
पूजान्ते पूजयेद्विप्रानष्टौ दद्याच्च दक्षिणां ॥
ततो वेदीं वितानञ्च चतुर्हस्तं प्रकल्पयेत् ।
तत्रैवाग्निं समाधाय चरुत्रयं न्यसेद्बुधः ॥
स्थालीपाकञ्च रुद्राय यावकं चरुपायसं ।
तथा चाहुतये दत्त्वा एभीरौद्रैर्वलिन्ततः ॥
हरेः सर्व्वासु काष्ठासु मन्त्रेण विधिपूर्व्वकं ।
सार्द्धं ब्रह्मतरोभिश्च ब्रह्मघोषेण वै ततः ॥
अभिषिच्य वृषं तन्तु निर्दिष्टेन कर्म्मणा ।
रक्तपीतासितैः क्षौमैः पुष्पैश्चापि विभूषयेत् ॥
संयुक्तं वस्त्रयुग्माभ्यां हेमवैदूर्य्यसम्भवे ।
घण्टिके कर्णिकाभ्याञ्च बासयित्वा विभूषयेत् ॥
विकिरेच्च ततो लाजान् जातवेदः प्रदक्षिणं ।
परोताञ्जलिना पुच्छं सहेमेन तु धारयेत् ॥
हराय परमेशाय पुष्पोदकयुतेन च ।
हस्तादुत्क्षिप्य मोक्तव्यो मया दत्तमुदीरयेत् ॥
आत्मामूर्द्धस्फिचावृष्टं मोचयित्वा प्रदक्षिणं ।

अङ्कयेत् त्रिशूलेन कुङ्कुमेन विपश्चितः ॥
दद्याद्दर्शयते कुम्भं प्रणम्येशञ्च सोदकं।
कर्षार्द्धहेमविन्यस्तं सम्पूर्णं तिलसंयुतं ॥
तं चास्य वस्त्रयुग्मेन सहाचार्य्याय दापयेत्।
शिवव्रतधरान् विप्रान् संयतांश्च विशेषतः ॥
हिरण्यवस्त्रदानेन व्रतस्थान् भोज्य दच्चयेत्।
दीनान्धदुःखितानाञ्च भोजनञ्चानिवारितं ॥
अरण्ये चत्वरे वापि गोष्ठे वा गोचयेत् वृषं।
न गृहे मोचयेद्विद्वान् पुष्कलं कामनाफलं ॥

विष्णुधर्म्मोत्तरात्।

मार्कण्डेय उवाच।

अश्वयुक् शुक्लपक्षस्य पञ्चदश्यां नराधिप।
कार्त्तिके प्यथवा मासि वृषोत्सर्गन्तु कारयेत् ॥
ग्रहणे द्वे महापुण्ये तथा चैवायनद्वये।
विषुवद्वितये चैव मृताह्ने बान्धवस्य च ॥
मृताहो यस्य यस्मिन् वा तस्मिन्नहनि कारयेत्।
मातरं स्थापयित्वाग्रे पूजयेत् कुसुमाक्षतैः ॥
मातृश्राद्धं ततः कुर्य्यात् वंशाभ्युदयकारकं।
अक्षालमूलं कलसं अश्वत्थदलसेवितं ॥
तत्र रुद्रान् समावाह्य जपयेद्रुद्रदेवताः।
सुसमिद्धं गवां मध्ये सुविस्तीर्य्य हुताशनं।
पयसा श्रपयेद्विद्वान् चरुं पौष्णं समाहितः ॥

तथैव पौरुषं सूक्तं कूष्माण्डानि तथैव च ।
ततोऽङ्कयीत वृषभमवस्कारः सुशिल्पवान् ॥
शूलेन दक्षिणे पार्श्वे वामे चक्रेण निर्दिशेत् ।
अङ्कितं स्नपयेत्पश्चात् स्नाने तस्य यथा पठेत् ॥
हिरण्यवर्णेति ऋचयतस्रो मन्त्रेश्वर ।
आपोहिष्ठेति तिस्रश्च शन्नोदेवीति वाप्युत ॥
वत्सतर्य्यश्चतस्रस्तु तं वृषञ्च नराधिप ।
अलङ्कुर्य्यात्ततः पश्चाद्गन्धमाल्यैश्च शक्तितः ॥
किङ्किणीभिश्च रम्याभिस्तथा चीनांशुकैः शुभैः ।
ततोऽङ्किते जपेन्मन्त्रमिमं प्रयतमानसः ॥
वृषो हि भगवान् धर्म्मश्चतुष्पादः प्रकीर्त्तितः ।
वृणोमि तमहं भक्त्या स मां रक्षतु सर्व्वतः ॥

एतं युवानं वृषभं ददामि
गवां पतिं यूथपतिं महार्घं ।
अनेन सार्द्धञ्चरत प्रकामं
कामं तथा प्राप्नुत वत्सतर्य्यः ॥
एतं युवानं पतिं वो ददामि
तेन क्रीड़न्त्यश्चरत प्रियेण ।
साहस्रम्हि प्रजया मातनूभि
स्तन्यारिषाम दिवते सोमराजं(१) ।
मन्त्रं पितावक्र इति प्रतीतं
जपेत कर्णे वृषभस्य सव्ये ।

१ खोकार्ईविर न मन्नोचीनं ।

प्रधावयेत्तं वृषभं ततस्तु
पूर्व्वां दिशं वत्सतरीस्तु सर्व्वाः॥
वासोयुगं होतुरथ प्रदेयं
सुवर्णयुक्तं सघृतञ्च कांस्यं।
शिल्पिप्रधानस्य तथैव मूल्यं
देयं तथा पुष्टिमुपैति राजन्॥
विप्रास्तथान्नं दधिसर्पिषा युतं
सम्भोजनीयाः पयसा च मिश्रं।
उत्सृष्टमात्रे वृषभे व्रजन्ति
तृप्तिं परान्तस्य पितामहा ये॥
यस्मिंस्तड़ागे स जलं तृषार्त्तः
पातुं समागच्छति तत् पितृणां।
दिव्याम्बु पूर्णा सकलां महीपते
लोके परे तृप्तिमसौ विधत्ते॥
सरिद्वरां काञ्चिदथोपयाति
तृषान्वितस्तस्य पितामहानां॥
तृप्तिं विधत्ते सरितास्वरिष्ठा
सुदीर्घ कालं विविधाम्बुवाहा॥
दर्पेण पूर्णः स विषाणघातै-
र्धरां यदा दारयते नरेन्द्र।
पित्रादयस्तस्य तदन्न कूटां
ध्रुवं लभन्तीति न संशयोऽत्र॥
रोमाणि तुल्यानि शतानि राजन्

मोक्ता तथा तस्य दिवं प्रयाति ।
संवत्सराणां परिपूर्णकामः
संसेव्यमानस्त्रिदशाङ्गनाभिः ।

इति वृषोत्सर्गविधिः ।

———000———

शतानीक उवाच ।

भगवन् केन विधिना श्रोतव्यं भारतं नरैः ।
चरितं रामभद्रस्य पुराणानि विशेषतः ॥
कथञ्च वैष्णवा धर्म्माः शिवधर्म्मा अशेषतः ।
सौराणां वापि विप्रेन्द्र श्रवणे उच्यतां विधिः

सुमन्तुरुवाच ।

हन्त ते कथयिष्यामि पुराणश्रवणे विधिं ।
इतिहासपुराणानि श्रुत्वा भक्त्या विशाम्पते
मुच्यते सर्व्वपापेभ्यो ब्रह्महत्यादिभिर्विभो ॥
सायं प्रातस्तथा रात्रौ शुचिर्भूत्वा शृणोति यः
तस्य विष्णुस्तथा ब्रह्मा तुष्यते शङ्करस्तथा ॥
प्रत्यूषे भगवान् ब्रह्मा दिनान्ते तुष्यते हरिः ।
महादेवस्तथा रात्रौ शृण्वतां तुष्टिमाप्नुयात ।
पुराणानि दशाष्टौ च तदेकं शृण्वतां विभो ।
भारतं राजशार्द्दूल शृणु तेषाञ्च यत् फलं ।
विधानं वाचकस्येदं शृणु तावद्विशाम्पते ॥
शुक्लवासा गृहादेव स्नानं यत् समयान्वितं ।

प्रदक्षिणं ततः कृत्वा वा तस्मिन् देवतेव हि ॥
तां विधानेन सर्व्वेषां यथेषगुणवन्नृप।
नमस्कृत्य यथा न्याय्यं शिवमस्त्विति चासतः।
नान्यतो नृपशार्दूल सर्व्ववर्णमहीपते ॥
शूद्राणां पुरतो वैश्या वैश्यानां क्षत्रियास्तथा।
क्षत्रियाणां तथा विप्राः शृण्वन्तोऽतेऽग्रतः सदा
मध्यस्थितोऽथ सर्व्वेषां वाचको वाचयेन्नृप।
ये च सङ्करजा राजन् दूरात्तच्छृणुयुस्ततः ॥
ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात्।
श्रुत्वान्यवर्णजाद्राजन् वाचकान्नरकं व्रजेत् ॥
इत्थं हि शृण्वतां तेषां वर्णानामनुपूर्व्वशः।
मासि मासि भवेद्राजन् पारणं कुरुनन्दन ॥
श्रेयोऽर्थमात्मनो राजन् पूजयेद्वाचकं नृप।
मासि पूर्णे नृपश्रेष्ठ दातव्यः स्वर्णमाषकः ॥
ब्राह्मणेन महाबाहो द्वौ देयौ क्षत्रियेण तु।
वाचकस्य नृपश्रेष्ठ वैश्येनापि त्रयस्तथा ॥
शूद्रेणाप्यथ चत्वारो दातव्याः स्वर्णमाषकाः।
मासि मासि नृपश्रेष्ठ श्रद्धया वाचकस्य तु ॥
प्रथमे पारणे राजन् वाचकं पूज्य शक्तितः।
अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥
कार्त्तिकादि महाबाहो कार्त्तिकं यावदेव तु।
अग्निष्टोमं गोसवञ्च ज्योतिष्टोमं तथैव च ॥
मैत्रावरुणं वाजपेयं वैष्णवञ्च तथा विभुं।

माहेश्वरं तथा ब्राह्मं पुण्डरीकस्य भूपते ॥
आदित्ययज्ञस्य यथा राजसूयाश्वमेधयोः ।
फलं प्राप्नोति राजेन्द्र मासैर्द्वादशभिः क्रमात् ॥
इत्थं यज्ञफलं प्राप्य याति लोकाननोत्तमान् ॥
समाप्ते पर्व्वणि तथा स्वशक्त्या तर्पयन् नृप ।
वाचकं ब्राह्मणश्चैव सर्व्वकामैः प्रपूजयेत् ।
गन्धमाल्यानि दिव्यानि वस्त्राण्याभरणानि च ।
वाचकाय प्रदद्यात्तु तत्र विप्रान् प्रपूजयेत् ॥
हिरण्यं रजतं वस्त्रं गावः कांस्योपदोहनीः ।
दत्वा तु वाचकायेह श्रुतस्य प्राप्नुते फलं ॥
वाचकः पूजितो येन प्रसन्नास्तस्य देवताः ।
तस्माद्धनं सदा पूर्व्वं देयन्तस्य विदुर्बुधाः ॥
श्राद्धे तस्य द्विजो भुङ्क्ते वाचकः श्रद्धयान्वितः ।
भवन्ति पितरस्तस्य तृप्ता वर्षशतं नृप ॥
ब्राह्मणादिषु वर्णेषु ग्रन्थार्थं वाचयेन्नृप ।
य एवं वाचयेद्राजन् स विप्रो व्यास उच्यते,॥
अतोऽन्यथा वाचयानो ज्ञेयोऽसौ पितृनामतः ।
इत्थम्भूतो वसेद्यस्मिन् वाचको व्याससंमितः ॥
देशेषु पत्तने राजन् स देशः प्रवरः स्मृतः ।
प्रणम्य वाचके भक्त्या यत् फलं प्राप्यते नरैः ॥
न तत्क्रतुसहस्रेण प्राप्यते कुरुनन्दन ॥
यथैकतो ग्रहाः सर्व्वे एकतस्तु दिवाकरः ।
तथैकतो द्विजाः सर्व्वे एकतस्तु स वाचकः ॥

दैवे कर्म्मणि पित्रे च पावनं परमं नृप।
वाचकश्च यतिश्चैव तथा चैव षडङ्गवित्॥
एते सर्व्वे नृपश्रेष्ठ विज्ञेयाः पङ्क्तिपावनाः।
त्रिविधं वाचकं विद्यात्सदारगुणभेदतः॥
श्रावकश्च महावाहो त्रिविधो गुणभेदतः।
द्वावेतौ कथ्यमानौ त्वं निबोध गदतो मम॥
अतिद्रुतं तथाऽस्पष्टं स्वरसर्व्वविवर्ज्जितं।
पदच्छेदविहीनञ्च तत्सद्भावविवर्ज्जितं॥
अबुध्यमानो ग्रन्थार्थं लोभमोहात्तवर्ज्जितः।
ईदृशं वाचयेद्यस्तु स विप्रश्च नरेश्वर॥
क्रोधनोऽप्रियवादी च अज्ञातो ग्रन्थदूषकः।
न च वदाति कष्टानि स ज्ञेयो वाचकोऽधमः॥
विस्पष्टमद्रुतं शास्त्रं स्पष्टाक्षरपदं तथा।
तारस्वरसमायुक्तं रसभावविवर्जितं॥
अबुध्यमानो ग्रन्थार्थं वाचयेद्यस्तु वाचकः।
स ज्ञेयो राक्षसो राजन् इदानीं सात्विकं शृणु॥
ग्रन्थार्थं बुध्यमानस्तु समग्रं कृत्स्नशो नृप।
ब्राह्मणादिषु वर्णेषु अर्चयेद्विधिवन्नृप॥
य एवं वाचयेद्राजन् स ज्ञेयः सात्विको बुधैः।
श्रद्धाभक्तिविहीनोऽसौ लोभी च दूषकस्तथा॥
हेतुवादपरो राजन् तथासूयासमन्वितः।
नित्यां नैमित्तिकीं काम्यामदद्दक्षिणां नृप॥
वाचकाय महावाहो शृणुयाद्यस्तु मानवः।

स ज्ञेयस्तामसो राजन् तामसो मानवः सदा ।
न तस्य पुरतो वीर वाचयेत् प्राज्ञ एव हि ॥
प्रसङ्गात् शृणुयाद्यस्तु श्रद्धाभक्तिविवर्जितः ।
श्रोता कौतुकमात्रस्तु स ज्ञेयो राजसो बुधैः ॥
सन्त्यज्य सर्व्वकर्माणि भक्तिश्रद्धासमन्वितः ।
सततं पूजयानस्तु वाचकं श्रद्धया नृप ॥
नित्ये नैमित्तिके काम्ये गुरवे च ददत्तथा ।
य एव वाचको वीर स ज्ञेयः सात्विको बुधैः ॥
व्यासः पूज्यः श्रावकाणां यथा व्यासवचो नृप ।
तस्मात् पूज्यो नृपश्रेष्ट प्रथमं वाचको बुधैः ॥
आपत्काले च वृद्धौ च तथाऽसौ गुरुवत् स्मृतः ॥
वैशाखसमये वीर तृतीयायान्तु सुव्रत ।
कार्त्तिक्यामथ माघ्याञ्च संपूज्यः प्रथमो भवेत् ॥
पर्व्वस्वेतेषु च विभो संपूज्य धर्मतः स्मृतः ॥
हिरण्यञ्च सुवर्णञ्च धनं धान्यं तथैव च ।
अन्नञ्चापि तथा पक्कं मांसञ्च कुरुनन्दन ।
दातव्यं प्रथमं तस्मै श्रावकैरतिभक्तितः ॥
दत्त्वा पुष्पं फलं तोयं पत्रमिन्धनमेव च ।
सारस्वतश्च ग्रन्थान्तस्मै देयं समस्ततः ॥
यथ सर्व्वैस्तथा कार्य्यं श्रावकैः पूजनं नृप ।
वाचकस्तु यथा नित्यं सुखमास्ते नराधिप ।
न पीड्यते यथा द्वन्द्वैस्तथा कार्य्यं नराधिप ।
हेमन्ते लोमशं देयं छत्रं प्रावृषि चोत्तमं ॥

उपानहौ कालयोगे कालौ वै कुशलोमशौ ॥
यदा दातुं न शक्नोति साधकं काञ्चनस्य तु।
ततस्तस्य तदा दद्यात् साधकं श्रेयसेऽनघ ॥
तदभावे हिरण्यन्तु वित्तशाठ्यं विवर्जयेत्।
मृत्तिकापि हि दातव्या कुर्वता सफलं श्रुतं ॥
इत्येषा कथिता नित्या मासि मासि भवेत्ततः।
नैमित्तिकी भवेद्राजन् ग्रहणादिषु पर्व्वसु ॥
अमले वाससी राजन् गन्धमाल्यविभूषणे।
समाप्ते पर्व्वणि विभो दातव्ये भूतिमिच्छता ॥
ज्ञात्वा पर्व्वसमाप्तिन्तु वाचकं पूजयेद् बुधः।
आत्मानमपि विक्रीय य इच्छेत् सफलं श्रुतं।
नैमित्तिकीच नित्याञ्च दक्षिणां न ददाति यः ॥
शृणोति च सदा तात तस्य तत् निष्फलं फलं।
चतुर्गुणा भवेद्राजन् या नित्यं दक्षिणा विभो ॥
ऐच्छिकं भोगमाप्नोति इत्याह भगवान् शिवः।
इत्येष कथितो राजन् पुराणश्रवणे विधिः ॥

इति श्रीमहाराजाधिराज-श्रीमहादेवस्य समस्तकरणा-
धीश्वर-सकलविद्याविशारद-श्रीहेमाद्रिविरचिते
चतुर्व्वर्गचिन्तामणौ व्रतखण्डे
प्रकीर्णकव्रतानि।

अथ शान्तिकपौष्टिकानि।

नीतः शान्तिमनः स्वदानसलिलस्रावैः सहस्रैरसौ
येनात्यर्थकदर्थितार्थिनिवहो दारिद्र्यदावानलः।
लोकं यः सततं कृपालुहृदयः पुष्णाति तृष्णातुरं
सोऽयं शान्तिकपौष्टिकानि गदितुं हेमाद्रिरभ्युद्यतः॥

तत्र विनायकस्नपनमुच्यते।

आह याज्ञवल्क्यः।

विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः।
गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा॥
तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत।
स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति॥

अत्यर्थमिति स्रोतसि ह्रियते निमज्जति वा अवगाहमानस्य च बलवत्त्वात्।

काषायवाससश्चैव क्रव्यादांश्चाधिरोहति॥

क्रव्यादः, गृध्रव्याघ्रादीन्।

अन्त्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठति।
व्रजमानं तथात्मानं मन्यतेऽनुगतं परैः॥

परैः शत्रुभिः, पृष्ठतो धावद्भिरभिभूयमानं मन्यते।

विमना विफलारम्भाः संसीदत्यनिमित्ततः।
तेनोपसृष्टो लभते न राज्यं राजनन्दनः॥

कुमारी न च भर्त्तारमपत्यङ्गर्भसङ्गता।
आचार्य्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा॥
वणिक् लाभं न वाप्नोति कृषिञ्चैव कृषीवलः।
स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्व्वकं॥

पुण्येऽह्नि, अनुकूलनक्षत्रादियुतेऽह्नि न रात्रौ।

गौरसर्षपकल्केन साज्येनोत्सादितस्य तु।

'उत्सादनमुद्वर्त्तनं'।

सर्व्वौषधैः सर्व्वगन्धैर्विलिप्तशिरसस्तथा।
भद्रासनोपविष्टस्य स्वस्तिवाच्याः द्विजाः शुभाः॥

शुभा अनूचानाः। चत्वारो द्विजाः स्वस्ति भवन्तो ब्रुवन्त्विति वाच्याः। अस्मिन् समये गृह्योक्तविधिना पुण्याहवाचनं कुर्य्यादित्यर्थः।

अश्वस्थानाद्गजस्थानाद्वल्मीकात् सङ्गमात् ह्रदात्।
मृत्तिकां रोचनां गन्धान् गुग्गुलञ्चाप्सु निक्षिपेत्॥
या आहृता ह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात्।
चर्म्मण्यानडुहे रक्ते स्थाप्य भद्रासनं तथा॥

तत उक्तोदकमृत्तिकां गन्धादिसहितांश्चूतादिपल्लवोपशोभितान् तान्स्रग्दामवेष्टितकण्ठान् चन्दनेन चर्चितान् नवाहतवस्त्रभूषितांश्चतुरः कलशांश्च तिसृषु पूर्व्वादिषु दिक्षु स्थापयित्वा शुचौ सुलिप्ते स्थण्डिले रचितपञ्चवर्णस्वस्तिके लोहितमानडुहं चर्मोत्तरलोमप्राचीनग्रीवमास्तीर्य्य तस्योपरि श्वेतवस्त्रप्रच्छादितमासनं स्थाप्य तत्रोपविष्टस्य स्वस्तिवाचनानन्तरं जीवत्पतिपुत्राभिः रूपगुणशालिनीभिः कृतमङ्गलस्य गुरुरभिषेकं कुर्य्यात्।

सहस्राक्षं शतधारमृषिभिः पावनं कृतं।
तेन त्वामभिषिञ्चामि पावमानाः पुनन्तु ते॥
भगन्ते वरुणो राजा भगं सूर्य्यो बृहस्पतिः।
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो विदुः॥
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि।
ललाटे कर्णयोरक्ष्णोरापस्तत् घ्नन्तु ते सदा॥

कलशत्रये मन्त्रत्रयमुक्तं, चतुर्थे तु सर्व्वमन्त्रैरभिषेकः।

स्नातस्य सार्षपन्तैलं स्रुवेणौदुम्बरेण तु॥
जुहुयान्मूर्द्धनि कुशान् सव्येन परिगृह्य च।

सव्यपाणिगृहीतकुशानन्तर्द्धारं जुहुयात्॥

मितश्च संमितश्चैव तथा शालकटं कटौ।
कूष्माण्डो राजपुत्रश्चेत्यग्नस्वाहसमन्वितैः।
नामभिर्बलिमन्त्रैश्च नमस्कारसमन्वितैः॥

प्रणवादिभिरितिशेषः।

अनन्तरं लौकिकेऽग्नौ स्थालीपाकविधिना चरुं श्रपयित्वा तैरेव षड्भिर्मन्त्रैस्तस्मिन्नेवाग्नौ हुत्वा तच्छेषञ्च बलिमन्त्रैरिन्द्राग्नि यम-निर्ऋति वरुण-वायु सोमेशानब्रह्मानन्तानां नामभिश्चतुर्थ्यन्तैर्नमोन्तैर्म्मन्त्रैर्भ्यो बलिन्दद्यात्।

दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य्य यत्नतः।
कृताकृतांस्तण्डुलांश्च पललौदनमेव च॥

कृताकृताः सकृदवहताः तण्डुलाः पललं तिलपिष्टन्तन्मिश्रमोदनं पललौदनं।

मत्स्यान् पक्वांस्तथैवामान् मांसमेतावदेव तु।
चित्रं पुष्पं सुगन्धञ्च सुराञ्च त्रिविधामपि॥
मूलकं पूरिकां पूपांस्तथैवोण्डरकस्रजः।
दध्यन्नं पायसञ्चैव गुडपिष्टं समोदकं।

उण्डरका पिष्टादिमय्यः ताः प्रोताः स्रजः, गुडपिष्टं गुडमिश्रं शाल्यादिपिष्टं।

एतान् सर्व्वानुपाहृत्य भूमौ कृत्वा ततः शिरः।

एतान्याहृत्य

ओं तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि
तन्नो दन्ती प्रचोदयात्। इति विघ्नेशं।

सुभगायै विद्महे काममालिन्यै धीमहि तन्नो गौरी प्रचोदयादिति अम्बिकां नमस्कुर्य्यात्।

एवं विनायकं तज्जनन्यै संपूज्योपहारशेषमास्तीर्य्य कुशे सूर्पे निधाय चतुष्पथे निदध्यात्।

बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा।
मरुतोऽथाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः॥
असुरा यातुधानाश्च पिशाचा मातरो नगाः।
शाकिन्यो यक्षवेतालयोगिन्यः पूतना शिवाः॥
जृम्भकाः सिद्धगन्धर्व्वा मालाविद्याधरानघाः।
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः॥
जगतां शान्तिकर्त्तारो ब्रह्माद्याश्च महर्षयः।
भूचराः खेचराश्चैव ये चान्ये चोपदेशिकाः॥

मा विघ्नो मा च मे पापं मा सन्तु परिपन्थिनः ।
सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः ॥

इत्येते चतुष्पथे बलिहरणमन्त्राः ॥

विनायकस्य जननीमुपतिष्ठेत्ततोऽम्बिकां ।
दूर्वासर्षपपुष्पाणां दत्त्वार्घं पूर्णमञ्जलिं ॥

स कुसुमेनोदकेनार्घं दत्त्वा दूर्वासर्षपपुष्पाणां पूर्णमञ्जलिञ्च दत्त्वोपतिष्ठेत वक्ष्यमाणमन्त्रेण ।

रूपं देहि यशो देहि भवं भगवति देहि मे ।
पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे ॥

विनायकोपस्थाने भवत्वित्यूहः ।

ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ।
ब्राह्मणान् भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि ॥

गुरोर्दक्षिणादानमप्यभिप्रायात् । विनायकोद्देशेन ब्राह्मणेभ्यश्च ।

एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ।
कर्म्मणां फलमाप्नोति श्रियं प्राप्नोत्यनुत्तमां ॥

आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा ।
महाभोक्षपतश्चैव कुर्व्वन् सिद्धिमवाप्नुयात् ॥

विनायकोपसृष्टाधिकारे ।

भविष्यत्पुराणे ।

करणे मूढ़माश्चानमनोलाम्बरगस्तथा ।
पिहभिश्चाहतो याति बध्यामनिकटं नृप ॥

करणे विषये कार्य्ये मनोलाम्बरगः भूम्यादावसंलग्नः मध्यन्तरीक्षे गच्छतीत्यर्थः ।

पश्यति नृपशार्दूल स्वप्नान्ते नात्र संशयः।
तैलार्द्रगात्रविधुरं करवीरविभूषितं॥

स्वप्नान्ते स्वप्नमध्ये। तथा

स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्व्वकं।
गौरसर्षपकल्केन सक्तुनोत्सादितो नरः॥
शुक्लपक्षे चतुर्थ्याश्च वारेण धिषणस्य च।
तिथौ वीरजनक्षत्रे तस्यैव पुरतो नृप॥

उत्सादित उद्वर्त्तितः। धिषणो वृहस्पतिः।

सर्व्वौषधैः सर्व्वगन्धैर्विलिप्तशिरसस्तथा।
भद्रासनोपविष्टस्य स्वस्तिवाच्या द्विजाः शुभाः॥
व्योमकेशन्तु संपूज्य पार्व्वतीं भीमजन्मथा।
कृष्णास्य पितरं वाथ पकर्म्मारम्भिनं तथा॥
धिषणं श्वेदपुष्पश्च कोपलक्ष्मीश्च भारत।
विप्रस्तकं वाहुलेयं नवकस्य च धारिणं।

अश्वस्थानगजस्थान इत्यादिको मन्त्रो याज्ञवल्क्यसमानः।

अम्बिकोपस्थानमन्त्रस्तु।

रूपं देहि यशो देहि भगं भगवति देहि मे।
पुत्रान् देहि धनं देहि सर्व्वकामांश्च देहि मे॥
अचलां कुरु मे देवि विपुलां ख्यातिसम्भवां।

ख्यातिसम्भवा लक्ष्मी।

इति विनायकस्नपनं।

कुमार उवाच।

स्नानमन्यत् प्रवक्ष्यामि तवाहं दुरितापहं।
राजन् माहेश्वरं पुण्यं सततं विजयावहं॥
दानवेन्द्राय तु यते यज्जगाद मनुः पुरा।
धन्यं यशस्यमायुष्यं सर्व्वशत्रुक्षयङ्करं॥
प्रभातायाश्च शर्व्वर्य्यां भास्करेऽभ्युदिते तथा।
स्नायीत दानवश्रेष्ठ विधिदृष्टेन कर्म्मणा॥
सौवर्णं राजतं कुम्भं अथवापि महीमयं।
नादेयैः सारसैस्तोयैः कल्पयित्वा यथाविधि॥
औषधीर्विन्यसेत्तत्र समाभ्यक्ताः सुपूजिताः।
जया च विजया चैव तथा सुत्रफलेति च॥
धूपनं सुरवीजा च भक्तो च कुसुमानि च।
वीरजं पद्मनिर्म्माल्यं देवीनिःसारमेव च॥
फलिनी वराङ्गना चैव गजेन्द्रस्य च मञ्जरी।
क्षुद्राक्षुद्रजा चैव घने द्वे द्वे विभावरी॥
महौषधं मृत्तिके चैव तुम्बं यशभुव तथा।
गगाह्वमगदश्चैव दानव करिणस्तथा।
ओषध्यः कथितास्तुभ्यं स्नानमन्त्रमतः शृणु॥

ओं नमो भगवते रुद्राय धवलपाण्डुरोपचितभस्मानुलिप्तगात्राय।

तद्यथा।

जय जय विजय सर्व्वाङ्गसमसुख कलहविग्रहविवादेषु।
जम्भ जम्भ मथ मथ सर्व्वप्रत्यर्थिनां।

योऽसौ युगान्तकाले तु दिधक्षति इमां पुनः।
रौद्रीं मूर्त्तिं समास्थाय: स त्वां रक्षतु जीवितं॥
संवर्त्ताग्नितुल्यश्च त्रिपुरान्तकरः शरः।
सर्व्वदेवमयः सोऽपि स त्वां रक्षतु जीवितं॥

निखिलनैमित्यनि स्नाशा।

एवं स्नानन्तु तेनैव मन्त्रेण तिलतण्डुलं।
घृताक्तं ज्वलिते वह्नौ जुहुयात् प्रयतः शुचिः॥
ततः संपूजनं कुर्य्याद्देवदेवस्य शूलिनः।
घृतक्षीराभिषेकेण गन्धपुष्पफलाक्षतैः॥
दीपधूपनमस्कारैस्तथा चान्नेन भूरिणा।
गीतवाद्यैस्तु मधुरैर्ब्राह्मणस्वस्तिवाचनैः॥

माहेश्वरस्नानमिदं हि कृत्वा
रक्षोघ्नं शत्रुनिवर्हणञ्च।
सर्व्वानवाप्नोति नरस्तु कामान्
यान्यान् कांश्चिन्मनसि स्थिताय॥

इति विष्णुधर्म्मोत्तरोक्तं माहेश्वरस्नानं।

———000@000———

पुष्कर उवाच।

स्नानान्यन्यानि ते वक्ष्मि निबोध गदतो मम।
रक्षोघ्नानि यशस्यानि मङ्गल्यानि विशेषतः॥
स्नानं घृतेन कथितमायुषोवर्द्धनं परं।
राम गोमयजता स्नानं परं लक्ष्मीविवर्द्धनं॥

गोमूत्रेण तथा स्नानं सर्व्वपापनिवर्हणं ।
पञ्चगव्यजलस्नानं सर्व्वव्याधिनिषूदनं ।
स्नानं क्षीरेण कथितं बलबुद्धिविवर्द्धनं ।
स्नानञ्च कथितं दध्ना परं लक्ष्मीविवर्द्धनं ॥
तथा दर्भोदकस्नानं सर्व्वपापनिवर्हणं ।
पञ्चगव्यजलस्नानं सर्व्वकार्य्यार्थसाधकं ॥
गवां शृङ्गोदकस्नानं सर्व्वपापनिवर्हणं ।
पलाशबिल्वकमलपुष्पस्नानं पुरोहितं ॥
वचा हरिद्रा मञ्जिष्ठा तगरं वाचके तथा ।
स्नानमेतद्धिनिर्द्दिष्टं रक्षोघ्नं पापसूदनं ॥
वचा हरिद्रे द्वे मुस्ते स्नानं रक्षोघ्नं परं ।
आयुष्यञ्च यथा यशस्यं धन्यं मेधाविवर्द्धनं ॥
स्नानं पवित्रं माङ्गल्यं तथा काञ्चनवारिणा ।
क्रमाद्गमतरे किञ्चिद्रूप्यताम्रोदकैस्ततः ॥
तथा रत्नोदकैः स्नानं संग्रामे विजयाम् कृष ।
वैकुण्ठमध्यतः कृत्वा प्रवालैः परिचारयेत् ॥
तेन पात्रेण यत् स्नानं सर्व्वकामप्रदं भवेत् ।
तथा पुष्पोदकस्नानं भवेदारोग्यकारकं ॥
तथा बीजोदकस्नानं सर्व्वबीजप्रसादकं ।
तथैवामलकस्नानं अलक्ष्मीनाशनं परं ॥
तिलसिद्धार्थकैः स्नानमसाङ्गल्यप्रणाशनं ।
केवलैर्व्वा तिलैः स्नानं यद्वा गौरसर्षपैः ।
स्नानं प्रियङ्गुना प्रोक्तं तथा सौभाग्यवर्द्धनं ॥

वन्ध्याकर्कोटकीमूलं कुमारी पद्मचारिणी।
स्नानं रोगविनाशाय वस्तं प्रत्येकशो द्विज॥
मांसी मुरा चोरकनागपुष्पैः
समांसदामैररिनाशकेच।
कुरङ्ग कङ्कोलकजातिपूगैः
समस्तसौख्यञ्च सुतप्रदं स्यात्॥

इति विष्णुधर्म्मोत्तरोक्तनानास्नानविधिः।

———ooo———

युधिष्ठिर उवाच।

रुद्रस्नानं विधानेन कथयस्व जनार्द्दन।
सर्व्वदुष्टोपशमनं सर्व्वशान्तिप्रदं नृणां॥

कृष्ण उवाच।

देवसेनापतिस्कन्दं रुद्रपुत्रं षडाननं।
अगस्त्यो मुनिशार्द्दूलः सुखासीनमुवाच ह॥
सर्व्वज्ञोऽसि कुमार त्वं प्रसादाच्छङ्करस्य वै।
स्नानं रुद्रविधानेन ब्रूहि कस्य कथं भवेत्॥

स्कन्द उवाच।

मृतवत्सा तु या नारी दुर्भगा सुतवर्ज्जिता।
या सूते कन्यकां वन्ध्यां स्नानमासां विधीयते॥
अष्टम्यां वा चतुर्द्दश्यां उपवासपरायणा।
स्नातौ पक्षे चतुर्थेऽह्नि प्राप्ते सूर्य्यदिनेऽथ वा॥

मध्योस्तु सप्तमी कुर्य्याच्चतुर्दश्यां विशेषतः।
शिवालयेऽथवा गोष्ठे विविक्ते वा गृहाङ्गणे॥
आहिताग्निं द्विजं शान्तं धर्म्मज्ञं सत्यशालिनं।
आचार्य्यं प्रार्थयेद्देवं निपुणे रौद्रकर्म्मणि॥
ततस्तु मण्डपं कुर्य्याच्चतुरस्रमुदक्प्लवं।
तत्र चन्दनमाल्यैश्च गोमयेनानुलेपितं॥
तन्मध्ये सितरजसा संपूर्णं पद्ममालिखेत्।
मध्ये तस्य महादेवं स्थापयेत् कर्णिकोपरि॥
दद्याद्दलेषु मन्त्रादीन् चतुर्षु विधिपूर्व्वकं।
इन्द्रादिलोकपालांश्च दलेष्वन्येषु विन्यसेत्॥
देवीं विनायकञ्चैव स्थापयेत्तत्र पार्थिव।
दत्त्वार्घ्यं गन्धपुष्पञ्च धूपं दीपं गुडोदनं॥
भक्ष्यान्नानाविधान् दद्यात् फलानि विविधानि च।
चतुःकोणेषु शृङ्गारानम्रदलभूषितं॥
एकैकं विन्यसेद्ब्रह्मन् सर्व्वौषधिसमन्वितं।
चतुर्दिक्षु मण्डपस्य दद्याद्भूतबलिं ततः॥
आग्नेय्यां दिशि कर्त्तव्यं मण्डलस्य समीपतः।
अग्निकार्य्यं शुभे कुण्डे पत्रपुष्पैरलङ्कृते॥
लवणं सर्पिषा युक्तं घृतेन मधुना सह।
मासं स्तोकेन जुहुयात् शतहोमे नवग्रहे॥
द्वितीयस्याग्निकार्य्यस्य कर्त्ता च ब्राह्मणो भवेत्॥
रुद्रजाप्यकृदाचार्य्यं सितचन्दनचर्चितं।
सितवस्त्रपरीधानं सितमाल्यविभूषित॥

शोभयेत् वस्त्रैः कण्ठैः कर्णवेष्टाङ्गुलीयकैः।
मण्डपस्य समीपस्थो जपेद्रुद्रान् विमत्सरः॥
यावदेकादश गताः पुनरेव जपेच्च तान्।
देवमण्डलवत् कार्य्यं द्वितीयं मण्डलं शुभं॥
तस्य मध्ये तु या नारी श्वेतपुष्पैरलङ्कृता।
श्वेतवस्त्रपरीधाना श्वेतगन्धानुलेपना॥
सुखासनोपविष्टा या आचार्य्यो रुद्रजापकः।
अभिषिञ्चेत्ततश्चैनामर्कंचपुटाञ्जुना॥
चतुःषष्टिसंख्यानामेकादशकल्पः।
पवित्रामिन्द्रकोटाजम्बुगोदावरीमदं।
सर्व्वौषधी रोचनाश्च नदीतीर्थोदकानि च॥
एतत् संक्षिप्य कलशे शिवसंज्ञसुपूजिते।
आपादतलकेशान्तं शुचिदेशे विशेषतः॥
सर्व्वाङ्गं लेपयेद्धन्या सुशीला काचिदङ्गना।
रुद्राभिजपेन ततः स्नापयेत् ललनाश्च तां॥
तोयपूर्णाष्टकलशैरश्वत्थदलपूरितैः।
सर्व्वतोदिक्स्थितैः पश्चात् स्नापयेत् कलशाश्चतैः॥
एवं स्नाता जापकाय दद्याद् गां काञ्चनं तथा।
होतुरेवाथ निर्द्दिष्टा दक्षिणा गौः पयस्विनी॥
ब्राह्मणानामथान्येषां स्वशक्त्या मुनिपुङ्गव।
गोवस्त्रकाञ्चनादीनि दत्वा सर्व्वान् क्षमापयेत्॥
व्रतेनानेन विप्रेन्द्र रुद्रस्नानेन भामिनि।
सुभगा कान्तिसंयुक्ता बहुपुत्रा प्रजायते॥

सर्व्वेष्वपि हि मासेषु ब्राह्मणानुमते शुभं ।
तस्मादवश्यं कर्त्तव्यं पुंसां स्त्रीणां सुखमिच्छति ॥
या स्नानमाचरति वह्रमिति प्रसिद्धं
श्रद्धान्विता द्विजवरानुमता नताङ्गी ।
दोषान् निहत्य सकलांश्च शरीरभाजो
भर्त्तुः प्रिया भवति भारत जीववत्सा ॥

इति भविष्यत्तरोक्तं रुद्रस्नानं ।

———ooOoo———

ईश्वर उवाच ।

शृणु षण्मुख तत्त्वेन स्नानं घटिकया परं ।
धारयिष्यन्ति ये वत्स घटिकां देवनिर्म्मितां ॥
तेषामर्थश्च कामश्च सौभाग्यं हविमेष्यति ।
पूर्व्वोक्तं मण्डलं कृत्वा गौरीं तत्रैव पूजयेत् ॥
कुङ्कुमागुरुकर्पूरचन्दनेन विलेपयेत् ।
ऐशान्यां दिशि संस्थाप्य घटिकां मधुपूरितां ।
पुष्पमाल्यैरलङ्कृत्य रक्तसूत्रेण वेष्टयेत् ॥
हिरण्यं निक्षिपेत्तत्र न शून्यां कारयेद् बुधः ।
वस्त्रेण तु समाहृत्य गन्धांस्तत्रैव निक्षिपेत् ॥
कुङ्कुमागुरुकर्पूरचन्दनेन विलेपयेत् ॥
उशीरं चन्दनं मुस्तां बालकं सर्व्वौषधं ।
तथा चामलकीं दूर्वां क्षिपेद्गोरोचनां बुधः ॥
शतमष्टोत्तरं कृत्वा गौर्य्या वै मूलविद्यया ।

ततोऽभिमन्त्य घटिकां गौरीमन्त्रेण तां पुनः।
शताष्टाधिकजप्तेन अभिमन्त्योदकं गुह॥
ततोऽभिषेकं कुर्य्याद्वै योषितो वा नरस्य वा।
घटिकाभिषिक्ता चैव या नारी मण्डले गुह।
सुभगा सा भवेन्नित्यं नरश्च विधिवद्गुह॥
अपुत्रा लभते पुत्रं अजीवा जीविनी भवेत्।
अनेनैव विधानेन गुर्व्विणी यदि कारयेत्॥
पुत्रं प्रसूयते सा तु महावीर्य्यपराक्रमं।
राजा विजयमाप्नोति धारयित्वा सुसङ्करे॥
या या रूपवती कन्या वरं न लभते सदा।
सा घटिकाभिषेकेण सौभाग्यमतुलं लभेत्॥
येन येन हि भावेन घटिकां कारयेद्बुधः।
तस्य तेन हि भावेन तत्फलं ददते बुधः॥
पञ्चनीकं यथोक्तञ्च सङ्क्षेपेण मयश्रुण।
तत्सर्व्वं मूलमाश्रित्य अनेनैव तु कारयेत्॥
मूलमाश्रित्य पूर्व्वोक्तमूलमन्त्रेण सर्व्वः।
न घटिकापरं किञ्चित्सौभाग्यकरणं मतं।
न घटिकापरं स्कन्द धर्म्मकामार्थमोक्षदं॥
घटिका धारयेद्यस्तु स कामानखिलान् लभेत्।
अपुत्रो लभते पुत्रमधनो धनमाप्नुयात्॥

इति भविष्यत्पुराणोक्तो घटिकाभिषेकः।

———

कार्त्तिकेय उवाच।

पूर्व्वमेव त्वया ख्यातं सन्ति वन्ध्या न हि स्त्रियः।
दोषैस्तु विविधाकारैर्ग्रहधातुविकारजैः।
वन्ध्यात्वं जायते तासां तानाचक्ष्व प्रयत्नतः॥

ईश्वर उवाच।

ग्रहदोषान् प्रवक्ष्यामि शृणु पुत्र यथार्थतः।
द्वात्रिंशतिर्ग्रहाः प्रोक्ता नारीपीड़ाकरास्तु ते॥
ग्रहाः कौमारिकायाश्च तेऽपि द्वात्रिंशकीर्त्तिताः।
चतुःषष्टिश्च संख्या वै ग्रहाणां क्रूरकर्म्मणां॥
चतुःषष्टिसहस्राणि एकैकस्य प्रविस्तरः।
तेषां मध्ये तु प्रोच्यन्ते चतुःषष्टिस्तु नायकाः॥
दोषैर्द्वादशभिर्वत्स ग्रहा गृह्णन्ति योषितं॥
एकपात्रेण यानेन परशय्यासनेन तु॥
परपुरुषसंयोगेन परवस्त्रविभूषणैः॥
उच्छिष्टकमाल्येन एकभाजनभोजनैः॥
केशोदकेन संस्नानाद्वन्यनार्य्यावगूहनात्।
एतैर्दोषैश्च सर्व्वैश्च ग्रहाः पीडाकराः स्मृताः॥
प्रथमं गृह्णते पुष्पं गर्भञ्च तदनन्तरं।
पश्चात् क्षीरस्ततो बालमेवमाहुर्न संशयः॥
ग्रहनामानि वक्ष्यामि सचरी रेवती शिवा।
सुखमन्दी च लम्बा च पूतना कण्ठपूतना॥
गोमुखी च बिड़ाली च तथा चैव महाबला।
काकोली च हसन्ती च चचरारी तथा तथा।

मुक्तकेशी विदग्धी च पञ्चास्यमुखी च रोचना॥
मुकुला पिङ्गला नाम पिटनासा तथापरा।
स्कन्दपक्षास्तथा चान्ये सर्वेषां नायकाः स्मृताः॥
रजनी कुम्भकर्णी च तापसी राक्षसी परा।
मोदनी रोदनी चात्र धनदा च कुला तथा॥
चतुःषष्टिः समाख्याता मातरो बालमातरः।
आर्जको जम्भको नाम उपस्कन्दश्च पञ्चमः॥
बालानां पीडनाः सर्वे भ्रमन्ते बलिकाङ्क्षिणः।
बलिमन्त्राद्विधानेन ततो मुञ्चन्ति नान्यथा॥
चतुरस्रं कृतं चैव समसूत्रं कृतं ततः।
समभागान् समान् सर्वान् कृत्वा होमं विचक्षणः॥
तेषामन्तरकोष्ठेषु नवपद्मानि कारयेत्।
सर्वाग्राभ्यन्तरे वत्स चक्रमालिख्य यत्नतः॥
अष्टपत्रं सितं शुभ्रं केसरैः सह कर्णिकैः।
तेषु पात्रेषु च गणाः सर्व्वे तुष्टिं यथाक्रमं॥
पूर्वादौ पूजयेत् सर्वान् तथाष्टाष्टकमष्टधा।
शिवन्तु कर्णिकामध्ये पद्मेषु नवसु स्थितं॥
कमले मध्यमे वत्स षड्भिस्तु सहितं शिवं।
पूजयेत् पूर्वविधिना कल्पयित्वा तु वासनं॥
अस्य कर्माणि वक्ष्यामि येन मुञ्चन्ति योषितः।
ज्ञात्वा तासां विकारांश्च सर्व्वाभरणभूषिताः॥
स्नापयेच्च विधानज्ञः सोपवासपरायणः।
व्यतीपातविनिर्मुक्ते कालशुद्ध्यां शुभेऽहनि॥

त्रिषूत्तरेषु रेवत्यां प्राजापत्ये पुनर्वसौ।
अश्विन्यामथ पुष्ये च नक्षत्रे रोहिणी तथा॥
मातृगृहे गृहे वापि त्रिपथे वा चतुष्पथे।
जीर्णकूपे तड़ागे वा नदीनां सङ्गमेषु च॥
एकवृक्षे श्मशाने वा देवतायतनेऽपि वा।
अष्टम्यां राजपत्नीस्तु मध्याह्ने स्नापयेत्ततः॥
पुत्रकामास्तु गोतीर्थे राजपत्नीस्तु सङ्गमे।
मातृस्थाने तु दौर्भाग्यां श्मशाने मृतपुत्रिकां॥
काकवन्ध्यां जीर्णकूपे वन्ध्यां पुष्करिणीषु च।
अभिचारकृतां नारीं पुत्रपत्नविरेतसं।
स्नापयेत्तान् प्रयत्नेन शिवायतनसङ्गमे॥
आचार्य्यस्तु सुसंपूर्णः शुक्लवस्त्रः शुचिः सदा।
अष्टहस्तप्रमाणेन चतुर्हस्तमथापि वा॥
चतुर्हस्तं चतुर्द्वारं तोरणध्वजशोभितं।
चन्द्राभन्तु कृतादीपं पुष्पमाल्योपशोभितं।
खानपानैश्च नैवेद्यैर्विविधं कारयेद्बलिं॥
त्रिरजोभिः समालिख्य मण्डलं सर्व्वकामिकं।
सितरक्तं तथा कृष्णं वर्णानाञ्च क्रमेण तु॥
ईशो ब्रह्मा तथा विष्णुः रजसामधिपाः स्मृताः॥
मण्डलस्योत्तरे भागे कुर्य्यात् स्नपनमण्डलं।
चतुर्हस्तप्रमाणेन वर्णकैरुपशोभितं॥
अकालमूलकलसां चतुरष्टप्रमाणतः।
चूतपल्लवसंयुक्तान् तथेष्टपरिवेष्टितान्।

हिरण्यक्षतदूर्व्वाभिरोषधीसञ्चसंयुतान्॥
नद्याश्चोभयकूलास्तु वल्मीकद्रुममूलतः।
गृहीत्वा मृदमत्यास्तु स्थापयेत् प्रथमे घटे॥
द्वितीये गोमयं स्थाप्य तृतीये गन्धवारि च।
चतुर्थे हेमरजते पञ्चमे सर्व्वमोषधं॥
षष्ठे तीर्थाम्बुविन्यासः सप्तमे सप्तसागरं।
कलशे चाष्टमे न्यस्य शङ्करं मातृभिः सह।
अनेन विधिना मन्त्री त्वभिषेकं प्रदापयेत्॥
मृतवत्सा जीवपुत्रा वन्ध्या चापि प्रसूतिका।
अबीजा बीजतां याति स्त्री वाथ पुरुषोऽपिवा।
अभिचारकृतं दोषं मन्त्रोऽयं नाशयेदिति॥
अनेनैव हि योगेन सुश्वेन सर्व्ववस्तुना।
दुर्भगा सुभगा वापि कन्या प्राप्नोति सद्वरं॥
हस्त्यश्वरथयानं वा मुकुटं कुण्डलानि च।
धनधान्यहिरण्यानि येन वै तुष्यते गुरुः।
येन तुष्टेन तुष्यन्ति देवता मातरो ग्रहाः॥

अथाभिषेकविद्या भवति। ओं रों श्रों सों वौषट्। अभिषेकोऽनेन कीलिते गर्भे ओं वज्रः। स्त्री स्वाहा। अनेनाभिषेक भुक्तान्ते पुरुषः स्यात्। ओं स्त्रीलयुं स्वाहा।

पुत्रार्थे तु नारीणामभिषेकञ्च कारयेत्॥
ओं रों ह्रां स्वाहा। अनेन कीलिते गर्भे अभिषेकं देयं।
यो जीवति तस्यान्तेन सुतं वा पतिं ध्रुवं।
ओं ह्रां फट्। रें स्वाहा।

सर्षपैरक्षतैर्वापि तं देहन्ताडयेच्छिशोः ।
नो नश्येन्म्रियते बालो वर्द्धते जीवते ध्रुवं ॥

इति वन्ध्याभिषेकविधिः ।

———ooo@ooo———

मनुरुवाच ।

इन्द्वादित्योपरागे च यत्स्नानमभिधीयते ।
तत्सर्व्वं श्रोतुमिच्छामि द्रव्यं मन्त्रविधानतः ॥

मत्स्य उवाच ।

यस्य राशिं समासाद्य भवेद्ग्रहणसम्भवः ।
तस्य स्नानं प्रवक्ष्यामि मन्त्रौषधिसमन्वितं ॥
चन्द्रोपरागं संप्राप्य कृत्वा ब्राह्मणवाचनं ।
संपूज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनैः ॥
सर्व्वमेवोपरागस्य समानीयौषधादिकं ।
स्थापयेच्चतुरः कुम्भान् अव्रणान् सलिलान्वितान् ॥
गजाश्वरथ्यावल्मीकसङ्गमाद्ध्रदगोकुलात् ।
राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॥
पञ्चगव्यञ्च कुम्भेषु पञ्चरत्नानि चैव हि ।
रोचनापद्मशङ्खञ्च पञ्चभङ्गसमन्वितं ॥
स्फटिकञ्चन्दनञ्चैव तीर्थवारि ससर्षपं ।
गजदन्तं कुङ्कुमञ्च तथैवोशीरगुग्गुलं ।
एतत्सर्व्वं विनिक्षिप्य कुम्भेष्वावाहयेत्सुरान् ॥
सर्व्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।

आयान्तु यजमानस्य दुरितक्षयकारकाः॥
योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः।
सहस्रनयनश्चेन्द्रः पीडामस्य व्यपोहतु॥
मुखं यः सर्व्वदेवानां सप्तार्चिरमितद्युतिः।
चन्द्रोपरागसम्भूतामग्निपीडां व्यपोहतु॥
यः कर्म्मसाक्षी लोकानां धर्म्मराजेतिविश्रुतः।
यमश्चन्द्रोपरागोत्थां पीडामस्य व्यपोहतु॥
रक्षोगणाधिपः साक्षात् प्रलयानलसंप्रभः।
खड्गव्यग्रोऽतिभीमश्च रक्षःपीडां व्यपोहतु॥
नागपाशधरो देवः सदा मकरवाहनः।
स जलाधिपतिश्चन्द्रः ग्रहपीडां व्यपोहतु॥
योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः।
चन्द्रोपरागकलुषं धनदेवो व्यपोहतु॥
योऽसाविन्दुधरो देवः पिनाकी वृषवाहनः।
चन्द्रोपरागपापानि विनाशयतु शङ्करः॥
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च।
ब्रह्मविष्ण्वर्कयुक्तानि तानि पापं हरन्तु ते॥
पूजयेद्वस्त्रगोदानैर्ब्राह्मणानिष्टदेवतां।
एतामेव ततो भक्त्याञ्चितश्च कनकाञ्चितां।
प्राङ्मुखः पूजयित्वा तु सम्यक्तामिष्टदेवतां॥
कलशं द्रव्यसंयुक्तं प्रासं यद्दत्पञ्चकं चि।
चन्द्रग्रहे निवृत्ते तु कृते गोदोहमङ्गले।
कृतस्नानश्च तं पटं ब्राह्मणाय निवेदयेत्॥

अनेन विधिना यस्तु समग्रं स्नानमाचरेत्।
न तस्य ग्रहपीडा स्यान्न च बन्धुधनक्षयः॥
परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम्।
सूर्यग्रहे सूर्यनाम सदा मन्त्रेषु कीर्तयेत्॥
इत्येतदेव कथितं स्नानं नृपकुलोद्वह।
अस्मिंस्तु पद्मरागः स्यात् कपिला च सुशोभना॥
य इदं शृणुयान्नित्यं श्रावयेद्वापि मानवः।
सर्वपापविनिर्मुक्तः शक्रलोके महीयते॥
चन्द्रग्रहे नृप रविग्रहणेऽप्यजस्रं
मन्त्रैरिमैः समभिमन्त्र्य शुभोदकुम्भान्।
स्नानं करोति नियमेन नरस्य पीडा
न तस्य तं ग्रहकृता सुचिरं दुनोति॥

इति मत्स्यपुराणोक्तं चन्द्रसूर्योपरागस्नानं।

अथातो यमलजननशान्तिं व्याख्यास्यामो यस्य भार्या गौर्दासी वडवा विकृतिं प्रसवेत्। प्रायश्चित्तीभवेत् पूर्वं दशाहे चतुर्णां क्षीरवृक्षाणां कषायमुपसंहरेत्। प्लक्षवटोदुम्बराश्वत्थशमीदेवदारुगौरसर्षपास्तेषां सचिरत्नदूर्वाङ्कुरैश्च पञ्चविंशतौ कलशान् पूरयित्वा सर्वौषधिना दम्पती स्नापयेत्। आपोहिष्ठेति तिसृभिः, कयानश्चित्रेति पञ्चेन्द्रैश्च पञ्चवारुणैरिदमापः प्रवहतेत्यपाघमिति स्नापयित्वाऽलङ्कृत्य तौ दर्भेषु उपवेशयेत्। मारतं स्थाली-

पाकं श्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोति। पूर्व्वोक्तस्नपनमन्त्रैः स्थालीपाकं जुहोति। अग्नये स्वाहा। पवनाय स्वाहा। मारुताय स्वाहा। यमाय स्वाहा। अन्तकाय स्वाहा। मृत्यवे स्वाहा। ब्रह्मणे स्वाहा। अग्नये स्विष्टिकृते स्वाहा। गृहोत्पातेषूलूकः कपोतो गृध्रः श्येनोवाविशेचस्ततः प्ररोहेवल्मीको वा भवेदुदकुम्भप्रचलने, आसनशयनयानभङ्गे, गृहगोधिकाकृकलासरीसृपसर्पणे, छत्रध्वजविनाशेऽप्यन्ये उत्पाते ष्येतदेव प्रायश्चित्तं यद्दशशान्तिं प्रोक्तेन विधिना कृत्वाचार्य्याय वरं दत्वा स्वस्ति वाच्याशिषः प्रतिगृह्य शान्तिर्भवतीति।

इति कात्यायनोक्तयमलजननशान्तिः।

पुष्कर उवाच।

दन्तजन्मविशालानां लक्षणं तन्निबोध मे।
उपरि प्रथमं यस्य जायन्ते हि शिशोर्द्विजाः॥
दन्तैर्वा सह यस्य स्याज्जन्म भार्गवसत्तम।
मातरं पितरं वाथ खादेदात्मानमेव वा।
तत्र शान्तिं प्रवक्ष्यामि तां मे निगदतः शृणु॥
गजपृष्ठगतं बालं नौस्थं वा स्थापयेद्द्विज।
तदभावेन धर्म्मज्ञ काञ्चनेन वरासने॥
सर्व्वौषधैः सर्व्वगन्धैर्बीजैः पुष्पैः फलैस्तथा।
पञ्चगव्येन रत्नैश्च पताकाभिश्च भार्गव।
स्थालीपाकेन दातारं पूजयेत्तदनन्तरं॥

समाहश्चात्र कर्त्तव्यं तथा ब्राह्मणभोजनं।
अष्टमेऽहनि विप्राणां तथा देया च दक्षिणा॥
काञ्चनं रजतं गाश्च भुवमात्मानमेव वा।
दन्तजन्मनि सामान्ये शृणु स्नानमतः परं॥
भद्रासने निवेश्यञ्च मृद्भिर्मूलैः फलैस्तथा।
सर्वौषधैः सर्व्वबीजैः सर्व्वगन्धैस्तथैव च।
स्नापयेत् पूजयेच्चात्र वह्निं सोमं समीरणं॥
प्रथमं स्नापयेत्तत्र देवदेवञ्च केशवं।
स तेषामेव जुहुयाद्धुतमन्नो यथाविधि॥
ब्राह्मणानान्तु दातव्या ततः पूजा च दक्षिणा।
ततः स्वलङ्कृतं बालं आसनेषूपवेशयेत्॥
आसन्नं श्वमूर्द्धानं बीजैः सुस्नापयेत्ततः।
सुस्त्रिग्धैर्बालकानाञ्च तैश्च कार्य्यञ्च पूजनं।
पूज्याश्चाविधवा नार्यो ब्राह्मणाः सुहृदस्तथा॥

इति विष्णुधर्म्मोत्तरोक्तदन्तोत्पत्तिशान्तिः।

—o—

जनमारसमुत्पत्तिं प्रवक्ष्यामि वसन्तिकां।
यदा लोभसमाविष्टः पीडयानो धनैः प्रजाः॥
रमत्यभिद्रवन्राजा न च धर्म्मेण तिष्ठति।
वचस्तस्यानुवर्त्तन्ते प्रजा धर्म्मं विहाय ताः॥
क्रोधलोभसमाविष्टाः माध्वाचारविवर्ज्जिताः।
पूजयन्ते न चाभीष्टं देवान् विप्रांस्तथा पितॄन्॥

तासु धर्माभिभूतासु ततो रुद्रः प्रकुप्यति ॥
अन्तको एष भगवान् भूतानां प्रिय एव च।
कुरुतेऽसौ विकारांश्च हेतुभूतः पृथग्विधान् ॥
ताराग्रहान् केतुदण्डान् राहुकाकबलाहकान्।
ससूर्य्यसन्ध्याविकृतिं घोरां खमृगपक्षिणः।
भूमिकम्पोल्कनिर्घाताः शीतोष्णानिलविक्रियाः ॥
अतिवर्षमवर्षञ्च तथैवर्त्तुविपर्य्ययाः।
ओषध्यो रसहीनाश्च भवन्तीह विपर्य्यये ॥
रसवीर्य्यविहीनास्ता रोगानुत्पादयन्ति च।
रुद्रप्रकोपनं तस्माज्जनमारं प्रचक्षते ॥
तस्मात् प्रसादयेत् यत्नाद्देवदेवं महेश्वरं।
दैवज्ञानप्रदिष्टेन विधिना सुसमाहितः ॥
गाणपत्येन विधिना अथर्वशिरसा तथा।
यामलेन विधानेन कुर्य्याद्देवं प्रसादनं ॥
शिवसूक्तमुमासूक्तं जपेच्च शतरुद्रियं।
बल्युपहारविविधान् चत्वरेषु निवेदयेत् ॥
आवाहयेत्तं सगणं रुद्रं रात्रावहः शुचिः।
ब्राह्मणान् भक्ष्यभोज्यैश्च दक्षिणाभिश्च पूजयेत् ॥
प्रसादिते ततो रुद्रे जनमारो निवर्त्तते।
जप्य एवास निरतो नृपतिश्च यतेन्द्रियः ॥
युक्तो होममुपाश्रित्य नियमेन यथाविधि।
एवं युक्तस्य नृपतेः कर्म्मसिद्धिः प्रशस्यते ॥
कर्म्मणस्तस्य मूलं हि श्रद्दधानो नृपः स्मृतः।

उपोषितो नृपः स्नातः शुक्लवस्त्रसमाहितः ॥
आत्मरक्षां स्वयं कृत्वा ततः शान्तिं प्रयोजयेत् ॥
धर्म्मात्मा धर्म्मविद्येषां राजा राजपुरोहितः ।
राजवंशगुणो येषां कुशलं तत्र वर्द्धते ॥

इति गर्गोक्तजनमारशान्तिः ।

अथ गोशान्तिः गर्गप्रोक्ता ।

व्याधयस्तु दश प्रोक्ता गवां वक्ष्यामि यादृशाः ।
उद्विग्नो हृदयशाली पतनो मोहनस्तथा ॥
तेषां रूपसमुत्थानन्तादृशं तद्ब्रवीमि वः ।
शान्तिकर्म्म च निर्द्दिष्टं यादृशं तच्च निश्चितं ॥
रात्रौ गोष्ठेषु या गावो विशसन्ति यतस्ततः ।
उद्विग्नो नाम स व्याधिस्तेन चैव प्रजायते ॥
अश्रुप्रमोक्षं कुर्व्वन्ति नयनात् प्रपतन्ति च ।
हृद्रोगं तं विजानीयाद्गोषु रोगं विनिर्द्दिशेत् ॥
शोणितं यत्र कुर्व्वीत पुरीषं मूत्रयन्ति वा ।
प्रवेपमानाश्चलिताः पतिता व्याधिरुच्यते ॥
हुङ्कारमथ कुर्व्वन्ति मण्डलानि तथैव च ।
भविष्यात्संभ्रमन्ती च मूढसंज्ञं विदुर्बुधाः ॥
पुरीषं पूतिकं यासां चोडुमध्यात् प्रवर्त्तते ।
तं पूतनाख्यं विद्याद्गोषु रोगसमुत्थितं ॥
यदि जिह्वां विनिर्भज्य गोष्ठीं समभिधावति ।

कलिलो नाम नाम्नेह गोषु व्याधिर्भवत्यपि॥
रक्तानि नयनेत्रानि विप्लवन्ति स्रवन्ति च।
मक्षिकाश्चापि लीयन्ते व्याधिं विद्यात्सुदारुणं॥
उत्थाय मण्डलं याति वातेन क्षिप्यते च या।
कर्णक्षेपगतिर्ज्ञेयो गोषु व्याधिः समुत्थितः॥
खुरेण या न शक्नोति यातुमुत्सङ्गसंस्थिता।
खेरको नाम स ज्ञेयो गोषु रोगः समुत्थितः॥
यस्याः स्फुरन्ति गात्राणि रोमाण्युद्वीनि सन्ति च।
उभौ च कर्णौ लम्बेते विद्यात्तं कर्णलम्बकं॥
इत्येते व्याधयो दिष्टा यथैव्या एव चापरे।
तेषु तेषु यथोद्दिष्टं शान्तिकर्म्म प्रयोजयेत्॥
ब्रह्मचारी शिरःस्नातो निराहारः क्षमी शुचिः।
आत्मरक्षां स्वयं कृत्वा ततः शान्तिं प्रयोजयेत्॥
नग्नाः कषायवसना मूढा ये परिचारिणः।
व्यङ्गाश्च स्खलिताश्चैव दूरतः परिवर्जयेत्॥
काणांश्चिपिटांश्च कुष्ठांश्च तथा पचक्षतानपि।
अन्त्यावसायिनश्चैव दूरतः परिवर्जयेत्॥
अश्वत्थे वा पलाशे वा समदेशे त्वनूषरे।
महास्थानैकवृक्षे वा देवगोष्ठेऽपि वा भवेत्॥
मण्डकस्तु शुचिर्भूत्वा देवताश्चुपकल्पयेत्।
प्रतिष्ठाप्य ततो देवान् वेदीं कुर्यात् प्रमाणतः॥
पूर्व्वं कुम्भान् कुशान् माल्यं लाजाशुक्लोमिकांस्तथा।
मांसं पक्वान्नञ्चापि तथैव छिमपिण्डिकां॥

घृतसर्षपतैलेन सर्षपानक्षतांस्तथा ।
युक्तप्रतिसरान् गन्धान् समिधस्तु समाहरेत् ॥
उदुम्बरं पलाशञ्च खदिरं बिल्वमेव च ।
अश्वत्थञ्च शमीञ्चैव समिधस्तत्र कारयेत् ॥
चत्वार्य्येव चरूणापि पर्णमात्राणि कारयेत् ।
उपाख्यिवारणाद्योनि उलूकस्य समाहरेत् ॥
एतान्यन्यानि धूपार्थं सर्वाण्येव समाहरेत् ।
वचया सह संयुक्तं धूपार्थे तु समानयेत् ॥
सुरारुधिरसंयुक्तं मांसं पक्वामिषन्तथा ।
दिशाञ्च विदिशाञ्चैव बलिं कुर्य्यात् प्रदक्षिणां ॥
गावस्तु सर्व्वगोष्ठात्तु देवगोष्ठमुपानयेत् ।
आज्यधूपञ्च गन्धाञ्च आदद्यात् प्रदक्षिणां ॥
अग्निं प्रणीय विधिवत् परिस्तीर्य्य समन्ततः ।
बलेन विजयेनापि मुहूर्त्ते कर्म्म कारयेत् ॥
शान्तिमेतां प्रयुञ्जानः सावित्रीं मनसा जपेत् ।
एषा हि वेदमाता तु द्विजैः पूर्व्वमुदाहृता ॥
कृष्णच्छागस्य देहेन कर्णाभ्यां च शोणितं ।
समिधो जुहुयाच्चाग्नौ सर्षपैश्च घृतेन च ॥
रक्षोघ्नतैलमुत्करं रक्षमाणेन संयुतं ।
एवं तु जुहुयाद्विप्रो व्रजरोगस्य विनाशनं ॥
पुष्पवर्णस्य छागस्य शोणितं छावयेत्ततः ।
यावनं अद्भुतेनाथ व्याधिं दृष्ट्वानुपातनं ॥
शमीमयस्तु दण्डिभ्यः अमरं यावकन्तथा ।

रथ्यातैलेन संयुक्तं व्याधिः स्रावात्र मोहकः॥
पाण्डुरस्य तु छागस्य वसां हृदयमेव च।
मधु सर्पिश्च जिह्वाश्च जुहुयात् पूतनाग्रहे॥
अश्वत्थोदुम्बरः समित्।
पलाशखादिरौमांसैः व्याधिः शाम्यति दारुणः।
कृष्णग्रीवस्य छागस्य छागल्या वा तथा भवेत्॥
शोणितं सर्पिषा युक्तं जुहुयाद्दारुणामये।
ययोक्तस्य छागस्य वसां हृदयशोणितं॥
अरिष्टाक्तसंयुक्तं कण्डूरोमस्य नाशनं।
हुतं सर्षपतैलञ्च हृदयं कुक्कुटस्य च॥
यथोपनीताः समिधो ह्यावयेच्चम्बकर्णिके।
गवां शान्तिं यथोद्दिष्टां यः प्रयुक्तां द्विजर्षभ॥
कारयेच्च गवार्थं वा जपेयुश्च शतैर्वरं।
तस्य पुत्राश्च पौत्राश्च धनधान्यस्तथैव च॥
गावश्च सस्यग्वर्द्धन्ते लोके कीर्त्तिमवाप्नुयात्।

शिवधर्मात्।

———ooo———

ब्रह्मणा ब्रह्मपादेन स्तूयते प्रणवेन सः।
स शिवः शाश्वतो देवो गोषु मारीं व्यपोहतु॥
लम्बोदरेण देवेन गजवक्त्रेण सुस्तुतः।
स शिवः शाश्वतो देवो गोषु मारीं व्यपोहतु॥
योऽर्च्यते च सदा भक्त्या विष्णुना प्रभविष्णुना।

स शिवः शाश्वतो देवो गोषु मारिं व्यपोहतु ॥
सर्व्वरोगहरेणापि रविणा यः प्रणम्यते ।
स शिवः शाश्वतो देवो गोषु मारीं व्यपोहतु ॥
श्रीमतां रुचिराङ्गेण घण्टाकर्णगणेन यः ।
नित्यं प्रणम्यते भक्त्या हृष्टेनानन्यचेतसा ॥
स शिवः शाश्वतो देवो गोषु मारीं व्यपोहतु ।
नित्यं रुद्रबलोपेतो रुद्रभक्तिसमन्वितः ॥
घण्टाकर्णगणो देवः शिवज्ञानविधायकः ।
शिवयोगानुभावेन गोषु मारीं व्यपोहतु ॥
नमः शिवाय देवाय महादेवाय भाविने ।
रुद्राय स्थाणवे नित्यं हरायेशाय ते नमः ॥
परमेशाय सिद्धाय मन्त्रसिद्धिप्रदायिने ।
त्र्यम्बकाय महेशाय चनन्ताय नमोनमः ॥
अभिमन्त्य सदा तोयमेतैर्मन्त्रैर्यथाक्रमं ।
प्रार्थयीत गवां देवं ततः सिद्धिर्भविष्यति ॥
य इदं पठते गोषु प्रस्थाने वा समागमे ।
आयुष्मान् बलवान् भोगी श्रीमानर्थपतिर्भवेत् ॥
देहान्ते च परं स्थानं स गच्छेत्रात्र संशयः ।
सर्व्वपापविनाशार्थं गोशान्तिकमिदं पठेत् ॥

इति गोशान्तिः ।

सुमन्तो रुद्रराजश्च गर्गो मित्रजिदेव च ।

पृच्छन्ति वाहनागारं शालिहोत्रं तपोनिधिं ॥
हयानां मड़को घोरः कथं जायेत वै प्रभो।
कथं वा शान्तिकं तेषां एतच्छ्रुत तां वद ॥
तानुवाच महातेजाः शालिहोत्रस्तपोनिधिः।
स्थानेऽशुभे स्थापितानां सगर्भे वार्षसंग्रहे ॥
हयानां मरको घोरो जायते नात्र संशयः।
यस्य वा जन्मनक्षत्रं कर्मजं वाथ मानस ॥
मघादिकं सामुदायं वैनाशिकमथापि वा।

जन्मनक्षत्राच्चतुर्दशमषोड़शाष्टादशानां नक्षत्राणां मानसा-
द्यः संज्ञाः।

पीड्यते सौरिसूर्य्याद्यैर्यदि वाप्यथ राहुणा।
त्रिविधैर्वा तथोत्पातैस्तस्य स्याद्वाजिमारकं॥
यस्य वै ब्राह्मणाः क्रुद्धा देवा वा पितरोऽप्यथ।
विनायकोपसृष्टो वा क्रुद्धा वा यस्य वाजिनः॥
हयमारस्तु तस्य स्यात् स तु शान्तिकरो भवेत्।
न वर्द्धन्ते हयात् पुत्रा रोगैः पीड्यन्ति चापरे॥
स्थानाद्विवर्त्तनं कार्य्यं शल्योद्धरणमेव वा।
कृत्वा कुर्व्वीत तत्रैव वासुदेवतपूजनं॥
तथा नक्षत्रपीड़ायां स्नानं विहितमाचरेत्।
पीड़कश्च ग्रहः पूज्यो नक्षत्रमपि पीड़कं॥
विनायकोपसृष्टेन पूज्यो गणपतिर्भवेत्।
मितश्च संमितश्चैव तथा शालकटं कटो॥
कुष्माण्डो राजपुत्रश्च पूज्या वै चाम्बिका तथा।

यस्य वै ब्राह्मणाः क्रुद्धाः पूज्यास्त्वेते न चान्यथा ।
देवानां पूजनं कार्य्यं यस्य क्रुद्धा दिवौकसः ॥
रात्रौ च वाहनागारे यदालिन्दापकर्षणं ।
कृते स्यात्तत्र कर्त्तव्यं गन्धर्व्वाणाञ्च पूजनं ॥
प्रदीपे स्थापिते स्थाने तथा शुचिविवर्ज्जिते ।
स्थानापकर्षणं कृत्वा स्त्रियः पूजा विधीयते ॥
उच्चैःश्रवादयः पूज्या यस्य क्रुद्धास्तुरङ्गमाः ॥
हयमारे तु संग्रामे हयानां चाप्युपद्रवे ।
इमां शान्तिं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥
गोमयेनानुलिप्ते तु शुभे देशे पुरोहितः ।
अहोरात्रोषितो भूत्वा शान्तिकर्म्म समारभेत् ॥
धौतशुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ।
सोष्णीषालङ्कृतः गत्वा हयैस्तैः शुचिभिः सह ॥
चत्वारो ब्राह्मणाश्चास्य सहायाश्चाततन्द्रिताः ।
ऋग्वेदपारगश्चैको द्वितीयो यजुषां वरः ।
तृतीयः सामविन्मुख्यस्तुर्य्यश्चाप्यथर्व्वणः ।
सर्व्वे व्यङ्गाः कुलीनाश्च शुचयः शीलसंयुताः ।
गृहीताम्बरसम्वीताः पवित्रककरास्तथा ।
मध्येऽग्निकुण्डं कुर्व्वीत मण्डलन्तु समायतं ॥
विदिक्षु विन्यसेत् कुम्भान् पूर्णानाशुभिवारिणा ।
रत्नपात्रं न्यसेत्तेषु ऐशान्यादिक्रमेण तु ॥
सर्पिषः पयसो दध्नो मधुनश्च यथाक्रमं ।
कुण्डस्य पूर्व्वभागे तु कुर्य्याद्देवेश्वरं पदे ॥

दक्षिणे तु यमं कुर्य्याद्वरुणं पश्चिमे तथा।
उत्तरे च तथा भागे कुर्य्याद्वैश्रवणं प्रभुं॥
सर्व्वांस्तान् पूजयेद्विप्रा गन्धमाल्यानुलेपनैः।
वस्त्रैर्धूपैरलङ्कारैस्तथैव नैवेद्यपूजनं॥
तेषामवाप्य तल्लिङ्गं मन्त्रराज्येन पावकं।
यजुर्वेदविदः पूर्वं जपेदैन्द्रान्विशारद॥
याम्ये सोमं साम गम्स्तु वारुणं बह्वृचोपि च।
मन्त्रं कुवेरसंयुक्तं जपेद्विद्वानथर्व्वणः॥
सुवर्णमक्षतं वासः कांस्यञ्चाश्च पृथक् पृथक्।
पञ्चानां दक्षिणा दत्त्वा हयमारात् प्रमुच्यते॥
हयमारे तु संप्राप्ते हयानां वाप्युपद्रवे।
इमां शान्तिं प्रवक्ष्यामि तन्मे निगदतः शृणु॥
पूर्वोक्ते तु शुभे स्थाने पूर्वोक्तविधिना ततः।
अग्निकुण्डं दिशोशान्यां पूर्व्वे वै पूर्वदक्षिणे।
भूमौ कुर्व्वीत देवानां मण्डलेष्वपि पूजनं॥
अत्र त्रितयं कार्य्यं नैर्ऋत्यामथर्वणः।
आग्नेये त्वत्र दिग्भागे वह्निपूजा विधीयते॥
ऐशान्यां पूजनं वायोः पर्व तु सवितुर्भवेत्।
सावित्रन्तु जपेन्मन्त्रं यजुर्वेदविशारदः॥
आग्नेये वह्वृचश्चैव सौमं सामविशारदः।
सर्व्वमन्यत्तु कर्त्तव्यं पूर्वोद्दिष्टं विजानता॥
उत्पातेषु निमित्तेषु वाजिनामिङ्गितेषु च।
प्रायश्चित्तं प्रकुर्वीत ततः सर्वं प्रशाम्यति॥

हयशालोत्तरे भागे स्थण्डिलं तत्र कल्पयेत् ।
त्रिरात्रोपोषितस्तत्र शान्तिं कुर्य्यात् पुरोहितः ॥
नववासोभिराच्छन्नं स्थण्डिलन्तु चतुर्दिशं ।
उदकुम्भास्तु चत्वारः स्थापनीयाश्चतुर्दिश ॥
रसपात्राणि देयानि पूर्णकुम्भे च सुव्रत ।
शिरःस्नातः कृतोष्णीषो यथावत् ज्ञातमण्डलः ॥
शुक्लवासा जितक्रोधो बन्धुत्वेन समीरितः ।
आहुतीर्जुहुयादग्नौ ध्यानेन सुसमाहितः ॥
पितामहाय रुद्राय स्कन्दाय वरुणाय च ।
अश्विभ्याञ्चैव सूर्य्याय शक्राय च तथाग्नये ॥
वाताय चाथ हरये श्रियै देव्यै तथैव च ।
गन्धर्वेभ्यश्च सोमाय उच्चैःश्रवस एव च ॥
देवता या भवेत्तत्र उत्पातस्य तु कारणी ।
मण्डले तां विदित्वा तु बलिभिश्चापि पूजयेत् ॥
शतमष्टाधिकं हुत्वा प्रतिदैवं पुरोहितः ।
ततस्तु पूजनं कुर्य्याद्देवानान्तु विशेषतः ॥
पायसोल्लेपकादीपधूपदीपादिलेपनैः ।
मधुपायससंमिश्रं विप्रा भोज्याः सदक्षिणाः ॥
एकैकदैवमुद्दिश्य दश सप्त च पञ्च वा ।
सुवर्णसहितं वासो गावः कांस्यं दक्षिणा ॥
निष्कृत्यर्थं तदा देयं धराश्वस्तु महीभुजा ।
पुरोहिताय तुष्ट्यर्थं येन तुष्यत्यसौ द्विजः ॥
ब्राह्मणान् पूजयेत् सर्व्वान् स्वस्तिवाच्य द्विजोत्तमान् ।

एतद्धि शान्तिकं कार्य्यं नित्यमौत्पातिके सदा ॥
रक्षोघ्नन्तु यशस्यन्तु सर्व्वोत्पातविनाशनं।
राज्ञो विजयदं पुण्यं धनधान्यविवर्द्धनं ॥

इति शालिहोत्राश्वशान्तिः।

———ooo———

अथ गजशान्तिः।

तत्र पालककलक्षणानि पालकगृहीतगजलक्षणानि चाभिधायाह पालकाप्यः।

चरस्तत्रोपसर्गाय चरतीत्यभिलक्षयेत्।
बहून् स कुञ्जरान् हन्ति श्रेष्ठं वापि मतङ्गजं ॥
इमां तत्र क्रियाङ्कुर्य्यात् श्रेयोर्थी नृपतिः स्वयं।
पूजयेच्च यतो रुद्रं विष्णुं सर्व्वाश्च देवताः ॥
रात्रौ भूतबलिश्चापि कर्त्तव्यो मांसशोणितैः।
सर्व्वासु गजशालासु चत्वरेष्वधरेषु च ॥
नगरात्सहसा राज्ञो निर्णयेद्वारणान् बहिः।
दिशि प्राच्यामुदीच्यां वा स्थानं जनमनोरमं ॥
मनोरमतरान् देशानपरेङ्कि मतङ्गजान्।
सञ्चार्य्यश्चरणा राजन् हृष्टभङ्गलणाशनाः ॥
यथाविधि महामन्त्रैरेकाहारैस्तु संयतैः।
सप्ताहमेव सञ्चार्य्या जपहोमपरायणैः ॥
पुरोहितस्तु कुर्वीत शान्तिं पापप्रणाशनीं।
तर्प्पयित्वा द्विजांस्तत्र दक्षिणाभिश्च पूजयेत् ॥

महोमावास्य समाहं शुचयः संयतव्रताः ।
एकाशनं निशि स्नात्वा भुञ्जीरन् हविषोदनैः ॥
वृषभङ्कृतणाहारानेकस्थाने निवेशयेत् ।
आरण्यकत्वं तेषान्तु सङ्कल्पं मनसा भवेत् ॥
हविस्थानेषु यूथस्तु गावः समाहमेव च ।
वासयेत् सह वत्सैश्च वृषभैर्विहितैस्तथा ॥
द्वितोरणं निवेश्याथ जलक्षोभयनीरजं ।
स्वस्तिकस्तेषु चैकैकोभवेद्द्रोणोऽथ काञ्चनः ॥
महामामास्य तत्रैव स्थस्ते स्थण्डिलवासिनः ।
सुवर्णानां शतस्याथ विन्यस्यमुदकं द्विज ॥
सामान्ययज्ञप्रोक्तं यत् स्नानं तदुपकल्पयेत् ।
तोरणे च भवेत्साध्यं चतुर्मासविधौ तथा ॥
मन्त्रैर्जुहुयाद्विप्रस्तु समिद्भिर्जातवेदसं ।
सामान्ययज्ञं निवर्त्त्य यथाप्रोक्तं विधानवित् ॥
मन्त्रैस्तु जुहुयादेतैः समिद्भिर्जातवेदसं ।
इन्द्रैः सह मरुद्भिश्च गजेनैरावतेन च ॥
उत्पातन्तु निरस्यायात् उदीच्यां स्थापयेत् गजान् ।
एवं कृत्वा हविःशेषैर्बलिं प्रतिदिशं हरेत् ॥
मन्त्रैस्तैरेव पूर्व्वोक्तैर्देवेभ्यस्तेभ्य एव च ।
दक्षिणस्यान्दिशि विप्रो ततो होमं समाचरेत् ॥
नामाग्नये विश्वेभ्यश्च भूतेभ्योऽथ बलिमथा ।
दक्षिणायां वारुणस्तु हरिद्रान्नौदनं बलिं ।
द्विजो मन्त्रमिमं राजन् नियतः सुस्वनैर्जपन् ॥

ये च पश्चिमायान्दिशि समाश्रिता रुद्रा रुद्रमनुष्याः रौद्राणि च भूतानि रोमाणि व्याधयश्च येत्वारोग्यं व्याधयो जीवितं चाय-त्तस्तेभ्य एष बलिः।

पूर्वोत्तरायान्दिशि तु कृत्वाहरेद्रुद्रायोद्गमं।

सुसमाहितो बलिं हरेच्चयाम्यायमिमंमन्त्रं विप्रो यत्नेन योजये-द्दिति नमो राक्षस-पिशाच-गन्धर्व-रक्षोभ्यो येषु विश्वं संश्रयं एव प्राचायायत्तास्तेभ्य एष बलिरिति बलिं सर्वेभ्यो दिग्भ्यमिमं मन्त्रमुदीरयेत्।

अग्नये पार्थिवानां सत्वानामपार्थिवानां सत्वानामधिपतये एष ते बलिः वायोरान्तरिक्षाणां सत्वानामधिपतये एष ते बलिः।

रुद्राय च यथान्यायं क्रमेणोपहरेद् बलिं।

ये वृक्षेषु ये तीर्थेषु ये वीथिषु तेभ्यो नमोऽस्तु रुद्रेभ्यो हराम्यहं।

येऽन्तरिक्षे ये निविष्टास्तु पृथिव्यां ये च संश्रिताः।
तेभ्यो नमोऽस्तु रुद्रेभ्यो बलिमेभ्यो हराम्यहं॥
हुत्वा हुत्वा बलिं सम्यक् द्विजातीन् स्वस्तिवाच्य च।
पूर्वोक्तेन विधानेन रागाबीराजते क्रमात्॥
दत्त्वावगाहन्तेषान्तु ततस्तीरं परं नयेत्।
द्वारे द्वितीये नीराज्यास्ते नैव विधिना पुनः॥
नीराजयेच्च पश्चाद्वै यथा राजजनन्ततः।
सप्तमे संप्रवेश्यैतान् कृतकौतुकमङ्गलान्॥
गीतवादित्रयन्त्रैश्च सद्विजान् स्वस्तिवाच्य च।
सर्वबीजैः फलैः पुष्पैः माल्यगन्धैश्च पूजितान्॥

सहिरण्यांस्ततः कुम्भान् शालाद्वारेषु विन्यसेत् ।
संसृष्टालङ्कृतान् कृत्वा सर्वसम्भारपूजितान् ॥
भरद्वाजो मतश्चैव ऋद्रोभूप उदाहृतः ।
तथा पुनश्च शालायां क्षेममङ्गलसम्भृतां ॥
प्रविशंश्चानिरुद्धस्तु स्तम्भे तिष्ठन् शरच्छतं ।
अरोगी बलवान् भूयो राष्ट्रश्च च विजयावहः ॥

तथा ।

अङ्गस्तु राजा चम्पायां पालकाप्यं स्म पृच्छति ।
चातुर्मास्येषु सर्वासु कथंनीराजयेद्गजान् ॥
प्रब्रूहि पृष्टमेतन्मे यथावन्मुनिसत्तम ।
संपृष्टस्त्वङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
इदं शृणु महाराज यन्मां त्वं परिपृच्छसि ।
रोगाश्च नैर्ऋतिश्चैव तथा रक्षांसि पन्नगाः ॥
पिशाचा गुह्यकाश्चैव गन्धर्वा राक्षसास्तथा ।
दानवाश्चैव यक्षाश्च कौमाराश्चापि ये ग्रहाः ॥
ये चघोरा जयाद्याश्च ये च रुद्राश्च देवताः ।
उपसर्गाश्च ये केचित् पीडानक्षत्रजाश्च ये ॥
बलिं वा भोक्तुकामाश्च हन्तुकामास्तथाऽपरे ।
तथा क्रीडितुकामाश्च घोररूपा महाग्रहाः ॥
देवोपघाता ये चान्ये तत्र शान्तिं व्रजन्ति ते ।
एतदर्थं महीपाल गजनीराजनो स्मृता ॥
कार्त्तिकी प्रथमा राजन् द्वितीया फाल्गुनी तथा ।
आषाढी तु तृतीया स्यात् तिस्रो नीराजनाः स्मृताः ॥

चतुर्मासी भवेत् कुर्य्याद् गजानां हितमिच्छता (१)।
यथार्हं देवतानाञ्च सिद्धानाञ्च बलिं हरेत्॥
उष्ट्रान् पिक्कांश्च जालांश्च धान्यन्दधि घृतं मधु।
पायसं मधु कल्माषं लोहिताब्नं गुडौदनं।
सुप्रतिष्ठं भद्रपीठं दिव्यमाल्यानुलेपनं॥
दीर्घाग्रान् हरितान् दर्भान् विप्राणाञ्चैव भोजनं।
नवं शिवञ्च विधिवद्गजोपस्करमाहरेत्॥
आक्रान्तस्तगरोशीरं प्रियङ्गुञ्चोपराजयेत्।
सर्वरत्नौषधैश्चापि धूपमाल्यानुलेपनानि च॥
रक्षाविधानं कुर्वीत गजानां स्वस्तिवाचनैः।
गमागमेपि कर्त्तव्या शान्तिः सन्ध्याद्वयेपि च॥
पुरोहितो दक्षिणतो जुहुयाद्धव्यवाहनं।
उत्तरे जुहुयाद्वैद्यः शुचिवस्त्रः समाहितः॥
आहतक्षौमवसनः शुचिर्भूत्वा कृताञ्जलिः।
अष्टौ देवान् नमस्कृत्य गजानां स्वस्तिवाच्य च॥
प्रजापतिं च विष्णुञ्च यमञ्चैव शचीपतिं।
रुद्रञ्च बलदेवञ्च वरुणं धनदं तथा॥
सेनापतिं नमस्यामि गजानां स्वामिनां प्रभुं।
यज्ञभाण्डमथानीय यज्ञभूमिं प्रकल्पयेत्॥
पूर्वेणान्तरतो वापि ब्राह्मणानुमते शिवे।
प्रागुदक् प्रवणे देशे स्निग्धौषधिनगे समे॥
प्रदक्षिणोदके चैव सर्वतः सुपरिक्रमे।

---

१ श्लोकार्द्धमिदं समीचीनं भवितुं नार्हति।

गोमयेनोपलिप्याथ यज्ञभूमिं प्रवेशयेत् ॥
तस्मात्तत्रकं तत्र भूमादष्टादशवयः(१) ।
नोद्यानदेवोपहतान् नोदैत्यकान् दृढान् समान् ।
अनुगम्यात्नवान् सुचान् ऋजुस्थानसुस्थितान् ।
उत्सेधान् द्वादशारत्नीन् धारयीत विचक्षणः ॥
हर्म्यागाराणि सर्व्वाणि गोमयेनोपलेपयेत् ।
शुचीनि कारयित्वा षट् बलिभिश्च विभूषयेत् ॥
स्थानेषु पुष्पमालाश्च करणे तोरणानि वा ।
राजाथ प्राजनान् सर्व्वान् गृहीत्वा चाक्षतोदकं ।
प्रोक्षयेत् स्तम्भमूलानि धरणीं परिचारस्तथा ।
परिकर्म्मिणः सुस्नाताः शुचयः शुक्लवाससः ॥
यावन्निर्व्वाणकाले तु जमाभ्यासं नयेद्गजं ।
शान्तिञ्च जुहुयात्तत्र ब्राह्मणश्चैव वाचयेत् ॥
द्रव्याणि हर्म्यागाराणि तथा प्रस्रवणानि च ।
वरुणं तीर्थकन्याश्च नागानुदकदैवतान् ॥
सागरान् सरितश्चैव उदपानं सरांसि च ।
तड़ागानि च सर्व्वाणि सुरानभ्यर्च्य यत्नतः ॥
प्रायश्चित्तानि कृत्वा च ततः प्रस्थापयेद्गजं ।
सर्व्वरत्नौषधैर्बीजैः पूर्णश्चैव विचक्षणः ॥
चन्दनैश्च यथा प्रोक्तैः स्नापयेद्दत्तपूर्व्वगः ।
स्नातस्य तस्य नागस्य कारयेदाहतानि तु ॥
हारिद्रं पिष्टमादाय पूर्व्वात् पश्चाङ्गुलान्यथ ।

१ श्लोकार्द्धमिदं न सम्यक् प्रतिभाति ।

मङ्गलानि च सर्व्वाणि कारयेत्तु विचक्षणः ॥
रोचनया प्रियं यच्च सम्यग्ग्रामं समालभेत् ।
अङ्गे स्वलङ्कृतं हृष्टं तुर्य्याभिः समवस्मरेत् ॥
शोभितं वैजयन्तीभिर्नवैः पञ्चरज्जुभिः ।
काञ्चना राजता वापि दिव्यवासः समन्विता ॥
ग्रथिता क्षौमसूत्रेण नागरीगोरमिश्रिता ।
सम्भूता पर्व्वताग्रे च सर्व्वदेवनमस्कृता ॥
शतपाशीनमुक्तार्थे गजानां स्वस्तये भवेत् ।
आरोग्यायैव नागानां नृपस्य विजयाय च ॥
मध्ये च स्वस्तिकं कुर्य्यात्स्वस्ति गच्छन्ति कुञ्जराः ।
अवकीर्य्य तु लाजैश्च यज्ञभूमिं समन्ततः ॥
कुशोदुम्बरशाखाभिः सर्व्वतः परिताड़येत् ।
काष्ठैः पलाशजैश्चापि सिद्धकोदुम्बरैस्तथा ॥
ज्योतींषि जनयेद्यावत् समिद्धं पावकं ततः ।
गृहीत्वा चोदकं पात्रं प्रोक्षयेद्धव्यवाहनं ॥
अदिते नमस्ते। सरस्वति नमस्ते। देवसवितर्नमस्ते।
उत्तिष्ठाय विवर्द्धस्व प्रभावं त्वरितं मम।
विशोधयत्यप्सरसः शुभहस्ताश्च ब्राह्मणाः ॥
योगं मम प्रयच्छस्व प्रसन्नो हव्यवाहन।
स्रुवेणाज्यं गृहीत्वाथ शान्तिर्भवतु हस्तिनां ।
स्वाहा। समिधे स्वाहा। स्रुवाय स्वाहा। भूः स्वाहा।
भुवः स्वाहा।
बुद्धो बोधय भूतानि ब्रह्मणश्चामितौजसं ।

सहस्राक्षं भूतपतिं कुबेरं वरुणं यमं ॥
विष्णुञ्चैव महात्मानं तथा नारदपर्व्वतौ ।
उद्दालकं काश्यपञ्च मरीचिं भृगुमेव च ॥
ऋषिमुख्याननमस्यामि सर्व्वानेव कृताञ्जलिः ।
आसिच्याज्याहुतिं तेषां भूयः स्वस्ति गजे पुनः ॥
भवन्त्वरोगाः राजानः समृध्यन्ताञ्च याजकाः ।
द्विजे दानं प्रयच्छन्तु बलारोग्ययशांसि च ॥

स्वाहा ।

दक्षं भूतानि गन्धर्व्वाः ओषध्यश्च दिग्गणाः ।
आदित्यमरुतश्चैव अश्विन्यौ च तथा ग्रहाः ।
गजानां संप्रयच्छन्ति बलारोग्ययशांसि च ॥

स्वाहा ।

ऐरावतं पुष्पदन्तं कुमुदं वामनं तथा ।
पौण्डरीकं नीलवन्तं सार्व्वभौमं सुतेजसं ॥
सुप्रतीकञ्च नागेन्द्रं महाबलिनमेव च ।
महागजांस्तथैवान्यान् नमस्यामि कृताञ्जलिः ॥
आसिच्याज्याहुतिं तेषां भूयः स्वस्ति गजे पुनः ।
भवन्त्वरोगाश्च गजाः समृध्यन्ताञ्च याजकाः ।
प्रयच्छन्तु च नागानां बलारोग्ययशांसि च ॥

स्वाहा ।

आत्रेयं जमदग्निञ्च वसिष्ठं पुलहं क्रतुं ।
दीर्घं वरवरञ्चैव पुलस्त्यं च्यवनं तथा ॥
वेदोत्तमाञ्च स्वाहाञ्च पर्व्वतं चात्र मालिनं ।

हिमवत्प्रमुखश्चापि समेतान् कुलपर्व्वतान् ॥
तथैव सर्व्वतोऽनन्तान् नमस्यामि कृताञ्जलिः।
दिशो दश च ये नागा सर्व्वकालमधिष्ठिताः ॥
भूमिधराः भुजङ्गाश्च नमस्यामि कृताञ्जलिः।
आसिच्याज्याहुतिं तेषां भूयः स्वस्ति गजे पुनः ॥
भवन्त्वरोगाश्च गजा समृध्यन्ताश्च याजकाः।
प्रयच्छन्तु च नागानां वर्णारोग्ययशांसि च ॥

स्वाहा।

भूमिधरान् अभिमतान् महातेजान् महाबलान्।
देवदत्तोमहाभोग्यान् शुचिर्भूत्वा कृताञ्जलिः ॥
अनन्तं प्रथमं वन्दे सर्व्वलोकाभिपूजितं।
कर्कोटकं धूम्रविषं वासुकिञ्च महाबलं ॥
कालीयञ्चापि वन्दित्वा बलमुत्पलमेव च।
हरिञ्च विद्युज्जिह्वञ्च कवलाश्वतरावुभौ ॥
उद्यन्तमथादित्यं जिह्वायां परिलेहति।
प्रयतं तं पुनश्चापि लाङ्गुलेन निषेवते ॥
चतुर्नाम महाभागः पञ्चशीर्षो महाबलः।
नागो मणिमश्चैव ये चापि धरणीधराः ॥
कुर्व्वन्तु स्वस्ति नागानां निर्व्वाणे तरणे तथा।
अन्तर्भूमौ च ये नागा ये च ये दिशि गोचराः ॥
आसिच्याज्याहुतिं तेषां भूयः स्वस्ति गजे पुनः।
भवन्त्वरोगाश्च गजाः समृध्यन्ताश्च याजकाः।
संप्रयच्छन्तु नागानां बलारोग्ययशांसि च।

उत्तरेण जपेद्विप्रः सेनान्यमपि कीर्त्तनं ॥
सेनापतिं शक्तिधरं गजानां स्वामिनं प्रभुं ।
षष्ठीप्रियं क्रौञ्चरिपुं षण्मुखं द्वादशेक्षणं ॥
रक्तमाल्याम्बरधरं घण्ठाभरणकुण्डलं ।
त्र्यम्बकं द्वादशभुजं कार्त्तिकेयं दुरासदं ॥
रक्तप्रतिसरं माल्यं प्रकृतं कामचन्दनैः ।
अर्चयेद्गुडसंयावपायसस्वस्तिकादिभिः ॥
पूर्व्वदक्षिण दिग्भागं दक्षिणाञ्च दिशं तथा ।
तथैव नैरृतीं वन्दे पश्चिमाञ्च दिश तथा ॥
वायव्याञ्चोत्तराञ्चैव तथा पूर्व्वोत्तरां दिशं ।
ततोऽर्द्धाञ्च दिशं वन्दे अदितिं देवमातरं ॥
अधिश्रये वसत्रागास्तान्नमस्ये कृताञ्जलिः ।
आसिच्याज्याहुतिं तेषां भूयः स्वस्ति गजे पुनः ॥
भवन्त्वरोगाश्च गजाः समृद्ध्यन्ताञ्च याजकाः ।
संप्रयच्छन्तु नागानां वर्णारोग्ययशांसि च ॥ स्वाहा ।
स्वस्तिकापूपसंयावमधुलाजा घृतं तथा ।
हिरण्यञ्च सुवर्णञ्च वासांस्यभिनवानि च ॥
मैरेयञ्च सुराचैव वाचैषा वरवारुणी ।
गुडौदनञ्च मांसञ्च मद्यं कल्माषमेव च ॥
सर्व्वमेतदुपन्यस्तं भक्ष्याणामग्रतो हितं ।
प्रतिगृह्णां सुगृह्णां वा बभुर्धा वद चाम नः ।
संप्रयच्छतु नागानां वर्णारोग्ययशांसि च ॥

स्वाहा ।

व्यपोहतु च पापानि इह राज्ञः शतं समाः।
त्वया विसृष्टा आरण्या मानुषाणाममङ्गलाः॥
अविसृष्टं त्वया नास्ति भोक्तुमर्हसि कामदः।
अपूतिमांसमामारं ह्युपधापरिवर्जितं॥
अनारूढं मनुष्यैस्तु तमारुह्य च कुञ्जरं।
गृहाण च यथातत्त्वं सेनान्ये भद्रमस्तु ते।
संप्रयच्छन्तु नागानां वर्णारोग्ययशांसि च॥

स्वाहा।

पादायुधं ताम्रचूडं शतपत्रं मनोरमं।
विचित्रपत्ररक्ताक्षं कुक्कुटं दर्शयामि ते॥
कुक्कुटं मे गृहाण त्वं सेनानि भद्रमस्तु ते।
संप्रयच्छस्व नागानां वर्णारोग्ययशांसि च॥

स्वाहा।

प्रभूतवर्णलाङ्गूलं सर्व्वाङ्गसुसमाहितः।
धौतमामलकं कल्कैः छागं सन्दर्शयामि ते॥
छागं मम गृहाण त्वं सेनान्ये भद्रमस्तु ते।
संप्रयच्छस्व नागानां वर्णारोग्ययशांसि च॥

स्वाहा।

सहस्रमूलावनतं देवराजविलेपनं।
प्रवरं सर्व्वमूलानां उशीरं दर्शयामि ते॥
उशीरं मे गृहाण त्वं सेनान्ये भद्रमस्तु ते।
संप्रयच्छस्व नागानां वर्णारोग्ययशांसि च॥

स्वाहा ।

नैराजिनीं त्विमां मालां सहस्राक्षेण धारितां ।
सम्भूतां देवतानाञ्च राक्षसानां मनोहरां ॥
प्रीतिसञ्जननीं देवीं भूतनागनिषेवितां ।
आवाहेषु विवाहेषु क्षेत्रनीराजनेषु च ॥
नागानाञ्च प्रवेशेषु मङ्गल्या वारुणी स्मृता ।
सुरा सुगन्धा सुरसा महोत्करमनोरमा ॥
पूजिता देवमनुजैः प्रसन्नो दर्शयामि ते ।
वारुणीं मे गृहाण त्वं सेनान्ये भद्रमस्तु ते ।
संप्रयच्छस्व नागानां वर्णारोग्ययशांसि च ॥

स्वाहा ।

पुरा देवासुरे युद्धे संग्रामे तारकामये ।
सेनानीः संस्कृतो देवैर्देवानाममितद्युतिः ॥
रक्ष सैन्यं सराजानं सेनान्ये भद्रमस्तु ते ॥
संप्रयच्छस्व नागानां वर्णारोग्ययशांसि च ।

स्वाहा ।

इमे शङ्खा मृदङ्गाश्च कांस्यवाद्यानि यानि च ।
वीणासर्पाणि पणवा गोधा परिवदल्लकाः ॥
आहुता मङ्गलार्थं वै वाद्यन्ते मधुरस्वराः ।
इहैकरात्रं दिवसं विजयाय नृपस्य च ॥
विविधानि च रूपाणि सम्यग्बुद्धा हुताशने ।
ह्रूयमाननिमित्तज्ञः रक्षणार्थं विनिर्दिशेत् ॥
ह्रियमाने क्षयं यान्ति यथाग्निः सुहृदायते ।

चित्रश्च परुषश्चापि वसुगन्धस्तथैव च।
अतिवर्णो विचित्रश्च वल्मीकाकृतिसंस्थितः।
होविदाये च यो वह्निर्द्विजानां भयमादिशेत्॥
कृशमानः स्फुलिङ्गाद्यैः राज्ञो रूक्षो विरूपवान्।
धूमवातगतश्चाथ वर्णगन्धः समश्च यः॥
गोसुखाकृतसंस्थानो गवां संक्षयमादिशेत्।
चिरेणोत्तिष्ठते यश्च क्षिप्रश्चैव प्रशाम्यति॥
कृष्णवर्णो विधूमाश्च कुणपागन्ध एव च।
क्षयमानस्तदा वह्निराख्याति नृपतेर्वधं॥
गर्भोलूकनिभश्चापि राज्ञो मरणमादिशेत्।
अव्यक्तवर्णो दुर्गन्धो विप्रकीर्णशिखोऽनलः॥
क्षिप्रं विनाशयेद्राष्ट्रं सामात्यं सपरोहितं।
राज्ञो मरणमेवापि शवगन्धो यदाऽनलः॥
हीनस्वनो यदा वह्निः कुणपश्च हुताशनः।
सगन्धः स्यादिवर्णश्च हतमाख्याति पार्थिवं।
श्यावः पाटलकश्चैव वह्निर्बन्धनमादिशेत्॥
विप्रकीर्णशिखश्चापि वायसप्रतिनिस्वनः।
राज्ञः कोषस्य नाशाय युवराजवधाय च॥
तद्विधं कुरुते वह्निरतिधूमोऽप्यतिस्वनः।
करे चोरसि दाहो च होतृवाही च यो भवेत्॥
तस्यार्थहानिं जानीयात्तस्मिन्नुत्पातदर्शने।
करीषधूमसङ्काश इन्द्रायुधसमद्युतिः॥
हस्त्यश्वस्य भयं क्षिप्रं तद्विधो वह्निरादिशेत्।

कर्ब्बुरवर्णो विकृतस्तु तथा चर्म्मसुगन्धिकः ॥
जननाशं तदाख्याति हूयमानो हुताशनः ।
हविर्हरिद्रावर्णाभो लेपमानो यथाऽनलः ॥
निगडाकृतिसंस्थानस्तथा शङ्खनिभाकृतिः ।
पाशाकृतिनिभश्चापि राज्ञो बन्धनमादिशेत् ॥
विच्छिन्नशतमूर्च्छाणामाक्रन्दरुदितस्वनः ।
वामतो यस्य गत्वा च धूमः प्रतिनिवर्त्तते ।
मत्स्यशोणितगन्धानां तुल्यो यस्य च जायते ।
राज्ञः पुत्रवधं विद्यात् शान्तिपौष्टिककर्मसु द्विजः ॥
अशुभान्येवमादीनि न निवेद्यानि भूपते ।
प्रासादाद्रिनिभश्चापि स्वौपम्यः कलशाकृतिः ॥
प्रदक्षिणाकृतिशिखो हंसरक्तोदधिस्वनः ।
शङ्खशब्दसमश्चाश्वानामेव दुन्दुभिनिस्वनः ।
सुवर्णरजतप्रख्यः क्षीरपायसगन्धवान् ॥
शस्त्राणां कवचानाञ्च वारणानां महीपते ।
श्यामते यस्य चात्यर्थं संग्रामे जयमादिशेत् ॥
प्रहृष्टमनसश्चापि शुक्लाम्बरधरा यदि ।
दृश्येयुः शुभाशास्तद्वैजयलक्षणं ॥
यदा गुरुस्त्वप्रमत्तो जुहुयाद्धव्यवाहनं ।
महाभयं विजानीयात् नृपश्चापि गजादिकं ॥
अनन्यवाहनान् पूज्यान दिव्यलक्षणसंयुतान् ।
गदादीनि विशिष्टेन तोयेन स्नापयेद् बुधः ॥
अन्यवाहान् द्विपश्रयान् सर्व्वांस्तेन समाहितान् ।

ब्राह्मकुम्भोदकेनैव स्नापयेत्तत्र साधकः ॥
रात्रे नीराजनं कुर्य्यात्तदहःसु च मन्त्रवित्।
अन्येष्वेवंविधः कार्य्यः स हि रत्नाकरः परः ॥
राजानं वाहनान्यांश्च तथान्यांश्च पुरोहितः।
सर्व्वालङ्कारसंयुक्तान् सर्व्वमङ्गलसंयुतान्।
कृत्वानुवाचयेत्पश्चाद् ब्राह्मणैराशिषो बहु ॥
दक्षिणामतुलान्दद्यादृत्विग्भ्यो गुरवे नृपः।
वाहनञ्च सभूषाढ्यमाचार्य्याय प्रदापयेत् ॥
दासदासीकभृत्येषु ग्रामादिषु च सर्व्वशः।
सर्व्वालङ्कारसंयुक्तान् राजा बाह्यपरिस्थितान् ॥
सारोहैश्चापि संयुक्तान् मत्तद्विपहयोत्तमैः।
ब्राह्मणैः स्वस्तिवचनैरृत्विग्भिः सह संयुतैः ॥
आचार्य्यो राजभवनं नृपं संवेशयेत् स्वयं।
पूर्व्वस्नानविशिष्टेन कुम्भतोयेन मन्त्रवित् ॥
गजशालाश्च सम्प्रोक्ष्य वाजिशालास्तथैव च।
सिद्धार्थतण्डुलतिलैः पुष्पैश्चाप्यवकीर्य्य च ॥
शालामध्ये नृसिंहञ्च सुदर्शनमनामयं।
पूजयेद् गन्धपुष्पादिसर्व्वालङ्कारसंयुतैः।
सप्तभिः कुशराश्नेन कुर्य्याद्भूतबलिं बहिः ॥
ततः शालासु सर्व्वासु ब्राह्मणान् भोजयेदलं।
ततः संवेशने कुर्य्यादाचार्य्यो गजवाजिनं ॥
एवं शान्तिं प्रकुर्वीत निमित्ते सति तद्गुरुः।
परिच्छदस्य नृपतेर्मन्त्रविन्सुसमाहितः ॥

सर्व्वकल्याणसंपूर्णः सर्व्वबाधाविवर्ज्जितः ।
सुपुष्टराज्यतन्त्रश्च नृपस्तेन महीयते ॥

इति गजशान्तिः ।

गृहमध्ये स्थूणा विरोहेत् कपोतो वागारमध्ये निपतेत् । वायसो वा गृहं प्रविशेत् । गौर्गृहमारोहेत् । गौरात्मानं प्रतिभाषेत् । अनड्वान् वा सृक्किणी उल्लिखेदग्नौ वा धूमो जायते वल्मीकश्चोपजायते छत्राकनिर्यासश्चोपजायते । मण्डूकी अवश्यो वासयेत् । स्वप्नेऽस्थिदन्तपतने गृहपतिजायां मधुपतयश्छिन्देत अन्येषु वा गृहोत्पातेषु अगारे यजनाल्लेखनप्रत्यग्निमुखान् कृत्वा स्थालीपाकं जुहोति । यत इन्द्र भयामहे इति पर्यायेनन्नं स्वस्तिदा विशस्पतिरिति याज्यया जुहोत्याज्याहुतीरुपजुहोति यथो व्याख्यातं । अत्र इन्द्राग्नी भवतामवोभिः अत्र इन्द्रायकर्णायानन्त्यः । अमि-न्त्रासौ मासुवितायगयोः अत्र इन्द्रापूषणावाजसातौ । कयानश्चित्र आभुवत् अत्ययुते भवानत्रः समनमाविति । स्विष्टकृत् प्रभृति-तुष्टामा धेनूवरप्रदानम् ।

अथाग्नेय समीपस्थेषु हुतशेषं निदधाति ॥

शन्नोदेवी रभिष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः ।
इति स्थालीसंक्षालनमाज्यशेषमुदकशेषं च पात्रां समानीय एतेषूत्पातेषु उत्पन्नेषु विनयेत् । पौष्णिका तत्र्योगात्पूर्णोमह इति ।

अन्नं संस्कृत्य ब्राह्मणान् संपूज्याशिषो वाचयित्वा शिवं शिव-
मित्यद्धतो व्याख्यातः।

ब्रह्मा उवाच।

———ooOoo———

नानारोगहतानाञ्च आहितानां तथारिभिः।
आदित्याराधनं मुक्त्वा नान्यच्छ्रेयस्करं परं॥
तस्मादाराधयादित्यं सर्व्वरोगविनाशनं।
ग्रहोपघातहन्तारं सर्वोपद्रवनाशनं॥
पूजयानो जगन्नाथं भास्करं तिमिरापहं।
सूर्य्याग्निकार्यं सततं मिथ्यर्थं सुखमाचरेत्॥
महाशान्तिरिति ख्यातं सर्वोपद्रवनाशनं।
ग्रहोपघातहन्तारं दृढ़कायकरं परं॥
यत् कृते मम सूर्य्येण पुरा शान्त्यर्थमादरात्।
सर्व्वपापहरं पुण्यं महाविघ्नविनाशनं॥
महोदयं शान्तिकरं लक्षहोममिति स्मृतं।
तालध्वजपताकाय महावस्त्राय ते नमः॥
स्वाहेति च दानायेह आहुतिं विसृजेद् बुधः।
महोदराय श्वेताय पिङ्गाक्षाय महामते॥
स्वाहा पशाधिपतये आहुतिं विसृजेद् बुधः।
उत्तरादिङ्मुखायेह महादेव प्रियाय च॥
श्वेताय श्वेतवर्णाय त्रिवेदाय नमो नमः।
शान्ताय शान्तरूपाय पिनाकवरधारिणे॥
ईशानदिङ्मुखायेह स्वाहा ईशान आहुतिं।

विसर्जयेत् खगशार्दूल विधिवत्पावकोपम ॥
हुते देवं महात्मानं पावकं विधिवन्नृप ।
लोकपालमुखं देवं विशाद्भिं यावदादरात् ॥
एवं हुताग्निकार्य्यश्च स्वैरं खगवरोत्तम ।
लघुहोमश्च विधिवत्ततः शान्तिं समाचरेत् ॥
भूर्भुवः स्वरिति स्वाहा लघुहोमविधिः स्मृतः ।
महाहोमे च वै सौर एष एव विधिः परः ॥
कृत्वैवमग्निकार्य्यन्तु सौरं खगवरोत्तम ।
लघुहोमश्च विधिवत्ततः शान्तिं समाचरेत् ॥
सिन्दूरारुणरक्ताभः पद्मरक्तान्तलोचनः ।
सहस्रकिरणो देवः सप्ताश्वरथवाहनः ॥
गभस्तिमाली भगवान् सर्व्वलोकनमस्कृतः ।
करोति ते महाशान्तिं ग्रहपीड़ानिवारिणीं ॥
सुचक्ररथमारूढ़ः सर्पा सारमयोऽब्जजः ।
सप्ताश्ववाहनो देवः शान्तये त्वमृतप्रभः ॥
शीतांशुरमृतांशुश्च चयवृद्धिसमन्वितः ।
सोमः सौम्येन भावेन ग्रहपीड़ां व्यपोहतु ॥
तप्तगैरिकसङ्काशः सर्व्वशास्त्रविशारदः ।
सर्व्वदेवगुरुर्विप्रो ब्रह्मर्षिवरः परः ॥
बृहस्पतिरिति ख्यातो ब्रह्मशास्त्रपरश्च यः ।
शान्तेन चेतसा शान्तिः परेण सुसमाहितः ॥
ग्रहपीड़ां विनिर्ज्जित्य करोतु तव शान्तिकं ।
सूर्य्यार्चनपरो नित्यं प्रसादाद्भास्करस्य च ॥

हिमकुन्देन्दुवर्णाभदैत्यदानवपूजितः।
महेश्वरस्तुतो वीरो महासौरो महामुनिः॥
सूर्य्यार्चनपरो नित्यं शुक्रः शुक्लनिभः सदा।
नीतिशास्त्रपरो नित्यं ग्रहपीडां व्यपोहतु॥
भिन्नाञ्जनचय प्रख्यश्छायाजः सुमहाद्युतिः।
सूर्य्यपुत्रः सूर्य्यरतो ग्रहपीडां व्यपोहतु॥
नानारूपधरोऽव्यक्तः रविज्ञानरतिश्च गः।
नोत्पत्तिर्ज्ञायते तस्य नोदयः पण्डितैरपि॥
एकमूलो द्विमूलश्च त्रिशिखः पञ्चचूडकः।
सहस्रशिखरूपश्च इन्द्रकेतुरिव स्थितः॥
सूर्य्यपुत्रोऽग्निपुत्रश्च ब्रह्मविष्णुशिवात्मजः।
अनेकशिखरः केतुः स ते रुजं व्यपोहतु॥
एते ग्रहाः महात्मानः सूर्य्यार्चनपराः सदा।
शान्तिं कुर्व्वन्तु मे हृष्टाः सदा कालहितैषिणः॥
पद्मासनः पद्मवर्णः पद्मपत्रदलेक्षणः।
कमण्डलुधरः श्रीमान् देवगन्धर्व्वसेवितः॥
चतुर्मुखो देवपतिः सूर्य्यार्चनपरः सदा।
सुरश्रेष्ठो महातेजाः सर्व्वलोकप्रजापतिः॥
ब्रह्मशब्देन दिव्येन ब्रह्मशान्तिं करोतु वै।
निष्कालतत्त्वविज्ञो यः कालवित् कालतत्परः॥
पीताम्बरधरो देव आत्रेयीवरदः सदा।
शङ्खचक्रगदापाणिः श्यामवर्णश्चतुर्भुजः॥
अग्निः साक्षात्कृतो येन वनेषु परयेव यः।

सर्वदेवोत्तमो देवो माधवो मधुसूदनः॥
सूर्य्यभक्त्यान्वितो नित्यं विंशतिर्विंशतिप्रियः।
सूर्य्यध्यानपरो नित्यं विष्णुः शान्तिं करोतु मे॥
हेमकुन्देन्दुसङ्काशो गोश्रुत्याभरणोऽरिहा।

गोश्रुतयः सर्पाः।

चतुर्भुजो महातेजाः पुष्पेन्दुः शशिशेखरः।
चतुर्मुखो भस्मधरः श्मशाननिलयः सदा॥
मातॄणां नियतश्चैव तथ च क्रतुसूदनः।
वरो वरेण्यो वरदो देवदेवो महेश्वरः॥
त्रैलोक्यनमितः श्रीमानादित्याराधने रतः।
आदित्यपरमो नित्यमादित्यध्यानतत्परः॥
आदित्यदेहसम्भूतः स मे शान्तिं करोतु वै।
पद्मरागनिभा देवी चतुर्वदनपङ्कजा।
अक्षमालार्पितकरा कमण्डलुधरा शुभा॥
ब्रह्माणी सौम्यवदना आदित्याराधने रता।
शान्तिं करोतु मे प्रीत्या आशीर्व्वादपरा खग॥
महाश्वेतेति विख्याता आदित्यदयिता सदा।
महाश्वेतेति सेत्यस्मिन् ख्यातिं लोके गता खग॥
हिमकुन्देन्दुसदृशी महावृषभवाहिनी।
त्रिशूलहस्ताभरणा गोश्रुत्याभरणा मता॥
चतुर्भुजा चतुर्व्वक्त्रा त्रिनेत्रा पापनाशिनी।
वृषध्वजा यानरता रुद्राणी शान्तिदाऽस्तु मे॥
मयूरवाहना देवी सिंहवाहणविग्रहा।

शक्तिहस्ता महाकाया सर्व्वालङ्कारभूषिता ॥
सूर्य्यरक्ता महावीर्य्या वनवासपरा सदा।
कौमारी वरदा देवी शान्तिं मातु करोतु ते॥
कम्बुचक्रधरा श्यामा पीताम्बरधरा खग।
चतुर्भुजा च या देवी चतुर्वदनपङ्कजा ॥
सूर्य्यार्चनरता नित्यं सूर्य्यैकगतमानसा।
शान्तिं करोतु ते नित्यं सर्व्वासुरविमर्द्दिनी॥
ऐरावतगजारूढ़ा पविहस्ता महाबला।

पविर्वज्रं।

सहस्रलोचनादेवी वर्णितश्यम्यकेक्षणा ॥
सिद्धगन्धर्व्वनमिता सर्व्वाभरणभूषिता।
इन्द्राणी ते सदा वीर शान्तिमाशु करोतु वै ॥
वराहरूपा विकटा वाराहवरवर्णिनी।
श्यामावदाता या देवी शङ्खचक्रगदाधरा।
तर्जयन्तीह निःशेषं पूजयन्ती सदा रविं॥
वाराही वरदा देवी तव शान्तिं करोतु वै।
अर्द्धकेशोत्कटामासा निर्मांसा स्नायुबन्धना॥
करालवदना घोरा खड्गघण्टोद्यता सती।
कपालमालिनी घोरा खट्वाङ्गवरधारिणी॥
आरक्तपिङ्गनयना गजचर्म्मावगुण्ठिता।
शायदाभरणा देवी श्मशानविनिवासिनी।
शिवा रूपेण घोरेण शिवाराधभयङ्करी॥
चामुण्डा चण्डरूपेण सदा रक्षाङ्करोतु मे।

चण्डमुण्डकरा देवी चण्डमुण्डगता सती ॥
आकाशमातरो देव्यस्तथा लोकस्य मातरः ।
भूतानां मातरः सर्व्वास्तथा च पितृमातरः ॥
वृद्धवृद्धैस्तु पूज्यन्ते तास्तु देव्यो मनीषिभिः ।
मात्रे प्रमात्रे तन्मात्रे इति मातृमुखास्तु ताः ॥
पितामही तु तन्माता वृद्धा या च पितामही ।
इत्येतास्तु पितामह्यः शान्तिं ते पितृमातरः ॥
सर्व्वमातृमुखादेव्यः स्वायुधाः शस्त्रपाणयः ।
जगद्व्याप्य प्रतिष्ठन्त्यो बलिकामा महोदयाः ॥
शान्तिं कुर्वन्तु ते नित्यमादित्याराधने रताः ।
शान्तेन चेतसा शान्ता शान्ता त्वं भव शान्तिदा ॥
सर्व्वावयवयुक्तेन गात्रेण तनुमध्यमा ।
पीतश्यामादिसौम्येन चित्रलेखेव शोभिता ॥
ललाटतिलकोपेतचन्द्रलेखाग्र धारिणी ।
चित्राम्बरधरा देवी सर्व्वाभरणभूषिता ॥
वरा क्षौमयरूपाणां शुभा गुणमहास्पदं ।
सर्व्वमन्त्रे तु सन्तुष्टा उमा देवी वरप्रदा ॥
साक्षादागत्य रूपेण शान्तेनामिततेजसा ।
शान्तिं करोतु ते प्रीत्या आदित्यचरणे रता ॥
चपलाबालरूपेण षड्वक्त्रः शिखिवाहनः ।
पूर्णेन्दुवदनः श्रीमान् त्रिशिखः शक्तिमान् विभुः ॥
कृत्तिकापत्यरूपेण समुद्दीप्तः सुरार्चितः ।
कार्त्तिकेयो महातेजा आदित्याद्दरदर्पितः ॥

शान्तिं करोतु सततं फलं सौख्यञ्च सम्पदः।
आत्रेयोमवलां जन्म तथारोग्यं खगाधिप॥
श्वेतवस्त्रपरीधानस्ताम्र्यश्च कनकप्रभुः।
शूलहस्तो महाप्राज्ञो नन्दीशो रविभावितः॥
शान्तिं करोतु ते शान्तो धर्म्मे मतिमनुत्तमां।
धर्म्म तरतु भो नित्यमचलं संप्रयच्छतु॥
महोदरो महाकायो गजवक्त्रो महाबलः।
नागयज्ञोपवीतेन नागाभरणभूषितः॥
सर्व्वार्थसम्पदाधारो गणाध्यक्षो वरप्रदः।
भीमगात्रो भवो देवो नायकोऽथ विनायकः।
करोतु ते महाशान्तिं प्रीतिं प्रीतेन चेतसा॥
पीताम्बरधरा कन्या नानालङ्कारभूषिता।
यमुना स्ताम्बिका पुण्या सर्व्वलोकनमस्कृता॥
सर्व्वसिद्धिकरा देवी प्रसादात्परमा परा।
शान्तिं करोतु ते माता भुवनस्य खगाधिप॥
त्रिगुणात्मेन सर्व्वेण महामहिषमर्द्दनी।
धनुः-शक्ति-प्रहरण-खड्ग-पट्टिशधारिणी॥
आर्ज्जवेनोद्यतकरा सर्व्वोपद्रवनाशिनी।
शान्तिं करोतु ते गौरा दुर्गा भगवती शिवा॥
निर्म्मांसेन शरीरेण स्नायुरज्जुनिबन्धनः।
अतिसूक्ष्मोऽतिव्यक्तो यः अशोभः किरीटी महान्॥
सूर्य्यात्मको महावीर्य्यः सूर्य्ये च कृतमानसः।
सूर्य्यभक्तिपरो नित्यं स ते शान्तिं प्रयच्छतु॥

प्रचण्डगणसैन्योऽसौ महाकटाक्षधारकः।
अक्षमालार्पितकरस्तापसश्चेश्वरो वरः॥
चण्डपापहरो नित्यं ब्रह्महत्यादिनाशनः।
शान्तिं करोतु ते नित्यं आदित्याराधने रतः।
करोतु च महायोगी कल्याणानाखाः परम्परम्॥
आकाशे मातरो देव्यस्तथा लोकस्य मातरः।
भूतानां मातरः सर्व्वास्तथा देवस्य मातरः॥
सूर्य्यार्चनपरा देव्यो जगद्दाण्य व्यवस्थिताः।
शान्तिं कुर्व्वन्तु ते नित्यं मातरः सुरपूजिताः॥
ये रौद्रा रौद्रकर्म्माणो रौद्रस्थाननिवासिनः।
मातरो रौद्ररूपाश्च गणानामधिपाश्च ये॥
विघ्नभूतास्तथा चान्ये दिवि दिक्षु समाश्रिताः।
सिद्धिं कुर्व्वन्तु ते नित्यं भयेभ्यः पान्तु सर्व्वदा॥
ऐन्द्रां दिशि गता ये तु वज्रहस्ता महाबलाः।
हिमकुन्देन्दुपद्मोशनील-कृष्णाङ्गलोहिताः॥
दिव्यान्तरिक्षा भौमाश्च पातालतलवासिनः।
सूर्य्यार्चनरता ऐन्द्राः शान्तिं कुर्व्वन्तु ते सदा॥
आग्नेय्यां ये स्थिताः सर्व्वे श्रुतहस्तास्तपस्विनः।
सूर्य्यभक्तास्तु रक्तास्तु तथा वै रक्तभूषणाः॥
दिव्यान्तरिक्षा भौमाश्च आग्नेया भास्करप्रियाः।
आदित्याराधनपराः शं प्रयच्छन्तु ते सदा॥
याम्यां दिशि गता ये तु सततं दण्डपाणयः।
कृष्णाङ्गाः कृष्णनेपथ्याः वरा वै कृष्णलोहिताः॥

दिव्यान्तरिक्षा भौमाश्च यमस्यानुचराः खग।
आदित्याराधनपराः शं प्रयच्छन्तु ते सदा॥
नैर्ऋत्यां संस्थिता ये तु राक्षसा खड्गपाणयः।
नीलाङ्गा नीलवर्णाश्च तथा वै नीललोहिताः॥
दिव्यान्तरिक्षा भौमाश्च विरूपाक्षानुगामिनः।
आदित्यस्यार्चने नित्यं कुर्वन्त्वारोग्यमुत्तमं॥
अपरस्यां वरा ये तु सततं पाशपाणयः।
कर्म्माभाः कर्म्मरूपाश्च सदा चणिकवीक्षणाः॥
दिव्यान्तरिक्षा भौमाश्च आदित्याराधने रताः।
कुर्व्वन्तु ते सदा शान्तिं वारुणा वरुणानुगाः॥
वायव्यां संस्थिता नित्यं महावेगाश्चराः खगाः।
पीताख्याः पीतनिर्भासास्तथा वै पीतलोहिताः॥
दिव्यान्तरिक्षा भौमाश्च आदित्याराधने रताः।
सूर्य्यव्रताः सुमनसः शान्तिं कुर्व्वन्तु ते सदा॥
उत्तरायां दिशि गताः सततं निधिपाणयः।
गिरिकाद्याः कस्तूरिकास्तथा वै कृष्णलोहिताः॥
दिव्यान्तरिक्षा भौमाश्च अलकाधिपवल्लभाः।
आदित्याराधनपराः शं प्रयच्छन्तु ते सदा॥
ऐशान्यां संस्थिता ये च प्रशान्ताः शूलपाणयः।
भस्मोद्धूलितदेहाश्च नीलकण्ठलोहिताः॥
दिव्यान्तरिक्षा भौमाश्च पातालतलवासिनः।
सूर्य्यपूजापरा नित्यं शान्तिं कुर्व्वन्तु ते सदा॥
लोकपालानुगा ह्येते महाबलपराक्रमाः।

आदित्यं पूजयित्वा तु बलिमेषां विनिक्षिपेत् ॥
ततः सुप्रान्तमनसो लोकपालसमन्विताः।
आग्नेयीसबलाः सर्व्वे शं प्रयच्छन्तु पूजिताः ॥
अमरावती नाम पुरी पूर्व्वभागे व्यवस्थिता।
विद्याधरगणाकीर्णा सिद्धगन्धर्व्वसेविता।
रत्नप्राकाररुचिरा महारत्नोपशोभिता ॥
तत्र देवपतिः श्रीमान् वज्रपाणिर्महाबलः।
गोपतिर्गोसहस्रेण शोभमानेन शोभते ॥
ऐरावतगजारूढो गैरिकाभो महाद्युतिः।
इन्द्रः सहस्रनयनः आदित्याराधने रतः ॥
सूर्य्यध्यानैकपरमः सूर्य्यभक्तिसमन्वितः।
सूर्य्यप्रणामपरमः शान्तिं ते शीघ्रमृच्छतु ॥
आग्नेये दिग्विभागे तु पुरी तेजवती सदा।
नानादेवगणाकीर्णा नानारत्नोपशोभिता ॥
तत्र ज्वालासमाकीर्णो दीप्ताङ्गारसमद्युतिः।
पुरा गोदेहिनां देहे ज्वलनं पापनाशनं ॥
आदित्याराधनपरा आदित्यगतमानसाः।
शान्तिं करोतु ते देवा पत्र पापपरिक्षयं ॥
वैवस्वती पुरी रम्या दक्षिणे च महात्मनः।
सुरनागगणाकीर्णा पितृरक्षोगणाकुला ॥
तत्रेन्द्रनीलसङ्काशो रक्तान्तायतलोचनः।
महामहिषमारूढो रक्तमाल्यविभूषणः ॥
अन्तकोऽत्र महातेजाः लोकधर्म्मपरायणः।

आदित्याराधनपरः क्षेमारोग्यं ददातु मे ॥
नैरृते तु दिशो भागे पुरी कृष्णेति विश्रुता।
महारक्षोगणाकीर्णा पिशाचप्रेतसंकुला ॥
तत्र स्कन्दनिभो देवो रक्तस्रग्वस्त्रभूषणः।
खड्गपाणिर्महातेजाः करालवदनोज्ज्वलः ॥
राक्षसेन्द्रो वसेन्नित्यं आदित्याराधने रतः।
करोतु ते महाशान्तिं धनं धान्यञ्च यत्नतः॥
पश्चिमे तु दिशां भागे पुरी शुद्धवती शुभा।
ऋषिसिद्धगणाकीर्णा नानारत्नसुशोभिता ॥
तत्र कुन्देन्दुसंकाशो हरिः पिङ्गललोचनः।
शुक्लाम्बरधरो देवो पाशहस्तो महाबलः ॥
वरुणः परया भक्त्या आदित्यगतमानसः।
रोगकाशादिसंकाशं तापं निर्व्वापयत्वथ ॥
वायव्ये दिग्विभागे तु पुरी गन्धवती शुभा।
ऋषिसिद्धगणाकीर्णा हेमप्राकारतोरणा ॥
तत्र ह्यीश्वरदेहस्तु कृष्णः पिङ्गललोचनः।
पृथिव्याः प्रान्तसन्तानो ध्वजयष्ट्यायुधोच्छ्रितः ॥
चरमः परमो देवो ग्रहेशश्च परात्परः।
क्षेमारोग्यं बलं शान्तिं करोतु सततं तव ॥
महोदया नाम पुरी मन्दरेण महोदया।
नानायक्षसमाकीर्णा नानारत्नोपशोभिता ॥
तत्र देवो गदाहस्तश्चित्रस्रग्वस्त्रभूषणः।
इक्ष्वाकुर्महातेजा हरिः पिङ्गललोचनः ॥

शान्तिं करोतु ते प्रीतः शान्तः शान्तेन चेतसा।
यशोवती पुरी रम्या ऐशानीं दिशमाश्रिता॥
नानागणसमाकीर्णा नानाकृतसुरालया।
तेजःप्राकारपर्य्यन्ता अनौपम्या महोज्ज्वला॥
तत्र कुन्देन्दुसंकाशो अङ्गरागविभूषितः।
त्रिनेत्रः शान्तरूपात्मा अक्षमालाधरो वरः।
ईशानः परमो देवः सदा ते शान्तिमृच्छतु॥
उमापतिर्महातेजाश्चन्द्रार्द्धकृतशेखरः।
भूर्लोके च भुवर्लोके स्वर्लोके निवसन्ति ये।
देवी देवीसमाकीर्णा शान्तिं कुर्व्वन्तु ते सदा॥
महर्लोके जनोलोके तपोलोके च ये स्थिताः।
ते सर्व्वे मुदिता देवाः शान्तिं कुर्व्वन्तु ते सदा॥
सत्यलोके तु ये देवास्तत्र भोज्ज्वलविग्रहाः।
सूर्य्यभक्ताः सुमनसो भयं निर्णाशयन्तु ते॥
गिरिकन्दरदुर्गेषु वनेषु निवसन्ति ये।
सूर्य्यार्चनपरा देवा रक्षां कुर्व्वन्तु ते सदा॥
शरच्चन्द्रातिगौरेण देहेनामलतेजसा।
सरस्वती सूर्य्यभक्ता शान्तिं यच्छतु ते सदा॥
या तु चामीकरच्छाया सरोजकरपल्लवा।
सूर्य्यभक्ता श्रिया देवी शान्तिं यच्छतु ते सदा॥
हारेण सुविचित्रेण भास्वत्कनकमेखला।
अपराजिता सूर्य्यपरा करोतु विजयं तव॥
कृत्तिका परमा देवी रोहिणी च वरानना।

श्रीमन्मृगशिरो भद्रमार्द्रा च परमोज्ज्वला॥
पुनर्व्वसुस्तथा पुष्याः अश्लेषा च तथा खग।
सूर्य्यार्चनरता नित्यं सूर्य्यभावेन भाविताः।
पूर्व्वभागे स्थिता ह्येताः शान्तिं कुर्व्वन्तु ते सदा।
नक्षत्रमातरो ह्येताः कुर्व्वन्तु रविनोदिताः॥
अनुराधा ततो ज्येष्ठा मूलं सूर्य्यपरं तथा।
पूर्व्वाषाढ़ा महावीर्य्या आषाढा चोत्तरा तथा॥
अभिजिन्नाम नक्षत्रं श्रवणश्च बहुश्रुतं।
एताः पश्चिमतो दीप्ता राजन्ते चानुमूर्त्तयः॥
भास्करं पूजयन्त्येताः सर्व्वकालं सुभाविताः।
शान्तिं कुर्व्वन्तु ते नित्यं विभूतिश्च महाधिकां॥
धनिष्ठा शतभिषा या तु पूर्व्वभाद्रपदा तथा।
उत्तराभाद्ररेवत्याश्विनी च महामते।
भरणी च महादेवी नित्यमुत्तरतःस्थिता॥
सूर्य्यार्चनरता नित्यमादित्यगतमानसाः।
शान्तिं कुर्व्वन्तु ते नित्यं विभूतिश्च महाईशां॥
वृषो वृषाधिपः सिंहराशिर्दीप्तिमतां वरः।
पूर्व्वेण भासयन्त्येते सूर्य्ययोगपराः शुभाः।
शान्तिं कुर्व्वन्तु ते भक्त्या सूर्य्यपादाब्जपूजकाः॥
धनुः कन्या च परमा मकरश्चापि कान्तिमान्।
एते दक्षिणभागे तु पूजयन्ति रविं सदा॥
तुला मिथुनकुम्भाश्च पश्चिमेन व्यवस्थिताः।
सूर्य्यपादार्चनरताः शान्तिं कुर्व्वन्तु ते सदा॥

कर्कटो वृश्चिको मीन एते उत्तरतः स्थिताः।
यजन्त्येते महाकालमादित्यं ग्रहनायकं।
शान्तिं कुर्वन्तु ते नित्यं स्वस्वोक्तस्थानतत्पराः॥
यतयः कृतपुण्याश्च ये स्मृताः सततं बुधैः।
ऋषयः सप्तविंशाद्याः प्रशान्ताः परमोज्ज्वलाः।
सूर्य्यप्रसादसम्पन्नाः शान्तिं कुर्वन्तु ते सदा॥
कश्यपो गालवो गार्ग्यो विश्वामित्रो महामुनिः।
मनुर्दक्षो वसिष्ठश्च मार्त्तण्डः पुलहः क्रतुः॥
नारदो भृगुरात्रेयो भरद्वाजोऽङ्गिरा मुनिः।
वाल्मीकः कौशिकः कण्वः शालङ्योऽथ पुनर्वसुः॥
शालङ्कायन इत्येते ऋषयो वै खगाधिप।
सूर्य्यध्यानैकपरमा आदित्याराधने रताः॥
तारकोऽग्निमुखो दैत्यः कालनेमिर्म्महाबलः।
एते दैत्या महात्मानः सूर्य्यभावेन भाविताः॥
पुष्टिं बलं तथारोग्य प्रयच्छन्तु सुरारयः।
वैरोचनो हिरण्याक्षः सुपर्व्वा वसुलोचनः॥
मधुकुन्दो मुकुन्दश्च दैत्यो रैवतकस्तथा।
भावेन परमेणापि वक्त्राक्ताग्रतलोचनः।
महाभोगकृताटोपः शङ्खाक्तकृतलक्षणः॥
अनन्तो नागराजेन्द्र आदित्याराधने रतः।
महापापचयं हत्वा शान्तिमाशु करोतु ते॥
अतिश्वेतशरीरेण स्फुरन्मौक्तिकसन्निभः।
नित्यं राजश्रिया युक्तो वासुकिः शान्तिमृच्छतु।

अतिपीतेन वर्णेन विस्फुरन् भोगसम्पदा।
तेजसा चापि दिव्येन कृतस्वस्तिकलाञ्छनः॥
नागराट् तचकः श्रीमान् नायकौघसमन्वितः।
करोतु ते महाशान्तिं सर्व्वदोषविषापहः॥
अतिकृष्णेन वर्णेन जटाविकटमस्तकः।
कण्ठे रेखात्रयोपेतो घोरदंष्ट्रायुधोद्यतः॥
कर्कोटको महाभागो विषदर्पोद्दलान्वितः।
विवसन् सर्व्वसन्तापं हत्वा शान्तिं करोतु ते॥
पद्मवर्णेन देहेन चारुपद्मायतेक्षणः।
पद्मविन्दुकृताभासो ग्रीवायां शुभलक्षणः॥
व्योमपद्मो महाभागः सूर्य्यपादार्चने रतः।
करोतु ते महाशान्तिं महापापभयापहां॥
पुण्डरीकनिभेनापि देहेनामिततेजसा।
शङ्खशूलाङ्करचितैर्भूषितो मूर्ध्नि सर्व्वदा॥
महापद्मो महानागो नित्यं भास्करपूजकः।
स ते शान्तिं श्रियं जन्म निर्म्मलं संप्रयच्छतु॥
श्यामेन देहभारेण श्रीमान् कमललोचनः।
विषदर्पबलोन्मत्तो ग्रीवायां रेखयान्वितः॥
शङ्खपालः श्रिया युक्तः सूर्य्यपादकपूजकः।
महाविषहरो हृष्टः स च शान्तिं करोतु ते॥
अतिदेहेन गौरेण चन्द्रार्द्धकृतमस्तकः।
दीप्ताभोगकृताटोपः शुभलक्षणलक्षितः॥
कुलिशो नाम नागेन्द्रो नित्यं सूर्य्यपरायणः।

अपहृत्य विषं घोरं करोतु तव शान्तिकं ॥
अन्तरिक्षे च ये नागा ये नागाः स्वर्गसंस्थिताः ।
पाताले ये स्थिता नागाः सर्व्वेप्यत्र समाश्रिताः ।
सूर्य्यपादार्चनरताः शान्तिं कुर्व्वन्तु ते सदा ॥
नागिन्यो नागकन्याश्च तथा नागकुमारकाः ।
सूर्य्यभक्ताः सुमनसः शान्तिं कुर्वन्तु ते सदा ॥
य इमं नागसंस्थानं कीर्त्तयेच्छृणुयात्तथा ।
न तस्य सर्पा हिंसन्ति न विषं क्रमते सदा ॥
गङ्गा पुण्या महादेवी यमुना नर्म्मदा नदी ॥
गोमती चापि शोना च वरुणा देविका तथा ।
सर्व्वग्रहपतिं देवं देवेशं लोकनायकं ॥
पूजयन्ति सदा नद्यः सूर्य्यवद्भावभाविताः ।
शान्तिं कुर्व्वन्तु ते नित्यं सूर्य्यध्यानैकमानसाः ॥
नैरञ्जना नाम नदी शोनश्चापि महानदः ।
मन्दाकिनी च परमा तथा सत्यान्विता शुभा ॥
एताश्चान्याश्च बह्व्यो वै भुवि दिव्यन्तरीक्षगाः ।
सूर्य्यार्चनपरा नद्यः कुर्व्वन्तु तव शान्तिकं ॥
महावैश्रवणो देवो यक्षराजो महाबलः ।
यक्षकोटिपरो वारो यक्षसंक्षेपसंयुतः ॥
महाविभवसम्पन्नः सूर्य्यपादार्चने रतः ।
सूर्य्यध्यानैकपरमः सूर्य्यभावेन भावितः ।
शान्तिं करोतु मे प्रीतः पद्मपत्रायतेक्षणः ॥
मणिभद्रो महायक्षो मणिरत्नविभूषितः ।

मनोहरेण हारेण कम्बुलग्नेन राजते ॥
यक्षिणीयक्षकन्याभिः परिवारितविग्रहः ।
सूर्य्यार्चनसमायुक्तः करोतु तव शान्तिकं ॥
सुवीरो नाम यक्षेन्द्रो मणिकुण्डलभूषितः ।
ललाटे हेमपट्टेन प्रबद्धेन विराजते ॥
वापिको नाम यक्षेन्द्रः कण्ठाभरणभूषितः ।
मुकुटेन विचित्रेण बहुरत्नान्वितेन च ॥
यक्षवृन्दसमाकीर्णो यक्षकोटिसमन्वितः ।
सूर्य्यार्चनपरः श्रीमान् करोतु तव शान्तिकं ॥
धृतराष्ट्रो महाराजा नागयक्षाधिपः खग ।
दिव्यपट्टोऽगुरुच्छत्रो मणिकाञ्चनभूषितः ॥
सूर्य्यभक्तः सूर्य्यरतः सूर्य्यपूजापरायणः ।
सूर्य्यप्रसादसम्पन्नः करोतु तव शान्तिकं ॥
पूर्णभद्रो महायक्षः सर्व्वालङ्कारभूषितः ।
ललाटे हेमपट्टेन प्रबद्धेन विराजते ॥
बहुयक्षसमाकीर्णो यक्षकोटिशतेन च ।
सूर्य्यप्रणामपरमः सूर्य्यभक्त्या समन्वितः ।
सूर्य्यार्चनसमायुक्तः करोतु तव शान्तिकं ॥
विरूपाक्षाख्ययक्षेन्द्रो श्वेतवासा महाद्युतिः ।
नानाकाञ्चनमालाभिरुपशोभितकाञ्चनः ॥
सूर्य्यपूजापरो नित्यं कम्बाक्षः कम्बसन्निभः ।
तेजसादित्यसङ्काशः करोतु तव शान्तिकं ॥
अन्तरिक्षगता यक्षाः ये यक्षा सूर्य्यवासिनः ।

गिरिदुर्गेषु ये यक्षाः पातालतलवासिनः।
नानारूपधरा यक्षा सूर्य्यभक्ता दृढव्रताः॥
ये तद्भक्तास्तन्मनसः सूर्य्यपूजासमुत्सुकाः।
शान्तिं कुर्वन्तु ते हृष्टाः शान्ताः शान्तिपरायणाः॥
यक्षिण्यो विविधाकारास्तथा यक्षकुमारकाः।
यक्षकन्या महाभागा सूर्य्यस्यार्चनतत्पराः॥
शान्तिं स्वस्त्ययनं क्षेमं बलं कल्याणमुत्तमं।
सिद्धिमाशु प्रयच्छन्तु नित्यास्ते सुसमाहिताः॥
अर्चिताः सर्वतः सर्वे यक्षाश्चैव महाधिपाः।
सूर्य्यभक्ता सदाकालं शान्तिं कुर्वन्तु ते पराम्॥
सागराः सर्वतः सर्वे ग्रहरत्नानि सर्वगः।
सूर्य्यस्याराधनपराः कुर्वन्तु तव शान्तिकं॥
राक्षसाः सर्वतश्चैव घोररूपा महाबलाः।
स्थूलाश्च राक्षसा ये तु अन्तरिक्षचराश्च ये॥
पाताले राक्षसा ये तु नित्यं सूर्य्यार्चने रताः।
प्रेतानामधिपाः सर्वे प्रेताश्च सर्व्वतोमुखाः।
अतिदीप्ताश्च ये प्रेता ये प्रेता रुधिराशनाः॥
अन्तरिक्षचराः प्रेतास्तथाऽन्ये स्वर्गवासिनः।
पाताले भूतले चापि ये प्रेताः कामचारिणः॥
एकचक्रो रथो यस्य यस्तु देवो वृषध्वजः।
तेजसा तस्य देवस्य शान्तिं कुर्वन्तु ते सदा॥
ये पिशाचा महावीर्या ऋद्धिमन्तो महाबलाः।
नानारूपधराः सर्वे नाना च गुणवत्तराः॥

अन्तरिक्षे पिशाचा ये स्वर्गे ये च महाबलाः।
पाताले भूतले ये च बहुरूपा मनोजवाः॥
यस्याहं सारथिर्वीर यस्य त्वं तुरगः सदा।
तेजसा तस्य देवस्य शान्तिं कुर्वन्तु ते सदा॥
अपस्मारग्रहाः सर्वे सर्वे वापि ज्वरग्रहाः।
गर्भबालग्रहा ये च दन्तरोगग्रहाश्च ये।
अन्तरिक्षग्रहा ये च शान्तिं कुर्वन्तु ते सदा॥
इति देवादयः सर्वे सूर्य्यज्ञानविधायिनः।
कुर्वन्तु जगतः शान्तिं सूर्य्यभक्त्यैव सर्वदा॥
जयः सूर्य्याय देवाय तमोमोहविरोधिने।
जगतामेकसूर्य्याय भास्कराय नमोऽस्तु ते॥
ग्रहोत्तमाय शान्ताय जयः कल्याणकारिणे।
जयः पद्मविकाशाय बुद्धरूपाय ते नमः॥
जयो दीप्तिविधानाय जयः कान्तिविधायिने।
तमोघ्नाय अजेयाय अजिताय नमो नमः॥
जयो वाजेयदीप्तेश सहस्रकिरणोज्वल।
रयनिर्जितलोकाय बहुरूपाय ते नमः॥
गायत्रीवेदरूपाय सावित्रीदयिताय च।
धराधराय सूर्य्याय मार्त्तण्डाय नमो नमः॥

सुमन्तुरुवाच।

———000(1)000———

एवं हि विहिता शान्तिररुणेन महीपते।
श्रेयसे वैनतेन्द्राय गरुडाय महात्मने॥

एवमन्येऽपि राजेन्द्र मानवाश्चाग्नियोगिनः।
अस्मिन् कृतेऽग्निकार्ये तु नीरुजास्ते भवन्ति हि॥
तस्माद्यत्नेन कर्त्तव्यो अग्निकार्यो विधानतः।
करणीयन्तु राजेन्द्र यदिदं शान्तिलक्षणं॥
ग्रहोत्पातेषु दुर्भिक्षे उत्पातेषु च कृत्स्नशः।
अवर्षमाने पर्जन्ये लक्षहोमसमन्वितं॥
जपित्वा योऽग्निसूक्तन्तु ध्यात्वा रविं प्रयत्नतः।
एवं कृते भवन्देवो वर्षते कामतो नृणां॥
इत्येवं शान्तिकाध्यायं यः पठेच्छृणुयादपि।
विहाय सर्वलोकांस्तु सूर्यलोके महीयते॥
कन्यार्थी लभते कन्यां जयकामो जयं लभेत्।
अर्थकामो लभेदर्थं पुत्रकामः सुतं लभेत्॥
यं यं प्रार्थयते कामं शृणुते मानवो नृप।
तं सर्वं शीघ्रमाप्नोति भास्करस्य प्रिया भवेत्॥
श्रुत्वा शान्तिमिमां पुण्यां समग्रां कुरुनन्दन।
संग्रामं प्रविशेद्यस्तु ध्यायमानो दिवाकरं।
सर्वान् जित्वा रणे शत्रून् आनन्दपरमो भवेत्॥
अक्षयं मोदते कालं अतिरस्कृतशासनः।
व्याधिभिर्नाभिभूयेत पुत्रपौत्रप्रतिष्ठितः॥
भवेदादित्यसदृशस्तेजसा प्रभया तथा॥
यमुद्दिश्य पठेद्वार वाचको मानवं प्रति।
न पीड्यते त्वसौ दोषैर्वातकम्पकफात्मकैः॥
नाकाले मरणं तस्य सर्वपापैर्न दुष्यते।

न विषं क्रमते देहे न जडो नान्धमूकता।
न चोत्पातभयं तस्य नचैवाऽरिभयं भवेत्॥
ये रोगा ये महोत्पाता ये ग्रहा यन्महाविषं।
ते सर्वे प्रशमं यान्ति श्रवणादस्य भारत॥
यत्पुण्यं सर्वतीर्थानां गङ्गादिषु निषेवितः।
तत्पुण्यं कोटिगुणितं प्राप्नोति श्रवणादिभिः॥
दशानां राजसूयानां अन्येषाञ्च विशेषतः।
जीवेद्वर्षशतं साग्रं सर्वबाधाविवर्जितः॥
गोघ्नश्चैव कृतघ्नश्च ब्रह्महा गुरुतल्पगः।
शरणागतहन्ता च ये च विश्वासघातकाः॥
दुष्टपापसमाचारः पितृहा मातृहा तथा।
श्रवणाच्चैव पाठेन मुच्यते सर्वपातकैः॥
इतिहासमिदं पुण्यं अग्निकार्य्यमनुत्तमं।
सूर्य्यभक्ते सदा देयं सूर्य्येण कथितं पुरा॥
अरुणस्य महाबाहो अरुणेनानुजस्य तु।
अनुजेन पुरा प्रोक्तं भोजकानां महात्मनां॥
सूर्य्यशर्म्ममुखानान्तु शाकद्वीपे महीपते।
तेनापि कथितं मह्यं सर्वपापभयापहं॥

इति भविष्यपुराणोक्ता महाशान्तिः।

——०()——

अथाद्भुतशान्तयः। तत्र मत्स्यपुराणे।

मनुरुवाच।

दिव्यान्तरिक्षे भौमेषु या शान्तिरभिधीयते।

तामहं श्रोतुमिच्छामि महोत्पातेषु केशव ॥

मत्स्य उवाच ।

अथातः संप्रवक्ष्यामि विविधेष्वद्भुतेषु च ।
विशेषेण तु भौमेषु शान्तिं कुर्यान्नराधिप ॥
अभया चान्तरिक्षेषु भौमा दिव्येषु पार्थिव ।
विजिगीषुपराद्राजन् भूतिकामश्च यो भवेत् ॥
विजिगीषुपरेणैव अभियुक्तस्तथा परैः ।
तथाभिचारशङ्कायां शत्रूणामपि नाशने ।
भये महति संप्राप्ते अभया शान्तिरिष्यते ॥
भूतेषु दृश्यमानेषु रौद्री शान्तिस्तथेष्यते ।
वेदनाशे समुत्पन्ने जने जाते च नास्तिके ।
अपूज्यपूजने जाते ब्राह्मी शान्तिस्तथेष्यते ॥
भविष्यत्यभियोगे च परचक्रभयेऽपि च ।
राष्ट्रभेदे च संप्राप्ते रौद्री शान्तिः प्रशस्यते ॥
त्र्यहातिरिक्ते पवने रूक्षे सर्वदिगुत्थिते ।
वैकृते वातजे व्याधौ वायवी शान्तिरिष्यते ॥
अनावृष्टिभये जाते तथा विकृतवर्षणे ।
जलाशयविकारे च वारुणी शान्तिरिष्यते ॥
अभिशापभये प्राप्ते भार्गवी च तथा द्विज ।
जाते प्रसववैकृत्ये प्राजापत्या महाभुज ।
उपस्कराणां वैकृत्ये त्वाष्ट्री पार्थिवनन्दन ॥
बालानां शान्तिकामस्य कौमारी च तथा नृप ।
आग्नेयीं कारयेच्छान्तिं संप्राप्ते वह्निवैकृते ॥

आज्ञाभङ्गे तथा जाते जायाभृत्यादिसंक्षये।
अश्वानां शान्तिकामस्य तद्विकारे समुत्थिते।
अश्वानां काममानस्य गान्धर्वी शान्तिरिष्यते॥
गजानां शान्तिकामस्य तद्विकारे समुत्थिते।
गजानां काममानस्य शान्तिराङ्गिरसी भवेत्॥
पिशाचादिभये जाते शान्तिस्तु नैर्ऋती स्मृता।
अपमृत्युभये जाते दुःस्वप्नेऽपि महाभुज॥
काम्यान्तु कारयेच्छान्तिं संप्राप्ते मकरे तथा।
धननाशे समुत्पन्ने कौवेरो शान्तिरिष्यते॥
प्रचाणाञ्च तथार्थानां वैकृत्ये समुपस्थिते।
भूमिकामस्तथा शान्तिं पार्थिवीञ्च प्रयोजयेत्॥
प्रथमे दिनयामे च रात्रौ वा मनुजोत्तम।
हस्ते स्वात्याञ्च चित्रायामादित्ये चाश्विने तथा॥
आर्य्यम्णे सोमजातेषु वायव्येष्वद्भुतेषु च।
द्वितीये दिनयामे च रात्रौ च रविनन्दन॥
पुष्याग्नेयविशाखायां पित्र्याजभरणीषु च।
उत्पाता ये तथा भाग्ये आग्नेयीं तेषु कारयेत्॥
तृतीये दिनयामे च रात्रौ च रविनन्दन।
रोहिण्यां वैष्णवे ब्राह्मे वासवे विश्वदैवते॥
ज्येष्ठायाञ्च तथा मैत्रे ये भवन्त्यद्भुताः क्वचित्।
ऐन्द्री तेषु प्रयोक्तव्या महाशान्तिः कुलोद्वह॥
चतुर्थे दिनयामे च रात्रौ च रविनन्दन।
सार्पे पौष्णे तथार्द्रायामहिर्बुध्ने च दारुणे॥

मूले वरुणदैवत्ये ये भवन्त्यद्भुतास्तथा।
वारुणी तेषु कर्त्तव्या महाशान्तिर्मनीषिता॥
भिन्नभक्षलवेलासु ये भवन्त्यद्भुताः क्वचित्।
शान्तिः शान्तिरियं कार्य्यं निमित्ते सति नान्यथा।
निर्निमित्तकृता शान्तिर्निमित्तमुपजायते॥

बाणप्रहारा न भवन्ति यद्व-
द्राजन्नृणां सन्नाहनैर्युतानां।
दैवोपघाता न भवन्ति तद्व-
द्धर्मात्मनां शान्तिपरायणानां॥

मनुरुवाच।

अद्भुतानां फलं देव शमनञ्च तथा वद।
त्वं हि वेत्सि विशालाक्ष श्रेयं सर्व्वमशेषतः॥

मत्स्य उवाच।

अत्र ते वर्णयिष्यामि यदुवाच महातपाः।
अत्रि मे वृद्धगर्गस्तु सर्व्वधर्म्मभृतांवर॥
सरस्वत्यां समासीनं गार्गं पार्थिवनन्दन।
पप्रच्छेति महातेजा गर्गो मुनिवरप्रियः॥

अत्रिरुवाच।

पश्यतां पूर्व्वरूपाणि जनानां कथयस्व मे।
नगराणां तथा राज्ञां त्वं हि सर्व्वविदुच्यते॥

गर्ग उवाच।

पुरुषापचारनियमाद्पराध्यन्ति देवताः।
ततोपराधाद्देवानामुपसर्गः प्रवर्त्तते॥

दिव्यान्तरिक्षं भौमञ्च त्रिविधं परिकीर्त्तितं।
ग्रहर्क्षवैकृतं दिव्यमान्तरिक्षं निबोध मे॥
उल्कापातो दिग्दाहः परिवेशस्तथैव च।
गन्धर्वनगरञ्चैव वृष्टिश्च विकृता च या।
एवमादीनि लोकेऽस्मिन् आकाशानि विनिर्द्दिशेत्॥
चरस्थिरभवं भौमं भूकम्पमपि भूमिजं।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितं॥
भौमञ्चाल्पफलं ज्ञेयं चिरेण परिपच्यते।
नभसं मध्यफलदं मध्यकालफलं द्रुतं॥
अद्भुते तु समुत्पन्ने यदि वृष्टिः शिवा भवेत्।
सप्ताहाभ्यन्तरे ज्ञेयमशुभं निष्फलं भवेत्॥
अद्भुतस्य विपाकश्चेद्विना शान्त्या न दृश्यते।
त्रिभिर्वर्षैस्तु तद्भव्यं सुमहद्भयकारकं॥
राज्ञः शरीरे लोके च पुरे दारे पुरोहिते।
पाकमायाति पुत्रेषु तथा वै कोशवाहने॥
ऋतुस्वभावाद्राजेन्द्र भवन्त्यद्भुतसंश्रिताः।
शुभावहाश्च विज्ञेयास्तांस्त्वं मे वदतः शृणु॥
वज्राशनि-महीकम्प-सन्ध्यानिर्घात-निःस्वनाः।
परिवेषरजोधूम-रक्तार्कास्तमनोदयाः॥
द्रुमेभ्योऽथ रसस्नेहो बहुशस्यफलोद्गमाः(१)।
गोपक्षिमदवृद्धिश्च शुभानि(२) मधुमाधवे॥

---

(१) मधुपुष्पफलोद्गमा इति क्वचित् पाठः।
(२) शिवाय इति पुस्तकान्तरे पाठः।

तारोल्कापातकलुषं कपिलार्केन्दुमण्डलं ।
अनग्निज्वलनं स्फोटं धूमदिव्यानिलाहतं(१) ॥
रक्तपद्मारुणा सन्ध्या नभः क्षुब्धार्णवोपमं ।
सरितास्वाम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ॥
शक्रायुधपरिवेशौ विद्युच्छुष्कविरोहणं ।
कम्पोद्वर्त्तनवैकृत्यं रसनं दरणं क्षितेः ॥
नद्युदपानसरसां वृद्ध्यर्थाभरणप्लवाः ।
शीर्षाणि वारिरोधानां वर्षासु शुभदानि च(२) ॥
दिव्यस्त्रीरूपगन्धर्वविमानाद्भुतदर्शनं(३) ।
ग्रहनक्षत्रताराणां दर्शनं वागमानुषो(४) ॥
गीतवादित्रनिर्घोषो वनपर्व्वतसानुषु ।
शस्यवृद्धीरसोत्पत्तिः शरत्काले शुभाः स्मृताः(५) ॥
शीतानिलतुषारत्वं नन्दनं मृगपक्षिणां ।
रक्षोयक्षादिसत्त्वानां दर्शनं वागमानुषी ॥
दिशो धूमान्धकाराश्च शलभा वनपर्वताः ।
उच्चैः सूर्योदयास्तत्वं हेमन्ते शोभनाः स्मृताः ॥
हिमपाताविलोत्पातविरूपाद्भुतदर्शनं ।
दृष्ट्वाञ्जनाभमाकाशन्तारोल्कापातपिञ्जरं ॥

---

(१) धूमरेणुभिराकुलमिति वा पाठः ।
(२) पतनवाद्रिभेदानां वर्षासु च प्रभावमिति वा पाठः ।
(३) दिव्यस्त्रीभूतगन्धर्वविमानाद्भुतदर्शनमितिपाठान्तरं ।
(४) दर्शनन्तु दिवाम्बरे इति क्वचित् पाठः ।
(५) चापापाः शरदि स्मृता इति वा पाठः ।

चित्रागर्भोद्भवाःस्त्रीषु गोजाश्वमृगपक्षिणां।
पत्राङ्कुरलतानाञ्च विकाराः शिशिरे शुभाः॥
ऋतुस्वभावेन विनाद्भुतस्य
जातस्य दृष्टस्य तु शीघ्रमेतत्।
कृतागमा शान्तिरनन्तरन्तु
कार्य्या यथोक्ता वसुधाधिपेन॥

इत्यद्भुतशान्तौ चौत्पातिकं।

———000———

गर्ग उवाच।

देवतार्चाः प्रनृत्यन्ति वेपन्ते प्रज्वलन्ति च।
आरटन्ति च रोदन्ति प्रतिष्ठन्ति हसन्ति च॥
उत्पतन्ति निषीदन्ति प्रधावन्ति वसन्ति च।
भुञ्जतो विक्षिपन्ते वा शाकप्रहरणध्वजान्॥
अवाङ्मुखा वा तिष्ठन्ति स्थानात्स्थानं भ्रमन्ति च।
वमन्त्यग्निं तथाधूमं स्नेहरक्ते तथा वसां।
एवमादीनि दृश्यन्ते विकाराः सहसोत्थिताः॥
लिङ्गायतनचैत्येषु तत्र वासं न रोचयेत्।
राज्ञो वा मरणं तत्र स वा देशो विनश्यति॥
देवयात्रासु चोत्पातान् दृष्ट्वा देशभयं वदेत्।
पितामहस्वधर्म्मेषु तत्र वासं न रोचयेत्॥
वसूनां वह्निजं ज्ञेयं नृपाणां लोकपालजं।

ज्ञेयं सेनापतीनाञ्च यस्मात् स्कन्दशिवात्मजं ॥
लोकानां विष्णुवार्युन्द्रं विश्वकर्म्मसमुद्भवं ।
विनायकाद्भव ज्ञेयं गणानाञ्चैव नायक ॥
देवदेव नृपश्रेष्ठ देवस्त्रीषु नृपस्त्रियः ।
वास्तुदेवेषु विज्ञेयं गृहाणामेव नान्यथा ॥
देवतार्चाविकारेषु श्रुतिवित्ता पुरोहितः ।
देवतार्चान्तु गत्वा वै तांस्तामाच्छाद्य भूषयेत् ॥
पूजयेत्तां महाभाग गन्धमाल्यान्नसम्पदा ।
मधुपर्केण विधिवदुपतिष्ठेदनन्तरं ॥
तस्मिङ्गार्च्चनमात्रेण स्थालीपाकं यथाविधि ।
पुरोधा जुहुयाद्दक्षो सप्तरात्रमतन्द्रितः ॥

विप्राश्च पूज्या मधुरान्नपानैः
सदक्षिणैः सप्तदिनं द्विजेन्द्र ।
प्राप्तेऽष्टमे च क्षितिगोप्रदानैः
सकाञ्चनैः शान्तिमुपैति पापं ॥

इत्यद्भुतशान्तौ अर्चाविकृतोपशमनं ।

गर्ग उवाच ।

अनग्निर्दीप्यते यत्र राष्ट्रे भृशमतिस्वरः ।
न दीप्यते चेन्धनवान् स राष्ट्रः पीड्यते नृप
प्रज्वलेद्द्रुमं यत्र तथाद्रेस्त्वा कथञ्चन ।
प्रासादतोरणद्वारं नृपवेश्मसुरालयं ।

एतानि यत्र दृश्यन्ते तत्र राजभयं भवेत्॥
विद्युता वा प्रदृश्यन्ते तत्रापि नृपतेर्भयं।
अनैशानि तमांसि स्युः विशालमुपपद्यते।
धूमश्चानग्निजो यत्र तत्र विद्यान्महद्भयं॥
तड़िद्विनाभ्रे गगने भयं स्याद्वृष्टिवर्जिते।
दिवा सतारे गगने तथैव भयमादिशेत्॥
विकारश्चायुधानां स्यात्तत्र संग्राममादिशेत्।
त्रिरात्रोपोषितस्तत्र पुरोधाः सुसमाहितः।
समिद्भिः क्षीरवृक्षाणां सर्षपैश्च घृतेन च॥

दद्यात्सुवर्णञ्च तथा द्विजेभ्यो
गाश्चैव वस्त्राणि तथा भुवञ्च।
एवं कृते पापमुपैति नाशं
यदग्निवैकृत्यभव द्विजेन्द्र॥

इत्यद्भुतशान्तौ अग्निवैकृत्यं।

गर्ग उवाच।

पुरेषु येषु दृश्यन्ते पादपा दैवचोदिताः।
वदन्तो वा हसन्तो वा स्रवन्तो वा रसं बहु॥
प्ररोहा वा विना बाधं शाखा मुञ्चन्त्यसंक्रमं।
फलं पुष्पन्तथाकालं दर्शयन्ति शाखावनाः॥
पूर्व्वावस्थान्दर्शयन्ति फलं पुष्पं तथाभवं।
क्षीरं स्नेहं सुरां रक्तं मधु तोयं स्रवन्ति वा॥

पुष्पन्त्यरोगाः सहसा शुष्कं रोहन्ति वा पुनः ।
उत्तिष्ठन्तीह पतिताः पतन्ति च तथोत्थिताः ॥
तत्र वक्ष्यामि ते ब्रह्मन् विपाकफलमेव च ।
रोदने व्याधिमभ्येति हसने देशविभ्रमं ॥
शाखाप्रपातने कुर्य्यात् संग्रामे योद्धपातनं ।
बालानां मरणं कुर्य्यात् बालानां फलपुष्पतः ॥
स्वराष्ट्रभेदं कुरुते फलपुष्पमनन्तरं ।
स्रयं सर्व्वत्र गोक्षीरं स्नेहं दुर्भिक्षलक्षणं ॥
शुष्केषु संप्रहारेषु वीर्य्यमन्नं न रोहति ।
पर्व्वतानां महाराजभयं भेदकरम्भवेत् ॥
स्थानात् स्थानन्तु गमने देशभङ्गं तथादिशेत् ॥
जल्पत्स्वपि च वृक्षेषु रोदते वा धनक्षयं ॥
एतत्पूजितवृक्षेषु सर्व्वराशौऽपि पच्यते ।
पुष्पैः फलैश्चाधिकृते राज्ञो मृत्युस्तथादिशेत् ॥
अन्येषु चैव वृक्षेषु वृक्षोत्पातेष्वतन्द्रितः ।
आच्छादयित्वा तं वृक्षं गन्धमाल्यैर्विभूषयेत् ॥
वृक्षोपरि तथाच्छत्रं कुर्य्यात्पापप्रशान्तये ।
शिवमभ्यर्च्चयेद्देवं पशुश्चास्मै निवेदयेत ।
मूलेभ्य इति षड्भीमान् कृत्वा रुद्रं जपेत्ततः ॥

मध्वाज्ययुक्तेन तु पायसेन
संपूज्य विप्रांश्च भवश्च दद्यात ।
गीतेन नृत्येन तथार्च्चनेन
देवं हरं पापविनाशहेतोः ॥

इत्यद्भुतसागरे वृक्षोत्पातशमन ।

(१२८)

गर्ग उवाच।

अतिवृष्टिरनावृष्टिर्दुर्भिक्षादिभयं मतं।
अनृतौ तु दिनादूर्ध्वं वृष्टिर्ज्ञेया भयाय तु॥
अनभ्रे विद्युता चैव विज्ञेया राजमृत्यवे।
शीतोष्णताविपर्य्यासे ऋतूनां रिपुजभयं॥
शोणितं वर्षते यत्र तत्र शस्त्रभयं भवेत्।
अङ्गारपांशुवर्षेषु नगरं संविनश्यति।
मज्जास्थिस्नेहमांसानां जनमारभयं भवेत्॥

गर्ग उवाच।

प्रविशन्ति यदा ग्राममारण्यमृगपक्षिणः।
अरण्यं यान्ति वा ग्राम्याः स्थलं यान्ति जलोद्भवाः॥
स्थलजा वा जले यान्ति घोरं वा सन्ति निर्भयाः।
राजद्वारे पुरद्वारे शिवा वाप्यशिवप्रदाः॥
दिवा रात्रिचरा वापि रात्रौ वापि दिवाचराः।
ग्राम्यास्त्यजन्ति ग्रामं वा तस्योत्पातं विनिर्दिशेत्॥
दीप्ता वा सन्ति सन्ध्यास्तु मण्डलानि च कुर्व्वते।
रसन्ते विप्रियं यत्र तदा प्रेतफलं लभेत्॥
प्रदोषे कुक्कुटावासो हेमन्ते वापि कोकिलः।
अर्कोदयेऽर्काभिमुखो शिवा यमभयं वदेत्॥
गृहं कपोतः प्रविशेत् क्रव्यादा मूर्ध्नि लीयते।
मधु वाऽमक्षिका कुर्य्यात् मृत्युर्गृहपतेर्भवेत्॥
प्राकारद्वारगेहेषु तोरणापणवीथिषु।
केतुच्छत्रायुधाद्येषु क्रव्यात् संपतते यदि॥

जायन्ते वाथ वाल्मीका मधु वा स्यन्दते यदि।
प्रदेशो नाशमायाति राजा च म्रियते तदा॥
मूषिकान् शलभान् दृष्ट्वा प्रभूतं तु भयं भवेत्।
काष्ठोलूकास्थिशृङ्गास्याः श्वानो मरकवेदिनः॥
दुर्भिक्षवेदना ज्ञेयाः काका धान्यमुषो यदि।
जना अभिभवन्ति स्म निर्भया रणवेदिनः॥
काको मैथुनयुक्तश्च श्वेतः स यदि दृश्यते।
राजा वा म्रियते तत्र तदा देशो विनश्यति॥
उलूको वसते यत्र निपतेद्वा तथा गृहे।
ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च॥
मृगपक्षिविकारेषु कुर्याद्धोमं सदक्षिणं।
देवाः कपोत इति च जप्तव्यं पञ्चभिर्द्विजैः॥
सुदेव इति चैकेन देया गावः सदक्षिणाः।
जपेच्छाकुनसूक्तञ्च मनोवेदशिरांसि च॥
देवाः कपोतादयो मन्त्रा ऋग्वेदे प्रसिद्धाः।

गावश्च देया विधिवत् द्विजानां,
सकाञ्चना वस्त्रयुगोत्तरीयाः।
एवं कृते शान्तिमुपैति पापं
मृगैर्द्विजैर्वा विनिवेदितं यत्॥

इत्यद्भुतशान्तौ मृगपक्षिवैकृतोपशमनं।

गर्ग उवाच।

प्रासादतोरणच्छादं द्वारं प्राकारवेश्मनां।

अनिमित्तन्तु पतितं दृष्टानां राजमृत्यवे ॥
रजसा वाप्यधूमेन दिशो यत्र समाकुलाः।
आदित्यचन्द्रताराश्च विवर्णा भयवृद्धये ॥
राक्षसा यत्र दृश्यन्ते ब्राह्मणाश्च विधर्मिणः।
ऋतवस्तु विपर्य्यस्ता अपूज्यं पूजयेज्जनः।
नक्षत्राणि वियोगानि तस्माद्भयलक्षणं ॥
केतूदयोपरागे च छिद्रता शशिसूर्य्ययोः।
फलं पुष्पं तथा धान्यं हिरण्याभरणानि च ॥
पांशुजन्तु(१) फलानाञ्च वर्षणे रोगजम्भयं।
छिद्रस्यातिप्रवर्षायां शस्यानां प्रीतिवर्द्धनं ॥
विरजस्के रवावभ्रे यदा च्छाया न दृश्यते।
दृश्यते न प्रदीपे वा तत्र देशभयं भवेत् ॥
निरभ्रे वापि रात्रौ वा श्वेतं याम्योत्तरेण च।
इन्द्रायुधं तथा दृष्ट्वा उल्कापातं तथैव च ॥
दिग्दाहपरिवेषौ च गन्धर्वनगरन्तथा।
परचक्रभयं ब्रूयाद्देशोपद्रवमेव च ॥
सूर्य्येन्दुपर्जन्यसमीरणानां
होमस्तु कार्य्यो विधिवद्द्विजेन्द्रैः।
धान्यानि गोकाञ्चनदक्षिणाश्च
देया द्विजानामघनाशहेतोः ॥

इत्यद्भुतशान्तौ वृष्टिवैकृतप्रशमनं।

---

१ पवनेति क्वचित् पुस्तके पाठः।

गर्ग उवाच ।

नगरादपसर्पन्ते समीपमुपयान्ति वा ।
नद्यो ह्रदप्रस्रवणा विरसा हि भवन्ति च ॥
विवर्णकलुषं तप्तं फेनवज्जन्तु सङ्कुलं ।
क्षीरस्नेहसुरारक्तं वहन्ते वहुलोदकाः ।
षण्मासाभ्यन्तरे तत्र परचक्रभयं भवेत् ॥
जलाशया नदन्ते च प्रज्वलन्ति कम्पन्ति वा ।
विजल्पन्तेऽतिजिह्माश्च ज्वालाधूम सृजन्ति च ॥
अखाते वा जलोत्पातः समर्था वा जलाशयाः ।
सगीतशब्दा दृश्यन्ते जनमारोऽत्र सम्भवेत् ॥
दिव्याश्चोगोभयं सर्पिर्मधुनाथावसेचन ।
जपश्च वारुणा मन्त्रास्तैस्तु होमा जले भवेत् ॥
मध्वाज्ययुक्तं परमान्नमत्र
देयं द्विजानां द्विजभोजनार्थं ।
गावश्च देयाः सितवस्त्रयुक्ता-
स्तथोदकुम्भाः सकलाश्चगान्तं ।'

इत्यद्भुतशान्तौ सलिलाशयवैकृत ।

——०००——

गर्ग उवाच ।

अकालप्रसवा नार्यः कालातीतप्रजास्तथा ।
विकृतप्रसवाश्चैव युग्मप्रसवनास्तथा ॥
अमानुषाश्च षण्डाश्च सञ्जाता व्यञ्जनास्तथा ।

हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा नयः॥
पशवः पक्षिणश्चैव तथैव च सरीसृपाः।
विनाशन्तस्य देशस्य कुलस्य च विनिर्दिशेत्॥
निर्वासयेत्तां नृपतिश्च राष्ट्रात्
स्त्रियश्च पूज्याश्च ततो द्विजेन्द्राः।
यदृच्छकैर्ब्राह्मणतर्पणाश्च
लोके ततः शान्तिमुपैति पापं।

इति वैकृतशान्तौ प्रसववैकृतं।

———000———

गर्ग उवाच।

यान्ति यानान्ययुक्तानि युक्तान्यपि न यान्ति चेत्
चोद्यमानानि तत्र स्यात् महद्भयसमुत्थितं॥
वाद्यमाना न वाद्यन्ते वाद्यन्ते वाद्यनाहताः।
अचलाश्च चलन्तोव न चलानि चलन्ति च।
उपस्करादिविकृते चारं शस्त्रभयं भवेत्।
वायोस्तु पूजा द्विजपुङ्गवैश्च
कृत्वा तदुक्तांश्च जपेश्च मन्त्रान्।
दद्यात् प्रभूतं परमाचमन्नं
सदक्षिणन्तेन शमोऽस्य भूपतेः॥

इत्युपस्करवैकृतोपशमः।

———000———

यदृच्छविकृतिर्यत्र तत्रापि भयमादिशेत्।
स्त्रियश्च कलहायन्ते बाधा निघ्नन्ति बालकान्॥
क्रियाणामुचितानाञ्च विस्मृतिर्यत्र दृश्यते।
अग्निर्यत्र न दीप्येत हूयमानासु शान्तिषु॥
पिपीलिकाश्च क्रव्यादा यान्ति वाऽन्तर्हितास्ततः।
पूर्णकुम्भाः स्रवन्ते च हविर्वा विप्रलुप्यते॥
मङ्गल्याः स्वामिनो यत्र न शृण्वन्ति समन्ततः।
वेपथुर्बाधते वापि प्रोत्साहे सति निन्दितः(१)॥
न च देवेषु वर्त्तन्ते यथावद्ब्राह्मणेषु च।
मन्दघोषाणि वाद्यानि वाद्यन्ते विस्वराणि च॥
गुरुमित्रद्विषो यत्र शत्रुपूजारता जनाः।
ब्राह्मणान् सुहृदोमान्यान् जनो यत्रावमन्यते॥
शान्तिमङ्गलहोमेषु नास्तिको यत्र जायते।
राजा वा म्रियते यत्र सर्व्वदेशो विनश्यति॥
राज्ञो विनाशे संप्राप्ते निमित्तानि निबोध मे।
ब्राह्मणान् प्रथमं द्वेष्टि ब्राह्मणांश्च विनिन्दति॥
ब्राह्मणानवमन्येत ब्राह्मणांश्च जिघांसति।
न तान् स्मरति कृत्येषु याचितश्चावसीयते॥
नमनञ्च नचापिश्च प्रशंसां नाभिनन्दति।
अपूर्व्वन्तु करं लोभात्तथा सम्मोहिते जने॥

---

१ प्रवर्त्ति स्ववर्त्ति इति क्वचित् पाठः।

एतांश्चाभ्यर्चयेत् सम्यक् सपत्नीकान् द्विजोत्तमान्।
भोज्यानि चैव कार्य्याणि सुराणां बलयस्तथा॥

गावश्च देया द्विजपुङ्गवेभ्यो
भूवस्तथा काञ्चनमम्बरञ्च।
होमश्च कार्य्यो द्विजपूजनञ्च
एवं कृते शान्तिमुपैति पापं॥

इति मत्स्यपुराणोक्तान्यद्भुतशान्तिकानि समाप्तानि।

इति श्रीमहाराजाधिराज-श्रीमहादेवस्य समस्तकरणाधीश्वर-सकलविद्याविशारद-श्रीहेमाद्रिविरचिते चतुर्व्वर्गचिन्तामणौ व्रतखण्डे अद्भुतशान्तिकानि समाप्तानि।

ASIATIC SOCIETY CALCUTTA

ASIATIC SOCIETY, CALCUTTA